।। कोबातीर्थमंडन श्री महावीरस्वामिने नमः ।।

।। अनंतलब्धिनिधान श्री गौतमस्वामिने नमः ।। ।। गणधर भगवंत श्री सुधर्मास्वामिने नमः ।।

।। योगनिष्ठ आचार्य श्रीमद् बुद्धिसागरसूरीश्वरेभ्यो नमः ।। ।। चारित्रचूडामणि आचार्य श्रीमद् कैलाससागरसूरीश्वरेभ्यो नमः ।।

आचार्य श्री कैलाससागरसूरि ज्ञानमंदिर

पुनितप्रेरणा व आशीर्वाद

राष्ट्रसंत श्रुतोद्धारक आचार्यदेव श्रीमत् पद्मसागरसूरीश्वरजी म. सा.

जैन मुद्रित ग्रंथ स्केनिंग प्रकल्प

ग्रंथांक : १

श्री महावीर जैन आराधना केन्द्र

आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
कोबा, गांधीनगर-श्री महावीर जैन आराधना केन्द्र
आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
कोबा, गांधीनगर-३८२००७ (गुजरात)
(079) 23276252, 23276204
फेक्स : 23276249
Websiet : www.kobatirth.org
Email : Kendra@kobatirth.org

शहर शाखा

आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
शहर शाखा
आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
त्रण बंगला, टोलकनगर
परिवार डाइनिंग हॉल की गली में
पालडी, अहमदाबाद – ३८०००७
(079) 26582355

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीभगवद्रामानुजविरचिते

श्रीशारीरकमीमांसाभाष्ये

द्वितीयो भागः.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीभगवद्रामानुजविरचिते
श्रीशारीरकमीमांसाभाष्ये
द्वितीयो भागः

अयं च
श्रीशैलाद्रिङ्कि लक्ष्मीनरसिंहकुमार कुमारतातार्य
कविभूषणस्वामिभिः प्रत्यवेक्षितः



अ. वी. नरसिंहाचार्यैः, ति. वि. चे. नरसिंहाचार्यैश्च
परिशोधितः

आर्. वेङ्कटेश्वरसभाधिकारिभिः आनन्दमुद्रायन्त्रालये
पराङ्कुशयतिवरादिगुरुपरम्पराब्देषु ५०१२ तम
साधारणसंवत्सरापाढशुद्धपञ्चम्यां बहिः प्रकाशितश्च
विजयतेतराम् ॥

१९१०.

Copy-right Reserved.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीः.

श्रीशारीरकमीमांसाभाष्यवेदान्तसारदीपानां द्वितीयप्रभृत्यध्यायत्रयस्य अधिकरणानां सूची ॥

अधिकरणानि.	शारीरकमीमांसाभाष्ये		वेदान्तसारे		वेदान्तदीपे	
	आरम्भ.	समाप्ति.	आरम्भ	समाप्ति.	आरम्भ.	समाप्ति.
२. अ. प्रथमपादे.						
स्मृत्यधिकरणम्	१	५	५	५	५	६
योगप्रत्युक्त्यधिकरणम्	६	६	७	७	७	७
विलक्षणत्वाधिकरणम्	७	१७	१७	१८	१८	२०
शिष्टापरिग्रहाधिकरण-	२१	२१	२१	२१	२१	२१
भोक्रापत्त्यधिकरणम्	२२	२४	२४	२४	२४	२४
आरम्भणाधिकरणम्	२५	४९	४९	४९	५०	५१
इतरव्यपदेशाधिकरण-	५१	५४	५५	५५	५५	५७
उपसंहारदर्शनाधिक-	५७	५८	५८	५८	५८	५९
कृत्स्नप्रसक्त्यधिकरणम्	५९	६२	६२	६३	६४	६४
प्रयोजनवत्त्वाधिकरण-	६४	६७	६७	६८	६८	६९
२. अ. द्वितीयपादे.						
रचनानुपपत्त्यधिकरण-	७०	८०	८०	८१	८१	८३
महद्दीर्घाधिकरणम्	८४	८७	८७	८८	८८	८९
समुदायाधिकरणम्	८९	९६	९६	९८	९८	१००
उपलब्ध्यधिकरणम्	१०१	१०२	१०३	१०३	१०३	१०४
सर्वथानुपपत्त्यधिकरण	१०४	१०५	१०५	१०५	१०५	१०६
एकस्मिन्नसम्भवाधि-	१०६	१०९	१०९	१०९	११०	१११
पशुपत्यधिकरणम्	१११	११४	११४	११४	११४	११५
उत्पत्त्यसम्भवाधिकर-	११५	१२१	१२१	१२१	१२२	१२२
२. अ. तृतीयपादे.						
वियदधिकरणम्	१२३	१२६	१२६	१२७	१२७	१२९
तेजोधिकरणम्	१२९	१३३	१३३	१३४	१३४	१३६
आत्माधिकरणम्	१३६	१३९	१३९	१३९	१३९	१३९
ज्ञाधिकरणम्	१३९	१४६	१४६	१४८	१४८	१५१
कर्त्राधिकरणम्	१५१	१५४	१५४	१५४	१५५	१५५
परायत्ताधिकरणम्	१५६	१५७	१५७	१५८	१५८	१५८
अंशाधिकरणम्	१५८	१६४	१६४	१६५	१६६	१६८
२. अ. चतुर्थपादे.						
प्राणोत्पत्त्यधिकरणम्	१६९	१७१	१७१	१७१	१७१	१७२
सप्तगत्यधिकरणम्	१७२	१७३	१७३	१७४	१७४	१७४
प्राणाणुत्वाधिकरणम्	१७५	१७५	१७६	१७६	१७६	१७६

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अधिकरणानि.	शारीरकमीमांसाभाष्ये		वेदान्तसारे		वेदान्तदीपे.	
	आरम्भ.	समाप्ति.	आरम्भ.	समाप्ति.	आरम्भ.	समाप्ति.
वायुक्रियाधिकरणम्	१७६	१७८	१७८	१७९	१७९	१८०
श्रेष्ठाणुत्वाधिकरणम्	१८०	१८०	१८१	१८१	१८१	१८१
ज्योतिराद्यधिष्ठानाधि-	१८१	१८२	१८२	१८२	१८३	१८३
इन्द्रियाधिकरणम्	१८३	१८४	१८४	१८४	१८४	१८५
संज्ञामूर्तिकप्त्यधिकर-	१८५	१८९	१८९	१९०	१९०	१९१
३. अ. प्रथमपादे.						
तदन्तरप्रतिपत्त्यधिक-	१९३	१९८	१९८	१९९	१९९	२०१
कृतात्ययाधिकरणम्	२०१	२०४	२०४	२०४	२०४	२०५
अनिष्टादिकार्यधिकर-	२०५	२०९	२०९	२१०	२१०	२१२
तत्स्वाभाव्यापत्त्यधिक-	२१२	२१३	२१३	२१३	२१३	२१३
नातिचिराधिकरणम्म्	२१३	२१४	२१४	२१४	२१४	२१४
अन्याधिष्ठिताधिकर-	२१४	२१७	२१७	२१७	२१८	२१८
३. अ. द्वितीयपादे.						
सन्ध्याधिकरणम्	२१९	२२२	२२२	२२३	२२३	२२४
तदभावाधिकरणम्	२२४	२२५	२२५	२२५	२२६	२२६
कर्मानुस्मृतिशब्दवि -	२२६	२२७	२२७	२२७	२२७	२२८
मुग्धाधिकरणम्	२२८	२२८	२२८	२२८	२२८	२२९
उभयलिङ्गाधिकरणम्	२२९	२३८	२३८	२४१	२४१	२४५
अहिकुण्डलाधिकरणम्	२४५	२४७	२४७	२४८	२४८	२४९
पराधिकरणम्	२४९	२५३	२५३	२५४	२५४	२५७
फलाधिकरणम्	२५७	२५९	२५९	२६०	२६०	२६१
३. अ. तृतीयपादे.						
सर्ववेदान्तप्रत्ययाधि-	२६२	२६४	२६५	२६५	२६५	२६६
अन्यथात्वाधिकरणम्	२६६	२७०	२७०	२७१	२७१	२७२
सर्वाभेदाधिकरणम्	२७३	२७४	२७४	२७४	२७५	२७५
आनन्दाद्यधिकरणम्	२७५	२७९	२७९	२८०	२८०	२८१
कार्याख्यानाधिकरणम्	२८१	२८२	२८२	२८३	२८३	२८३
समानाधिकरणम्	२८४	२८४	२८४	२८४	२८५	२८५
सम्बन्धाधिकरणम्	२८५	२८६	२८६	२८७	२८७	२८७
सम्भृत्यधिकरणम्	२८७	२८८	२८८	२८८	२८९	२८९
पुरुषविद्याधिकरणम्	२८९	२९०	२९०	२९१	२९१	२९१
वेधाद्यधिकरणम्	२९१	२९३	२९३	२९३	२९३	२९३
हान्यधिकरणम्	२९३	२९५	२९५	२९६	२९६	२९७
साम्परायाधिकरणम्	२९७	३००	३००	३०१	३०१	३०३

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अधिकरणानि.	शारीरकमीमांसाभाष्ये		वेदान्तसारे		वेदान्तदीपे.	
	आरम्भ.	समाप्ति	आरम्भ.	समाप्ति.	आरम्भ.	समाप्ति.
अनियमाधिकरणम्	३०३	३०४	३०४	३०४	३०४	३०५
अक्षरध्यधिकरणम्	३०५	३०७	३०७	३०७	३०८	३०८
अन्तरत्वाधिकरणम्	३०९	३१४	३१४	३१५	३१५	३१६
काम्याद्यधिकरणम्	३१६	३१९	३२०	३२०	३२०	३२२
तन्निर्धारणानियमाधि-	३२२	३२३	३२३	३२३	३२३	३२४
प्रदानाधिकरणम्	३२४	३२४	३२५	३२५	३२५	३२५
लिङ्गभूयस्त्वाधिकरण-	३२५	३२७	३२७	३२७	३२७	३२८
पूर्वविकल्पाधिकरणम्	३२८	३३२	३३२	३३३	३३३	३३५
शरीरेभावाधिकरणम्	३३५	३३७	३३७	३३७	३३७	३३८
अङ्गावबद्धाधिकरणम्	३३८	३३९	३३९	३४०	३४०	३४०
भूमज्यायस्त्वाधिकरण	३४०	३४२	३४३	३४३	३४३	३४४
शब्दादिभेदाधिकर	३४४	३४५	३४५	३४५	३४५	३४५
विकल्पाधिकरणम्	३४६	३४७	३४७	३४७	३४७	३४८
यथाश्रयभावाधिकरण	३४८	३५१	३५१	३५१	३५२	३५३
३. अ. चतुर्थपादे.						
पुरुषार्थाधिकरणम्	३५४	३६४	३६४	३६६	३६६	३७०
स्तुतिमात्राधिकरणम्	३७०	३७१	३७१	३७१	३७२	३७२
पारिप्लवाधिकरणम्	३७२	३७३	३७३	३७३	३७३	३७३
अग्नीन्धनाधिकरणम्	३७४	३७४	३७४	३७४	३७४	३७५
सर्वापेक्षाधिकरणम्	३७५	३७६	३७६	३७६	३७६	३७६
शमदमाद्याधिकरणम्	३७७	३७७	३७७	३७८	३७८	३७८
सर्वान्नानुमत्याधिकरणम्	३७८	३८०	३८०	३८०	३८१	३८१
विहितत्वाधिकरणम्	३८१	३८३	३८३	३८३	३८३	३८४
विधुराधिकरणम्	३८४	३८५	३८५	३८६	३८६	३८६
तद्भूताधिकरणम्	३८६	३८८	३८९	३८९	३८९	३९०
स्वाम्यधिकरणम्	३९०	३९१	३९१	३९२	३९२	३९२
सहकार्यन्तरविध्यधिक-	३९२	३९५	३९५	३९५	३९५	३९६
अनाविष्काराधिकर-	३९६	३९७	३९७	३९७	३९७	३९७
ऐहिकाधिकरणम्	३९८	३९८	३९८	३९८	३९८	३९९
मुक्तिफलाधिकरणम्	३९९	३९९	४००	४००	४००	४००
४. अ. प्रथमपादे.						
आवृत्त्यधिकरणम्	४०१	४०२	४०३	४०३	४०३	४०४
आत्मत्वोपासनाधिक-	४०४	४०५	४०५	४०६	४०६	४०६
प्रतीकाधिकरणम्	४०७	४०७	४०८	४०८	४०८	४०८

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अधिकरणानि.	शारीरकमीमांसाभाष्ये		वेदान्तसारे		वेदान्तदीपे	
	आरम्भ.	समाप्ति.	आरम्भ.	समाप्ति.	आरम्भ.	समाप्ति.
आदित्यादिमत्यधिक-	४०८	४०९	४०९	४०९	४०९	४०९
आसीनाधिकरणम्	४०९	४११	४११	४११	४११	४१२
आप्रयाणाधिकरणम्	४१२	४१२	४१२	४१२	४१२	४१३
तदधिगमाधिकरणम्	४१३	४१५	४१५	४१५	४१५	४१५
इतराधिकरणम्	४१५	४१६	४१६	४१६	४१६	४१६
अनारब्धकार्याधिकर-	४१६	४१७	४१७	४१७	४१७	४१७
अग्निहोत्राद्यधिकरणम्	४१८	४१९	४१९	४९९	४१९	४२०
इतरक्षपणाधिकरणम्	४२०	४२१	४२१	४२१	४२१	४२२
४. अ. द्वितीयपादे.						
वागधिकरणम्	४२३	४२४	४२४	४२४	४२४	४२५
मनोधिकरणम्	४२५	४२५	४२५	४२५	४२६	४२६
अध्यक्षाधिकरणम्	४२६	४२७	४२७	४२७	४२७	४२७
भूताधिकरणम्	४२७	४२८	४२८	४२८	४२८	४२९
आसृत्युपक्रमाधिकर-	४२९	४३३	४३३	४३४	४३४	४३५
परसम्पत्त्यधिकरणम्	४३६	४३६	४३६	४३६	४३६	४३७
अविभागाधिकरणम्	४३७	४३७	४३७	४३७	४३८	४३८
तदोकोधिकरणम्	४३८	४३९	४३९	४३९	४३९	४४०
रश्म्यनुसाराधिकरणम्	४४०	४४१	४४१	४४१	४४१	४४१
निशाधिकरणम्	४४१	४४२	४४२	४४२	४४२	४४३
दक्षिणायनाधिकरणम्	४४३	४४४	४४५	४४५	४४५	४४६
४. अ. तृतीयपादे.						
अर्चिराद्यधिकरणम्	४४७	४४९	४४९	४४९	४४९	४५०
वाय्वधिकरणम्	४५०	४५१	४५१	४५१	४५२	४५२
वरुणाधिकरणम्	४५२	४५३	४५३	४५३	४५४	४५४
आतिवाहिकाधिकरण-	४५४	४५५	४५५	४५६	४५६	४५६
कार्याधिकरणम्	४५६	४६१	४६१	४६३	४६३	४६६
४. अ. चतुर्थपादे.						
सम्पद्याविर्भावाधिकर-	४६७	४७०	४७०	४७०	४७०	४७१
अविभागेनदृष्टत्वाधि-	४७२	४७३	४७३	४७३	४७३	४७४
ब्राह्माधिकरणम्	४७४	४७६	४७६	४७६	४७७	४७७
सङ्कल्पाधिकरणम्	४७८	४७८	४७९	४७९	४७९	४७९
अभावाधिकरणम्	४८०	४८३	४८३	४८४	४८४	४८५
जगद्व्यापारवर्जाधिकर-	४८६	४९१	४९१	४९२	४९२	४९५

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीः.

श्रीशारीरकमीमांसाभाष्य
वेदान्तसार-वेदान्तदीपानां द्वितीयप्रभृत्यध्यायत्रयस्य
अकारादिक्रमेण सूत्राणां सूची ॥

सूत्राणि.	अ-सं.	पा-सं.	सू-सं.	शा-भा. पु-सं.	वे-सा. पु-सं.	वे-दी. पु-सं.
अ.						
अंशो नानाव्यपदेशादन्यथाचा-	२	३	४२	१५८	१६४	१६६
अकरणत्वाच्च न दोषस्तथा हि	२	४	१०	१७७	१७८	१७९
अक्षरधियां त्ववरोधस्तथाहि	३	३	३३	३०५	३०७	३०८
अग्निहोत्रादितु तत्कार्थायैव तद्दर्शना-	४	१	१६	४१८	४१९	४१९
अग्न्यादिगतिश्रुतिरितिचेन्न	३	१	४	१९५	१९८	२००
अङ्गावबद्धास्तु न शाखासुहि	३	३	५३	३३८	३३९	३४०
अङ्गित्वानुपपत्तेश्च	२	२	६	७७	८१	८३
अङ्गेषु यथाश्रयभावः	३	३	५९	३४८	३५१	३५२
अचलत्वं चापेक्ष्य	४	१	९	४१०	४११	४११
अणवश्च	२	४	६	१७५	१७६	१७६
अणुश्च	२	४	१२	१८०	१८१	१८१
अत एवचाग्नीन्धनाद्यनपे-	३	४	२५	३७४	३७४	३७४
अतएवचानन्याधिपतिः	४	४	९	४७८	४७९	४७९
अत एव चोपमा सूर्यकादि-	३	२	१८	२३३	२३९	२४३
अत एव सर्वाण्यनु	४	२	२	४२४	४२४	४२४
अतः प्रबोधोऽस्मात्	३	२	८	२२५	२२५	२२६
अतश्चायनेऽपि दक्षिणे	४	२	१९	४४३	४४५	४४५
अतस्त्वितरज्यायो लिङ्गा-	३	४	३९	३८५	३८६	३८६
अतिदेशाच्च	३	३	४५	३२७	३३२	३३४
अतोऽनन्तेन तथाहि लिङ्गम्	३	२	२५	२३८	२४१	२४५
अतोऽन्यापिह्येकेषामुभयोः	४	१	१७	४१८	४१९	४२०
अदृष्टानियमात्	२	३	५०	१६३	९६५	१६७
अधिकंतु भेदनिर्देशात्	२	१	२२	५२	५५	५६
अधिकारूपशब्दान्तरे-	२	३	१३	१३०	१३३	१३४
अधिकोपदेशात्तु बादरायण-	३	४	८	३५७	३६५	३६८
अधिष्ठानानुपपत्तेश्च	२	२	३६	११३	११४	११४
अध्ययनमात्रवतः	३	४	१२	३५९	३६५	३६९

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सूत्राणि.	अ-सं.	पा-सं.	सू-सं.	शा-भा. पु-सं.	वे-सा. पु-सं.	वे-दी. पु-सं.
अनभिभवं च दर्शयति	३	४	३५	३८२	३८३	३८४
अनारब्धकार्ये एव तु पूर्वे तदव-	४	१	१५	४१६	४१७	४१७
अनाविष्कुर्वन्नन्वयात्	३	४	४९	३९६	३९७	३९७
अनावृत्तिश्शब्दादनावृत्तिश्श-	४	४	२२	४९०	४९२	४९४
अनियमस्सर्वेषामविरोध-	३	३	३२	३०३	३०४	३०४
अनिष्टादिकारिणामपि च	३	१	१२	२०५	२०९	२१०
अनुज्ञापरिहारौ देहसंब-	२	३	४७	१६२	१६५	१६७
अनुबन्धादिभ्यः प्रज्ञान्तरपृ-	३	३	४८	३३०	३३२	३३४
अनुष्ठेयं बादरायणस्साम्यश्रु	३	४	१९	३६२	३६६	३७०
अनुस्मृतेश्च	२	२	२४	९४	९७	१००
अनेन सर्वगतत्वमायामश-	३	२	३६	२५२	२५४	२५६
अन्तवत्त्वमसर्वज्ञता वा	२	२	३८	११३	११४	११५
अन्तराचापि तु तद्दृष्टेः	३	४	३६	३८४	३८५	३८६
अन्तरा भूतग्रामवत्त्वात्स्वा-	३	३	३५	३०९	३१४	३१५
अन्तरा विज्ञानमनसी	२	३	१६	१३१	१३३	१३५
अन्त्यावस्थितेश्चोभयनित्य-	२	२	३४	१०९	१०९	११०
अन्यत्राभावाच्च न तृणा-	२	२	४	७६	८०	८२
अन्यथात्वं शब्दादिति चे-	३	३	६	२६६	२७०	२७१
अन्यथानुमितौ च ज्ञशक्ति-	२	२	७	७७	८१	८३
अन्याथानुमेयमिति चेदेव-	२	१	१२	१६	१८	२०
अन्याधिष्ठिते पूर्ववदभिला-	३	१	२४	२१४	२१७	२१८
अन्वयादिति चेत्स्यादवधार-	३	३	१७	२७८	२७९	२८१
अपरिग्रहाच्चात्यन्तनपेक्षा	२	२	१६	८७	८८	८९
अपिचैवमेके	३	२	१३	२३१	२३९	२४२
अपि संराधने प्रत्यक्षानुमा-	३	२	२३	२३७	२४१	२४५
अपि सप्त	३	१	१५	२०६	२०९	२१०
अपि स्मर्यते	२	३	४४	१६१	१६४	१६६
अपि स्मर्यते	३	४	३०	३८०	३८०	३८१
अपि स्मर्यते	३	४	३७	३८५	३८५	३८६
अपीतौ तद्वत्प्रसङ्गादसमञ्ज-	२	१	८	११	१७	१९
अप्रतीकालम्बनान्नयती-	४	३	१४	४६०	४६२	४६४
अबाधाच्च	३	४	२९	३७९	३८०	३८१
अभावं बादरिराह ह्येवम्	४	४	१०	४८०	४८३	४८४
अभिमानिव्यपदेशस्तु विशेषा-	२	१	५	९	१७	१९

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सूत्राणि.	अ-सं.	पा-सं.	सू-सं.	शा-भा. पु-सं.	वे-सा. पु-सं.	वे-दी. पु-सं.
अभिसंध्यादिष्वपि चैवम्	२	३	५१	१६४	१६५	१६८
अभ्युपगमेऽप्यर्थाभावात्	२	२	८	७७	८१	८३
अम्बुवदग्रहणात्तु न तथा-	३	२	१९	२३४	२४०	२४३
अरूपवदेव हि तत्प्राधान-	३	२	१४	२३१	२३९	२४२
अर्चिरादिना तत्प्रथितेः	४	३	१	४४७	४४९	४४९
अवस्थितिवैशेष्यादिति	२	३	२५	१४२	१४६	१४९
अविभागेन दृष्टत्वात्	४	४	४	४७२	४७३	४७३
अविभागो वचनात्	४	२	१५	४३७	४३७	४३८
अविरोधश्चन्दनवत्	२	३	२४	१४२	१४६	१४९
अशुद्धमिति चेन्न शब्दा-	३	१	२५	२१५	२१७	२१८
अश्मादिवच्च तदनुपपत्तिः	२	१	२३	५३	५५	५६
अश्रुतत्वादिति चेन्नेष्टादिका-	३	१	६	१९६	१९९	२००
असति प्रति शोपरोधो यौ-	२	२	२०	९२	९७	९९
असदिति चेन्न प्रतिषेध-	२	१	७	११	१७	१९
असद्व्यपदेशान्नेतिचेन्न-	२	१	१८	४७	४९	५०
असन्ततेश्चाव्यतिकरः	२	३	४८	१६३	१६५	१६७
असंभवस्तु सतोऽनुपपत्तेः	२	३	९	१२६	१२७	१२९
असार्वत्रिकी	३	४	१०	३५९	३६५	३६८
अस्तितु	२	३	२	१२४	१२६	१२८
अस्यैवचोपपत्तेरूष्मा	४	२	११	४३१	४३४	४३५
आ.						
आकाशेचाविशेषात्	२	२	२३	९३	९७	१००
आचारदर्शनात्	३	४	३	३५६	३६४	३६७
आतिवाहिकास्तल्लिङ्गात्	४	३	४	४५४	४५५	४५६
आत्मगृहीतिरितरदुत्तरात्	३	३	१६	२७८	२७९	२८१
आत्मनिचैवं विचित्राश्चहि	२	१	२८	६०	६२	६३
आत्मशब्दाच्च	३	३	१५	२७८	२७९	२८१
आत्मा प्रकरणात्	४	४	३	४६९	४७०	४७१
आत्मेति तूपगच्छन्ति ग्राह-	४	१	३	४०४	४०५	४०६
आदरादलोपः	३	३	३९	३१८	३२०	२२१
आदित्यादिमतयश्चाङ्ग	४	१	६	४०८	४०९	४०९
आध्यानाय प्रयोजनाभावात्	३	१	१४	२७७	२७९	२८०
आनन्दादयः प्रधानस्य	३	३	११	२७६	२७९	२८०
आनर्थक्यमितिचेन्न तदपे-	३	१	१०	२०३	२०४	२०५

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सूत्राणि.	अ-सं.	पा-सं.	सू-सं.	शा-भा. पु-सं.	वे-सा. पु-सं.	वे-दी. पु-सं.
आपः	२	३	११	१२९	१३३	१३४
आप्रयाणात्तत्रापिहि दृष्टम्	४	१	१२	४१२	४१२	४१२
आभास एव च	२	३	४९	१६३	१६५	१६७
आर्त्विज्यमित्यौडुलोमिस्तस्मै	३	४	४५	३९१	३९२	३९२
आवृत्तिरसकृदुपदेशात्	४	१	१	४०१	४०३	४०३
आसीनस्संभवात्	४	१	७	४०९	४११	४११
आह च तन्मात्रम्	३	२	१६	२३२	२३९	२४३
इ.						
इतरे त्वर्थसामान्यात्	३	३	१३	२७६	२७९	२८०
इतरव्यपदेशाद्धिताकरणादि-	२	१	२१	५१	५५	५५
इतरस्याप्येवमसंश्लेषः पा-	४	१	१४	४१५	४१६	४१६
इतरेतरप्रत्ययत्वादुपपन्न-	२	२	१८	९१	९७	९९
इतरेषां चानुपलब्धेः	२	१	२	४	५	६
इयदामननात्	३	३	३४	३०७	३०७	३०८
उ.						
उत्क्रान्तिगत्यागतीनाम्	२	३	२०	१४१	१४६	१४८
उत्तरोत्पादेच पूर्वनिरोधात्	२	२	१९	९१	९७	९९
उत्पत्त्यसंभवात्	२	२	३९	११५	१२१	१२२
उदासीनानामपि चैवं सिद्धिः	२	२	२६	९६	९८	१००
उपपत्तेश्च	३	२	३४	२५१	२५४	२५६
उपपन्नस्तल्लक्षणार्थोपल-	३	३	३०	२९९	३०१	३०२
उपपूर्वमपीत्येके भावमश-	३	४	४२	३८८	३८९	३९०
उपमर्दं च	३	४	१६	३६१	३६६	३६९
उपलब्धिवदनियमः	२	३	३६	१५३	१५४	१५५
उपसंहारदर्शनान्नेति चे-	२	१	२४	५७	५८	५८
उपसंहारोऽर्थाभेदाद्विधिशेषवत्समा -	३	३	४	२६४	२६५	२६६
उपस्थितेऽतस्तद्वचनात्	३	३	४०	३१९	३२०	३२१
उपादानाद्विहारोपदेशाच्च	२	३	३४	१५२	१५४	१५५
उभयथा च दोषात्	२	२	१५	८६	८८	८९
उभयथाच दोषात्	२	२	२२	९३	९७	९९
उभयथापि न कर्मातस्त-	२	२	११	८५	८७	८८
उभयव्यपदेशात्त्वहिकुण्डलवत्	३	२	२६	२४५	२४७	२४८
ऊ.						
ऊर्ध्वरेतस्सुच शब्दे हि	३	४	१७	३६१	३६६	३६९

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सूत्राणि.	अ-सं.	पा-सं.	सू-सं.	शा-भा. पु सं.	वे-सा. पु-सं	वे-दी. पु-सं.
ए.						
एक आत्मनश्शरीरे भावात्	३	३	५१	३३५	३३७	३३७
एतेन मातरिश्वा व्याख्यातः	२	३	८	१२६	१२७	१२९
एतेन योगः प्रत्युक्तः	२	१	३	६	७	७
एतेन शिष्टापरिग्रहा अ	२	१	१३	२१	२१	२१
एवं चात्माकात्स्न्यम्	२	२	३२	१०८	१०९	११०
एवमप्युपन्यासात्पूर्वभावा-	४	४	७	४७५	४७६	४७७
एवं मुक्तिफलानियमस्तदव-	३	४	५०	३९९	४००	४००
ऐ.						
ऐहिकमप्रस्तुतप्रतिबन्धे	३	४	५०	३९८	४९८	४९८
क.						
करणवच्चेन्न भोगादिभ्यः	२	२	३७	११३	११४	११५
कर्ता शास्त्रार्थवत्त्वात्	२	३	३३	१५१	१५४	१५५
कामकारेण चैके	३	४	१५	३६१	३६६	३६९
कामादीतरत्र तत्र चायतना-	३	३	३८	३१६	३२०	३२०
काम्यास्तु यथाकामं समुच्ची-	३	३	५८	३४६	३४७	३४७
कार्ये बादरिरस्य गत्युपपत्तेः	४	३	६	४५६	४६१	४६३
कार्याख्यानादपूर्वम्	३	३	१८	२८१	२८२	२८३
कार्यात्यये तदध्यक्षेण सहातः	४	३	९	४५८	४६१	४६४
कृतप्रयत्नापेक्षस्तु विहितप्र-	२	३	४१	१५६	१५७	१५८
कृतात्यये ऽनुशयवान् दृष्ट-	३	१	८	२०१	२०४	२०४
कृत्स्नप्रसक्तिर्निरवयत्व-	२	१	२६	५९	६२	६३
कृत्स्नभावात्तु गृहिणोपसंहारः	३	४	४७	३९४	३९५	३९६
ग.						
गतेरर्थवत्त्वमुभयथा ऽन्य	२	३	२९	२९८	३०१	३०२
गुणसाधारण्यश्रुतेश्च	३	३	६२	३४९	३५१	३५२
गुणाद्वा ऽऽलोकवत्	२	३	२६	१४३	१४७	१४९
गौण्यसंभवाच्छब्दाच्च	२	३	३	१२४	१२६	१२८
गौण्यसंभवात्तत्प्राक्छ्रुतेश्च	२	४	२	१७०	१७१	१७२
च.						
चक्षुरादिवत्तु तत्सहशिष्ट्यादि-	२	४	९	१७७	१७८	१७९
चरणादिति चेन्न तदुपलक्ष-	३	१	९	२०३	२०४	२०५
चराचरव्यपाश्रयस्तु स्यात्त-	२	३	१७	१३२	१३४	१३५
चिति तन्मात्रेण तदात्मक-	४	४	६	४७५	४७६	४७७

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सूत्राणि.	अ-सं.	पा-सं	सू-सं.	शा-भा. पु-सं.	वे-सा. पु-सं.	वे-दी. पु-सं.
छ.						
छन्दत उभयाविरोधात्	३	३	२८	२९८	३००	३०२
ज.						
जगद्व्यापारवर्जं प्रकर-	४	४	१७	४८६	४९१	४९२
शोऽत एव	२	३	१९	१३९	१४६	१४८
ज्योतिराद्यधिष्ठानं तु तदा-	२	४	१३	१८१	१८२	१८३
त.						
त इन्द्रियाणि तद्व्यपदेशाद-	२	४	१५	१८३	१८४	१८४
तच्छ्रुतेः	३	४	४	३५६	३६४	३६७
तटितोऽधि वरुणस्सम्बन्धात्	४	३	३	४५२	४५३	४५४
तत्पूर्वकत्वाद्वाचः	२	४	३	१७०	२७१	१७२
तत्रापि तद्व्यापारादविरोधः	३	१	१६	२०७	२०९	२११
तत्स्वाभाव्यापत्तिरुपपत्तेः	३	१	२२	२१२	२१३	२१३
तथाचैकवाक्योपबन्धात्	३	४	२४	३७३	३७३	३७३
तथान्यप्रतिषेधात्	३	२	३५	२५१	२५४	२५६
तथा प्राणाः	२	४	१	१६९	१७१	१७१
तदधिगम उत्तरपूर्वाघयो-	४	१	१३	४१३	४१५	४१५
तदनन्यत्वमारम्भणशब्दा-	२	१	१५	२५	४९	५०
तदन्तरप्रतिपत्तौ रंहति संपरि-	३	१	१	१९३	१९८	१९९
तदभावो नाडीषु तच्छ्रुतेरा-	३	२	७	२२४	२२५	२२६
तदभिध्यानादेव तु तल्लिङ्गा-	२	३	१४	१३०	१३३	१३५
तदव्यक्तमाहहि	३	२	२२	२३७	२४०	२४४
तदापीतेस्संसारव्यपदेशात्	४	२	८	४३०	४३३	४३५
तदोकोऽग्रज्वलनं तत्प्रकाशि-	४	२	१६	४३८	४३९	४३९
तद्गुणसारत्वात्तु तद्व्यपदेशः प्रा-	२	३	२९	१४४	१४७	१५०
तद्भूतस्य तु नातद्भावो जैमि-	३	४	४०	३८६	३८९	३८९
तद्भूतो विधानात्	३	४	६	३५७	३६४	३६८
तन्निर्धारणानियमस्तद्दृष्टेः प्र-	३	३	४१	३२२	३२३	३२३
तन्मनः प्राण उत्तरात्	४	२	३	४२५	४२५	४२६
तन्वभावे सन्ध्यवदुपपत्तेः	४	४	१३	४८१	४८३	४८४
तर्काप्रतिष्ठापनादपि	२	१	११	१६	१८	२०
तस्य च नित्यत्वात्	२	४	१४	१८२	१८२	१८३

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सूत्राणि.	अ सं.	पा सं.	सू सं.	शा-भा-पु-सं.	वे-सा. पु-सं.	वे-दी. पु-सं.
तानि परे तथाह्याह	४	२	१४	४३६	४३६	४३६
तुल्यं तु दर्शनम्	३	४	९	३५८	३६५	३६८
तृतीयशब्दावरोधस्संशोक-	३	१	२१	२०९	२१०	२१२
तेजोऽतस्तथाह्याह	२	३	१०	१२९	१३३	१३४
त्र्यात्मकत्वात्तु भूयस्त्वात्	३	१	२	१९५	१९८	२००
द						
दर्शनाच्च	३	१	२०	२०८	२१०	२११
दर्शनाच्च	३	३	६४	३५०	३५१	३५३
दर्शनाच्च	४	३	१२	४५९	४६२	४६४
दर्शयतश्चैवं प्रत्यक्षानुमाने	४	४	२०	४८८	४९२	४९३
दर्शयति च	३	३	४	२६४	२६५	२६६
दर्शयति च	३	३	२२	२८६	२८७	२५७
दर्शयति चाथो अपि स्मर्यते	३	२	१७	२३३	२३९	२४३
दृश्यते तु	२	१	६	१०	१७	१९
देवादिवदपि लोके	२	१	२५	५८	५८	५९
देहयोगाद्वा सोऽपि	४	२	५	२२१	२२२	२२४
द्वादशाहवदुभयविधं बाद-	४	४	१२	४८९	४८३	४८४
ध.						
धर्मं जैमिनिरत एव	३	२	३९	२५७	२५९	२६१
ध्यानाच्च	४	१	८	४१०	४११	४११
न.						
न कर्माविभागादिति चेन्ना-	२	१	३५	६६	६७	६८
न च कर्तुः करणम्	२	२	४०	११५	१२१	१२२
न च कार्ये प्रत्यभिसंधिः	२	३	१३	४५९	४६३	४६४
न च पर्यायादप्यविरोधो	२	२	३३	१०८	१०९	११०
न चाधिकारमपि पत-	३	४	४१	३८७	३८९	१९०
न तु दृष्टान्तभावात्	२	१	९	१३	१८	२०
न तृतीये तथोपलब्धेः	३	१	१८	२०८	२०९	२११
न प्रतीके नहि सः	४	१	४	४०७	४०८	४०८
न प्रयोजनवत्त्वात्	२	१	३२	६४	६७	६८
न वा तत्सहभावाश्रुतेः	३	३	६३	३४९	३५१	३५३
न वा प्रकरणभेदात्परोवरी-	२	३	७	२६८	२७०	२७२
न वायुक्रिये पृथगुपदेशा-	२	४	८	१७६	३७८	१७९
न वा विशेषात्	३	३	२१	२८६	२८६	२८७

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सूत्राणि.	अ-सं.	पा-सं.	सू-सं.	शा-भा. पु-सं.	वे सा. पु-सं.	वे-दी. पु-सं.
न वियदश्रुतेः	२	३	१	१२३	१२६	१२७
न विलक्षणत्वादस्य तथात्वं	२	१	४	७	१७	१८
न सामान्यादप्युपलब्धेः	३	३	४९	३३१	३३३	३३५
न स्थानतोऽपि परस्योभ-	३	२	११	२२९	२३८	२४१
नाणुरतच्छ्रुतेरिति चेन्नेत-	२	३	२२	१४२	१४६	१४९
नातिचिरेण विशेषात्	३	१	२३	२१३	२१४	२१४
नात्मा श्रुतेर्नित्यत्वाच्च	२	३	१८	१३६	१३९	१३९
नाना शब्दादिभेदात्	३	३	५६	३४४	३४५	३४५
नाभाव उपलब्धेः	२	२	२७	१०१	१०३	१०३
न भावोऽनुपलब्धेः	२	२	२९	१०२	१०३	१०४
नाविशेषात्	३	४	१३	३६०	३६५	३६९
नासतोऽदृष्टत्वात्	२	२	२५	९५	९७	१००
नित्यमेव च भावात्	२	२	१३	८६	८७	८९
नित्योपलब्ध्यनुपल-	२	३	३२	१४५	१४७	१५०
निममात्	३	४	७	३५७	३६५	३६८
निर्मातारंचैके पुत्रादयश्च	३	२	२	२१९	२२२	२२३
निशि नेति चेन्न संबन्धस्य	४	२	१८	४४१	४४२	४४२
नैकस्मिन् दर्शयतो हि	४	२	३	४२८	४२८	४२७
नैकस्मिन्नसंभवात्	२	२	३१	१०६	१०९	११०
नोपमर्देनातः	४	२	१०	४३१	४३३	४३५
प.						
पञ्चवृत्तिर्मनोवद्व्यपदि-	२	४	११	१७८	१७८	१८०
पटवच्च	२	१	१९	४८	४९	५१
पत्युरसामञ्जस्यात्	२	२	३५	१११	११४	११४
पत्रोम्बुवच्चेत्तत्रापि	२	२	२	७३	८०	८२
पतं जैमिनिर्मुख्यत्वात्	४	३	११	४५८	४६२	४६४
पतमतस्सेतून्मानसंबन्धभेदव्य-	३	२	३०	२४९	२५३	२५४
परात्तु तच्छ्रुतेः	२	३	४०	१५६	१५७	१५८
परभिध्यानात्तु तिरोहि-	३	२	४	२२१	२२२	२२४
परामर्शं जैमिनिरचोदना-	३	४	१८	३६२	३६६	३७०
परेण च शब्दस्य ताद्विध्यं	३	३	५०	३३१	३३३	३३५
पारिप्लवार्था इति चेन्न वि-	३	४	२३	३७२	३७३	३७३
पुंस्त्वादिवत्त्वस्य सतोऽभि-	२	३	३१	१४५	१४७	१५०
पुरुषविद्यायामपिचेतरे-	३	३	२४	२८९	२९०	२९१

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सूत्राणि	अ-सं.	पा-सं.	सू-सं.	शा-भा. पु-सं.	वे-सा. पु-सं.	वे-दी. पु-सं.
पुरुषार्थोऽतश्शब्दादिति	३	४	१	३५४	३६४	३६६
पुरुषाश्मवदितिचेत्तथापि	२	२	५	७६	८०	८२
पूर्वं तु बादरायणो हे-	३	२	४०	२५८	२६०	२६१
पूर्ववद्वा	३	२	१८	२४६	२४८	२४९
पूर्वविकल्पः प्रकरणात्स्यात्क्रि-	३	३	४४	३२८	३३२	३३३
पृथगुपदेशात्	२	३	२८	१४३	१४७	१५०
पृथिवी	२	३	१२	१२९	१३३	१३४
प्रकाशवच्चावैयर्थ्यात्	३	२	१५	२३२	२३९	२४३
प्रकाशादिवच्चावैशेष्यं प्र-	३	२	२४	२३८	२४१	२४५
प्रकाशादिवत्तु नैवं परः	२	३	४५	१६१	१६५	१६६
प्रकाशाश्रयवद्वा तेजस्त्वात्	३	२	२७	२४६	२४७	२४८
प्रकृतैतावत्त्वं हि प्रतिषेध-	३	२	२१	२३५	२४०	२४४
प्रतिज्ञाहानिरव्यतिरेकात्	२	३	५	१२५	१२७	१२८
प्रतिषेधाच्च	३	२	२९	२४७	२४८	२४९
प्रतिषेधादितिचेन्न शारी-	४	२	१२	४३१	४३४	४३५
प्रतिसंख्याप्रतिसंख्यानिरो-	२	२	२१	९२	९७	९९
प्रत्यक्षोपदेशादिति चेन्ना-	४	४	१८	४८७	४९१	४९३
प्रथमे श्रवणादिति चेन्न ता-	३	१	५	१९६	१९९	२००
प्रदानवदेव तदुक्तम्	३	३	४२	३२४	३२५	३२५
प्रदीपवदावेशस्तथाहि द-	४	४	१५	४८२	४८३	४८५
प्रदेशभेदादिति चेन्नान्त-	२	३	५२	१६४	१६५	१६८
प्राणगतेश्च	३	१	३	१९५	१९८	२००
प्रियशिरस्त्वाद्यप्राप्तिरुप-	३	३	१२	२७६	२७९	२८०
फ.						
फलमत उपपत्तेः	३	२	३७	२५७	२५९	२६०
ब.						
बहिस्तूभयथापि स्मृतेरा-	३	४	४३	३८८	३८९	३९०
बुद्ध्यर्थः पादवत्	३	२	३२	२५०	२५३	२५५
ब्रह्मदृष्टिरुत्कर्षात्	४	१	५	४०७	४०८	४०८
ब्राह्मेण जैमिनिरुपन्या-	४	४	५	४७४	४७६	४७७
भ.						
भाक्तं वाऽनात्मवित्त्वात्तथा	३	१	७	१९७	१९९	२०१
भावं जैमिनिर्विकल्पाम-	४	४	११	४८०	४८३	४८४
भावशब्दाच्च	३	४	२२	३७१	३७१	३७२

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सूत्राणि.	अ-सं.	पा-सं.	सू-सं.	शा-भा-पु-सं.	वे-सा. पु-सं.	वे-दी. पु-सं.
भावे चोपलब्धेः	२	१	१६	४६	४९	५०
भावे जाग्रद्वत्	४	४	१४	४८१	४८३	४८४
भूतेषु तच्छ्रुतेः	४	२	५	४२७	४२८	४२८
भूम्नः क्रतुवज्ज्यायस्त्वं तथा	३	३	५५	३४०	३४३	३४३
भेदश्रुतेर्वैलक्षण्याच्च	२	४	१६	१८३	१८४	१८४
भेदादिति चेन्न प्रत्येकमद्व-	३	२	१२	२३०	२३९	२४२
भेदान्नेति चेदेकस्यामपि	३	३	२	२६३	२६५	२६५
भोक्त्रापत्तेरविभागश्चेत्स्या-	२	१	१४	२२	२४	२४
भोगमात्रसाम्यलिङ्गाच्च	४	४	२१	४८९	४९२	४९४
भोगेन त्वितरे क्षपयित्वाथ	४	१	१९	४२०	४२१	४२१
म.						
मन्त्रवर्णात्	२	३	४३	१६०	१६४	१६६
मन्त्रादिवद्वाविरोधः	३	३	५४	३३९	३४०	३४०
महद्दीर्घवद्वा ह्रस्वपरिम-	२	२	१०	८४	८७	८८
मांसादि भौमं यथाशब्द-	२	४	१८	१८७	१८९	१९१
मायामात्रं तु कात्स्न्र्येना-	३	२	३	२२०	२२२	२२३
मुक्तः प्रतिज्ञानात्	४	४	२	४६८	४७०	४७१
मुग्धेऽर्धसंपत्तिः परिशेषात्	३	२	१०	२२८	२२८	२२८
मौनवदितरेषामप्युपदेशात्	३	४	४८	३९४	३९५	३९६
य.						
यत्रैकाग्रता तत्राविशेषात्	४	१	११	४१०	४११	४१२
यथा च तक्षोभयथा	२	३	३९	१५४	१५४	११५
यथा च प्राणादिः	२	१	२०	४८	४९	५१
यदेव विद्ययेतिहि	४	१	१८	४१९	४१९	४२०
यावदधिकारमवस्थितिरा	३	३	३१	३००	३०१	३०३
यावदात्मभावित्वाच्च	२	३	३०	१४४	१४७	१५०
यावद्विकारं तु विभागो लो-	२	३	७	१२५	१२७	१२८
योगिनः प्रतिस्मर्येते स्मा-	४	२	२०	४४४	४४५	४४५
योनेश्शरीरम्	३	१	२७	२१७	२१७	२१८
र.						
रचनानुपपत्तेश्चानुमानं	२	२	१	७०	८०	८१
रश्म्यनुसारी	४	२	१७	४४०	४४१	४४१
रूपादिमत्त्वाच्च विपर्ययो द-	२	२	१४	८६	८८	८९
रेतःसिग्योगोऽथ	३	१	२६	२१६	२१७	२१८

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सूत्राणि	अ-सं.	पा-सं.	सू-सं.	शा-भा. पु सं.	वे-सा. पु-सं	वे-दी. पु-सं.
ल.						
लिङ्गभूयस्त्वात्ताद्धिबली-	३	३	४३	३२५	३२७	३२७
लिङ्गाच्च	४	१	२	४०२	४०३	४०३
लोकवत्तु लीला कैवल्यम्	२	१	३३	६५	६७	६८
व.						
वाङ्मनसि दर्शनाच्छब्दा-	४	२	१	४२३	४२४	४२४
वायुमब्दादविशेषविशेषा-	४	३	२	४५०	४५१	४५२
विकरणत्वान्नेति चेत्तदुक्तम्	२	१	३१	६२	६३	६४
विकल्पोऽविशिष्टफलत्वात्	३	३	५७	३४६	३४७	३४७
विकारावर्ति च तथाहिस्थिति-	४	४	१९	४८८	४९१	४९३
विज्ञानादिभावे वा तदप्रतिषेधः	२	२	४१	११६	१२१	१२२
विद्याकर्मणोरिति तु प्रकृतत्वात्	३	१	१७	२०७	२०९	१११
विद्यैव निर्धारणाद्दर्शनाच्च	३	३	४६	३२९	३३२	३३४
विधिर्वा धारणवत्	३	४	२०	३६३	३६६	३७०
विपर्ययेण तु क्रमोऽत उपपद्यते च	२	३	१५	१३१	१३३	३३५
विप्रतिषेधाच्च	२	२	४२	११७	१२१	१२२
विप्रतिषेधाच्चासमञ्जसम्	२	२	९	८१	८१	२८३
विभागशतवत्	३	४	११	३५९	३६५	३६९
विशेषं च दर्शयति	४	३	१५	४६१	४६३	४६५
विशेषानुग्रहश्च	३	४	३८	३८५	३८६	३८६
विशेषितत्वाच्च	४	३	७	४५७	४६१	४६३
विहितत्वाच्चाश्रमकर्मापि	३	४	३२	३८१	३८३	३८३
वृद्धिह्रासभाक्त्वमन्तर्भावादु-	३	२	२०	२३४	२४०	२४३
वेधाद्यर्थभेदात्	३	३	२५	२९१	२९३	२९३
वैद्युतेनैव ततस्तच्छ्रुतेः	४	३	५	४५५	४५५	४५६
वैधर्म्याच्च न स्वप्नादिवत्	२	२	२८	१०२	१०३	१०३
वैशेष्यात्तु तद्वाद-	२	४	१९	१८९	१९०	१९१
वैषम्यनैर्घृण्ये न सापेक्षत्वात्त-	२	१	३४	६५	६७	६८
व्यतिरेकस्तद्भावभावित्वान्न	३	३	५२	३३६	३३७	३३८
व्यतिरेकानवस्थितेश्चानपे-	२	२	३	७४	८०	८२
व्यतिरेको गन्धवत्तथाहि द-	२	३	२७	१४३	१४७	१५०
व्यतिहारो विशिंषन्तीहीतर-	३	३	३६	३११	३१४	३१५
व्यपदेशाच्च क्रियायां न चेन्नि-	२	३	३५	१५३	१५४	१५५
व्याप्तेश्च समञ्जसम्	३	३	९	२७०	२७१	२७२

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सूत्राणि.	अ-सं.	पा-सं	सू-सं.	शा-भा. पु-सं.	वे-सा. पु-सं.	वे-दी. पु-सं.
श.						
शक्तिविपर्ययात्	२	३	३७	१५३	१५४	१५५
शब्दश्चातोऽकामकारे	३	४	३१	३८०	३८०	३८१
शब्देभ्यः	२	३	६	१२५	१२७	१२८
शमदमाद्युपेतस्यात्तथापि	३	४	२७	३७७	३७७	३७८
शिष्टेश्च	३	३	६०	३४९	३५१	३५२
शेषत्वात्पुरुषार्थवादो यथा	३	४	२	३५४	३६४	३६७
श्रुतत्वाच्च	३	२	३८	२५७	२५९	२६१
श्रुतेस्तु शब्दमूलत्वात्	२	१	२७	६०	६२	६३
श्रुत्यादिबलीयस्त्वाच्च न	३	३	४७	३२९	३३२	३३४
श्रेष्ठश्च	२	४	७	१७५	१७६	१७६
स.						
स एव तु कर्मानुस्मृतिश-	३	२	९	२२६	२२७	२२७
संकल्पादेव तच्छ्रुतेः	४	४	८	४७८	४७९	४७९
संज्ञातश्चेत्तदुक्तमस्ति तु	३	३	८	२६९	२७१	२७२
संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कु-	२	४	१७	१८५	१८९	१९०
सत्त्वाच्चापरस्य	२	१	१७	४७	४९	५०
संध्ये सृष्टिराह हि	३	२	१	२१९	२२२	२२३
संपद्याविर्भावस्स्वेनशब्दात्	४	४	१	४६७	४७०	४७०
सप्तगतेर्विशेषितत्वाच्च	२	४	४	१७२	१७३	१७४
संबन्धादेवमन्यत्रापि	३	३	२०	२८५	२८६	२८७
संभृतिद्युव्याप्त्यपिचातः	३	३	२३	२८७	२८८	२८९
समन्वारम्भणात्	३	४	५	३५६	३६४	३६७
समवायाभ्युपगमाच्च साम्या-	२	२	१२	८५	८७	८९
समाध्यभावाच्च	२	३	३८	१५३	१५४	१५५
समान एवं चाभेदात्	३	३	१९	२८४	२८४	१८५
समनाचासृत्युपक्रमादमृतत्वं	४	२	७	४२९	४३३	४३४
समाहारात्	३	३	६१	३४९	३५१	३५२
समुदाय उभयहेतुकेऽपित-	२	२	१७	८९	९६	९८
संयमने त्वनुभूयेतरेषामार-	३	१	१३	२०६	२०९	२१०
सर्वथानुपपत्तेश्च	२	२	३०	१०४	१०५	१०५
सर्वथापि त एवोभयलिङ्गात्	३	४	३४	३८२	३८३	३८४
सर्वधर्मोपपत्तेश्च	२	१	३६	६६	६७	६९
सर्ववेदान्तप्रत्ययं चोदना-	३	३	१	२६२	२६५	२६५
सर्वान्नानुमतिश्च प्राणात्य-	३	४	२८	३७८	३८०	३८१

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सूत्राणि.	अ-सं.	पा-सं.	सू-सं.	शा-भा. पु-सं.	वे-सा. पु-सं.	वे-दी. पु-सं.
सर्वापेक्षा च यज्ञादिश्रुते-	३	४	२६	३७५	३७६	३७६
सर्वाभेदादन्यत्रेमे	३	३	१०	२७३	२७४	२७५
सर्वोपेताच तद्दर्शनात्	२	१	३०	६१	६३	६४
सहकारित्वेन च	३	४	३३	३८२	३८३	३८३
सहकार्यन्तरविधिः पक्षेण	३	४	४६	३९२	३९५	३९५
सामान्यात्तु	३	२	३१	२५०	२५३	२५५
सामीप्यात्तु तद्व्यपदेशः	४	३	८	४५७	४६१	४६४
साम्पराये तर्तव्याभावात्तथा	३	३	२७	२९७	३००	३०१
सुकृतदुष्कृते एवेतितु बादरिः	३	१	११	२०३	२०४	२०५
सूक्ष्मं प्रमाणतश्च तथोप-	४	२	९	४३०	४३३	४३५
सूचकश्च हि श्रुतेराचक्षतेच	३	२	६	२२१	२२२	२२४
सैवहि सत्यादयः	३	३	३७	३१३	३१५	३१६
सोऽध्यक्षे तदुपगमादिभ्यः	४	२	४	४२६	४२७	४२७
स्तुतयेऽनुमतिर्वा	३	४	१४	३६०	३६५	४६९
स्तुतिमात्रमुपादानादिति	३	४	२१	३७०	३७१	३७२
स्थानविशेषात्प्रकाशादिवत्	३	२	३३	२५१	२५४	२५६
स्मरन्ति च	२	३	४६	१६२	१६५	१६७
स्मरन्ति च	३	१	१४	२०६	२०९	२१०
स्मरन्ति च	४	१	१०	४१०	४११	४११
स्मर्यते च	४	२	१३	४३३	४३४	४३५
स्मर्यतेऽपि च लोके	३	१	९९	२०८	२१०	२११
स्मृतेश्च	४	३	१०	४५८	४६२	४६४
स्मृत्यनवकाशदोषप्रस-	२	१	१	१	५	५
स्याच्चैकस्य ब्रह्मशब्दवत्	२	३	४	१२४	१२७	१२८
स्वपक्षदोषाच्च	२	१	१०	१६	१८	२०
स्वपक्षदोषाच्च	२	१	२९	६१	६३	६४
स्वशब्दोन्मानाभ्यां च	२	३	२३	१४२	१४६	१४९
स्वात्मना चोत्तरयोः	२	३	२१	१४१	१४६	१४९
स्वाध्यायस्य तथात्वेहि स-	३	३	३	२६३	२६५	२६६
स्वाप्ययसंपत्त्योरन्यतरापेक्ष-	४	४	१६	४८२	४८३	४८५
स्वामिनः फलश्रुतेरित्यात्रेयः	३	४	४४	३९०	३९१	३९२
ह.						
हस्तादयस्तु स्थितेऽतो नैवम्	२	४	५	१७३	१७४	१७४
हानौ तूपायनशब्दशेष-	३	३	२६	२९३	२९५	२९६

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

☞ दीयतां दृष्टिः.

२६३. तमपुटे. १८, १९. तमपङ्क्त्योर्मध्ये—

स्वाध्यायस्य तथात्वे हि समाचारेऽधिकाराच्च सववच्च तन्नियमः । ३ । ३ । ३ ॥

इति सूत्रं संयोज्य पठनीयम् ।

अधस्तनसङ्केतानां विवरणम्

अ-सं—अध्यायसंख्या ॥
पा-सं—पादसंख्या ॥
सू-सं—सूत्रसंख्या ॥
शा-भा. पु-सं—शारीरकमीमांसाभाष्यपुटसंख्या ॥
वे-सा. पु-सं—वेदान्तसारपुटसंख्या ॥
वे-दी. पु-सं—वेदान्तदीपुटसंख्या ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीमते रामानुजाय नमः

श्रीभगवद्रामानुजविरचिते

श्रीशारीरकमीमांसाभाष्ये

(द्वितीयाध्याये—प्रथमपादे—स्मृत्यधिकरणम् ॥ १ ॥)

स्मृत्यनवकाशदोषप्रसङ्ग इतिचेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गात् । २ । १ । १ ॥

प्रथमेऽध्याये प्रत्यक्षादिप्रमाणगोचरादचेतनात्तत्संसृष्टात्तद्वियुक्ताच्च चेतनादर्थान्तरभूतं निरस्तनिखिलाविद्याद्यपुरुषार्थगन्धमनन्तज्ञानानन्दैकतानमपरिमितोदारगुणसागरं निखिलजगदेककारणं सर्वान्तरात्मभूतं परं ब्रह्म वेदान्तवेद्यमित्युक्तम् ॥

अनन्तरमस्यार्थस्य सम्भावनीयसमस्तप्रकारदुर्धर्षणत्वप्रतिपादनाय द्वितीयोऽध्याय आरभ्यते। प्रथमं तावत्कपिलस्मृतिविरोधाद्वेदान्तानामतत्परत्वमाशङ्क्य तन्निराक्रियते । कथं स्मृतिविरोधाच्छ्रुतेरन्यपरत्वम्? उक्तं हि[1] "विरोधे त्वनपेक्ष्यं स्यात्" इति श्रुतिविरुद्धायास्स्मृतेरना-

१. पूर्वमीमां १. ३. ३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दरणीयत्वम्।—सत्यम्, [१]"औदुम्बरीं स्पृष्ट्वोद्गायेत्" इत्यादिषु स्वत एवार्थनिश्चयसम्भवात्तद्विरुद्धा स्मृतिरनादरणीयैव; इहतु वेदान्तवेद्यतत्त्वस्य दुरवबोधत्वेन परमर्षिप्रणीतस्मृतिविरोधे सत्ययमर्थ इति निश्चययोगात् स्मृत्या श्रुतेरतत्परत्वोपपादनमविरुद्धम् । एतदुक्तं भवति—प्राचीनभागोदितनिखिलाभ्युदयसाधनभूताग्निहोत्रदर्शपूर्णमासज्योतिष्टोमादिकर्माणि यथावदभ्युपगच्छता श्रुतिस्मृतीतिहासपुराणेषु [२]"ऋषिं प्रसूतं कपिलम्" इत्यादिवाक्यैराप्तत्वेन सङ्कीर्तितेन परमर्षिणा कपिलेन परमनिःश्रेयसतत्साधनावबोधित्वेनोपनिबद्धस्मृत्युपबृंहणेन विना अल्पश्रुतैर्मन्दमतिभिर्वेदान्तार्थनिश्चययोगाद्यथाश्रुतार्थग्रहणे चाप्तप्रणीतायास्साङ्ख्यस्मृतेस्सकलाया एवानवकाशप्रसङ्गाच्च स्मृतिप्रसिद्ध एवार्थो वेदान्तवेद्य इति बलादभ्युपगमनीयम्—इति । न च वाच्यं मन्वादिस्मृतीनां ब्रह्मैककारणत्ववादिनीनामेवं सत्यनवकाशत्वदोषप्रसङ्ग इति; धर्मप्रतिपादनद्वारा प्राचीनभागोपबृंहण एव सावकाशत्वात् । अस्यास्तु कृत्स्नायास्तत्त्वप्रतिपादनपरत्वात्तथाऽनभ्युपगमे निरवकाशत्वमेव स्यात् । तदिदमाशङ्क्यते—स्मृत्यनवकाशदोषप्रसङ्ग इति चेत्—इति ॥

(सिद्धान्तः)

तत्रोत्तरं—नान्यस्मृत्यनवकाशदोषप्रसङ्गात्—इति । अन्या हि मन्वादिस्मृतयो ब्रह्मैककारणतां वदन्ति; यथाऽऽह मनुः[३]"आसीदिदं तमोभूतम्" इत्यारभ्य [४]"ततस्स्वयम्भूर्भगवानव्यक्तो व्यञ्जयन्निदम्। महाभूतादिवृत्तौजाः प्रादुरासीत्तमोनुदः" [५]"सोऽभिध्याय शरीरात्स्वात्सिसृक्षुर्विविधाः प्रजाः । अप एव ससर्जादौ तासु वीर्यमपासृजत्" इति । भगवद्गीतासु च [६]"अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा" [७]"अहं

१. २. श्वे. ५-२ ॥ ३. मनु. १-५ ॥ ४. मनु. १-६ ॥ ५. मनु. १-८ ॥ ६. गी. ७-६ ॥ ७. गी. १०-८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सर्वस्य प्रभवो मत्तस्सर्वं प्रवर्तते" इति च। महाभारते [१]"कुतस्सृष्टमिदं सर्वं जगत् स्थावरजङ्गमम्। प्रलये च कमभ्येति तन्मे ब्रूहि पितामह" इति पृष्ट आह [२]"नारायणो जगन्मूर्तिरनन्तात्मा सनातनः" इति। तथा [३]"तस्मादव्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तम "इति, [४]"अव्यक्तं पुरुषे ब्रह्मन्निष्क्रिये सम्प्रलीयते" इति च। आह च भगवान्पराशरः [५]"विष्णोस्सकाशादुद्भूतं जगत्तत्रैव च स्थितम्। स्थितिसंयमकर्ताऽसौ जगतोऽस्य जगच्च सः" इति। आह चापस्तम्बः [६]"पूः प्राणिनस्सर्व एव गुहाशयस्य अहन्यमानस्य विकल्मषस्य"इत्यारभ्य[७]"तस्मात्कायाः प्रभवन्ति सर्वे स मूलं शाश्वतिकस्स नित्यः" इति। यदि कपिलस्मृत्या वेदान्तवाक्यार्थव्यवस्था स्यात्, तदैतासां सर्वासां स्मृतीनामनवकाशत्वरूपो महान् दोषः प्रसज्येत। अयमर्थः—यद्यपि वेदान्तवाक्यानामतिक्रान्तप्रत्यक्षादिसकलेतरप्रमाणसम्भावनाभूमिभूतार्थप्रतिपादनपरत्वात्तदर्थवैशद्यायाल्पश्रुतानां प्रतिपत्तॄणां तदुपबृंहणमपेक्षितम्; तथापि तदर्थानुसारिणीनामाप्ततमप्रणीतानां बह्वीनां स्मृतीनां तदुपबृंहणाय प्रवृत्तानामनवकाशत्वं मा प्रसाङ्क्षीदिति श्रुतिविरुद्धार्था कपिलस्मृतिरुपेक्षणीया। उपबृंहणं च श्रुतिप्रतिपन्नार्थविशदीकरणम्; तच्च विरुद्धार्थया स्मृत्या न शक्यते कर्तुम्। नचैतासां स्मृतीनां प्राचीनभागोदितधर्मांशविशदीकरणेन सावकाशत्वम्; परब्रह्मभूतपरमपुरुषाराधनत्वेन धर्मान्विदधतीनामेतासामाराध्यभूतपरमपुरुषप्रतिपादनाभावे सति तदाराधनभूतधर्मप्रतिपादनासम्भवात्। तथाहि परमपुरुषाराधनरूपता सर्वेषां कर्मणां स्मर्यते[८]"यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम्। स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः"

१. २-३-४ भारते. शान्तिपर्वे. मोक्षधर्मे. ८. १, १२, १३, १४॥
५. वि-पु. १-१-३१॥
६. आपस्तम्बधर्मे. २२-ख. १-२॥
७. आपस्तम्बधर्मे २३. ख-१-२॥
८. गी. १८-४६॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

१"ध्यायेन्नारायणं देवं स्नानादिषु च कर्मसु। ब्रह्मलोकमवाप्नोति न चेहावर्तते पुनः" २"यैस्त्वकर्मपरैर्नाथ नरैराराधितो भवान्। ते तरन्त्यखिलामेतां मायामात्मविमुक्तये" इति। न चैहिकामुष्मिकसांसारिकफलसाधनकर्मप्रतिपादनेनैतासां सावकाशत्वम्; यतस्तेषामपि कर्मणां परमपुरुषाराधनत्वमेव स्वरूपम्; यथोक्तं ३"येऽप्यन्यदेवताभक्ता यजन्ते श्रद्धयाऽन्विताः। तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम्। अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च। न तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते" इति; तथा ४"यज्ञैस्त्वमिज्यसे नित्यं सर्वदेवमयाच्युत। हव्यकव्यभुगेकस्त्वं पितृदेवस्वरूपधृक्" इति। यदुक्तम्—५"ऋषिं प्रसूतं कपिलम्" इति कपिलस्याप्ततया सङ्कीर्तनात्तत्स्मृत्यनुसारेण वेदान्तार्थव्यवस्थापनं न्याय्यम्—इति; तदसत्, बृहस्पतेश्श्रुतिस्मृतिषु सर्वेषामतिशयितज्ञानानां निदर्शनत्वेन सङ्कीर्तनात्तत्प्रणीतेन लोकायतेन श्रुत्यर्थव्यवस्थापनप्रसक्तेः—इति ॥ १ ॥

अथ स्यात्, कपिलस्य स्वयोगमहिम्ना वस्तुयाथात्म्योपलब्धेस्तत्स्मृत्यनुसारेण वेदान्तार्थो व्यवस्थापयितव्यः—इति; अत उत्तरं पठति—

इतरेषां चानुपलब्धेः। २। १। २ ॥

चशब्दस्तुशब्दार्थश्चोदिताशङ्कानिवृत्त्यर्थः। इतरेषां—मन्वादीनां बहूनां स्वयोगमहिमसाक्षात्कृतपरावरतत्त्वयाथात्म्यानां निखिलजगद्धेषजभूतस्ववाक्यतया ६"यद्वै किञ्च मनुरवदत्तद्भेषजम्" इति श्रुतिप्रसिद्धानां कपिलदृष्टप्रकारेण तत्त्वानुपलब्धेश्श्रुतिविरुद्धा कपिलोपलब्धि-

१. दक्षस्मृतौ.
२. वि-पु-५. ३०. १६ ॥
३. गी. ९-२३, २४ ॥
४. वि-पु-५-२०. ९७ ॥
५. श्वे-५-२ ॥ (११. अनु ॥
६. यजुषि-२-३. अष्ट. च ३. प्रश्न. २.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भ्रान्तिमूलेति न तया यथोक्तो वेदान्तार्थश्चालयितुं शक्य इति सिद्धम् ॥ २ ॥

इति श्रीशारीरकमीमांसाभाष्ये स्मृत्यधिकरणम् ॥ १ ॥

वेदान्तसारे—स्मृत्यनवकाशदोषप्रसङ्ग इतिचेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गात् ॥ उपबृंहणापेक्षे वेदान्तार्थनिर्णये सति, कपिलस्मृत्युपबृंहणेन वेदान्तार्थः प्रधानकारणवाद इत्यनभ्युपगमे, कपिलस्मृतेरुपबृंहणानन्वयेनानवकाशदोषप्रसक्तिरितिचेत् न, अन्यासां वेदाविरोधिनीनां बह्वीनाम्मन्वादिस्मृतीनामनवकाशप्रसक्तेः, वेदस्योपबृंहणापेक्षत्वेऽपि अनन्यपराविरुद्धानेकस्मृतिषु सतीषु, विरुद्धार्थायाः वेदोदितार्थविशदीकरणत्वाभावेन तस्या उपबृंहणत्वमन्याय्यमित्यर्थः ॥ १ ॥

योगीन्द्रकपिलस्य तथाऽनुपलब्धेः कथं स्मृत्यन्तरमेतन्न्याय्यमितिचेत् तत्राह—

इतरेषाञ्चानुपलब्धेः ॥ वेदार्थसाक्षात्कारचतुरमन्वादियोगीन्द्राणां कपिलदृष्टार्थानुपलब्धेः कपिलोपलब्धिर्भ्रम एव ॥ २ ॥

इति वेदान्तसारे स्मृत्यधिकरणम् ॥ १ ॥

वेदान्तदीपे—स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गात् ॥ वेदान्तानां समस्तचिदचिद्वस्तुविलक्षणास्पृष्टहेयगन्धसर्वज्ञताद्यनन्तकल्याणगुणाकरब्रह्मैकपरत्वं प्रतिपादितं, कापिलस्मृतिविरोधेन चालयितुं शक्यम्, उतनेति संशयः । शक्यमिति पूर्वः पक्षः, श्रुतिविरुद्धायाः स्मृतेरनादरणीयत्वे स्थितेऽपि वेदान्तवेद्यार्थस्य दुर्ग्रहत्वेन अल्पश्रुतैर्मन्दमतिभिराप्तप्रणीतस्मृत्युपबृंहणेन विना तेषां निश्चयो नोपपद्यते । कपिलस्मृतिः केवलतत्त्वपरेति तयैव ह्युपबृंहणं न्याय्यम् । अन्यथा आप्तप्रणीतायाः केवलतत्त्वपरायाः अस्या अनवकाशप्रसङ्गइति वेदान्तवेद्यं जगत्कारणं प्रधानम् । राद्धान्तस्तु — वेदान्तस्योपबृंहणापेक्षत्वेऽप्याप्ततममन्वादिस्मृतिभिर्वेदान्ताविरोधिनीभिरेवोपबृंहणं न्याय्यम्, अन्यथा तासां बह्वीनामनवकाशप्रसङ्गो महानयं दोषस्स्यात् । नच तासां धर्मप्रतिपादनांशोपबृंहणत्वेन सावकाशत्वम्, यतो ध-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

र्णामपि स्वरूपं परब्रह्मभूतपरमपुरुषाराधनत्वम्[१] "इष्टापूर्तं बहुधा जातं जायमानं विश्वं बिभर्तिभुवनस्य नाभिः । तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदु चन्द्रमाः" २"यज्ञैस्त्वमिज्यसे नित्यं सर्वदेवमयाच्युत" इत्यादिश्रुतिस्मृतिभिः। सूत्रमपि व्याख्यातम् ॥ १ ॥

अतीन्द्रियार्थसाक्षात्कारसमर्थस्य कपिलस्य वेदान्तानां ब्रह्मपरत्वानुपलब्धेः प्रधानपरत्वमेवाश्रयणीयमित्यत उत्तरं पठति—

इतरेषाञ्चानुपलब्धेः ॥ इतरेषां मन्वादीनां वेदविदग्रेसराणां सर्वातीन्द्रियार्थसाक्षात्कारसमर्थानां प्रधानपरत्वानुपलब्धेः ब्रह्मपरत्वोपलब्धेश्च ब्रह्मपरत्वमेवाश्रयणीयम् ; वेदान्तप्रतिपन्नार्थविरुद्धायास्तु कपिलोपलब्धेर्भ्रान्तिमूलत्वं कल्पयितव्यम् ॥ २ ॥

इति वेदान्तदीपे स्मृत्यधिकरणम् ॥ १ ॥

(श्रीशारीकमीमांसाभाष्ये योगप्रत्युक्त्यधिकरणम् ॥ २ ॥)

एतेन योगः प्रत्युक्तः । २ । १ । ३ ॥

एतेन—कापिलस्मृतिनिराकरणेन योगस्मृतिरपि प्रत्युक्ता। का पुनरत्राधिकाशङ्का, यन्निराकरणाय न्यायातिदेशः—योगस्मृतावपीश्वराभ्युपगमान्मोक्षसाधनतया वेदान्तविहितयोगस्य चाभिधानाद्वक्तुर्हिरण्यगर्भस्य सर्ववेदान्तप्रवर्तनाधिकृतत्वाच्च तत्स्मृत्या वेदान्तोपबृंहणं न्याय्यम्—इति ॥

परिहारस्तु – अब्रह्मात्मकप्रधानकारणवादान्निमित्तकारणमात्रेश्वराभ्युपगमाज्ज्ञानात्मकस्य योगस्य ध्येयैकनिरूपणीयस्य ध्येयभूतयोरात्मेश्वरयोर्ब्रह्मात्मकत्वजगदुपादानतादिसर्वकल्याणगुणात्मकत्वविरहेणावैदिकत्वाद्वक्तुर्हिरण्यगर्भस्यापि क्षेत्रज्ञभूतस्य कदाचिद्रजस्तमोभिभवसम्भवाच्च योगस्मृतिरपि तत्प्रणीतरजस्तमोमूलपुराणवद्भ्रान्तिमूलेति न तया वेदान्तोपबृंहणं न्याय्यम्—इति ॥ ३ ॥

इति श्रीशारीरकमीमांसाभाष्ये योगप्रत्युक्त्यधिकरणम् ॥ २ ॥

---

१. तै. नारा-६. १६, १७ ॥ २. वि-पु. ५. २०. ९७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वेदान्तसारे–एतेन योगः प्रत्युक्तः ॥ योगस्य हैरण्यगर्भस्यापि कापिलस्मृतिवद्वेदविरुद्धत्वाविशेषात् तद्वन्निरासः ॥ ३ ॥

इति वेदान्तसारे योगप्रत्युक्त्यधिकरणम् ॥ २ ॥

वेदान्तदीपे–एतेन योगः प्रत्युक्तः ॥ किं वेदान्तानां योगस्मृत्योपबृंहणं न्याय्यम्? उत नेति संशयः । न्याय्यमिति पूर्वः पक्षः, कृत्स्नवेदप्रवर्तनाधिकृतहिरण्यगर्भप्रणीतत्वाद्योगस्य, ईश्वरसद्भावाभ्युपगमाच्च । अतो योगस्मृत्योपबृंहितत्वेन वेदान्तानामब्रह्मात्मकप्रधानोपादानप्रतिपादनपरत्वम् । राद्धान्तस्तु– कपिलस्मृतिवद्वेदविरुद्धत्वाविशेषादनादरणीयैव योगस्मृतिः; हिरण्यगर्भस्यापि क्षेत्रज्ञत्वेन भ्रमसम्भवात् योगस्मृतेरपि भ्रान्तिमूलकत्वम् । सूत्रमपि व्याख्यातम् ॥ ३ ॥

इति वेदान्तदीपे योगप्रत्युक्त्यधिकरणम् ॥ २ ॥

(श्रीशारीरकमीमांसाभाष्ये विलक्षणत्वाधिकरणम् ॥ ३ ॥)

न विलक्षणत्वादस्य तथात्वं च शब्दात्।२।१।४।

पुनरपि स्मृतिविरोधवादी तर्कमवलम्बमानः प्रत्यवतिष्ठते–यत्साङ्ख्यस्मृतिनिराकरणेन जगतो ब्रह्मकार्यत्वमुक्तम्;तन्नोपपद्यते,अस्य प्रत्यक्षादिभिरचेतनत्वेनाशुद्धत्वेनानीश्वरत्वेन दुःखात्मकत्वेन चोपलभ्यमानस्य चिदचिदात्मकस्य जगतः भवदभ्युपेतात्सर्वज्ञात्सर्वेश्वराद्वेयप्रत्यनीकादानन्दैकतानाद्ब्रह्मणो विलक्षणत्वात् । न केवलं प्रत्यक्षादिभिरेव जगतो वैलक्षण्यमुपलभ्यते; शब्दाच्च तथात्वं–विलक्षणत्वम् उपलभ्यते– १"विज्ञानं चाविज्ञानं च" २"एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राः प्राणेऽर्पिताः" ३"समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति

१. तै. आन. ६-३ ॥ २. कौषी. ३, ९ ॥ ३. मु. ३-१. २ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मुह्यमानः" १"अनीशश्चात्मा बध्यते भोक्तृभावात्"इत्यादिभिः। कार्यस्य हि जगतोऽचेतनत्वदुःखित्वादयो निर्दिश्यन्ते। यद्धि यत्कार्यम्, तत्तस्मादविलक्षणम्, यथा मृत्सुवर्णादिकार्यं घटरुचकादि। अतो ब्रह्मविलक्षणस्यास्य जगतस्तत्कार्यत्वं न सम्भवतीति साङ्ख्यस्मृत्यनुरोधेन कार्यसलक्षणं प्रधानमेव कारणं भवितुमर्हति। अवश्यं च शास्त्रस्यान्यापेक्षस्यातीन्द्रियार्थगोचरस्यापि तर्कोऽनुसरणीयः; यतस्सर्वेषां प्रमाणानां क्वचित्क्वचिद्विषये तर्कानुगृहीतानामेवार्थनिश्चयहेतुत्वम्। तर्को हि नाम—अर्थस्वभावविषयेण वा सामग्रीविषयेण वा निरूपणेनार्थविशेषे प्रमाणं व्यवस्थापयत्तदितिकर्तव्यतारूपमूहापरपर्यायं ज्ञानम्; तदपेक्षा च सर्वेषां प्रमाणानां समाना; शास्त्रस्य तु विशेषेणाकाङ्क्षासन्निधियोग्यताज्ञानाधीनप्रमाणभावस्य सर्वत्रैव तर्कानुग्रहापेक्षा; उक्तंच मनुना २"यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः" इति। तदेव हि तर्कानुगृहीतशास्त्रार्थप्रतिष्ठापनं श्रुत्या च ३"मन्तव्यः"इत्युच्यते। अथोच्येत—श्रुत्या जगतो ब्रह्मैककारणत्वे निश्चिते सति तत्कार्यस्यापि जगतश्चैतन्यानुवृत्तिरभ्युपगम्यते। यथा चेतनस्य सुषुप्तिमूर्च्छादिषु चैतन्यानुपलम्भः; तथा घटादिष्वपि सदैव चैतन्यमनुद्भूतम्; अत एव चेतनाचेतनविभागः—इति। नैतदुपपद्यते, यतो नित्यानुपलब्धिरसद्भावमेव साधयति। अत एव चैतन्यशक्तियोगोऽपि तेषु निरस्तः। यस्य हि क्वचित्कदाचिदपि यत्कार्यानुपलब्धिः, तस्य तत्कार्यशक्तिं ब्रुवाणो वन्ध्यासुतसमितिषु तज्जननीनां प्रजननशक्तिं ब्रूताम्। किञ्च वेदान्तैर्जगतो ब्रह्मोपादानताप्रतिपादननिश्चये सति घटादीनां चैतन्यशक्तेश्चैतन्यस्य वाऽनुद्भूतस्य सद्भावनिश्चयः, तन्निश्चये सति वेदान्तैर्जगतो ब्रह्मोपादानताप्रतिपादननिश्चय इतीतरेतराश्रयत्वम्। विलक्षणयोर्हि कार्यकारणभावः प्रतिपादयितुमेव

१. श्वे. १-८॥ २. मनु. १२-१०६॥ ३. बृ. ६-५-६॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न शक्यते । किं पुनः प्रकृतिविकारयोस्सालक्षण्यमभिप्रेतम्, यदभावाज्जगतो ब्रह्मोपादानताप्रतिपादनासम्भवं ब्रूषे; न तावत्सर्वधर्मसारूप्यम्, कार्यकारणभावानुपपत्तेः । नहि मृत्पिण्डकार्येषु घटशरावादिषु पिण्डत्वाद्यनुवृत्तिर्दृश्यते । अथ येनकेनचिद्धर्मेण सारूप्यम्, तज्जगद्ब्रह्मणोरपि सत्तादिलक्षणं सम्भवति—तदुच्यते, येन स्वभावेन कारणभूतं वस्तु वस्त्वन्तराद्व्यावृत्तम्, तस्य स्वभावस्य तत्कार्येऽप्यनुवृत्तिः कार्यस्य कारणसालक्षण्यम्, येन ह्याकारेण मृदादिभ्यो हिरण्यं व्यावर्तते, तदाकारानुवृत्तिस्तत्कार्येषु कुण्डलादिषु दृश्यते । ब्रह्म च हेयप्रत्यनीकज्ञानानन्दैश्वर्यस्वभावम्, जगच्च तत्प्रत्यनीकस्वभावमिति न तदुपादानम्। ननु च वैलक्षण्येऽपि कार्यकारणभावो दृश्यते, यथा चेतनात्पुरुषादचेतनानि केशनखदन्तलोमानि जायन्ते; यथाचाचेतनाद्गोमयाच्चेतनो वृश्चिको जायते; चेतनाच्चोर्णनाभेरचेतनस्तन्तुः; नैतदेवम्, यतस्तत्राप्यचेतनांश एव कार्यकारणभावः ॥ ४ ॥

अथ स्यात्—अचेतनत्वेनाभिमतानामपि चैतन्ययोगश्रुतिषु श्राव्यते [१]"तं पृथिव्यब्रवीत्" [२]"आपो वा अकामयन्त" [३]"ते हेमे प्राणा अहंश्रेयसे विवदमाना ब्रह्माणं जग्मुः" इति । नदीसमुद्रपर्वतादीनामपि चेतनत्वं पौराणिका आतिष्ठन्ते; अतो न वैलक्षण्यम्—इति । अत उत्तरं पठति—

अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम् । २। १। ५॥

तुशब्दश्चोदिताशङ्कानिवृत्त्यर्थः; पृथिव्याद्यभिमानिन्यो देवताः [१]"तं पृथिव्यब्रवीत्" इत्यादिषु पृथिव्यादिशब्दैर्व्यपदिश्यन्ते । कुतः?

१.यजुषि. ५-का. ५-प्र. २-अनु॥ २.यजुषि. ३-अष्टक. १-प्र. ५-अनु॥ ३. बृ.८-१-७॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषानुगतिभ्यां–विशेषः–विशेषणम्, देवताशब्देन विशेष्य पृथिव्यादयोऽभिधीयन्ते, [१]"हन्ताऽहमिमास्तिस्रो देवताः" इति तेजोऽबन्नानि देवताशब्देन विशेष्यन्ते, [२]"सर्वा हवै देवता अहंश्रेयसे विवदमानाः" [२]"ते देवाः प्राणे निःश्रेयसं विदित्वा" इति च; अनुगतिः–अनुप्रवेशः; [३]"अग्निर्वाग्भूत्वा मुखं प्राविशत्। आदित्यश्चक्षुर्भूत्वाऽक्षिणी प्राविशत्। वायुः प्राणो भूत्वा नासिके प्राविशत्" इत्यादिना वागाद्यभिमानित्वेनाग्न्यादीनामनुप्रवेशश्श्रूयते। अतो जगतोऽचेतनत्वेन विलक्षणत्वाद्ब्रह्मकार्यत्वानुपपत्तेस्तर्कानुगृहीतस्मृत्यनुरोधेन जगतः प्रधानोपादानत्वं वेदान्तैः प्रतिपाद्यते–इति ॥ ५ ॥

(सिद्धान्तः)

एवं प्राप्तेऽभिधीयते—

दृश्यते तु । २ । १ । ६ ॥

तुशब्दात्पक्षो विपरिवर्तते; यदुक्तं–जगतो ब्रह्मविलक्षणत्वेन ब्रह्मोपादानत्वं न सम्भवति–इति; तदयुक्तम्, विलक्षणयोरपि कार्यकारणभावदर्शनात्। दृश्यते हि माक्षिकादेर्विलक्षणस्य क्रिम्यादेस्तस्मादुत्पत्तिः। ननूक्तमचेतनांश एव कार्यकारणभावात्तत्र सालक्षण्यम्। सत्यमुक्तम्, न तावता कार्यकारणयोर्भवदभिमतसालक्षण्यसिद्धिः; यथा कथञ्चित्सालक्षण्ये सर्वस्य सर्वसालक्षण्येन सर्वस्मात्सर्वोत्पत्तिप्रसङ्गभयाद्वस्तुनो वस्त्वन्तराद्व्यावृत्तिहेतुभूतस्याकारस्यानुवृत्तिस्सालक्षण्यं भवताऽभ्युपेतम्; स तु नियमो माक्षिकादिभ्यः क्रिम्याद्युत्पत्तौ न दृश्यत इति ब्रह्मविलक्षणस्यापि जगतो ब्रह्मकार्यत्वं नानुपपन्नम्। नहि मृद्धिरण्य-

१. छा. ६-३-२ ॥
२. कौषी. २-९ ॥
३. ऐतरेय. १-२-४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

घटमकुटादिष्विव वस्त्वन्तरव्यावृत्तिहेतुभूतासाधारणाकारानुवृत्तिर्मार्क्षिकलौमयक्रिमिवृश्चिकादिषु दृश्यते ॥ ६ ॥

असदितिचेन्न प्रतिषेधमात्रत्वात् । २। १। ७॥

यदि कार्यभूताज्जगतः कारणभूतं ब्रह्म विलक्षणम्, तर्हि कार्यकारणयोर्द्रव्यान्तरत्वेन कारणे परस्मिन्ब्रह्मणि कार्यं जगन्न विद्यत इत्यसत एव जगत उत्पत्तिः प्रसज्यत इति चेत्—नैतदेवम्, कार्यकारणयोस्सालक्षण्यनियमप्रतिषेधमात्रमेव हि पूर्वसूत्रेऽभिप्रेतम्; न तु कारणात्कार्यस्य द्रव्यान्तरत्वम्; कारणभूतं ब्रह्मैव स्वस्माद्विलक्षणजगदाकारेण परिणमत इत्येतत्तु न परित्यक्तम्; क्रिमिमाक्षिकयोरपि हि सति च वैलक्षण्ये कुण्डलहिरण्ययोरिव द्रव्यैक्यमस्त्येव ॥ ७ ॥

अत्र चोदयति—

अपीतौ तद्वत्प्रसङ्गादसमञ्जसम् । २। १। ८॥

अपीताविति अपीतिपूर्वकसृष्ट्यादेः प्रदर्शनार्थम्, [१]"सदेव सोम्येदमग्र आसीत्" [२]"आत्मा वा इदमेक एवाग्र आसीत्" इत्यादिष्वप्यवस्थोपदेशपूर्वकत्वदर्शनात्सृष्ट्यादेः । यदि कार्यकारणयोर्द्रव्यैक्यमभ्युपेतम्, तदा कार्यस्य जगतो ब्रह्मण्यप्ययसृष्ट्यादिषु सत्सु ब्रह्मण एव तत्तदवस्थान्वय इति कार्यगतास्सर्वे एवापुरुषार्था ब्रह्मणि प्रसज्येरन्, सुवर्ण इव कुण्डलगता विशेषाः । ततश्च वेदान्तवाक्यं सर्वमसमञ्जसं स्यात्, [३]"यस्सर्वज्ञस्सर्ववित्" [४]"अपहतपाप्मा विजरो विमृत्युः" [५]"न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते"

१. छा. ६-२-१ ॥
२. ऐतरेय. १-१-१ ॥
३. मु. १-१-९ ॥
४. छा. ८-१-५ ॥
५. श्वे. ६-८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

[1]"तयोरन्यः पिप्पलं स्वाद्वत्ति" [2]"अनीशश्चात्मा बध्यते भोक्तृभावात्" [3]"अनीशया शोचति मुह्यमानः" इत्येकस्मिन्नेव वस्तुन्येषां परस्परविरुद्धानां प्रसक्तेः । अथोच्येत–चिदचिद्वस्तुशरीरकस्य परस्यैव ब्रह्मणः कार्यकारणभावाच्छरीरभूतचिदचिद्वस्तुगतत्वाच्च दोषाणाम्, न शरीरिणि ब्रह्मणि कार्यावस्थे कारणावस्थे च प्रसङ्गः—इति । तदयुक्तम्, जगद्ब्रह्मणोऽशरीरशरीरिभावस्यैवासम्भवात्, सम्भवे च ब्रह्मणि शरीरसम्बन्धनिबन्धनदोषाणामनिवार्यत्वात्; न हि चिदचिद्वस्तुनोर्ब्रह्मणश्शरीरत्वं सम्भवति, शरीरं हि नाम कर्मफलरूपसुखदुःखभोगसाधनभूतेन्द्रियाश्रयः पञ्चवृत्तिप्राणाधीनधारणः पृथिव्यादिभूतसङ्घातविशेषः, तथाविधस्यैव लोकवेदयोश्शरीरत्वप्रसिद्धेः । परमात्मनश्च [4]"अपहतपाप्मा विजरः" [5]"अनश्नन्नन्यो अभिचाकशीति" [6]"अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुस्स शृणोत्यकर्णः" "अप्राणो ह्यमनाः" इत्यादिभिः कर्मतत्फलभोगयोरभावादिन्द्रियाधीनभोगत्वाभावात्प्राणवत्त्वाभावाच्च न तं प्रति चेतनाचेतनयोश्शरीरत्वम् । नचाचेतनव्यष्टिरूपतृणकाष्ठादीनां समष्टिरूपस्य भूतसूक्ष्मस्य चेन्द्रियाश्रयत्वादि सम्भवति । भूतसूक्ष्मस्य पृथिव्यादिसङ्घातत्वं च न विद्यते । चेतनस्य तु ज्ञानैकाकारस्य सर्वमेतन्न सम्भवतीति नतरां शरीरत्वसम्भवः । नच भोगायतनत्वं शरीरत्वमिति शरीरत्वसम्भवः, भोगायतनेषु वेश्मादिषु शरीरत्वाप्रसिद्धेः; यत्र वर्तमानस्यैव सुखदुःखोपभोगः, तदेव भोगायतनमितिचेन्न, परकायप्रवेशजन्मसुखदुःखोपभोगायतनस्य परकायस्य प्रविष्टशरीरत्वाप्रसिद्धेः; ईश्वरस्य तु स्वतस्सिद्धनित्यनिरतिशयानन्दस्य भोगं प्रति चिदचितोरायतनत्वनियमो न सम्भवति । एतेन भोगसाधनमात्रस्य श-

१. मु. ३-१-१ ॥
२. श्वे. १-८ ॥
३. मु. ३-१-२ ॥
४. छा. ८-१-५ ॥
५. श्वे. ३-१९ ॥
६. मु. २-१-२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रीरत्वं प्रत्युक्तम् । अथ मतं–यदिच्छाधीनस्वरूपस्थितिप्रवृत्ति यत्, तत्तस्य शरीरमिति, सर्वस्येश्वरेच्छाधीनस्वरूपस्थितिप्रवृत्तित्वेनेश्वरशरीरत्वं सम्भवति–इति; तदपि न साधीयः, शरीरतया प्रसिद्धेषु तत्तच्चेतनेच्छायत्तस्वरूपत्वाभावात्, रुग्णशरीरस्य तदिच्छाधीनप्रवृत्तित्वाभावात्, मृतशरीरस्य तदात्मायत्तस्थितित्वाभावाच्च, सालभञ्जिकादिषु चेतनेच्छाधीनस्वरूपस्थितिप्रवृत्तिषु तच्छरीरत्वाप्रसिद्धेश्च, चेतनस्य नित्यस्येश्वरेच्छायत्तस्वरूपत्वाभावाच्च, न तच्छरीरत्वसम्भवः । नच यद्यदेकनियाम्यम्, यदेकधार्यम्, यस्यैकशेषभूतम्, तत्तस्य शरीरमिति वाच्यम्; क्रियादिषु व्यभिचारात् । [१]"अशरीरं शरीरेषु" [२]"अपाणिपादो जवनो ग्रहीता"इत्यादिभिश्चेश्वरस्य शरीराभावः प्रतिपाद्यते।अतो जगद्ब्रह्मणोश्शरीरशरीरिभावस्यासम्भवात्तत्सम्भवे च ब्रह्मणि दोषप्रसङ्गाद्ब्रह्मकारणवादे वेदान्तवाक्यानामसामञ्जस्यम्–इति ॥ ८ ॥

(सिद्धान्तः.)

अत्रोत्तरम्—

न तु दृष्टान्तभावात् । २ । १ । ९ ॥

नैवमसामञ्जस्यम्–एकस्यैवावस्थाद्वयान्वयेऽपि गुणदोषव्यवस्थितेर्दृष्टान्तस्य विद्यमानत्वात्। तुशब्दोऽत्र हेयसम्बन्धगन्धस्यासम्भावनीयतां द्योतयति । एतदुक्तं भवति–चिदचिद्वस्तुशरीरतया तदात्मभूतस्य परस्य ब्रह्मणस्सङ्कोचविकासात्मककार्यकारणभावावस्थाद्वयान्वयेऽपि न कश्चिद्विरोधः; यतस्सङ्कोचविकासौ परब्रह्मशरीरभूतचिदचिद्वस्तुगतौ, शरीरगतास्तु दोषा नात्मनि प्रसज्यन्ते; आत्मगताश्च गुणा न शरीरे; यथा देवमनुष्यादीनां सशरीराणां क्षेत्रज्ञानां शरीरगता बालत्वयुवत्वस्थविरत्वा-

१. कठ. १-२-२२ ॥ २. श्वे. ३-१९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दयो नात्मनि सम्बध्यन्ते; आत्मगताश्च ज्ञानसुखादयो न शरीरे । अथ च 'देवो जातो मनुष्यो जातः, तथा स एव बालो युवा स्थविरश्च' इति व्यपदेशश्च मुख्यः; भूतसूक्ष्मशरीरस्यैव क्षेत्रज्ञस्य देवमनुष्यादिभाव इति [१]"तदन्तरप्रतिपत्तौ" इति वक्ष्यते—इति। यत्पुनरुक्तं—चिदचिदात्मकस्य जगतस्स्थूलस्य सूक्ष्मस्य च परमात्मानं प्रति शरीरभावो नोपपद्यते—इति; तदनाकलितसम्यङ्न्यायानुगृहीतवेदान्तवाक्यगणस्य स्वमतिपरिकल्पितकुतर्कविजृम्भितम्; सर्व एवहि वेदान्ताः स्थूलस्य सूक्ष्मस्य चेतनस्याचेतनस्य समस्तस्य च परमात्मानं प्रति शरीरत्वं श्रावयन्ति; वाजसनेयके तावत्काण्वशाखायां चान्तर्यामिब्राह्मणे [२]"यः पृथिव्यां तिष्ठन्.....यस्य पृथिवी शरीरम्" इत्यारभ्य पृथिव्यादिसमस्तमचिद्वस्तु [३]"यो विज्ञाने तिष्ठन्.....यस्य विज्ञानं शरीरम्" [४]"य आत्मनि तिष्ठन्.....यस्यात्मा शरीरम्" इति चेतनमचेतनं च पृथक्पृथङ्निर्दिश्य तस्य तस्य परमात्मशरीरत्वमभिधीयते । सुबालोपनिषदि च [५]"यः पृथिवीमन्तरे सञ्चरन्यस्य पृथिवी शरीरम्" इत्यारभ्य तद्वदेव चिदचितोस्सर्वावस्थयोः परमात्मशरीरत्वमभिधाय [५]"एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः" इति तस्य सर्वभूतानि प्रत्यात्मत्वमभिधीयते । स्मरन्ति च [६]"जगत्सर्वं शरीरं ते" [७]"यदम्बु वैष्णवः कायः" [८]"तत्सर्वं वै हरेस्तनुः" [९]"तानि सर्वाणि तद्वपुः" [१०]"सोऽभिध्याय शरीरात्स्वात्" इत्यादि। भूतसूक्ष्मात्स्वाच्छरीरादित्यर्थः। लोके च शरीरशब्दो घटादिशब्दवदेकाकारद्रव्यनियतवृत्तिमनासादितः क्रिमिकीटपतङ्गसर्पनर-

१. शारी. ३-१-१ ॥
२. बृ. ५-७-३ ॥
३. बृ. ५-७-२२ ॥
४. बृ. ५-७-२२ ॥ मा. पाठः ॥
५. सुबाल. ७. ख ॥
६. रामायणे. युद्धकाण्डे. १२०-सर्गे. २९-श्लो॥
७. वि. पु. २-१२-३७ ॥
८. वि पु. १-२२-३८ ॥
९. वि. पु. १-२२-८६ ॥
१०. मनु. १-८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पशुप्रभृतिष्वत्यन्तविलक्षणाकारेषु द्रव्येष्वगौणः प्रयुज्यमानो दृश्यते । तेन तस्य प्रवृत्तिनिमित्तव्यवस्थापनं सर्वप्रयोगानुगुण्येनैव कार्यम् । त्वदुक्तं च 'कर्मफलभोगहेतुः' इत्यादिकं प्रवृत्तिनिमित्तलक्षणं न सर्वप्रयोगानुगुणम्, यथोक्तेष्वीश्वरशरीरतयाऽभिहितेषु पृथिव्यादिष्वव्याप्तेः । किञ्च ईश्वरस्येच्छाविग्रहेषु मुक्तानां च [1]"स एकधा भवति" इत्यादिवाक्यावगतेषु विग्रहेषु तल्लक्षणमव्याप्तम्, कर्मफलभोगनिमित्तत्वाभावात्तेषाम्;परमपुरुषेच्छाविग्रहाश्च न पृथिव्यादिभूतसङ्घातविशेषाः [2]"न भूतसङ्घसंस्थानो देहोऽस्य परमात्मनः" इति स्मृतेः।अतो भूतसङ्घातरूपत्वं च शरीरस्याव्याप्तम् । पञ्चवृत्तिप्राणाधीनधारणत्वं च स्थावरशरीरेष्वव्याप्तम् । स्थावरेषु हि प्राणसद्भावेऽपि तस्य पञ्चधा अवस्थाय शरीरस्य धारकत्वेनावस्थानं नास्ति । अहल्यादीनां कर्मनिमित्तशिलाकाष्ठादिशरीरेष्विन्द्रियाश्रयत्वं सुखदुःखहेतुत्वं चाव्याप्तम् । अतो यस्य चेतनस्य यद्द्रव्यं सर्वात्मना स्वार्थे नियन्तुं धारयितुं च शक्यम्, तच्छेषतैकस्वरूपं च, तत्तस्य शरीरमिति शरीरलक्षणमास्थेयम् । रुग्णशरीरादिषु नियमनाद्यदर्शनं विद्यमानाया एव नियमनशक्तेः प्रतिबन्धकृतम्, अग्न्यादेर्दग्धशक्तिप्रतिबन्धादौष्ण्याद्यदर्शनवत्।मृतशरीरं च चेतनवियोगसमय एव विशरितुमारब्धम्; क्षणान्तरे च विशीर्यते। पूर्वं शरीरतया परिकृप्तसङ्घातैकदेशत्वेन च तत्र शरीरत्वव्यवहारः । अतस्सर्वं परमपुरुषेण सर्वात्मना स्वार्थे नियाम्यं धार्यं तच्छेषतैकस्वरूपमिति सर्वं चेतनाचेतनं तस्य शरीरम्। [3]"अशरीरं शरीरेषु"इत्यादिच कर्मनिमित्तशरीरप्रतिषेधपरम्, यथोक्तसर्वशरीरत्वश्रवणात् । उपरितनाधिकरणेषु चैतदुपपादयिष्यते। 'अपीतौ तद्वत्प्रसङ्गादसमञ्जसं' 'नतु दृष्टान्तभा-

---

१. छा. ७-२-६२ ॥
२. भारते ॥
३. कठ. २-२२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वात्' इति सूत्रद्वयेन[1] "इतरव्यपदेशात्" इत्यधिकरणसिद्धोऽर्थस्स्मारितः॥

स्वपक्षदोषाच्च । २ । १ । १० ॥

न केवलं ब्रह्मकारणवादस्य निर्दोषतयैतत्समाश्रयणम् ; प्रधानकारणवादस्य दुष्टत्वाच्च तत्परित्यज्यैतदेव समाश्रयणीयम् । प्रधानकारणवादे हि जगत्प्रवृत्तिर्नोपपद्यते । तत्र हि निर्विकारस्य चिन्मात्रैकरसस्य पुरुषस्य प्रकृतिसन्निधानेन प्रकृतिधर्माध्यासनिबन्धना जगत्प्रवृत्तिः। निर्विकारस्य चिन्मात्ररूपस्य प्रकृतिधर्माध्यासहेतुभूतं प्रकृतिसन्निधानं किंरूपमिति विवेचनीयम् ; किं प्रकृतेस्सद्भाव एव; उत तद्गतः कश्चिद्विकारः ; अथ पुरुषगत एव कश्चिद्विकारः। न तावत्पुरुषगतः, अनभ्युपगमात् ; नापि प्रकृतेर्विकारः, तस्याध्यासकार्यतयाऽभ्युपेतस्याध्यासहेतुत्वासम्भवात् ; सद्भावमात्रस्य सन्निधानत्वे मुक्तस्याप्यध्यासप्रसङ्ग इति त्वत्पक्षे जगत्प्रवृत्तिर्नोपपद्यते। अयमर्थस्साङ्ख्यपक्षप्रतिक्षेपसमये[2] "अभ्युपगमेऽप्यर्थाभावात्" इत्यादिना प्रपञ्चयिष्यते ॥ १० ॥

तर्काप्रतिष्ठानादपि । २ । १ । ११ ॥

तर्कस्याप्रतिष्ठितत्वादपि श्रुतिमूलो ब्रह्मकारणवाद एव समाश्रयणीयः; न प्रधानकारणवादः । शाक्योलूक्याक्षपादक्षपणकपिलपतञ्जलितर्काणामन्योन्यव्याघातात्तर्कस्याप्रतिष्ठितत्वं गम्यते ॥ ११ ॥

अन्यथानुमेयमिति चेदेवमप्यनिर्मोक्षप्रसङ्गः । २ । १ । १२ ॥

इदानीं विद्यमानानां शाक्यादीनां तर्कानुदूष्यान्यथा प्रधानकारणवादमतिक्रान्ततदुपदर्शितदूषणत्वेनानुमास्यामह इति चेत्—एवमपि

१. शारी. २-१-२१ ॥ २. शारी. २-२-८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पुरुषबुद्धिमूलतर्कैकावलम्बनस्य तथैव देशान्तरकालान्तरेषु त्वदधिकतर्ककुशलपुरुषोत्प्रेक्षिततर्कदूष्यत्वसम्भावनया तर्काप्रतिष्ठानदोषादनिर्मोक्षो दुर्वारः। अतोऽतीन्द्रियेऽर्थे शास्त्रमेव प्रमाणम्; तदुपबृंहणायैव तर्क उपादेयः; तथाचाह [१]"आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना। यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः" इति। वेदाख्यशास्त्राविरोधिनेत्यर्थः। अतो वेदविरोधित्वेन वेदार्थविशदीकरणरूपवेदोपबृंहणतर्कोपादानाय साङ्ख्यस्मृतिर्नादरणीया ॥ १२ ॥

इति श्रीशारीरकमीमांसाभाष्ये विलक्षणत्वाधिकरणम् ॥ ३ ॥

वेदान्तसारे—न विलक्षणत्वादस्य तथात्वं च शब्दात् ॥ विकारास्पदत्वेनाज्ञत्वेनापुरुषार्थाश्रयत्वेन च जगतो ब्रह्मविलक्षणत्वात्तत्कार्यत्वञ्च सम्भवति; विलक्षणत्वञ्च शब्दाच्चावगम्यते,[२]"विज्ञानञ्चाविज्ञानञ्च" इत्यादेः॥

अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम् ॥ ३"तं पृथिव्यब्रवीत्" ४"आपो वा अकामयन्त" इत्यादौ ज्ञानकार्यव्यपदेशः तत्तदभिमानिदेवताविषय इति, ५"हन्ताहमिमास्तिस्रो देवताः" इति देवताशब्देन विशेषितत्वात्, ६"अग्निर्वाग्भूत्वा मुखं प्राविशत्" इत्यादिना तत्तदचिद्वस्त्वभिमानित्वेन देवतानुगतेश्चावगम्यते ॥ ५ ॥

दृश्यते तु ॥ विलक्षणयोरपि कार्यकारणभावस्सम्भवति,माक्षिकादिभ्यः क्रिम्याद्युत्पत्तिदर्शनात् ॥ ६ ॥

असदितिचेन्न प्रतिषेधमात्रत्वात् ॥ एवन्तर्हि कार्यं कारणे असदितिचेत्—न, सालक्षण्यनियमप्रतिषेधमात्रत्वात्, पूर्वोक्तं कार्यकारणयोर्वस्त्वैक्यन्न त्यक्तम् ॥ ७ ॥

अपीतौ तद्वत्प्रसङ्गादसमञ्जसम् ॥ जगतो ब्रह्मकारणत्वेन वस्त्वैक्येन तस्मिन्नपीत्यादौ जगत इव ब्रह्मणोऽपि विकारित्वाद्यनिष्टप्रसङ्गाद्भेदान्तवाक्यं

---

१. मनु. १२-१०६ ॥
२. तै. आन. ६ ॥
३. यजुषि.५-काण्ड.५-प्रश्न.२-अनु.१०-वा.
४. अष्टक-३. प्र-१. अनु-५ ॥
५. छा. ६-३-२ ॥
६. ऐतरेय. २-४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सर्वमसमञ्जसं स्यात् ॥ ८ ॥

न तु दृष्टान्तभावात् ॥ नैतत् १"यस्यात्मा शरीरम्" २"यस्याव्यक्तं शरीरम्" इत्यादिश्रुतिसिद्धचिदचिद्वस्तुशरीरकस्य ब्रह्मणः कार्यकारणभावेनावस्थाने गुणदोषव्यवस्थितेः दृष्टान्तसद्भावात्, यथा जीवस्य सशरीरस्य मनुष्याद्यात्मनो बालत्वयुवत्वस्थविरत्वादिभावेऽपि बालत्वादयश्शरीरे तिष्ठन्ति,ज्ञानसुखादयश्चात्मन्येव; तद्वदत्रापि शरीरभूतचिदचिद्वस्तुगतान्यज्ञानविकारादीनि दोषाः । आत्मभूतेतु ब्रह्मणि निरवद्यत्वाविकारित्वसार्वज्ञसत्यसङ्कल्पत्वादयः ॥ ९ ॥

स्वपक्षदोषाच्च ॥ प्रधानकारणदोषाच्चायमेव ग्राह्यः । प्रधानकारणवादे हि निर्विकारपुरुषसन्निधानात् प्रकृतिप्रवृत्तावितरेतरधर्माध्यासादयो दुरुपपादाः । अन्यत्रान्यधर्मानुसन्धानरूपोऽध्यासः निर्विकारपुरुषस्य न सम्भवति, अचेतनायाः प्रकृतेरनुसन्धानरूपोऽध्यासस्सुतरान्न सम्भवति ॥ १० ॥

तर्काप्रतिष्ठानादपि ॥ प्रधानकारणवादस्य कुतर्कमूलत्वात् तस्याप्रतिष्ठितत्वादपि त्याज्यं प्रधानम् ॥ ११ ॥

अन्यथाऽनुमेयमितिचेदेवमप्यनिर्मोक्षप्रसङ्गः ॥ कृतप्रकारात् प्रकारान्तरेण प्रधानमनुमेयमिति चेत्—एवमपि ततोऽधिककुतर्ककुशलसम्भावनया अप्रतिष्ठितत्वात् अनिर्मोक्षप्रसङ्गः दुर्वारस्स्यात् ॥ १२ ॥

इति वेदान्तसारे विलक्षणत्वाधिकरणम् ॥ ३ ॥

वेदान्तदीपे—न विलक्षणत्वादस्य तथात्वं च शब्दात् ॥ किं वेदान्तानां जगत्कारणतया प्रधानपरत्वम् ? उत ब्रह्मपरत्वमिति संशयः । प्रधानपरत्वमिति पूर्वः पक्षः, अज्ञत्वादिना जगतो ब्रह्मविलक्षणत्वेन ब्रह्मकार्यत्वप्रतिपादनासम्भवात्, सालक्षण्येन प्रधानकार्यत्वप्रतिपादनपरत्वस्य च सम्भवात्। सिद्धान्तस्तु—माक्षिकादिभ्यः क्रिम्यादीनां विलक्षणानामुत्पत्तिदर्शनात् ब्रह्मविलक्षणस्य जगतः तत्कार्यत्वं सम्भवत्येव—इति । सूत्रार्थस्तु—अज्ञत्वेनासुखत्वेनचोपलब्धस्य चास्य जगतः सर्वज्ञाद्धेयप्रत्यनीकानिरतिशयानन्दाद्ब्रह्मणो विलक्षणत्वेन जगतो ब्रह्मकार्यत्वप्रतिपादनं वेदान्तानां न सम्भवति । तथात्वं

१. बृ. ५-७-२२. मा. पा ॥ २. सुबाल. ७-खं ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विलक्षणत्वं च शब्दादवगम्यते, न केवलं प्रत्यक्षाद्युपलब्ध्या, १"विज्ञानञ्चाविज्ञानञ्च" २"अनीशया शोचति मुह्यमानः" ३"अनीशश्चात्मा बध्यते भोक्तृभावात्" इत्यादेः ॥ ४ ॥

४"आपो वा अकामयन्त" ५"तं पृथिव्यब्रवीत्" इत्यादौ पृथिव्यादेरपि ज्ञानकार्यं व्यपदिश्यते, तस्मात्, ६"अविज्ञानञ्च" इत्येतदन्यपरमित्यत उत्तरं पठति—

अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम् ॥ तुशब्दश्चोद्यं व्यावर्तयति; पृथिव्याद्यभिमानिदेवतानामयं व्यपदेशः। कुतोऽवगम्यते, विशेषानुगतिभ्यां—विशेषः विशेषणम्. ७"हन्ताहमिमास्तिस्रो देवताः" इति पृथिव्यादेर्देवताशब्देन विशेषणं दृश्यते, ८"सर्वा ह वै देवता अहंश्रेयसे विवदमानाः" इति च वागादिप्राणपर्यन्तस्य च। तथा अनुगतिः-अनुप्रवेशः, अग्न्यादीनां वागाद्यनुप्रवेशो दृश्यते, ९"अग्निर्वाग्भूत्वा मुखं प्राविशत् आदित्यश्चक्षुर्भूत्वाऽक्षिणी प्राविशत् वायुः प्राणो भूत्वा नासिके प्राविशत्" इत्यादौ ॥ ५ ॥

दृश्यते तु ॥ तुशब्दः पक्षं व्यावर्तयति, माक्षिकादिभ्यो विलक्षणानां क्रिम्यादीनामुत्पत्तिर्दृश्यते, अतो ब्रह्मविलक्षणस्यापि जगतस्तत्कार्यत्वं सम्भवति ॥ ६ ॥

असदितिचेन्न प्रतिषेधमात्रत्वात् ॥ यदि कार्यस्य कारणाद्विलक्षणद्रव्यत्वमभ्युपगम्यते, तर्हि कारणे कार्यं न सद्भवतीत्यसत्कार्यवादोऽभ्युपगतस्यात्; तथा सति १०"सर्वं खल्विदं ब्रह्म" इति सामानाधिकरण्यव्यपदेशो न घटत इति चेत्—तन्न, कार्यकारणयोस्सालक्षण्यनियमप्रतिषेधमात्रत्वादस्माभिः पूर्वमभिहितस्य। कार्यकारणयोरेकद्रव्यत्वं स्वीकृतमेव। एकमेव कारणावस्थं द्रव्यं कार्यावस्थाम्भजमानं सलक्षणावस्थामपि भजते, विलक्षणावस्थामपीत्यर्थः ॥ ७ ॥

अपीतौ तद्वत्प्रसङ्गादसमञ्जसम् ॥ यदि ब्रह्मैव सर्वज्ञं सत्यसङ्कल्पं निरतिशयानन्दमपहतपाप्मत्वादिस्वरूपं तद्विपरीतजगदवस्थां भजते; तर्हि पि-

१. तै. आन. ६ ॥
२. मु. ३-१-२ ॥ ३. श्वे. १-७ ॥
४. ३. अष्टक. १-प्रश्न. ५-अनु ॥
५. यजुषि. ५. काण्ड. ५. प्रश्न. २-अनु. १०-वा ॥
६. तै. आन. ६ ॥ ७. छा. ६-३-२ ॥
८. बृ. ८-१-६ ॥
९. ऐतरेय. २-४॥ १०. छा. ३-१४ १॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ण्डत्वघटत्वावस्थमृद्द्रव्यवत्सर्वज्ञत्वमपहतपाप्मत्वमज्ञत्वं कर्मवश्यत्वं च ब्रह्मणः प्रसज्यत इति विरुद्धार्थाभिधानाद्वेदान्तवाक्यमसमञ्जसं स्यात्। अपीताविति प्रदर्शनार्थम्। जगतो ब्रह्मणि अपीतौ ब्रह्मण उत्पत्तावपीत्यर्थः। अपीतिः अप्ययः॥

न तु दृष्टान्तभावात् ॥ न ब्रह्मण्यज्ञत्वादयः प्रसज्येरन्; अत एव न वेदान्तानामसामञ्जस्यम्, तुशब्दः प्रसक्तस्यासम्भावनीयतां द्योतयति । एकस्यैवावस्थाद्वयान्वयेऽपि गुणदोषव्यवस्थायां दृष्टान्तसद्भावात्, यथा 'मनुष्यो जातो बालो युवा स्थविरो भवति' इत्यत्र मनुष्यशरीरकस्य चेतनस्यैव सर्वावस्थान्वयेऽपि जन्मबालत्वयुवत्वस्थविरत्वादीनि नात्मनि सङ्कच्छन्ते; तथा ज्ञानसुखदुःखादयश्च न शरीरे; एवं चिदचिद्वस्तुशरीरकस्य परस्य ब्रह्मणः कार्यकारणोभयावस्थान्वयेऽपि कर्मवश्यत्वाज्ञत्वादयः शरीरभूतचिदचिद्वस्तुगताः। अपहतपाप्मत्वसर्वज्ञत्वादयः परमात्मन्यात्मभूतेऽवतिष्ठन्ते। सर्वावस्थस्य चिदचिद्वस्तुनो ब्रह्मशरीरत्वम्, ब्रह्मणश्च तदात्मत्वम्, [1]"यस्य पृथिवी शरीरम्" इत्याद्यन्तर्यामिब्राह्मणादिष्ववगतमिति न कश्चिद्विरोधः ॥ ९ ॥

स्वपक्षदोषाच्च ॥ न केवलं ब्रह्मकारणवादस्य निर्दोषतया तत्समाश्रयणम्, प्रधानकारणवादे दोषाच्चैतत्परित्यज्य स एव समाश्रयणीयः। प्रधानकारणवादे हि निर्विकारस्य चिन्मात्रस्य पुरुषस्य प्रकृतिसन्निधानकृततद्धर्माध्यासमूला जगत्प्रवृत्तिरभ्युपगम्यते; तत्र प्रकृतिसद्भावमात्रे सन्निधाने सति मुक्तस्यापि तद्धर्माध्यासप्रसङ्गः; विकारविशेषे सति सन्निधाने कृत्स्नस्य विकारस्याध्यासपूर्वकत्वान्नाध्यासस्य विकारो हेतुरिति विरुद्धार्थाभिधानादसामञ्जस्यदोष इति न तत्पक्षसम्भवगन्धः ॥ १० ॥

तर्काप्रतिष्ठानादपि ॥ कापिलतन्त्रस्य तर्कमूलत्वेन शाक्यादितर्कप्रतिहततयाऽस्य तर्कस्याप्रतिष्ठितत्वाच्च न तत्पक्षसम्भवः ॥ ११ ॥

अन्यथाऽनुमेयमितिचेदेवमप्यनिर्मोक्षप्रसङ्गः ॥ इतः पूर्वं विद्यमानैस्तैस्तैरप्रतिहतत्वं यथा सम्भवति, तथा प्रधानकारणवादमनुरमन्यामहे—इति चेत्, तथापि तर्काप्रतिष्ठानदोषात् अनिर्मोक्षप्रसङ्गो दुर्वारः; त्वदधिककुतर्ककुशलसद्भावसम्भवात् ॥ १२ ॥

इति वेदान्तदीपे विलक्षणत्वाधिकरणम् ॥ ३ ॥

---

१. सुबाल. ७-खं ॥ २. मास्यामहे. पा ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एतेन शिष्टापरिग्रहा अपि व्याख्याताः ।२।१।१३॥

शिष्टाः परिशिष्टाः, न विद्यते वेदपरिग्रहो येषामित्यपरिग्रहाः; शिष्टाश्चापरिग्रहाश्च शिष्टापरिग्रहाः; एतेन वेदापरिगृहीतसाङ्ख्यपक्षक्षपणेन परिशिष्टाश्च वेदापरिगृहीताः कणभक्षाक्षपादक्षपणकभिक्षुपक्षाः क्षपिता वेदितव्याः। परमाणुकारणवादेऽमीषां सर्वेषां संवादात्कारणवस्तुविषयस्य तर्कस्याप्रतिष्ठितत्वं न शक्यते वक्तुमित्यधिकाशङ्का ॥

तावन्मात्रसंवादेऽपि तर्कमूलत्वाविशेषात्परमाणुस्वरूपेऽपि शून्यात्मकत्वाशून्यात्मकत्वज्ञानात्मकत्वार्थात्मकत्वक्षणिकत्वनित्यत्वैकान्तत्वानेकान्तत्वसत्यासत्यात्मकत्वादिविसंवाददर्शनाच्चाप्रतिष्ठितत्वमेवेतिपरिहारः ॥ १३ ॥

इति श्रीशारीरकमीमांसाभाष्ये शिष्टापरिग्रहाधिकरणम् ॥ ४ ॥

वेदान्तसारे—एतेन शिष्टापरिग्रहा अपि व्याख्याताः ॥ एतेन साङ्ख्यस्मृतिनिराकरणहेतुना तर्काप्रतिष्ठतत्वादिना परिशिष्टाश्च कणभक्षाक्षपादक्षपणकादिस्मृतयो निराकृताः ॥ १३ ॥

इति वेदान्तसारे शिष्टापरिग्रहाधिकरणम् ॥ ४ ॥

वेदान्तदीपे—एतेन शिष्टापरिग्रहा अपि व्याख्याताः ॥ न परिगृह्यन्ते वैदिकैरित्यपरिग्रहाः; शिष्टाश्च ते अपरिग्रहाश्च शिष्टापरिग्रहाः; एतेन तर्काप्रतिष्ठानलक्षणकापिलस्मृतिनिरसनहेतुना परिशिष्टाः कणभक्षादिस्मृतयोऽपि निरस्ता व्याख्याताः । परमाणुकारणवादस्सर्वसम्मत इति न तेषां तर्कस्याप्रतिष्ठितत्वमित्यधिकाऽशङ्का । तर्कमूलत्वाविशेषात् परमाणूनां शून्यत्वाद्द्रव्यत्वादिविवादाच्च, तर्कस्याप्रतिष्ठितत्वमेवेति परिहारः ॥ १३ ॥

इति वेदान्तदीपे शिष्टापरिग्रहाधिकरणम् ॥ ४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत्।२।१।१४॥

पुनरपि साङ्ख्यः प्रत्यवतिष्ठते—यदुक्तं, स्थूलसूक्ष्मचिदचिद्वस्तुशरीरस्य परस्य ब्रह्मणः कार्यकारणरूपत्वाज्जीवब्रह्मणोस्स्वभावविभाग उपपद्यते–इतिः स तु विभागो न सम्भवति—ब्रह्मणस्सशरीरत्वे तस्य भोक्तृत्वापत्तेः, सशरीरत्वे जीवस्येवेश्वरस्यापि सशरीरत्वप्रयुक्तसुखदुःखयोर्भोक्तृत्वस्यावर्जनीयत्वात्। ननु च [1]"सम्भोगप्राप्तिरितिचेन्न वैशेष्यात्" इत्यत्रेश्वरस्य भोगप्रसङ्गपरिहार उक्तः, नैवम् तत्र ह्युपास्यतया हृदयायतने सन्निहितस्य शरीरान्तर्वर्तित्वमात्रेण भोगप्रसङ्गो न विद्यत इत्युक्तम्, इह तु जीववद्ब्रह्मणोऽपि सशरीरत्वे तद्वदेव सुखदुःखयोर्भोक्तृत्वप्रसङ्गो दुर्वार इत्युच्यते; दृश्यते हि सशरीराणां जीवानां शरीरगतबालत्वस्थविरत्वादिविकारासम्भवेऽपि शरीरधातुसाम्यवैषम्यनिमित्तसुखदुःखयोगः। श्रुतिश्च [2]"न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति अशरीरं वा व सन्तं न प्रियाप्रिये स्पृशतः" इति। अतस्सशरीरब्रह्मकारणवादे जीवेश्वरस्वभावविभागासम्भवात्केवलब्रह्मकारणवादे मृत्सुवर्णादिवज्जगद्वतापुरुषार्थादिसर्वविशेषाश्रयत्वप्रसङ्गाच्च प्रधानकारणवाद एव ज्यायानिति चेत्—

(सिद्धान्तः)

अत्रोत्तरं—स्याल्लोकवत्–इति। स्यादेव विभागो जीवेश्वरस्वभावयोः; नहि जीवस्य शरीरधातुसाम्यवैषम्यनिमित्तं सुखदुःखयोभोक्तृत्वं सशरीरत्वकृतम्, अपि तु पुण्यपापरूपकर्मकृतम्। [2] "न ह वै

१ शारी. १-२-८॥ २. छा. ८-१२-१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सशरीरस्य" इत्यपि कर्मारब्धदेहविषयम्, [१]"स एकधा भवति त्रिधा भवति"[२]"स यदि पितृलोककामो भवति" [३]"स तत्र पर्येति जक्षत्क्रीडन्रममाणः" इति कर्मबन्धविनिर्मुक्तस्याविर्भूतस्वरूपस्य सशरीरस्यैवापुरुषार्थगन्धाभावात्। अपहतपाप्मनस्तु परमात्मनस्स्थूलसूक्ष्मरूपकृत्स्नजगच्छरीरत्वेऽपि कर्मसम्बन्धगन्धो नास्तीति नतरामपुरुषार्थगन्धप्रसङ्गः। लोकवत्—यथा लोके राजशासनानुवर्तिनां तदतिवर्तिनां च राजानुग्रहनिग्रहकृतसुखदुःखयोगेऽपि न [४]शरीरित्वमात्रेण शासके राज्ञ्यपि शासनानुवृत्त्यतिवृत्तिनिमित्तसुखदुःखयोर्भोक्तृत्वप्रसङ्गः। यथाह द्रमिडभाष्यकारः [५]"यथा लोके राजा प्रचुरदन्दशूके घोरेऽनर्थसङ्कटेऽपि प्रदेशे वर्तमानो व्यजनाद्यवधूतदेहो दोषैर्न स्पृश्यते, अभिप्रेतांश्च लोकान् [६]परिपालयति, भोगांश्च गन्धादीनविश्वजनोपभोग्यान्धारयति, तथाऽसौ लोकेश्वरो भ्रमत्स्वसामर्थ्यचामरो दोषैर्न स्पृश्यते, रक्षति च लोकान्ब्रह्मलोकादीन्, भोगांश्चाविश्वजनोपभोग्यान्धारयति"इति।मृत्सुवर्णादिवद्ब्रह्मस्वरूपपरिणामस्तु नैवाभ्युपगम्यते, अविकारत्वनिर्दोषत्वादिश्रुतेः॥

यत्तु परैर्ब्रह्मकारणवादे भोक्तृभोग्यविभागाभावमाशङ्क्य समुद्रफेनतरङ्गदृष्टान्तेन विभागप्रतिपादनपरं सूत्रं व्याख्यातम्; तदयुक्तम्, अन्तर्भावितशक्त्यविद्योपाधिकाद्ब्रह्मणस्सृष्टिमभ्युपगच्छतामेवमाक्षेपपरिहारयोरसङ्गतत्वात्,कारणान्तर्गतशक्त्यविद्योपाध्युपहितस्य भोक्तृत्वादुपाधेश्च भोग्यत्वात्। विलक्षणयोस्तयोः परस्परभावापत्तिर्हि न सम्भवति - स्वरूपपरिणामस्तु तैरपि नाभ्युपेयते, [७]"न कर्माविभागादितिचेन्नानादित्वात्" इति क्षेत्रज्ञानां तद्गतकर्मणां चानादित्वप्रतिपादनात्। स्वरूपपरिणामाभ्युपगमेऽपि भोक्तृभोग्याविभागाशङ्का कस्यचिदपि न जायते

१. छा. ७-२६-२॥
२. छा. ८-२-१॥ ३. छा. ८-१२-३॥
४. सशरीरत्व. पा॥ ५. द्रमिडभाष्यम्॥
६. परिपिपालयिषति, परिपालयिष्यतीति च. पा॥
७. शारी. २-१-३५॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मृत्सुवर्णादिपरिणामरूपघटशरावकटकमकुटादिविभागवद्भोक्तृभोग्यविभागोपपत्तेः । स्वरूपपरिणामे च ब्रह्मण एव भोक्तृभोग्यत्वापत्तिरिति पुनरप्यसामञ्जस्यमेव ॥ १४ ॥

इति श्रीशारीरकमीमांसाभाष्ये भोक्त्रापत्त्यधिकरणम् ॥ ५ ॥

वेदान्तसारे—भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत् ॥ यदि चिदचिद्वस्तुशरीरकत्वेन ब्रह्मणोऽपि सशरीरत्वमिष्यते ; तर्हि जीववत्सशरीरत्वेन ब्रह्मणोऽपि शरीरसम्बन्धप्रयुक्तसुखदुःखभोक्तृत्वापत्तेः जीवादविभागप्रसक्तिरिति चेत्—न, स्यादेव जीवाद्विभागः, निरवद्यत्वकल्याणगुणाकरत्वेन ब्रह्मणः । न हि सशरीरत्वप्रयुक्तमनिष्टभोक्तृत्वम् ; अपित्वन्यवश्यत्वकृतम्। यथा लोके राज्ञस्सशरीरत्वेऽपि अनन्यवश्यस्य स्वाज्ञातिवृत्तिकृतानिष्टभोक्तृत्वन्नेतरसमानम्॥

इति वेदान्तसारे भोक्त्रापत्त्यधिकरणम् ॥ ५ ॥

वेदान्तदीपे—भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत् ॥ सर्वात्मभूतस्य परस्य ब्रह्मणः स्वशरीरभूताज्जीवान्निरतिशयानन्दस्वभावतया यो विभाग उक्तः, स किं विभागस्सम्भवति ? उत नेति संशयः । न सम्भवतीति पूर्वः पक्षः, सर्वचिदचिद्वस्तुशरीरतया शरीरित्वाद्ब्रह्मणः, सशरीरस्य च सुखदुःखयोः भोक्तृत्वापत्तेः। तदापत्तिश्च १"न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः"इति श्रुतेः। सिद्धान्तस्तु—स्यादेव विभागो जीवात्परस्याकर्मवश्यतया । न सशरीरत्वप्रयुक्तस्सुखदुःखयोगः; अपि तु शास्त्रवश्यतया तदतिवृत्तिकृतः; २"स एकधा भवति त्रिधा भवति" इत्यादिनाऽवगतशरीरस्य मुक्तस्य सशरीरस्याप्यशास्त्रवश्यतया निरस्तनिखिलदुःखत्वदर्शनात् । यथा लोके ३राजशासनवश्यानां तच्छासनातिवृत्तिनिमित्तदुःखान्वयेऽपि ४राज्ञः प्रकारान्तरेण साधर्म्येऽपि स्वशासनावश्यतया न तदतिवृत्तिकृतदुःखान्वयः । विभागः-वैलक्षण्यम् । सूत्रमपि व्याख्यातम् ॥ १४ ॥

इति वेदान्तदीपे भोक्त्रापत्त्यधिकरणम् ॥ ५ ॥

---

१. छा. ८-१२-१ ॥
२. छा. ७-२६-२ ॥
३. राजशासनवश्यानां शरीरिणां. पा ॥
४. राज्ञः सशरीरस्यापि. पा ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तदनन्यत्वमारम्भणशब्दादिभ्यः । २ । १ । १५ ॥

[1]"असदितिचेन्न प्रतिषेधमात्रत्वात्" इत्यादिषु कारणभूताद्ब्रह्मणः कार्यभूतस्य जगतोऽनन्यत्वमभ्युपगम्य ब्रह्मणो जगत्कारणत्वमुपपादितम्, इदानीं तदेवानन्यत्वमाक्षिप्य समाधीयते । तत्र काणादाः प्राहुः—न कारणात्कार्यस्यानन्यत्वं सम्भवति, विलक्षणबुद्धिबोध्यत्वात्, न खलु तन्तुपटमृत्पिण्डघटादिषु कार्यकारणविषया बुद्धिरेकरूपा । शब्दभेदाच्च, न हि तन्तवः पट इत्युच्यन्ते, पटो वा तन्तव इति । कार्यभेदाच्च, नहि मृत्पिण्डेनोदकमाहियते, घटेन वा कुड्यं निर्मीयते । कालभेदाच्च, पूर्वकालं च कारणम्, अपरकालं च कार्यम् । आकारभेदाच्च, पिण्डाकारं कारणम्, कार्यं च पृथुबुध्नोदराकारम्; तथा सत्यामेव मृदि घटो नष्ट इति व्यवहियते । सङ्ख्याभेदश्च दृश्यते—बहवस्तन्तवः, एकश्च पटः । कारकव्यापारवैयर्थ्यञ्च—कारणमेवचेत्कार्यं किं कारकव्यापारसाध्यं स्यात् । सत्यपि कार्ये कार्योपयोगितया कारकव्यापारेण भवितव्यं चेत्—सर्वदा कारकव्यापारेण नोपरन्तव्यम् । सर्वस्य सर्वदा सत्त्वेन नित्यानित्यविभागश्च न स्यात् । अथ कार्यं सदेव पूर्वमनभिव्यक्तं कारकव्यापारेणाभिव्यज्यते, अतः कारकव्यापारार्थवत्त्वं, नित्यानित्यविभागश्चोच्यते; तदसत्, अभिव्यक्तेरभिव्यक्त्यन्तरापेक्षत्वे अनवस्थानादनपेक्षत्वे कार्यस्य नित्योपलब्धिप्रसङ्गात्तदुत्पत्त्यभ्युपगमे चासत्कार्यवादप्रसङ्गात् । किञ्च कारकव्यापारस्याभिव्यञ्जकत्वे घटार्थेन कारकव्यापारेण करकादेरप्यभिव्यक्तिः प्रसज्यते, सम्प्रतिपन्नाभिव्यञ्जकभावेषु दीपादिष्वभिव्यङ्ग्यविशेषनियमादर्शनात्;

१. शारी. २-१-७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नहि घटार्थमारोपितः प्रदीपः करकादीन्नाभिव्यनक्ति । अतोऽसतः कार्यस्योत्पत्तिहेतुत्वेनैव कारकव्यापारार्थवत्त्वम्, अतश्च सत्कार्यवादासिद्धिः । न च नियतकारणोपादानं सत एव कार्यत्वं साधयति, कारणशक्तिनियमादेव तदुपपत्तेः । नन्वसत्कार्यवादिनोऽपि कारकव्यापारो नोपपद्यते ; प्रागुत्पत्तेः कार्यस्यासत्त्वात् कार्यादन्यत्र कारकव्यापारेण भवितव्यम् ; तत्रान्यत्वाविशेषात्तन्तुगतकारकव्यापारेण घटोत्पत्तिरपि प्रसज्यते ; नैवम् यत्कार्योत्पादनशक्तं यत्कारणम्, दग्धतकारकव्यापारेण तत्कार्योत्पत्तिसिद्धेः । अत्राहुः—कारणादनन्यत्कार्यम्; नहि परमार्थतः कारणव्यतिरिक्तं कार्यं नाम वस्त्वस्ति, अविद्यानिबन्धनत्वात्सकलकार्यतद्व्यवहारयोः । अतो यथा कारणभूतान्मृद्द्रव्याद्घटादिषु विकारेषूपलभ्यमानाद्व्यतिरिक्तं घटशरावादिकार्यं व्यवहारमात्रालम्बनं मिथ्या ; कारणभूतं मृद्द्रव्यमेव सत्यम्; तथा निर्विशेषसन्मात्रात्कारणभूताद्ब्रह्मणोऽन्योऽहङ्कारादिव्यवहारालम्बनः कृत्स्नः प्रपञ्चो मिथ्या ; कारणभूतसन्मात्र ब्रह्मैव सत्यम् । तस्मात्कारणव्यतिरिक्तं कार्यं नास्तीति कारणादनन्यत्कार्यम् । नच वाच्यं शुक्तिकारजतादीनामिव घटादिकार्याणामसत्यत्वाप्रसिद्धेर्दृष्टान्तानुपपत्तिरिति ; यतस्तत्रापि युक्त्या मृद्द्रव्यमात्रमेव सत्यतया व्यवस्थाप्यते ; तदतिरिक्तं तु युक्त्या बाध्यते । का पुनरत्र युक्तिः?,मृद्द्रव्यमात्रस्यानुवर्तमानत्वम्, तदतिरिक्तस्य च व्यावर्तमानत्वम् । रज्जुसर्पादिषु ह्यनुवर्तमानस्याधिष्ठानभूतस्य रज्ज्वादेस्सत्यता,व्यावर्तमानस्य च सर्पभूदलनाम्बुधारादेरसत्यता दृष्टा, तथाऽनुवर्तमानमधिष्ठानभूतं मृद्द्रव्यमेव सत्यम्, व्यावर्तमानास्तु घटशरावादयोऽसत्यभूताः । किञ्च सत आत्मनो विनाशाभावादसतश्च शशविषाणादेरुपलब्ध्यभावादुपलब्धिविनाशयोगि कार्यं सदसद्भ्यामनिर्व-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चनीयमिति गम्यते। अनिर्वचनीयं च शुक्तिकारजतादिवन्मृषैव। तस्य चानिर्वचनीयत्वं प्रतीतिबाधाभ्यां सिद्धम्। किञ्च कार्यमुत्पादयन्मृदादि कारणद्रव्यं किमविकृतमेव कार्यमुत्पादयति, उत कञ्चन विशेषमापन्नम्। न तावदविकृतमुत्पादयति, सर्वदोत्पादकत्वप्रसङ्गात्। नापि विशेषान्तरमापन्नम्, विशेषान्तरापत्तेरपि विशेषान्तरापत्तिपूर्वकत्वेन भवितव्यम्, तस्या अपि तथेत्यनवस्थानात्। अविकृतमेव देशकालनिमित्तविशेषसम्बद्धं कार्यमुत्पादयतीतिचेन्न। देशादिविशेषसम्बन्धोऽपि ह्यविकृतस्य विशेषान्तरमापन्नस्य च पूर्ववन्न सम्भवति। नच वाच्यं मृत्सुवर्णदुग्धादिभ्यो घटरुचकदध्यादीनामुत्पत्तिर्दृश्यते; शुक्तिकारजतादिवदेशकालादिप्रतिपन्नोपाधौ बाधश्च न दृश्यते, अतः प्रतीतिशरणानां कारणात्कार्योत्पत्तिरवश्याश्रयणीयेति; विकल्पासहत्वात्—किं हेमादिमात्रमेव स्वस्तिकादेरारम्भकम्, उत रुचकादि, अथ रुचकाद्याश्रयो हेमादिः; न तावद्धेमादिमात्रमारम्भकम्; हेमव्यतिरिक्तस्य कार्यस्याभावात्, स्वात्मानं प्रत्यात्मन आरम्भकत्वासम्भवाच्च। हेमव्यतिरिक्तं स्वस्तिकं दृश्यत इति चेत्—न हेमव्यतिरिक्तं तत्, हेमप्रत्यभिज्ञानात्तदतिरिक्तवस्त्वन्तरानुपलब्धेश्च। बुद्धिशब्दान्तरादिभिर्वस्त्वन्तरत्वं साधितमितिचेन्न, अनिरूपितवस्त्ववलम्बनानां बुद्धिशब्दान्तरादीनां शुक्तिकारजतबुद्धिशब्दादिवद्भ्रान्तिमूलत्वेन वस्त्वन्तरसद्भावस्यासाधकत्वात्; नापि रुचकादि स्वस्तिकादेरारम्भकम्, स्वस्तिके हि रुचकं पट इव तन्तवो भवतापि नोपलभ्यते। नापि रुचकाश्रयभूतं हेम, रुचकाश्रयाकारेण हेम्नस्स्वस्तिकेऽनुपलब्धेः; अतो मृदादिकारणातिरिक्तस्य कार्यस्यासत्यत्वदर्शनाद्ब्रह्मव्यतिरिक्तं कृत्स्नं जगत्कार्यत्वेन मिथ्याभूतम्; तदिदं ब्रह्मव्यतिरिक्तमिथ्यात्वसुखप्रतिपत्तये काल्पनिकमृदादिसत्यत्वमाश्रित्य कार्यस्यासत्यत्वं प्रतिपादितम्। परमार्थतस्तु मृत्सुवर्णादिकारण-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मपि घटरुचकादिकार्यवन्मिथ्याभूतम्, ब्रह्मकार्यत्वाविशेषात् । [१]"ऐतदात्म्यमिदं सर्वं तत्सत्यम्" [२]"नेह नानास्ति किञ्चन [३]मृत्योस्स मृत्युमाप्नोति य इह नानेव पश्यति" [४]"यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति यत्रत्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्" [५]"इन्द्रो मायाभिः पुरुरूप ईयते"इत्येवमादिभिश्श्रुतिभिश्च ब्रह्मव्यतिरिक्तस्य मिथ्यात्वमवगम्यते । नचागमावगतार्थस्य प्रत्यक्षविरोधश्शङ्कनीयः; यथोक्तप्रकारेण कार्यस्य सर्वस्य मिथ्यात्वावगमात्, प्रत्यक्षस्य सन्मात्रविषयत्वाच्च, विरोधे सत्यप्यसम्भावितदोषस्य चरमभाविनस्स्वरूपसद्भावादौ प्रत्यक्षाद्यपेक्षत्वेऽपि प्रमितौ निराकाङ्क्षस्य निरवकाशस्य शास्त्रस्य बलीयस्त्वात्। अतः कारणभूताद्ब्रह्मणोऽन्यत्सर्वं मिथ्या । नच प्रपञ्चमिथ्यात्वेन जीवमिथ्यात्वमाशङ्कनीयम्, ब्रह्मण एव जीवभावात् । ब्रह्मैव हि सर्वशरीरेषु जीवभावमनुभवति—[६]"अनेन जीवेनाऽत्मनाऽनुप्रविश्य" [७]"एको देवस्सर्वभूतेषु गूढः"[८]"एको देवो बहुधा निविष्टः"[९]"एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते"[१०]"नान्योऽतोऽस्ति द्रष्टा"इत्येवमादिभ्यः। नन्वेकमेव ब्रह्म सर्वशरीरेषु जीवभावमनुभवति चेत्—'पादे मे वेदना' 'शिरसि मे सुखम्' इतिवत्सर्वशरीरेषु सुखदुःखप्रतिसन्धानं स्यात्; जीवेश्वरबद्धमुक्तशिष्याचार्यज्ञत्वाज्ञत्वादिव्यवस्था च न स्यात् । अत्र केचिदद्वितीयत्वं ब्रह्मणोऽभ्युपयन्त एवैनं समादधते—एकस्यैव ब्रह्मणः प्रतिबिम्बभूतानां जीवानां सुखित्वदुःखित्वादय एकस्यैव सुखस्य प्रतिबिम्बानां मणिकृपाणदर्पणादिषूपलभ्यमानानामल्पत्वमहत्त्वमलिनत्वविम-

---

१. छा. ६-८-७ ॥ २. कठ. ४-११ ॥ ७. श्वे. ६-११ ॥
३. कठ. ४-१० ॥ ८. यजु. आरण. ३-प्रश्न. १२-अनु. १-पं ॥
४. बृ. ४-४-१४ ॥ ९. कठ. ३-१२ ॥
५. बृ. ४-५-१९ ॥ १०. बृ. ५-७-२३ ॥
६. छा. ६-३-२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लत्वादिवत्तत्तदुपाधिवशात्[1]व्यवस्थाप्यन्ते। ननु[2]"अनेन जीवेनाऽत्मनाऽनुप्रविश्य" इत्यादिश्रुतेर्न जीवा ब्रह्मणो भिद्यन्त इत्युक्तम्; सत्यम्, परमार्थतः; काल्पनिकं तु भेदमाश्रित्येयं व्यवस्थोच्यते । कस्य पुनः कल्पना; न तावद्ब्रह्मणः, तस्य परिशुद्धज्ञानात्मनः कल्पनाशून्यत्वात् । नापि जीवानाम्, इतरेतराश्रयत्वप्रसङ्गात्—कल्पनाधीनो हि जीवभावः, जीवाश्रया च कल्पना—इति । नैतदेवम्, अविद्याजीवभावयोर्बीजाङ्कुरन्यायेनानादित्वात् । किञ्च—प्रासादनिगरणादिवदनुपपन्नतैकवेषायामवस्तुभूतायामविद्यायां नेतरेतराश्रयत्वादयो वस्तुदोषा अनवकल्पिमावहन्ति । वस्तुतो ब्रह्माव्यतिरिक्तानां जीवानां स्वतो विशुद्धत्वेऽपि कृपाणादिगतमुखप्रतिबिम्बश्यामतादिवदौपाधिकाशुद्धिसम्भवादविद्याश्रयत्वोपपत्तेः काल्पनिकत्वोपपत्तिः । प्रतिबिम्बगतश्यामतादिवज्जीवगताशुद्धिरपि भ्रान्तिरेव, अन्यथाऽनिर्मोक्षप्रसङ्गात् । जीवानां भ्रमस्य प्रवाहानादित्वान्न तद्धेतुरन्वेषणीयः—इति ॥

तदेतदविदिताद्वैतयाथात्म्यानां भेदवादश्रद्धालुजनसबहुमानावलोकनलिप्साविजृम्भितम्। तथाहि—जीवस्याकल्पितस्वाभाविकरूपेणाविद्याश्रयत्वे ब्रह्मणएवाविद्याश्रयत्वमुक्तं स्यात्। तदतिरिक्तेन तस्मिन्कल्पितेनाकारेणाविद्याश्रयत्वे जडस्याविद्याश्रयत्वमुक्तं स्यात् । न खल्वद्वैतवादिनस्तदुभयव्यतिरिक्तमाकारमभ्युपगच्छन्ति । कल्पिताकारविशिष्टेन स्वरूपेणैवाविद्याश्रयत्वमितिचेत्—तन्न, स्वरूपस्याखण्डैकरसस्याविद्यामन्तरेण विशिष्टरूपत्वासिद्धेः, अविद्याश्रयाकार एवहि निरूप्यते। किञ्च बन्धमोक्षादिव्यवस्थासिद्ध्यर्थं हि [3]जीवाज्ञानवादाश्रयणम्, सा तु व्यवस्था जीवाज्ञानपक्षेऽपि न सिध्यति । अविद्याविनाश एव हि मोक्षः। तत्रैकस्मिन्मुक्ते अविद्याविनाशादितरेऽपि विमुच्येरन् । अन्य-

१. व्यवस्थास्यन्ते. पा ॥
२. छा. ६-३-२ ॥
३. जीवाज्ञानवादसमाश्रयणम्. पा ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्यामुक्तत्वादविद्या तिष्ठतीति चेत्—तर्ह्येकस्याप्यमुक्तिस्स्यात्, अविद्याया अविनष्टत्वात्। प्रतिजीवमविद्याभेदः कल्प्यते, तत्र यस्याविद्या विनष्टा, स मोक्ष्यते, यस्य त्वविनष्टा, स भन्त्स्यतइति चेत्—तन्न, प्रतिजीवमिति जीवभेदमाश्रित्य ब्रूषे, स जीवभेदः किं स्वाभाविकः, उताविद्याकल्पितः ; न तावत्स्वाभाविकः, अनभ्युपगमात् ; भेदसिद्ध्यर्थस्य चाविद्याकल्पनस्य व्यर्थत्वात्। अथाविद्याकल्पितः, तत्रेयं जीवभेदकल्पिकाऽविद्या किं ब्रह्मणः, उत जीवानाम्। ब्रह्मणइति चेत्—आगतोऽसि मदीयं मार्गम्। अथ जीवानाम्, किमस्या जीवभेदकल्पिसिद्ध्यर्थतां विस्मरसि। अथ प्रतिजीवं बद्धमुक्तव्यवस्थासिद्ध्यर्थं या अविद्याः कल्प्यन्ते, ताभिरेव जीवभेदोऽपीति मनुषे, जीवभेदसिद्धौ तास्सिद्ध्यन्ति, तासु सिद्धासु जीवभेदसिद्धिरितीतरेतराश्रयत्वम्। नचात्र बीजाङ्कुरन्यायस्सिध्यति बीजाङ्कुरेषु ह्यन्यदन्यद्बीजमन्यस्यान्यस्याङ्कुरस्योत्पादकम्, इह तु याभिरविद्याभिर्ये जीवाः कल्प्यन्ते, तानेवाश्रित्य तासां[1] सिद्धिरित्यशकनीयता। अथ बीजाङ्कुरन्यायेन पूर्वपूर्वजीवाश्रयाभिरविद्याभिरुत्तरोत्तरजीवकल्पनां मन्यसे, तथा सति जीवानां भङ्गुरत्वमकृताभ्यागमकृतविप्रणाशादिप्रसङ्गश्च। अतएव ब्रह्मणः पूर्वपूर्वजीवाश्रयाभिरविद्याभिरुत्तरोत्तरजीवभावकल्पनमित्यपि निरस्तम्। अविद्याप्रवाहेऽभ्युपगम्यमाने तत्कल्पितजीवभावस्यापि तद्वत्प्रवाहानादिता स्यात्। न ध्रुवरूपता, आमोक्षाच्च जीवस्य ध्रुवत्वमिष्टं न सिध्येत्। यच्चोक्तमविद्याया अवस्तुरूपत्वेनानुपपन्नतैकवेषाया नेतरेतराश्रयत्वादयो वस्तुदोषा अनवकल्पिमावहन्तीति, तथा सति मुक्तान् परञ्च ब्रह्माश्रयेदविद्याः शुद्धविद्यास्वरूपत्वादशुद्धिरूपा न तत्र प्रसजतीति चेत्—किमुपपत्त्यनुवर्तिन्यविद्या। एवं तर्ह्युक्ताभिरुपपत्तिभिर्जीवानपि नाश्रयेत्। किञ्च जीवा-

१. सिद्धिरित्याशङ्कनीयता. पा ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रयाया अविद्यायास्तत्त्वज्ञानोदयान्नाशे सति जीवो नश्येद्वा, नवा, यदि नश्येत्, स्वरूपोच्छित्तिलक्षणो मोक्षस्स्यात्; नो चेदविद्यानाशेऽप्यनिर्मोक्षः, ब्रह्मस्वरूपव्यतिरिक्तजीवत्वावस्थानात्। यच्चोक्तं—मणिकृपाणदर्पणादिषूपलभ्यमानमुखमलिनत्वविमलत्वादिवच्छुद्ध्यशुद्ध्यादि - व्यवस्थोपपत्तिः—इति; तत्रेदं विमर्शनीयम्—अल्पत्वमलिनत्वादय औपाधिका दोषाः कदा नश्येयुरिति, कृपाणाद्युपाध्यपगम इति चेत्—किं तदाऽल्पत्वाद्याश्रयः प्रतिबिम्बं तिष्ठति वा, नवा, तिष्ठति चेत्—तत्स्थानीयस्य जीवस्यापि स्थितत्वादनिर्मोक्षप्रसङ्गः; नश्यति चेत्—तद्वदेव जीवनाशात्स्वरूपोच्छित्तिलक्षणो मोक्षस्स्यात्। किञ्च—यस्य ह्यपुरुषार्थरूपदोषप्रतिभासः, तस्य तदुच्छेदः पुरुषार्थः; तत्र किमौपाधिकदोषप्रतिभासो बिम्बस्थानीयस्य ब्रह्मणः, उत प्रतिबिम्बस्थानीयस्य जीवस्य, उतान्यस्य कस्यचित्; आद्ययोः कल्पयोर्दृष्टान्तोऽयं न सङ्गच्छते, मुखस्य मुखप्रतिबिम्बस्य चाल्पत्वादिदोषप्रतिभासशून्यत्वात्; नहि मुखं तत्प्रतिबिम्बं वा चेतयते; ब्रह्मणो दोषप्रतिभासे ब्रह्माविद्याप्रसङ्गश्च। तृतीयोऽपि कल्पो न कल्पते, जीवब्रह्मव्यतिरिक्तस्य द्रष्टुरभावात्। किञ्च अविद्याकल्प्यस्य जीवस्य कल्पकः क इति निरूपणीयम्, न तावदविद्या, अचेतनत्वात्, नापि जीवः, आत्माश्रयदोषप्रसङ्गात्, शुक्तिकारजतादिवदविद्याकल्प्यत्वाच्च जीवभावस्य; ब्रह्मैव कल्पकमिति चेत्—ब्रह्माज्ञानमेवायातम्। किञ्च ब्रह्माज्ञानानभ्युपगमे किं ब्रह्म जीवान्पश्यति वा, न वा, न पश्यति चेत्— ईक्षापूर्विका विचित्रसृष्टिर्नामरूपव्याकरणमित्यादि ब्रह्मणो न स्यात्। अथ पश्यति, अखण्डैकरसं ब्रह्म नाविद्यामन्तरेण जीवान्पश्यतीति ब्रह्माज्ञानप्रसङ्गः। अतएव माया-विद्याविभागवादोऽपि निरस्तः। अज्ञानमन्तरेण हि मायिनोऽपि ब्रह्मणो जीवदर्शित्वं न स्यात्। नच मायावी परानदृष्ट्वा मोहयितुमलम्। नापि माया मायाविनो दर्शनसाधनम्, दृष्टेषु परेषु तन्मोहनसाधनमात्रत्वा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्तस्याः। अथ ब्रह्मणो माया तस्य जीवदर्शित्वं कुर्वती जीवमोहनस्य हेतुरिति मन्यसे ; तर्हि परिशुद्धस्याखण्डैकरसस्वप्रकाशस्य ब्रह्मणः परदर्शनं कुर्वती माया मायापरपर्याया अविद्यैव स्यात्। अथ मतम्—विपरीतदर्शनहेतुरविद्या, माया तु मिथ्याभूतं ब्रह्मव्यतिरिक्तं मिथ्यात्वेन दर्शयन्ती न ब्रह्मणो विपरीतदर्शनहेतुः। अतस्तस्या नाविद्यात्वमिति। नैवम्—चन्द्रैकत्वे ज्ञायमाने द्विचन्द्रदर्शनहेतोरप्यविद्यात्वात्। यदि च ब्रह्म मिथ्यात्वेनैव स्वव्यतिरिक्तं जानाति, न तर्हि तन्मोहयति। नह्यनुन्मत्तो मिथ्यात्वेन ज्ञातान्मोहयितुमीहते। अथापुरुषार्थापरमार्थदर्शनहेतुरविद्या, माया तु ब्रह्मणो नापुरुषार्थदर्शनहेतुः; अतोऽस्या नाविद्यात्वमिति मतम्; तन्न, द्विचन्द्रज्ञानस्य दुःखहेतुत्वाभावेनापुरुषार्थत्वाभावेऽपि तद्धेतुरविद्यैव, तन्निरसने च प्रयस्यन्ति; यदि च नापुरुषार्थदर्शनकरी माया, तर्ह्यनुच्छेद्यतया नित्या ब्रह्मस्वरूपानुबन्धिनी स्यात्। अस्तु को दोष इति चेत्—द्वैतदर्शनमेव दोषः। [1]"यत्र हि द्वैतमिव भवति....यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्" इत्याद्यद्वैतश्रुतयः प्रकुप्येयुः। परमार्थविषया अद्वैतश्रुतयः, मायायास्त्वपरमार्थत्वादविरोध इति चेत्—अपरिच्छिन्नानन्दैकस्वरूपस्य ब्रह्मणोऽपरमार्थभूतमायादर्शनं तद्वत्ताचाविद्यामन्तरेण नोपपद्यते। किञ्च अपरमार्थभूतया नित्यया मायया किं प्रयोजनं ब्रह्मणः। जीवमोहनमितिचेत्—अपुरुषार्थेन मोहनेन किं प्रयोजनम्। क्रीडेति चेत्—अपरिच्छिन्नानन्दस्य किं क्रीडया। परिपूर्णभोगानामेव क्रीडा पुरुषार्थत्वेन लोके दृष्टेति चेत्—नैवमिहोपपद्यते; नह्यपरमार्थभूतैः क्रीडोपकरणैरपरमार्थतया प्रतिभासमानैर्निष्पन्नयाऽपरमार्थभूतया क्रीडयाऽपरमार्थभूतेन च तत्प्रतिभासेनानुन्मत्तानां क्रीडारसो निष्पद्यते। मायाश्रयतयाऽभिमतब्रह्मव्यतिरेकेणाविद्याश्रयस्य जीवस्य

१. बृ. ४-४-१४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कल्पनासम्भवश्च पूर्ववदेव द्रष्टव्यः । अतो ब्रह्मैवानाद्यविद्याशबलं स्वगतनानात्वं पश्यतीत्यद्वितीयत्वं ब्रह्मणोऽभ्युपयद्भिरभ्युपेत्यम् । यत्तु बन्धमोक्षव्यवस्था नोपपद्यत इति, न तद्ब्रह्माज्ञानवादिनश्चोद्यम्, एकस्यैव ब्रह्मणोऽज्ञस्य स्वाज्ञाननिवृत्त्या मोक्ष्यमाणत्वाद्बद्धमुक्तादिव्यवस्थाया एवाभावात्, व्यवह्रियमाणायाश्च बद्धमुक्तशिष्याचार्यादिव्यवस्थायाः काल्पनिकत्वात्, स्वप्नदर्शिनइव चैकस्यैवाविद्यया सर्वकल्पनोपपत्तेः; स्वप्नदृशा ह्येकेन दृष्टाश्शिष्याचार्यादयस्तदविद्याकल्पिताएव । अत एव बह्वविद्याकल्पनमपि न युक्तिमत् । पारमार्थिकी बन्धमोक्षव्यवस्था स्वपरव्यवस्था च जीवाज्ञानवादिनापि नाभ्युपेयते । अपारमार्थिकी त्वेकस्यैवाविद्ययोपपद्यते । प्रयोगश्च—बन्धमोक्षव्यवस्थाः स्वपरव्यवस्थाश्च स्वाविद्याकल्पिताः, अपारमार्थिकत्वात्, स्वप्नदृष्टव्यवस्थावदिति । शरीरान्तराण्यपि मयैवात्मवन्ति, शरीरत्वात्,एतच्छरीरवत्। शरीरान्तरण्यपि मदविद्याकल्पितानि, शरीरत्वात्, कार्यत्वात्, जडत्वात्, कल्पितत्वाद्वा, एतच्छरीरवत्। विवादाध्यासितं चेतनजातमहमेव, चेतनत्वात्, यदनहम्, तदचेतनं दृष्टम्, यथा घटः । अतस्स्वपरविभागो बद्धमुक्तशिष्याचार्यादिव्यवस्थाश्चैकस्याविद्याकल्पिताः । द्वैतवादिनापि बद्धमुक्तव्यवस्था दुरुपपादा;अतीतानां कल्पानामानन्त्यादेकैकस्मिन्कल्पे एकैकमुक्तावपि सर्वेषां मोक्षसम्भवादमुक्तानुपपत्तेः। अनन्तत्वादात्मनाममुक्ताश्च सन्तीतिचेत्—किमिदमनन्तत्वम्? असङ्ख्येयत्वमितिचेन्न, भूयस्त्वादल्पैरसङ्ख्येयत्वेऽपीश्वरस्य सर्वज्ञस्य सङ्ख्येया एव । तस्याप्यशक्यत्वे सर्वज्ञत्वं न स्यात्;आत्मनां निस्सङ्ख्यत्वादीश्वरस्याविद्यमानसङ्ख्यावेदनाभावो नासार्वज्ञ्यमावहतीतिचेत्—भिन्नत्वे सङ्ख्याविधुरत्वं नोपपद्यते । आत्मानस्सङ्ख्यावन्तः,भिन्नत्वात्, माषसर्षपघटपटादिवत् । भिन्नत्वे चात्मनां घटादिवज्जडत्वमनात्मत्वं क्षयित्वं च प्रसज्यते । ब्रह्मणश्चान-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न्तत्वं न स्यात्। अनन्तत्वं नाम—परिच्छेदरहितत्वम्। भेदवादे च वस्त्वन्तराद्विलक्षणत्वेन ब्रह्मणो वस्तुतः परिच्छेदरहितत्वं न शक्यते वक्तुम्; वस्त्वन्तरभावएव हि वस्तुतः परिच्छेदः।वस्तुतः परिच्छिन्नस्य देशतः कालतश्चापरिच्छिन्नत्वं च न युज्यते;वस्त्वन्तराद्विलक्षणत्वेन वस्तुतः परिच्छिन्नाएव घटादयो देशतः कालतश्च परिच्छिन्ना हि दृष्टाः; तथा सर्वे चेतनाः ब्रह्मच वस्तुतः परिच्छिन्नाः देशकालाभ्यामपि परिच्छिद्यन्ते। एवञ्च [१]"सत्यं ज्ञानमनन्तम्" इत्यादिभिस्सर्वप्रकारपरिच्छेदरहितत्वं वदद्भिर्विरोधः। उत्पत्तिविनाशादयश्च जीवानां ब्रह्मणश्च प्रसज्येरन्; कालपरिच्छेदएव उत्पत्तिविनाशभागित्वम्। अत एकस्यैवापरिच्छिन्नस्य ब्रह्मणोऽविद्याविजृम्भितं ब्रह्मादिस्तम्बपर्यन्तं कृत्स्नं जगत्; सुखदुःखप्रतिसन्धानव्यवस्थादयोऽपि स्वाप्नव्यवस्थावदविद्यास्वाभाव्यादुपपद्यन्ते। तस्मादेकमेव नित्यमुक्तस्वप्रकाशस्वभावमनाद्यविद्यावशाज्जगदाकारेण विवर्ततइति परमार्थतो ब्रह्मव्यतिरिक्ताभावात्तदनन्यत्वं जगतः—इति ॥

अत्रोच्यते—निर्विशेषस्वप्रकाशमात्रं ब्रह्मानाद्यविद्यातिरोहितस्वस्वरूपं स्वगतनानात्वं पश्यतीत्येतत् प्रकाशस्वरूपस्य निरंशस्य प्रकाशनिवृत्तिरूपतिरोधाने स्वरूपनाशप्रसङ्गेन तिरोधानासम्भवादिभ्यस्सकलप्रमाणविरुद्धं स्ववचनविरुद्धं चेति पूर्वमेवोक्तम्। यत्पुनरुक्तं-कारणव्यतिरिक्तं कार्यं युक्तिबाधितत्वेन शुक्तिकारजतादिवद्भ्रमः—इति; तदयुक्तम्,युक्तेरभावात्। यत्त्वनुवर्तमानस्य कारणमात्रस्य सत्यत्वम्, व्यावर्तमानानां घटशरावादिकार्याणामसत्यत्वमिति; तदप्यन्यत्र दृष्टस्यान्यत्र व्यावर्तमानता न बाधिकेत्यादिभिः पूर्वमेव परिहृतम्। यच्चोपलभ्यमानत्वविनाशित्वाभ्यां सदसदनिर्वचनीयत्वेन कार्यस्य मृषात्वमिति; तदसत्, उपलब्धिविनाशयोगो हि न मिथ्यात्वं साधयति, किन्त्वनित्यत्वम्। यद्देशकालसम्बन्धि-

१. तै. आन. १-१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तया यदुपलब्धम्,तदेशकालसम्बन्धितया बाधितत्वमेव हि तस्य मिथ्यात्वे हेतुः ; देशान्तरकालान्तरसम्बन्धितयोपलब्धस्यान्यदेशकालसम्बन्धित्वेन बाधितत्वं देशान्तरकालान्तराव्याप्तिमात्रं साधयति,न तु मिथ्यात्वम्। प्रतिप्रयोगश्च–घटादि कार्यं सत्यम्,देशकालादिप्रतिपन्नोपाधावबाधितत्वात्, आत्मवत् । यच्चोक्तं–कारणस्वरूपादविकृताद्विकृताच्च कार्योत्पत्तिर्न सम्भवति–इतिः तदसत्, देशकालादिसहकारिसमवहितात्कारणात्कार्योत्पत्तिसम्भवात्। तत्समवधानं च विकृतस्याविकृतस्य च न सम्भवति–इति यदुक्तम्; तदयुक्तम्,पूर्वमविकृतस्यैव कालादिसमवधानसम्भवात् । अविकृतत्वाविशेषात् पूर्वमपि देशकालादिसमवधानं प्रसज्यत इतिचेन्न, देशकालादिसमवधानस्य कारणान्तरायत्तस्यैतदायत्तत्वाभावात् । अतो देशकालादिसमवधानरूपविशेषमापन्नं कारणं कार्यमुत्पादयतीति न किञ्चिदवद्यीनम्। कारणस्य च कार्यं प्रत्यारम्भकत्वमबाधितं दृश्यमानं न केनापि प्रकारेणापह्नोतुं शक्यते। यत्तु–हेमादिमात्रस्य, रुचकादिकार्यस्यैतदाश्रयस्य वा हेमादेरारम्भकत्वं न सम्भवति–इतिः तदयुक्तम् , हेमादिमात्रस्यैव यथोक्तपरिकरयुक्तस्यारम्भकत्वसम्भवात् । न चारम्भकहेमव्यतिरिक्तं कार्यं न दृश्यत इति वक्तुं शक्यम्; हेमातिरिक्तस्य स्वस्तिकस्य दर्शनात् , बुद्धिशब्दान्तरादिभिर्वस्त्वन्तरस्य साधितत्वाच्च । नचायं शुक्तिकारजतादिवद्भ्रमः , उत्पत्तिविनाशयोरन्तराल उपलभ्यमानस्य तदेशकालसम्बन्धितया बाधादर्शनात् । नचास्या उपलब्धेर्बाधिका काचिदपि युक्तिर्दृश्यते । प्रागनुपलब्धस्वस्तिकोपलब्धिवेलायामपि हेमप्रत्यभिज्ञा स्वस्तिकाश्रयतया हेम्नोऽप्यनुवृत्तेरविरुद्धा । श्रुतिभिस्तु प्रपञ्चमिथ्यात्वसाधनं पूर्वमेव निरस्तम्। यच्चान्यदत्र प्रत्यक्षविरोधादि प्रतिवक्तव्यम्, तदपि सर्वं पूर्वमेव सुष्ठूक्तम् । यच्चोक्तम्–एकेनात्मना सर्वाणि शरीराण्यात्मवन्ति–इतिः तदसत्, एकस्यैव सर्वशरीरप्र-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

युक्तसुखदुःखप्रतिसन्धानप्रसङ्गात् । सौभरिप्रभृतिषु ह्यात्मैकत्वेनानेकशरीरप्रयुक्तसुखादिप्रतिसन्धानमेकस्य दृश्यते । नचाहमर्थस्य ज्ञातृत्वात्तद्भेदात्प्रतिसन्धानाभावो नात्मभेदादिति वक्तुं शक्यम् ; आत्मा ज्ञातैव, स चाहमर्थ एव, अन्तःकरणभूतस्त्वहङ्कारो जडत्वात्करणत्वाच्च शरीरेन्द्रियादिवन्न ज्ञातेत्युपपादितत्वात्। यच्च—शरीरत्वजडत्वकार्यत्वकल्पितत्वैस्सर्वशरीराणामेकस्याविद्याकल्पितत्वमुक्तम्; तदपि सर्वशरीराणामविद्याकल्पितत्वस्यैवाभावादयुक्तम् । तदभावश्चाबाधितस्य सत्यत्वोपपादनात् । यच्च चेतनादन्यस्य जडत्वदर्शनात्सर्वचेतनानामनन्यत्वमुक्तम्, तदपि सुखदुःखव्यवस्थया भेदोपपादनादेव निरस्तम् । यत्तु—मय्यैवात्मवन्ति मदविद्याकल्पितान्यहमेव सर्वं चेतनजातमित्यहमर्थस्यैक्यमुपपादितम्, तदज्ञातस्वसिद्धान्तस्य भ्रान्तिजल्पितम् ; अहं त्वमाद्यर्थविलक्षणं चिन्मात्रं ह्यात्मा त्वन्मते । किञ्च निर्विशेषचिन्मात्रातिरेकि सर्वं मिथ्येति वदतो मोक्षार्थश्रवणादिप्रयत्नो निष्फलः, अविद्याकार्यत्वात्; शुक्तिकारजतादिषु रजताद्युपादानादिप्रयत्नवत् । मोक्षार्थप्रयत्नो व्यर्थः, कल्पिताचार्यायत्तज्ञानकार्यत्वात्, शुकप्रह्लादवामदेवादिप्रयत्नवत्। *तत्त्वमस्यादिवाक्यजन्यज्ञानं न बन्धनिवर्तकम् , अविद्याकल्पितवाक्यजन्यत्वात् , स्वयमविद्यात्मकत्वात् , अविद्याकल्पितज्ञात्राश्रयत्वात् , कल्पिताचार्यायत्तश्रवणजन्यत्वाद्वा, स्वाप्नबन्धनिवर्तनवाक्यजन्यज्ञानवत् । किञ्च निर्विशेषचिन्मात्रं ब्रह्म मिथ्या, अविद्याकार्यज्ञानगम्यत्वात् , अविद्याकल्पितज्ञात्राश्रयज्ञानगम्यत्वात् , अविद्यात्मकज्ञानगम्यत्वाद्वा, यदेवं तत्तथा, यथा स्वाप्नगन्धर्वनगरादिः । नच निर्विशेषचिन्मात्रं ब्रह्म स्वयं प्रकाशते, येन न प्रमाणान्तरमपेक्षते । यत्त्वात्मसाक्षिकं स्वयं प्रकाशज्ञानं दृश्यते, तत्तु ज्ञेयविशेषसिद्धिरूपं ज्ञातृगतमेव दृश्यत इति पूर्वमेवोक्तम् । यानि च तस्य निर्विशेषत्वसाधकानि यौक्तिकानि ज्ञानान्युपन्यस्तानि, तानि चानन्तरोक्तैरविद्याकार्यत्वादित्यादिभिरनुमानैर्निरस्ता-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नि । नच निर्विशेषस्य चिन्मात्रस्याज्ञानसाक्षित्वमहङ्कारादिजगद्भ्रमश्चोपपद्यते, साक्षित्वभ्रमादयोऽपि हि ज्ञातृविशेषगता दृष्टाः, न ज्ञप्तिमात्रगताः; नच तस्य प्रकाशत्वं स्वायत्तप्रकाशता वा सिध्यति; प्रकाशो हि कस्यचित्पुरुषस्य कञ्चनार्थविशेषं प्रति सिद्धिरूपो दृश्यते, तत एव हि तस्य स्वयम्प्रकाशतोपपाद्यते भवद्भिरपि । नचातादृशस्य निर्विशेषस्य प्रकाशता सम्भवति । यः पुनः स्वगोष्ठीष्वपरमार्थादपि परमार्थकार्यं दृश्यत इत्युद्घोषः, सोऽपि तानि कार्याणि सर्वाण्यबाधितकल्पानि व्यावहारिकसत्यानि; वस्तुतस्त्वविद्यात्मकान्येवेति स्वाभ्युपगमादेव निरस्तः। अस्माभिरपि सर्वत्र परमार्थादेव कारणात्सर्वकार्योत्पत्तिमुपपादयद्भिः पूर्वमेव निरस्तः। नच त्वयैषामनुमानानां श्रुतिविरोधो वक्तुं शक्यते, श्रुतेरप्यविद्याकार्यत्वेनाविद्यात्मकत्वेन चोक्तदृष्टान्तेभ्यो विशेषाभावात्। यत्तु ब्रह्मणोऽपारमार्थिकज्ञानगम्यत्वेऽपि पश्चात्तनबाधादर्शनाद्ब्रह्म सत्यमेव इति; तदसत्,दुष्टकारणजन्यज्ञानगम्यत्वे निश्चिते सति पश्चात्तनबाधादर्शनस्याकिञ्चित्करत्वात्; यथा शून्यमेव तत्त्वमिति वाक्यजन्यज्ञानस्य पश्चात्तनबाधादर्शनेऽपि दोषमूलत्वनिश्चयादेव तदर्थस्यासत्यत्वम्। किञ्च [१]"नेह नानाऽस्ति किञ्चन" [२]"विज्ञानमानन्दं ब्रह्म"इति विज्ञानमात्रातिरिक्तस्य कृत्स्नस्य वस्तुजातस्य निषेधकत्वेन सर्वस्मात्परत्वात्पश्चात्तनबाधादर्शनमुच्यते, शून्यमेव तत्त्वमिति तस्याप्यभावं वदतस्तस्मात्परत्वेन पश्चात्तनबाधो दृश्यते । सर्वशून्यत्वातिरेकिनिषेधासम्भवात्तस्यैव पश्चात्तनबाधादर्शनम्; दोषमूलत्वं तु प्रत्यक्षादीनां वेदान्तजन्मनस्सर्वशून्यज्ञानस्याप्यविशिष्टम् । अतस्सर्वं विज्ञानजातं पारमार्थिकज्ञातृगतम्, स्वयं च परमार्थभूतमर्थविशेषसिद्धिरूपम्; तत्र किञ्चित् ज्ञानं दोषमूलम्; दोषश्च परमार्थः;किञ्चिच्च निर्दोषं पारमार्थिकसामग्रीजन्यमिति यावन्नाभ्युपेयते,न तावत्सत्यमिथ्यार्थव्यवस्था, लोकव्यवहारश्च सेत्स्यति। लो-

१. कठ. २-४-११ ॥ २. बृ. ५-९-२८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कव्यवहारो हि पारमार्थिको भ्रान्तिरूपश्च पारमार्थिकज्ञातृगतार्थविशेषसिद्धिरूपप्रकाशपूर्वकः; निर्विशेषसन्मात्रस्य तु पारमार्थिकस्यापारमार्थिकस्य च प्रतिभासादेर्हेतुत्वासम्भवात् लोकव्यवहारो न सम्भवति। यच्च—तैर्निरधिष्ठानभ्रमासम्भवात्सर्वाध्यासाधिष्ठानस्य सन्मात्रस्य पारमार्थिकत्वमुक्तम्, तदपि दोषदोषाश्रयत्वज्ञातृत्वज्ञानानामपारमार्थ्येऽपि भ्रमोपपत्तिवदधिष्ठानापारमार्थ्येऽपि भ्रमोपपत्तेर्निरस्तम्। अथ—अधिष्ठानापारमार्थ्येऽपि न क्वचिद्भ्रमो दृष्ट इति सन्मात्रस्य पारमार्थिकत्वमवश्याश्रयणीयमिति मन्यसे, हन्त तर्हि दोषदोषाश्रयत्वज्ञातृत्वज्ञानानामपारमार्थ्येऽपि न क्वचिद्भ्रमो दृष्ट इति दर्शनानुगुण्येन तेषामपि पारमार्थ्यममवश्याश्रयणीयमिति न कश्चिद्विशेषोऽन्यत्र तत्संरम्भात्। यत्तु भेदपक्षेऽप्यतीतकल्पानामानन्त्यात्सर्वेषामात्मनां मुक्तत्वेन बद्धासम्भवाद्बद्धमुक्तव्यवस्था न सम्भवतीति,तदात्मानन्त्येन परिहृतम्। यच्चात्मनां भिन्नत्वे माषसर्षपघटपटादिवत्सङ्ख्यावत्त्वमवर्जनीयमिति, तत्र घटादीनामप्यनन्तत्वाद्दृष्टान्तस्साध्यविकलस्स्यात्। दशघटास्सहस्रं माषा इति सङ्ख्यावत्त्वं दृश्यत इति चेत्—सत्यं, तत्तु न घटादिस्वरूपगतम्,अपितु देशकालाद्युपाधिमद्घटादिगतम्,तादृशं तु सङ्ख्यावत्त्वमात्मनामभ्युपगच्छामः। नच तावता सर्वमुक्तिप्रसङ्गः;आत्मस्वरूपानन्त्यात्। यत्तु—आत्मनां भिन्नत्वे घटादिवज्जडत्वानात्मत्वक्षयित्वप्रसङ्गः—इति; तदयुक्तं, एकजातीयानां भेदस्य तज्जातीयानां जात्यन्तरत्वानापादकत्वात्। नहि घटानां भेदः तेषां पटत्वमापादयति। यत्तु—भिन्नत्वे वस्तुतः परिच्छेदादेशकालाभ्यामपि परिच्छेदो ब्रह्मणः प्रसज्यत इत्यनन्तत्वं ब्रह्मणो न सिध्यतीतिः तदयुक्तं, वस्तुतः परिच्छिन्नानामपि देशकालपरिच्छेदस्य न्यूनाधिकभावेनानियमदर्शनात्; देशकालसम्बन्धेयत्तायाः प्रमाणान्तरायत्तनिर्णयत्वेन ब्रह्मणस्सर्वदेशकालसम्बन्धस्यापि प्रमाणान्तरादापततो विरोधाभावात्। वस्तुतः परिच्छे-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दमात्रादपि सर्वप्रकारपरिच्छेदरहितत्वाभावादानन्त्यासिद्धिरिति चेत्—तद्भवतोऽप्यविद्याविलक्षणत्वं ब्रह्मणोऽभ्युपयतस्समानम्। अतस्ततोऽविद्याविलक्षणत्वाभ्युपगमाद्ब्रह्मणोऽपि भिन्नत्वेन भेदप्रयुक्ता दोषास्सर्वे तवापि प्रसज्येरन्। यद्यविद्याविलक्षणत्वं नाभ्युपेयते; तर्ह्यविद्यात्मकमेव ब्रह्म स्यात्। [१]"सत्यं ज्ञानमनन्तं ब्रह्म"इति लक्षणवाक्यमपि तत एवापार्थकं स्यात्। भेदतत्त्वानभ्युपगमे हि स्वपक्षपरपक्षसाधनदूषणादिविवेकाभावात्सर्वमसमञ्जसं स्यात्। आनन्त्यप्रसिद्धिश्च देशकालपरिच्छेदरहितत्वमात्रेण; न वस्तुतोऽपि परिच्छेदरहितत्वेन, तथाविधस्य शशविषाणायमानस्यानुपलब्धेः। भेदवादिनस्तु सर्वचिदचिद्वस्तुशरीरत्वेन ब्रह्मणस्सर्वप्रकारत्वात् स्वतः परतोऽपि परिच्छेदो न विद्यते। तदेवं कारणाद्भिन्नस्य कार्यस्य सत्यत्वाद्ब्रह्मकार्यं कृत्स्नं जगद्ब्रह्मणोऽन्यदेव॥

(सिद्धान्तः)

इति प्राप्ते प्रचक्ष्महे—तदनन्यत्वमारम्भणशब्दादिभ्यः—तस्मात् परमकारणाद्ब्रह्मणः, अनन्यत्वं जगतः आरम्भणशब्दादिभ्यः तदुपपादयद्भ्योऽवगम्यते। आरम्भणशब्द आदिर्येषां वाक्यानाम्, तान्यारम्भणशब्दादीनि[२]"वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" [३]"सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजत" [४]"अनेन जीवेनाऽत्मनाऽनुप्रविश्य" [५]"सन्मूलास्सोम्येमास्सर्वाः प्रजास्सदायतनास्सत्प्रतिष्ठाः....ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो" इत्येतानि; प्रकरणान्तरस्थान्यप्येवंजातीयकान्यत्राभिप्रेतानि। एतानि हि वाक्यानि चिदचिदात्मकस्य जगतः

१. तै. आन. १.१॥
२. छा. ६-१-४॥
३. छा. ६-२-१॥
४. छा. ६-३-३॥
५. छा. ६-८-६७॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

परस्माद्ब्रह्मणोऽनन्यत्वमुपपादयन्ति। तथा हि–[१]"स्तब्धोऽस्युत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातम्"इति कृत्स्नस्य जगतो ब्रह्मैककारणत्वम्, कारणात्कार्यस्यानन्यत्वं च हृदि निधाय कारणभूतब्रह्मविज्ञानेन कार्यभूतस्य सर्वस्य विज्ञाने प्रतिज्ञाते सति कृत्स्नस्य ब्रह्मैककारणतामजानता शिष्येण [१]"कथं नु भगवस्स आदेशः" इत्यन्यज्ञानेनान्यज्ञाततासम्भवं चोदितो जगतो ब्रह्मैककारणतामुपदेक्ष्यन् लौकिकप्रतीतिसिद्धं कारणात्कार्यस्यानन्यत्वं तावत् [२]"यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यात्" इति दर्शयति। यथैकमृत्पिण्डारब्धानां घटशरावादीनां तस्मादनतिरिक्तद्रव्यतया तज्ज्ञानेन ज्ञाततेत्यर्थः। अत्र काणादवादेन कारणात्कार्यस्य द्रव्यान्तरत्वमाशङ्क्य लोकप्रतीत्यैव कारणात्कार्यस्यानन्यतामुपपादयति[२]"वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" इति। आरभ्यते आलभ्यते स्पृश्यते इत्यारम्भणम्; [३]"कृत्यल्युटो बहुलम्" इति कर्मणि ल्युट्। वाचा वाक्पूर्वकेण व्यवहारेण हेतुनेत्यर्थः। 'घटेनोदकमाहर' इत्यादिवाक्पूर्वको ह्युदकाहरणादिव्यवहारः; तस्य व्यवहारस्य सिद्धये, तेनैव मृद्द्रव्येण पृथुबुध्नोदरत्वादिलक्षणो विकारः–संस्थानविशेषः, तत्प्रयुक्तं च घटइत्यादिनामधेयम्, स्पृश्यते—उदकाहरणादिव्यवहारविशेषसिद्ध्यर्थं मृद्द्रव्यमेव संस्थानान्तरनामधेयान्तरभाग्भवति। अतो घटाद्यपि मृत्तिकेत्येव सत्यं–मृत्तिकाद्रव्यमित्येव सत्यम्–प्रमाणेनोपलभ्यत इत्यर्थः, नतु द्रव्यान्तरत्वेन। अतस्तस्यैव मृद्धिरण्यादेर्द्रव्यस्य संस्थानान्तरभावित्वमात्रेण बुद्धिशब्दान्तरादय उपपद्यन्ते, यथैकस्यैव देवदत्तस्यावस्थाभेदैः'बालो युवा स्थविरः' इति बुद्धिशब्दान्तरादयः कार्यविशेषाश्च दृश्यन्ते। यदुक्तं-सत्या-

१. छा. ६-१-३ ॥
२. छा. ६-१-४ ॥
३. अष्टा. ३-३-११३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मेव मृदि घटो नष्ट इति व्यवहारात्कारणादन्यत्कार्यमिति; तदुत्पत्तिविनाशादीनां कारणभूतस्यैव द्रव्यस्यावस्थाविशेषत्वाभ्युपगमादेव परिहृतम्। तत्तदवस्थस्यैकस्यैव द्रव्यस्य ते ते शब्दास्तानि तानि च कार्याणीति युक्तम्। द्रव्यस्य तत्तदवस्थत्वं कारकव्यापारायत्तमिति तस्यार्थवत्त्वम्। अभिव्यक्त्यनुबन्धीनि चोद्यानि तस्या अनभ्युपगमादेव परिहृतानि। उत्पत्त्यभ्युपगमेऽपि सत्कार्यवादो न विरुध्यते; सत एवोत्पत्तेः। विप्रतिषिद्धमिदमभिधीयते,—पूर्वमेव सत्, तदुत्पद्यते च—इति। अज्ञातोत्पत्तिविनाशयाथात्म्यस्येदं चोद्यम्; द्रव्यस्योत्तरोत्तरसंस्थानयोगः पूर्वपूर्वसंस्थानसंस्थितस्य विनाशः, स्वावस्थस्य तूत्पत्तिः। अतस्सर्वावस्थस्य द्रव्यस्य सत्त्वात्सत्कार्यवादो न विरुध्यते। संस्थानस्यासत उत्पत्तावसत्कार्यवादप्रसङ्ग इति चेत्—असत्कार्यवादिनोऽप्युत्पत्तेरनुत्पत्तिमत्त्वे सत्कार्यवादप्रसङ्गः। उत्पत्तिमत्त्वे चानवस्था। अस्माकं त्ववस्थानां पृथक्प्रतिपत्तिकार्ययोगानर्हत्वादवस्थावत एवोत्पत्त्यादिकं सर्वमिति निरवद्यम्। कपालत्वचूर्णत्वपिण्डत्वावस्थाप्रहाणेन घटत्वावस्थावदेकत्वावस्थाप्रहाणेन बहुत्वावस्था तत्प्रहाणेनैकत्वावस्था चेति न कश्चिद्विरोधः। तथा [१]"सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्" इति सदेवेदम् इदानीं विभक्तनामरूपत्वेन नानारूपं जगत् अग्रे नामरूपविभागाभावेनैकमेवासीत्, सर्वशक्तित्वेनाधिष्ठातन्तरासहतया अद्वितीयं चेत्यनन्यत्वमेवोपपादितम्। तथा [२]"तदैक्षत बहु स्यां प्रजायेय" इति स्रक्ष्यमाणतेजःप्रभृतिविविधविचित्रस्थिरत्रसरूपजगत्त्वेनात्मनो बहुभवनं सङ्कल्प्य जगत्सर्गाभिधानात्कार्यभूतस्य जगतः परमकारणात्परस्माद्ब्रह्मणोऽनन्यत्वमवसीयते। सच्छब्दवाच्यस्य परस्य ब्रह्मणस्सर्वज्ञस्य सत्यसङ्कल्पस्य निरवद्यस्यैव सदेवेदमिति निर्देशार्हजगत्त्वम्, सच्छब्दवाच्यस्यैव जगतो नामरूपविभागाभावेनैकत्वमधिष्ठातन्तरनिरपेक्ष-

१. छा. ६-२-१ ॥—२. छा. ६-२-३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्वम्, पुनरपि तस्यैव विचित्रस्थिरत्वसरूपजगत्त्वेन बहुभवनसङ्कल्परूपेक्षणम्, यथासङ्कल्पं सर्गश्च कथमुपपद्यतइत्याशङ्क्याह [१]"सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवताः अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति तासां त्रिवृतं त्रिवृतम्" इत्यादि। [१]"तिस्रो देवताः"इति कृत्स्नमचिद्वस्तु निर्दिश्य स्वात्मकजीवानुप्रवेशेनैतद्विचित्रनामरूपभाकरवाणीत्युक्तम्। अनेन जीवेनात्मना—मदात्मकजीवेन आत्मतयाऽनुप्रविश्यैतद्विचित्रनामरूपभाकरवाणीत्यर्थः। स्वात्मनो जीवस्य चात्मतयाऽनुप्रवेशकृतं नामरूपभाक्त्वमित्युक्तं भवति। [२]"तत्सृष्ट्वा तदेवानुप्राविशत् तदनुप्रविश्य सच्च त्याच्चाभवत्" इति श्रुत्यन्तरेण स्पष्टं सजीवं जगत्परेण ब्रह्मणा आत्मतयाऽनुप्रविष्टमिति। तदेतत्कार्यावस्थस्य च कारणावस्थस्य च चिदचिद्वस्तुनः स्थूलस्य सूक्ष्मस्य च परब्रह्मशरीरत्वम्, परस्य च ब्रह्मण आत्मत्वमन्तर्यामिब्राह्मणादिषु सिद्धं स्मारितम्। अनेन पूर्वोक्ता शङ्का निरस्ता। अचिद्वस्तुनि सजीवे ब्रह्मण्यात्मतयाऽवस्थिते नामरूपव्याकरणवचनाच्चिदचिद्वस्तुशरीरकं ब्रह्मैव जगच्छब्दवाच्यमिति [३]"सदेवेदमग्र एकमेवासीत्" इत्यादिसर्वमुपपन्नतरम्। शरीरभूतचिदचिद्वस्तुगतास्सर्वे विकाराश्चापुरुषार्थाश्चेति ब्रह्मणो निरवद्यत्वं कल्याणगुणाकरत्वं च सुस्थितम्। तदेतत् [४]"अधिकं तु भेदनिर्देशात्" इत्यनन्तरमेव वक्ष्यति। तथा [५]"ऐतदात्म्यमिदं सर्वम्" इति कृत्स्नस्य चेतनाचेतनस्य ब्रह्मतादात्म्यमुपदिशति। तदेवच [५]"तत्त्वमसि" इति निगमयति। तथा प्रकरणान्तरस्थेष्वपि वाक्येषु [६]"सर्वं खल्विदं ब्रह्म" [७]"आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इदं सर्वं विदितम्" [८]"इदं सर्वं यदयमात्मा" [९]"ब्रह्मैवेदं सर्वम्" [१०]"आत्मैवेदं सर्वम्" इत्यनन्यत्वं प्रतीयते, तथाऽन्यत्वं च निषिध्यते [११]"सर्वं तं परा दा-

१. छा. ६-३-२ ॥—२. तै. आन. ६-२ ॥—३. छा. ६-२-१ ॥—४. शारी. २-१-२२ ॥—५. छा. ६-८-७ ॥—६. छा. ३-१४-१ ॥—७. बृ. ६-५-६ ॥—८. बृ. ६-५-७ ॥—९. ॥—१०. छा. ७-२५-२ ॥—११. बृ. ६-५-७॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्यो ऽन्यत्रात्मनस्सर्वं वेद"[१] "नेह नानास्ति किञ्चन। मृत्योस्स मृत्युमाप्नोति य इह नानेव पश्यति" इति,तथा [२] "यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्" इत्यविदुषो द्वैतदर्शनं विदुषश्चाद्वैतदर्शनं प्रतिपादयदनन्यत्वमेव तात्त्विकमिति प्रतिपादयति। तदेवमारम्भणशब्दादिभ्यो जगतः परमकारणात्परस्माद्ब्रह्मणोऽनन्यत्वमुपपाद्यते। अत्रेदं तत्त्वं–चिदचिद्वस्तुशरीरतया तत्प्रकारं ब्रह्मैव सर्वदा सर्वशब्दाभिधेयम्। तत्कदाचित्स्वस्मात्स्वशरीरतयापि पृथग्व्यपदेशानर्हसूक्ष्मदशापन्नचिदचिद्वस्तुशरीरम्। तत्कारणावस्थं ब्रह्म। कदाचिच्च विभक्तनामरूपव्यवहारार्हस्थूलदशापन्नचिदचिद्वस्तुशरीरम्। तच्च कार्यावस्थमिति कारणात्परस्माद्ब्रह्मणः कार्यरूपं जगदनन्यत् शरीरभूतचिदचिद्वस्तुनः शरीरिणो ब्रह्मणश्च कारणावस्थायां कार्यावस्थायांच श्रुतिशतसिद्धया स्वभावव्यवस्थया गुणदोषव्यवस्था च[३] "नतु दृष्टान्तभावात्" इत्यत्रोक्ता॥

ये तु कार्यकारणयोरनन्यत्वं कार्यस्य मिथ्यात्वाश्रयेण वर्णयन्ति, न तेषां कार्यकारणयोरनन्यत्वं सिध्यति, सत्यमिथ्यार्थयोरैक्यानुपपत्तेः; तथासति ब्रह्मणो मिथ्यात्वं जगतस्सत्यत्वं वा स्यात्॥

येच कार्यमपि पारमार्थिकमभ्युपयन्तएव जीवब्रह्मणोरौपाधिकमन्यत्वम्, स्वाभाविकं चानन्यत्वम्, अचिद्ब्रह्मणोस्तु द्वयमपि स्वाभाविकमिति वदन्ति; तेषामुपाधिब्रह्मव्यतिरिक्तवस्त्वन्तराभावान्निरवयवस्याखण्डितस्य ब्रह्मण एवोपाधिसम्बन्धाद्ब्रह्मस्वरूपस्यैव हेयाकारपरिणामत् शक्तिपरिणामाभ्युपगमे शक्तिब्रह्मणोरनन्यत्वाच्च जीवब्रह्मणोः कर्मवश्यत्वापहतपाप्मत्वादिव्यवस्थावादिन्योऽचिद्ब्रह्मणोश्च परिणामवादिन्यश्श्रुतयो व्याकुलीभवेयुः॥

ये पुनः निरस्तनिखिलभोक्तृत्वादिविकल्पविप्लवं सर्वशक्तियुक्तं सन्मात्रद्रव्यमेव कारणं ब्रह्म; तच्च प्रलयवेलायां शान्ताशेषसुखदुःखानुभ-

१. बृ. ६-४-१९॥—२. बृ. ६-५-७॥—३. शारी. २-१-९॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वविशेषं स्वप्रकाशमपि सुप्तात्मवदचिदविलक्षणमवस्थितम् ; सृष्टिवेलायां मृत्तिकाद्रव्यमिव घटशरावादिरूपम्, समुद्र इव च फेनतरङ्गबुद्बुदादिरूपो भोक्तृभोग्यनियन्तृरूपेणांशत्रयावस्थमवतिष्ठते ; अतो भोक्तृभोग्यनियन्तृत्वानि तत्प्रयुक्ताश्च गुणदोषाः शरावत्वघटत्वमणिकत्ववत्तद्गतकार्यभेदवच्च व्यवतिष्ठन्ते ; भोक्तृभोग्यनियन्तृणां सदात्मनैकत्वं च घटशरावमणिकादीनां मृदात्मनैकत्ववदुपपद्यते ; अतस्सन्मात्रद्रव्यमेव सर्वावस्थावस्थितमिति ब्रह्मणोऽनन्यज्जगदातिष्ठन्ते ; तेषां सकलश्रुतिस्मृतीतिहासपुराणन्यायविरोधः; सर्वा हि श्रुतयः सस्मृतीतिहासपुराणास्सर्वेश्वरं सदैव सर्वज्ञं सर्वशक्तिं सत्यसङ्कल्पं निरवद्यं देशकालानवच्छिन्नानवधिकातिशयानन्दं परमकारणं ब्रह्म प्रतिपादयन्ति;न पुनरीश्वरादपि परमीश्वरांशि सन्मात्रम्। तथाहि [१]"सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्" [२]"तदैक्षत बहु स्यां प्रजायेयेति"[३]"ब्रह्म वा इदमग्र आसीदेकमेव तदेकं सन्न व्यभवत् तच्छ्रेयोरूपमत्यसृजत क्षत्रं यान्येतानि देवक्षत्राणीन्द्रो वरुणस्सोमो रुद्रः पर्जन्यो यमो मृत्युरीशान इति"[४]"आत्मा वा इदमेक एवाग्र आसीत् नान्यत्किञ्चन मिषत् स ऐक्षत लोकान्नु सृजा इति"[५]"एको ह वै नारायण आसीत् न ब्रह्मा नेशानो नेमे द्यावापृथिवी न नक्षत्राणि नापो नाग्निर्न सोमो न सूर्यः स एकाकी न रमेत तस्य ध्यानान्तस्थस्य"इत्यादिभिः परमकारणं सर्वेश्वरेश्वरो नारायण एवेत्यवगम्यते। सद्ब्रह्मात्मशब्दा हि तुल्यप्रकरणस्थास्तत्तुल्यप्रकरणस्थेन नारायणशब्देन विशेषितास्तमेवावगमयन्ति। [६]"तमीश्वराणां परमं महेश्वरम्" [७]"स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः" इतीश्वरस्यैव कारणत्वं श्रूयते। स्मृतिरपि मानवी [८]"ततस्स्वयम्भूर्भगवान्" इति प्रकृत्य[९]"सोऽभिध्याय शरीरात्स्वात्सिसृ-

१. छा. ६-२-१ ॥—२. छा. ६-२-३ ॥—३. बृ. ३-४-११ ॥—४. ऐतरेय. १-१-१ ॥—५. महोप. १-१ ॥—६. श्वे. ६-७ ॥—७. श्वे. ६-९॥—८. मनु. १-६॥—९. मनु. १-८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

क्षुर्विविधाः प्रजाः। अप एव ससर्जादौ तासु वीर्यमपासृजत्"इति। इतिहासपुराणान्यपि पुरुषोत्तममेव परमकारणमभिदधति [१]"नारायणो जगन्मूर्तिरनन्तात्मा सनातनः···स सिसृक्षुस्सहस्रांशादसृजत्पुरुषान् द्विधा" [२]"विष्णोस्सकाशादुद्भूतं जगत्तत्रैव च स्थितम्"इत्यादिषु। नचेश्वरस्सन्मात्रमेवेति वक्तुं शक्यम्, तस्य तदंशत्वाभ्युपगमात्सविशेषत्वाच्च। नच तस्य ज्ञानानन्दाद्यनन्तकल्याणगुणयोगः कादाचित्क इति वक्तुं शक्यते, तेषां स्वाभाविकत्वेन सदातनत्वात्, [३]"पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च" [४]"यस्सर्वज्ञस्सर्ववित्"इत्यादिभ्यः। ज्ञानानन्दादिशक्तियोग एवास्य स्वाभाविक इति मा वोचः, 'शक्तिः स्वाभाविकी, ज्ञानबलक्रिया च स्वाभाविकी'इति पृथङ्निर्देशाल्लक्षणाप्रसङ्गाच्च। नच पाचकादिवत् 'सर्वज्ञः' इत्यादिषु शक्तिमात्रे कृत्प्रत्ययइति वक्तुं शक्यम्, कृत्प्रत्ययमात्रस्य शक्तावस्मरणात्, [५]"शक्तौ हस्तिकवाटयोः"इत्यादिषु केषाञ्चिदेव कृत्प्रत्ययानां शक्तिविषयत्वस्मरणात्। पाचकादिषु त्वगत्या लक्षणा समाश्रीयते। किञ्च ईश्वरस्य तदंशविशेषत्वात्तस्य चांशित्वे तरङ्गात्समुद्रस्येवांशादंशिनोऽधिकत्वात्, [६]"तमीश्वराणां परमं महेश्वरम्" [३]"न तत्समश्चाभ्यधिकश्च दृश्यते"इत्यादीनीश्वरविषयाणि परश्शतानि वचांसि बाध्येरन्। किञ्च सन्मात्रस्य सर्वात्मकत्वे अंशित्वे च ईश्वरस्य तदंशविशेषत्वात् तस्य सर्वात्मकत्वांशित्वोपदेशा व्याहन्येरन्। नहि मणिकात्मकत्वं तदंशत्वं वा घटशरावादेः। स्वांशेषु सर्वेषु सन्मात्रस्य पूर्णत्वेनेश्वरांशेऽपि तस्य पूर्णत्वात् तदात्मकानि तदंशाश्चेतराणि वस्तूनीति चेन्न, घटेऽपि सन्मात्रस्य पूर्णत्वादीश्वरस्यापि घटात्मकत्वतदंशत्वप्रसङ्गात्। नच सन्मात्रस्य 'घटोऽस्ति' 'पटोऽस्ति'इति वस्तुधर्मतयाऽवगतस्य द्रव्यत्वं कारणत्वं

---

१. भारते. मोक्ष. ८·१२ ॥—२. वि-पु. १-१-३१ ॥—३. श्वे. ६. ८ ॥—४. मु. १-१-९ ॥—५. अष्टा. ३-२-५४ ॥— ६. श्वे. ६-७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वोपपद्यते। व्यवहारयोग्यता हि सत्त्वम्। विरोधिव्यवहारयोग्यता तद्व्यवहारयोग्यस्यासत्त्वम्। द्रव्यमेव सदित्यभ्युपगमे क्रियादीनामसत्त्वप्रसङ्गः। क्रियादिषु काशकुशावलम्बनेऽपि सर्वत्रैकरूपा सत्ता दुरुपपादा। सदात्मनाच सर्वस्याभिन्नत्वे सर्वज्ञत्वेन सर्वस्वभावप्रतिसन्धानात्सर्वगुणदोषसङ्करप्रसङ्गश्च पूर्वमेवोक्तः। अतो यथोक्तप्रकारमेवानन्यत्वम् ॥ १५ ॥

अथोच्येत—एकस्यैवावस्थान्तरयोगेऽपि बुद्धिशब्दान्तरादयो बालत्वयुवत्वादिषु दृश्यन्ते, मृदारुहिरण्यादिषु द्रव्यान्तरत्वेऽपि दृश्यन्ते, तत्र मृद्घटादिषु कार्यकारणेषु बुद्धिशब्दान्तरादयोऽवस्थानिबन्धना एवेति कुतो निर्णीयते—इति। तत्रोत्तरम्—

भावे चोपलब्धेः। २। १। १६॥

कुण्डलादिकार्यसद्भावे च कारणभूतहिरण्यस्योपलब्धेः—'इदं कुण्डलं हिरण्यम्' इति हिरण्यत्वेन प्रत्यभिज्ञानादित्यर्थः। नचैवं हिरण्यादिषु द्रव्यान्तरेषु मृदादय उपलभ्यन्ते। अतो बालयुवादिवत्कारणभूतमेव द्रव्यमवस्थान्तरापन्नं कार्यमिति गीयते; द्रव्यान्तरवादिनाऽप्यभ्युपेतेनावस्थान्तरयोगेन बुद्धिशब्दान्तरादिषूपपन्नेष्वनुपलब्धद्रव्यान्तरकल्पनानुपपत्तेश्च। नच जातिनिबन्धनेयं प्रत्यभिज्ञा, जात्याश्रयभूतद्रव्यान्तरानुपलब्धेः। एकमेव हेमजातीयं द्रव्यं कार्यकारणोभयावस्थं दृश्यते। नच द्रव्यभेदे समवायिकारणानुवृत्त्या कार्ये प्रतिसन्धानमिति वक्तुं शक्यम्, द्रव्यान्तरत्वे सत्याश्रयानुवृत्तिमात्रेण तदाश्रितद्रव्यान्तरे प्रतिसन्धानानुपपत्तेः। गोमयादिकार्ये वृश्चिकादौ गोमयादिप्रतिसन्धानं न दृश्यत इति चेन्न, तत्राप्याद्यकारणभूतपृथिवीद्रव्यप्रत्यभिज्ञानात्। अग्निकार्ये धूमे अग्निप्रत्यभिज्ञानं न दृश्यत इति चेत्—भवतु, न तत्र प्रत्यभिज्ञानम्; तथापि न दोषः, अग्नेर्निमित्तकारणमात्रत्वात्। अग्नि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

संयुक्तार्द्रेन्धनाद्धि धूमो जायते । गन्धैक्याच्चार्द्रेन्धनकार्यमेव धूमः। अतः कार्यभावेच तदेवेदमित्युपलब्धेर्बुद्धिशब्दान्तरादयोऽवस्थाभेदमात्रनिबन्धना इत्यवगम्यते । तस्मात्कारणादनन्यत्कार्यम् ॥ १६ ॥

इतश्च—

सत्त्वाच्चापरस्य । २। १। १७॥

अपरस्य कार्यस्य कारणे सत्त्वाच्च कारणात्कार्यस्यानन्यत्वम् । लोकवेदयोर्हि कार्यमेव कारणतया व्यपदिश्यते ; यथा लोके 'सर्वमिदं घटशरावादिकं पूर्वाह्णे मृत्तिकैवासीत्' इति ; वेदेच [1]"सदेव सोम्येदमग्र आसीत्" इति ॥ १७ ॥

असद्व्यपदेशान्नेतिचेन्न धर्मान्तरेण वाक्यशेषाद्युक्तेश्शब्दान्तराच्च । २। १। १८॥

यदुक्तं कारणे कार्यस्य सत्त्वं लोकवेदाभ्यामवगम्यते इति ; तदयुक्तम् ,असद्व्यपदेशात् [1]"असदेवेदमग्र आसीत्"[2]"असद्वा इदमग्र आसीत्" [3]"इदं वा अग्रे नैव किञ्चनासीत्" इति ; लोकेच 'सर्वमिदं घटशरावादिकं पूर्वाह्णे नासीत्" इति। अतो यथोक्तं नोपपद्यत इति चेत्—तन्न, धर्मान्तरेण तथा व्यपदेशात् । स खल्वसद्व्यपदेशस्तस्यैव कार्यद्रव्यस्य पूर्वकाले धर्मान्तरेण—संस्थानान्तरेण; न भवदभिप्रेतेन तुच्छत्वेन । सत्त्वासत्त्वे हि द्रव्यधर्मावित्युक्तम् । तत्र सत्त्वधर्माद्धर्मान्तरमसत्त्वम् । इदंशब्दनिर्दिष्टस्य जगतस्सत्त्वधर्मो नामरूपे ; असत्त्वधर्मस्तु तद्विरोधिनी सूक्ष्मावस्था । अतो जगतो नामरूपयुक्तस्य तद्विरोधि सूक्ष्मदशापन्नस्यासत्त्वम् । कथमिदमवगम्यते—वाक्यशेषाद्युक्तेः शब्दा-

१. छा. ६-२-१॥—२. शतपथब्राह्मणे. ६-१-१॥—३. यजुषि.२-अष्ट.२-प्र. ९-अनु॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न्तराच्च — वाक्यशेषस्तावत् [१]"इदं वा अग्रे नैव किञ्चनासीत्" इत्यत्र [२]"तदसदेव सन्मनोऽकुरुत स्यामिति" इति; अनेन वाक्यशेषगतेन मनस्कारलिङ्गेनासच्छब्दार्थे तुच्छातिरिक्ते निश्चिते, तदैकार्थ्यात् [३]"असदेवेदम्" इत्यादिष्वप्यसच्छब्दस्यायमेवार्थ इति निश्चीयते। युक्तेश्चासत्त्वस्य धर्मान्तरत्वमवगम्यते; युक्तिर्हि सत्त्वासत्त्वे पदार्थधर्मावावगमयति। मृद्द्रव्यस्य पृथुबुध्नोदराकारयोगो घटोऽस्तीति व्यवहारहेतुः; तस्यैव तद्विरोध्यवस्थान्तरयोगो घटो नास्तीति व्यवहारहेतुः; तत्र कपालाद्यवस्थायास्तद्विरोधित्वेन सैव घटावस्थस्य नास्तीति व्यवहारहेतुः। नच तद्व्यतिरिक्तो घटाभावो नाम कश्चिदुपलभ्यते; नच कल्प्यते, तावतैवाभावव्यवहारोपपत्तेः। तथा शब्दान्तराच्च पूर्वकाले धर्मान्तरयोग एवावगम्यते। शब्दान्तरञ्च पूर्वोदाहृतम् [३]"सदेव सोम्येदमग्र आसीत्" इत्यादिकम्। तत्र हि [४]"कुतस्तु खलु सोम्यैवं स्यात्" इति तुच्छत्वमाक्षिप्य [४]"सत्त्वेव सोम्येदमग्र आसीत्" इति स्थापितम्। [५]"तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यां व्याक्रियत" इति सुस्पष्टमुक्तम् ॥ १८ ॥

इदानीं कार्यस्य कारणादनन्यत्वे निदर्शनद्वयं द्वाभ्यां सूत्राभ्यां दर्शयति—

पटवच्च । २। १। १९॥

यथा तन्तव एव व्यतिषङ्गविशेषभाजः पट इति नामरूपकार्यान्तरादिकं भजन्ते; तद्वद्ब्रह्मापि ॥ १९ ॥

यथाच प्राणादिः । २। १। २०॥

यथा च वायुरेक एव शरीरे वृत्तिविशेषं भजमानः प्राणापाना-

---

१. यजुषि. २-अष्ट. २-प्र. ९-अनु ॥—२. यजुषि. २-अष्ट. २ - प्र. ९ - अनु ॥—३. छा. ६-२-१ ॥—४. छा. ६-२-२ ॥—५. बृ. ३-४-७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दिनामरूपकार्यान्तराणि भजते ; तद्वद्ब्रह्मैकमेव विचित्रस्थिरत्रसरूपं जगद्भवतीति परमकारणात्परस्माद्ब्रह्मणोऽनन्यत्वं जगतस्सिद्धम् ॥ २० ॥

इति श्रीशारीरकमीमांसाभाष्ये आरम्भणाधिकरणम् ॥ ६ ॥

वेदान्तसारे—तदनन्यत्वमारम्भणशब्दादिभ्यः ॥ कारणभूताद्ब्रह्मणोऽनन्यत्वं कार्यभूतजगतः वाचारम्भणशब्दादिभ्यो वाक्येभ्योऽवगम्यते, १"वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" २"सदेवसोम्येदमग्र आसीदेकमेवाद्वितीयं तदैक्षत बहु स्यां प्रजायेयेति" ३"ऐतदात्म्यमिदं सर्वं... तत्त्वमसि" इत्यादिभ्यः ॥ १५ ॥

भावेचोपलब्धेः ॥ घटादिकार्यभावे च तदेवेदं मृद्द्रव्यमित्युपलब्धेश्च कारणादनन्यत्कार्यम् ॥ १६ ॥

सत्त्वाच्चापरस्य ॥ कार्यस्य कारणे सत्वाच्च तस्मादनन्यत्कार्यम्, घटशरावादिकं पूर्वम्मृदेवासीदिति हि घटादिः मृदात्मनोपलभ्यते ॥ १७ ॥

असद्व्यपदेशान्नेतिचेन्न धर्मान्तरेण वाक्यशेषाद्युक्तेश्शब्दान्तराच्च॥ ४"इदं वा अग्रे नैव किञ्चनासीत्"इति कार्यस्य तदानीमसन्वव्यपदेशात् कारणे कार्यमसदिति चेत्—न, स्थूलत्वविरोधिसूक्ष्मत्वरूपधर्मान्तरयोगादसत्त्वव्यपदेशः; कुतः? ४"तदसदेव सन्मनोऽकुरुत स्याम्" इति वाक्यशेषादवगम्यते; मनस्कारो हि विद्यमानस्यैवायुक्तिश्च-असद्व्यपदेशो धर्मान्तरयोगनिमित्तइति गमयति; पिण्डत्वघटत्वकपालत्वादिभिः परस्परविरोधिभिः भावरूपैर्धर्मैः घटः प्राङ्नासीदिदानीमस्ति भविष्यतिचेति सदा विद्यमानस्यैव मृद्द्रव्यस्य हि असदादिव्यपदेशः। तथा शब्दान्तरञ्च ५" तद्धेदं तर्ह्यव्याकृतमासीत्" इत्यादि ॥ १८॥

पटवच्च ॥ तन्तव एव संयोगविशेषभाजः पट इति नामान्तरादिकं भजन्ते, तद्वत् ब्रह्मापि ॥ १९ ॥

यथाच प्राणादिः ॥ यथा च वायुरेक एव वृत्तिविशेषैः प्राणापानादिनामानि भजते, तथा ब्रह्मापीति तदनन्यत्वं जगतः ॥ २० ॥

इति वेदान्तसारे आरम्भणाधिकरणम् ॥ ६ ॥

---

१. छा. ६-१-५ ॥—२. छा. ६-२-१॥—३. छा. ६-८-७ ॥—४. यजुषि. २-अष्ट. २-प्र. ८-अनु ॥—५. बृ. ३-४-७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वेदान्तदीपे—तदनन्यत्वमारम्भणशब्दादिभ्यः ॥ किं ब्रह्मकार्यं जगत् ब्रह्मणोऽन्यत् ,उतानन्यदिति संशयः।अन्यदिति पूर्वः पक्षः, तथोपलब्धेः नहि बुद्धिशब्दान्तरादयः कारणात्कार्यस्यानन्यत्वे कथंचिदुपपद्यन्ते; कारकव्यापारवैयर्थ्यं चानन्यत्वे; अतो वस्तुविरोधादनन्यत्वश्रुतयः लक्षणया नेयाः। राद्धान्तस्तु-१ ''वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्'' २''सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजत'' ३''ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो''४'सर्वं खल्विदं ब्रह्म तज्जलानिति''५''तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यां व्याक्रियत''इत्यादिश्रुतिशतसिद्धं कार्यस्य जगतः कारणाद्ब्रह्मणोऽनन्यत्वम्।नचात्र वस्तुविरोधगन्धः; कारणभूतमृदादिद्रव्यस्यैव पृथुबुध्नोदराद्यवस्थान्तरापत्त्या बुद्धिशब्दान्तरादयोऽप्युपपद्यन्ते। ततएव कारकव्यापाराद्यर्थवत्त्वञ्च ; कारणस्यैव कार्यावस्थायामपि प्रत्यभिज्ञायमानस्यावस्थान्तरापत्त्यैव सर्वेषूपपन्नेषु अनुपलब्धद्रव्यान्तरकल्पना न सम्भवति; तस्माद्ब्रह्मकार्यं जगत् ब्रह्मणोऽनन्यदेव॥

सूत्रार्थस्तु—तस्मात् ब्रह्मणः, अनन्यत्वं कार्यस्य जगतः आरम्भणशब्दादिभ्यो वाक्येभ्यस्तदुपपादयद्भ्योऽवगम्यते; आरम्भणमिति शब्द आदिर्येषां पूर्वोक्तानां वाक्यानाम्, तान्यारम्भणशब्दादीनि ; तान्यनन्यत्वमुपपादयन्ति॥

भावेचोपलब्धेः ॥ घटादिकार्यभावे च तदेवेदं मृद्द्रव्यमित्थमवस्थितमिति कारणस्य उपलब्धेश्च कारणादनन्यत्वं कार्यस्य। यथा देवदत्तस्य बालत्वयुवत्वाद्यवस्थाविशिष्टस्य नान्यत्वम् ॥ १६ ॥

सत्त्वाच्चापरस्य ॥ अपरस्य कार्यस्य कारणे सत्त्वाच्च कारणादनन्यत्कार्यम्। सर्वमिदं घटशरावादिकार्यं पूर्वाह्णे मृदेवासीदिति हि कारणे कार्यमुपलभ्यते। घटशरावादिसंस्थानसंस्थितमेव मृद्द्रव्यं पूर्वकाले पिण्डाकारमुपलब्धमित्यर्थः ॥ १७ ॥

असद्व्यपदेशान्नेतिचेन्न धर्मान्तरेण वाक्यशेषाद्युक्तेश्शब्दान्तराच्च॥ ६''असदेवेदमग्र आसीत्'' ७''इदं वा अग्रे नैव किञ्चनासीत्'' इत्यादिषु कारणावस्थायां कार्यस्यासत्त्वव्यपदेशात् कारणे कार्यं सदित्येतन्नोपपद्यत इति चेन्न, सदितिव्यपदेशहेतुभूतनामरूपावस्थाविरोधिसूक्ष्मावस्थाख्यधर्मान्तरेण

१. छा. ६-१-५ ॥—२. छा. ६-२-१ ॥—३. छा.६-८-७॥—४. छा. ३-१४-१ ॥—५. बृ. ३-४-७ ॥—६. छा. ६-२-१ ॥—७. यजुषि. २-अष्ट. २-प्र. ८-अनु ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

योगादसदिति व्यपदिश्यते। कथमिदमवगम्यते? वाक्यशेषाद्युक्तेश्शब्दान्तराच्च। वाक्यशेषस्तावत् १"तदसदेव सन्मनोऽकुरुत स्याम्" इति। असदिति व्यपदिष्टस्यैव मनस्कारप्रतिपादनेन असद्व्यपदेशो धर्मान्तरयोगादित्यवगम्यते। युक्तिश्च धर्मान्तरयोगमेवासद्व्यपदेशहेतुमवगमयति ; घटोऽस्ति घटो नास्तीति सदसद्व्यपदेशयोः घटत्वकपालत्वयोः परस्परविरोधिधर्मयोरेव हेतुत्वे सिद्धेतदतिरिक्तानुपलब्धतुच्छत्वस्य हेतुत्वकल्पनानुपपत्तेः। तथा शब्दान्तरं च "२सदेवसोम्येदमग्र आसीत्" इति समानप्रकरणस्थमसच्छब्दं धर्मान्तरयोगनिमित्तमवगमयति ॥ १८ ॥

पटवच्च ॥ यथा तन्तव एव व्यतिषङ्गविशेषभाजः पट इति नामरूपाभ्यां कार्यान्तरादिकं भजन्ते, तद्वद्ब्रह्मापि ॥ १९ ॥

यथाच प्राणादिः॥ यथा च वायुरेक एव शरीरे वृत्तिविशेषं भजमानः प्राणापानादिनामरूपकार्यान्तराणि भजते, तद्वद्ब्रह्मापीति तदनन्यत्वं जगतस्सिद्धम् ॥ २० ॥

इति वेदान्तदीपे आरम्भणाधिकरणम् ॥ ६ ॥

(श्रीशारीकमीमांसाभाष्ये इतरव्यपदेशाधिकरणम्॥ ७ ॥)

इतरव्यपदेशाद्धिताकारणादिदोषप्रसक्तिः२।१।२१

जगतो ब्रह्मानन्यत्वं प्रतिपादयद्भिः३"तत्त्वमसि"४"अयमात्मा ब्रह्म"इत्यादिभिर्जीवस्यापि ब्रह्मानन्यत्वं व्यपदिश्यत इत्युक्तम्; तत्रेदं चोद्यते; यदीतरस्य जीवस्य ब्रह्मभावोऽमीभिर्वाक्यैर्व्यपदिश्यते, तदा ब्रह्मणः सार्वज्ञ्यसत्यसङ्कल्पत्वादियुक्तस्यात्मनो हितरूपजगदकरणमहितरूपजगत्करणमित्यादयो दोषाः प्रसज्येरन्। आध्यात्मिकाधिदैविकाधिभौतिकानन्तदुःखाकरं चेदं जगत्;नचेदृशे स्वानर्थे स्वाधीनो बुद्धिमान्

१. यजुषि. २, अष्ट. २. प्र. ८. अनु ॥—२. छा. ६-२-१॥—३. छा. ६-८-७ ॥—४. बृ. ६-४-५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रवर्तते । जीवाद्ब्रह्मणो भेदवादिन्यश्श्रुतयो जगद्ब्रह्मणोरनन्यत्वं वदता त्वयैव परित्यक्ताः, भेदे सत्यनन्यत्वासिद्धेः ॥

औपाधिकभेदविषया भेदश्रुतयः स्वाभाविकाभेदविषयाश्चाभेदश्रुतय इतिचेत्–तत्रेदं वक्तव्यम्–स्वभावतः स्वस्मादभिन्नं जीवं किमनुपहितं जगत्कारणं ब्रह्म जानाति वा, नवाः न जानाति चेत्–सर्वज्ञत्वहानिः; जानाति चेत्–स्वस्मादभिन्नस्य जीवस्य दुःखं स्वदुःखमिति जानतो ब्रह्मणो हिताकरणाहितकरणादिदोषप्रसक्तिरनिवार्या ॥

जीवब्रह्मणोरज्ञानकृतो भेदः, तद्विषया भेदश्रुतिरिति चेत्–तत्रापि जीवाज्ञानपक्षे पूर्वोक्तो विकल्पस्तत्फलं च तदवस्थम् । ब्रह्माज्ञानपक्षे स्वप्रकाशस्वरूपस्य ब्रह्मणोऽज्ञानसाक्षित्वं तत्कृतजगत्सृष्टिश्च न सम्भवति । अज्ञानेन प्रकाशस्तिरोहितश्चेत्–तिरोधानस्य प्रकाशनिवृत्तिकरत्वेन प्रकाशस्यैव स्वरूपत्वात्स्वरूपनिवृत्तिरेवेति स्वरूपनाशादिदोषसहस्रं प्रागेवोदीरितम् । अत इदमसङ्गतं ब्रह्मणो जगत्कारणत्वम्॥२१॥

(सिद्धान्तः)

इति प्राप्तेऽभिधीयते—

अधिकन्तु भेदनिर्देशात् । २। १। २२॥

तुशब्दः पक्षं व्यावर्तयतिः आध्यात्मिकादिदुःखयोगार्हात्प्रत्यगात्मनः अधिकम् अर्थान्तरभूतं ब्रह्म । कुतः, भेदनिर्देशात्–प्रत्यगात्मनो हि भेदेन निर्दिश्यते परं ब्रह्म [१]"य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मनमन्तरो यमयति स त आत्माऽन्तर्याम्यमृतः" [२]"पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति" [३]"स कारणं करणाधिपाधिपः" [४]"तयोरन्यः पिप्पलं स्वाद्वत्ति

१. बृ. ५-७-२२. मा. पा ॥—२. श्वे. १-६ ॥—३. श्वे. ६-९ ॥—४. श्वे. ४-६॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अनश्नन्नन्यो अभिचाकशीति"[१] "ज्ञाज्ञौ द्वावजावीशनीशौ" [२] "प्राज्ञेनाऽत्मना सम्परिष्वक्तः" [३] "प्राज्ञेनात्मनाऽन्वारूढः" [४] "अस्मान्मायी सृजते विश्वमेतत् तस्मिंश्चान्यो मायया सन्निरुद्धः" [५] "प्रधानक्षेत्रज्ञपतिर्गुणेशः" [६] "नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्" [७] "योऽव्यक्तमन्तरे सञ्चरन् यस्याव्यक्तं शरीरं यमव्यक्तं न वेद योऽक्षरमन्तरे सञ्चरन् यस्याक्षरं शरीरं यमक्षरं न वेद एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायणः" इत्यादिभिः ॥ २२ ॥

अश्मादिवच्च तदनुपपत्तिः । २। १। २३॥

अश्मकाष्ठलोष्टतृणादीनामत्यन्तहेयानां सततविकारास्पदानामचिद्विशेषाणां निरवद्यनिर्विकारनिखिलहेयप्रत्यनीककल्याणैकतानस्वेतरसमस्तवस्तुविलक्षणानन्तज्ञानानन्दैकस्वरूपनानाविधानन्तमहाविभूतिब्रह्मस्वरूपैक्यं यथा नोपपद्यते, तथा चेतनस्याप्यनन्तदुःखयोगार्हस्य स्वद्योतकल्पस्य [८] "अपहतपाप्मा" इत्यादिवाक्यावगतसकलहेयप्रत्यनीकानवधिकातिशयासङ्ख्येयकल्याणगुणाकरब्रह्मभावानुपपत्तिः । सामानाधिकरण्यनिर्देशः [९] "यस्यात्मा शरीरम्" इत्यादिश्रुतेर्जीवस्य ब्रह्मशरीरत्वाद्ब्रह्मणो जीवशरीरतया तदात्मत्वेनावस्थितेर्जीवप्रकारब्रह्मप्रतिपादनपरश्चैतदविरोधी, प्रत्युतैतस्यार्थस्योपपादकश्चेति [१०] "अवस्थितेरिति काशकृत्स्नः" इत्यादिभिरसकृदुपपादितम् । अतस्सर्वावस्थं ब्रह्म चिदचिद्वस्तुशरीरामिति सूक्ष्मचिदचिद्वस्तुशरीरं ब्रह्म कारणम्; तदेव ब्रह्म स्थूलचिदचिद्वस्तुशरीरं जगदाख्यं कार्यमिति जगद्ब्रह्मणोस्सामानाधिकरण्योपपत्तिः, जगतो ब्रह्मकार्यत्वम्, ब्रह्मणोऽनन्यत्वम्, अचिद्वस्तुनो जीवस्य

---

१. श्वे. १-९ ॥—२. बृ. ६-३-२१ ॥—३. बृ. ६-३-३५ ॥—४. श्वे. ४-९ ॥—५. श्वे. ६-१६ ॥—६. श्वे. ६-१३ ॥—७. सुबाल. ७ ॥—८. छा. ८-१-५ ॥—९. बृ. ५-७-२२. मा. पा॥—१०. शारी. १-४-२२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

च ब्रह्मणश्च परिणामित्वदुःखित्वकल्याणगुणाकरत्वस्वभावासङ्गरस्सर्वश्रुत्यविरोधश्च भवति। [१]"सदेव सोम्येदमग्र आसीदेकमेव" इत्यविभागावस्थायामप्यचिद्युक्तजीवस्य ब्रह्मशरीरतया सूक्ष्मरूपेणावस्थानमवश्याभ्युपगन्तव्यम्, [२]"वैषम्यनैर्घृण्ये न सापेक्षत्वात्" [३]"न कर्माविभागादितिचेन्नानादित्वादुपपद्यते चाप्युपलभ्यते च" इति सूत्रद्वयोदितत्वात्तदानीमपि सूक्ष्मरूपेणावस्थानस्य। अविभागस्तु नामरूपविभागाभावादुपपद्यते। अतो ब्रह्मकारणत्वं सम्भवत्येव। ये पुनरस्यैव जीवस्याविद्याविमुक्तावस्थामभिप्रेत्येमं भेदं वर्णयन्ति, तेषामिदं सर्वमसङ्गतं स्यात्; न हि तदवस्थस्य सर्वज्ञत्वं, सर्वेश्वरत्वं, समस्तकारणत्वं, सर्वात्मत्वं, सर्वनियन्तृत्वमित्यादीनि सन्ति। अनेनैव रूपेण ह्याभिः श्रुतिभिः प्रत्यगात्मनो भेदः प्रतिपाद्यते; तस्य सर्वस्याविद्यापरिकल्पितत्वात्। नचाविद्यापरिकल्पितस्याविद्यावस्थायां शुक्तिकारजतादिभेदवत्परस्परभेदोऽत्र सूत्रकारेण [४]"अधिकन्तु भेदनिर्देशात्" इत्यादिषु प्रतिपाद्यते; ब्रह्मजिज्ञासा कर्तव्येति जिज्ञास्यतया प्रक्रान्तस्य ब्रह्मणो जगज्जन्मादिकारणस्य वेदान्तवेद्यत्वम्, तस्य च स्मृतिन्यायविरोधपरिहारश्च क्रियते। [५]"अपीतौ तद्वत्प्रसङ्गादसमञ्जसम्" [६]"न तु दृष्टान्तभावात्" इति सूत्रद्वयमेतदधिकरणसिद्धमनुवदति; तत्र हि विलक्षणयोः कार्यकारणभावसम्भव एवाधिकरणार्थः। [७]"असदिति चेन्न प्रतिषेधमात्रत्वात्" इति च पूर्वाधिकरणस्थमनुवदति॥ २३॥

इति श्रीशारीरकमीमांसाभाष्ये इतरव्यपदेशाधिकरणम्॥ ७॥

---

१. छा. ६-२-१॥—२. शारी. २-१-३४॥—३. शारी. २-१-३५॥—४. शारी. २-१-२२॥—५. शारी. २-१-८॥—६. शारी. २-१-९॥—७. शारी. २-१-७॥—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वेदान्तसारे—इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः ॥ १"तत्त्वमसि" २"अयमात्मा ब्रह्म" इति कार्यभूतस्य जीवस्य ब्रह्मभावव्यपदेशाद्धि अनन्यत्वमुक्तम् ; एवन्तर्हि सर्वज्ञस्य सत्यसङ्कल्पस्य ब्रह्मणः आत्मनो हितरूपकार्यजगदकरणम्, अहितरूपकार्यकरणञ्चेत्यादिदोषप्रसक्तिः ॥ २१ ॥

नैतत्—

अधिकन्तु भेदनिर्देशात् ॥ कार्यकारणयोरनन्यत्वेऽपि जीवस्वरूपात् ब्रह्मस्वरूपमर्थान्तरम्, ३"करणाधिपाधिपः" ४"विद्याविद्ये ईशते यस्तु सोऽन्यः" इत्यादिभेदनिर्देशात् । चिदचिद्वस्तुशरीरं ब्रह्मैव कारणावस्थं कार्यावस्थञ्चेति गुणदोषव्यवस्थितिरिति ५"न तु दृष्टान्तभावात्" इति ह्युक्तम् । ६"यस्य पृथिवी शरीरम्" ७"यस्यात्मा शरीरम्" इत्यादिश्रुतिशतसमधिगतं चिदचिद्वस्तुशरीरकत्वम् ॥ २२ ॥

अश्मादिवच्च तदनुपपत्तिः ॥ अश्मकाष्ठलोष्टतृणादेरचेतनस्येव जीवस्य ८"अनीशया शोचति मुह्यमानः" इत्यादिना अत्यन्तविसजातीयतयाऽभिहितस्य सर्वज्ञसत्यसङ्कल्पब्रह्मस्वरूपतानुपपत्तिस्सिद्ध्यत्येवेत्यर्थः ॥ २३ ॥

इति वेदान्तसारे इतरव्यपदेशाधिकरणम् ॥ ७ ॥

वेदान्तदीपे—इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तितः ॥ ब्रह्मणो जगत्कारणत्वं सम्भवति, नेति संशयः। न सम्भवतीति पूर्वः पक्षः, ९"अयमात्मा ब्रह्म" १"तत्त्वमसि" इति सामानाधिकरण्येन जीवो ब्रह्मेत्यवगमात्, जगत्सर्गस्य च जीवदुःखहेतुत्वात्, आत्महिताकरणादिदोषप्रसक्तेः सर्वज्ञस्य सत्यसङ्कल्पस्य ब्रह्मणो जगत्कारणत्वानुपपत्तेः । जीवपरयोर्भेदवादिन्यश्श्रुतयः, जगद्ब्रह्मणोरनन्यत्वं वदता त्वयैव परित्यक्ताः, भेदे सत्यनन्यत्वासिद्धेः । औपाधिकभेदविषयाः भेदश्रुतयः, स्वाभाविकाभेदविषया अभेदश्रुतयः इति चेत्—तत्रेदं वक्तव्यम्, स्वभावतः स्वस्मादभिन्नं जीवं किमनुपहितं जगत्कारणं ब्रह्म जानाति, न वा ; न जानाति चेत्—सर्वज्ञत्वहानिः ; जानाति चेत्—स्वस्मादभिन्नस्य जीवस्य दुःखं स्वदुःखमिति जानतो ब्रह्मणः हिताकरणाहित-

---

१. छा. ६-८-७ ॥—२. बृ. ६-४-५ ॥—३. श्वे. ६-९ ॥—४. श्वे. ५-१ ॥—५. शारी. २-१-९ ॥—६. सुबाल. ७. ख ॥—७. बृ. ५-७-२२. मा. पा ॥—८. मु. ३-१-२ ; श्वे. ४-७ ॥—९. बृ. ६-४-५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

करणादिदोषप्रसक्तिरनिवार्या । जीवब्रह्मणोरज्ञानकृतो भेदः, तद्विषया भेदश्रुतिरिति चेत्—तत्रापि जीवाज्ञानपक्षे पूर्वोक्तो [1]दोषस्तत्फलं च तदवस्थमेव । ब्रह्माज्ञानपक्षे स्वप्रकाशस्वरूपस्य ब्रह्मणोऽज्ञानसाक्षित्वं तत्कृतजगत्सृष्टिश्च न सम्भवति ; अज्ञानेन प्रकाशस्तिरोहितश्चेत्—तिरोधानस्य प्रकाशानिवृत्तिकरत्वेन प्रकाशस्यैव स्वरूपत्वात्स्वरूपनिवृत्तिरेवेति स्वरूपनाशादिदोषाः भाष्ये प्रपञ्चिताः। राद्धान्तस्तु—[2]"अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया सन्निरुद्धः[3]"तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्यो अभिचाकशीति"[4]"प्रधानक्षेत्रज्ञपतिर्गुणेशः" [5]"पृथगात्मानं प्रेरितारं च मत्वा" इत्यादिभिः प्रत्यगात्मनोऽर्थान्तरभूतं ब्रह्मेत्यवगमात्, जीवकर्मानुगुणतया जगत्सर्गस्य च ब्रह्मणो लीलाप्रयोजनत्वात्, जगत्कारणत्वं सम्भवत्येव। तत्त्वमस्यादिसामानाधिकरण्यनिर्देशः [6]"यस्यात्मा शरीरम्" इत्यादिश्रुतेर्जीवस्य ब्रह्मशरीरत्वात्तच्छरीरतया जीवप्रकारकब्रह्मप्रतिपादनपरः । सूक्ष्मचिदचिद्वस्तुशरीरं ब्रह्म कारणावस्थम्, स्थूलचिदचिद्वस्तुशरीरं ब्रह्मैव कार्यावस्थमिति कार्यकारणयोरनन्यत्वम् । एवमपि शरीरभूतयोश्चिदचिद्वस्तुनोः शरीरिणो ब्रह्मणश्च दुःखित्वपरिणामित्वहेयप्रत्यनीकत्वकल्याणगुणाकरत्वस्वभावाः स्वरूपविवेकविषयश्रुतिसिद्धाः तथैव व्यवस्थिता इति ब्रह्मणो जगत्कारणत्वं सम्भवत्येव सूत्रार्थस्तु—इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः—ब्रह्मण इतरः जीवः ब्रह्मणो जीवतया व्यपदेशात्, जीवस्य च दुःखित्वात्, हितरूपजगदकरणमहितरूपजगत्करणमित्यादिदोषप्रसक्तिर्ब्रह्मणः । अतो ब्रह्मणो जगत्कारणत्वं न सम्भवति—इति ॥ २१ ॥

अत उत्तरं पठति—

अधिकन्तु भेदनिर्देशात् ॥ तुशब्दः पक्षव्यावृत्त्यर्थः प्रत्यगात्मनः अधिकम्—अर्थान्तरभूतं ब्रह्म । कुतः? भेदनिर्देशात्—[7]"स कारणं करणाधिपाधिपः" [4]"प्रधानक्षेत्रज्ञपतिर्गुणेशः" [5]"पृथगात्मानं प्रेरितारं च मत्वा" इत्यादिभिः प्रत्यगात्मनो जीवाद्ब्रह्मणो हि भेदो निर्दिश्यते ॥ २२ ॥

अश्मादिवच्च तदनुपपत्तिः ॥ अश्मकाष्ठलोष्टतृणादेरचेतनस्येवानन्तदुःखाकरजीवस्य निरतिशयानन्दसत्यसङ्कल्पब्रह्मभावानुपपत्तिश्च । न केवलं

१. दोषविकल्पस्तत्फलं च.पा॥—२.श्वे. ४-६॥—३. मु.३-१-१;श्वे.४-६॥—४. श्वे. ६-१६॥—५. श्वे. १-६॥ —६. बृ. ५-७-२२. मा. पा॥—७. श्वे. ६-९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भेदश्रुत्याऽर्थान्तरताऽवगम्यते, वस्त्वनुपपत्त्या चेत्यर्थः। जीवसामानाधिकरण्यनिर्देशः १"यस्यात्मा शरीरम्" इत्यादिश्रुतिशतसिद्धजीवप्रकारकब्रह्मप्रतिपादनपर इति २"अवस्थितेरिति काशकृत्स्नः" इत्यत्रैव प्रतिपादितः ॥ २३ ॥

इति वेदान्तदीपे इतरव्यपदेशाधिकरणम् ॥ ७ ॥

श्रीशारीरकमीमांसाभाष्ये उपसंहारदर्शनाधिकरणम्

उपसंहारदर्शनान्नेतिचेन्न क्षीरवद्धि । २ । १ । २४ ॥

परस्य ब्रह्मणस्सर्वज्ञस्य सत्यसङ्कल्पस्य स्थूलसूक्ष्मावस्थसर्वचेतनाचेतनवस्तुशरीरतया सर्वप्रकारत्वेन सर्वात्मत्वं सकलेतरविलक्षणत्वं चाविरुद्धमिति स्थापितम् । इदानीं सत्यसङ्कल्पस्य परस्य ब्रह्मणः सङ्कल्पमात्रेण विचित्रजगत्सृष्टियोगो न विरुद्ध इति स्थाप्यते । ननु च परिमितशक्तीनां काराककलापोपसंहारसापेक्षत्वदर्शनेन सर्वशक्तेर्ब्रह्मणः कारककलापानुपसंहारेण जगत्कारणत्वविरोधः कथमाशङ्क्यते? ; उच्यते—लोके तत्तत्कार्यजननशक्तियुक्तस्यापि तत्तदुपकरणापेक्षत्वदर्शनात्सर्वशक्तियुक्तस्य परस्य ब्रह्मणोऽपि तत्तदुपकरणविरहिणः स्रष्टृत्वं नोपपद्यत इति कस्यचिन्मन्दधियश्शङ्का जायत इति सा निराक्रियते । घटपटादिकारणभूतानां कुलालकुविन्दादीनां तज्जननसामर्थ्ये सत्यपि कानिचिदुपकरणान्युपसंहृत्यैव जनयितृत्वं दृश्यते । तज्जननाशक्ताः कारककलापोपसंहारेऽपि जनयितुं न शक्नुवन्ति ; शक्ताः पुनः कारककलापोपसंहारे जनयन्तीत्येतावानेव विशेषः । ब्रह्मणोऽपि सर्वशक्तेः सर्वस्य जनयितृत्वं तदुपकरणानामनुपसंहारे नोपपद्यते। प्राक्सृष्टेश्चासहायत्वं —३"सदेव सोम्येदमग्रआसीत्" ४"एको ह वै नारायण आसीत्"इत्या-

१. बृ. ५-७-२२-मा.पा ॥—२.शारी. १-४-२२॥—३.छा. ६-२-२ ॥—४.महो.१-१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दिषु प्रतीयते । अतस्स्रष्टृत्वं नोपपद्यत इत्येवं प्राप्तम् । तदिदमाशङ्क्ते—उपसंहारदर्शनान्नेतिचेत्–इति ॥

(सिद्धान्तः)

परिहरति—न क्षीरवद्धि–इति ; न सर्वेषां कार्यजननशक्तानामुपसंहारसापेक्षत्वमस्ति ; यथा क्षीरजलादेर्दधिहिमजननशक्तस्य तज्जनने; एवं ब्रह्मणोऽपि स्वयमेव सर्वजननशक्तेस्सर्वस्य जनयितृत्वमुपपद्यते । हीति प्रसिद्धवन्निर्देशश्चोद्यस्य मन्दताख्यापनाय । क्षीरादिष्वातञ्चनाद्यपेक्षा न दध्यादिभावाय ; अपितु शैघ्र्यार्थं रसविशेषार्थंवा ॥

देवादिवदपि लोके । २ । १ । २५ ॥

यथा देवादयः स्वेस्वे लोके सङ्कल्पमात्रेण स्वापेक्षितानि सृजन्ति; तथाऽसौ पुरुषोत्तमः कृत्स्नं जगत्सङ्कल्पमात्रेण सृजति । देवादीनां वेदावगतशक्तीनां दृष्टान्ततयोपादानम्, ब्रह्मणो वेदावगतशक्तेस्सुखग्रहणायेति प्रतिपत्तव्यम् ॥

इति श्रीशारीरकमीमांसाभाष्ये उपसंहारदर्शनाधिकरणम् ॥ ८ ॥

वेदान्तसारे—उपसंहारदर्शनान्नेतिचेन्न क्षीरवद्धि॥ कार्यनिर्वृत्तावनेककारकोपसंहारदर्शनात् ब्रह्मैकमेव[1] जगदाकारकार्यन्न भवेदितिचेत्—न,क्षीरस्यैव दधिभाववत् ब्रह्मणोऽपि सम्भवति ॥ २४ ॥

देवादिवदपि लोके ॥ यथा देवादेश्शास्त्रावगतशक्तेः स्वसङ्कल्पादेव स्वेस्वे लोके स्वापेक्षितनानारूपभावः ; एवं ब्रह्मणोऽपि शास्त्रावगतशक्तेस्सर्वमुपपन्नम् ॥ २५ ॥

इति वेदान्तसारे उपसंहारदर्शनाधिकरणम् ॥ ८ ॥

वेदान्तदीपे—उपसंहारदर्शनान्नेतिचेन्न क्षीरवद्धि ॥ ब्रह्मणो जगत्कारणत्वं सम्भवति, न वेति संशयः; न सम्भवतीति पूर्वः पक्षः, लोके कार्य-

१. जगत्कारणं न. पा ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जननसमर्थस्यापि वस्तुनः तत्तत्कार्यजनने अनेककारकोपसंहारदर्शनाद्विचित्रजगज्जननसमर्थस्यापि ब्रह्मणोऽसहायस्य जनयितृत्वानुपपत्तेः। राद्धान्तस्तु—क्षीरस्य दधिभावेऽनन्यापेक्षत्वदर्शनान्नानेककारकोपसंहारनियमो दृश्यत इति ब्रह्मणोऽनन्यापेक्षस्यैव कारणत्वं सम्भवत्येव। १सूत्रमपि व्याख्यातम्। 'क्षीरवद्धि' इतिप्रसिद्धवन्निर्देशः चोद्यमान्यपरः ॥ २४ ॥

देवादिवदपि लोके ॥ यथा देवादयः स्वेस्वे लोके स्वापेक्षितानि स्वसङ्कल्पादेव सृजन्ति ; तथा ब्रह्मापि। देवादेश्शास्त्रावसेयशक्तितया ब्रह्मतुल्यत्वेऽपि देवादिग्रहणं ब्रह्मणो विचित्रशक्तित्वस्य सुग्रहणायेति मन्तव्यम् ॥ २५ ॥

इति वेदान्तदीपे उपसंहारदर्शनाधिकरणम् ॥ ८ ॥

(श्रीशारीरकमीमांसाभाष्ये कृत्स्नप्रसक्त्यधिकरणम् ॥९॥)

कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा॥२। १।२६॥

२"सदेव सोम्येदमग्र आसीत्" ३"इदं वा अग्रे नैव किञ्चनासीत्" ४"आत्मा वा इदमेक एवाग्र आसीत्" इत्यादिषु कारणावस्थायां ब्रह्मैकमेव निरवयवमासीदिति कारणावस्थायां निरस्तचिदचिद्विभागतया निरवयवं ब्रह्मैवासीदित्युक्तम्; तदविभागमेकं निरवयमेव ब्रह्म ५"बहु स्याम्" इति सङ्कल्प्य आकाशवाय्वादिविभागं ब्रह्मादिस्तम्बपर्यन्तक्षेत्रज्ञविभागं चाभवदितिचोक्तम्; एवं सति तदेव परं ब्रह्म कृत्स्नं कार्यत्वेनोपयुक्तमित्यभ्युपगन्तव्यम्। अथ चिदंशः क्षेत्रज्ञविभागविभक्तः, अचिदंशश्चाकाशादिविभागविभक्तः इत्युच्यते, तदा १"स देव सोम्येदमग्र आसीत् एकमेवाद्वितीयम्" "ब्रह्मैकमेव" "आत्मैकएव" इत्येवमादयः कारणभूतस्य ब्रह्मणो निरवयवत्ववादिनश्शब्दाः कुप्येयुः—बाधिता भवेयुः।यद्यपि सूक्ष्मचिदचिद्वस्तुशरीरं ब्रह्म कारणम्,स्थूलचिद-

१. सूत्रं तु निगदव्याख्यातम्. पा ॥ २.छा. ६-२-१॥—.३ २.अष्ट. २-प्र. ८-अनु॥ ४. ऐतरेय. १-१-१ ॥—५. छा. ६-२-३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चिद्वस्तुशरीरं ब्रह्म कार्यमित्यभ्युपगम्यते; तथापि शरीर्यशस्यापि कार्यत्वाभ्युपगमादुक्तदोषो दुर्वारः। तस्य निरवयवस्य बहुभवनं च नोपपद्यते।कार्यत्वानुपयुक्तांशस्थितिश्च नोपपद्यते।तस्मादसमञ्जसमिवाभाति। अतो ब्रह्मकारणत्वं नोपपद्यते ॥

इत्याक्षिप्ते समाधत्ते—

श्रुतेस्तु शब्दमूलत्वात् । २ । १ । २७ ॥

तुशब्द उक्तदोषं व्यावर्तयति । नैवमसामञ्जस्यम् ; कुतः? श्रुतेः श्रुतिस्तावन्निरवयवत्वं ब्रह्मणस्ततो विचित्रसर्गं चाह । श्रौतेऽर्थे यथाश्रुति प्रतिपत्तव्यमित्यर्थः। ननुच श्रुतिरपि अग्निना सिञ्चेदितिवत्परस्परान्वयायोग्यमर्थं प्रतिपादयितुं न समर्था; अत आह—शब्दमूलत्वादिति। शब्दैकप्रमाणकत्वेन सकलेतरवस्तुविसजातीयत्वादस्यार्थस्य विचित्रशक्तियोगो न विरुद्ध्यत इति न सामान्यतो दृष्टं साधनं,दूषणं वा अर्हति ब्रह्म ॥

आत्मनि चैवं विचित्राश्च हि । २ । १ । २८ ॥

किंच—एवं वस्त्वन्तरसंबन्धिनो धर्मस्य वस्त्वन्तरे चारोपणे सति, अचेतने घटादौ दृष्टा धर्मास्तद्विसजातीये चेतने नित्ये आत्मन्यपि प्रसज्यन्ते । तदप्रसक्तिश्च भावस्वभाववैचित्र्यादित्याह—विचित्राश्च हि—इति ; यथा अग्निजलादीनामन्योन्यविसजातीयानामौष्ण्यादिशक्तयश्च विसजातीया दृश्यन्ते ; तद्वल्लोकदृष्टविसजातीये परे ब्रह्मणि तत्तत्तादृष्टास्सहस्रशः शक्तयस्सन्तीति न किञ्चिदनुपपन्नम् । यथोक्तं भगवता पराशरेण—[१]"निर्गुणस्याप्रमेयस्य शुद्धस्याप्यमलात्मनः । कथं सर्गादिकर्तृत्वं ब्रह्मणोऽभ्युपगम्यते" इति सामान्यदृष्ट्या परिचोद्य "शक्तयस्सर्वभावानामचिन्त्यज्ञानगोचराः । यतोऽतो ब्रह्मणस्तास्तु सर्गाद्या भा-

१. वि. पु. अं. १-अ. ३-१-२-३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वशक्तयः ॥ भवन्ति तपतां श्रेष्ठ पावकस्य यथोष्णता" इति। श्रुतिः [१]"किं स्विद्वनं क उ स वृक्ष आसीद्यतो द्यावापृथिवी निष्टतक्षुः। मनीषिणो मनसा पृच्छतेदुतद्यदध्यतिष्ठद्भुवनानि धारयन्। ब्रह्म वनं ब्रह्म स वृक्ष आसीद्यतो द्यावापृथिवी निष्टतक्षुः। मनीषिणो मनसा विब्रवीमि वो ब्रह्माध्यतिष्ठद्भुवनानि धारयन्"इति। सामान्यतो दृष्टं चोद्यं सर्वं वस्तुविलक्षणे परे ब्रह्मणि नावतरतीत्यर्थः ॥

इतश्च—

स्वपक्षदोषाच्च । २ । १ । २९ ॥

स्वपक्षे—प्रधानादिकारणवादे, लौकिकवस्तुविसजातीयत्वाभावेन प्रधानादेः लोकदृष्टा दोषास्तत्र भवेयुरिति सकलेतरविलक्षणं ब्रह्मैव कारणमभ्युपगन्तव्यम्। प्रधानं च निरवयवम्; तस्य निरवयवस्य कथमिव महदादिविचित्रजगदारम्भ उपपद्यते। सत्त्वं रजस्तम इति तस्यावयवा विद्यन्त इति चेत्—तत्रेदं विवेचनीयम्; किं सत्त्वरजस्तमसां समूहः प्रधानम्; उत सत्त्वरजस्तमोभिरारब्धं प्रधानम्; अनन्तरे कल्पे प्रधानं कारणमिति स्वाभ्युपगमविरोधः; स्वाभ्युपेतसङ्ख्याविरोधश्च; तेषामपि निरवयवानां कार्यारम्भविरोधश्च। समूहपक्षे च तेषां निरवयवत्वेन प्रदेशभेदमनपेक्ष्य संयुज्यमानानां न स्थूलद्रव्यारम्भकत्वसिद्धिः। परमाणुकारणवादेऽपि तथैव अणवो निरंशाः निष्प्रदेशाः प्रदेशभेदमनपेक्ष्य परस्परं संयुज्यमाना अपि न स्थूलकार्यारम्भाय प्रभवेयुः ॥

सर्वोपेता च तद्दर्शनात् । २ । १ । ३० ॥

सकलेतरवस्तुविसजातीया परा देवता सर्वशक्त्युपेता च। तथैव परां देवतां दर्शयन्ति हि श्रुतयः—[२]" पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च"तथा [३]"अपहतपाप्मा विजरो विमृत्युर्वि-

१. यजुषि. २-अष्ट. २-प्र. ७-अनु ॥—२. श्वे. ६-७ ॥—३. छा. ८-१-५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शोको विजिघत्सोऽपिपासः"इति सकलेतरविसजातीयतां परस्या देवतायाः प्रतिपाद्य[१]"सत्यकामस्सत्यसङ्कल्पः"इति सर्वशक्तियोगं प्रतिपादयन्ति। तथा [२]"मनोमयः प्राणशरीरो भारूपस्सत्यसङ्कल्प आकाशात्मा सर्वकर्मा सर्वकामस्सर्वगन्धस्सर्वरसः सर्वमिदमभ्यात्तोऽवाक्यनादरः"इति च ॥

विकरणत्वान्नेतिचेत्तदुक्तम् । २ । १ । ३१ ॥

यद्यप्येकमेव ब्रह्म सकलेतरविलक्षणं सर्वशक्तिः; तथापि [३]"न तस्य कार्यं करणं च विद्यते"इति करणविरहिणस्तस्य न कार्यारम्भस्सम्भवतीति चेत्—तत्रोत्तरं—"शब्दमूलत्वात्"। "विचित्राश्चहि" इत्युक्तम् । शब्दैकप्रमाणं सकलेतरविलक्षणं तत्तत्करणविरहेणापि तत्तत्कार्यसमर्थमित्यर्थः । तथाच श्रुतिः—[४]"पश्यत्यचक्षुस्स शृणोत्यकर्णः अपाणिपादो जवनो ग्रहीता" इत्येवमाद्या ॥

इति श्रीशारीरकमीमांसाभाष्ये कृत्स्नप्रसक्त्यधिकरणम् ॥ ९ ॥

वेदान्तसारे—कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा ॥ चिदचिद्वस्तुशरीरकं ब्रह्मैव कार्यकारणावस्थमिति ह्युक्तम् ; तत्र ब्रह्मणश्शरीरिणो निरवयवत्वेन कृत्स्नस्य ब्रह्मणः कार्यत्वेनोपयोगप्रसक्तिः ; कार्यावस्थायामपि अंशान्तरेणावस्थितमिति च पक्षे निरवयवत्वशब्दकोपो वा स्यात् ; अतो ब्रह्म न कारणम् ॥ २६ ॥

परिहरति—

श्रुतेस्तु शब्दमूलत्वात् ॥ श्रुतिप्रामाण्यान्नैवं प्रसज्यते । शब्दैकप्रमाणकत्वाद्ब्रह्मस्वरूपस्य सकलेतरप्रमाणावगतवस्तुविसजातीयत्वेन तत्रतत्रादृष्ट शक्तियोगः ब्रह्मणो न विरुद्धः ; अतः कार्यत्वेन कारणत्वेन परिपूर्णस्यावस्थान सम्भवति । यथा जातिवादिनां जातेः खण्डमुण्डादिषु ॥ २७ ॥

आत्मनि चैवं विचित्राश्च हि ॥ जीवात्मनि चाचिद्धर्मविरोधिधर्मयोगो विसजातीयशक्तित्वादेव, अग्निजलादयोऽप्यचिद्विशेषाः अन्योन्यविलक्षणाः नियतशक्तयो विचित्राः दृश्यन्ते ॥ २८ ॥

---

१. छा. ८-१-५ ॥—२. छा. ३-१४-२ ॥—३. श्वे. ६-८ ॥—४. श्वे. ३-१९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्वपक्षदोषाच्च ॥ कृत्स्नप्रसक्त्यादिदोषः निरवयवेऽचित्सजातीये प्रधाने एवेति ब्रह्मैव कारणम् ॥ २९ ॥

सर्वोपेता च तद्दर्शनात् ॥ १"पराऽस्य शक्तिर्विविधैव श्रूयते" इति श्रुतेः सर्वशक्तियोगश्च देवताया अवगम्यते ॥ ३० ॥

विकरणत्वान्नेतिचेत्तदुक्तम् ॥ २"न तस्य कार्यं करणञ्च विद्यते" इति ब्रह्मणो विकरणत्वात् कारणत्वं नेति चेत्—तस्योत्तरं— शब्दैकमूलत्वेन विसजातीयत्वादिति पूर्वसूत्रोक्तमेव ॥ ३१ ॥

इति वेदान्तसारे कृत्स्नप्रसक्त्यधिकरणम् ॥ ९ ॥

वेदान्तदीपे—**कृत्स्नप्रसक्तिर्निरवयत्वशब्दकोपो वा॥** ब्रह्मणो जगत्कारणत्वं सम्भवति, नेति संशयः। न सम्भवतीति पूर्वः पक्षः,निरवयवस्य ब्रह्मणो जगदुपादानत्वे कृत्स्नस्य ब्रह्मणो जगदाकारेणोपयोगप्रसङ्गात् ; तत्परिजिहीर्षया सावयवत्वाभ्युपगमे ३"सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्" इत्यादिः कारणावस्थायां निरवयवत्ववाचिशब्दो बाध्येत। यद्यपि सूक्ष्मचिदचिद्वस्तुशरीरं ब्रह्म कारणम्, स्थूलचिदचिद्वस्तुशरीरं ब्रह्म कार्यमित्यभ्युपगम्यते, तथापि शरीर्यंशस्यापि कार्यत्वाभ्युपगमात् कृत्स्नप्रसक्तिर्निरवयवत्वशब्दबाधो वा। राद्धान्तस्तु—सकलेतरविसजातीयं श्रुत्येकसमधिगम्यं सर्वशक्तियुक्तं ब्रह्म निरवयवमपि कार्यञ्च भवति, अन्यच्च भवतीति परिमितशक्तिवस्तुचोद्यं न तत्र प्रसज्यते। यथा जातिवादिनो जातिरेकैवामूर्ता खण्डमुण्डादिष्वत्यन्तविलक्षणेषु अनन्तेष्वपि परिसमाप्त्यैव वर्तते ; न तत्रेतरवस्तुचोद्यमिति। अतो ब्रह्मणः जगत्कारणत्वं संभवत्येव।सूत्रार्थस्तु—कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा—ब्रह्मकारणत्वे कृत्स्नस्य ब्रह्मणः कार्यत्वेनोपयोगप्रसङ्गः, निरवयवत्वात् ; सावयवत्वे निरवयवत्वशब्दकोपो वा-निरवयवत्ववादिशब्दबाधप्रसङ्ग इत्यर्थः ॥ २६ ॥

श्रुतेस्तु शब्दमूलत्वात्॥ तुशब्दः पक्षव्यावृत्त्यर्थः।श्रुतेः-श्रुतिप्रामाण्यान्नैवं प्रसज्यते;शब्दमूलत्वात्-शब्दैकमूलत्वेन सकलेतरविजातीयत्वादित्यर्थः ॥

आत्मनि चैवं विचित्राश्च हि ॥ आत्मनि चैवं - जीवात्मन्यचेतनध-

---

१. श्वे. ३-८ ॥—२. श्वे. ६-१६ ॥—३. छा. ६-२-१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

र्माप्रसक्तिश्चैवम् अचेतनविजातीयत्वादेवेत्यर्थः । विचित्राश्च हि—अचेतनेषु च विसजातीयेष्वग्निजलादिषु विचित्रा हि शक्तयो दृश्यन्ते; एवं परमात्मनश्चेतनाचेतनविसजातीयस्य विचित्राश्शक्तय उपपद्यन्ते ॥ २८ ॥

स्वपक्षदोषाच्च ॥ प्रधानादिकारणपक्षे दोषाच्च ब्रह्मैव जगत्कारणम् । तत्र हि लौकिकवस्तुसजातीयत्वेन प्रधानादेरुक्तदोषोऽन्ये च प्रसज्येरन्॥ २९॥

सर्वोपेता च तद्दर्शनात् ॥ न केवलं सकलेतरविसजातीयत्वेन सर्वशक्त्युपेता परा देवतेत्युच्यते ; तद्दर्शनाच्च – सर्वशक्तियोगश्रुतेरित्यर्थः । दर्शयतीति दर्शनं श्रुतिः, १"पराऽस्य शक्तिर्विविधैव श्रूयते" इत्यादिका ॥ ३०॥

विकरणत्वान्नेतिचेत्तदुक्तम् ॥उक्तस्यार्थस्य द्रढिम्ने चोद्यपूर्वकं पूर्वोक्तं स्मारयति—विकरणत्वात्—करणविरहितत्वाद्ब्रह्म न कारणमिति चेत् ; २"न तस्य कार्यं करणं च विद्यते"इति हि श्रूयते।तदुक्तम् – अत्र यद्वक्तव्यम् ,तत्पूर्वमेवोक्तम् "शब्दमूलत्वात्" "विचित्राश्च हि" इति । अयमेव परिहारः—शब्दैकमूलत्वेन सकलेतरविसजातीयत्वाद्ब्रह्मणः, विसजातीयानां च शक्तिवैचित्र्यस्य लोकदृष्टत्वात्सर्वमुपपन्नमित्यर्थः ॥ ३१ ॥

इति वेदान्तदीपे कृत्स्नप्रसक्त्यधिकरणम् ॥ ९ ॥

(श्रीशारीरकमीमांसाभाष्ये प्रयोजनवत्त्वाधिकरणम् ॥१०॥)

न प्रयोजनवत्त्वात् । २ । १ । ३२ ॥

यद्यपीश्वरः प्राक्सृष्टेरेक एव सन् सकलेतरविलक्षणत्वेन सर्वार्थशक्तियुक्तः स्वयमेव विचित्रं जगत्स्रष्टुं शक्नोति ; तथापीश्वरकारणत्वं न सम्भवति,प्रयोजनवत्त्वाद्विचित्रसृष्टेः,ईश्वरस्य च प्रयोजनाभावात्। बुद्धिपूर्वकारिणामारम्भे द्विविधं हि प्रयोजनं—स्वार्थः परार्थो वा । नहि परस्य ब्रह्मणस्स्वभावत एवावाप्तसमस्तकामस्य जगत्सर्गेण किंचन प्रयोजनमनवाप्तमवाप्यते । नापि परार्थः, अवाप्तकामस्य परार्थता हि परानुग्रहेण भवति; नचेदृशगर्भजन्मजरामरणनरकादिनानाविधानन्तदुःखबहुलं

१. श्वे. ६-८ ॥—२. श्वे. ६-१६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जगत्करुणया सृजतिः प्रत्युत सुखैकतानमेव जनयेज्जगत्करुणया सृजन् । अतः प्रयोजनाभावाद्ब्रह्मणः कारणत्वं नोपपद्यत इति ॥ ३२ ॥

एवं प्राप्ते प्रचक्ष्महे—

लोकवत्तु लीलाकैवल्यम् । २ । १ । ३३ ॥

अवाप्तसमस्तकामस्य परिपूर्णस्य स्वसङ्कल्पविकार्यविविधविचित्रचिदचिन्मिश्रजगत्सर्गे लीलैव केवला प्रयोजनम्, लोकवत्—यथा लोके सप्तद्वीपां मेदिनीमधितिष्ठतस्संपूर्णशौर्यवीर्यपराक्रमस्यापि महाराजस्य केवललीलैकप्रयोजनाः कन्तुकाद्यारम्भा दृश्यन्ते; तथैव परस्यापि ब्रह्मणः स्वसङ्कल्पमात्रावकृप्तजगज्जन्मस्थितिध्वंसादेर्लीलैव प्रयोजनमिति निरवद्यम् ॥

वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथाहि दर्शयति । २ । १ । ३४ ॥

यद्यपि परमपुरुषस्य सकलेतरचिदचिद्वस्तुविलक्षणस्याचिन्त्यशक्तियोगात्प्राक्सृष्टेरेकस्य निरवयवस्यापि विचित्रचिदचिन्मिश्रजगत्सृष्टिस्सम्भाव्येत, तथापि देवतिर्यङ्मनुष्यस्थावरात्मनोत्कृष्टमध्यमापकृष्टसृष्ट्या पक्षपातः प्रसज्येत। अतिघोरदुःखयोगकरणान्नैर्घृण्यं चावर्जनीयमिति। तत्रोत्तरं—न सापेक्षत्वादितिः; न प्रसज्येयातां वैषम्यनैर्घृण्ये, कुतः सापेक्षत्वात्—सृज्यमानदेवादिक्षेत्रज्ञकर्मसापेक्षत्वाद्विषमसृष्टेः । देवादीनां क्षेत्रज्ञानां देवादिशरीरयोगं तत्तत्कर्मसापेक्षं दर्शयन्ति हि श्रुतिस्मृतयः—[१]"साधुकारी साधुर्भवति पापकारी पापो भवति पुण्यः पुण्येन कर्मणा भवति पापः पापेन कर्मणा", तथा भगवता पराशरेणापि देवादिवैचित्र्यहेतुः सृज्यमानानां क्षेत्रज्ञानां प्राचीनकर्मशक्तिरेवेत्युक्तं—

१. बृ. ६-४-५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

[1]"निमित्तमात्रमेवासौ सृज्यानां सर्गकर्मणि। प्रधानकारणीभूता यतो वै सृज्यशक्तयः ॥ निमित्तमात्रं मुक्त्वैव नान्यत्किंचिदपेक्षते। नीयते तपसां श्रेष्ठ स्वशक्त्या वस्तु वस्तुताम्" इति। स्वशक्त्या स्वकर्मणैव देवादिवस्तुताप्राप्तिरिति ॥

न कर्माविभागादिति चेन्नानादित्वादुपपद्यते चाप्युपलभ्यते च। २। २। ३५ ॥

प्राक्सृष्टेः क्षेत्रज्ञा नाम न सन्तिः कुतः?, अविभागश्रवणात्, [2]"सदेव सोम्येदमग्रआसीत्" इतिः अतस्तदानीं तदभावात्तत्कर्म न विद्यतेः कथं तदपेक्षं सृष्टिवैषम्यमित्युच्यत इतिचेत्—न, अनादित्वात् क्षेत्रज्ञानां तत्कर्मप्रवाहाणां च। तदनादित्वेऽप्यविभाग उपपद्यते चः यतस्तत् क्षेत्रज्ञवस्तु परित्यक्तनामरूपं ब्रह्मशरीरतयापि पृथग्व्यपदेशानर्हमतिसूक्ष्मम्। तथाऽनभ्युपगमे अकृताभ्यागमकृतविप्रणाशप्रसङ्गश्च। उपलभ्यते च तेषामनादित्वं—[3]"न जायते म्रियते वा विपश्चित्" इति। सृष्टिप्रवाहानादित्वं च[4]"सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्" इत्यादौ। [5]"तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यां व्याक्रियत" इति नामरूपव्याकरणमात्रश्रवणात् क्षेत्रज्ञानां स्वरूपानादित्वं सिद्धम्। स्मृतावपि [6]"प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि" इति। अतस्सर्वविलक्षणत्वात्सर्वशक्तित्वात्, लीलैकप्रयोजनत्वात्, क्षेत्रज्ञकर्मानुगुण्येन विचित्रसृष्टियोगाद्ब्रह्मैव जगत्कारणम् ॥ ३५ ॥

सर्वधर्मोपपत्तेश्च। २। २। ३६ ॥

प्रधानपरमाण्वादीनां कारणत्वे यद्धर्मवैकल्यमुक्तं, वक्ष्यमाणं च

---

१. वि. पु. १-४-५१, ५२ ॥—२. छा. ६-२-१ ॥—३. कठ. १-२-१८ ॥—४. तै. नारा. १-१४ ॥—५. बृ. ३-४-७ ॥—६. गी. १३-१९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तस्य सर्वस्य धर्मजातस्य कारणत्वोपपादिनो ब्रह्मण्युपपत्तेश्च ब्रह्मैव जगत्कारणमिति स्थितम् ॥ ३६ ॥

इति श्रीशारीरकमीमांसाभाष्ये प्रयोजनवत्त्वाधिकरणम् ॥ १० ॥

इति श्रीभगवद्रामानुजविरचिते शारीरकमीमांसाभाष्ये द्वितीयस्याध्यायस्य प्रथमः पादः ॥ १ ॥

वेदान्तसारे—**न प्रयोजनवत्त्वात् ॥** ब्रह्मणः अवाप्तसमस्तकामत्वेन सृष्टौ प्रयोजनाभावात् ब्रह्म न कारणम् ॥ ३२ ॥

लोकवत्तु लीलाकैवल्यम् ॥ अवाप्तसमस्तकामस्यापि लीलाप्रयोजनत्वे नैरपेक्ष्यं सम्भवति, लोके केवललीलायै कन्तुकाद्यारम्भदर्शनात्। अस्यात्मतृप्तस्यावाप्तसमस्तकामत्वं हि सदाभिमतसकलभोगोपकरणसद्भावः । आत्मतृप्तेर्भोगतृप्तिर्विसजातीया । लीलारसस्यापि तद्विलक्षणस्य त्रिगुणपुरुषाद्युपकरणवित्थमेव ॥ ३३ ॥

वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथाहि दर्शयति ॥ देवादिविषमसृष्ट्या पक्षपातो नैर्घृण्यञ्च न सम्भवति परस्य, क्षेत्रज्ञकर्मसापेक्षत्वाद्विषमसृष्टेः; तथा[1] "साधुकारी साधुर्भवति पापकारी पापो भवति" इति श्रुतिरेव दर्शयति॥

न कर्माविभागादितिचेन्नानादित्वादुपपद्यते चाप्युपलभ्यते च ॥ [2]"सदेव सोम्येदमग्र आसीत् एकमेव" इत्येकत्वावधारणात्, तदानीं क्षेत्रज्ञाभावात् कर्म न सम्भवति, इति चेत्—न; अनादित्वात् क्षेत्रज्ञानां तत्तत्कर्मप्रवाहश्चास्त्येव; उपपद्यते च तदनादित्वेऽप्यविभागश्रुतिः, नामरूपविभागाभावात्, [3]"तदेदं तर्ह्यव्याकृतमासीत् तन्नामरूपाभ्यां व्याक्रियत" इत्यनयैकार्थ्यात्; उपलभ्यते च श्रुतिषु क्षेत्रज्ञानादित्वम् [4]"ज्ञाज्ञौ द्वावजावीशनीशौ" [5]"नित्यो नित्यानाम्" इति ॥ ३५ ॥

सर्वधर्मोपपत्तेश्च ॥ प्रधानपरमाण्वादिष्वनुपपन्नानां सर्वधर्माणां ब्र-

---

१. बृ. ६-४-५ ॥—२. छा. ६-२-१ ॥—३. बृ. ३-४-७ ॥—४. श्वे.१-९ ॥—५. श्वे ६-१३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ह्मणि सकलेतरविलक्षणत्वेन सर्वशक्तिश्रुत्या चोपपत्तेः ब्रह्मैव कारणमिति सिद्धम् ॥ ३६ ॥

इति वेदान्तसारे प्रयोजनवत्त्वाधिकरणम् ॥ १० ॥

इति श्रीभगवद्रामानुजविरचिते वेदान्तसारे द्वितीयस्याध्यायस्य प्रथमः पादः ॥ १ ॥

वेदान्तदीपे—न प्रयोजनवत्त्वात् ॥ ब्रह्मणो जगत्कारणत्वं सम्भवति, नेति संशयः । न सम्भवतीति पूर्वः पक्षः ; बुद्धिपूर्वारम्भाणां स्वप्रयोजनत्वात्, ईश्वरस्य च स्वत एवावाप्तसमस्तकामस्य जगत्सृष्ट्यारम्भे प्रयोजनाभावात्, गर्भवासादिदुःखरूपत्वात्सृष्टेः, परानुग्रहेणापि न सप्रयोजनत्वम्—इति । राद्धान्तस्तु—परिपूर्णस्यापीश्वरस्य केवललीलाप्रयोजनाय जगत्सृष्ट्याद्यारम्भस्सम्भवति ; यथा लोके सप्तद्वीपवतीं मेदिनीमधितिष्ठतो महाराजस्य परिपूर्णस्यापि केवललीलैकफलाः कन्तुकाद्यारम्भा दृश्यन्ते, तद्वदीश्वरस्यापि प्रयोजनाय जगत्सृष्ट्यारम्भस्सम्भवति । सूत्रार्थस्तु—न प्रयोजनवत्त्वात् । प्रयोजनवत्त्वात्सृष्टेः ईश्वरस्य स्वतः परिपूर्णस्य प्रयोजनाभावान्न स्रष्टृत्वम् ॥ ३२ ॥

लोकवत्तु लीलाकैवल्यम् ॥ लीलाकैवल्यं लीलायाः प्रयोजनत्वे कैवल्यं सम्भवति ; केवलाया लीलायास्सृष्ट्यारम्भप्रयोजनत्वं सम्भवतीत्यर्थः । लोकवत् । यथा लोके राज्ञः कन्तुकाद्यारम्भे ॥ ३३ ॥

देवमनुष्यादिविषमसृष्ट्या पक्षपातप्रसङ्गात् दुर्विषहदुःखगर्भत्वेन नैर्घृण्यप्रसङ्गाच्च, परमकारुणिकस्य परमपुरुषस्य परिपूर्णस्य लीलार्थमपि जगत्सर्गो न सम्भवतीत्याशङ्क्याह—

वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथाहि दर्शयति ॥ ईश्वरस्य विचित्रजगत्सृष्टौ देवादिवैषम्यप्रयुक्तपक्षपातः, दुःखप्रदजगत्सर्गे नैर्घृण्यं च न सम्भवतः ; वैषम्यादावीश्वरस्य क्षेत्रज्ञकर्मसापेक्षत्वात् क्षेत्रज्ञानां पूर्वपूर्वकर्मपर्यालोच्य, तत्तत्कर्मानुगुणं विषमं जगत्सृजतीति तत्कर्मैव वैषम्यादिहेतुरित्यर्थः।तथा देवादिदेहयोगं क्षेत्रज्ञानां तत्कर्मसापेक्षं दर्शयति हि श्रुतिः१ "साधुकारी साधुर्भवति पापकारी पापो भवति" इति ॥ ३४ ॥

न कर्माविभागादितिचेन्नानादित्वादुपपद्यते चाप्युपलभ्यते च ॥

---

१. बृ. ६-४-५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सृष्टेः प्राक्कर्म न विद्यते क्षेत्रज्ञाभावात्; तदभावश्च, १"सदेव सोम्येदम्" इत्यवधारणावगतादविभागादितिचेत्—तन्न, अनादित्वात् क्षेत्रज्ञानां तत्तत्कर्म प्रवाहाणां च, उपपद्यते च क्षेत्रज्ञस्वरूपानादित्वेऽपि नामरूपविभागाभावाद्-विभागश्रुतिः, अन्यथा अकृताभ्यागमकृतविप्रणाशप्रसङ्गात्। उपलभ्यते च श्रुतिस्मृत्योः क्षेत्रज्ञानामनादित्वम् २ "तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यां व्याक्रियत"इति। नामरूपव्याकरणमात्रश्रवणात् क्षेत्रज्ञानां स्वरूपानादित्वं सिद्धम्, ३"ज्ञाज्ञौ द्वावजावीशनीशौ" ४"नित्यो नित्यानाम्" ५"प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि" इति, अविभागश्रुतिरपि नामरूपविभागाभावादेवोपपद्यत इत्यभिप्रायः ॥ ३५ ॥

सर्वधर्मोपपत्तेश्च ॥ प्रधानपरमाण्वादिष्वनुपपन्नानां ६"स्वपक्षदोषात्" इत्यादिषूक्तानां सर्वेषां धर्माणां कारणत्वोपपादकानां ब्रह्मण्युपपत्तेश्च ब्रह्मैव कारणम्। प्रधानपरमाण्वादीनां परिमितशक्तिकत्वाल्लोकदृष्टवस्तुसजातीयत्वाच्च अनुपपत्तयस्सहस्रशस्सन्ति, ब्रह्मणश्शास्त्रैकसमधिगम्यतया सकलेतरविसजातीयत्वेनाचिन्त्यशक्तित्वात्सर्वशक्तित्वश्रुतेश्च सर्वमुपपन्नमित्यर्थः॥

इति श्रीवेदान्तदीपे प्रयोजनवत्त्वाधिकरणम् ॥ १० ॥

इति श्रीभगवद्रामानुजविरचिते वेदान्तदीपे
द्वितीयस्याध्यायस्य प्रथमः पादः ॥ १ ॥

---

१. छा. ६-२-१ ॥—२. बृ. ३-४-७ ॥—३. श्वे. १-९ ॥—४. श्वे. ६-१३ ॥—५. गी. १३-१९ ॥—६. शारी. २-१-२९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीमते रामानुजाय नमः

श्रीभगवद्रामानुजविरचिते

श्रीशारीरकमीमांसाभाष्ये

(द्वितीयाध्याये-द्वितीयपादे-रचनानुपपत्त्यधिकरणम् ॥१॥)

रचनानुपपत्तेश्च नानुमानं प्रवृत्तेश्च ।२।२।१॥

उक्तं जगज्जन्मादिकारणं परं ब्रह्मेति ; तत्र परैरुद्भाविताश्च दोषाः परिहृताः; इदानीं स्वपक्षरक्षणाय परपक्षाः प्रतिक्षिप्यन्ते ; इतरथा कस्यचिन्मन्दधियस्तेषां पक्षाणां युक्त्याभासमूलतामजानतः प्रामाणिकत्वशङ्क्या वैदिकपक्षे किंचिच्छ्रद्धावैकल्यं जायेतापि; अतः परपक्षप्रतिक्षेपायानन्तरः पादः प्रवर्तते। तत्र प्रथमं तावत्कापिलमतं निरस्यते, वैदिकानुमतसत्कार्यवादाद्यर्थसङ्गहेणैतस्य सत्पक्षनिक्षेपसम्भावनाभ्रमहेतुत्वातिरेकात् ।[१] " ईक्षतेर्नाशब्दम्" इत्यादिभिः वैदिकवाक्यानामतत्परत्वमात्रमुक्तम् ; अत्रैव तत्पक्षस्वरूपप्रतिक्षेपः क्रियत इति न पौनरुक्त्याशङ्का। एषा साङ्ख्यानां दर्शनस्थितिः—[२]"मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयस्सप्त । षोडशकश्च विकारो न प्रकृतिर्न विकृतिः पुरुषः"इति तत्त्वसङ्ग्रहः । मूलप्रकृतिर्नाम सुखदुःखमोहात्मकानि लाघवप्रकाशचलनोपष्टम्भनगौरवावरणकार्याण्यत्यन्तातीन्द्रियाणि कार्यैकनिरूपणविवेकान्यन्यूनानतिरेकाणि समतामुपेतानि सत्त्वरजस्तमांसि द्रव्याणि। सा च

१. शारी. १-१-५ ॥—२. साङ्ख्यतत्त्वकौमुदी. ३. श्लो ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सत्त्वरजस्तमसां साम्यरूपा प्रकृतिरेका स्वयमचेतनाऽनेकचेतनभोगापवर्गार्था नित्या सर्वगता सततविक्रिया न कस्यचिद्विकृतिः, अपितु परमकारणमेव; महदाद्यास्तद्विकृतयोऽन्येषां च प्रकृतयस्सप्त; महानहङ्कारः शब्दतन्मात्रं स्पर्शतन्मात्रं रूपतन्मात्रं रसतन्मात्रं गन्धतन्मात्रम्—इति। तत्राहङ्कारस्त्रिधा—वैकारिकस्तैजसो भूतादिश्च, क्रमात्सात्त्विको राजसस्तामसश्च; तत्र वैकारिकस्सात्त्विक इन्द्रियादिः; भूतादिस्तामसो महाभूतहेतुभूततन्मात्रहेतुः; तैजसो राजसस्तूभयोरनुग्राहकः; आकाशादीनि पञ्च महाभूतानि श्रोत्रादीनि पञ्च ज्ञानेन्द्रियाणि वागादीनि पञ्च कर्मेन्द्रियाणि मन इति केवलविकाराः षोडश; पुरुषस्तु निष्परिणामत्वेन न कस्यचित्प्रकृतिः, न कस्यचिद्विकृतिः; तत एव निर्धर्मकश्चैतन्यमात्रवपुर्नित्यो निष्क्रियस्सर्वगतः प्रतिशरीरं भिन्नश्च; निर्विकारत्वान्निष्क्रियत्वाच्च तस्य कर्तृत्वं भोक्तृत्वं च न सम्भवति। एवंभूतेऽपि तत्त्वे मूढाः प्रकृतिपुरुषसन्निधिमात्रेण पुरुषस्य चैतन्यं प्रकृतावध्यस्य प्रकृतेश्च कर्तृत्वं स्फटिकमणाविव जपाकुसुमस्यारुणिमानं पुरुषेऽध्यस्य 'अहंकर्ता भोक्ता' इति मन्यन्ते। एवमज्ञानाद्भोगः, तत्त्वज्ञानाच्चापवर्गः। तदेतत्प्रत्यक्षानुमानागमैस्साधयन्ति। तत्र प्रत्यक्षसिद्धेषु पदार्थेषु नातीव विवादपदमस्ति। आगमोऽपि कपिलादिसर्वज्ञज्ञानमूल इति सोऽपि प्रथमे काण्डे प्रमाणलक्षणे निरस्तप्रायः। यदिदं प्रधानमेव जगत्कारणमित्यनुमानम्, तन्निरसनेन तन्मतं सर्वं निरस्तं भवतीति तदेव निरस्यते। ते चैवं वर्णयन्ति—कृत्स्नस्य जगत एकमूलत्वमवश्याभ्युपगमनीयम्, अनेकेभ्यः कार्योत्पत्त्यभ्युपगमे कारणानवस्थानात्। तन्तुप्रभृतयो ह्यवयवाः स्वांशभूतैष्षड्भिः पार्श्वैः परस्परं संयुज्यमाना अवयविनमुत्पादयन्ति; तेच तन्त्वादयः स्वावयवैस्तथाभूतैरुत्पाद्यन्ते; तेच तथाभूतैः स्वावयवैरिति परमाणुभिरपि स्वकीयैष्षड्भिः पार्श्वैस्संयुज्यमानैरेव स्वकार्योत्पादनमभ्युपेतव्यम्, अन्यथा प्रथिमानुपपत्तेः। परमाणवोऽप्यंशित्वेन स्वां-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शैस्तथैवोत्पाद्यन्ते, तेच स्वांशैरिति न क्वचित्कारणव्यवस्थितिः । अतः कारणव्यवस्थासिद्ध्यर्थमेकद्रव्यं विविधविचित्रपरिणामशक्तियुक्तं स्वयमप्रच्युतस्वरूपमेव महदाद्यनन्तावस्थाश्रयः कारणमाश्रयणीयम् । तच्चैकं कारणं गुणत्रयसाम्यरूपं प्रधानमिति तत्कल्पने हेतूनुपन्यस्यन्ति—[१]"भेदानां परिमाणात्समन्वयाच्छक्तितः प्रवृत्तेश्च । कारणकार्यविभागादविभागाद्वैश्वरूप्यस्य ॥ कारणमस्त्यव्यक्तम्" इति । अयमर्थः—विश्वरुपमेव वैश्वरूप्यम्, विचित्रसन्निवेशं तनुभुवनादि कृत्स्नं जगत् ; तच्च जगद्विचित्रसन्निवेशत्वेन कार्यभूतं तत्सरूपाव्यक्तकारणकम् ; कुतः?, कार्यत्वात्; कार्यस्य हि सर्वस्य तत्सरूपात्कारणविशेषाद्विभागस्तस्मिन्नेवाविभागश्च दृश्यते ; यथा घटमकुटादेः कार्यस्य तत्सरूपान्मृत्सुवर्णादेः कारणाद्विभागस्तस्मिन्नेव चाविभागः ; अतो विश्वरूपस्य जगतस्तत्सरूपात्प्रधानादुत्पत्तिस्तस्मिन्नेव लयश्चेति प्रधानकारणकमेव जगत् । गुणत्रयसाम्यरूपं प्रधानमेव जगत्सरूपं कारणम् ; सत्त्वरजस्तमोमयसुखदुःखमोहात्मकत्वाज्जगतः। यथा मृदात्मनाघटस्य मृद्द्रव्यमेव कारणम्; तदेव हि तदुत्पत्त्याख्यप्रवृत्तिशक्तिमत्, तथा दर्शनात्। अव्यक्तस्य गुणसाम्यरूपस्य देशतः कालतश्चापरिमितस्यैव कारणत्वं भेदानां महदहङ्कारतन्मात्रादीनां परिमितत्वादवगम्यते। महदादीनि च घटादिवत्परिमितानि कृत्स्नजगदुत्पत्तौ न प्रभवन्ति, अतस्त्रिगुणं जगद्गुणत्रयसाम्यरूपप्रधानैककारणमिति निश्चीयते ॥

अत्रोच्यते—रचनानुपपत्तेश्च नानुमानं प्रवृत्तेश्च—अनुमीयतइत्यनुमानम् ; न भवदुक्तं प्रधानं विचित्रजगद्रचनासमर्थम्, अचेतनत्वे सति तत्स्वभावाभिज्ञानधिष्ठितत्वात्; यदेवं तत्तथा, यथा रथप्रासादादिनिर्माणे केवलदार्वादिकम् । दार्वादेरचेतनस्य तज्ज्ञानधिष्ठितस्य कार्यारम्भानुपपत्तेर्दर्शनात्, तज्ज्ञाधिष्ठितस्य कार्यारम्भप्रवृत्तेर्दर्शनाच्च न प्राज्ञानधिष्ठितं

१. साङ्ख्यतत्त्वकौमुदी. १५, १६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रधानं कारणमित्युक्तं भवति। चकारादन्वयस्यानैकान्त्यं समुच्चिनोति; न ह्यन्वितं शौक्ल्यगोत्वादि कारणत्वव्याप्तम्; न च वाच्यं मा भूदन्वितानामपि शौक्ल्यादिधर्माणां कारणत्वम्, द्रव्यस्य तु हेमादेः कार्येऽन्वितस्य कारणत्वव्याप्तिरस्त्येव; सत्त्वादीन्यपि द्रव्याणि कार्येऽन्वितानि कारणत्वव्याप्तानि—इति; यतस्सत्त्वादयो द्रव्यधर्माः, न तु द्रव्यस्वरूपम्; सत्त्वादयो हि पृथिव्यादिद्रव्यगतलघुत्वप्रकाशादिहेतुभूतास्तत्स्वभावविशेषा एव; न तु मृद्धिरण्यादिवद्द्रव्यतया कार्यान्विता उपलभ्यन्ते; गुणा इत्येव च सत्त्वादीनां प्रसिद्धिः। यच्च कारणव्यवस्थासिद्धये जगतः एकमूलत्वमुक्तम्, तदपि सत्त्वादीनामनेकत्वान्नोपपद्यते। अत एव कारणव्यवस्था च न सिध्यति। साम्यावस्थास्सत्त्वादय एव हि प्रधानमिति त्वन्मतम्। अतः कारणबहुत्वादनवस्था तदवस्थैव। न च तेषामपरिमितत्वेन व्यवस्थासिद्धिः, अपरिमितत्वे हि त्रयाणामपि सर्वगतत्वेन न्यूनाधिकभावाभावाद्वैषम्यासिद्धेः कार्यारम्भासम्भवात्। कार्यारम्भायैव परिमितत्वमवश्याश्रयणीयम्॥

यत्र रथादिषु स्पष्टं चेतनाधिष्ठितत्वं दृष्टम्, तद्व्यतिरिक्तं सर्वं पक्षीकृतमित्याह—

पयोम्बुवच्चेत्तत्रापि। २। २। २॥

यदुक्तं प्रधानस्य प्राज्ञानधिष्ठितस्य विचित्रजगद्रचनानुपपत्तिरिति; तन्न, यतः पयोऽम्बुवत्प्रवृत्तिरुपपद्यते। पयसस्तावद्धिभावेन परिणममानस्यानन्यापेक्षस्याऽप्यपरिस्पन्दप्रभृतिपरिणामपरम्परा स्वत एवोपपद्यते; यथा च वारिदविमुक्तस्याम्बुन एकरसस्य नारिकेलतालचूतकपित्थनिम्बतिन्त्रिण्यादिविचित्ररसरूपेण परिणामप्रवृत्तिः स्वत एव दृश्यते; तथा प्रधानस्यापि परिणामस्वभावस्यान्यानधिष्ठितस्यैव प्रतिसर्गावस्थायां सदृशपरिणामेनावस्थितस्य सर्गावस्थायां गुणवैषम्यनिमित्त-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विचित्रपरिणाम उपपद्यते । यथोक्तं [१]"परिणामतस्सलिलवत्प्रतिप्रतिगुणाश्रयविशेषात्"इति । तदेवमव्यक्तमनन्यापेक्षं प्रवर्तत इति चेत्—अत उत्तरं—तत्रापि—इति; यत् क्षीरजलादिदृष्टान्ततया निर्दर्शितम्, तत्रापि प्राज्ञानधिष्ठाने प्रवृत्तिर्नोपपद्यते; तदपि पूर्वत्र पक्षीकृतमित्यभिप्रायः । [२]"उपसंहारदर्शनान्नेतिचेन्न क्षीरवद्धि"इत्यत्र दृष्टपरिकरान्तररहितस्यापि स्वासाधारणपरिणाम उपपद्यत इत्येतावदुक्तम्, न प्राज्ञाधिष्ठितत्वं पराकृतम्, [३]"योऽप्सु तिष्ठन्" इत्यादिश्रुतेः ॥

व्यतिरेकानवस्थितेश्चानपेक्षत्वात् । २ । २ । ३॥

इतश्च सत्यसङ्कल्पेश्वराधिष्ठानानपेक्षपरिणामित्वे सर्गव्यतिरेकेण प्रतिसर्गावस्थयाऽनवस्थितिप्रसङ्गाच्च न प्राज्ञानधिष्ठितं प्रधानं कारणम्; प्राज्ञाधिष्ठितत्वे तस्य सत्यसङ्कल्पत्वेन सर्गप्रतिसर्गविचित्रसृष्टिव्यवस्थासिद्धिः । न च वाच्यं प्राज्ञाधिष्ठितत्वेऽपि तस्यावाप्तसमस्तकामस्य परिपूर्णस्यानवधिकातिशयानन्दस्य निरवद्यस्य निरञ्जनस्य सर्गप्रतिसर्गव्यवस्थाहेत्वभावाद्विषमसृष्टौ निर्दयत्वप्रसङ्गाच्च समानोऽयं दोष इति; परिपूर्णस्यापि लीलार्थप्रवृत्तिसम्भवात्, सर्वज्ञस्य तस्य परिणामविशेषापन्नप्रकृतिदर्शनरूपसर्गप्रतिसर्गविशेषहेतोस्सम्भवात्, क्षेत्रज्ञकर्मणामेव विषमसृष्टिव्यवस्थापकत्वाच्च । नन्वेवं क्षेत्रज्ञपुण्यापुण्यरूपकर्मभिरेव सर्वा व्यवस्थास्सिध्यन्तीति कृतमीश्वरेणाधिष्ठात्रा; पुण्यापुण्यरूपानुष्ठितकर्मसंस्कृता प्रकृतिरेव पुरुषार्थानुरूपं तथातथा व्यवस्थया परिणंस्यते; यथा विषादिदूषितानामन्नपानादीनामौषधविशेषाप्यायितानां च सुखदुःखहेतुभूतः परिणामविशेषो देशकालव्यवस्थया दृश्यते; अतस्सर्गप्रतिसर्गव्यवस्था देवादिविषमसृष्टिः कैवल्यव्यवस्था च सर्वप्रकारपरिणामशक्तियुक्तस्य प्रधानस्यैवोपपद्यत इति । अनभिज्ञो भवान् पुण्यापुण्यकर्मस्वरूपयोः;

१. साङ्ख्यतत्त्वकौमुदी. १६ ॥ २. शारी. २-१-२४ ॥ ३. बृ. ५-७-४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पुण्यापुण्यस्वरूपे हि शास्त्रैकसमधिगम्ये; शास्त्रं चानादिनिधनाविच्छिन्नपाठसम्प्रदायानाघ्रातप्रमादादिदोषगन्धवेदाख्याक्षरराशिः; तच्च परमपुरुषाराधनतद्विपर्ययरूपे कर्मणी पुण्यापुण्ये, तदनुग्रहनिग्रहायत्ते च तत्फले सुखदुःखे—इति वदति। तथाह द्रमिडाचार्यः[1] "फलसंविभक्तया हि कर्मभिरात्मानं पिप्रीषन्ति स प्रीतोऽलं फलायेतिशास्त्रमर्यादा" इति। तथाच श्रुतिः[2] "इष्टापूर्ते बहुधा जातं जायमानं विश्वं बिभर्ति भुवनस्य नाभिः" इति। तथाच भगवता स्वयमेवोक्तं [3] "यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम्। स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः" इति[4] "तानहं द्विषतः क्रूरान् संसारेषु नराधमान्। क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु" इति च। स भगवान् पुरुषोत्तमोऽवाप्तसमस्तकामस्सर्वज्ञस्सर्वेश्वरस्सत्यसङ्कल्पः स्वमाहात्म्यानुगुणलीलाप्रवृत्तः एतानि कर्माणि समीचीनान्येतान्यसमीचीनानीति कर्मद्वैविध्यं संविधाय तदुपादानोचितदेहेन्द्रियादिकं तन्नियमनशक्तिं च सर्वेषां क्षेत्रज्ञानां सामान्येन प्रदिश्य स्वशासनावबोधि शास्त्रं च प्रदर्श्य तदुपसंहारार्थं चान्तरात्मतयाऽनुप्रविश्यानुमन्तृतया च नियच्छंस्तिष्ठति। क्षेत्रज्ञास्तु तदाहितशक्तयस्तत्प्रदिष्टकरणकलेवरादिकास्तदाधाराश्च स्वयमेव स्वेच्छानुगुण्येन पुण्यापुण्यरूपे कर्मणी उपाददते; ततश्च पुण्यापुण्यरूपकर्मकारिणं स्वशासनानुवर्तिनं ज्ञात्वा धर्मार्थकाममोक्षैर्वर्धयते; शासनातिवर्तिनं च तद्विपर्ययैर्योजयति; अतः स्वातन्त्र्यादिवैकल्यचोद्यानि नावकाशं लभन्तेदया हि नाम स्वार्थनिरपेक्षा परदुःखासहिष्णुता; सा च स्वशासनातिवृत्तिव्यवसायिन्यपि वर्तमाना न गुणायावकल्पते; प्रत्युतापुंस्त्वमेवावहति; तन्निग्रह एव तत्र गुणः, अन्यथा शत्रुनिग्रहादीनामगुणत्वप्रसङ्गात्। स्वशासनातिवृत्तिव्यवसायनिवृत्तिमात्रेणानाद्यनन्तकल्पोपचितदुर्विषहानन्तापराधानङ्गीकारेणनिरतिशयसुखसंवृद्ध-

१. द्रमिडाचार्यः ॥—२. तै. अम्भसि. २ ॥—३. गी. १८-४६ ॥— ४. गी. १६-१९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ये स्वयमेव प्रयतते। यथोक्तं[१] "तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम्। ददामि बुद्धियोगन्तं येन मामुपयान्ति ते। तेषामेवानुकम्पार्थमहमज्ञानजं तमः। नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता" इति। अतः प्राज्ञानधिष्ठितं प्रधानं न कारणम्॥ ३॥

अथ स्यात्—यद्यपि प्राज्ञानधिष्ठितायाः प्रकृतेः परिस्पन्दप्रवृत्तिरपि न सम्भवतीत्युक्तम्, तथाऽप्यनपेक्षाया एव परिणामप्रवृत्तिस्सम्भवति, तथादर्शनात्; धेन्वादिनोपयुक्तं हि तृणोदकादि स्वयमेव क्षीराद्याकारेण परिणममानं दृश्यते। अतः प्रकृतिरपि स्वयमेव जगदाकारेण परिणंस्यते—इति। तत्राह—

अन्यत्राभावाच्च न तृणादिवत् २। २। ४॥

नैतदुपपद्यते, तृणादेः प्राज्ञानधिष्ठितस्य परिणामाभावाद्दृष्टान्तासिद्धेः; कथमसिद्धिः?, अन्यत्राभावात्—यदि हि तृणोदकादिकमनड्वाद्युपयुक्तं प्रहीणं वा क्षीराकारेण पर्यणंस्यत; ततः प्राज्ञानधिष्ठितमेव परिणमत इति वक्तुमशक्ष्यत; नचैतदस्ति; अतो धेन्वाद्युपयुक्तं प्राज्ञ एव क्षीरीकरोति। [२]"पयोम्बुवच्चेत्तत्रापि" इत्युक्तमेवात्र प्रपञ्चितं तत्रैव व्यभिचारप्रदर्शनाय॥

पुरुषाश्मवदितिचेत्तथापि। २। २। ५॥

अथोच्येत—यद्यपि चैतन्यमात्रवपुः पुरुषो निष्क्रियः, प्रधानमपि दृक्छक्तिविकलम्; तथापि पुरुषसन्निधानादचेतनं प्रधानं प्रवर्तते, तथा दर्शनात्; गमनशक्तिविकलदृक्छक्तियुक्तपङ्गुसन्निधानात्तद्वैतन्योपकृतो दृक्छक्तिविकलः प्रवृत्तिशक्तोऽन्धः प्रवर्तते; अयस्कान्ताश्मसन्निधानाच्चायः प्रवर्तते। एवं प्रकृतिपुरुषसंयोगकृतो जगत्सर्गः प्रवर्तते। यथोक्तं [३]"पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य। पङ्ग्वन्धवदुभयोरपि संयोग-

१. गी. १०-१०, ११॥ २. शारी. २-२-२॥ ३. साङ्ख्य. २१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्तत्कृतस्सर्गः"इति। पुरुषस्य प्रधानोपभोगार्थं कैवल्यार्थं च पुरुषसन्निधानात्प्रधानं सर्गादौ प्रवर्तत इत्यर्थः। अत्रोत्तरं—तथापीति।एवमपि प्रधानस्य प्रवृत्त्यसम्भवस्तदवस्थ एव, पङ्गोर्गमनशक्तिविकलस्यापि मार्गदर्शनतदुपदेशादयः कादाचित्का विशेषाः सहस्रशस्सन्ति; अन्धोऽपि चेतनस्संस्तदुपदेशाद्यवगमेन प्रवर्तते; तथा अयस्कान्तमणेरप्ययस्समीपागमनादयस्सन्ति; पुरुषस्य तु निष्क्रियस्य न तादृशा विकारास्सम्भवन्ति। सन्निधानमात्रस्य नित्यत्वेन नित्यसर्गप्रसङ्गो नित्यमुक्तत्वेन बन्धाभावोऽपवर्गाभावश्च ॥ ५ ॥

अङ्गित्वानुपपत्तेश्च । २ । २ । ६ ॥

गुणानामुत्कर्षनिकर्षनिबन्धनाङ्गाङ्गिभावाद्धि जगत्प्रवृत्तिः[१]"प्रतिप्रतिगुणाश्रयविशेषात्"इति वदद्भिर्भवद्भिरभ्युपगम्यते। प्रतिसर्गावस्थायां तु साम्यावस्थानां सत्त्वरजस्तमसामन्योन्याधिक्यन्यूनत्वाभावादङ्गाङ्गिभावानुपपत्तेर्न जगत्सर्ग उपपद्यते; तदापि वैषम्याभ्युपगमे नित्यसर्गप्रसङ्गः। अतश्च न प्राज्ञानधिष्ठितं प्रधानं कारणम् ॥ ६ ॥

अन्यथानुमितौ च ज्ञशक्तिवियोगात् । २। २ । ७॥

दूषितप्रकारातिरिक्तप्रकारान्तरेण प्रधानानुमितौ च प्रधानस्य ज्ञातृत्वशक्तिवियोगात्त एव दोषाः प्रादुःष्युः। अतो न कथंचिदप्यनुमानेन प्रधानसिद्धिः ॥ ७ ॥

अभ्युपगमेऽप्यर्थाभावात् । २ । २ । ८ ॥

अनुमानेन प्रधानसिद्ध्यभ्युपगमेऽपि प्रधानेन प्रयोजनाभावान्न तदनुमातव्यम्।[२]"पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य"इति प्रधान-

१. साङ्ख्य. १६ ॥ २. साङ्ख्य. २१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्य प्रयोजनं पुरुषभोगापवर्गावभिमतौ, तौ च न सम्भवतः ; पुरुषस्य चैतन्यमात्रवपुषो निष्क्रियस्य निर्विकारस्य निर्मलस्य ततएव नित्यमुक्तस्वरूपस्य प्रकृतिदर्शनरूपो भोगस्तद्वियोगरूपोऽपवर्गश्च न सम्भवति। एवंरूपस्यैव प्रकृतिसन्निधानात्तत्परिणामविशेषसुखदुःखदर्शनरूपभोगसम्भावनायां प्रकृतिसन्निधानस्य नित्यत्वेन कदाचिदप्यपवर्गो न सेत्स्यति॥८॥

विप्रतिषेधाच्चासमञ्जसम्। २। २। ९॥

विप्रतिषिद्धं चेदं साङ्ख्यानां दर्शनम्। तथाहि—प्रकृतेः परार्थत्वेन दृश्यत्वेन भोग्यत्वेन च प्रकृतेर्भोक्तारमधिष्ठातारं द्रष्टारं साक्षिणं च पुरुषमभ्युपगम्य प्रकृत्यैव साधनभूतया तस्य कैवल्यमपि प्राप्यं वदन्त एव तस्य नित्यनिर्विकारचैतन्यमात्रस्वरूपतया अकर्तृत्वं, कैवल्यं च स्वरूपमेवाहुः ; ततएव बन्धमोक्षसाधनानुष्ठानं मोक्षं च प्रकृतेरेवेत्याहुः, एवंभूतनिर्विकारोदासीनपुरुषसन्निधानात्प्रकृतेरितरेतराध्यासेन सर्गादिप्रवृत्तिं पुरुषभोगापवर्गार्थत्वं चाहुः[१]"सङ्घातपरार्थत्वात् त्रिगुणादिविपर्ययादधिष्ठानात्। पुरुषोऽस्ति भोक्तृभावात्कैवल्यार्थप्रवृत्तेश्च॥तस्माच्च विपर्यासात्सिद्धं साक्षित्वमस्य पुरुषस्य। कैवल्यं माध्यस्थ्यं द्रष्टृत्वं कर्तृभावश्च"इतिः [२]"पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य"इत्युक्त्वैवमाहुः[३]"तस्मान्न बध्यते नापि मुच्यते नापि संसरति कश्चित्। संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिः"इतिः तथा [४]" तस्मात्तत्संयोगादचेतनं चेतनावदिव लिङ्गम्। गुणकर्तृत्वे च तथा कर्तेव भवत्युदासीनः॥पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य। पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतस्सर्गः"इति। साक्षित्वद्रष्टृत्वभोक्तृत्वादयो नित्यनिर्विकारस्याकर्तुरुदासीनस्य कैवल्यैकस्वरूपस्य न सम्भवन्ति। एवंरूपस्य तस्याध्यासमूलभ्रमोऽपि न सम्भ-

१. साङ्ख्य. १७॥—२. साङ्ख्य. ५७॥—३. साङ्ख्य. ६२॥—४. साङ्ख्य.२०,२१.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वति, अध्यासभ्रमयोरपि विकारत्वात् । प्रकृतेश्च तौ न सम्भवतः, तयोश्चेतनधर्मत्वात् । अध्यासो हि नाम चेतनस्यान्यस्मिन्नन्यधर्मानुसन्धानम् स च चेतनधर्मो विकारश्च । नच पुरुषस्य प्रकृतिसन्निधिमात्रेणाध्यासादयस्सम्भवन्ति, निर्विकारत्वादेव;सम्भवन्ति चेत्–नित्यं प्रसज्येरन्; सन्निधेरकिञ्चित्करत्वञ्च[1] "नविलक्षणत्वात्" इत्यत्र प्रतिपादितम्। प्रकृतिरेव संसरति बध्यते मुच्यते चेत्–कथं नित्यमुक्तस्य पुरुषस्योपकारिणी सेत्युच्यते? वदन्ति हि[2] "नानाविधैरुपायैरुपकारिण्यनुपकारिणः पुंसः। गुणवत्यगुणस्य सतस्तस्यार्थमपार्थकं चरति" इति। तथा प्रकृतिर्येन पुरुषेण यथास्वभावा दृष्टा, तस्मात्पुरुषात्तदानीमेव निवर्तत इतिचाहुः ।[3] "रङ्गस्य दर्शयित्वा निवर्तते नर्तकी यथा नृत्तात्।पुरुषस्य तथाऽऽत्मानं प्रकाश्य विनिवर्तते प्रकृतिः ॥ प्रकृतेस्सुकुमारतरं न किञ्चिदस्तीति मे मतिर्भवति। या दृष्टास्मीति पुनर्न दर्शनमुपैति पुरुषस्य" इति; तदप्यसङ्गतम् , पुरुषो हि नित्यमुक्तत्वान्निर्विकारत्वान्न तां कदाचिदपि पश्यति, नाध्यस्यति च । स्वयं च स्वात्मानं न पश्यति, अचेतनत्वात् । पुरुषस्य स्वात्मदर्शनं स्वदर्शनमिति नाध्यवस्यतिच, स्वयमचेतनत्वात् ,पुरुषस्य च दर्शनरूपविकारासम्भवात् । अथ सन्निधिमात्रमेव दर्शनमित्युच्यते; सन्निधेर्नित्यत्वेन नित्यदर्शनप्रसङ्ग इत्युक्तम् । स्वरूपातिरिक्तकादाचित्कसन्निधिरपि नित्यनिर्विकारस्य नोपपद्यते । किंच मोक्षहेतुस्तु स्वसन्निधानरूपमेव दर्शनं चेत्-बन्धहेतुरपि तदेवेति नित्यबद्धन्धो मोक्षश्च स्याताम् । अयथादर्शनं बन्धहेतुः, यथावत्स्वरूपदर्शनं मोक्षहेतुरितिचेत्–उभयविधस्यापि दर्शनस्य सन्निधानरूपतानतिरेकात्सदोभयप्रसङ्ग एव । सन्निधेरनित्यत्वे तस्य हेतुरन्वेषणीयः, तस्यापीत्यनवस्था । अथैतद्दोषपरिजिहीर्षया स्वरूपसद्भावएव सन्निधिरिति, तदा स्वरूपस्य नित्यत्वेन नित्यबद्धन्धमोक्षौ। अत एवमा-

---

१. शरी. २-१-४ ॥ २. साङ्ख्य. ६०, ५९ ॥ ३.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

देर्विप्रतिषेधात्साङ्ख्यानां दर्शनमसमञ्जसम्।येऽपि कूटस्थनित्यनिर्विशेषस्वप्रकाशचिन्मात्रं ब्रह्माविद्यासाक्षित्वेनापारमार्थिकबन्धमोक्षभागिति वदन्ति, तेषामप्युक्तनीत्याऽविद्यासाक्षित्वाध्यासाद्यसम्भवादसामञ्जस्यमेव; इर्यास्तु विशेषः—साङ्ख्याः जननमरणप्रतिनियमादिव्यवस्थासिद्ध्यर्थं पुरुषबहुत्वमिच्छन्ति, ते तु तदपि नेच्छन्तीति सुतरामसामञ्जस्यम्। यत्तु प्रकृतेः पारमार्थ्यापारमार्थ्यविभागेन वैषम्यमुक्तम्, तदयुक्तम्, पारमार्थिकत्वेऽप्यपारमार्थिकत्वेऽपि नित्यनिर्विकारस्वप्रकाशैकरसचिन्मात्रस्य स्वव्यतिरिक्तसाक्षित्वाद्यनुपपत्तेः। अपारमार्थिकत्वे तु तस्याः दृश्यत्वबाध्यत्वाभ्युपगमात्सुतरामसङ्गतम्।औपाधिकभेदवादेऽपिउपाधिसम्बन्धिनो ब्रह्मणोऽयमेव स्वभाव इत्युपाधिसम्बन्धाद्यनुपपत्तेरसामञ्जस्यं पूर्वमेवोक्तम्॥

इति श्रीशारीरकमीमांसाभाष्ये रचनानुपपत्त्यधिकरणम् ॥ १ ॥

वेदान्तसारे—रचनानुपपत्तेश्च नानुमानं प्रवृत्तेश्च ॥ दार्वादेरचेतनस्य रथप्रासादादिनिर्माणे तदभिज्ञानधिष्ठितस्य रचनानुपपत्तेश्च तज्ज्ञाधिष्ठितस्य रचनाप्रवृत्तेश्च, अनुमानगम्यं प्रधानमचेतनं प्राज्ञानधिष्ठितं न जगत्कारणम् ॥ १ ॥

पयोम्बुवच्चेत्तत्रापि ॥ यथा पयः, अम्बुच दध्यादिभावेऽनपेक्षम्, तद्वत्प्रधानमपीति चेत्—तत्रापि उक्त एव हेतुः, तस्यापि पक्षीकृतत्वात् ॥ २ ॥

व्यतिरेकानवस्थितेश्चानपेक्षत्वात् ॥ प्राज्ञाधिष्ठितत्वानपेक्षत्वेन सर्वदा सृष्टिप्रसङ्गाच्च न प्रधानं कारणम् ॥ ३ ॥

अन्यत्राभावाच्च न तृणादिवत् ॥ क्षीरोभवद्धेनूपयुक्ततृणादिवत् प्रधानमपीति न युक्तं वक्तुम्, अनडुहादिष्वदर्शनात्; तद्धि प्राज्ञाधिष्ठितम् ॥

पुरुषाश्मवदितिचेत्तथापि ॥ पुरुषः स्वसन्निधानात्प्रधानं प्रवर्तयति। अन्धपङ्गुपुरुषवत्—अश्मवत्—अयस्कान्ताश्मवत् इति न प्राज्ञापेक्षेति चेत्—न—तथापि न प्रधानप्रवृत्तिसम्भवः, अविकृतत्वात्पुरुषस्य। पङ्ग्वन्धादेः मार्गोपदेशदेशान्तरगमनादिः कादाचित्को विकारो ह्यस्ति ॥ ५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अङ्गित्वानुपपत्तेश्च॥गुणानामुत्कर्षापकर्षरूपाङ्गाङ्गिभावेन हि जगत्प्रवृत्तिः, प्रतिसर्गावस्थायां साम्यावस्थानां वैषम्यकृताङ्गाङ्गित्वानुपपत्तेश्च न जगदारम्भः ॥ ६ ॥

अन्यथाऽनुमितौ च ज्ञशक्तिवियोगात् ॥ ज्ञस्य या शक्तिः, तद्वियोगात्—ज्ञातृत्वशक्तिवियोगादित्यर्थः । उक्तप्रकारव्यतिरिक्तप्रकारेण प्रधानानुमितौ च प्रधानस्य ज्ञातृत्वशक्तिवियोगात् रचनानुपपत्त्यादयो दोषास्तदवस्थाः ॥ ७ ॥

अभ्युपगमेऽप्यर्थाभावात्॥प्रधानाभ्युपगमेऽपि प्रयोजनाभावान्न तदनुमेयम् । पुरुषस्य निर्विकारस्य प्रधानदर्शनरूपविकारासम्भवात्, प्रकृतिधर्माध्यासनिमित्तभोगः, तद्विवेकानुसन्धानकृतकैवल्यञ्च न सम्भवति ॥ ८ ॥

विप्रतिषेधाच्चासमञ्जसम् ॥ पुरुषस्य द्रष्टृत्वभोक्तृत्वनिर्विकारत्वादिविरुद्धसङ्ख्याभ्युपगमाच्च असमञ्जसं कापिलमतम् ॥ ९ ॥

इति वेदान्तसारे रचनानुपपत्त्यधिकरणम् ॥ १ ॥

वेदान्तदीपे-रचनानुपपत्तेश्च नानुमानं प्रवृत्तेश्च॥ साङ्ख्यतन्त्रसिद्धः प्रधानकारणवादः किं समीचीनयुक्तिमूलः?,उत नेति संशयः।समीचीनयुक्तिमूल इति पूर्वः पक्षः ; घटादिवद्विचित्रसन्निवेशं जगत्कार्यम् , तद्वदेव स्वसरूपकारणविशेषारब्धम् ; सुखदुःखमोहाद्यात्मकतया सत्त्वाद्यात्मकं जगत् सत्त्वरजस्तमोमूलकम् । तत्र महदादिपृथिव्यन्तानां घटादिवत्परिणामित्वेन कारणापेक्षित्वाविशेषात् ते जगदुत्पत्तौ कारणकाष्ठा न भवन्ति, तेषां परिमितत्वेन अपरिमितजगदुत्पादनाशक्तेः। अन्यूनानतिरिक्तानि साम्यावस्थान्यपरिमितानि सत्त्वरजस्तमांसि अव्यक्तप्रधानादिशब्दाभिधेयानि जगत्कारणम् । राद्धान्तस्तु —रथप्रासादादिहेतुभूतदार्वादिवत् अचेतनं प्रधानं स्वस्वभावाद्यभिज्ञचेतनानधिष्ठितं विचित्रजगद्रचनासमर्थमिति न केवलं प्रधानं कारणम् । सूत्रार्थस्तु —रचनानुपपत्तेश्च नानुमानम्—अनुमीयत इति अनुमानम् प्रधानम् ; तस्याचेतनस्य प्राज्ञानधिष्ठितस्य विचित्रसन्निवेशजगद्रचनानुपपत्तेः तन्न कारणम् । चकारात्सत्त्वादीनां द्रव्यगुणत्वेन शौक्ल्यादेरिवोपादानकारणत्वासम्भवं समुच्चिनोति । सत्त्वादयो हि कार्यगतलाघवप्रकाशादिहेतुभूताः कारणभूतपृथि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

व्यादिगतास्तत्स्वभावविशेषाः। प्रवृत्तेश्च—अनुपपत्तेरिति वर्तते ; प्राज्ञानधिष्ठितस्य प्रधानस्य विचित्रजगद्रचनानुगुणाद्यपरिस्पन्दरूपप्रवृत्त्यनुपपत्तेश्च न प्रधानं कारणम् ॥ १ ॥

पयोम्बुवच्चेत्तत्रापि ॥ पयसः अम्बुनश्च यथा प्राज्ञानधिष्ठितस्यैव दधिभावेन नारिकेलचूतादिविचित्ररसरूपेण च परिणामो दृश्यते ; तद्वत्प्रधानस्यापि केवलस्यैव जगदाकारेण परिणाम उपपद्यत इति चेत्—परिहरति—तत्रापि—इति ; तदपि पक्षीकृतमित्यर्थः । यत्र रथादिष्वचेतनस्य प्राज्ञाधिष्ठितत्वं दृष्टम् ; तद्व्यतिरिक्तं हि सर्वं पक्षीकृतमेव । १"योऽप्सु तिष्ठन्" इत्यादिश्रुतेः तदपि प्राज्ञाधिष्ठितम् ॥ २ ॥

व्यतिरेकानवस्थितेश्चानपेक्षत्वात् ॥ सर्गव्यतिरेकेण प्रतिसर्गावस्थानवस्थितिप्रसङ्गाच्च केवलं प्रधानं न कारणम् ; अन्यानपेक्षत्वात्प्रधानस्य सर्वदैव सृष्टिः प्रसज्यते ॥ ३ ॥

अन्यत्राभावाच्च न तृणादिवत् ॥ धेन्वादिनोपयुक्तं हि तृणोदकादि स्वयमेव क्षीराकारेण परिणमते ; तद्वत्प्रधानमपीति च वक्तुं न शक्यते; धेन्वादिनोपयुक्तस्यापि तृणादेः क्षीराकारेण परिणामः प्राज्ञाधिष्ठितत्वादेव भवतीत्यभ्युपेतव्यम् ; कुतः ? अन्यत्राभावात्—अनडुहाद्युपयुक्तस्य प्रहीणस्य वा तृणादेः क्षीराकारेण परिणामाभावात् ॥ ४ ॥

पुरुषाश्मवदितिचेत्तथापि ॥ प्राज्ञानधिष्ठितमपि प्रधानं, चैतन्यमात्रवपुर्निष्क्रियः पुरुषस्स्वसन्निधिमात्रेण सर्गादौ प्रवर्तयति । यथा दृक्छक्तियुक्तः गमनशक्तिविकलः पङ्गुः पुरुषः, अन्धं दृक्छक्तिविकलं प्रवृत्तिशक्तियुक्तं पुरुषं स्वसन्निधानात्प्रवर्तयति ; यथा चायस्कान्ताश्मा स्वसन्निधानादयः प्रवर्तयति ; तद्वदितिचेत्-परिहरति—तथापि-इति ; तद्वदपि प्रधानस्य प्रवृत्तिर्नोपपद्यते ; तत्र हि पङ्गोः पुरुषस्य गमनशक्तिविकलस्यापि मार्गोपदेशादिव्यापारः कादाचित्को दृश्यते;अन्धस्य चाक्षुषव्यापारविरहेऽपि पङ्गूपदेशग्रहणादिश्चेतनधर्मोऽस्ति । अयस्कान्तमणेरप्ययःप्रवृत्तौ कादाचित्कमयस्सन्निधानं विद्यते । इहतु सन्निधिमात्रातिरेकी तादृशः कश्चिद्विशेषः उभयत्रापि न विद्यते । पुरुषसन्निधानस्य नित्यत्वेन नित्यसर्गप्रसक्तिः । तथा सति प्रतिस-

१. बृ. ५-७-४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

र्गाभावोऽपवर्गाभावप्रसङ्गश्च ॥ ५ ॥

इतश्च—

अङ्गित्वानुपपत्तेश्च ॥ गुणानामुत्कर्षापकर्षरूपाङ्गाङ्गिभावेन जगत्प्रवृत्तिः प्रतिसर्गावस्थायां साम्यावस्थानामेकस्योत्कर्षरूपाङ्गित्वानुपपत्तेश्च न सम्भवति । तत्राप्युत्कर्षोऽस्तिचेत्—सर्वदा सर्गप्रसङ्गः ॥ ६ ॥

अन्यथाऽनुमितौ च ज्ञशक्तिवियोगात् ॥ उक्तप्रकाराद्यतिरिक्तप्रकारेण प्रधानानुमितौ च प्रधानस्य ज्ञातृत्वशक्तिवियोगाद्रचनानुपपत्त्यादयो दोषाः तदवस्थाः ॥ ७ ॥

अभ्युपगमेऽप्यर्थाभावात्॥प्रधानाभ्युपगमेऽपि प्रधानेन प्रयोजनाभावान्न तदनुमेयम् । पुरुषस्य भोगापवर्गार्थतया हि प्रधानप्रवृत्तेस्सप्रयोजनत्वम्; चैतन्यमात्रवपुषो निष्क्रियस्य नित्यनिर्विकारस्य पुरुषस्य इतरेतराध्यासकृतप्रकृतिदर्शनरूपभोगः,तद्विवेचनरूपापवर्गश्च न सम्भवति। निर्विकारस्यैव प्रकृतिसन्निधानेन भोगस्सम्भवति चेत्—उभयोर्नित्यत्वेन सर्वगतत्वेन च सन्निधानस्य नित्यत्वादपवर्गासिद्धिः, तथाविधसन्निधेरेवापवर्गहेतुत्वे भोगासिद्धिश्च ॥ ८ ॥

विप्रतिषेधाच्चासमञ्जसम् ॥ विप्रतिषिद्धं चेदं साङ्ख्यदर्शनम्; प्रकृतेः परार्थतया पुरुषो द्रष्टा भोक्ता अधिष्ठाता च—इत्याहुः;प्रकृतेश्च पुरुषस्य भोगापवर्गार्थतया सप्रयोजनत्वं च, प्रकृत्यैव साधनभूतया पुरुषो भोगमपवर्गं चाश्नुत इति चोक्तेः। सच पुरुषश्चैतन्यमात्रवपुर्नित्यो निर्विकारो न द्रष्टा न भोक्ता न कर्ता—इति च । अत एव पुरुषो न बद्ध्यते, नच मोक्षसाधनमनुतिष्ठति, नच मुच्यते—इति च वदन्ति। प्रकृतिरचेतनभूतैव पुरुषसन्निधानात्पुरुषधर्मं चैतन्यं स्वस्मिन् स्वधर्मं कर्तृत्वं पुरुषे चानुसन्धाय बध्यते; मोक्षसाधनमनुतिष्ठति मुच्यते—इतिचाहुः। अध्यासनरूपमनुसन्धानं हि चेतनधर्मः; तथा प्रकृतिरनुपकारिणः पुरुषस्य भोगापवर्गस्वरूपं प्रयोजनं साधयतीत्युपकारिणी—इति चाहुः। अध्यासरूपबन्धादयः पुरुषस्य न सन्तीतिचेत्—कस्तस्योपकारः । एवमाद्यन्योन्यविरुद्धभाषणादसमञ्जसम् ॥ ९ ॥

इति वेदान्तदीपे रचनानुपपत्त्यधिकरणम् ॥ १ ॥

———

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

महद्दीर्घवद्वाह्रस्वपरिमण्डलाभ्याम् । २ । २ । १० ॥

प्रधानकारणवादस्य युक्त्याभासमूलतया विप्रतिषिद्धत्वाच्चासामञ्जस्यमुक्तम् ; सम्प्रति परमाणुकारणवादस्याप्यसामञ्जस्यं प्रतिपाद्यते—महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम्—इति । असमञ्जसमिति वर्तते ; वाशब्दश्चार्थे । ह्रस्वपरिमण्डलाभ्यां द्व्यणुकपरमाणुभ्यां, महद्दीर्घवत्—त्र्यणुकोत्पत्तिवादवत्, अन्यच्च तदभ्युपगतं सर्वमसमञ्जसम्; परमाणुभ्यो द्व्यणुकादिक्रमेण जगदुत्पत्तिवादवदन्यदप्यसमञ्जसमित्यर्थः । तथाहि—तन्तुप्रभृतयो ह्यवयवाः स्वांशैष्षड्भिः पार्श्वैस्संयुज्यमाना अवयविनमुत्पादयन्ति, परमाणवोऽपि स्वकीयैः षड्भिः पार्श्वैस्संयुज्यमाना एव द्व्यणुकादीनामुत्पादका भवेयुः, अन्यथा परमाणूनां प्रदेशभेदाभावे सति सहस्रपरमाणुसंयोगेऽप्येकस्मात्परमाणोरनतिरिक्तपरिमाणतया अणुत्वह्रस्वत्वमहत्त्वदीर्घत्वाद्यसिद्धिस्स्यात् । प्रदेशभेदाभ्युपगमे परमाणवोऽपि सांशाः स्वकीयैरंशैः । ते च स्वकीयैरंशैरित्यनवस्था । नच वाच्यम्—अवयवाल्पत्वमहत्त्वाभ्यां हि सर्षपमहीधरयोः वैषम्यम्, परमाणोरप्यनन्तावयवत्वे अवयवानन्त्यसाम्यात्सर्षपमहीधरयोः वैषम्यासिद्धेः अवयवापकर्षकाष्ठावश्याभ्युपगमनीया—इति । परमाणूनां प्रदेशभेदाभावे सत्येकपरमाणुपरिमाणातिरेकी प्रथिमा न जायेतेति सर्षपमहीधरयोरेवासिद्धेः किं कुर्म इति चेत् —वैदिकः पक्षः परिगृह्यताम् । यत्तु परैः ब्रह्मकारणवाददूषणपरिहारपरमिदं सूत्रं व्याख्यातम् ; तदसङ्गतं, पुनरुक्तंच; ब्रह्मकारणवादे परोक्तान् दोषान् पूर्वस्मिन् पादे परिहृत्य परपक्षप्रतिक्षेपो ह्यस्मिन् पादे क्रियते । चेतनाद्ब्रह्मणो जगदुत्पत्तिसम्भवश्च [१] "न विलक्षणत्वात्" इत्यत्रैव प्रपञ्चितः। अतो ह्रस्वपरिमण्डलाभ्यां महद्दीर्घाणुह्रस्वोत्पत्तिवदन्यच्च तदभ्युपगतं सर्वमसमञ्जसमित्येव सूत्रार्थः ॥ १० ॥

१. शारी. २-१-४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

किमन्यदसमञ्जसमित्यत्राह—

उभयथाऽपि न कर्मातस्तदभावः । २ । २ । ११ ॥

परमाणुकारणवादे हि परमाणुगतकर्मजनिततत्संयोगपूर्वकद्व्यणुकादिक्रमेण जगदुत्पत्तिरिष्यते, तत्र निखिलजगदुत्पत्तिकारणभूतपरमाणुगतमाद्यं कर्मादृष्टकारितमित्यभ्युपगम्यते "अग्नेरूर्ध्वज्वलनं वायोस्तिर्यग्गमनमणुमनसोश्चाद्यं कर्मेत्यदृष्टकारितानि"इति। तदिदं परमाणुगतं कर्म स्वगताद्दष्टकारितम्, आत्मगताद्दष्टकारितं वा। उभयथाऽपि नसम्भवति, क्षेत्रज्ञपुण्यपापानुष्ठानजनितस्यादृष्टस्य परमाणुगतत्वासम्भवात्, सम्भवे च सदोत्पादकत्वप्रसङ्गः। आत्मगतस्य चादृष्टस्य परमाणुगतकर्मोत्पत्तिहेतुत्वं न सम्भवति। अथादृष्टवदात्मसंयोगादणुषु कर्मोत्पत्तिः,तदा तस्यादृष्टप्रवाहस्य नित्यत्वेन नित्यसर्गप्रसङ्गः।नन्वदृष्टं विपाकापेक्षं फलायालम्। कानिचिददृष्टानि तदानीमेव विपच्यन्ते, कानिचिज्जन्मान्तरे, कानिचित्कल्पान्तरे। अतो विपाकापेक्षत्वान्न सर्वदोत्पादकत्वप्रसङ्ग इति। नैतत्, अनन्तैरात्मभिस्सङ्केतपूर्वकमयुगपदनुष्ठितानेकविधकर्मजनितानामदृष्टानामेकस्मिन्काले एकरूपविपाकस्याप्रामाणिकत्वात्। अत एव युगपत्सर्वसंहारो द्विपरार्धकालमविपाकेनावस्थानं च न सङ्गच्छते। नचेश्वरेच्छाहितविशेषादृष्टसंयोगादणुषु कर्म,आनुमानिकेश्वरासिद्धेः[२]"शास्त्रयोनित्वात्"इत्यत्रोपपादितत्वात्। अतो जगदुत्पत्तेरणुगतकर्मपूर्वकत्वाभावः ॥ ११ ॥

समवायाभ्युपगमाच्च साम्यादनवस्थितेः ।२।१।१२

समवायाभ्युपगमाच्चासमञ्जसम्, कुतः? साम्यादनवस्थितेः—समवायस्याप्यवयविजातिगुणवदुपपादकान्तरापेक्षासाम्यादुपपादकान्तरस्यापि तथेत्यनवस्थितेरसमञ्जसमेव। एतदुक्तं भवति—अयुतसिद्धानामाधाराधेयभूतानामिह प्रत्ययहेतुर्यस्सम्बन्धः, स समवाय इति समवायोऽ-

२॥ २. शारी. १-१-३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भ्युपगम्यते। अपृथक्स्थित्युपलब्धीनां जात्यादीनां तथाभावस्य निर्वाहकत्वेन चेत्समवायोऽभ्युपगम्यते, समवायस्यापि तत्साम्यात्तथाभावहेतुरन्वेषणीयः, तस्यापि तथेत्यनवस्थितिः। समवायस्य तदपृथक्सिद्धत्वं स्वभाव इति परिकल्प्यते चेत्—जातिगुणानामेवैष स्वभावः परिकल्पनीयः, न पुनरदृष्टचरं समवायमभ्युपगम्य तस्यैष स्वभाव इति कल्पयितुं युक्तम्—इति ॥ १२ ॥

समवायस्य नित्यत्वे अनित्यत्वे चायं दोषस्समानः, नित्यत्वे दोषान्तरं चाह—

नित्यमेव च भावात् । २ । २ । १३ ॥

समवायस्य सम्बन्धत्वात्सम्बन्धस्य नित्यत्वे सम्बन्धिनो जगतश्च नित्यमेव भावादसमञ्जसम् ॥ १३ ॥

रूपादिमत्त्वाच्च विपर्ययो दर्शनात् । २ । २ । १४ ॥

परमाणूनां पार्थिवाप्यतैजसवायवीयानां चतुर्विधानां रूपरसगन्धस्पर्शवत्त्वाभ्युपगमादभिमतनित्यत्वसूक्ष्मत्वनिरवयवत्वादिविपर्ययेणानित्यत्वस्थूलत्वसावयवत्वादि प्रसज्यते, रूपादिमतां घटादीनामनित्यत्वतथाविधकारणान्तरारब्धत्वादिदर्शनात्। नहि दर्शनानुगुण्येनादृष्टोऽर्थः कल्प्यमानः स्वाभिमतविशेषे व्यवस्थापयितुं शक्यः। दर्शनानुगुण्येन हि परमाणूनां रूपादिमत्त्वं त्वया कल्प्यते। अतोऽप्यसमञ्जसम् ॥ १४ ॥

अथैतद्दोषपरिजिहीर्षया परमाणूनां रूपादिमत्त्वं नाभ्युपगम्यते, तत्राह—

उभयथा च दोषात् । २ । २ । १५ ॥

न केवलं परमाणूनां रूपादिमत्त्वाभ्युपगम एव दोषः, रूपादिविरहेऽपि कारणगुणपूर्वकत्वात्कार्यगुणानां पृथिव्यादयो रूपादिशून्या-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्युः। तत्परिजिहीर्षया रूपादिमत्त्वाभ्युपगमे पूर्वोक्तदोष इत्युभयथा च दोषादसमञ्जसम् ॥ १५ ॥

अपरिग्रहाच्चात्यन्तमनपेक्षा । २ । २ । १६ ॥

कापिलपक्षस्य श्रुतिन्यायविरोधपरित्यक्तस्यापि सत्कार्यवादादिना कचिदंशे वैदिकैः परिग्रहोऽस्ति, अस्य तु काणादपक्षस्य केनाप्यंशेनापरिग्रहादनुपपन्नत्वाच्चात्यन्तमनपेक्षैव निःश्रेयसार्थिभिः कार्या ॥

इति महद्दीर्घाधिकरणं समाप्तम् ॥ २ ॥

वेदान्तसारे—महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम् ॥ असमञ्जसमिति वर्तते, वाशब्दाश्चार्थे, ह्रस्वपरिमण्डलाभ्यां महद्दीर्घवत्—द्व्यणुकत्र्यणुकोत्पत्तिवदन्यच्च तन्मतं सर्वमसमञ्जसम् । अवयवास्स्वकीयैषड्भिः पार्श्वैस्संयुज्यमाना हि पृथुतरमवयविनमारभन्ते, परमाणूनान्निरवयवत्वेन पार्श्वानभ्युपगमात्, पार्श्वाण्यनपेक्ष्य संयुज्यमानानां न पृथुतरद्रव्यारम्भकत्वसम्भवः ॥ १० ॥

उभयथापि न कर्मातस्तदभावः ॥ अणुगताद्यकर्मासम्भवात्तत्कृताणुसंयोगाभावः; क्षेत्रज्ञादृष्टानां विपाकापेक्षत्वेऽपि न तत्कृतकादाचित्काणुगतकर्मसम्भवः; अनपेक्षत्वे प्रागप्युत्पादकं स्यात्। विपाको नाम कश्चिददृष्टगतः धर्मो न ज्ञायते; कर्मविधिवेलायामेव कालविशेषनियतफलदायित्वं यस्य कर्मणश्चोदितम्, तस्य तत्तत्कालागम एव विपाकः। अनियतकालविशेषाणां कर्मणां प्रबलकर्मान्तराप्रतिबन्ध एव विपाकः, अदृष्टानि च तत्तत्कर्मानुगुणफलदानस्वभावानि। अतोऽनन्तैरात्मभिः विविधकालफलदायित्वेनानुष्ठितानामेकदैकरूपविपाको न सम्भवति। अनुमेयेश्वरासिद्धेस्तदधिष्ठानाच्च न सम्भवति ॥ ११ ॥

समवायाभ्युपगमाच्च साम्यादनवस्थितेः ॥ समवायाभ्युपगमाच्च असमञ्जसम्, समवायस्यापि जातिगुणादेरिव अपृथक्सिद्धिहेत्वपेक्षासाम्यादनवस्थितेः, समवायस्य तत्स्वभावकल्पनायां जात्यादेरेव तन्न्याय्यम् ॥ १२ ॥

नित्यमेव च भावात् ॥ समवायस्य नित्यत्वाभ्युपगमे सम्बन्धिनित्यत्वमन्तरेण तदनुपपत्तेः अवयवावयविनोरुभयोर्नित्यत्वप्रसङ्गादसदेवेदम् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रूपादिमत्त्वाच्चविपर्ययो दर्शनात् ॥ परमाणूनां रूपादिमत्त्वान्नित्यत्वादिविपर्ययश्च, घटादिषु तथा दर्शनात् ॥ १४ ॥

उभयथा च दोषात् ॥ अनित्यत्वादिभयाद्रूपादिशून्यत्वे कारणगुणपूर्वकत्वासिद्धिः, तद्भयाद्रूपादिमत्त्वे च अनित्यत्वादिरिति उभयथा च दोषादसमञ्जसमेव ॥ १५ ॥

अपरिग्रहाच्चात्यन्तमनपेक्षा ॥ काणादपक्षे कस्याप्यंशस्य वैदिकैरपरिग्रहादनुपपन्नत्वाच्च अत्यन्तमनपेक्षा ॥ १६ ॥

इति वेदान्तसारे महद्दीर्घाधिकरणम् ॥ २ ॥

वेदान्तदीपे—महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम् ॥ किं काणादाभ्युपागतः परमाणुकारणवादः समीचीनयुक्तिमूलः ? उत नेति संशयः । समीचीनयुक्तिमूल इति पूर्वपक्षः, अवयवसंयोगादवयव्युत्पत्तेर्दर्शनात्; अवयवाल्पत्वप्राचुर्याभ्यां सर्षपमहीधरवैषम्यदर्शनाच्च अवयवाल्पत्वकाष्ठाऽवश्याभ्युपगमनीयेति परमाणुसिद्धिः । ते चतुर्विधाः परमाणवो विपाकदशापन्नक्षेत्रज्ञादृष्टसचिवाः परमेश्वराधिष्ठिताः द्व्यणुकादिक्रमेणजगदारम्भका इति । राद्धान्तस्तु—अवयवास्स्वकीयैरष्टभिः पार्श्वैस्संयुज्यमानास्स्वस्मान्महान्तमवयविनमुत्पादयन्तीति परमाणुष्वपि तथैवोत्पादकत्वमभ्युपेतव्यम् । तथा सति परमाणवोऽपि सांशास्स्वकीयैरवयवैः, तेच स्वकीयैरिति न क्वचित्कारणस्य व्यवस्थितिः । सूत्रार्थस्तु—महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम्—असमञ्जसमिति वर्तते, वाशब्दश्चार्थे, ह्रस्वपरिमण्डलाभ्यां द्व्यणुकपरमाणुभ्याम्, महद्दीर्घवत्—त्र्यणुकद्व्यणुकोत्पत्तिवदन्यच्च तदभ्युपगतं सर्वमसमञ्जसम् ॥ १० ॥

द्व्यणुकादिक्रमेणारम्भकत्वं कारणानवस्थितेरसमञ्जसम् । किमन्यदसमञ्जसमित्यत्राह—

उभयथापि न कर्मातस्तदभावः ॥ परमाणूनामाद्यं कर्म अदृष्टकारितमित्यभ्युपगम्यते, तददृष्टं किमणुगतम्, उत क्षेत्रज्ञगतम्। उभयथाऽप्यदृष्टस्य अकादाचित्कत्वेन सदोत्पादकत्वप्रसङ्गात्कादाचित्कं कर्म न सम्भवति । अतः कर्मणा परमाणुसंयोगाभावः । विपाकापेक्षत्वेऽपि नानाविधानन्तादृष्टानामेकदैवैकरूपविपाकश्च न सम्भवति । आनुमानिकेश्वरासिद्धेरीश्वरेच्छयापि नियमो न सम्भवति ॥ ११ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

समवायाभ्युपगमाच्च साम्यादनवस्थितेः ॥ समवायाभ्युपगमाच्च असमञ्जसम्; समवायो हि जातिगुणादीनां द्रव्यविशेषापृथग्विकसद्धिहेतुतयाऽभ्युपगम्यते; समवायस्यापि तथाभावे हेत्वपेक्षासाम्यादनवस्थितेः; समवायस्य तथाभावस्स्वाभाविक इति चेत्—जातिगुणादीनामेवैष स्वभाव इति युक्तम् ॥ १२ ॥

इतश्च—

नित्यमेव च भावात् ॥ समवायसम्बन्धस्य नित्यत्वाभ्युपगमात्, सम्बन्धिनित्यत्वमन्तरेण तदनुपपत्तेः, अवयवावयविनोरुभयोरपि नित्यमेव भावात् कार्यकारणभाव एव न सिद्ध्यति ॥ १३ ॥

रूपादिमत्त्वाच्च विपर्ययो दर्शनात्॥ परमाणूनां नित्यत्वनिरवयवत्वादिविपर्ययश्च स्यात्, रूपादिमत्त्वात्तेषाम्, घटादिषु रूपादिमत्सु तथा दर्शनात्; दर्शनादेव हि त्वदभिमतं परिकल्प्यते ॥ १४ ॥

उभयथा च दोषात् ॥ अनित्यत्वादिभयात्परमाणूनां रूपादिशून्यत्वे कार्यगुणस्य कारणगुणपूर्वकत्वासिद्धिः; तत्सिद्धये रूपादिमत्त्वे चानित्यत्वादिदोषप्रसक्तिरिति उभयथा च दोषादसमञ्जसमेव ॥ १५ ॥

अपरिग्रहाच्चात्यन्तमनपेक्षा ॥ कापिलपक्षे हि श्रुतिन्यायविरुद्धेऽपि सत्कार्यवादादि किञ्चिद्वैदिकैः परिगृह्यते; काणादे तु कस्यचिदप्यंशस्य वैदिकैः परिग्रहाभावादनुपपन्नत्वाच्च निःश्रेयसार्थिभिरत्यन्तमनपेक्षा कार्या ॥ १६ ॥

इति वेदान्तदीपे महद्दीर्घाधिकरणम् ॥ २ ॥

(श्रीशारीरकमीमांसाभाष्ये समुदायाधिकरणम् ॥ ३ ॥)

समुदाय उभयहेतुकेऽपि तदप्राप्तिः ।२। २। १७॥

परमाणुकारणवादिनो वैशेषिका निरस्ताः; सौगताश्च जगतः परमाणुकारणत्वमभ्युपगच्छन्तीत्यनन्तरं तन्मतेऽपि जगदुत्पत्तितद्व्यवहारादिकं नोपपद्यत इत्युच्यते। ते चतुर्विधाः—केचित्पार्थिवाप्यतैजसवायवीयपरमाणुसङ्घातरूपान् भूतभौतिकान् बाह्यांश्चित्तचैत्तरूपांश्चाभ्यन्तरानर्थान्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रत्यक्षानुमानसिद्धानभ्युपयन्ति, अन्ये तु बाह्यार्थान् सर्वान् पृथिव्यादीन्विज्ञानानुमेयान्वदन्ति; अपरे त्वर्थशून्यं विज्ञानमेव परमार्थसत्, बाह्यार्थास्तु स्वाप्नार्थकल्पा इत्याहुः; त्रयोऽप्येते स्वाभ्युपगतं वस्तु क्षणिकमाचक्षते, उक्तभूतभौतिकचित्तचैत्तव्यतिरिक्तमात्माकाशादिकं स्वरूपेणैव नानुमन्वते; अन्ये तु सर्वशून्यत्वमेव सङ्गिरन्ते; तत्र ये बाह्यार्थास्तित्ववादिनः, ते तावन्निरस्यन्ते; तेचैवं मन्यन्ते—रूपरसस्पर्शगन्धस्वभावाः पार्थिवाः परमाणवः, रूपरसस्पर्शस्वभावाश्चाप्याः, रूपस्पर्शस्वभावाश्च तैजसाः, स्पर्शस्वभावाश्च वायवीयाः पृथिव्यग्निजोवायुरूपेण संहन्यन्ते, तेभ्यश्च पृथिव्यादिभ्यः शरीरेन्द्रियविषयरूपसङ्घाता भवन्ति; तत्र च शरीरान्तर्वर्ती ग्राहकाभिमानारूढो विज्ञानसन्तान एवात्मत्वेनावतिष्ठते; तत एव सर्वो लौकिको व्यवहारः प्रवर्तते—इति ॥

तत्राभिधीयते—समुदाय उभयहेतुकेऽपि तदप्राप्तिः—योऽयमणुहेतुः पृथिव्यादिभूतात्मकस्समुदायः, यश्च पृथिव्यादिहेतुकश्शरीरेन्द्रियविषयरूपस्समुदायः, तस्मिन्नुभयहेतुकेऽपि समुदाये तत्प्राप्तिर्नोपपद्यते—जगदात्मकसमुदायोत्पत्तिर्नोपपद्यत इत्यर्थः। परमाणूनां पृथिव्यादिभूतानां च क्षणिकत्वाभ्युपगमात्, क्षणध्वंसिनः परमाणवो भूतानि च कदा संहतौ व्याप्रियन्ते, कदावा संहन्यन्ते, कदा विज्ञानविषयभूताः, कदा च हानोपादानादिव्यवहारास्पदतां भजन्ते, को वा विज्ञानात्मा कं च विषयं स्पृशति कश्च विज्ञानात्मा कमर्थं कदा वेदयते, कं वा विदितमर्थं कश्च कदोपादत्ते; स्पष्टा हि नष्टः, स्पृष्टश्च नष्टः; तथा वेदिता विदितश्च नष्टः; कथं चान्येन स्पृष्टमन्यो वेदयते, कथञ्चान्येन विदितमर्थमन्य उपादत्ते; सन्तानानामेकत्वेऽपि सन्तानिभ्यस्तेषां वस्तुतो वस्त्वन्तरत्वानभ्युपगमान्न तन्निबन्धनं व्यवहारादिकमुपपद्यते; अहमर्थ एवात्मा, सच ज्ञातैवेति चोपपादितं पुरस्तात् ॥ १७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इतरेतरप्रत्ययत्वादुपपन्नमितिचेन्न संघातभावानिमित्तत्वात् । २ । २ । १८ ॥

अविद्यादीनामितरेतरहेतुत्वेनोपपन्नं सङ्घातभावादिकमितिचेत्; एतदुक्तं भवति—यद्यपि क्षणिकास्सर्वे भावाः,तथाऽप्यविद्ययैतत्सर्वमुपपद्यते; अविद्या हि नाम विपरीतबुद्धिः क्षणिकादिषु स्थिरत्वादिगोचरा; तया संस्काराख्याः रागद्वेषादयो जायन्ते; ततश्चित्ताभिष्वलनरूपं विज्ञानम्; ततश्च नामाख्याश्चित्तचैत्ताः पृथिव्यादिकं च रूपिद्रव्यम्; ततषडायतनाख्यमिन्द्रियषट्कम्; ततः स्पर्शाख्यः कायः; ततो वेदनादयः; ततश्च पुनरप्यविद्यादयो यथोक्ता इत्यनादिरियमविद्यादिकाऽन्योन्यमूला चक्रपरिवृत्तिः; एतच्च सर्वं पृथिव्यादिभूतभौतिकसङ्घातमन्तरेण नोपपद्यते। अतस्सङ्घातभावादिकमुपपन्नम्—इति।तत्रोत्तरं—न सङ्घातभावानिमित्तत्वात्—इति। नैतदुपपद्यते—एषामविद्यादीनां पृथिव्यादिभूतभौतिकसङ्घातभावं प्रत्यनिमित्तत्वात्; न खल्वस्थिरादिषु स्थिरत्वादिबुद्ध्यात्मिकाऽविद्या तन्निमित्ता रागद्वेषादयो वाऽर्थान्तरस्य क्षणिकस्य संहतिहेतुतां प्रतिपद्यन्ते; शुक्तिकारजतादिबुद्धिर्हि न शुक्त्याद्यर्थसंहतिहेतुर्भवति; किंच यस्य क्षणिके स्थिरत्वबुद्धिः, स तदैव नष्ट इति कस्य रागादय उत्पद्यन्ते; संस्काराश्रयं स्थिरमेकं द्रव्यमनभ्युपगच्छतां संस्कारानुवृत्तिरपि न शक्या कल्पयितुम् ॥ १८ ॥

उत्तरोत्पादे च पूर्वनिरोधात् । २ । २ । १९ ॥

इतश्च क्षणिकत्वपक्षे जगदुत्पत्तिर्नोपपद्यते, उत्तरक्षणोत्पत्तिवेलायां पूर्वक्षणस्य विनष्टत्वात्, तस्योत्तरक्षणं प्रति हेतुत्वानुपपत्तेः; अभावस्य हेतुत्वे सर्वं सर्वत्र सर्वदोत्पद्येत; अथ पूर्वक्षणवर्तित्वमेव हेतुत्वमित्युच्यते, एवं तर्हि कश्चिदेव घटक्षणस्तदुत्तरकालभाविनां सर्वेषामेव गोमहिषाश्व-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कुड्यपाषाणादीनां त्रैलोक्यवर्तिनां हेतुस्स्यात्, अथैकजातीयस्यैव पूर्वक्षणवर्तिनो हेतुत्वमिष्यते, तथापि सर्वदेशवर्तिनामुत्तरक्षणभाविनां घटानामेक एव पूर्वक्षणवर्तिघटो हेतुस्स्यात्; अथैकस्यैव हेतुरेक इति मनुषे, तथापि कस्यैकस्य को हेतुरिति न ज्ञायते; अथ यस्मिन् देशे यो घटक्षणः स्थितः,तद्देशसम्बन्धिन एवोत्तरक्षणस्य स हेतुरिति,किं देशस्य स्थिरत्वं मनुषे; किञ्च चक्षुरादिसम्प्रयुक्तस्यार्थस्य ज्ञानोत्पत्तिकालेऽनवस्थितत्वान्न कस्यचिदर्थस्य ज्ञानविषयत्वं सम्भवति ॥ १९ ॥

असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा॥२।२।२०॥

असत्यपि हेतौ कार्यमुत्पद्यते चेत्–सर्वं सर्वत्र सर्वदोत्पद्येतेत्युक्तम्, न केवलमुत्पत्तिविरोध एव, प्रतिज्ञा च भवतामुपरुध्येत, अधिपतिसहकार्यालम्बनसमनन्तरप्रत्ययाश्चत्वारो विज्ञानोत्पत्तौ हेतव इति वः प्रतिज्ञा; अधिपतिः इन्द्रियम्। अथ प्रतिज्ञानुपरोधाय घटक्षणे स्थित एव घटक्षणान्तरोत्पत्तिरिष्यते, तथाच सति द्वयोः कार्यकारणयोर्घटक्षणयोर्यौगपद्येनोपलब्धिः प्रसज्येत, नच तथोपलभ्यते, क्षणिकत्वप्रतिज्ञा चैवं हीयेत।क्षणिकत्वं स्थितमेवेति चेत्–इन्द्रियसंप्रयोगज्ञानयोर्यौगपद्यं प्रसज्येत।

प्रतिसंख्याप्रतिसंख्यानिरोधाप्राप्तिरविच्छेदात्। २। २। २१॥

एवं तावदसत उत्पत्तिर्निरस्ता; सतो निरन्वयविनाशोऽपि नोपपद्यत इत्युच्यते; क्षणिकत्ववादिभिर्मुद्गराभिघाताद्यनन्तरभावितयोपलब्धियोग्यस्सदृशसन्तानावसानरूपः स्थूलो यः, सदृशसन्ताने प्रतिक्षणभावी चोपलब्ध्यनर्हस्सूक्ष्मश्च यो निरन्वयो विनाशः प्रतिसङ्ख्यानिरोधाप्रतिसङ्ख्यानिरोधशब्दाभ्यामभिधीयेते, तौ न सम्भवत इत्यर्थः। कुतः? अविच्छेदात्–सतो निरन्वयविच्छेदासम्भवात्। असम्भवश्च सत उत्पत्तिवि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नाशौ नामावस्थान्तरापत्तिरेव ; अवस्थायोगि तु द्रव्यमेकमेव स्थिरमिति कारणादनन्यत्वं कार्यस्योपपादयद्भिरस्माभिः[1] "तदनन्यत्वम्" इत्यत्र प्रतिपादितम्। निर्वाणस्य दीपस्य निरन्वयविनाशदर्शनादन्यत्रापि विनाशो निरन्वयोऽनुमीयत इति चेन्न, घटशरावादौ मृदादिद्रव्यानुवृत्त्युपलब्ध्या सतो द्रव्यस्यावस्थान्तरापत्तिरेव विनाश इति निश्चिते सति प्रदीपादौ सूक्ष्मदशापत्त्याऽप्यनुपलम्भोपपत्तेः तत्राप्यवस्थान्तरापत्तिकल्पनस्यैव युक्तत्वात् ॥ २१ ॥

उभयथा च दोषात्। २। २। २२ ॥

क्षणिकत्ववादिभिरभ्युपेता तुच्छादुत्पत्तिः उत्पन्नस्य तुच्छतापत्तिश्च न सम्भवतीत्युक्तम् ; तदुभयप्रकाराभ्युपगतौ दोषश्च भवति। तुच्छादुत्पत्तौ तुच्छात्मकमेव कार्यं स्यात् ; यद्धि यस्मादुत्पद्यते, तत्तदात्मकं दृष्टम् ; यथा मृत्सुवर्णादेरुत्पन्नं मणिकमकुटादि मृत्सुवर्णाद्यात्मकं दृष्टम् ; नच जगत्तुच्छात्मकं भवद्भिरभ्युपगम्यते; नच प्रतीयते। सतो निरन्वयविनाशे सत्येकक्षणादूर्ध्वं कृत्स्नस्य जगतस्तुच्छतापत्तिरेव स्यात् ; पश्चात्तुच्छाज्जगदुत्पत्तौ अनन्तरोक्तं तुच्छात्मकत्वमेव स्यात्। अत उभयथापि दोषान्न भवदुक्तप्रकारावुत्पत्तिनिरोधौ ॥ २२ ॥

आकाशे चाविशेषात्। २। २। २३ ॥

बाह्याभ्यन्तरवस्तुनः स्थिरत्वप्रतिपादनाय प्रतिसङ्ख्याप्रतिसङ्ख्यानिरोधयोस्तुच्छरूपता निराकृता ; तत्प्रसङ्गेन ताभ्यां सह तुच्छत्वेन सौगतैः परिगणितस्याकाशस्यापि तुच्छता प्रतिक्षिप्यते। आकाशे च निरुपाख्यता न युक्ता, भावरूपत्वेनाभ्युपगतपृथिव्यादिवदाकाशस्यापि अबाधितप्रतीतिसिद्धत्वाविशेषात्। प्रतीयते ह्याकाशः 'अत्र श्येनः पतति, अत्र गृध्रः' इति श्येनादिपतनदेशत्वेनानच पृथिव्याद्यभावमात्रमाकाश इति

१. शा. २. १-१५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वक्तुं शक्यम्, विकल्पासहत्वात् । पृथिव्यादेः प्रागभावः, प्रध्वंसाभावः, इतरेतराभावः, अत्यन्ताभावो वा आकाशः; सर्वथाऽप्याकाशप्रतीत्यनुपपत्तिस्स्यात्।प्रागभावप्रध्वंसाभावयोराकाशत्वे पृथिव्यादिषु वर्तमानेषु आकाशप्रतीत्ययोगात् निराकाशं जगत्स्यात्। इतरेतराभावस्याकाशत्वेऽपि इतरेतराभावस्य तत्तद्वस्तुगतत्वेन तेषामन्तराले आकाशप्रतीतिर्न स्यात्। अत्यन्ताभावस्तु पृथिव्यादीनां न सम्भवति । अभावस्य विद्यमानपदार्थावस्थाविशेषत्वोपपादनाच्चाकाशस्याभावरूपत्वेऽपि न निरुपाख्यत्वम्। अण्डान्तर्वर्तिनश्चाकाशस्य त्रिवृत्करणोपदेशप्रदर्शितपञ्चीकरणेन रूपवत्त्वाच्चाक्षुषत्वेऽप्यविरोधः ॥ २३ ॥

अनुस्मृतेश्च २ । २ । २४ ॥

पूर्वप्रस्तुतं वस्तुनः स्थिरत्वमेवोपपाद्यते–अनुस्मरणं–पूर्वानुभूतवस्तुविषयं ज्ञानम्, प्रत्यभिज्ञानमित्यर्थः । तदेवेदमिति सर्वं वस्तुजातमतीतकालानुभूतं प्रत्यभिज्ञायते।नच भवद्भिर्ज्वालादिष्विव सादृश्यनिबन्धनोऽयमेकत्वव्यामोह इति वक्तुं शक्यम्, व्यामुह्यतो ज्ञातुरेकस्यानभ्युपगमात्। नह्यन्यानुभूतेनैकत्वं सादृश्यं वा स्वानुभूतस्यान्योऽनुसन्धत्ते । अतो भिन्नकालवस्त्वाश्रयसादृश्यानुभवनिबन्धनमेकत्वव्यामोहं वदद्भिर्ज्ञातुरेकत्वमवश्याश्रयणीयम्। नच ज्ञेयेष्वपि घटादिषु ज्वालादिष्विव भेदसाधनप्रमाणमुपलभामहे; येन सादृश्यनिबन्धनां प्रत्यभिज्ञां कल्पयेम।यदपि चेदमुच्यते–प्रत्यक्षानुमानाभ्यां घटादेः क्षणिकत्वं सिध्यति;प्रत्यक्षं तावद्वर्तमानार्थविषयमवर्तमानाद्वस्तुनो व्यावृत्तं स्वविषयमवगमयति, नीलमिव पीतात्। एवंच भूतभविष्यद्भ्यां वर्तमानस्य वस्त्वन्तरत्वमवगतं भवति । अनुमानमपि–अर्थक्रियाकारित्वात्सत्त्वाच्च घटादिः क्षणिकः,यदक्षणिकं शशविषाणादि, तदनर्थक्रियाकार्यसच्च। तथा अन्त्यघटक्षणसत्त्वात्पूर्वघटक्षणसत्त्वानि विनाशीनि,घटक्षणसत्त्वात्,अन्त्यघटक्षणसत्त्ववत्-इतिःतच्च कार्यकारणभावा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नुपपत्त्यादिभिः पूर्वमेव निरस्तम्। किञ्च प्रत्यक्षगम्या वर्तमानस्यावर्तमानाद्व्यावृत्तिर्न वर्तमानस्य वस्त्वन्तरत्वमवगमयति; अपितु वर्तमानकालयोगितामात्रम्। नच तावता वस्त्वन्तरत्वं सिध्यति, तस्यैव कालान्तरयोगसम्भवात्। यत्तु सत्त्वादर्थक्रियाकारित्वाच्चेति क्षणिकत्वे हेतुद्वयमुक्तम्, तदभिमतविपरीतसाधनत्वाद्विरुद्धम्। सत्त्वादर्थक्रियाकारित्वाद्वा घटादि स्थास्नु, यदस्थास्नु तदसदनर्थक्रियाकारि च,यथा शशविषाणमित्यपि हि वक्तुं शक्यम्। किञ्च अर्थक्रियाकारित्वमक्षणिकत्वमेव साधयेत्। क्षणध्वंसिनो हि व्यापारासम्भवादर्थक्रियाकारित्वं न सम्भवतीत्युक्तम्। तथाऽन्त्यघटक्षणस्य हेतुतो नाशदर्शनादितरेऽपि घटक्षणा हेत्वपेक्षविनाशास्स्युरित्यामुद्गरादिहेतूपनिपातात् स्थास्नुत्वमेव। नच वाच्यं न मुद्गरादयो विनाशहेतवः, अपितु कपालादिविसदृशसन्तानोत्पत्तिहेतवइति, कपालत्वावस्थापत्तिरेव घटादीनां विनाश इत्युपपादितत्वात्।कपालोत्पत्तिव्यतिरिक्तत्वाभ्युपगमेऽपि विनाशस्य विनाशहेतुत्वमेव मुद्गरादेरानन्तर्याद्युक्तम्। अतः प्रत्यभिज्ञया स्थिरत्वमवगम्यमानं न केनापि प्रकारेणापह्नोतुं शक्यम्। पूर्वापरकालसम्बन्ध्यर्थैक्यविषयायाः प्रत्यभिज्ञाया अन्यविषयत्वं ब्रुवन्नीलादिज्ञानानामपि नीलादेरर्थान्तरविषयत्वं ब्रूयात्। किञ्च प्रमातृप्रमेययोः क्षणिकत्वं वदद्भिर्व्याप्त्यवधारणतत्स्मरणपूर्वकानुमानाभ्युपगमोऽपि दुश्शकः। तथा इदं क्षणिकमित्यादिप्रतिज्ञापूर्वकहेतूपन्यासादिकमपि नोपपद्यते भवताम्, प्रतिज्ञोपक्रमक्षण एव वक्तुर्विनष्टत्वात्; नह्यन्येनोपक्रान्तमजानद्भिरन्यैस्समापयितुं शक्यम्॥ २४॥

नासतोऽदृष्टत्वात्। २। २। २५॥

एवं तावद्वैभाषिकसौत्रान्तिकयोर्बाह्यार्थास्तित्ववादिनोस्साधारणानि दूषणान्युक्तानि; तत्र यदुक्तं--सम्प्रयुक्तस्यार्थस्य ज्ञानोत्पत्तिकालेऽनवस्थितत्वान्न कस्यचिदर्थस्य ज्ञानविषयत्वं सम्भवतीति; तत्र सौत्रान्तिकः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रत्यवतिष्ठते—न ज्ञानकालेऽनवस्थानमर्थस्य ज्ञानाविषयत्वहेतुः ; ज्ञानोत्पत्तिहेतुत्वमेव हि ज्ञानविषयत्वम् । नचैतावता चक्षुरादेः ज्ञानविषयत्वप्रसङ्गः, स्वाकारसमर्पणेन ज्ञानहेतोरेव ज्ञानविषयत्वाभ्युपगमात्। ज्ञाने स्वाकारं समर्प्य विनष्टोऽप्यर्थो ज्ञानगतेन नीलाद्याकारेणानुमीयते। नच पूर्वपूर्वज्ञानेनोत्तरोत्तरज्ञानाकारसिद्धिः, नीलज्ञानसन्ततौ पीतज्ञानानुत्पत्तिप्रसङ्गात्। अतोऽर्थकृतमेव ज्ञानवैचित्र्यम्—इति। अत्रोच्यते-नासतो दृष्टत्वात्-इति, योऽयं ज्ञाने नीलादिराकार उपलभ्यते, स विनष्टस्यासतोऽर्थस्याकारो भवितुं नार्हति; कुतः? अदृष्टत्वात्--न खलु धर्मिणि विनष्टे तद्धर्मस्यार्थान्तरे सङ्क्रमणं दृष्टम् । प्रतिबिम्बादिकमपि स्थिरस्यैव भवति । तत्रापि न धर्ममात्रस्य । अतो ऽर्थवैचित्र्यकृतं ज्ञानवैचित्र्यमर्थस्य ज्ञानकालेऽवस्थानादेव भवति ॥ २५ ॥

पुनरपि साधारणं दूषणमाह—

उदासीनानामपि चैवं सिद्धिः । २ । २ । २६ ॥

एवं क्षणिकत्वासदुत्पत्त्यहेतुकविनाशाद्यभ्युपगमे उदासीनानाम् अनुद्युञ्जानानामपि सर्वार्थसिद्धिरस्यात् इष्टप्राप्तिरनिष्टनिवृत्तिर्वा प्रयत्नादिभिस्साध्यते ; क्षणध्वंसे हि सर्वेषां भावानां पूर्वपूर्व वस्तु तद्गतो वा विशेषः संस्कारादिको विद्यादिर्वा उत्तरत्र न कश्चिदनुवर्तत इति प्रयत्नादिसाध्यं न किञ्चिदस्ति। एवं सत्यहेतुसाध्यत्वात्सर्वसिद्धीनामुदासीनानामप्यैहिकामुष्मिकफलं मोक्षश्च सिद्ध्येत् ॥ २६ ॥

इति श्रीशारीरकमीमांसाभाष्ये समुदायाधिकरणं समाप्तम् ॥ ३ ॥

वेदान्तसारे—समुदाय उभयहेतुकेऽपि तदप्राप्तिः ॥ अणुहेतुके पृथिव्यादिसमुदाये, पृथिव्यदिहेतुके शरीरेन्द्रियसमुदाये च सुगताभ्युपगते तदभ्युपगमप्रकारेणैव समुदायासिद्धिः ; क्षणिकत्वं हि तैरभ्युपगम्यते ; संहतै

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तौ व्याप्रियमाणाः परमाणवः पृथिव्यादयश्च तदानीमेव नष्टाश्चेत्—के समुदायिरूपेण संहन्यन्ते ॥ १७ ॥

इतरेतरप्रत्ययत्वादुपपन्नमितिचेन्न सङ्घातभावानिमित्तत्वात् ॥ अस्थिरेषु स्थिरत्वबुद्धिरूपाविद्यारागद्वेषादिपरम्परया अन्योन्यकारणत्वात्सर्वकारणत्वमुपपन्नमितिचेत्—न, अविद्यायास्सङ्घातभावानिमित्तत्वात्। नहि शुक्तिकादिषु रजतादिबुद्धिरूपाविद्यया शुक्तिकादिर्वस्तुतो रजतादिकार्यङ्करोति। अत्र विदुषस्तदानीमेव नष्टत्वादविद्यानिमित्तरागादयोऽपि न सम्भवन्ति॥ १८॥

उत्तरोत्पादे च पूर्वनिरोधात् ॥ उत्तरघटक्षणोत्पत्तौ पूर्वघटक्षणस्यापि नष्टत्वेनाभावस्यैवोत्पादकत्वाविशेषेण सर्वदोत्पत्तिश्च स्यात् ॥ १९ ॥

असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा॥ [1]असत उत्पत्तावधिपतिसहकार्यादीनां ज्ञानहेतुत्वप्रतिज्ञाविरोधश्च। तस्यापि स्थित्यभ्युपगमे युगपद्घटद्वयोपलब्धिप्रसक्तिः, अस्थितौ च संप्रयोगज्ञानापत्तेः यौगपद्यम् ॥ २० ॥

प्रतिसङ्ख्याप्रतिसङ्ख्यानिरोधाप्राप्तिरविच्छेदात् ॥ निरोधः निरन्वयविनाशः, स स्थूलः सूक्ष्मश्च न सम्भवति, कपालादिभावरूपावस्थाप्राप्तेरेव विनाशशब्दाभिधेयत्वात्, सतो द्रव्यस्य अविच्छेदात् ॥ २१ ॥

उभयथा च दोषात् ॥ उत्पन्नस्य तुच्छतापत्तौ तुच्छादुत्पत्तौ चाभावादुत्पत्त्यसम्भवादभावात्मककार्यापत्तिरूपदोषात्तुच्छत्वासिद्धिः ॥ २२ ॥

आकाशेचाविशेषात् ॥ आकाशे च न तुच्छत्वम्, अबाधितप्रतीत्यविशेषात्। प्रतीयते ह्याकाशः श्येनादिपतनदेशत्वेन ॥ २३ ॥

अनुस्मृतेश्च ॥ प्रत्यभिज्ञानाच्च न क्षणिकत्वसिद्धिः। 'तदेवेदम्' इति हि सामानाधिकरण्येनातीतवर्तमानदेशकालविशिष्टं वस्तु एकमिति प्रतीयते; अस्याश्च सामग्री पूर्वानुभवजनितसंस्कारवतः पुरुषस्येन्द्रियसंप्रयोगः ॥ २४ ॥

नासतोऽदृष्टत्वात् ॥ 'ज्ञानाकारवैचित्र्येण ज्ञाने स्वाकारं समर्प्य विनष्टमप्यर्थमनुमिनोति' इति वादश्च न सम्भवति, असतो विनष्टस्य धर्मिणो धर्मसङ्क्रमणस्यादृष्टत्वात्। (ज्ञाने नीलाद्याकार उपलभ्यते; स विनष्टस्यासतोऽर्थस्याकारो भवितुन्नार्हति; कुतः? अदृष्टत्वात्। न खलु धर्मिणि विनष्टे तद्धर्मस्यार्थान्तरे सङ्क्रमणं दृष्टम्) ॥ २५ ॥

---

१. असतिहेतावुत्पत्ता. पा ॥—() कुण्डलितग्रन्थः केषुचित्कोशेषु न दृश्यते ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उदासीनानामपि चैवं सिद्धिः ॥ क्षणिकत्वाभ्युपगमे अनुष्ठातुरन्यत्वात् फलिनां निष्प्रयत्नानामपि सर्वार्थसिद्धिस्स्यात् ॥ २६ ॥

इति वेदान्तसारे समुदायाधिकरणम् ॥ ३ ॥

वेदान्तदीपे—समुदाय उभयहेतुकेऽपि तदप्राप्तिः ॥ सौगताश्चतुर्विधाः—प्रत्यक्षसिद्धस्थूलद्रव्यवादिनः केचिद्वैभाषिकाः ; अन्ये विज्ञानानुमेयस्थूलद्रव्यवादिनः, तेच सौत्रान्तिकाः ; अपरे निरालम्बनविज्ञानमात्रसद्भावं वदन्ति योगाचाराः ; त्रयोऽप्येते स्वाभ्युपगतवस्तुनः क्षणिकत्वं वदन्ति ; अन्ये तु सर्वशून्यवादिनो माध्यमिकाः ; तत्राद्ययोर्बाह्यसद्भावमभ्युपगच्छतोः जगदुत्पत्तिप्रकारः लोकव्यवहारश्च सूपपादः, उत दुरुपपाद इति संशयः;सूपपाद इति पूर्वपक्षः;तथाहि—पार्थिवाप्यतैजसवायवीया गन्धादियुक्ताः परमाणवो हि पृथिव्यादिरूपेण संहता भवन्ति ; भूतेभ्यश्च शरीरेन्द्रियविषयलक्षणसङ्घाताः ; तत्र आन्तरः विज्ञानसन्तानो ग्राहकाभिमानारूढः आत्मत्वेनावतिष्ठते ; एषु क्षणिकेष्वपि स्थिरत्वादिगोचरबुद्ध्याख्याविद्यया सर्वमुपपद्यत इति जगदुत्पत्तिर्लोकव्यवहारश्च युज्यते । राद्धान्तस्तु—क्षणध्वंसिनः परमाणवः कदा संहतौ व्याप्रियन्ते, कदा संहन्यन्ते, संहतौ व्यापृताः तस्मिन्नेव क्षणे विनष्टाश्चेत्—के पुनः संहन्यन्ते, कश्च विज्ञानात्मा कदा कं विषयं स्पृशति, कश्च कदाकं जानाति; कश्च कदा कमर्थमुपादत्ते; स्पष्टा नष्टः,स्पृष्टं च नष्टम् ,वेदिता नष्टः, वेद्यंच नष्टम्; कथमन्येन स्पृष्टमन्यो विजानाति, कथंवाऽन्येन विदितमन्य उपादत्ते, सन्तानैकत्वे सिद्धेऽपि सन्तानिभ्यस्सन्तानस्य परमार्थतः वस्त्वन्तरत्वानभ्युपगमात् ; सन्तानैक्यमपारमार्थिकमकिञ्चित्करम् ; स्थिरत्वाद्यविद्ययापि सङ्घातोत्पत्तिर्न सम्भवति ; नहि शुक्तिकादिषु रजताविद्यया रजताद्युत्पत्तिसम्भवः; विदुषश्च पूर्वस्य नष्टत्वेन उत्तरेणाविदुषा पूर्वविनष्टेन विदुषाऽनुसंहितार्थोपादानं न सम्भवति ; संस्काराश्रयत्वेन चैकोऽर्थः स्थिरो नाभ्युपगम्यते ; अतो जगदुत्पत्तिर्लोकव्यवहारश्च दुरुपपाद एव । सूत्रार्थस्तु—समुदाय उभयहेतुकेऽपि तदप्राप्तिः—उभयहेतुकेऽपि समुदाये समुदायित्वाप्राप्तिः ; परमाणुहेतुकः पृथिव्यादिसमुदायः पृथिव्यादिहेतुकः शरीरेन्द्रियसमुदायः—इत्युभयहेतुकोऽपि समुदायः क्षणिकत्वाभ्युपगमादुक्तेन न्यायेन न सिद्ध्यतीत्यर्थः ॥ १७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इतरेतरप्रत्ययत्वादुपपन्नमितिचेन्न सङ्घातभावानिमित्तत्वात्॥ यद्यपि क्षणिकास्सर्वे भावाः, तथाप्यविद्यादीनामितरेतरहेतुकत्वादुपपन्नं लोकव्यवहारादिकम् : अस्थिरेषु स्थिरत्वबुद्धिरूपया अविद्यया तत्रतत्र रागद्वेषादयो जायन्ते ; इत्येवमादिपरम्परया पुनरप्यविद्येति चक्रवत्परिवर्तत इति चेत्—नैतदुपपद्यते, सङ्घाताभावानिमित्तत्वादविद्यायाः ; यद्यप्यविद्याख्या विपरीतबुद्धिः क्षणिकं स्थिरत्वेन विषयीकरोति, तथापि तन्न वस्तुतः स्थिरं भवतीति वस्तुतस्स्थिरकार्यं न करोति; अतस्सङ्घातभावो न सिध्यतीत्यर्थः; अस्थिरे स्थिरत्वबुद्धियुक्तस्य विज्ञानात्मनस्तदैव नष्टत्वात्कस्य रागद्वेषादयो जायन्त इति रागद्वेषादिपरम्परा च न सिध्यतीत्यभिप्रायः ॥ १८ ॥

इतश्च—

उत्तरोत्पादे च पूर्वनिरोधात् ॥ उत्तरघटक्षणोत्पत्तिवेलायां पूर्वस्य विनष्टत्वादभावस्यैव हेतुत्वेनाविशेषात्सर्वेषां सर्वदोत्पत्तिः प्रसज्यते । पूर्वक्षणवर्तिनो हेतुत्वोपगमेऽपि देशादेर्विशेषकस्य स्थिरस्यैकस्यानभ्युपगमादविशेषेणोत्तरक्षणवर्तिनस्सर्वस्य हेतुस्स्यात् ॥ १९ ॥

असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा ॥ असत उत्पत्तौ प्रतिज्ञाविरोधश्च भवताम्, अधिपतिसहकार्यादीनां विज्ञानोत्पत्तिहेतुत्वप्रतिज्ञानात् । अथैतत्परिजिहीर्षया पूर्वो घटक्षणस्तिष्ठतीत्युच्येत, तदा युगवद्घटक्षणद्वयोपलब्धिप्रसङ्गः ; नचोपलभ्यते ; उपरोधः विरोधः ॥ २० ॥

सतो निरन्वयविनाशोऽपि न सम्भवतीत्याह—

प्रतिसङ्ख्याप्रतिसङ्ख्यानिरोधाप्राप्तिरविच्छेदात् ॥ प्रतिसङ्ख्या प्रतिसङ्ख्यानिरोधाप्राप्तिः स्थूलसूक्ष्मविनाशयोरप्राप्तिरित्यर्थः ; स्थूलविनाशः मुद्गराभिघाताद्यनन्तरभाव्युपलब्धियोग्यः;सूक्ष्मस्तु प्रतिक्षणभाव्युपलब्ध्यनर्हः । तौ निरन्वयौ न भवतः, उत्पत्तिविनाशधर्मभागिनो द्रव्यस्याविच्छेदात्; १"तदनन्यत्वम्" इति सत्कार्यवादस्योपपादितत्वादित्यभिप्रायः । घटादौ कपालादिरूपावस्थया निरन्वयविनाशादर्शनात्प्रदीपनिर्वाणेऽपि सूक्ष्मावस्थाप्राप्तिरित्यविरोधः ॥ २१ ॥

उभयथा च दोषात् ॥ उत्पन्नस्य तुच्छतापत्तौ, तुच्छादुत्पत्तौ च, इत्युभयप्रकारे च दोषापत्तेः ते न सम्भवतः ; उत्पन्नस्य तुच्छतापत्तौ हि पश्चात्तुच्छादुत्पद्यमानं जगत्तुच्छात्मकमेव स्यात् ; मृत्सुवर्णादेरुत्पद्यमानमृत्सु-

१. शारी. २-१-१५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वर्णाद्यात्मकघटमकुटादिवत् ; अतस्तुच्छादुत्पत्तिस्तुच्छतापत्तिश्च न सम्भवतः ॥ २२ ॥

आकाशेचाविशेषात् ॥ आकाशे तुच्छस्वरूपता न सम्भवति, अबाधितप्रतीतिसिद्धपृथिव्यादिवत् आकाशेऽप्यबाधितप्रतीतेरविशेषात् । प्रतीयते ह्याकाशः, 'अत्र श्येनः पतत्यत्रगृध्रः' इति श्येनादेः पतनदेशत्वेन ॥ २३ ॥

अनुस्मृतेश्च ॥ प्रत्यभिज्ञानाच्च न घटादेः क्षणिकत्वम् । 'तदेव इदम्' इति हि प्रत्यभिज्ञायते । (प्रत्यभिज्ञानं हि नाम, अतीतवर्तमानकालवर्त्येकवस्तुविषयमेकं प्रत्यक्षज्ञानम् । तस्य कालद्वयसम्बन्धविशिष्टमेव वस्तु विषयः । न च तदित्यंशस्स्मरणम् , इदमित्यंशश्च ग्रहणम् , अतीतकालसम्बन्धिनीन्द्रियसम्प्रयोगाभावादिति वाच्यम् , तदिदमिति सामानाधिकरण्येन ग्रहणस्यैकत्वस्फुरणात् । पूर्वकालानुभवजनितसंस्कारसहकृतेन्द्रियसम्प्रयोगयुक्तस्य पुरुषस्य तथा ग्रहणमुपपद्यत एव।अन्वयव्यतिरेकाधीनं हि सर्वत्र सामग्रीपरिकल्पनम्) । नच ज्वालादिवत्सादृश्यनिबन्धना प्रत्यभिज्ञेति त्वया वक्तुं शक्यम् , कालद्वयवर्तिनोर्द्वयोस्सादृश्यस्यानुसन्धातुः ज्ञातुरेकस्यानभ्युपगमात् ॥ २४ ॥

विज्ञानानुमेयार्थवादिनं प्रत्याह । स हि ज्ञाने नीलपीतादिविचित्राकारं दृष्ट्वा ज्ञानात्पूर्वक्षणवर्तिनं ज्ञाने स्वाकारं समर्प्य विनष्टमर्थमनुमिनोति । तत्रोत्तरम्—

नासतोऽदृष्टत्वात् ॥ असतो धर्मिणो धर्मस्यान्यत्र सङ्क्रमणं न सम्भवति, कुतः ? अदृष्टत्वात्—न हि धर्मिणि विनष्टे तद्धर्मस्यान्यत्र सङ्क्रमणं क्वचिद्दृष्टम् ॥ २५ ॥

उदासीनानामपि चैवं सिद्धिः ॥ वैभाषिकसौत्रान्तिकयोर्द्वयोरपि साधारणमिदं दूषणम् ; एवं सर्वभावानां क्षणिकत्वाभ्युपगमे सति, उदासीनानां निष्प्रयत्नानामपि ऐहिकामुष्मिकसर्वार्थसिद्धिस्स्यात्, प्रयत्नाद्यनुतिष्ठतस्तदानीमेव विनष्टत्वात्, तत्तत्संस्कारादेरपि कस्यचित् स्थिरस्यानुर्तमानस्यानभ्युपगमाच्च, पश्चादागता सिद्धिरहैतुकीति निष्प्रयत्नानामप्यैहिकामुष्मिकसर्वार्थसिद्धिस्स्यात् ॥२६॥

इति वेदान्तदीपे समुदायाधिकरणम् ॥ ३ ॥

() कुण्डलितग्रन्थः केषुचित्कोशेषु न दृश्यते ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नाभाव उपलब्धेः । २ । २ । २७ ॥

विज्ञानमात्रास्तित्ववादिनो योगाचाराः प्रत्यवतिष्ठन्ते । यदुक्तमर्थवैचित्र्यकृतं ज्ञानवैचित्र्यमिति; तन्नोपपद्यते, अर्थवत् ज्ञानानामेव साकाराणां स्वयमेव विचित्रत्वात् । तच्च स्वरूपवैचित्र्यं वासनावशादेवोपपद्यते । वासना च विलक्षणप्रत्ययप्रवाह एव । यद्घटाकारज्ञानं कपालाकारज्ञानस्योत्पादकम्, तस्य तथाविधस्योत्पादकं तत्पूर्वघटज्ञानम् । तस्य च तथाविधस्योत्पादकं ततःपूर्वघटज्ञानम् इत्येवं रूपः प्रवाह एव वासनेत्युच्यते। कथं बहिष्सर्षपमहीधरादेराकार आन्तरस्य ज्ञानस्येत्युच्यते ? इत्थम्—अर्थस्यापि व्यवहारयोग्यत्वं ज्ञानप्रकाशायत्तम्, अन्यथा स्वपरवेद्ययोरनतिशयप्रसङ्गात्। प्रकाशमानस्य च ज्ञानस्य साकारत्वमवश्याश्रयणीयम्, निराकारस्य प्रकाशायोगात् । एकश्चायमाकार उपलभ्यमानो ज्ञानस्यैव। तस्य च बहिर्वदवभासोऽपि भ्रमकृतः । ज्ञानार्थयोस्सहोपलम्भनियमाच्च ज्ञानादव्यतिरिक्तोऽर्थः। किञ्च बाह्यमर्थमभ्युपयद्भिरपि घटपटादिविज्ञानेषु ज्ञानस्य तत्तदर्थासाधारण्यं तत्तदर्थसारूप्यमन्तरेण नोपपद्यत इत्यवश्यं ज्ञानेऽर्थसरूपं रूपमास्थेयम् । तावतैव सर्वव्यवहारोपपत्तेः तद्व्यतिरिक्तार्थकल्पना निष्प्रामणिका । अतो विज्ञानमात्रमेव तत्त्वम्, न बाह्यार्थोऽस्ति—इति.

एवं प्राप्ते प्रचक्ष्महे—नाभाव उपलब्धेः—इति । ज्ञानातिरिक्तस्यार्थस्याभावो वक्तुं न शक्यते; कुतः?उपलब्धेः—ज्ञातुरात्मनोऽर्थविशेषव्यवहारयोग्यतापादनरूपेण ज्ञानस्योपलब्धेः । एवमेव हि सर्वे लौकिकाः प्रतियन्ति—'घटमहं जानामि' इति । एवंरूपेण सकर्मकेण सकर्तृकेन ज्ञाधात्वर्थेन सर्वलोकसाक्षिकमपरोक्षमवभासमानेनैव ज्ञानमात्रमेव परमार्थ इति साधयन्तस्सर्वलोकोपहासोपकरणं भवन्तीति वेदवादच्छद्मप्रच्छन्नबौद्धनिराकरणे निपुणतरं प्रपञ्चितम् । यत्तु "सहोपलम्भनियमादभेदो नील-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तद्धियोः"इति, तत्स्ववचनविरुद्धम्, साहित्यस्यार्थभेदहेतुकत्वात्। तदर्थव्यवहारयोग्यतैकस्वरूपस्य ज्ञानस्य तेन सहोपलम्भनियमस्तस्मादवैलक्षण्यसाधनमिति च हास्यम्।निरन्वयविनाशिनां ज्ञानानामनुवर्तमानस्थिराकारविरहाद्वासना च दुरुपपादा। विनष्टेन पूर्वज्ञानेनानुत्पन्नमुत्तरज्ञानं कथं वास्यते। अतो ज्ञानवैचित्र्यमप्यर्थवैचित्र्यकृतमेव। तत्तदर्थव्यवहारयोग्यतापादनरूपतया साक्षात्प्रतीयमानस्य ज्ञानस्य तत्तदर्थसम्बन्धायत्तं तत्तदसाधारण्यम्। सम्बन्धश्च संयोगलक्षणः। ज्ञानमपि हि द्रव्यमेव। प्रभाद्रव्यस्य प्रदीपगुणभूतस्येव ज्ञानस्याप्यात्मगुणभूतस्य द्रव्यत्वमविरुद्धमित्युक्तम्। अतो न बाह्यार्थाभावः॥

यत्परैः स्वप्नज्ञानदृष्टान्तेन जागरितज्ञानानामपि निरालम्बनत्वमुक्तम्; तत्राह—

वैधर्म्याच्च न स्वप्नादिवत्। २। २। २८॥

स्वप्नज्ञानवैधर्म्याज्जागरितज्ञानानामर्थशून्यत्वं न युज्यते वक्तुम्। स्वप्नज्ञानानि हि निद्रादिदोषदुष्टकरणजन्यानि, बाधितानि च; जागरितज्ञानानि तु तद्विपरीतानीति तेषां न तत्साम्यम्। सर्वेषांच ज्ञानानामर्थशून्यत्वे भवद्भिस्साध्योऽप्यर्थो न सिध्यति, निरालम्बनानुमानस्याप्यर्थशून्यत्वात्। तस्यार्थवत्त्वे ज्ञानत्वस्यानैकान्त्यात्सुतरामर्थशून्यत्वासिद्धिः॥

न भावोऽनुपलब्धेः। २। २। २९॥

न केवलस्यार्थशून्यस्य ज्ञानस्य भावस्सम्भवति; कुतः? क्वचिदप्यनुपलब्धेः। नह्यकर्तृकस्याकर्मकस्य वा ज्ञानस्य क्वचिदुपलब्धिः। स्वप्नज्ञानादिष्वपि नार्थशून्यत्वमिति ख्यातिनिरूपणे प्रतिपादितम्॥

इति श्रीशारीरकमीमांसाभाष्ये उपलब्ध्यधिकरणम्॥ ४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वेदान्तसारे—नाभाव उपलब्धेः ॥ ज्ञानव्यतिरिक्तार्थाभाववादश्च न सम्भवति; 'घटमहं जानामि' इति कर्तृज्ञानकर्मतयाऽर्थस्य उपलब्धेः न तदभावश्शक्यते वक्तुम् । पुरुषस्यार्थविशेषव्यवहारानुगुण्यापादकत्वमेव ज्ञानस्याकारः ॥ २७ ॥

वैधर्म्याच्च न स्वप्नादिवत् ॥ कारणदोषबाधकप्रत्ययराहित्यरूपवैषम्याच्च न स्वप्नादिवज्जागरितज्ञानस्य मिथ्यात्वम् ॥ २८ ॥

न भावोऽनुपलब्धेः ॥ अर्थशून्यस्य ज्ञानस्य सद्भावो न सम्भवति, अनुपलब्धेः । स्वप्नज्ञानस्याप्यर्थवत्तोपपादयिष्यते ॥ २९ ॥

इति वेदान्तसारे उपलब्ध्यधिकरणम् ॥ ४ ॥

वेदान्तदीपे—नाभाव उपलब्धेः ॥ योगाचाराभिमतः ज्ञानमात्रसद्भाववादः किं समीचीनयुक्तिमूलः, उत नेति संशयः । समीचीनयुक्तिमूल इति पूर्वः पक्षः । बाह्यार्थसद्भाववादिनापि तत्तदर्थाकारज्ञानस्य प्रकाशमानत्वमवश्याश्रयणीयम् । सर्वस्य वस्तुनः प्रकाशमानस्य स्वासाधारणेनाकारेण प्रकाश इष्यते । तत्र घटपटादिज्ञानस्य घटपटाद्याकार एवाकारः । अन्यथा घटाद्यसाधारण्यं च तत्तज्ज्ञानस्य न सम्भवति । एकश्चायमाकार उपलभ्यते । स तु ज्ञानस्यैवेति तद्व्यतिरिक्तार्थसद्भाववादोऽनुपपन्नः । तावतैव 'घटोऽयं ज्ञातः' इति व्यवहारश्चोपपद्यते । तस्य बहिर्वदवभासो निर्मूलत्वाद्विभ्रमकृतः । सिद्धान्तस्तु—'घटमहं जानामि' इति सकर्मकस्य सकर्तृकस्य ज्ञाधात्वर्थस्य च्छेदनादिवत्सर्वलोकसाक्षिकमुपलभ्यमानस्य कर्तृकर्मव्यतिरेकेण केवलस्यैव सद्भावमनुन्मत्तः को ब्रवीति । स्वासाधारणाकारश्च छेदनादिवत्तत्तदर्थव्यवहारयोग्यतापादनाकारेणोपलभ्यते । एवं छेदनादेरप्याकारो द्विधाभावनादिहेतुतयैव कर्तृगतस्योपलभ्यते । नह्यमूर्तानां क्रियादीनां कर्तृकर्मनिरूपणीयस्वाकाराणां कर्माकारत्वमाश्रीयते। सूत्रार्थस्तु—नाभाव उपलब्धेः—ज्ञानव्यतिरिक्तार्थाभावो न शक्यते वक्तुम्, उपलब्धेः—'घटमहं जानामि' इति जानातेः कर्मतया कर्तृतया चोपलब्धेः ॥ २७ ॥

वैधर्म्याच्च न स्वप्नादिवत् ॥ स्वप्नज्ञानादिवच्च जागरितज्ञानानां न मिथ्यार्थत्वम्, तद्वैधर्म्यात् निद्रादिकारणदोषबाधकप्रत्ययरहितत्वादित्यर्थः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चकारात्तान्यपि यथार्थानीत्यभिप्रायः ॥ २८ ॥

न भावोऽनुपलब्धेः ॥ न केवलस्यार्थशून्यस्य ज्ञानस्य भावस्सम्भवति, क्वचिदप्यनुपलब्धेः। अबाधितप्रतीतिसिद्धस्यासद्भावे सति ज्ञानमात्रस्याप्यसद्भावो न शक्यते वारयितुमित्यभिप्रायः ॥ २९ ॥

इति वेदान्तदीपे उपलब्ध्यधिकरणम् ॥ ४ ॥

(श्रीशारीरकमीमांसाभाष्ये सर्वथानुपपत्त्यधिकरणम्॥५॥)

सर्वथानुपपत्तेश्च । २ । २ । ३० ॥

अत्र सर्वशून्यवादी माध्यमिकः प्रत्यवतिष्ठते। शून्यवाद एव हि सुगतमतकाष्ठा। शिष्यबुद्धियोग्यतानुगुण्येनार्थाभ्युपगमादिना क्षणिकत्वादय उक्ताः। विज्ञानं बाह्यार्थाश्च सर्वे न सन्ति, शून्यमेव तत्त्वम् ; अभावापत्तिरेव च मोक्ष इत्येव बुद्धस्याभिप्रायः। तदेव हि युक्तम्;शून्यस्याहेतुसाध्यतया स्वतस्सिद्धेः;सत एव हि हेतुरन्वेषणीयः;तच्च सत् भावादभावाच्च नोत्पद्यते;भावात्तावन्न कस्यचिदुत्पत्तिर्दृष्टा;न हि घटादिरनुपमृदिते पिण्डादिके जायते। नाप्यभावादुत्पत्तिस्सम्भवति, नष्टे पिण्डादिके ह्यभावादुत्पद्यमानं घटादिकमभावात्मकमेव स्यात्। तथा स्वतः परतश्चोत्पत्तिर्न सम्भवति, स्वतः स्वोत्पत्तावात्माश्रयदोषप्रसङ्गात्, प्रयोजनाभावाच्च। परतः परोत्पत्तौ परत्वाविशेषात्सर्वेषां सर्वेभ्य उत्पत्तिप्रसङ्गः। जन्माभावादेव विनाशस्याप्यभावः। अतः शून्यमेव तत्त्वम्। अतो जन्मविनाशसदसदादयो भ्रान्तिमात्रम्। नच निरधिष्ठानभ्रमासम्भवाद्भ्रमाधिष्ठानं किञ्चित्पारमार्थिकं तत्त्वमाश्रयितव्यम्, दोषदोषाश्रयत्वज्ञातृत्वाद्यपारमार्थ्येऽपि भ्रमोपपत्तिवदधिष्ठानापारमार्थ्येऽपि भ्रमोपपत्तेः। अतः शून्यमेव तत्त्वम् ॥

इति प्राप्ते उच्यते—सर्वथानुपपत्तेश्च—इति।सर्वथानुपपत्तेस्सर्वशून्यत्वं च

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भवदभिप्रेतं न सम्भवति। किं भवान् सर्वं सदिति वा प्रतिजानीते, असदिति वा,अन्यथा वा; सर्वथा तवाभिप्रेतं तुच्छत्वं न सम्भवति; लोके भावाभावशब्दयोस्तत्प्रतीत्योश्च विद्यमानस्यैव वस्तुनोऽवस्थाविशेषगोचरत्वस्य प्रतिपादितत्वात्। अतस्सर्वं शून्यमिति प्रतिजानता सर्वं सदिति प्रतिजानतैव सर्वस्य विद्यमानस्यावस्थाविशेषयोगितैव प्रतिज्ञाता भवतीति भवदभिमता तुच्छता न कुतश्चिदपि सिध्यति। किञ्च कुतश्चित्प्रमाणाच्छून्यत्वमुपलभ्य शून्यत्वं सिषाधयिषता तस्य प्रमाणस्य सत्यत्वमभ्युपेत्यम्; तस्यासत्यत्वे सर्वं सत्यं स्यादिति सर्वथा सर्वशून्यत्वं चानुपपन्नम्।

इति श्रीशारीरकमीमांसाभाष्ये सर्वथानुपपत्त्यधिकरणम् ॥ ५ ॥

वेदान्तसारे—सर्वथाऽनुपपत्तेश्च ॥ सर्वशून्यवादश्च न सम्भवति। सदिति प्रतिज्ञायामसदिति प्रतिज्ञायाञ्च तुच्छता न सम्भवति, अनुपपत्तेः, सदसद्बुद्धीनां वस्तुगतान्योन्यविरुद्धभावरूपावस्थाविशेषविषयत्वात् ॥ ३० ॥

इति वेदान्तसारे सर्वथानुपपत्त्यधिकरणम् ॥ ५ ॥

वेदान्तदीपे—सर्वथाऽनुपपत्तेश्च ॥ माध्यमिकोक्तसर्वशून्यवादस्संम्भवति, नेति संशयः। सम्भवतीति पूर्वः पक्षः। विज्ञानं घटादयश्च सर्वे भावा न सन्ति, कुतः? उत्पत्त्यनिरूपणात् घटादिभावानाम्। भावात्तावदुत्पत्तिर्न सम्भवति, नहि घटादिरुत्पद्यमानः असंमृदितेन मृत्पिण्डादिनोत्पद्यते। नाप्यभावात्, पश्चादभावादुत्पद्यमानो घटादिरभावात्मकएव स्यादिति सर्वशून्यत्वमेव युक्तिमत्। राद्धान्तस्तु—लोके भावाभावशब्दयोस्तद्बुद्ध्योश्च प्रमाणेनोपलभ्यमानस्यैव वस्तुनः अवस्थाविशेष एव भावरूपो विषयः। वर्तमानतयोपलभ्यमानावस्थाविशेषो भावबुद्धिविषयः। तद्विरोध्यवस्थाविशेषः अभावबुद्धिविषयः। अतो न कुतश्चित्त्वदभिप्रेतं तुच्छत्वं सिद्ध्यति। सूत्रार्थस्तु—सर्वथानुपपत्तेश्च—सर्वशून्यवादी सर्वं सदिति प्रतिज्ञाय स्वाभिप्रेतं साधयति,उतासदिति प्रति-

*14

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ज्ञाय; अथ प्रकारान्तरेण प्रतिज्ञाय। सर्वथापि सर्वशून्यत्वानुपपत्तेस्स्वाभिमतासिद्धिः, सदसद्भावयोर्विद्यमानवस्तुधर्मतोपपादनात् ॥ ३० ॥

इति वेदान्तदीपे सर्वथानुपपत्त्यधिकरणम् ॥ ५ ॥

(श्रीशारीरकमीमांसाभाष्ये एकस्मिन्नसम्भवाधिकरणम् ॥)

नैकस्मिन्न सम्भवात् । २। २। ३१॥

निरस्तास्सौगताः। जैना अपि परमाणुकारणत्वादिकं जगतो वदन्तीत्यनन्तरं जैनपक्षः प्रतिक्षिप्यते। ते किल मन्यन्ते—जीवाजीवात्मकं जगदेतन्निरीश्वरम् ; तच्च षड्द्रव्यात्मकम्। तानि च द्रव्याणि जीवधर्माधर्मपुद्गलकालाकाशाख्यानि। तत्र जीवाः—बद्धाः, योगसिद्धाः, मुक्ताश्चेति त्रिविधाः। धर्मो नाम गतिमतां गतिहेतुभूतो द्रव्यविशेषो जगद्व्यापी। अधर्मश्च स्थितिहेतुभूतो व्यापी। पुद्गलो नाम वर्णगन्धरसस्पर्शवद्द्रव्यम्। तच्च द्विविधम्—परमाणुरूपम्, तत्सङ्घातरूपं च पवनज्वलनसलिलधरणीतनुभुवनादिकम्। कालस्तु अभूदस्तिभविष्यतीति व्यवहारहेतुरणुरूपो द्रव्यविशेषः। आकाशोऽप्येकोऽनन्तप्रदेशश्च। तेषु चाणु[1]व्यतिरिक्तद्रव्याणि पञ्चास्तिकाया इति च संगृह्यन्ते—जीवास्तिकायः, धर्मास्तिकायः, अधर्मास्तिकायः, पुद्गलास्तिकायः, आकाशास्तिकायः—इति। अनेकदेशवर्तीनि द्रव्येऽस्तिकाय[2]शब्दः प्रयुज्यते। जीवानां मोक्षोपयोगिनमपरमपि सङ्ग्रहं कुर्वन्ति—जीवाजीवास्रवबन्धनिर्जरसंवरमोक्षाः—इति। मोक्षसङ्ग्रहेण मोक्षोपायश्च गृहीतः। स च सम्यग्ज्ञानदर्शनचारित्ररूपः। तत्र जीवस्तु—ज्ञानदर्शनसुखवीर्यगुणः। अजीवश्च जीवभोग्यवस्तुजातम्। आस्रवः तद्भोगोपकरणभूतमिन्द्रियादिकम्। बन्ध-

१. व्यतिरिक्तानि द्रव्याणि. पा॥—२. शब्दः। जीवानां. पा ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्चाष्टविधः—घातिकर्मचतुष्टयमघातिकर्मचतुष्टयं चेति । तत्राद्यं जीवगुणानां स्वाभाविकानां ज्ञानदर्शनवीर्यसुखानां प्रतिघातकरम् । अपरं शरीरसंस्थानतदभिमानतत्स्थितितत्प्रयुक्तसुखदुःखोपेक्षाहेतुभूतम्। निर्जरं मोक्षसाधनमर्हदुपदेशावगतं तपः । संवरो नामेन्द्रियनिरोधः समाधिरूपः । मोक्षस्तु निवृत्तरागादिक्लेशस्य स्वाभाविकात्मस्वरूपाविर्भावः । पृथिव्यादिहेतुभूताश्चाणवो वैशेषिकादीनामिव न चतुर्विधाः । अपित्वेकस्वभावाः । पृथिव्यादिभेदस्तु परिणामकृतः । सर्वं च वस्तुजातं सत्त्वासत्त्वनित्यत्वानित्यत्वभिन्नत्वाभिन्नत्वादिभिरनैकान्तिकमिच्छन्ति— स्यादस्ति,स्यान्नास्ति,स्यादस्तिचनास्तिच,स्यादवक्तव्यम्, स्यादस्तिचावक्तव्यं च, स्यान्नास्तिचावक्तव्यंच, स्यादस्तिच नास्तिचावक्तव्यं चेति सर्वत्र सप्तभङ्गीनयावतारात् । सर्वं वस्तुजातं द्रव्यपर्यायात्मकमिति द्रव्यात्मना सत्त्वैकत्व[1]नित्यत्वाद्युपपादयन्तिः पर्यायात्मना च तद्विपरीतम् । पर्यायाश्च द्रव्यस्यावस्थाविशेषाः । तेषां च भावाभावरूपत्वात्सत्त्वासत्त्वादिकं सर्वमुपपन्नम्—इति ॥

अत्राभिधीयते—नैकस्मिन्नसम्भवात्—इति। नैतदुपपद्यते; कुतः ? एकस्मिन्नसम्भवात्—एकस्मिन्वस्तुनि अस्तित्वनास्तित्वादेर्विरुद्धस्य च्छायातपवद्युगपदसम्भवात्। एतदुक्तं भवति—द्रव्यस्य तद्विशेषणभूतपर्यायशब्दाभिधेयावस्थाविशेषस्य च पृथक्पदार्थत्वान्नैकस्मिन्विरुद्धधर्म[2]समावेशस्सम्भवति—इति । तथाहि—एकेनास्तित्वादिनाऽवस्थाविशेषेण विशिष्टस्य तदानीमेव न तद्विपरीतनास्तित्वादिविशिष्टत्वं सम्भवति । उत्पत्तिविनाशाख्यपरिणामविशेषास्पदत्वं च द्रव्यस्यानित्यत्वम् , तद्विपरीतं च नित्यत्वं तस्मिन् कथं समवैतिः विरोधिधर्माश्रयत्वं च भिन्नत्वम्,तद्विपरीतंचाभिन्नत्वं कथं वा तस्मिन् समवैति ? ; यथाऽश्वत्वमहिषत्वयो

१. नित्यत्वान्युपपदायन्ति. पा ॥—२. समावेशसम्भवश्चति. पा ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

युगपदेकस्मिन्नसम्भवः। अयमर्थः पूर्वमेव भेदाभेदवादिनिरसनसमये "तत्तु समन्वयात्"इत्यत्र प्रपञ्चितः। कालस्य पदार्थविशेषणतयैव प्रतीतेस्तस्य पृथगस्तित्वनास्तित्वादयो न वक्तव्याः; न च परिहर्तव्याः। कालोऽस्ति नास्तीति व्यवहारो व्यवहर्तृणां जात्याद्यस्तित्वनास्तित्वव्यवहारतुल्यः। जात्यादयो हि द्रव्यविशेषणतयैव प्रतीयन्त इति पूर्वमेवोक्तम्। कथं पुनरेकमेव ब्रह्म सर्वात्मकमिति श्रोत्रियैरुच्यते?; सर्वचेतनाचेतनशरीरत्वात्सर्वज्ञस्य सर्वशक्तेस्सत्यसङ्कल्पस्य पुरुषोत्तमस्येत्युक्तम्। शरीरशरीरिणोस्तद्धर्माणाञ्चात्यन्तवैलक्षण्यमप्युक्तम्। किञ्च जीवादीनां षण्णां द्रव्याणामेकद्रव्यपर्यायत्वाभावात्तेषु द्रव्यैकत्वेन पर्यायात्मना चैकत्वानेकत्वादयो दुरुपपादाः। अथोच्येत–षडेतानि द्रव्याणि स्वकीयैः पर्यायैः स्वेनस्वेनचात्मना तथा भवन्ति–इति। एवमपि सर्वमनैकान्तिकमित्यभ्युपगमविरोधः, अन्योन्यतादात्म्याभावात्। अतो न युक्तमिदं जैनमतम्। ईश्वरानधिष्ठितपरमाणुकारणवादे पूर्वोक्तदोषास्तथैवावतिष्ठन्ते॥

एव चात्माकात्स्न्यम्। २। २। ३२॥

एवं भवदभ्युपगमे सति आत्मनश्चाकात्स्न्यं प्रसज्यते। जीवोऽसङ्ख्यातप्रदेशो देहपरिमाण इति हि भवतां स्थितिः। तत्र हस्त्यादिशरीरेऽवस्थितस्यात्मनस्ततो न्यूनपरिमाणे पिपीलिकादिशरीरे प्रविशतोऽल्पदेशव्यापित्वेनाकात्स्न्यं प्रसज्यते–अपरिपूर्णता प्रसज्यत इत्यर्थः॥ ३२॥

अथ सङ्कोचविकासधर्मतया आत्मनः पर्यायशब्दाभिधेयावस्थान्तरापत्त्या विरोधः परिहियत इत्युच्यते; तत्राह—

न च पर्यायादप्यविरोधो विकारादिभ्यः।२।२।३३॥

न च सङ्कोचविकासरूपावस्थन्तरापत्त्या विरोधः परिहर्तुं शक्यते,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विकारतत्प्रयुक्तानित्यत्वादिदोषप्रसक्तेर्घटादितुल्यत्वप्रसङ्गात् ॥ ३३ ॥

अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषः।२।२।३४॥

जीवस्य यदन्त्यं परिमाणं मोक्षावस्थागतम्, तस्य पश्चादेहान्तरपरिग्रहाभावादवस्थितत्वादात्मनश्च मोक्षावस्थस्य तत्परिमाणस्य चोभयोर्नित्यत्वात्तदेव आत्मनः स्वाभाविकं परिमाणमिति पूर्वमपि तस्मादविशेषः स्यात्। अतो देहपरिमाणत्वमात्मनो न स्यादित्यसङ्गतमेवेदमार्हतमतम् ॥ ३४ ॥

इति श्रीशारीरकमीमांसाभाष्ये एकस्मिन्नसम्भवाधिकरणम् ॥ ६ ॥

वेदान्तसारे—नैकस्मिन्नसम्भवात्॥ अर्हतो मतं न युक्तिमत्, एकस्मिन् वस्तुनि युगपत् सत्त्वासत्त्वनित्यत्वानित्यत्वभेदाभेदानाम् असम्भवात्। पर्यायरूपाश्च द्रव्यस्यास्तित्वादिशब्दबुद्धिविषयाः परस्परविरुद्धपिण्डत्वघटत्वकपालत्वाद्यवस्थाः युगपन्न सम्भवन्ति; तथा घटत्वशरावत्वावस्थाश्च पृथिव्यादेः प्रदेशभेदेन, तथाच द्रव्यस्यानित्यत्वमुत्पत्तिविनाशयोगित्वम्, तद्विपरीतं नित्यत्वं नैकस्मिन् समवैति ॥ ३१ ॥

एवं चात्माकार्त्स्न्यम् ॥ आत्मनश्शरीरपरिमाणत्वे बृहतश्शरीराद्ल्पीयसि प्रविशतः अकार्त्स्न्यं विकलत्वं प्रसज्येत ॥ ३२ ॥

न च पर्यायादप्यविरोधो विकारादिभ्यः ॥ तथा सङ्कोचविकासावस्थायोगादपि नाविरोधः, घटादिवद्विकारादियोगप्रसक्तेः ॥ ३३ ॥

अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषः ॥ अन्त्यस्य मोक्षावस्थापरिमाणस्य एकरूपावस्थितेः तस्य स्वाभाविकत्वेनात्मतत्परिमाणयोरुभयोर्नित्यत्वेन पूर्वत्रापि न विशेषः, विविधदेहपरिमाणत्वे वैकल्यं स्यादेव ॥ ३४ ॥

इति वेदान्तसारे एकस्मिन्नसम्भवाधिकरणम् ॥ ६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वेदान्तदीपे—नैकस्मिन्नसम्भवात् ॥ जैनमतं युक्तिमत्, उत नेति संशयः ; युक्तिमदिति पूर्वः पक्षः; जीवाजीवशब्दाभिलपनीयभोक्तृ[१]भोग्यात्मकं जगत् सत्त्वासत्त्वनित्यत्वानित्यत्वभिन्नत्वाभिन्नत्वैरनैकान्तिकम्; षड्द्रव्यतत्पर्यायात्मनावस्थितत्वात् कृत्स्नस्य जगतो द्रव्यात्मना सत्त्वैकत्वनित्यत्वानि उपपन्नानि ; पर्यायात्मना च विपरीतानि ; पर्यायाश्च—घटत्वपटत्वाद्यवस्थाविशेषाः ; द्रव्यस्वरूपस्यैकत्वात् स्थिरत्वात् सद्बुद्धिबोद्धव्यत्वात् तेन रूपेणैकत्वादि युक्तम् ; पर्यायशब्दाभिधेयावस्थाविशेषाणामनेकत्वादस्थिरत्वादसद्बुद्धिबोध्यत्वात्तेन रूपेणासत्त्वानित्यत्वनानात्वानि युक्तानि ; प्रतीतिव्यवस्थाप्यत्वात् सर्वस्य वस्तुन उभयाकारप्रतीतेरुभयमुपपन्नम् । राद्धान्तस्तु—एकस्यास्तित्वनास्तित्वादिभिरनैकान्तिकत्वमयुक्तम्, एकस्मिन्वस्तुन्यस्तित्वनास्तित्वादेः विरुद्धस्य च्छायातपवद्युगपदसम्भवात् । तथाहि द्रव्यस्य तद्विशेषणभूतपर्यायस्य इत्थंशब्दाभिधेयावस्थाविशेषस्य च "इदमित्थम्" इति प्रतीतेः प्रकारप्रकारितया पृथक्पदार्थत्वान्नैकस्मिन्विरुद्धप्रकारभूतसत्त्वासत्त्वरूपधर्मसमावेशो युगपत्सम्भवति । उत्पत्तिविनाशाख्यपरिणामविशेषास्पदत्वं च द्रव्यस्यानित्यत्वम् ; तद्विपरीतं नित्यत्वं तस्मिन्कथं समवैति । विरोधिधर्माश्रयत्वं च भिन्नत्वम्, तद्विपरीतं चाभिन्नत्वं कथं वा तस्मिन्समवैति ; यथा अश्वत्वमहिषत्वयोः युगपदेकस्मिन्नसम्भवः । (एकस्य पृथिवीद्रव्यस्य घटत्वं शरावत्वं च प्रदेशभेदेन; न त्वेकेन प्रदेशेनोभयाश्रयत्वम् ; यथैकस्य देवदत्तस्योत्पत्तिविनाशयोगित्वं कालभेदेन । नह्येतावता वस्तुनो द्व्यात्मकत्वम्, अपि तु परिणामशक्तियोगमात्रम्) अतः न युक्तिमत् जैनमतम् । सूत्रार्थस्तु—नैकस्मिन्नसम्भवात्—न जैनमतं युक्तम्, कुतः? एकस्मिन्वस्तुन्युक्तरीत्या युगपद्विरुद्धधर्मसमावेशासम्भवात् । अतस्सूत्रविरुद्धं वेदान्तवादिभिरपि भेदाभेदसमाश्रयणम् ॥ ३१ ॥

एवं चात्माकात्स्न्यम् ॥ एवमात्माकात्स्न्यञ्चानुपपन्नम् ; शरीरपरिमाणत्वे ह्यात्मनो बृहतश्शरीरादल्पीयसि शरीरे प्रविशतः अकात्स्न्यम् अपरिपूर्णत्वं प्रसज्यते । तदानीमल्पपरिमाणत्वात् ॥ ३२ ॥

न च पर्यायादप्यविरोधो विकारादिभ्यः ॥ तथाविधाल्पत्वावस्थायोगेनाप्यविरोधो न सम्भवति । घटपटादेरिव विकारतत्प्रयुक्तदोषास्पदत्वप्रसङ्गात् ॥ ३३ ॥

अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषः ॥ जीवस्य यदन्त्यं परि-

१. भोग्यात्मकस्य जगतः सत्त्वा...भिन्नत्वैरनैकान्त्यम्, पा ॥ ()कुण्डलितग्रन्थः क्वचिन्न दृश्यते ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

माणं मोक्षावस्थम्,तस्य पश्चादेकरूपेणावस्थितेस्तदेव स्वाभाविकं परिमाणमिति, आत्मनश्च तत्परिमाणस्य चोभयोर्नित्यत्वात्पूर्वमपि न शरीरपरिमाणत्वसिद्धिरिति पूर्वावस्थायां न विशेषः; अतः असङ्गतमेवेदञ्चैनमतम् ॥ ३४ ॥

इति वेदान्तदीपे एकस्मिन्नसम्भवाधिकरणम् ॥ ६ ॥

श्रीशारीरकमीमांसाभाष्ये पशुपत्यधिकरणम् ॥ ७ ॥

पत्युरसामञ्जस्यात् । २। २। ३५॥

कपिलकणादसुगतार्हतमतानामसामञ्जस्यात् वेदबाह्यत्वाच्च निश्श्रेयसार्थिभिरनादरणीयत्वमुक्तम् ; इदानीं पशुपतिमतस्य वेदविरोधादसामञ्जस्याच्च अनादरणीयतोच्यते। तन्मतानुसारिणश्चतुर्विधाः—[1]कापालाः,कालामुखाः, पाशुपताः, शैवाश्च—इति । सर्वेचैते वेदविरुद्धां तत्त्वप्रक्रियाम् ऐहिकामुष्मिकनिश्श्रेयससाधनकल्पनाश्च कल्पयन्ति । निमित्तोपादानयोर्भेदं, निमित्तकारणं च पशुपतिमाचक्षते। तथा निश्श्रेयससाधनमपि मुद्रिकाषट्कधारणादिकम्।यथाहुः कापालाः-[2]"मुद्रिकाषट्कतत्त्वज्ञः परमुद्राविशारदः। भगासनस्थमात्मानं ध्यात्वा निर्वाणमृच्छति॥[3]कण्ठिका रुचकं चैव कुण्डलं च शिखामणिः । भस्म यज्ञोपवीतं च मुद्राषट्कं प्रचक्षते ॥ आभिर्मुद्रितदेहस्तु नभूय इह जायते" इत्यादिकम्। तथा कालामुखा अपि कपालपात्रभोजनशवभस्मस्नानतत्प्राशनलगुडधारणसुराकुम्भस्थापनतदाधारदेवपूजादिकमैहिकामुष्मिकसकलफलसाधनमभिदधति ।[2]"रुद्राक्षकङ्कणं हस्ते जटा चैका च मस्तके । कपालं भस्मना स्नानम्" इत्यादि च प्रसिद्धं शैवागमेषु। तथा केनचित्क्रियाविशेषेण विजातीयानामपि ब्राह्मण्यप्राप्तिमुत्तमाश्रमप्राप्तिं चाहुः—[2]" दीक्षाप्रवेशमात्रेण ब्राह्मणो भवति क्षणात् । कापालं व्रतमास्थाय यतिर्भवति मानवः " इति ॥

---

१. कापालिकाः. पा ॥ २. शैवागमे ॥ ३. कर्णिका. पा ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

(सिद्धान्तः)

तत्रेदमुच्यते—पत्युरसामञ्जस्यात्—इति। "नैकस्मिन्नसम्भवात्" इत्यतो 'न' इत्यनुवर्तते। पत्युः—पशुपतेः, मतं नादरणीयम्; कुतः? असामञ्जस्यात्। असामञ्जस्यं च अन्योन्यव्याघातात् वेदविरोधाच्च। मुद्रिकाषट्कधारणभगासनस्थात्मध्यानसुराकुम्भस्थापनतत्स्थदेवतार्चनगूढाचारश्मशानभस्मस्नानप्रणवपूर्वाभिध्यानान्यन्योन्यविरुद्धानि। वेदविरुद्धंचेदं तत्त्वपरिकल्पनमुपासनमाचारश्च। वेदाः खलु परं ब्रह्म नारायणमेव जगन्निमित्तमुपादानंच वदन्ति—[१]"नारायण परं ब्रह्म तत्त्वं नारायणः परः। नारायण परो ज्योतिरात्मा नारायणः परः" [२]"तदैक्षत बहु स्यां प्रजायेयेति" [३]"सोऽकामयत बहु स्यां प्रजायेयेति" [४]"तदात्मानं स्वयमकुरुत" इत्यादयः। परब्रह्मभूतपरमपुरुषवेदनमेव च मोक्षसाधनमुपासनं वदन्ति—[५]"वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसस्तु पारे" [५]"तमेवं विद्वानमृत इह भवति। नान्यः पन्था अयनाय विद्यते" इत्यादिना एकतां गतास्सर्वे वेदान्ताः, तदितिकर्तव्यताभूतं कर्म च वेदविहितवर्णाश्रमसम्बन्धि यज्ञादिकमेव वदन्ति—[६]"तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन" [६]"एतमेव लोकमिच्छन्तः प्रव्राजिनः प्रव्रजन्ति" इत्यादयः। केवलपरतत्त्वप्रतिपादनपरनारायणानुवाकसिद्धतत्त्वपराः केषुचिदुपासनादिविधिपरेषु वाक्येषु श्रुताः प्रजापतिशिवेन्द्राकाशप्राणादिशब्दा इति [७]"शास्त्रदृष्ट्या तूपदेशो वामदेववत्"इत्यत्र प्रतिपादितम्। तथा [८]"एको हवै नारायण आसीन्न ब्रह्मा नेशानः" इत्यारभ्य [८]"स एकाकी न रमेत" इति सृष्टिवाक्योदितं स्रष्टारं नारायणमेव समानप्रकरणस्थाः [९]"सदेव सोम्येदमग्रे" इत्यादिषु साधारणाः सद्ब्रह्मात्मादिशब्दाः प्रतिपादयन्तीति[१०]"जन्माद्य-

१. तै. नारा. १३ ॥—२. छा. ६-२-३ ॥—३. तै. आन. ६. अनु. २ ॥—४. तै. आन. ७ ॥—५. पुरुषसू ॥—६ बृ. ६-४-२२ ॥—७. शारी. १-१-३१ ॥—८. महोप. १-१ ॥—९. छा. ६-२-१ ॥—१०. शारी. १-१-२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्य यतः" इत्यत्र प्रतिपादितम्। अतो वेदविरुद्धतत्त्वोपासनानुष्ठानाभिधानात्पशुपतिमतमनादरणीयमेव ॥ ३५ ॥

अधिष्ठानानुपपत्तेश्च । २। २। ३६॥

वेदबाह्यानामनुमानाद्धि केवलनिमित्तेश्वरकल्पना; तथा सति दृष्टानुसारेण कुलालादिवदधिष्ठानं कर्तव्यम्; न च कुलालादेर्मृदाद्यधिष्ठानवत्पशुपतेर्निमित्तभूतस्य प्रधानाधिष्ठानमुपपद्यते, अशरीरत्वात्; सशरीराणामेव हि कुलालादीनामधिष्ठानशक्तिर्दृष्टा; नचेश्वरस्य सशरीरत्वमभ्युपगन्तव्यम्, तच्छरीरस्य सावयवस्य नित्यत्वे अनित्यत्वे च [1]"शास्त्रयोनित्वात्" इत्यत्र दोषस्योक्तत्वात् ॥ ३६ ॥

करणवच्चेन्न भोगादिभ्यः । २। २। ३७॥

यथा भोक्तुर्जीवस्य करणकलेबराद्यधिष्ठानमशरीरस्यैव दृश्यते; तद्वन्महेश्वरस्याप्यशरीरस्यच प्रधानाधिष्ठानमुपपद्यत इति चेत्—न, भोगादिभ्यः पुण्यपापरूपकर्मफलभोगार्थं पुण्यपापरूपादृष्टकारितं हि तदधिष्ठानम्; तद्वत्पशुपतेरपि पुण्यपापरूपादृष्टवत्तया तत्फलभोगादि सर्वं प्रसज्येत; अतो नाधिष्ठानसम्भवः ॥ ३७ ॥

अन्तवत्त्वमसर्वज्ञता वा । २ । २ । ३८॥

वाशब्दश्चार्थे; पशुपतेः पुण्यापुण्यरूपादृष्टवत्त्वे जीववदन्तवत्त्वं सृष्टिसंहाराद्यास्पदत्वमसर्वज्ञताच स्यादित्यनादरणीयमेवेदं मतम्, [2]"विरोधे त्वनपेक्षं स्यात्" इत्यादिना वेदविरुद्धस्यानादरणीयत्वे सिद्धेऽपि पशुपतिमतस्य वेदविरुद्धताख्यापनार्थं "पत्युरसामञ्जस्यात्" इति पुनरारम्भः। यद्यपि पाशुपतशैवयोर्वेदाविरोधिन इव केचन धर्माः प्रतीय-

१. शारी. १-१-३ ॥ २. पू. मी. १-१-३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न्तेः तथापि वेदविरुद्धनिमित्तोपादानभेदकल्पनापरावरतत्त्वव्यत्ययकल्पनामूलत्वात् सर्वमसमञ्जसमेवेति 'असामञ्जस्यात्' इत्युक्तम् ॥ ३८ ॥

इति श्रीशारीरकमीमांसाभाष्ये पशुपत्यधिकरणम् ॥ ७ ॥

वेदान्तसारे—पत्युरसामञ्जस्यात् ॥ नेति वर्तते, पशुपतेर्मतमनादरणीयम्, वेदविरुद्धनिमित्तोपादानभेदतद्विरुद्धाचारपरत्वेन असामञ्जस्यात् ॥

अधिष्ठानानुपपत्तेश्च ॥ अनुमेयेश्वराभ्युपगमेन हि केवलाधिष्ठातृत्वमुच्यते ; तथासति अशरीरस्य प्रधानाधिष्ठानानुपपत्तेः, सशरीरत्वे तु शरीरोत्पत्त्यनिरूपणात् सावयवस्य तस्य नित्यत्वे महीमहीधरादीनामपि नित्यत्वाविरोधाच्च ॥ ३६ ॥

करणवच्चेन्न भोगादिभ्यः ॥ करणकलेबराद्यधिष्ठानवदशरीरस्यैवाधिष्ठानमितिचेत्—न, पुण्यपापनिमित्तत्वात्तस्य तत्फलभोगादिप्रसक्तेः ॥ ३७ ॥

अन्तवत्त्वमसर्वज्ञता वा ॥ तथा सति क्षेत्रज्ञवत् अन्तवत्त्वमसर्वज्ञता च ॥ ३८ ॥

इति वेदान्तसारे पशुपत्यधिकरणम् ॥ ७ ॥

वेदान्तदीपे—पत्युरसामञ्जस्यात् ॥ पशुपतिमतं निःश्रेयसार्थिभिरादरणीयम्, उत नेतिसंशयः । आदरणीयमिति पूर्वः पक्षः । परमपुरुषार्थसाधनावबोधित्वेन निखिलवस्तुसाक्षात्कारसमर्थपशुपतिप्रणीतत्वात् । राद्धान्तस्तु — अनादिनिधनाविच्छिन्नपाठसम्प्रदायनिरस्तप्रमादादिनिखिलदोषगन्धवेदसिद्धपरावरतत्त्वव्यत्ययप्रतिपादनात्, निमित्तोपादानभेदाभिधानात्, सुराकुम्भस्थापनतत्स्थदेवतार्चनमुद्रिकाषट्कविज्ञानतद्धारणादिवेदविरुद्धाचारप्रतिपादनपरत्वाच्च, असामञ्जस्यात् अनादरणीयमिति । सूत्रार्थस्तु—पत्युरसामञ्जस्यात् 'नैकस्मिन्नसम्भवात्' इत्यतो नेत्यनुवर्तते । पत्युः पशुपतेः, मतम् अनादरणीयम् । कुतः? वेदविरुद्धतत्त्वाचारावबोधित्वेन असामञ्जस्यात् ॥

अधिष्ठानानुपपत्तेश्च ॥ अनुमेयेश्वराभ्युपगमेनहि प्रधानस्याधिष्ठानमीश्वरस्योच्यते। सशरीरस्यैव कुलालादेरधिष्ठानदर्शनात् अशरीरस्येश्वरस्य प्र-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

धानाधिष्ठानानुपपत्तेश्चासामञ्जस्यम्। सशरीरत्वाभ्युपगमेऽपि तच्छरीरस्य सावयवस्य नित्यत्वे अनित्यत्वे च दोषः पूर्वोक्त इत्यभिप्रायः ॥ ३६ ॥

करणवच्चेन्न भोगादिभ्यः ॥ क्षेत्रज्ञस्य स्वकरणकलेबराद्यधिष्ठानवदुपपद्यत इति चेत् —न, पुण्यापुण्यरूपकर्मनिमित्तत्वात् क्षेत्रज्ञाधिष्ठानस्य; ईश्वरस्यापि तद्वत्तया तत्फलभोगादिनिखिलतत्स्वभावप्रसक्तेः ॥ ३७ ॥

अन्तवत्त्वमसर्वज्ञता वा ॥ वाशब्दश्चार्थे ; पुण्यापुण्यवत्त्वे त्वन्तवत्त्वं सृष्टिसंहारास्पदत्वमसर्वज्ञताच्च प्रसज्यत इत्यसमञ्जसमेवेदम् ॥ ३८ ॥

इति वेदान्तदीपे पशुपत्यधिकरणम् ॥ ७ ॥

(श्रीशारीरकमीमांसाभाष्ये उत्पत्त्यसम्भवाधिकरणम्॥८॥)

उत्पत्त्यसम्भवात् । २ । २ । ३९ ॥

कपिलादितन्त्रसामान्याद्भगवदभिहितपरमनिःश्रेयससाधनावबोधिनि पञ्चरात्रतन्त्रेऽप्यप्रामाण्यमाशङ्क्य निराक्रियते ; तत्रैवमाशङ्कते [१]"परमकारणात्परब्रह्मभूताद्वासुदेवात्सङ्कर्षणो नाम जीवो जायते सङ्कर्षणात्प्रद्युम्नसंज्ञं मनो जायते तस्मादनिरुद्धसंज्ञोऽहङ्कारो जायते" इति हि भागवतप्रक्रिया। अत्र जीवस्योत्पत्तिः श्रुतिविरुद्धा प्रतीयते; श्रुतयो हि जीवस्यानादित्वं वदन्ति [२]"न जायते म्रियते वा विपश्चित्" इत्याद्याः ॥ ३९ ॥

न च कर्तुः करणम् । २ । २ । ४० ॥

[१]"सङ्कर्षणात्प्रद्युम्नसंज्ञं मनो जायते" इति कर्तुः जीवात्, करणस्य मनस उत्पत्तिर्न सम्भवति, [३]"एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि च" इति परस्मादेव ब्रह्मणो मनसोऽप्युत्पत्तिश्रुतेः । अतः श्रुतिविरुद्धार्थप्रतिपादनादस्यापि तन्त्रस्य प्रामाण्यं प्रतिषिद्ध्यत इति ॥ ४० ॥

---

१. परमसंहिता. २. कठ. २-१८ ॥ ३. मु. २-१-३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एवं प्राप्ते प्रचक्ष्महे—

विज्ञानादिभावे वा तदप्रतिषेधः । २ । २ । ४१ ॥

वाशब्दात्पक्षो विपरिवर्तते; विज्ञानं चादिचेति परब्रह्म विज्ञानादि। सङ्कर्षणप्रद्युम्नानिरुद्धानामपि परब्रह्मभावे सति तत्प्रतिपादनपरस्य शास्त्रस्य प्रामाण्यं न प्रतिषिध्यते। एतदुक्तं भवति—भागवतप्रक्रियामाजनतामिदं चोद्यं—यज्जीवोत्पत्तिर्विरुद्धाऽभिहिता—इति। वासुदेवाख्यं परं ब्रह्मैवाश्रितवत्सलं स्वाश्रितसमाश्रयणीयत्वाय स्वेच्छया चतुर्धाऽवतिष्ठत इति हि तत्प्रक्रिया। यथा पौष्करसंहितायां [१]"कर्तव्यत्वेन वै यत्र चातुरात्म्यमुपास्यते। क्रमागतैस्स्वसंज्ञाभिः ब्राह्मणैरागमं तु तत्" इत्यादि। तच्च चातुरात्म्योपासनं वासुदेवाख्यपरब्रह्मोपासनमिति सात्त्वतसंहितायामुक्तं [२]" ब्राह्मणानां हि सद्ब्रह्मवासुदेवाख्ययाजिनाम्। विवेकदं परं शास्त्रं ब्रह्मोपनिषदं महत्" इति। तद्धि वासुदेवाख्यं परं ब्रह्म सम्पूर्णषाड्गुण्यवपुः सूक्ष्मव्यूहविभवभेदभिन्नं यथाधिकारं भक्तैः ज्ञानपूर्वेण कर्मणा अभ्यर्चितं सम्यक्प्राप्यते। विभवार्चनाद्व्यूहं प्राप्य व्यूहार्चनात्परं ब्रह्म वासुदेवाख्यं सूक्ष्मं प्राप्यत इति वदन्ति। विभवो हि नाम रामकृष्णादिप्रादुर्भावगणः। व्यूहो वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धरूपश्चतुर्व्यूहः। सूक्ष्मं तु केवलषाड्गुण्यविग्रहं वासुदेवाख्यं परब्रह्म।यथा पौष्करे [१]"यस्मात्सम्यक्परं ब्रह्म वासुदेवाख्यमव्ययम्। अस्मादवाप्यते शास्त्रात् ज्ञानपूर्वेण कर्मणा" इत्यादि। अतस्सङ्कर्षणादीनामपि परस्यैव ब्रह्मणः स्वेच्छाविग्रहरूपत्वात् [३]"अजायमानो बहुधा विजायते" इति श्रुतिसिद्धस्यैवाश्रितवात्सल्यनिमित्तस्वेच्छाविग्रहसङ्ग्रहरूपजन्मनोऽभिधानात्तदभिधायिशास्त्रप्रामाण्यस्याप्रतिषेधः—इति। तत्र जीवमनोहङ्कारतत्त्वानामधिष्ठातारः

१. पौष्करसंहिता. २. सात्त्वतसंहिता. ३. पुरुषसू.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सङ्कर्षणप्रद्युम्नानिरुद्धा इति तेषामेव जीवादिशब्दैरभिधानमविरुद्धम् ; यथा आकाशप्राणादिशब्दैः ब्रह्मणोऽभिधानम् ॥ ४१ ॥

विप्रतिषेधाच्च । २ । २ । ४२ ॥

विप्रतिषिद्धा हि जीवोत्पत्तिस्तस्मिन्नपि तन्त्रे ; यथोक्तं परमसंहितायाम् [१]"अचेतना परार्था च नित्या सततविक्रिया। त्रिगुणा कर्मिणां क्षेत्रं प्रकृतेरूपमुच्यते ॥ व्याप्तिरूपेण सम्बन्धस्तस्याश्च पुरुषस्य च। स ह्यनादिरनन्तश्च परमार्थेन निश्चितः" इति । एवं सर्वास्वपि संहितासु जीवस्य नित्यत्ववचनाज्जीवस्वरूपोत्पत्तिः पञ्चरात्रतन्त्रे प्रतिषिद्धैव। जन्ममरणादिव्यवहारस्तु लोकवेदयोर्जीवस्य यथोपपद्यते, तथा [२]"नात्मा श्रुतेः" इत्यत्र वक्ष्यते । अतो जीवस्योत्पत्तिस्तत्रापि प्रतिषिद्धैवेति जीवोत्पत्तिवादनिमित्ताप्रामाण्यशङ्का दूरोत्सारिता । यश्चैष केषाञ्चिद्दुद्घोषः [३]"साङ्गेषु वेदेषु निष्ठामलभमानः शाण्डिल्यः पञ्चरात्रशास्त्रमधीतवान्" इति।साङ्गेषु वेदेषु पुरुषार्थनिष्ठा न लब्धेति वचनाद्वेदविरुद्धमेवेदं तन्त्रम्—इति,सोऽप्यनाघ्रातवेदवचसामनाकलिततदुपबृंहणन्यायकलापानां श्रद्धामात्रविजृम्भितः ; यथा [४]"प्रातःप्रातरनृतं ते वदन्ति पुरोदयाज्जुह्वति येऽग्निहोत्रम्" इति अनुदितहोमनिन्दा उदितहोमप्रशंसार्थेत्युक्तम् ; यथा च भूमविद्याप्रक्रमे नारदेन [५]"ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणं चतुर्थमितिहासपुराणं पञ्चमम्" इत्यारभ्य सर्वे विद्यास्थानमभिधाय [६]"सोऽहं भगवो मन्त्रविदेवास्मि नात्मवित्" इति भूमविद्याव्यतिरिक्तासु सर्वासु विद्यास्वात्मवेदनालाभवचनं वक्ष्यमाणभूमविद्याप्रशंसार्थं कृतम् ; अथवा अस्य नारदस्य साङ्गेषु वेदेषु यत्परतत्त्वं प्रतिपाद्यते, तदलाभनिमित्तोऽयं वादः; एवमेव शाण्डिल्यस्येति । पञ्चाद्वेदान्त-

१. परमसंहिता. २. शारी.२-३-१८॥३. पञ्चरात्रे. ४. ऐतरेयब्राह्मणे. ५-६. छा.७-१-२,३॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वेद्यवासुदेवाख्यपरब्रह्मतत्त्वाभिधानादवगम्यते । तथा वेदार्थस्य दुर्ज्ञानतया सुखावबोधार्थश्शास्त्रारम्भः परमसंहितायामुच्यते [१]"अधीता भगवन् वेदास्साङ्गोपाङ्गास्सविस्तराः । श्रुतानि च मयाऽङ्गानि वाकोवाक्ययुतानि च । नचैतेषु समस्तेषु संशयेन विना क्वचित् । श्रेयोमार्गं प्रपश्यामि येन सिद्धिर्भविष्यति"इति,[१]"वेदान्तेषु यथा सारं सङ्गृह्य भगवान् हरिः । भक्तानुकम्पया विद्वान् सञ्चिक्षेप यथासुखम्" इति च । अतस्स भगवान्वेदैकवेद्यः परब्रह्माभिधानो वासुदेवो निखिलहेयप्रत्यनीककल्याणैकतानानन्तज्ञानानन्दाद्यपरिमितोदारगुणसागरस्सत्यसङ्कल्पश्चातुर्वर्ण्यचातुराश्रम्यव्यवस्थयाऽवस्थितान् धर्मार्थकाममोक्षाख्यपुरुषार्थाभिमुखान् भक्तानवलोक्यापारकारुण्यसौशील्यवात्सल्यौदार्यमहोदधिः स्वस्वरूपस्वविभूतिस्वाराधनतत्फलयाथात्म्यावबोधिनो वेदान् ऋग्यजुस्सामाथर्वभेदभिन्नानपरिमितशाखान् विध्यर्थवादमन्त्ररूपान् स्वेतरसकलसुरनरदुरवगाहांश्चावधार्य तदर्थयाथात्म्यावबोधि पञ्चरात्रशास्त्रं स्वयमेव निरमिमीतेति निरवद्यम् ॥

यत्तु—परैस्सूत्रचतुष्टयं कस्यचिद्विरुद्धांशस्य प्रामाण्यनिषेधपरं व्याख्यातम् ; तत्सूत्राक्षराननुगुणम्, सूत्रकाराभिप्रायविरुद्धञ्च । तथाहि—सूत्रकारेण वेदान्तन्यायाभिधायीनि सूत्राण्यभिधाय वेदोपबृंहणाय च भारतसंहितां शतसहस्रिकां कुर्वता मोक्षधर्मे ज्ञानकाण्डेऽभिहितं [२]"गृहस्थो ब्रह्मचारी च वानप्रस्थोऽथ भिक्षुकः। य इच्छेत्सिद्धिमास्थातुं देवतां कां यजेत सः" इत्यारभ्य महता प्रबन्धेन पञ्चरात्रशास्त्रप्रक्रियां प्रतिपाद्य[३]"इदं शतसहस्राद्धि भारताख्यानविस्तरात्। आविध्य मतिमन्थानं दध्नो घृतमिवोद्धृतम्॥नवनीतं यथा दध्नो द्विपदां ब्राह्म-

१. पञ्चरात्रे ॥ २. भारते. शान्ति-मोक्ष. ३३५-१ ॥ ३. भारते. शान्ति-मोक्ष. ३४४-११ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

णो यथा।आरण्यकं च वेदेभ्यः ओषधीभ्यो यथाऽमृतम्"[१]"इदं महोपनिषदं चतुर्वेदसमन्वितम्।साङ्ख्ययोगकृतान्तेन पञ्चरात्रानुशब्दितम्"[२]"इदं श्रेय इदं ब्रह्म इदं हितमनुत्तमम् ।ऋग्यजुस्सामभिर्जुष्टमथर्वाङ्गिरसैस्तथा। भविष्यति प्रमाणं वा एतदेवानुशासनम्" इति। साङ्ख्ययोगशब्दाभ्यां ज्ञानयोगकर्मयोगावभिहितौ; यथोक्तं [३]"ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिनाम्" इति। भीष्मपर्वण्यपि [४]" ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैश्च कृतलक्षणैः। अर्चनीयश्च सेव्यश्च पूजनीयश्च माधवः। सात्त्वतं विधिमास्थाय गीतस्सङ्कर्षणेन यः" इति। कथमेवं ब्रुवाणो बादरायणो वेदविदग्रेसरो वेदान्तवेद्यपरब्रह्मभूतवासुदेवोपासनार्चनादिप्रतिपादनपरस्य सात्त्वतशास्त्रस्याप्रामाण्यं ब्रूयात्। ननुच [५]"साङ्ख्यं योगः पञ्चरात्रं वेदाः पाशुपतं तथा।....किमेतान्येकनिष्ठानि पृथङ्निष्ठानि वा मुने" इत्यादिना साङ्ख्यादीनामप्यादरणीयतोच्यते; शारीरके तु साङ्ख्यादीनि प्रतिषिध्यन्ते; अत इदमपि तन्त्रं तत्तुल्यम्; नेत्युच्यते, यतस्तत्रापीममेव शारीरकोक्तं न्यायमवतारयति; "किमेतान्येकनिष्ठानि पृथङ्निष्ठानिवा" इति प्रश्नस्यायमर्थः—किं साङ्ख्ययोगपाशुपतवेदपञ्चरात्राण्येकतत्त्वप्रतिपादनपराणि, पृथक्तत्त्वप्रतिपादनपराणि वा; यदैकतत्त्वप्रतिपादनपराणि, किं तदेकं तत्त्वम्; यदा तु पृथक्तत्त्वप्रतिपादनपराणि, तदैषां परस्परं विरुद्धार्थप्रतिपादनपरत्वाद्वस्तुनि विकल्पासम्भवाच्चैकमेव प्रमाणमङ्गीकरणीयम्, किं तदेकम्—इति। अस्योत्तरं ब्रुवन् [६]" ज्ञानान्येतानि राजर्षे विद्धि नानामतानि वै। साङ्ख्यस्य वक्ता कपिलः" इत्यारभ्य साङ्ख्ययोगपाशुपतानां कपिलहिरण्यगर्भपशुपतिकृतत्वेन पौरुषेयत्वं प्रतिपाद्य[७]" अवान्तरतपा नाम वेदाचार्यस्स उच्यते" इति वेदानामपौरुषेयत्वम-

१. भारते शान्ति-मोक्ष. ३४०-१११ ॥ २. भारते. शान्ति-मोक्ष. ३३६-३२ ॥ ३. गी. ३-३ ॥ ४. भारते. भीष्मपर्वणि. ६६-३९,४० ॥ ५. भारते. शान्ति-मोक्ष. ३५०-१,२॥ ६. भारते. शान्ति-मोक्ष. ३५०-६३,६४॥ ७. भारते. शा. मो. ३५०-६५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भिधाय[1] "पञ्चरात्रस्य कृत्स्नस्य वक्ता नारायणस्स्वयम्" इति पञ्चरात्रतन्त्रस्य वक्ता नारायणः स्वयमेवेत्युक्तवान्। एवं वदतश्चायमाशयः—पौरुषेयाणां तन्त्राणां परस्परविरुद्धवस्तुवादितया अपौरुषेयत्वेन निरस्तप्रमादादिनिखिलदोषगन्धवेदवेद्यवस्तुविरुद्धाभिधायित्वाच्च यथावस्थितवस्तुनि प्रामाण्यं दुर्लभम्; वेदवेद्यश्च परब्रह्मभूतो नारायणः; अतस्तत्तत्तन्त्राभिहितप्रधानपुरुषपशुपतिप्रभृतितत्त्वस्य वेदान्तवेद्यपरब्रह्मभूतनारायणात्मकतयैव वस्तुत्वमभ्युपगमनीयम्—इति। तदिदमाह च[2] "सर्वेषु च नृपश्रेष्ठ ज्ञानेष्वेतेषु दृश्यते। यथागमं यथान्यायं निष्ठा नारायणः प्रभुः", इति। "यथागमं यथान्यायम्" इति न्यायानुगृहीततत्तदागमोक्तं वस्तु परामृशतो नारायण एव सर्वस्य वस्तुनो निष्ठेति दृश्यते, अब्रह्मात्मकतया तत्तत्तन्त्राभिहितानां तत्त्वानां [3]"सर्वं खल्विदं ब्रह्म" [4]"विश्वं नारायणः" इत्यादिना सर्वस्य ब्रह्मात्मकतामनुसन्दधानस्य नारायण एव निष्ठेति प्रतीयत इत्यर्थः। अतो वेदान्तवेद्यः परब्रह्मभूतो नारायणः स्वयमेव पञ्चरात्रस्य कृत्स्नस्य वक्तेति, तत्स्वरूपतदुपासनाभिधायि तत्तन्त्रमिति च तस्मिन्नितरतन्त्रसामान्यं न केनचिदुद्भावयितुं शक्यम्। अतस्तत्रैवेदमुच्यते [5]"एवमेकं साङ्ख्ययोगं वेदारण्यकमेव च। परस्पराङ्गान्येतानि पञ्चरात्रं तु कथ्यते" इति। साङ्ख्यं च योगश्च साङ्ख्ययोगम्, वेदाश्चारण्यकानि च वेदारण्यकम्, परस्पराङ्गान्येतानि एकतत्त्वप्रतिपादनपरतयैकीभूतानि एकं पञ्चरात्रमिति कथ्यते। एतदुक्तं भवति—साङ्ख्योक्तानि पञ्चविंशतितत्त्वानि, योगोक्तं च यमनियमाद्यात्मकं योगम्, वेदोदितकर्मस्वरूपाण्यङ्गीकृत्य तत्त्वानां ब्रह्मात्मकत्वं। योगस्य च ब्रह्मोपासनप्रकारत्वं कर्मणां च तदाराधनरूपतामभिदधति-ब्रह्मस्वरूपं प्रतिपादयन्त्यारण्यकानि। एतदेव परेण ब्रह्मणा नारायणेन-

१. भार. शा. मो. ३५०-६७ ॥ २. भार. शा. मो. ३५०-६७-६८ ॥ ३. छा. ३-१४-१ ॥ ४. तै. नारा. १३ ॥ ५. भार. शा. मो. ३४९-८१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्वयमेवपञ्चरात्रतन्त्रे विशदीकृतम्–इति।शारीरके च साङ्ख्योक्ततत्त्वानामब्रह्मात्मकतामात्रं निराकृतम् ; न स्वरूपम्। योगपाशुपतयोश्चेश्वरस्य केवलनिमित्तकारणता, परावरतत्त्वविपरीतकल्पना,वेदबहिष्कृताचारो निराकृतः; न योगस्वरूपम् , पशुपतिस्वरूपं च। अतः [१]"साङ्ख्यं योगः पञ्चरात्रं वेदाः पाशुपतं तथा। आत्मप्रमाणान्येतानि न हन्तव्यानि हेतुभिः" इत्यपि तत्तदभिहिततत्तत्स्वरूपमात्रमङ्गीकार्यम्; जिनसुगताभिहिततत्त्ववत्सर्वं न बहिष्कार्यमित्युच्यते। [२]यथागमं "यथान्यायं निष्ठा नारायणः प्रभुः" इत्यनेनैकार्थ्यात् ॥ ४२ ॥

इति श्रीशारीरकमीमांसाभाष्ये उत्पत्त्यसम्भवाधिकरणम् ॥ ८ ॥

इतिश्रीभगवद्रामानुजविरचिते शारीरकमीमांसाभाष्ये
द्वितीयस्याध्यायस्य द्वितीयः पादः ॥ २ ॥

वेदान्तसारे–उत्पत्त्यसम्भवात् ॥ साङ्ख्यादिवत्पञ्चरात्रमपि जीवोत्पत्त्यभिधानात् , श्रुतिविरुद्धत्वेन तदसम्भवादप्रमाणम् ॥ ३९ ॥

न च कर्तुः करणम् ॥ कर्तुः जीवात् , करणम् मनश्च, श्रुतावुत्पद्यते इति नोच्यते,[३]"एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणिच" इत्यादिश्रुतेः॥४०॥

विज्ञानादिभावे वा तदप्रतिषेधः ॥ ४"वासुदेवात्सङ्कर्षणो नाम जीवः" इत्यादौ सङ्कर्षणादीनां विज्ञानादिरूपवासुदेवत्वे सति तदभिधायिनः प्रामाण्यानिषेधः। परब्रह्मवासुदेवस्य श्रुतावपि ५"अजायमानो बहुधा विजायते" इतिचावतारश्रूयते। जीवादिशब्दाः तच्छरीरकसङ्कर्षणादीनां वाचकाः॥ ४१॥

विप्रतिषेधाच्च ॥ तस्मिन्नपि तन्त्रे[४]"व्याप्तिरूपेण सम्बन्धः तस्याश्च पुरुषस्य च। सद्यनादिरनन्तश्च परमार्थेन निश्चितः" इति जीवोत्पत्तिप्रतिषेधाच्चाविरोधश्श्रुतः॥ ४२ ॥

इति वेदान्तसारे उत्पत्त्यसम्भवाधिकरणम् ॥ ८ ॥

इति श्रीभगवद्रामानुजविरचिते वेदान्तसारे
द्वितीयस्याध्यायस्य द्वितीयः पादः ॥ २ ॥

---

१. भारते. शान्ति. मोक्ष. ३५०-६३ ॥ —२. भारते. शान्ति. मोक्ष. ३५०-६८ ॥ —३. मु. २-१-३ ॥ — ४. पञ्चरात्रे.—५. पुरुषस्.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वेदान्तदीपे–उत्पत्त्यसम्भवात् ॥ साङ्ख्यादितन्त्रवत् पाञ्चरात्रतन्त्रमप्यप्रमाणम्, उत नेति संशयः ; अप्रमाणमिति पूर्वः पक्षः—वासुदेवात्सङ्कर्षणेनाम जीवो जायते''इति श्रुतिविरुद्धजीवोत्पत्त्यादिप्रतिपादनात्,१''चतुर्षु वेदेषु पुरुषार्थमलभमानः'' इति वेदगणानादरवचनाच्च । राद्धान्तस्तु—सङ्कर्षणप्रद्युम्नानिरुद्धानां परब्रह्मभावानाम्२''अजायमानो बहुधा विजायते'' इतिश्रुतिप्रसिद्धस्वेच्छावतारप्रतिपादनान्न क्वचिच्छ्रुतिविरोधः । जीवाहङ्कारमनश्शब्दाश्च तत्तच्छरीरकाणां सङ्कर्षणादीनामेवाभिधायकाः,३''तत्तेज ऐक्षत'' इति तेजः प्रभृतिशब्दवत्। १''चतुर्षु वेदेषु पुरुषार्थमलभमानः''इति च अनुदितहोमनिन्दावत्; यथा ४''ऋग्वेदं भगवोऽध्येमि'' इत्यारभ्य''इतिहासपुराणं पञ्चमम्''इत्यादिना सर्वेषु विद्यास्थानेषु चात्मनो वेदनाभाववचनं वक्ष्यमाणप्रशंसार्थम् । तत्रेऽस्मिन्वेदान्तोदितब्रह्मोपासनविधानाद्वेदाविरुद्धतदर्चनादि विधानाच्चावगम्यते इति प्रमाणमेवासूत्रार्थस्तु—उत्पत्त्यसम्भवात्—५''न जायते म्रियते वा'' इत्यादिश्रुतेः जीवस्योत्पत्त्यसम्भवाज्जीवोत्पत्तिवचनाच्च न प्रमाणम् ॥ ३९ ॥

न च कर्तुः करणम् ॥ १''सङ्कर्षणात्प्रद्युम्नसंज्ञं मन उत्पद्यते''इति मनसः करणस्य कर्तुर्जीवादुत्पत्तिश्च श्रुतिविरुद्धत्वान्न सम्भवति;६''एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणिच'' इति मनसो ब्रह्मण उत्पत्तिश्श्रूयते ॥ ४० ॥

विज्ञानादिभावे वा तदप्रतिषेधः ॥ वाशब्दात्पक्षो विपरिवर्तते ; विज्ञानं चादि च विज्ञानादि ब्रह्म ; सङ्कर्षणादीनां ब्रह्मभावे सति २''अजायमानो बहुधा विजायते'' इति श्रुतिप्रसिद्धस्वेच्छावतारस्यैवात्राभिधानात् , तदप्रतिषेधः, प्रामाण्याप्रतिषेधः, सङ्कर्षणादीनां जीवादिसमानाधिकरणतया निर्देशस्तेषामधिष्ठातृतयोपपद्यते ॥ ४१ ॥

विप्रतिषेधाच्च ॥ अस्मिन्नपि तन्त्रे जीवोत्पत्तिविप्रतिषेधाच्च अविरुद्धमिदं तन्त्रम्, १''व्याप्तिरूपेण सम्बन्धः तस्याश्च पुरुषस्यच । स ह्यनादिरनन्तश्च परमार्थेन निश्चितः'' इति हि पुरुषस्योत्पत्तिः प्रतिषिध्यते ॥ ४२ ॥

इति वेदान्तदीपे उत्पत्त्यसम्भवाधिकरणम् ॥ ८ ॥

इति श्रीभगवद्रामानुजविरचिते श्रीवेदान्तदीपे
द्वितीयस्याध्यायस्य द्वितीयः पादः ॥

---

१. पाञ्चरात्रे. २. पुरुषसू. ३. छा. ६-२-३ ॥—४. छा. ७-१-२ ॥—५. कठ. १-२-१८ ॥—६. मु. २-१-३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीमते रामानुजाय नमः

श्रीभगवद्रामानुजविरचिते

श्रीशारीरकमीमांसाभाष्ये

(द्वितीयाध्याये - तृतीयपादे - वियदधिकरणम् ॥)

न वियदश्रुतेः । २ । ३ । १ ॥

साङ्ख्यादिवेदबाह्यतन्त्राणां न्यायाभासमूलतया विप्रतिषेधाच्चासमञ्जस्यमुक्तम्; इदानीं स्वपक्षस्य विप्रषेधादिदोषाभावरूपापनाय ब्रह्मकार्यतयाऽभिमतचिदचिदात्मकप्रपञ्चस्य कार्यताप्रकारो विशोध्यते। तत्र वियदुत्पद्यते, नवा—इति संशय्यते । किं युक्तम्? न वियदुत्पद्यत इति। कुतः? अश्रुतेः; संभावितस्य हि श्रवणसंभवः; असंभावितस्य तु गगनकुसुमवियदुत्पत्त्यादेः शब्दाभिधेयत्वं न संभवति । न खलु विरवयवस्य सर्वगतस्याकाशस्य आत्मन इवोत्पत्तिर्निरूपयितुं शक्यते; अत एव उत्पत्त्यसंभवात् छान्दोग्ये सृष्टिप्रकरणे तेजःप्रभृतीनामेवोत्पत्तिराम्नायते—[१] "तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृत" इति। तैत्तिरीयकाथर्वणादिषु [२] "तस्माद्वा एतस्मादात्मन आकाशस्संभूतः"[३] "एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि च खं वायुर्ज्योतिरापः" इत्यादिषु श्रूयमाणा वियदुत्पत्तिः अर्थविरोधाद्बाध्यते—इति ॥ १ ॥

---

१. छा. ६-२-३ ॥—२. तै. आन. १-अनु ॥—३. मु. २-१-३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

(सिद्धान्तः)

एवं प्राप्तेऽभिधीयते—

अस्ति तु । २ । ३ । २ ॥

अस्तित्वाकाशस्योत्पत्तिः;अतीन्द्रियार्थविषया हि श्रुतिः प्रमाणान्तराप्रतीतामपि वियदुत्पत्तिं प्रतिपादयितुं समर्थैव । न च श्रुतिप्रतिपन्नेऽर्थे तद्विरोधिनिरवयवत्वादिहेतुकमनुत्पत्त्यनुमानमुदेतुमलम्; आत्मनोऽनुत्पत्तिर्न निरवयवत्वप्रयुक्तेति वक्ष्यते ॥ २ ॥

पुनश्चोदयति—

गौण्यसम्भवाच्छब्दाच्च । २ । ३ । ३ ॥

[1]"तस्माद्वा एतस्मादात्मन आकाशः संभूतः" इत्यादिवियदुत्पत्तिश्रुतिर्गौणीति कल्पयितुं युक्तम्, [2]"तत्तेजोऽसृजत" इति सिसृक्षोः ब्रह्मणः प्रथमं तेज उत्पद्यत इति तेजउत्पत्तिप्राथम्येन वियदुत्पत्तिप्रतिपादनासंभवात्, [3]"वायुश्चान्तरिक्षं चैतदमृतम्" इति वियतोऽमृतत्वशब्दाच्च ॥ ३ ॥

कथमेकस्य संभूतशब्दस्य आकाशापेक्षया गौणत्वम्, अग्न्याद्यपेक्षया मुख्यत्वमिति चेत्—तत्राह—

स्याच्चैकस्य ब्रह्मशब्दवत् । २ । ३ । ४ ॥

एकस्यैव [1]"तस्माद्वा एतस्मादात्मन आकाशस्संभूतः"इत्याकाशे मुख्यत्वासंभवात् गौणतया प्रयुक्तस्य सम्भूतशब्दस्य[1]"वायोरग्निः" इत्यादिष्वनुषक्तस्य मुख्यत्वं स्यादेव; ब्रह्मशब्दवत्—यथा ब्रह्मशब्दः, [4]"तस्मादेतद्ब्रह्म नाम रूपमन्नं च जायते" इत्यत्र प्रधाने गौणतया प्रयुक्तस्त-

१. तै. आन. १-अनु॥—२. छा. ६-२-३॥—३. बृ. ४-३-३॥—४. मु.१-१-९॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्मिन्नेव प्रकरणे[1] "तपसा चीयते ब्रह्म ततोऽन्नमभिजायते" इति ब्रह्मणि मुख्यतया प्रयुज्यते; तद्वत् । अनुषङ्गे च श्रवणाद्दृत्ताविवाभिधानाद्दृत्तिर्विद्यत एवेत्यर्थः ॥ ४ ॥

परिहरति—

प्रतिज्ञाहानिरव्यतिरेकात् । २ । ३ । ५ ॥

छान्दोग्यश्रुत्यनुसारेणान्यासां वियदुत्पत्तिवादिनीनां श्रुतीनां गौणत्वं कल्पयितुं न युज्यते, यतः छान्दोग्यश्रुत्यैव वियदुत्पत्तिरङ्गीकृता; [2] "येनाश्रुतं श्रुतम्" इत्यादिना ब्रह्मविज्ञानेन सर्वविज्ञानप्रतिज्ञानात् । तस्या हि प्रतिज्ञायाः अहानिराकाशस्यापि ब्रह्मकार्यत्वेन तदव्यतिरेकादेव भवति ॥ ५ ॥

शब्देभ्यः । २ । ३ । ६ ॥

इतश्च वियदुत्पत्तिः छान्दोग्ये प्रतीयते, [3] "सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्" इति प्राक्सृष्टेरेकत्वावधारणशब्दात्; [4] "ऐतदात्म्यमिदं सर्वम्" इत्येवमादिशब्देभ्यश्च कार्यत्वेन ब्रह्मणोऽव्यतिरेकप्रतीतेः । नच [5] "तत्तेजोऽसृजत" इति तेजस उत्पत्तिश्रुतिर्वियदुत्पत्तिं वारयति । वियदुत्पत्त्यवचनमात्रेण तेजसः प्रतीयमानं प्राथम्यं श्रुत्यन्तरप्रतिपन्नां वियदुत्पत्तिं न निवारयितुमलम् ॥ ६ ॥

यावद्विकारन्तु विभागो लोकवत् । २ । ३ । ७ ॥

तुशब्दश्चार्थे; [4] "ऐतदात्म्यमिदं सर्वम्" इत्यादिभिराकाशस्य विकारत्ववचनेन तस्याकाशस्य ब्रह्मणो विभागः—उत्पत्तिरप्युक्तैव । लोकवत्—यथा लोके एते सर्वे देवदत्तपुत्रा इत्यभिधाय तेषु केषांचित्तत उत्प-

---

१. मु. १-१-८ ॥—२. छा. ६-१-३ ॥ —३. छा. ६-२-१ ॥ —४. छा. ६-८-७ ॥—५. छा. ६-२-३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्तिवचनेन सर्वेषामुत्पत्तिरुक्ता स्यात्,तद्वत् । एवंच सति [१]"वायुश्चान्तरिक्षश्चैतदमृतम्" इति पुराणामिव चिरकालस्थायित्वाभिप्रायम् ॥७॥

एतेन मातरिश्वा व्याख्यातः । २ । ३ । ८ ॥

अनेनैव हेतुना मातरिश्वनो वायोरप्युत्पत्तिर्व्याख्याता । वियन्मातरिश्वनोः पृथग्योगकरणं [२]"तेजोऽतस्तथाह्याह" इति मातरिश्वपरामर्शार्थम् ॥ ८ ॥

असम्भवस्तु सतोऽनुपपत्तेः । २ । ३ । ९ ॥

तुशब्दोऽवधारणार्थः; असम्भवः—अनुत्पत्तिः । सतः—ब्रह्मण एव; तद्व्यतिरिक्तस्य कस्यचिदप्यनुत्पत्तिर्न सम्भवति, अनुपपत्तेः। एतदुक्तं भवति—वियन्मातरिश्वनोरुत्पत्तिप्रतिपादनमुदाहरणार्थम् ; उत्पत्त्यसम्भवस्तु सतः परमकारणस्य परस्यैव ब्रह्मणः । तद्व्यतिरिक्तस्य कृत्स्नस्याव्यक्तमहदहङ्कारतन्मात्रेन्द्रियवियत्पवनादिकस्य प्रपञ्चस्यैकविज्ञाने न सर्वविज्ञानप्रतिज्ञादिभिरवगतकार्यभावस्यानुत्पत्तिर्नोपपद्यत इति ॥९॥

इति श्रीशारीरकमीमांसाभाष्ये वियदधिकरणम् १ ॥

वेदान्तसारे—न वियदश्रुतेः॥ वियन्नोत्पद्यते, अश्रुतेः—श्रुतिः श्रवणम् । निरवयवस्य, आत्मन इवोत्पत्तिश्रवणासम्भवात् ॥ १ ॥

अस्ति तु॥ श्रवणं सम्भवत्येव—३"आकाशस्सम्भूतः" इत्येव हि श्रुतिः अतीन्द्रियार्थविषया वियदुत्पत्तिं प्रतिपादयति । आत्मनोऽपि ४"न जायते" इति प्रतिषेधादनुत्पत्तिः ॥ २ ॥

गौण्यसम्भवाच्छब्दाच्च ॥ ५"तत्तेजोऽसृजत" इति तेजःप्राथम्यवचनात्, ३"आकाशस्सम्भूतः" इति श्रुतिः गौणी १"वायुश्चान्तरिक्षश्चैतदमृतम्" इति शब्दाच्च ॥ ३ ॥

---

१. बृ. ४-३-३ ॥—२. शारी. २-३-१०॥—३. तै. आन. १ ॥—४. कठ. १-२ १८ ॥—५. छा. ६-२-३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्याच्चैकस्य ब्रह्मशब्दवत् ॥ एकस्य सम्भूतशब्दस्याऽकाशे गौणत्वमन्यत्र मुख्यत्वम् अनुषङ्गे सम्भवत्येव, श्रवणावृत्तिवत्। यथैकस्य ब्रह्मशब्दस्य १"तस्मादेतत् ब्रह्म नाम रूपमन्नञ्च जायते" इति प्रकृतौ गौणत्वम्, २"तपसा चीयते ब्रह्म" इति मुख्यत्वमावृत्तौ ॥ ४ ॥

परिहरति—

प्रतिज्ञाहानिरव्यतिरेकात् ॥ ३"येनाश्रुतम्" इत्यादिना एकविज्ञानेन सर्वविज्ञानप्रतिज्ञायाः अहानिः वियदादेः ब्रह्मकार्यत्वेन तदव्यतिरेकादेव ॥ ५ ॥

शब्देभ्यः ॥ ४"आकाशस्संभूतः" इत्यादिशब्देभ्यः अवगतां वियदुत्पत्तिं ५"तत्तेजोऽसृजत"इत्यत्राकाशशब्दावचनावगतं तेजःप्राथम्यं न निवारयितुं क्षमम् ॥ ६ ॥

यावद्विकारं तु विभागोलोकवत् ॥ ६"ऐतदात्म्यमिदं सर्वम्" इत्यादिना आकाशादेरपि विकारत्वावगमात्, तेजःप्रभृतिविभागवचनं सर्वस्य प्रदर्शनार्थमिति निश्चीयते। यथा च लोके 'दशेमे देवदत्तपुत्राः' इत्युक्त्वा तेषु केषाञ्चिदुत्पत्तिवचनम् ॥ ७ ॥

एतेन मातरिश्वा व्याख्यातः ॥ ७"तेजोऽतः" इत्यादि वक्तुं वायोः पृथगुपादानम् ॥ ८ ॥

असम्भवस्तु सतोऽनुपपत्तेः ॥ असम्भवस्तु परस्य ब्रह्मण एव, इतरस्य ८"सदेव" इत्यवधारणाद्यनुपपत्तेरुत्पत्तिरे ॥ ९ ॥

इति वेदान्तसारे वियदधिकरणम् ॥ १ ॥

वेदान्तदीपे—न वियदश्रुतेः ॥ वियत् उत्पद्यते नेतिसंशयः। नोत्पद्यते इति पूर्वः पक्षः, निरवयवस्य सर्वगतस्यात्मन इवोत्पत्त्यसम्भवात्। असम्भावनीयस्य श्रवणं च न सम्भवति। अत उत्पत्तिश्रुतिर्गौणीति। सिद्धान्तस्तु —वियत् उत्पद्यत एव,उत्पत्तिश्रुतेः। अतीन्द्रियार्थविषयया श्रुत्याऽभिहितेऽर्थे निरवयवत्वादिहेतुकं नानुत्पत्त्यनुमानमुदेतुमलम्। आत्मनोऽप्यनुत्पत्तिश्रुतेरेव-

---

१. मु. १-१-९ ॥—२. मु. १-१-८॥—३. छा. ६-१-३॥—४. तै. आन. १॥ ५. छा. ६-२-३ ॥—६. छा. ६-८-७ ॥—७. शारी. २-३-१० ॥—८. छा. ६-२-१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नित्यत्वम् ; न निरवयवत्वादिना। सूत्रार्थस्तु—नवियदश्रुतेः—वियत् नोत्पद्यते। कुतः? अश्रुतेः—अश्रवणात् ; असम्भावनीयस्य श्रवणासम्भवात् ॥ १ ॥

अस्ति तु ॥ अस्ति तु वियत उत्पत्तिः, १"आत्मन आकाशस्सम्भूतः" इति श्रुतेः ; अतीन्द्रियार्थविषयया श्रुत्या प्रमाणान्तराप्रतिपन्नवियदुत्पत्तिप्रतिपादनं सम्भवत्येव । "न अग्निना सिञ्चेत्" इतिवदयोग्यमित्यर्थः ॥ २ ॥

गौण्यसम्भवाच्छब्दाच्च ॥ २"तत्तेजोऽसृजत" इति प्रतिपन्नतेजःप्राथम्यविरोधात् मध्ये वियदुत्पत्तिर्नसम्भवतीत्युत्पत्तिश्रुतिर्गौणी, ३"वायुश्चान्त, रिक्षं चैतदमृतम्" इत्यमृतत्वश्रवणाच्च ॥ ३ ॥

स्याच्चैकस्य ब्रह्मशब्दवत्॥ १"आकाशस्सम्भूतः आकाशाद्वायुः। वायोरग्निः" इत्यादिषु सर्वत्रानुषक्तस्यैकस्य सम्भूतशब्दस्य आकाशे गौणत्वम्, वाय्वादिषु मुख्यत्वं च; सम्भवति च ब्रह्मशब्दवत् यथैकस्य ब्रह्मशब्दस्यैकप्रकरणे श्रूयमाणस्य ४"तस्मादेतद्ब्रह्म नामरूपमन्नञ्च जायते" इति प्रधानेगौणत्वम्, ५"तपसा चीयते ब्रह्म"इति ब्रह्मणिमुख्यत्वंच।श्रवणावृत्ताविवानुषङ्गेऽप्यभिधानावृत्तेरनुषङ्गोऽपि तत्तुल्य इत्यभिप्रायः ॥ ४ ॥

परिहरति—

प्रतिज्ञाऽहानिरव्यतिरेकात् ॥ ६"येनाश्रुतं श्रुतम्" इति ब्रह्मविज्ञानेनाकाशादिसर्वविज्ञानप्रतिज्ञाया अहानिः आकाशस्यापि ब्रह्मण उत्पत्त्या तदव्यतिरेकादेव भवति ॥ ५ ॥

शब्देभ्यः ॥ इतश्च ७"सदेव सोम्येदमग्र आसीत्" ८"ऐतदात्म्यमिदं सर्वम्" इत्यादिभ्यो ब्रह्मणः प्राक्सृष्टेरेकत्वावधारणसर्वात्मकत्वादिवादिभ्यश्शब्देभ्यश्च वियदुत्पत्तिः प्रतीयते। ९"तत्तेजोऽसृजत" इत्येतस्मिन्वाक्ये आकाशोत्पत्त्यवचनात्प्रतीयमानं तेजःप्राथम्यं समानप्रकरणस्थैः प्रकरणान्तरस्थैश्च शब्दैः प्रतीयमानां वियदुत्पत्तिं न निवारयतीत्यभिप्रायः ॥ ६ ॥

यावद्विकारं तु विभागो लोकवत्॥ यद्यपि छान्दोग्ये १०"तत्तेजोऽसृजत" इतिवदाकाशोत्पत्तिः स्वरूपेण नाभिधीयते ; तथापि तस्मिन्नेव "ऐत-

---

१. तै. आन. १ ॥—२. छा. ६-२-३ ॥—३. बृ. ४-३-३ ॥—४. मु. १-१-९॥—५. मु. १-१-८॥—६. छा. ६-१-३ ॥— ७. छा. ६-२-१॥—८. छा. ६-८-७ ॥—९. छा. ६-२-३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दात्म्यमिदं सर्वम्" इत्यादिनाऽऽकाशादेस्सर्वस्य वस्तुनो ब्रह्मविकारत्ववचनात् यावद्विकारं विभागः—उत्पत्तिरुक्तैवेति गम्यते । लोकवत्—यथा लोके 'सर्वे एते देवदत्तपुत्राः' इत्यभिधाय तेषां केषाञ्चिद्देवदत्तादुत्पत्तिवचनं सर्वेषां तत उत्पत्तिप्रतिपादनार्थमिति गम्यते । आकाशस्यामृतत्ववचनं सुरादिवच्चिरकालस्थायित्वविषयमित्यभिप्रायः ॥ ७ ॥

एतेन मातरिश्वा व्याख्यातः ॥ अनेनैव न्यायेन मातरिश्वनोऽप्युत्पत्तिरुक्ता । नायं न्यायातिदेशः, अधिकाशङ्काभावात् । "तेजोऽतस्तथाह्याह" इति वायोस्तेजस उत्पत्तिं वक्तुं पृथगुपादानम् ॥ ८ ॥

असम्भवस्तु सतोऽनुपपत्तेः ॥ तुशब्दोवधारणार्थः । सतः परमकारणस्य परस्यैव ब्रह्मणः असम्भवः—उत्पत्त्यसम्भवः । तद्व्यतिरिक्तस्य कृत्स्नस्यैव एकविज्ञानेन सर्वविज्ञानप्रतिज्ञाद्यनुपपत्तेः सम्भव उक्त इत्यभिप्रायः ॥ ९ ॥

इति वेदान्तदीपे वियदधिकरणम् ॥ १ ॥

(श्रीशारीरकमीमांसाभाष्ये तेजोधिकरणम्॥२॥)

तेजोऽतस्तथाह्याह । २ । ३ । १० ॥

ब्रह्मव्यतिरिक्तस्य कृत्स्नस्य ब्रह्मकार्यत्वमुक्तम्, इदानीं व्यवहितकार्याणां किं केवलात्तत्तदनन्तरकारणभूताद्वस्तुन उत्पत्तिः, आहोस्वित्तत्तद्भूताद्ब्रह्मण इति चिन्त्यते । किं युक्तम्? केवलात्तत्तद्वस्तु न इति । कुतः? तेजस्तावत् अतः—मातरिश्वन एवोत्पद्यते।[१] "वायोरग्निः" इति ह्याह॥१०॥

आपः । २ । ३ । ११ ॥

आपोऽपि अतः—तेजस एवोत्पद्यन्ते,[१] "अग्नेरापः" [२] "तदपोऽसृजत" इति ह्याह ॥ ११ ॥

पृथिवी । २ । ३ । १२ ॥

१. तै. आन. १-अनु. २ ॥—२. छा. ६-२-३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पृथिवी अद्भ्य उत्पद्यते–[१]"अद्भ्यः पृथिवी" [२]"ता अन्नमसृजन्त" इति ह्याह ॥ १२ ॥

नन्वन्नशब्देन कथं पृथिव्यभिधीयते ?, अत आह–

अधिकाररूपशब्दान्तरेभ्यः । २ । ३ । १३ ॥

महाभूतसृष्ट्यधिकारात्पृथिव्येवान्नशब्देनोक्तेति प्रतीयते । अदनीयस्य सर्वस्य पृथिवीविकारत्वात् कारणे कार्यशब्दः।तथा वाक्यशेषे भूतानां रूपसंशब्दने,[३]"यदग्नेरोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्य" इत्यग्नेजसोस्सजातीयमेवान्नशब्दवाच्यं प्रतीयते। शब्दान्तरं च समानप्रकरणे[४]"अग्नेरापः अद्भ्यः पृथिवी"इति श्रूयते।अतः पृथिव्येवान्नशब्देनोच्यत इत्यद्भ्य एव पृथिवी जायते।उदाहृतास्तेजःप्रभृतयः प्रदर्शनार्थाः। महदादयोऽपि स्वानन्तरवस्तुन एवोत्पद्यन्ते, यथाश्रुत्यभ्युपगमाविरोधात्। [४]"एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि च। खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी" [५]"तस्मादेतद्ब्रह्मनामरूपमन्नं च जायते"[१]"तस्माद्वा एतस्मादात्मन आकाशस्सम्भूतः"[६]"तत्तेजोऽसृजत" इत्यादयो ब्रह्मणः परम्परया कारणत्वेऽप्युपपद्यन्त इति ॥ १३ ॥

(सिद्धान्तः)

एवं प्राप्ते प्रचक्ष्महे–

तदभिध्यानादेव तु तल्लिङ्गात्सः । २ । ३ । १४ ॥

तुशब्दात्पक्षो व्यावृत्तः,महदादिकार्याणामपि तत्तदनन्तरवस्तुशरीरकस्स एव पुरुषोत्तमः कारणम्,कुतः?तदभिध्यानरूपात्तल्लिङ्गात्;अभिध्यानम्–बहु स्यामिति सङ्कल्पः, [६]"तत्तेज ऐक्षत बहु स्यां प्रजायेयेति" [२]"ता आप ऐक्षन्त बह्व्यस्स्यामःप्रजायेमहि"इत्यात्मनो बहुभवनसङ्कल्परूपेक्षण-

१. तै. आन. १-अनु. २ ॥—२. छा. ६-२-४ ॥—३. छा. ६-४-१ ॥—४. मु. २-१-३ ॥—५. मु. १-१-९ ॥—६. छा. ६-२-३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रवणान्महदहङ्काराकाशादीनामपि कारणानां तथाविधेक्षापूर्विकैव स्वकार्यसृष्टिरिति गम्यते, तथाविधंचेक्षणं तत्तच्छरीरकस्य परस्यैव ब्रह्मण उपपद्यते। श्रूयतेच सर्वशरीरकत्वेन सर्वात्मकत्वं परस्य ब्रह्मणोऽन्तर्यामिब्राह्मणे [१]"यः पृथिव्यां तिष्ठन्" [१]"योऽप्सु तिष्ठन्"[१]"यस्तेजसि तिष्ठन्"[१]"यो वायौ तिष्ठन्"[१]"य आकाशे तिष्ठन्" इत्यादि। सुबालोपनिषदिच [२]"यस्य पृथिवी शरीरम्" इत्यारभ्य[२]"यस्याहङ्कारश्शरीरं" [२]"यस्य बुद्धिश्शरीरं" [२]"यस्याव्यक्तं शरीरम्" इत्यादि॥

यच्चोक्तम्[३]"एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि च" इत्यादिषु श्रूयमाणा ब्रह्मणः प्राणादिसृष्टिः परम्परयाऽप्युपपद्यत इति; अत्रोच्यते—

विपर्ययेण तु क्रमोऽत उपपद्यतेच ।२।३। १५॥

तुशब्दोऽवधारणार्थः। अव्यक्तमहदहङ्काराकाशादिक्रमाद्विपर्ययेण यस्सर्वेषां कार्याणां ब्रह्मानन्तर्यरूपः क्रमः [३]"एतस्माज्जायते प्राणः"इत्यादिषु प्रतीयते,सच क्रमस्तत्तद्रूपाद्ब्रह्मणस्तत्तत्कार्योत्पत्तेरेवोपपद्यते।परम्परया कारणत्वे ह्यानन्तर्यश्रवणमुपरुध्येत।अतः[३]"एतस्माज्जायते"इत्यादिक्रमपि सर्वस्य ब्रह्मणः साक्षात्सम्भवस्योत्तम्भनम्॥ १५॥

अन्तरा विज्ञानमनसी क्रमेण तल्लिङ्गादिति चेन्ना-

विशेषात्।२।३।१६॥

विज्ञानसाधनत्वादिन्द्रियाणि विज्ञानमित्युच्यन्ते, यदुक्तम् [३]"एतस्माज्जायते"इत्यादिना सर्वस्य ब्रह्मणोऽनन्तरकार्यत्वं श्राव्यते; अतश्चानेन वाक्येन सर्वस्य साक्षाद्ब्रह्मण उत्पत्तिरभिध्यानलिङ्गावगतोत्तम्भ्यत इति; तन्नोपपद्यते—क्रमविशेषपरत्वादस्य वाक्यस्य; अत्रापि सर्वेषां क्रमप्र-

१. बृ. ५-७॥ २. सुबा. ७॥ ३. मु. २-१-३॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तीतेः। खादिषुतावत् श्रुत्यन्तरासिद्धः क्रमोऽत्रापि प्रतीयते—तैस्सहपाठलिङ्गाद्भूतप्राणयोरन्तराले विज्ञानमनसी अपि क्रमेणोत्पद्येते इति प्रतीयते। अतस्सर्वस्य साक्षाद्ब्रह्मण एव सम्भवस्योत्तम्भनमिदं वाक्यं न भवतीति चेत्—तन्न, अविशेषात्[1] "एतस्माज्जायते प्राणः" इत्यनेनाविशेषात्। विज्ञानमनसोः खादीनांच [1] "एतस्माज्जायते" इत्यनेन साक्षात्सम्भवरूपसम्बन्धस्याभिधेयस्य सर्वेषां प्राणादिपृथिव्यन्तानामविशिष्टत्वात्स एव विधेयः, न क्रमः। श्रुत्यन्तरसिद्धक्रमविरोधाच्च नेदं क्रमपरम्, [2] "पृथिव्यप्सु प्रलीयते" इत्यारभ्य "तमः....एकीभवति" इत्यन्तेन क्रमान्तरप्रतीतेः। अतोऽव्यक्तादिशरीरकात्परस्माद्ब्रह्मण एव सर्वकार्याणामुत्पत्तिः। तेजःप्रभृतयश्च शब्दास्तदात्मभूतं ब्रह्मैवाभिदधति ॥ १६ ॥

नन्वेवं सर्वशब्दानां ब्रह्मवाचित्वे सति तैस्तैश्शब्दैः तत्तद्वस्तुन्यपदेशो व्युत्पत्तिसिद्ध्य उपरुद्ध्येत ; तत्राह—

चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशोभाक्तस्तद्भावभावित्वात्। २। ३। १७॥

तुशब्दश्चोदिताशङ्कानिवृत्त्यर्थः, निखिलजङ्गमस्थावरव्यपाश्रयस्तत्तच्छब्दव्यपदेशः भाक्तः—वाच्यैकदेशे भज्यत इत्यर्थः; समस्तवस्तुप्रकारिणो ब्रह्मणः प्रकारभूतवस्तुग्राहिप्रत्यक्षादिप्रमाणाविषयत्वाद्वेदान्तश्रवणात्प्राक्प्रकार्यप्रतीतेः, प्रकारिप्रतीतिभावभावित्वाच्च तत्पर्यवसानस्य, लोके तत्तद्वस्तुमात्रे वाच्यैकदेशे तेते शब्दाः भङ्क्त्वाभङ्क्त्वा व्यपदिश्यन्ते। अथवा तेजःप्रभृतिभिश्शब्दैस्तत्तद्वस्तुमात्रवाचितया व्युत्पन्नैर्ब्रह्मणो व्यपदेशो भाक्तस्स्यात्—अमुख्यस्स्यादित्याशङ्क्य—चराचरव्यपाश्रयस्तु—इत्युच्यते। चराचरव्यपाश्रयः तद्व्यपदेशः—तद्वाचिशब्दः, चराचरवाचिश-

१. सू. २-१-३ ॥—२. सूबा. २-ख ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ब्दो ब्रह्मण्यभाक्तः मुख्य एव;कुतः?,ब्रह्मभावभावित्वात्सर्वशब्दानां वाचकभावस्य; नामरूपव्याकरणश्रुत्या हि तथाऽवगतम् ॥ १७ ॥

इति श्रीशारीरकमीमांसाभाष्ये तेजोधिकरणम् ॥ २ ॥

वेदान्तसारे—तेजोऽतस्तथाह्याह ॥ तेजः वायोरेवोत्पद्यते; न साक्षाद्ब्रह्मणः, १"वायोरग्निः" इति आह ॥ १० ॥

आपः ॥ १"अग्नेरापः" इति श्रुतेः आपः अग्नेः ॥ ११ ॥

पृथिवी ॥ पृथिवी अद्भ्यः, १"अद्भ्यः पृथिवी" इति श्रुतेः ॥ १२ ॥

अधिकाररूपशब्दान्तरेभ्यः ॥ २"ता अन्नमसृजन्त"इत्यन्नशब्देन पृथिव्येवाभिधीयते, महाभूतसृष्ट्यधिकारात् । ३"यत्कृष्णं तदन्नस्य"इति पृथिवीरूपविधानात् , १"अद्भ्यः पृथिवी" इति पृथिवीशब्दाभिधानाच्च ॥ १३ ॥

राद्धान्तमाह—

तदभिध्यानादेव तु तल्लिङ्गात्सः॥४"तत्तेज ऐक्षत"४"ता आप ऐक्षन्त" इति तदभिध्यानरूपात् , ४"तदैक्षत बहु स्याम्" इत्येतत्स्वरूपात् परमात्मकारणत्वलिङ्गात् स एव परमात्मा तेजःप्रभृतिशरीरकस्तत्तच्छब्दैस्साक्षात्कारणत्वेनाभिधीयते ॥ १४ ॥

विपर्ययेण तु क्रमोऽत उपपद्यते च॥पारम्पर्यक्रमात् विपर्ययेण५"एतस्माज्जायते प्राणः खं वायुर्ज्योतिरापः" इत्यादिवाक्यात् यस्साक्षाद्ब्रह्मणस्सृष्टिरुपक्रमः, सोऽपि अतः तेजःप्रभृतिशरीरकब्रह्मण एव सृष्टेः उपपद्यते॥१५॥

अन्तरा विज्ञानमनसी क्रमेण तल्लिङ्गादिति चेन्नाविशेषात् ॥ भूतप्राणयोरन्तराले इन्द्रियग्राममनसी क्रमेण उत्पद्येते इत्येतत्परमिदं वाक्यं ५"खं वायुर्ज्योतिरापः"इत्यादिश्रुतिप्रत्यभिज्ञानरूपात् लिङ्गात्; अत इदमपि पारंपर्यक्रमपरमितिचेन्न, ५"एतस्माज्जायते" इत्यस्य प्राणादिपृथिव्यन्तेषु सर्वेषु प्रत्येकमन्वयाविशेषात् । अतस्तेजःप्रभृतीनामपि साक्षात्परमात्मैव कारणम् ॥

४"तत्तेज ऐक्षत"इति तेजःप्रभृतिशब्दाः लोके तत्तद्वस्तुवाचिनः ब्रह्मणि भाक्ता इत्यत्राह—

---

१. तै. आन. १-२ ॥—२. छा. ६-२-४ ॥—३. छा. ६-४-१ ॥—४. छा.६-२-३॥—५. मु. २-१-३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशोऽभाक्तस्तद्भावभावित्वात् ॥

चराचरवस्तुसम्बन्धितत्तद्वाचकशब्दः ब्रह्मणि अभाक्तः मुख्य एव, १"अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि" इति तु सर्वस्य वस्तुनो नामरूपभाक्त्वस्यात्मतया ब्रह्मानुप्रवेशभावभावित्वात् । लौकिकास्त्वेवमजानन्तो वाच्यैकदेशे प्रयुञ्जते ॥ १७ ॥

इति वेदान्तसारे तेजोधिकरणम् ॥ २ ॥

वेदान्तदीपे—तेजोऽतस्तथाह्याह ॥ २"आकाशाद्वायुः" इत्यादिव्यवहितकार्याणि किं स्वानन्तरादाकाशादेः केवलादुत्पद्यन्ते, उत तत्तच्छरीरात्परस्माद्ब्रह्मण इति संशयः। स्वानन्तरादेवेति पूर्वःपक्षः—२"आकाशाद्वायुः वायोरग्निः" इति तस्मात्केवलादेवोत्पत्तिश्रवणात् । ३"एतस्माज्जायते प्राणः" इति परस्माद्ब्रह्मणस्सर्वस्योत्पत्तिवादः, परम्परयाप्युपपद्यते। राद्धान्तस्तु—४"तत्तेज ऐक्षत बहु स्याम्"५"ता आप ऐक्षन्त" इति बहुभवनसङ्कल्पपूर्वकसृष्ट्युपदेशात्केवलस्य त्वीदृशसङ्कल्पानुपपत्तेः, ६"यस्तेजसि तिष्ठन् यस्य तेजश्शरीरम् ...यस्याकाशश्शरीरम्" इति सर्वेषां परब्रह्मशरीरत्वश्रवणाच्च तत्तच्छब्दवाच्यात्परस्माद्ब्रह्मण एव साक्षात्तेजःप्रभृतीनामपि सृष्टिः । सूत्रार्थस्तु—तेजोऽतस्तथाह्याह—अतः वायोरेव केवलादुत्पद्यते तेजः;तथाह्याह श्रुतिः—२"वायोरग्निः" इति ॥ १० ॥

आपः ॥ 'अतस्तथाह्याह'इत्यनुवर्तते,अतः तेजस एव केवलात् आपः उत्पद्यन्ते, २"अग्नेरापः" ४"तदपोऽसृजत" इति ह्याह ॥ ११ ॥

पृथिवी॥ एवं पृथिव्यपि उत्पद्यते, २"अद्भ्यःपृथिवी"५"ता अन्नमसृजन्त" इति ह्याह ॥ १२ ॥

अन्नशब्देन कथं पृथिव्यभिधीयत इत्यवगम्यते ; तत्राह—

अधिकाररूपशब्दान्तरेभ्यः ॥ अन्नशब्देन पृथिव्युच्यते , महाभूतसृष्ट्यधिकारात्, पश्चादपि महाभूतरूपसङ्कीर्तने७"यत्कृष्णं तदन्नस्य"इति रूपकीर्तनात्, समानप्रकरणे २"अद्भ्यः पृथिवी" इति पृथिवीशब्दश्रवणाच्च॥१३॥

---

१. छा. ६-३-२ ॥—२. तै. आन. १-२ ॥—३. मु. २-१-३ ॥—४. ५. छा. ६-२-३,४ ॥—६. बृ. ५-७-१४ ॥—७. छा. ६-४-१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तदभिध्यानादेवतु तल्लिङ्गात्सः॥ तुशब्दः पक्षव्यावृत्त्यर्थः। न तेजःप्रभृतयः केवलाः स्वानन्तराणां कारणानि; अपि तु तत्तच्छरीरः सः परमात्मैव तेषां कारणम्; कुतः? परमात्मसृष्टिलिङ्गात् तथाविधाभिध्यानात्। यथैवहि१"तदैक्षत बहुस्यां प्रजायेयेति तत्तेजोऽसृजत" इति तथैव१"तत्तेज ऐक्षत बहुस्यां प्रजायेय" इति बहुभवनसङ्कल्परूपाभिध्यानं दृश्यते। ईदृशमभिध्यानं परमात्मन एव हि सम्भवति॥ १४॥

विपर्ययेण तु क्रमोऽत उपपद्यते च॥२" आकाशाद्वायुः वायोरग्निः" इति पारम्पर्यक्रमात् विपर्ययेण३"एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणिच।खं वायुर्ज्योतिरापः पृथिवी"इति सर्वेषां ब्रह्मानन्तर्यरूपो यः क्रमः, सचातएव तत्तच्छरीराद्ब्रह्मणस्सृष्टेः उपपद्यते॥ १५॥

अन्तरा विज्ञानमनसी क्रमेणतल्लिङ्गादितिचेन्नाविशेषात्॥ विज्ञानसाधनत्वादिन्द्रियाणि प्राणश्च विज्ञानमित्युच्यन्ते। ३"एतस्माज्जायते प्राणः"इत्येतद्वाक्यम् आकाशतन्मात्रपञ्चकयोरन्तराले विज्ञानमनसी क्रमेण उत्पद्येते इत्येतत्परम्।विज्ञानमनसी इति प्राणस्यापि प्रदर्शनार्थम्, ४"पृथिव्यप्सु प्रलीयते"इत्यारभ्य ४"वायुराकाशे लीयते आकाशमिन्द्रियेषु इन्द्रियाणि तन्मात्रेषु तन्मात्राणि भूतादौ लीयन्ते"इति प्रलयक्रमप्रत्यभिज्ञानात् तल्लिङ्गात्।अतो न श्रुत्यन्तरविरुद्धत्वात्साक्षाद्ब्रह्मणस्सर्वेषां सृष्टिपरमिदं वाक्यम्।अपि तु श्रुत्यन्तरसिद्धपारम्पर्यक्रमपरमिति चेत्—परिहरति-नाविशेषात्- भूततन्मात्रान्तराले विज्ञानमनसोरुत्पत्तावपि तत्तच्छरीरकब्रह्माभिधायित्वाद्भूतेन्द्रियमनः प्राणशब्दानां सर्वेषां साक्षादुत्पत्त्यविशेषात् तत्परमेवेदं वाक्यम्॥ १६॥

लोके तत्तद्वस्तुवाचितया शब्दजातस्य ब्रह्मणि वृत्तिरमुख्येत्याशङ्क्याह-

चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशोऽभाक्तस्तद्भावभावित्वात्॥तुशब्दश्शङ्कानिवृत्त्यर्थः;स्थावरजङ्गमवस्तुव्यपाश्रयः तद्व्यपदेशः तद्वाचिशब्दो ब्रह्मणि अभाक्तः मुख्यएव,कुतः?तद्भावभावित्वात्—तेजः प्रभृतिषु आत्मतया ब्रह्मभावभावित्वेन सर्वस्य वस्तुनस्तच्छरीरतया तत्प्रकारत्वात् तत्तद्वाचिनां शब्दानां तत्रैव पर्यवसानात्।प्रकारवाचिनां शब्दानां प्रकारिपर्यवसायित्वेनाभाक्त-

---

१. छा. ६-२-३॥—२. तै. आन. १-२—॥ ३. मु.२-१-३॥—४. सुबा. २-ख॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्वं गवादिशब्देषु सिद्धम् ॥ १७ ॥

इति वेदान्तदीपे तेजोधिकरणम् ॥ २ ॥

श्रीशारीरकमीमांसाभाष्ये आत्माधिकरणम् ॥ ३ ॥

नात्मा श्रुतेर्नित्यत्वाच्च ताभ्यः । २ । ३ । १८ ॥

वियदादेः कृत्स्नस्य परस्माद्ब्रह्मण उत्पत्तिरुक्ता। इदानीं जीवस्याप्युत्पत्तिरस्ति नेति संशय्यते; किं युक्तम् ? अस्तीति, कुतः, एकविज्ञानेन सर्वविज्ञानप्रतिज्ञोपपत्तेः, प्राक्सृष्टेरेकत्वावधारणाच्च । वियदादेरिव जीवस्याप्युत्पत्तिवादिन्यः श्रुतयश्च सन्ति-[१]"यतः प्रसूता जगतः प्रसूती तोयेन जीवान् व्यससर्ज भूम्याम्"[२]"प्रजापतिः प्रजा असृजत"[३]"सन्मूलास्सोम्येमास्सर्वाः प्रजास्सदायतनास्सत्प्रतिष्ठाः" [४]"यतो वा इमानि भूतानि जायन्ते"इति ।एवं सचेतनस्य जगत उत्पत्तिवचनात् जीवस्याप्युत्पत्तिः प्रतीयते। नच वाच्यं–ब्रह्मणो नित्यत्वात् तत्त्वमस्यादिभिश्च जीवस्य ब्रह्मत्वावगमाज्जीवस्य नित्यत्वम्–इति [५]"ऐतदात्म्यमिदं सर्वम्" [६]"सर्वं खल्विदं ब्रह्म"इत्येवमादिभिर्वियदादेरपि ब्रह्मत्वावगमात्तस्यापि नित्यत्वप्रसक्तेः। अतो जीवोपि वियदादिवदुत्पद्यत इति ॥

(सिद्धान्तः)

एवं प्राप्तेऽभिधीयते-नात्मा श्रुतेः-इति।नात्मोत्पद्यते;कुतः?श्रुतेः[७]"न जायते म्रियते वा विपश्चित्"[८]"ज्ञाज्ञौ द्वावजौ"इत्यादिभिर्जीवस्योत्पत्तिप्रतिषेधो हि श्रूयते।आत्मनो नित्यत्वं च ताभ्यः-श्रुतिभ्य एवागम्यते[९]"नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्"[७]"अजो नित्यश्शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे" इत्यादिभ्यः।अतश्च

१. तै. ब्रह्म. १-१ ॥—२. यजु. २-अष्ट ॥—३. छा. ६-८-४ ॥—४. तै. आन. ॥—५. छा. ६-८-७ ॥—६. छा. ३-१४-१ ॥—७. कठ. २-१८ ॥—८. श्वे. १-९ ॥—९. श्वे. ६-१३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नात्मोत्पद्यते। कथं तर्ह्येकविज्ञानेन सर्वविज्ञानप्रतिज्ञोपपद्यते;इत्थमुपपद्यते—जीवस्यापि कार्यत्वात्कार्यकारणयोरनन्यत्वाच्च । एवं तर्हि वियदादिवदुत्पत्तिमत्त्वमङ्गीकृतं स्यात्; नेत्युच्यते-कार्यत्वं हि नामैकस्य द्रव्यस्यावस्थान्तरापत्तिः, तज्जीवस्याप्यस्त्येव । इयांस्तु विशेषः वियदादेरचेतनस्य यादृशोऽन्यथाभावो न तादृशो जीवस्य ज्ञानसङ्कोचविकासलक्षणो जीवस्यान्यथाभावः; वियदादेस्तु स्वरूपान्यथाभावलक्षणः । सेयं स्वरूपान्यथाभावलक्षणोत्पत्तिर्जीवे प्रतिषिध्यते । एतदुक्तं भवति—भोग्यभोक्तृनियन्तृन् विविक्तस्वभावान् प्रतिपाद्य भोग्यगतमुत्पत्त्यादिकं भोक्तरि प्रतिषिध्य तस्य नित्यतां च प्रतिपाद्य भोग्यगतमुत्पत्त्यादिकं, भोक्तृगतं चापुरुषार्थाश्रयत्वं नियन्तरि प्रतिषिध्य तस्य नित्यत्वं, निरवद्यत्वं, सर्वदा सर्वज्ञत्वं, सत्यसङ्कल्पत्वं, करणाधिपाधिपत्वं, विश्वस्य पतित्वं, च प्रतिपाद्य सर्वावस्थयोश्चिदचितोस्तं प्रति शरीरत्वं, तस्य चात्मत्वम्, प्रतिपादितम्; अतस्सर्वदा चिदचिद्वस्तुतया तत्प्रकारं ब्रह्म; तत्कदाचित्स्वस्माद्विभक्तव्यपदेशानर्हातिसूक्ष्मदशापन्नचिदचिद्वस्तुशरीरं तिष्ठति; तत्कारणावस्थं ब्रह्म । कदाचिच्च विभक्तनामरूपस्थूलचिदचिद्वस्तुशरीरम्; तच्च कार्यावस्थम् । तत्र कारणावस्थस्य कार्यावस्थापत्तावचिदंशस्य कारणावस्थायां शब्दादिविहीनस्य भोग्यत्वाय शब्दादिमत्तया स्वरूपान्यथाभावरूपविकारो भवति । चिदंशस्य च कर्मफलविशेषभोक्तृत्वाय तदनुरूपज्ञानविकासरूपविकारो भवति । उभयप्रकारविशिष्टे नियन्तृंशे तदवस्थतदुभयविशिष्टतारूपविकारो भवति; कारणावस्थाया अवस्थान्तरापत्तिरूपो विकारः प्रकारद्वये प्रकारिणि च समानः । अत एवैकस्यावस्थान्तरापत्तिरूपविकारापेक्षया [१]"येनाश्रुतं श्रुतम्" इत्येकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय मृदादिदृष्टान्तो [२]"यथा

१, २. छा. ६-१-३, ४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सोम्यैकेन" इत्यादिना निदर्शितः। ईदृशज्ञानसङ्कोचविकासकरतत्तद्देह-सम्बन्धवियोगाभिप्रायाः जीवस्योत्पत्तिमरणवादिन्यः,[१] "प्रजापतिः प्रजा असृजत" इत्याद्याः श्रुतयः। अचिदंशवत्स्वरूपान्यथात्वाभावाभिप्राया उत्पत्तिप्रतिषेधवादिन्यो नित्यत्ववादिन्यश्च [२] "न जायते म्रियते" इत्याद्याः, [३] "नित्यो नित्यानाम्" इत्याद्याश्च श्रुतयः। स्वरूपान्यथात्वज्ञानसङ्कोचविकासरूपोभयविधानिष्टविकाराभावाभिप्रायाः [४] "सवा एष महानज आत्माऽजरोऽमरोऽमृतो ब्रह्म" [३] "नित्यो नित्यानाम्" इत्याद्याः परविषयाः श्रुतयः। एवं सर्वदा चिदचिद्वस्तुविशिष्टस्य ब्रह्मणः प्राक्सृष्टेरेकत्वावधारणं च नामरूपविभागाभावादुपपद्यते।[५] "तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यां व्याक्रियत" इतिहि नामरूपविभागभावाभावाभ्यां नानात्वैकत्वे वदति—इति।ये त्वविद्योपाधिकं जीवत्वंवदन्ति,येच पारमार्थिकोपाधिकृतम्,येच सन्मात्रस्वरूपं ब्रह्म स्वयमेव भोक्तृभोग्यनियन्तृरूपेण त्रिधाऽवस्थितं वदन्ति;सर्वेऽप्येते अविद्याशक्तेरुपाधिशक्तेर्भोक्तृभोग्यनियन्तृशक्तीनां च प्रलयकालेऽवस्थानेऽपि तदानीमेकत्वावधारणं नामरूपविभागाभावादेवोपपादयन्ति। [६] "वैषम्यनैर्घृण्ये न सापेक्षत्वात्" [७] "न कर्माविभागादितिचेन्नानादित्वादुपपद्यते चाप्युपलभ्यतेच" इति सूत्राभ्यां जीवभेदस्य तत्कर्मप्रवाहस्यचानादित्वाभ्युपगमाच्च। इयान्विशेषः—एकस्यानाद्यविद्यया ब्रह्म स्वयमेव मुह्यति, अन्यस्य पारमार्थिकानाद्युपाधिना ब्रह्मस्वरूपमेव बध्यते, उपाधिब्रह्मव्यतिरिक्तवस्त्वन्तराभावात्। अपरस्य ब्रह्मैव विचित्राकारेण परिणमते, कर्मफलानिचानिष्टानि भुङ्क्ते; नियन्तृशस्य भोक्तृत्वाभावेऽपि सर्वज्ञत्वात्स्वस्मादभिन्नं भोक्तारमनुसंदधातीति स्वयमेव भुङ्क्ते; अस्माकं तु स्थूलसूक्ष्मावस्थचिदचिद्वस्तुशरीरं ब्रह्म कार्य-

१. यजु. अष्ट. २॥—२. कठ. २-१८॥—३. श्वे. ६-१३॥—४ बृ. ६-४-२५॥—५. बृ. ३-४-७॥—६, ७. शारी. २-१-३४, ३५॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कारणोभयावस्थावस्थितमपि सर्वदा निरस्तनिखिलदोषगन्धं सत्यसङ्कल्पत्वाद्यपरिमितोदारगुणसागरमवतिष्ठते । प्रकारभूतचिदचिद्वस्तुगताः अपुरुषार्थाः स्वरूपान्यथाभावाश्चेति सर्वं समञ्जसम् ॥ १८ ॥

इति श्रीशारीरकमीमांसाभाष्ये आत्माधिकरणम् ॥ ३ ॥

वेदान्तसारे—नात्मा श्रुतेर्नित्यत्वाच्च ताभ्यः॥नात्मा उत्पद्यते,१"न जायते म्रियते" इति श्रुतेः;२"नित्यो नित्यानाम्" इत्यादिश्रुतिभ्यो नित्यत्वावगतेश्च ॥ १८ ॥

इति वेदान्तसारे आत्माधिकरणम् ॥ ३ ॥

वेदान्तदीपे—नात्मा श्रुतेर्नित्यत्वाच्च ताभ्यः॥ किमात्मोत्पद्यते, न वेतिसंशयः । उत्पद्यत इति पूर्वः पक्षः । एकविज्ञानेन सर्वविज्ञानप्रतिज्ञादेः, ३"तोयेन जीवान्व्यससर्ज भूम्याम्" ४"प्रजापतिः प्रजा असृजत" इत्यादिसृष्टिवचनाच्च नित्यादिश्रुतिराकाशाद्यमृतत्ववचनवन्नेया । राद्धान्तस्तु—नात्मोत्पद्यते, अनुत्पत्तिश्रुतेः; १"न जायते म्रियते वा विपश्चित्"इति जीवोत्पत्तिर्निषिध्यते;१"अजो नित्यः"२"नित्यो नित्यानाम्"इत्यादिश्रुतिभ्यो नित्यत्वावगमात् । जीवोत्पत्तिपक्षे अकृताभ्यागमकृतविप्रणाशादिप्रसङ्गात्, वैषम्यनैर्घृण्यप्रसङ्गाच्च । जीवस्य सृष्टिवचनं भोक्तृत्वानुगुणज्ञानविकासाभिप्रायम् । प्राक्सृष्टेरेकत्वावधारणादविभागवचनं नामरूपविभागाभावाभिप्रायम् । सूत्रमपि व्याख्यातम् ॥ १८ ॥

इति वेदान्तदीपे आत्माधिकरणम् ॥ ३ ॥

(श्रीशारीरकमीमांसाभाष्ये ज्ञाधिकरणम् ॥ ४ ॥)

ज्ञोऽत एव । २। ३। १९॥

वियदादिवज्जीवो नोत्पद्यत इत्युक्तम्, तत्प्रसङ्गेन जीवस्वरूपं नि-

१. कठ. २-१८ ॥—२. श्वे, ६-१३ ॥—३. तै. अम्भ. १-१ ॥—४. यजु. २. अष्ट॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रूप्यते। किं सुगतकपिलाभिमतचिन्मात्रमेवात्मनस्स्वरूपम्; उत कणभुगभिमतपाषाणकल्पस्वरूपमचित्स्वभावमेवागन्तुकचैतन्यगुणकम्; अथ ज्ञातृत्वमेवास्य स्वरूपमिति। किंयुक्तम्? चिन्मात्रमिति; कुतः तथा श्रुतेः। अन्तर्यामिब्राह्मणेहि [१]"य आत्मनि तिष्ठन्" इति माध्यन्दिनीयपर्यायस्य स्थाने [१]"यो विज्ञाने तिष्ठन्" इति काण्वा अधीयते। तथा [२]"विज्ञानं यज्ञं तनुते कर्माणि तनुतेऽपिच"इति कर्तुरात्मनो विज्ञानमेव स्वरूपं श्रूयते। स्मृतिषु च [३]"ज्ञानस्वरूपमत्यन्तनिर्मलं परमार्थतः" इत्यादिष्वात्मनो ज्ञानस्वरूपत्वं प्रतीयते। अपरस्तु—जीवात्मनो ज्ञानत्वे ज्ञातृत्वे च स्वाभाविकेऽभ्युपगम्यमाने तस्य सर्वगतस्य सर्वदा सर्वत्रोपलब्धिप्रसङ्गात्,करणानां च वैयर्थ्यात्,सुषुप्तिमूर्च्छादिषु सतोऽप्यात्मनश्चैतन्यानुपलब्धेर्जाग्रतस्सामग्र्यां सत्यां ज्ञानोत्पत्तिदर्शनादस्य न ज्ञानं स्वरूपम्; नापि ज्ञातृत्वम्;आगन्तुकमेव चैतन्यम्; सर्वगतत्वं चात्मनोऽवश्याभ्युपेत्यम्, सर्वत्र कार्योपलब्धेः सर्वत्रात्मनस्सन्निधानाभ्युपगमाच्छरीरगमनेनैव कार्यसम्भवे सति गतिकल्पनायां प्रमाणाभावाच्च। श्रुतिरपि सुषुप्तिवेलायां ज्ञानाभावं दर्शयति—[४]"नाह खल्वयमेवं सम्प्रत्यात्मानं जानात्ययमहमस्मीति नो एवेमानि भूतानि" इति। तथा मोक्षदशायां ज्ञानाभावं दर्शयति—[५]"न प्रेत्य संज्ञाऽस्ति" इति। [३]"ज्ञानस्वरूपम्"इत्यादिप्रयोगस्तु ज्ञानस्य तदसाधारणगुणत्वेन लाक्षणिक इति॥

एवं प्राप्ते प्रचक्ष्महे—ज्ञोऽत एव-ज्ञ एव—अयमात्मा ज्ञातृत्वस्वरूप एव, न ज्ञानमात्रम्,नापि जडस्वरूपः; कुतः? अत एव—श्रुतेरेवेत्यर्थः। "नात्मा श्रुतेः"इति प्रकृता श्रुतिः अतइति शब्देन परामृश्यते। तथा छान्दोग्ये प्रजापतिवाक्ये मुक्तामुक्तात्मस्वरूपकथने [१]" अथ यो वेदेदं जिघ्राणीति

१. बृ. ५-७-२२ ॥—२. तै. आन. ५-१॥— ३. वि. पु. १-अं. २-अ. ६-श्लो॥ —४. छा. ८-११-२ ॥—५. बृ. ६-५-१३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स आत्मा"[१] "मनसैवैतान् कामान् पश्यन्रमते य एते ब्रह्मलोके" [२] "सत्यकामस्सत्यसङ्कल्पः"[३] "नोपजनं स्मरन्निदं शरीरम्" अन्यत्रापि [४] "न पश्यो मृत्युं पश्यति" तथा वाजसनेयके [५] "कतम आत्मा" इति पृष्ट्वा [६] "योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः" इति तथा [७] "विज्ञातारमरे केन विजानीयात्" [८] "जानात्येवायं पुरुषः" तथा [९] "एष हि द्रष्टा श्रोता घ्राता रसयिता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः" [१०] "एवमेवास्य परिद्रष्टुरिमाष्षोडशकलाः" इति ॥ १९ ॥

यच्चोक्तं ज्ञातृत्वे स्वाभाविके सति सर्वगतस्य तस्य सर्वदा सर्वत्रोपलब्धिः प्रसज्यत इति; तत्रोच्यते—

उत्क्रान्तिगत्यागतीनाम् ।२। ३ । २०॥

नायं सर्वगतः, अपित्वणुरेवायमात्मा; कुतः? उत्क्रान्तिगत्यागतीनां श्रुतेः; उत्क्रान्तिस्तावच्छ्रूयते [११] "तेन प्रद्योतेनैष आत्मा निष्क्रामति चक्षुषो वा मूर्ध्नो वाऽन्येभ्यो वा शरीरदेशेभ्यः" इति। गतिरपि [१२] "ये वै केचास्माल्लोकात्प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति" इति। आगतिरपि [१३] "तस्माल्लोकात् पुनरेत्यस्मै लोकाय कर्मणे" इति। विभुत्वे ह्येता उत्क्रान्त्यादयो नोपपद्येरन् ॥ २० ॥

स्वात्मना चोत्तरयोः ।२।३।२१॥

चशब्दोऽवधारणे। यद्यपि शरीरवियोगरूपत्वेनोत्क्रान्तिः स्थितस्याप्यात्मनः कथंचिदुपपद्यते; गत्यागती तु न कथंचिदुपपद्येते। अत-

---

१. छा. ८-१२-४॥—२. छा. ८-७-१ ॥— ३. छा. ८-१२-३॥—४. छा. ७-२६-२ ॥—५, ६. बृ. ६-३-७ ॥— ७. बृ. ६-५-१५ ॥—८ ॥—९. प्रश्न.४-९॥ —१०. प्रश्न. ६-५॥—११. बृ. ६-४-२ ॥—१२. कौषी. १-२ ॥— १३. बृ. ६-४-६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्ते स्वात्मनैव सम्पाद्ये ॥ २१ ॥

नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात्। २।३।२२॥

[१]"योऽयं विज्ञानमयः प्राणेषु" इति जीवं प्रस्तुत्य [२]"स वा एष महानज आत्मा" इति महत्त्वश्रुतेः नाणुर्जीव इति चेन्न; इतराधिकारात्—जीवादितरस्य प्राज्ञस्य तत्राधिकारात्; यद्यप्युपक्रमे जीवः प्रस्तुतः, तथापि [३]"यस्यानुवित्तः प्रतिबुद्ध आत्मा" इति मध्ये परः प्रतिपाद्यत इति तत्सम्बन्धीदं महत्त्वम्; न जीवस्य ॥ २२ ॥

स्वशब्दोन्मानाभ्यांच । २ । ३ । २३ ॥

साक्षादणुशब्द एव श्रूयते [४]"एषोऽणुरात्मा चेतसा वेदितव्यो यस्मिन् प्राणः पञ्चधा संविवेश" इति;उद्भृत्य मानमुन्मानम्; अणुशब्दं वस्तूद्भृत्य तन्मानत्वं जीवस्य श्रूयते [५]"वालाग्रशतभागस्य शतधा कल्पितस्य चाभागो जीवस्स विज्ञेयः" इति;[६]"आराग्रमात्रो ह्यवरोऽपि दृष्टः" इतिच। अतोऽणुरेवायमात्मा ॥ २३ ॥

अथ स्यात्—आत्मनोऽणुत्वे सकलशरीरव्यापिनी वेदना नोपपद्यत इति; तत्र मतान्तरेण परिहारमाह—

अविरोधश्चन्दनवत्। २। ३। २४॥

यथा हरिचन्दनबिन्दुर्देहैकदेशवर्त्यपि सकलदेहव्यापिनमाह्लादं जनयति, तद्वदात्माऽपि देहैकदेशवर्ती सकलदेशवर्तिनीं वेदनामनुभवति॥

अवस्थितिवैशेष्यादितिचेन्नाभ्युपगमाद्धृदिहि । २।३ । २५॥

---

१. बृ. ६-३-७ ॥—२. बृ ६-४-२५॥—३. बृ. ६-४-१३॥—४. मु. ३-१-९॥—५. श्वे. ५-९ ॥—६. श्वे. ५-८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हरिचन्दनबिन्दादेर्देहदेशविशेषवस्थितिविशेषात्तथाभावः, आत्मनस्तु तन्न विद्यत इति चेन्नः आत्मनोऽपि देहदेशविशेषे स्थित्यभ्युपगमात्; हृदयदेशे ह्यात्मनः स्थितिः श्रूयते [१]"हृदि ह्ययमात्मा तत्रैकशतं नाडीनाम्" इति; तथा [२]"कतम आत्मा" इति प्रकृत्य [३]"योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः" इति। आत्मनो देशविशेषस्थितिख्यापनाय चन्दनदृष्टान्तः प्रदर्शितः; न तु चन्दनस्य देशविशेषापेक्षा ॥ २५ ॥

एकदेशवर्तिनस्सकलदेहव्यापिकार्यकरत्वप्रकारं स्वमतेनाह—

गुणाद्वाऽऽलोकवत् ।२ । ३।२६॥

वाशब्दो मतान्तरव्यावृत्त्यर्थः; आत्मा स्वगुणेन ज्ञानेन सकलदेहं व्याप्यावस्थितः; आलोकवत्—यथा मणिद्युमणिप्रभृतीनामेकदेशवर्तिनामालोकोऽनेकदेशव्यापी दृश्यते, तद्वद्धृदयस्थस्याऽत्मनो ज्ञानं सकलदेहं व्याप्य वर्तते; ज्ञातुः प्रभास्थानीयस्य ज्ञानस्य स्वाश्रयादन्यत्र वृत्तिर्मणिप्रभावदुपपद्यत इति प्रथमसूत्रे स्थापितम् ॥ २६ ॥

ननूक्तं ज्ञानमात्रमेवात्मेति; तत्कथं ज्ञानस्य स्वरूपव्यतिरिक्तगुणत्वमुच्यते; तत्राह—

व्यतिरेको गन्धवत्तथा च दर्शयति।२।३।२७॥

यथा पृथिव्याः गन्धस्य गुणत्वेनोपलभ्यमानस्य ततो व्यतिरेकः, तथा जानामीति ज्ञातृगुणत्वेन प्रतीयमानस्य ज्ञानस्याऽत्मनो व्यतिरेकसिद्धः; दर्शयति च श्रुतिः [४]"जानात्येवायं पुरुषः" इति ॥ २७ ॥

पृथगुपदेशात् । २ । ३ । २८॥

स्वशब्देनैव विज्ञानं विज्ञातुः पृथगुपदिश्यते [५]"नहि विज्ञातुर्विज्ञाते-

---

१. प्रश्न. ३-६ ॥—२. बृ. ६-३-७ ॥—३ ॥—४. बृ. ६-३-३० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

र्विपरिलोपो विद्यते" इति ॥ २८ ॥

यत्तूक्तं[१] "यो विज्ञाने तिष्ठन्"[२] "विज्ञानं यज्ञं तनुते"[३] "ज्ञानस्वरूपमत्यन्तनिर्मलम्" इत्यादिषु ज्ञानमेवात्मेति व्यपदिश्यत इति, तत्राह—

तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत्।२।३।२९॥

तुशब्दश्चोद्यं व्यावर्तयति; तद्गुणसारत्वात्— विज्ञानगुणसारत्वात् आत्मनो विज्ञानमिति व्यपदेशः। विज्ञानमेवास्य सारभूतो गुणः, यथा प्राज्ञस्यानन्दस्सारभूतो गुण इति प्राज्ञ आनन्दशब्देन व्यपदिश्यते—[४] "यदेष आकाश आनन्दो न स्यात्" [५] "आनन्दो ब्रह्मेति व्यजानात्" इति; प्राज्ञस्य ह्यानन्दस्सारभूतो गुणः—[६] "स एको ब्रह्मण आनन्दः"[७] "आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन" इति। यथावा [८] "सत्यं ज्ञानमनन्तं ब्रह्म" इति विपश्चितः प्राज्ञस्य ज्ञानशब्देन व्यपदेशः; [८] "सह ब्रह्मणा विपश्चिता" [९] "यस्सर्वज्ञः" इत्यादिषु प्राज्ञस्य ज्ञानं सारभूतो गुण इति विज्ञायते ॥

यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात्।२।३।३०॥

विज्ञानस्य यावदात्मभाविधर्मत्वात्तेन तद्व्यपदेशो न दोषः; तथाच खण्डादयो यावत्स्वरूपभाविगोत्वादिधर्मशब्देन गौरिति व्यपदिश्यमाना दृश्यन्ते; स्वरूपनिरूपणधर्मत्वादित्यर्थः। चकारात् ज्ञानवदात्मनोऽपि स्वप्रकाशत्वेन विज्ञानमिति व्यपदेशो न दोष इति समुच्चिनोति ॥ ३० ॥

यच्चोक्तं सुषुप्त्यादिषु ज्ञानाभावात् ज्ञानस्य न स्वरूपानुबन्धिधर्मत्वमिति, तत्राह—

---

१. बृ. ५-७-२२ ॥—२. तै. आन. ५-१ ॥—३. वि. पु. १-२-६ ॥—४. तै. आन. ७-१ ॥—५. तै. भृ. ६-१ ॥—६. तै. आन. ८-४ ॥—७. तै. आन. ९-१ ॥—८. तै. आन. १-१, २ ॥—९. मु. १-१-९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात्।२।३।३१

तुशब्दश्शोदिताशङ्कानिवृत्त्यर्थः। अस्य-ज्ञानस्य सुषुप्त्यादिष्वपि विद्यमानस्य जागर्यादिष्वभिव्यक्तिसम्भवात्स्वरूपानुबन्धिधर्मत्वोपपत्तिः; पुंस्त्वादिवत्—यथा पुंस्त्वाद्यसाधारणस्य धातोर्बाल्यावस्थायां सतोऽप्यनभिव्यक्तस्य युवत्वेऽभिव्यक्तौ पुंसस्तद्वत्ता न कादाचित्की भवति। सप्तधातुमयत्वं हि शरीरस्य स्वरूपानुबन्धि— [१]"तत्सप्तधातु त्रिमलं द्वियोनि चतुर्विधाहारमयं शरीरम्"इति शरीरस्वरूपव्यपदेशात्। सुषुप्त्यादिष्वप्यहमर्थः प्रकाशत इति प्रागेवोक्तम्। तस्य विद्यमानस्य ज्ञानस्य विषयगोचरत्वं जागर्यादावुपलभ्यते;एते चात्मनो ज्ञातृत्वादयो धर्माः प्रागेवोपपादिताः। अतो ज्ञातृत्वमेव जीवात्मनः स्वरूपम्, स चायमात्माऽणुपरिमाणः- [२]"न प्रेत्य संज्ञाऽस्ति"इत्यपि न मुक्तस्य ज्ञानाभाव उच्यते;अपि तु [२]"एतेभ्यो भूतेभ्यस्समुत्थाय तान्येवानुविनश्यति"इति संसारदशायां यद्भूतानुविधायित्वप्रयुक्तं जन्मनाशादिदर्शनम्, तन्मुक्तस्य न विद्यते—[३]"न पश्यो मृत्युं पश्यति न रोगं नोत दुःखताम् सर्वं ह पश्यः पश्यतिसर्वमाप्नोति सर्वशः" [४]"नोपजनं स्मरन्निदं शरीरम्" [५]"मनसैतान् कामान् पश्यन्रमते" इत्यादिश्रुत्यैकार्थ्यात् ॥ ३१ ॥

सम्प्रति ज्ञानात्मवादे तस्य सर्वगतत्वे दूषणमाह—

नित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतरनियमो वाऽन्यथा। २। ३। ३२॥

अन्यथा सर्वगतत्वपक्षे तस्य ज्ञानमात्मत्वपक्षे च नित्यमुपलब्ध्यनुपलब्धी सहैव प्रसज्येयाताम्; अन्यतरनियमो वा—उपलब्धिरेव वा नित्यं स्यात्, अनुपलब्धिरेव वा; एतदुक्तं भवति—लोके तावद्वर्तमानयोरा-

१॥—२. बृ. ४-४-१२ ॥—३. छा. ७-२६-२॥—४. छा. ८-१२-३॥—५. छा. ८-१२-५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्मोपलब्ध्यनुपलब्ध्योरयं ज्ञानात्मा सर्वगतो हेतुस्स्यात्; उपलब्धेरेव वा, अनुपलब्धेरेव वा;उभयहेतुत्वे सर्वदा सर्वत्रोभयं प्रसज्येत;यद्युपलब्धेरेव, सर्वस्य सर्वदा सर्वत्रानुपलम्भो न स्यात्। अथानुपलब्धेरेव,सर्वदा सर्वत्रोपलब्धिर्न स्यात्—इति। अस्माकं शरीरस्यान्तरेवावस्थितत्वादात्मनस्तत्रैवोपलब्धिर्नान्यत्रेति व्यवस्थासिद्धिः । करणायत्तोपलब्धेरपि सर्वेषामात्मनां सर्वगतत्वेन सर्वैः करणैस्सर्वदा संयुक्तत्वाददृष्टादेरप्यनियमादुक्तदोषस्समानः ॥ ३२ ॥

इति श्रीशारीरकमीमांसाभाष्ये ज्ञाधिकरणम् ॥ ४ ॥

वेदान्तसारे—ज्ञोऽतएव ॥ १"अथ यो वेदेदं जिघ्राणीति स आत्मा मनसैतान् कामान् पश्यन्रमते" २"य एते ब्रह्मलोके" इत्यादिश्रुतेः बद्धो मुक्त श्चात्मा ज्ञातैव २"मनोऽस्य दैवं चक्षुः" इति श्रुतेः स्वधर्मभूतं ज्ञानं मनः ॥१९॥

उत्क्रान्तिगत्यागतीनाम् ॥ उत्क्रान्तिगत्यागतीनां श्रुतेरणुर्जीवः॥२०॥

स्वात्मना चोत्तरयोः ॥ गत्यागत्योस्स्वात्मनैव संपाद्यत्वादप्यणुत्वं निश्चितम् ॥ २१ ॥

नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात् ॥ ३"स वा एष महानज आत्मा" इति श्रुतेः नाणुः इतिचेत्— न ४" यस्यानुवित्तः प्रतिबुद्ध आत्मा" इति परमात्माधिकारात् ॥ २२ ॥

स्वशब्दोन्मानाभ्याञ्च ॥ ५"एषोऽणुरात्मा" इत्यणुशब्दात् ६" आराग्रमात्रो ह्यवरः " इत्युद्धृत्य उन्मानशब्दाच्चाणुः ॥ २३ ॥

अणोरपि सकलदेहव्यापिवेदनानुभवे अन्यमते न हेतुमाह—

अविरोधश्चन्दनवत् ॥ यथा चन्दनबिन्दुरेकदेशस्थोऽपि सकलदेहव्यापि सुखं जनयति, तद्वदविरोधः ॥ २४॥

अवस्थितिवैशेष्यादितिचेन्नाभ्युपगमाद्धृदि हि ॥देशविशेषस्थितेश्च-

---

१. छा. ८-१२-४॥—२. छां. ८-१२-५॥—३. बृ. ६-४-२४॥—४. बृ. ६-४-१२॥—५. मु. ३-१-९॥—६. श्वे. ५-८॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न्दनस्येतिचेत्—न, आत्मनोऽपि तदभ्युपगमात्;१"हृदि ह्ययमात्मा" २"योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः" इति श्रुतेः ॥ २५ ॥

स्वमतेनाह—

गुणाद्वालोकवत् ॥ आत्मा स्वगुणेन ज्ञानेन सकलदेहं व्याप्यानुभवति, यथा मणिप्रभृतयस्स्वकीयेनालोकेन सकलदेशं व्याप्य प्रकाशयन्ति ३"प्रज्ञामात्रास्वर्पिताः" इति श्रुतेः ॥ २६ ॥

न ज्ञानात्मनोः व्यतिरेक इत्यत्राह—

व्यतिरेको गन्धवत्तथाच दर्शयति ॥ "गन्धवती पृथिवी" इतिवत् "अहं जानामि" इति गुणत्वेनोपलब्धेःव्यतिरेकोऽस्ति, दर्शयति च श्रुतिर्व्यतिरेकं—४"जानात्येवायं पुरुषः" इति ॥ २७ ॥

पृथगुपदेशात् ॥ आत्मनः पृथक्त्वेन चोपदिश्यते५"नहि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते" इति ॥ २८ ॥

२"योऽयं विज्ञानमयः" इति ज्ञानमात्रव्यपदेशः कथमित्यत्राह—

तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत् ॥ ज्ञानगुणसारत्वादात्मनो ज्ञानमिति व्यपदेशः, यथा प्राज्ञस्य विपश्चितोऽपि ६"सत्यं ज्ञानम्" इति ॥२९॥

यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात् ॥ आत्मस्वरूपानुबन्धित्वात् ज्ञानस्य तेन व्यपदेशे न दोषः; स्वरूपानुबन्धिधर्मत्वेन गोत्वादीनां खण्डादेः गौरित्यादिव्यपदेशो हि दृश्यते ॥ ३० ॥

सुषुप्त्यादिष्वसतो ज्ञानस्य यावदात्मभावित्वं कथमित्यत्राह—

पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात् ॥ सुषुप्त्यादिषु सतो ज्ञानस्यानभिव्यक्तस्यापि जागरादावभिव्यक्तिसम्भवात्, स्वरूपानुबन्ध्येव ज्ञानम्; यथा पुंस्त्वासाधारणसप्तमधातोर्बाल्येऽपि सतो युवत्वेऽभिव्यक्तिः; जीवात्मनो ज्ञातृत्वमणुत्वञ्चोक्तम् ॥ ३१ ॥

नित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतरनियमो वाऽन्यथा ॥ ज्ञप्ति-

---

१. प्रश्न. ३-६ ॥—२. बृ. ६-३-७ ॥—३. कौषी. ३-९ ॥—४॥—५. बृ. ६-३-३० ॥—६. तै. आन. १-१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मात्रसर्वगतात्मवादे तावन्नित्यवत्सर्वदोपलब्धिस्स्यात् ; सङ्कोचकाभावाद्विद्यमानाया अनुपलब्धेरपि सैव हेतुरिति साऽपि नित्यवत्स्यात्, ज्ञाने विद्यमानेऽपि हेत्वन्तरेण निवारणासम्भवात्। आगन्तुकज्ञानसर्वगतात्मवादेऽपि स एव दोषः; सर्वात्मनां सर्वगतत्वेन ज्ञानहेतूनां मनस्संयोगादीनां सर्वसाधारणत्वात्। अदृष्टहेतूनामपि सर्वसाधारणत्वात् तेनापि न नियमः, अथोपलब्ध्यनुपलब्ध्योर्विरोधादुपलब्धेर्वैते हेतवः स्युः; अनुपलब्धेर्वा ; तथा सत्यन्यतरनियमस्स्यात् ॥ ३२ ॥

इति वेदान्तसारे ज्ञाधिकरणम् ॥ ४ ॥

वेदान्तदीपे—ज्ञोऽत एव ॥ किं जीवः चैतन्यमात्रवपुः ! उत जडस्वरूप एवागन्तुकचैतन्यगुणः; अथ ज्ञातृत्वैकस्वरूप इति संशयः । चैतन्यमात्रवपुरिति प्रथमः पक्षः।१"विज्ञानं यज्ञं तनुते" २"यो विज्ञाने तिष्ठन्"३"ज्ञानस्वरूपमत्यन्तनिर्मलम्" इत्यादिश्रुतिस्मृतिभ्यः । द्वितीयस्तु—सुषुप्तिमूर्च्छादिषु सतोऽप्यात्मनश्चैतन्यानुपलब्धेः, जाग्रतोऽपीन्द्रियव्यापारान्वयव्यतिरेकानुविधायित्वाच्चैतन्यस्य,४"न प्रेत्य संज्ञास्ति"इति मुक्तस्य चैतन्यप्रतिषेधाच्च,पाषाणकल्प एवागन्तुकचैतन्यगुणः । सर्वत्र कार्योपलब्धेस्सर्वत्र सन्निधानात्, शरीरगमनेनैव कार्यसम्भवे गतिकल्पनायोगात्, सर्वगतश्चेति । राद्धान्तस्तु—५"अथ यो वेदेदं जिघ्राणीति स आत्मा मनसैतान्कामान्पश्यन्रमते" ६"न पश्यो मृत्युं पश्यति""सर्वं ह पश्यः पश्यति"७"द्रष्टा श्रोता घ्राता रसयिता" इत्यादिश्रुतिभ्यो बद्धमुक्तोभयावस्थो ज्ञातैवात्मा । ज्ञानमात्रव्यपदेशस्तु ज्ञानस्य प्रधानगुणत्वात्, स्वरूपानुबन्धित्वेन स्वरूपनिरूपकगुणत्वात्, आत्मस्वरूपस्य ज्ञानवत्स्वप्रकाशत्वाद्वोपपद्यते । सुषुप्तिमूर्च्छादौ सदेव ज्ञानं कर्मणा संकुचितमनभिव्यक्तमपि जागरादौ विकसितमभिव्यज्यत इति न विरोधः । ४"न प्रेत्य संज्ञाऽस्ति" इति सांसारिकदेहाद्यस्मरणविषयम्, ८"नोपजनं स्मरन्निदं शरीरम्" इत्यादिनैकार्थ्यात् । सर्वगततत्वन्तु अणुत्वगत्यादिश्रुतिविरुद्धम् । सूत्रार्थस्तु—ज्ञोऽत एव—अतः - श्रुतेः ज्ञातैव ॥ १९ ॥

उत्क्रान्तिगत्यागतीनाम्॥ श्रुतेः इति वर्तते । ९"तेन प्रद्योतेनैष

---

१. तै. आन. ५-१॥—२. बृ. ५-७-२२॥—३. वि-पु.१-२-६॥—४.बृ.४-४-१२॥—५. छा. ८-१२-४ ॥—६. छा. ७-२६-२ ॥—७. प्रश्न.४-९ ॥—८. छा.८-१२-३॥—९. बृ.६-४-२॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आत्मा निष्क्रामति" १"ये वैके चास्माल्लोकात्प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति" २"तस्माल्लोकात्पुनरेत्यस्मै लोकाय कर्मणे" इत्याद्युत्क्रान्तिगत्यागतीनां श्रवणादणुर्जीवः ॥ २० ॥

स्वात्मना चोत्तरयोः॥ चशब्दोऽवधारणार्थः; यद्यप्युत्क्रान्तौ स्थितस्य शरीरविश्लेषेण कथंचित्संपाद्यत्वमस्ति उत्तरयोः—गमनागमनयोस्तु स्वात्मनैव सम्पाद्यत्वमवश्याभ्युपेयम् ॥ २१ ॥

नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात् ॥ ३"योऽयं विज्ञानमयः" इति जीवं प्रस्तुत्य ४"स वा एष महानज आत्मा" इति महत्त्वश्रुतेः नाणुः जीव इति चेन्न; इतराधिकारात्—जीवेतरपरमात्माधिकारात्—५"यस्यानुवित्तः प्रतिबुद्ध आत्मा" इति हि मध्ये परमात्मा प्रस्तुतः ॥ २२ ॥

स्वशब्दोन्मानाभ्याञ्च ॥ ६"एषोऽणुरात्मा चेतसा वेदतव्यः यस्मिन्प्राणः पञ्चधा संविवेश" इति साक्षादणुशब्दादणुरेवायम् । उन्मानाच्चाणुरेव। उन्मानम्—उद्धृत्य मानम्। ७"आराग्रमात्रो ह्यवरोऽपि दृष्टः"इत्याराग्रमुद्धृत्य तन्मानत्वं हि जीवस्य श्रूयते ॥ २३ ॥

आत्मनोऽणुपरिमाणत्वे सकलदेहव्यापिसुखाद्यनुभवः कथमित्यत्र मतान्तरेण परिहारमाह—

अविरोधश्चन्दनवत् ॥ यथा हरिचन्दनबिन्दुः देहैकदेशवर्त्यपि सकलदेहवर्तिनमाह्लादं जनयति, तद्वदविरोधः ॥ २४ ॥

अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमाद्धृदि हि॥ चन्दनबिन्दोर्देहैकदेशविशेषस्थित्यपेक्षस्तथाभावः; आत्मनस्तु न तथेति चेन्न, आत्मनोऽपि तथाभावाभ्युपगमात्; हृदि ह्ययमात्मा स्थितः" इति श्रूयते ६"योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः" इत्यादौ ॥ २५ ॥

स्वमतेनाह—

गुणाद्वाऽऽलोकवत्॥ वाशब्दो मतान्तरव्यावृत्त्यर्थः; आत्मा स्वगुणेन ज्ञानेन सकलदेहं व्याप्यावस्थितः; यथा द्युमणिमणिप्रभृतीनामेकदेशवर्तिनामालोकः तद्गुणः अनेकदेशव्यापी दृश्यते ॥ २६ ॥

---

१. कौषी. १-२॥—२. बृ. ६-४-६ ॥—३. बृ. ६-३-७॥—४. बृ. ६-४-२५ ॥—५. बृ. ६-४-१३॥—६. मु. ३-१-९॥—७. श्वे. ५-८॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

१"विज्ञानं यज्ञं तनुते" इत्यादौ ज्ञानमेव आत्मेति व्यपदिश्यते इति चेत् —तत्राह—

व्यतिरेको गन्धवत्तथा च दर्शयति॥ जानामि इत्यात्मगुणत्वेन प्रतीतेः व्यतिरेकोऽभ्युपगमनीयः; यथा "गन्धवती पृथिवी" इत्युपलब्धौ गन्धस्तद्गुणस्तद्व्यतिरिक्तः। दर्शयति च श्रुतिः २"जानात्येवायं पुरुषः" इति ॥ २७ ॥

पृथगुपदेशात् ॥ न केवलं जानामीति पृथगुपलब्धिमात्रम्; आत्मनः पृथक्त्वेनोपदिश्यते च ज्ञानम्;३"न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते"इति॥

तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत् ॥ ज्ञानगुणसारत्वादात्मनो ज्ञानमिति व्यपदेशः;यथा४"प्राज्ञेन"५"ब्रह्मणा विपश्चिता"६"यस्सर्वज्ञस्सर्ववित्" इति सर्वज्ञ एव सर्वज्ञानगुणसारत्वात् ७"सत्यं ज्ञानम्" इति व्यपदिश्यते ॥

यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात् ॥ ज्ञानस्य यावदात्मस्वरूपभावित्वाच्च तेन तद्व्यपदेशो न दोषः, खण्डादिषु तथादर्शनात्; खण्डादिषु हि यावत्स्वरूपभाविधर्मत्वेन गोत्वस्य गौरिति व्यपदेशो दृश्यते; चकारादात्मनः स्वप्रकाशत्वेन ज्ञानमिति व्यपदेशे न दोष इत्युच्यते ॥ ३० ॥

सुषुप्त्यादिषु ज्ञानस्यानुपलब्धेः न यावदात्मभावित्वमित्याशङ्क्याह—

पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात् ॥ तुशब्दश्शङ्कानिवृत्त्यर्थः;सुषुप्तयादिष्वपि सतो ज्ञानस्यानभिव्यक्तस्य जागर्यादिष्वभिव्यक्तिसम्भवात् यावदात्मभाव्येव ज्ञानम्; पुंस्त्वादिवत्—पुंस्त्वमिति पुरुषासाधारणधातुरुच्यते; यथा सप्तधातुमयत्वेन शरीरस्य पुंस्त्वस्य बाल्येऽपि सतोऽनभिव्यक्तस्य सप्तमधातोः युवत्वेऽभिव्यक्तिः ॥ ३१ ॥

एवमात्मनो ज्ञातृत्वमणुत्वं चोक्त्वा पक्षान्तरे दोषमाह—

नित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतरनियमो वाऽन्यथा ॥ अन्यथा ज्ञानात्मवादे सर्वगतात्मवादे च उपलब्ध्यनुपलब्धी नित्यवत् प्रसज्येयाताम्; उपलब्ध्यनुपलब्ध्योरन्यतरनियमो वा। ज्ञानात्मपक्षे तावत् ज्ञानस्य प्रकाशस्वभावत्वात्प्रकाशपर्यायोपलब्धेर्नित्यवत्प्रसक्तिरनिवार्या; ज्ञाने विद्यमाने सति हेत्वन्तरेणानुपलब्धिजननायोगात् ज्ञानमेवानुपलब्धेरपि हेतुरित्यास्थे-

१. तै. आन. ५-१—२. — ३. बृ. ६-३-३०॥—४. बृ. ६,३-२१॥—५. तै. आन १-२॥—६. मु. १-१-९॥—७. तै. आन. १-१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यम्। ज्ञानस्य सर्वदा वर्तमानत्वात्सर्वदोभयप्रसक्तिः। अथ युगपद्विरुद्धकार्यजननायोगात् ज्ञानमुपलब्ध्यनुपलब्ध्योरन्यतरहेतुरास्थीयते। तदाऽन्यतरनियमस्स्यात्। सर्वगतत्वपक्षे यथा ज्ञानात्मवादिनाम्, तथैव हेतुजन्यज्ञानवादिनोपि सर्वेषामात्मनां सर्वगतत्वे सर्वस्यात्ममनस्संयोगादेः हेतोस्सर्वेषां साधारणत्वात् उक्तरीत्या तथैव प्रसक्तिः। अदृष्टोत्पत्तिहेतोरपि सर्वस्य साधारणत्वाददृष्टेनापि न व्यवस्था ॥ ३२ ॥

इति वेदान्तदीपे ज्ञाधिकरणम् ॥ ४ ॥

श्रीशारीरकमीमांसाभाष्ये कर्त्रधिकरणम् ॥ ५ ॥

कर्ता शास्त्रार्थवत्त्वात् । २ । ३ । ३३ ॥

अयमात्मा ज्ञाता, स चाणुपरिमाण इत्युक्तम्; इदानीं किं स एव कर्ता; उत स्वयमकर्तैव सन्नचेतनानां गुणानां कर्तृत्वमात्मन्यध्यस्यतीति चिन्त्यते। किं युक्तम्, अकर्तैवात्मेति, कुतः? आत्मनो ह्यकर्तृत्वम्, गुणानामेव च कर्तृत्वमध्यात्मशास्त्रेषु श्रूयते।तथाहि कठवल्लीषु जीवस्य[१] "न जायते म्रियते" इत्यादिना जन्मजरामरणादिकं सर्वं प्रकृतिधर्मं प्रतिषिध्य हननादिषु क्रियासु कर्तृत्वमपि प्रतिषिध्यते–[२] "हन्ता चेन्मन्यते हन्तुं हतश्चेन्मन्यते हतम्। उभौ तौ न विजानीतो नायं हन्ति न हन्यते" इति। हन्तारमात्मानं जानन्न जानात्यात्मानमित्यर्थः। तथा च भगवता स्वयमेव जीवस्याकर्तृत्वं स्वरूपम्; कर्तृत्वाभिमानस्तु व्यामोह इत्युच्यते— [३] "प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः। अहङ्कारविमूढात्मा कर्ताऽहमिति मन्यते" [४] "नान्यं गुणेभ्यः कर्तारं यदा द्रष्टाऽनुपश्यति" [५] "कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते। पुरुषस्सुखदुःखानां भोक्तृत्वे हेतुरुच्यते" इति च। अतः पुरुषस्य भोक्तृत्वमेव प्रकृतेरेव तु कर्तृत्वम्–इति॥

---

१. कठ. २-१८ ॥—२. कठ. २.१९॥—३. गी. ३-२७ ॥—४. गी.१४-१९ ॥ ५. गी. १३-२० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

(सिद्धान्तः)

एवं प्राप्ते प्रचक्ष्महे—कर्ता शास्त्रार्थवत्त्वात्—इति। आत्मैव कर्ता; न गुणाः, कस्मात्? शास्त्रार्थवत्त्वात्। शास्त्राणि हि 'यजेत स्वर्गकामः' 'मुमुक्षुर्ब्रह्मोपासीत' इत्येवमादीनि स्वर्गमोक्षादिफलस्य भोक्तारमेव कर्तृत्वे नियुञ्जते ; नह्यचेतनस्य कर्तृत्वेऽन्यो नियुज्यते। शासनाच्च शास्त्रम्; शासनं च प्रवर्तनम्; शास्त्रस्य च प्रवर्तकत्वं बोधजननद्वारेण; अचेतनं च प्रधानं न बोधयितुं शक्यम्। अतः शास्त्राणामर्थवत्त्वं भोक्तुश्चेतनस्यैव कर्तृत्वे भवेत्। तदुक्तं [१]"शास्त्रफलं प्रयोक्तरि" इति। यदुक्तं [२] "हन्ता चेन्मन्यते" इत्यादिना हननक्रियायामकर्तृत्वमात्मनः श्रूयत इति ; तदात्मनो नित्यत्वेन हन्तव्यत्वाभावादुच्यते। यच्च [३]"प्रकृतेः क्रियामाणानि" इत्यादिना गुणानामेव कर्तृत्वं स्मर्यत इति ; तत्संसारिकप्रवृत्तिष्वस्य कर्तृता सत्त्वरजस्तमोगुणसंसर्गकृता ; न स्वरूपप्रयुक्तेति प्राप्ताप्राप्तविवेकेन गुणानामेव कर्तृतेत्युच्यते। तथा च तत्रैवोच्यते [४]"कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु" इति। तथा तत्रैवात्मनश्च कर्तृत्वमभ्युपेत्योच्यते [५]"तत्रैवं सति कर्तारमात्मानं केवलं तु यः।पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः" इति। [६]"अधिष्ठानं तथा कर्ता करणं च पृथग्विधम्। विविधा च पृथक् चेष्टा दैवं चैवात्र पञ्चमम्" इत्यधिष्ठानादिदैवपर्यन्तसापेक्षे सत्यात्मनः कर्तृत्वे य आत्मानमेव केवलं कर्तारं मन्यते, न स पश्यतीत्यर्थः॥ ३३॥

उपादानाद्विहारोपदेशाच्च ।२। ३ ।३४॥

[७]"स यथा महाराजः" इति प्रकृत्य, [७]" एवमेवैष एतान् गृहीत्वा स्वेशरीरे यथाकामं परिवर्तते" इति प्राणानामुपादाने विहारे च कर्तृत्वमुपदिश्यते॥ ३४॥

---

१. पूर्वमीमांसान्यायः॥—२. कठ. २-१९॥—३. गी. ३-२७॥—४. गी. १३-२१॥—५. गी. १८-१६॥—६. गी. १८-१४॥—७. बृ. ४-१-१८॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः।२।३।३५

१ "विज्ञानं यज्ञं तनुते कर्माणि तनुतेपिच" इति लौकिकवैदिकक्रियासु कर्तृत्वव्यपदेशाच्च कर्ता। विज्ञानशब्देन नात्मनो व्यपदेशः; अपित्वन्तःकरणस्य बुद्धेरितिचेत्—एवंसति निर्देशविपर्ययस्स्यात्—बुद्धेः करणत्वाद्विज्ञानेनेति करणविभक्तिनिर्देशस्स्यात् ॥ ३५ ॥

उपलब्धिवदनियमः। २। ३। ३६॥

आत्मनोऽकर्तृत्वे दोष उच्यते। यथाऽऽत्मनो विभुत्वे नित्योपलब्ध्यनुपलब्धिप्रसङ्ग इत्यादिनोपलब्धेरनियम उक्तः; तद्वदात्मनोऽकर्तृत्वे प्रकृतेश्च कर्तृत्वे तस्यास्सर्वपुरुषसाधारणत्वात्सर्वाणि कर्माणि सर्वेषां भोगाय स्युः;नैव वा कस्य चित्।आत्मनां विभुत्वाभ्युपगमात्सन्निधानमपि सर्वेषामविशिष्टम्। अतएव चान्तःकरणादीनामपि नियमो नोपपद्यते; यदायत्ता व्यवस्था स्यात् ॥ ३६ ॥

शक्तिविपर्ययात्। २। ३। ३७॥

बुद्धेः कर्तृत्वे कर्तुरन्यस्य भोक्तृत्वानुपपत्तेर्भोक्तृत्वशक्तिरपि तस्याएव स्यादित्यात्मनो भोक्तृत्वशक्तिर्हीयेत। भोक्तृत्वं च बुद्धेरेव संपद्यत इति आत्मसद्भावे प्रमाणाभावश्च स्यात्। २"पुरुषोऽस्ति भोक्तृभावात्" इति हि तेषामभ्युपगमः ॥ ३७ ॥

समाध्यभावाच्च। २। ३। ३८॥

बुद्धेः कर्तृत्वे मोक्षसाधनभूतसमाधावपि सैव कर्त्री स्यात्। स च समाधिः प्रकृतेरन्योऽस्मीत्येवंरूपः; नच प्रकृतेरन्योऽस्मीति प्रकृतिस्समाधातुमलम्। अतोऽप्यात्मैव कर्ता ॥ ३८ ॥

---

१. तै. आन. ५-१ ॥—२. सांख्यतत्वकौमुदी. २७. पा ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नन्वात्मनः कर्तृत्वेऽभ्युपगम्यमाने सर्वदा कर्तृत्वान्नोपरमेतेत्यत्राह—

यथा च तक्षोभयथा । २। ३। ३९॥

वागादिकरणसम्पन्नोऽप्यात्मा यदेच्छति, तदा करोति, यदा तु नेच्छति, तदा न करोति; यथा तक्षा वाश्यादिकरणसन्निधानेऽपि इच्छानुगुण्येन करोति, न करोति च । बुद्धेस्त्वचेतनायाः कर्तृत्वे तस्याः भोगवाञ्छादिनियमकारणाभावात्सर्वदा कर्तृत्वमेव स्यात् ॥ ३९ ॥

इति श्रीशारीरकमीमांसाभाष्ये कर्त्रधिकरणम् ॥ ५ ॥

वेदान्तसारे—कर्ता शास्त्रार्थवत्त्वात्॥ ज्ञाता सन्नयमात्मा कर्मसु कर्ता च । आत्मनः अकर्तृत्वे, 'कुर्यात् न कुर्यात्' इति शास्त्रानर्थक्यं स्यात् ॥

उपादानाद्विहारोपदेशाच्च॥ [१]"प्राणान् गृहीत्वा स्वे शरीरे यथा कामं परिवर्तते" इत्युपादानविहारोपदेशाच्च कर्ता ॥ ३४ ॥

व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः॥ [२]"विज्ञानं यज्ञं तनुते" इत्यादिना यज्ञादौ कर्तृत्वव्यपदेशाच्च कर्ता । विज्ञानशब्दो बुद्धेः, नात्मनः इति चेत्, न । तदा विज्ञानेन इति निर्देशविपर्ययः स्यात्, बुद्धेः करणत्वात् ॥ ३५ ॥

उपलब्धिवदनियमः ॥ प्रकृतेरेव कर्तृत्वे तस्यास्सर्वसाधारणत्वेन पूर्वोपलब्ध्यनियमवत् फलानियमस्स्यात् ॥ ३६ ॥

शक्तिविपर्ययात् ॥ प्रकृतेरेव कर्तृत्वे कर्तुरेव भोक्तृत्वमिति सैव भोक्त्री स्यादित्यर्थः ॥ ३७ ॥

समाध्यभावाच्च ॥ प्रकृतेरेव कर्तृत्वे "प्रकृतेरन्योऽस्मि" इति समाध्यभावप्रसङ्गाच्च ॥ ३८ ॥

यथा च तक्षोभयथा ॥ आत्मनः कर्तृत्वे 'इच्छायां करोति, अन्यथा न करोति' इति व्यवस्था च सिध्यति । यथा तक्षा स्वकार्येषु । बुद्धेरिच्छाभावात् न व्यवस्था, चेतनधर्मत्वादिच्छायाः ॥ ३९ ॥

इति वेदान्तसारे कर्त्रधिकरणम् ॥ ५ ॥

---

१. बृ. ४-१-१८ ॥—२. तै. आन. ५. १ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वेदान्तदीपे—कर्ता शास्त्रार्थवत्त्वात्॥ आत्मनो ज्ञातृत्ववत्कर्तृत्वमप्यस्ति, नेति संशयः। प्रधानस्यैव कर्तृत्वादात्मनो न कर्तृत्वमस्ति इति पूर्वः पक्षः। १"अहङ्कारविमूढात्मा कर्ताऽहमितिमन्यते"२"नान्यं गुणेभ्यः कर्तारम्" इत्यादिषु गुणानामेव कर्तृत्ववचनात्। राद्धान्तस्तु—स्वर्गापवर्गसाधनानुष्ठानविधानशास्त्राणामर्थवत्त्वाय कर्तैवात्मा, बोद्धुरेव हि शासनम्; नाचेतनस्य प्रधानस्य। "यजेत" "उपासीत" इति कर्तरि लकारः। अतः कर्तारमेव बोधयति शास्त्रम्। सूत्रमपि व्याख्यातम्॥ ३३॥

उपादानाद्विहारोपदेशाच्च॥ उपादानात् उपदिश्यमानात्, विहारोपदेशाच्च। उपदिश्यते उपादानं, विहारश्च, ३ "एवमेवैष एतान्प्राणान्गृहीत्वा स्वे शरीरे यथाकामं परिवर्तते" इति उपादानविहारयोः कर्तृत्वोपदेशाच्च कर्ता॥ ३४॥

व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः॥ ४"विज्ञानं यज्ञं तनुते कर्माणि तनुतेऽपिच" इति यज्ञादिकर्मस्वात्मनः कर्तृत्वोपदेशाच्च कर्ता। विज्ञानशब्देन नात्मनो व्यपदेशः, अपित्वन्तःकरणरूपबुद्धेरेवेति चेत्—तथासति विज्ञानेनेति करणविभक्तिनिर्देशस्स्यात्॥ ३५॥

उपलब्धिवदनियमः॥ प्रधानस्य कर्तृत्वेन आत्मनो भोक्तृत्वमिति पक्षे पूर्वोक्तोपलब्ध्यनियमवत्प्रधानस्य सर्वसाधारणत्वात् भोक्तृत्वानियमः। अन्तःकरणभेदेऽपि सर्वेषामात्मनां सर्वगतत्वेन साधारण्यमनिवार्यम्॥ ३६॥

शक्तिविपर्ययात्॥ बुद्धेः कर्तृत्वे कर्तुरन्यस्य भोक्तृत्वायोगात् भोक्तृत्वशक्तिरपि बुद्धेरेवेति आत्मनो भोक्तृत्वशक्तिविपर्ययः—हानिरित्यर्थः॥

समाध्यभावाच्च॥ प्रकृतेः कर्तृत्वे मोक्षसाधनभूतसमाध्यभावश्च स्यात्। 'प्रकृतेरन्योस्मीति' समाधाने प्रकृतेः कर्तृत्वायोगात्॥ ३८॥

यथा च तक्षोभयथा॥ आत्मनः कर्तृत्वेऽपि 'भोगवाञ्छायां करोति, अन्यथा न करोति' इत्युभयप्रकारव्यवस्थोपपद्यते; यथा तक्षा स्वकार्ये इच्छया व्यवस्थितः। बुद्धेः कर्तृत्वे अचेतनत्वेन स्वेच्छाया अभावाद्व्यवस्था न सिध्यतीत्यभिप्रायः॥ ३९॥

इति वेदान्तदीपे कर्त्राधिकरणम्॥ ५॥

---

१. गी. १४-९॥—२. गी. १६-२०॥—३. बृ. ४-१-१८॥—४. तै. आन. ५-१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

परात्तुतच्छ्रुतेः । २। ३। ४०॥

इदं जीवस्य कर्तृत्वं किं स्वातन्त्र्येण? उत परमात्मायत्तमिति। किं प्राप्तम्? स्वातन्त्र्येणेति। परमात्मायत्तत्वे हि विधिनिषेधशास्त्रानर्थक्यं प्रसज्येत। यो हि स्वबुद्ध्या प्रवृत्तिनिवृत्त्यारम्भशक्तः; स एव नियोज्यो भवति। अत स्स्वातन्त्र्येणास्य कर्तृत्वम्॥

(सिद्धान्तः)

इति प्राप्तेऽभिधीयते—परात्तुतच्छ्रुतेः—इति। तुशब्दः पक्षं व्यावर्तयति; तत्—कर्तृत्वं अस्य—जीवस्य परात्—परमात्मन एव हेतोर्भवति, कुतः श्रुतेः—[१]"अन्तः प्रविष्टश्शास्ता जनानां सर्वात्मा" [२] "य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त आत्माऽन्तर्याम्यमृतः" इति। स्मृतिरपि [३] "सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिः ज्ञानमपोहनं च" [४]"ईश्वरस्सर्वभूतानां हृद्देशेर्जुन तिष्ठति। भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया" इति॥ ४०॥

नन्वेवं विधिनिषेधशास्त्रानर्थक्यं प्रसज्येतेत्युक्तम्; तत्राह—

कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः। २। ३। ४१॥

सर्वासु क्रियासु पुरुषेण कृतं प्रयत्नम् उद्योगमपेक्ष्यान्तर्यामी परमात्मा तदनुमतिदानेन प्रवर्तयति। परमात्मानुमतिमन्तरेणास्य प्रवृत्तिर्नोपपद्यत इत्यर्थः।कुत एतत्? विहितप्रतिषिद्धावैयर्थ्यादिभ्यः—आदिशब्देनानुग्रहनिग्रहादयो गृह्यन्ते। यथा द्वयोस्साधारणे धने परस्वत्वापादनमन्य-

१. तै. भारण. ३-११-१० ॥—२. बृ. ५-७-२२ ॥—३. गी. १५-१५ ॥—४. गी. १८-६१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तरानुमतिमन्तरेण नोपपद्यते ; अथापीतरानुमतेः स्वेनैव कृतमिति तत्फलं स्वस्यैव भवति । पापकर्मसु निवर्तनशक्तस्याप्यनुमन्तृत्वं न निर्दयत्वमावहतीति साङ्ख्यसमयनिरूपणे प्रतिपादितम् । नन्वेवम् [१] "एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषति एष एवासाधु कर्म कारयति तं यमधो निनीषति" इत्युन्निनीषयाऽधोनिनीषया च स्वयमेव साध्वसाधुनी कर्मणी कारयतीत्येतन्नोपपद्यते । उच्यते—एतन्न सर्वसाधारणम्, यस्त्वतिमात्रपरमपुरुषानुकूल्ये व्यवस्थितः प्रवर्तते ; तमनुगृह्णन् भगवान् स्वयमेव स्वप्राप्त्युपायेष्वतिकल्याणेषु कर्मस्वेव रुचिं जनयति । यश्चैतिमात्रप्रातिकूल्ये व्यवस्थितः प्रवर्तते ; [२]तं निगृह्णन् स्वप्राप्तिविरोधिष्वधोगतिसाधनेषु कर्मसु रुचिं जनयति । यथोक्तं भगवता स्वयमेव [३]"अहं सर्वस्य प्रभवो मत्तस्सर्वं प्रवर्तते। इति मत्वा भजन्ते मां बुधा भावसमन्विताः" इत्यारभ्य [४]"तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् । ददामि बुद्धियोगं तं येन मामुपयान्ति ते" [५]"तेषामेवानुकम्पार्थमहमज्ञानजं तमः नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता" इति। तथा [६]"असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम्" इत्यादि [७]"मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः" इत्यन्तमुक्त्वा [८]"तानहं द्विषतः क्रूरान् संसारेषु नराधमान्। क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु" इत्युक्तम् ॥ ४१ ॥

इति श्रीशारीरकमीमांसाभाष्ये परायत्ताधिकरणम् ॥ ६ ॥

वेदान्तसारे—परात्तुतच्छ्रुतेः॥ [९]"य आत्मानमन्तरो यमयति" इत्यादिश्रुतेरात्मनः कर्तृत्वं परायत्तम्, [१०]"सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनञ्च" इत्यादिस्मृतेश्च ॥ ४० ॥

कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थादिभ्यः ॥ जीवः स्वेच्छया प्रवृत्तिनिवृत्तिहेतुभूतं प्रयत्नं करोति, जीवेन तु कृतं प्रयत्नं प्रथमप्रवृत्तिहेतुम-

---

१. कौषी. ३-९ ॥—२. तं स्वप्राप्तिविरोधिषु अधोगतिसाधनेषु कर्मसु सज्जयति. पा ॥ ३. गी. १०-८ ॥—४.—५. गी. १०-१०,११ ॥—६.गी. १६-८ ॥—७. गी. १६-१८ ॥—८. गी. १६-१९ ॥—९. बृ. ५-७-२२ ॥—१०. गी. १५-१५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पेक्ष्य तदनुमतिदानेन परः प्रवर्तयति—इति तद्विधिनिषेधावैयर्थ्यनिग्रहानुग्रहेभ्योऽवगम्यते। यथा गुरुतरदार्वादिभरणमबलः प्रबलसहकृतः कुर्वन्नपि स्वीय प्रयत्नेन विधिनिषेधयोग्यो भवति ; एवमेव जीवः परमपुरुषानुमतिसहकृत प्रवर्तमानोऽपि विधिनिषेधयोग्य इति न कश्चिद्विरोधः ॥ ४१ ॥

इति वेदान्तसारे परायत्ताधिकरणम् ॥ ६ ॥

वेदान्तदीपे—परात्तु तच्छ्रुतेः ॥ कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः ॥ इदानीं जीवस्य कर्तृत्वं किं परमात्मायत्तम् ? उत स्वायत्तमितिसंशयः। स्वायत्तमिति पूर्वः पक्षः, विधिनिषेधशास्त्रानर्थक्यापत्तेः यस्स्वबुद्ध्यैव प्रवृत्तिनिवृत्तिशक्तः स एव हि नियोज्यो निग्रहानुग्रहास्पदं च भवतीति। राद्धान्तस्तु १ 'अन्तः प्रविष्टश्शास्ता जनानां सर्वात्मा" २ "य आत्मानमन्तरो यमयति" इत्यादिश्रुतेः परमात्मायत्तमेव कर्तृत्वम् ; तच्च जीवेन स्वबुद्ध्या कृतं प्रयत्नमपेक्ष्य तदनुमतिदानेनेति विधिनिषेधावैयर्थ्यम्; अतएव निग्रहानुग्रहास्पदं च। सूत्रद्वयमपि व्याख्यातम् ॥ ४१ ॥

इति वेदान्तदीपे परायत्ताधिकरणम् ॥ ६ ॥

(श्रीशारीरकमीमांसाभाष्ये अंशाधिकरणम् ॥ ७ ॥)

अंशो नानाव्यपदेशादन्यथाचापि दाशकितवादित्वमधीयत एके । २ । ३ । ४२ ॥

जीवस्य कर्तृत्वं परमपुरुषायत्तमित्युक्तम्; इदानीं किमयं जीवः परस्मादत्यन्तभिन्नः, उत परमेव ब्रह्म भ्रान्तम्, उत ब्रह्मैवोपाध्यवच्छिन्नम्, अथ ब्रह्मांश इति संशय्यते ; श्रुतिविप्रतिपत्तेस्संशयः। ननु ३"तदनन्यत्वमारम्भणशब्दादिभ्यः" ४"अधिकं तु भेदनिर्देशात्" इत्य-

१. तै. भारण. ३-११-२० ॥—२. बृ. ५-७-२२ ॥—३. शारी. २-१-१५ ॥—४. शारी. २-१-२२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्रैवायमर्थो निर्णीतः। सत्यम्, स एव नानात्वैकत्वश्रुतिविप्रतिपत्त्या आक्षिप्य जीवस्य ब्रह्मांशत्वोपपादनेन विशेषतो निर्णीयते; यावद्धि जीवस्य ब्रह्मांशत्वं न निर्णीतम्, तावज्जीवस्य ब्रह्मणोऽनन्यत्वं, ब्रह्मणस्तस्मादधिकत्वं च न प्रतितिष्ठति। किं तावत्प्राप्तम्? अत्यन्तभिन्न इति; कुतः? १"ज्ञाज्ञौ द्वावजावीशनीशौ"इत्यादिभेदनिर्देशात्। ज्ञाज्ञयोरभेदश्रुतयस्तु 'अग्निना सिञ्चेत्' इतिवद्गौरुद्धार्थप्रतिपादनादौपचारिक्यः। ब्रह्मणोऽशो जीव इत्यपि न साधीयः, एकवस्त्वेकदेशवाची ह्यंशशब्दः, जीवस्य ब्रह्मैकदेशत्वे तद्गता दोषा ब्रह्मणि भवेयुः।न च ब्रह्मखण्डो जीव इत्यंशत्वोपपत्तिः, खण्डनानर्हत्वाद्ब्रह्मणः, प्रागुक्तदोषप्रसङ्गाच्च। तस्मादत्यन्तभिन्नस्य च तदंशत्वं दुरुपपादम्। यद्वा भ्रान्तं ब्रह्मैव जीवः, कुतः २"तत्त्वमसि" ३"अयमात्मा ब्रह्म" इत्यादिब्रह्मात्मभावोपदेशात्। नानात्ववादिन्यस्तु प्रत्यक्षादिसिद्धार्थानुवादित्वादनन्यथासिद्धाद्वैतोपदेशपराभिः श्रुतिभिः प्रत्यक्षादय इवाविद्यान्तर्गताः ख्याप्यन्ते। अथवा ब्रह्मैवानाद्युपाध्यवच्छिन्नं जीवः। कुतः,तत एव ब्रह्मात्मभावोपदेशात्। नचायमुपाधिर्भ्रान्तिपरिकल्पित इति वक्तुं शक्यम्, बन्धमोक्षादिव्यवस्थानुपपत्तेः—इति ॥

एवं प्राप्तेऽभिधीयते ब्रह्मांश इति। कुतः? नानाव्यपदेशात्, अन्यथाच—एकत्वेन व्यपदेशात्। उभयथाहि व्यपदेशो दृश्यते। नानात्वव्यपदेशस्तावत्स्रष्टृत्वसृज्यत्वनियन्तृत्वनियाम्यत्वसर्वज्ञत्वाज्ञत्वस्वाधीनत्वपराधीनत्वशुद्धत्वाशुद्धत्वकल्याणगुणाकरत्वतद्विपरीतत्वपतित्वशेषत्वादिभिर्दृश्यते। अन्यथाच अभेदेन व्यपदेशोऽपि २"तत्त्वमसि"३"अयमात्मा ब्रह्म"इत्यादिभिर्दृश्यते। अपि दाशकितवादित्वमधीयत एके४"ब्रह्मदाशा

---

१. श्वे. १-९ ॥—२. छा. ६-१०-३ ॥—३. बृ. ६-४-५ ॥—४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ब्रह्मदासा ब्रह्मे मे कितवाः" इत्याथर्वणिका ब्रह्मणो दाशकितवादित्वमप्यधीयते। ततश्च सर्वजीवव्यापित्वेनाभेदो व्यपदिश्यत इत्यर्थः।एवमुभयव्यपदेशमुख्यत्वसिद्धये जीवोऽयं ब्रह्मणोंश इत्यभ्युपगन्तव्यः । नच भेदव्यपदेशानां प्रत्यक्षादिप्रसिद्धार्थत्वेनान्यथासिद्धत्वम् , ब्रह्मसृज्यत्वतन्नियाम्यत्वतच्छरीरत्वतच्छेषत्वतदाधारत्वतत्पाल्यत्वतत्संहार्यत्वतदुपासकत्वतत्प्रसादलभ्यधर्मार्थकाममोक्षरूपपुरुषार्थभात्त्वादयस्तत्कृतश्च जीवब्रह्मणोर्भेदः, प्रत्यक्षाद्यगोचरत्वेनानन्यथासिद्धः। अतो न जगत्सृष्ट्यादिवादिनीनां प्रमाणान्तरसिद्धभेदानुवादेन मिथ्यार्थोपदेशपरत्वम् । नचाखण्डैकरसचिन्मात्रस्वरूपेण ब्रह्मणा आत्मनोऽतद्भावानुसन्धानम्, बहुभवनसङ्कल्पपूर्वकवियदादिसृष्टिं,जीवभावेन तत्प्रवेशं, विचित्रनामरूपव्याकरणं,तत्कृतानन्तविषयानुभवनिमित्तसुखदुःखभागित्वम्,अभोक्तृत्वेन तत्र स्थित्वा तन्नियमनेनान्तर्यामित्वं, जीवभूतस्य स्वस्य कारणब्रह्मात्मभावानुसन्धानं, संसारमोक्षं, तदुपदेशशास्त्रं च कुर्वाणेन भ्रमितव्यमित्युपदिश्यते, तथा सत्युन्मत्तप्रलपितत्वापातात् । उपाध्यवच्छिन्नं ब्रह्म जीव इत्यपि न साधीयः, पूर्वनिर्दिष्टनियन्तृत्वनियाम्यत्वादिव्यपदेशबाधादेव। नहि देवदत्तादेरेकस्यैव गृहाद्युपाधिभेदान्नियन्तृनियाम्यभावादिसिद्धिः। अत उभयव्यपदेशोपपत्तये जीवोऽयं ब्रह्मणोंश इत्यभ्युपेत्यम् ॥ ४२ ॥

मन्त्रवर्णात् । २ । ३ । ४३ ॥

[1]"पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि" इति मन्त्रवर्णाच्च ब्रह्मणोंशो जीवः। अंशवाची हि पादशब्दः। [2]"विश्वा भूतानि" इति जीवानां बहुत्वाद्बहुवचनं मन्त्रे, सूत्रेऽपि अंश इत्येकवचनं जात्यभिप्रायम्। [3]"नात्माश्रुतेः" इत्यत्राप्येकवचनं जात्यभिप्रायम्, [4]"नित्यो

१. पुरुषम् ॥—२. छान्दो. ३-३-१८ ॥—६. श्वे. ६-१३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्" इत्यादिश्रुतिभ्य ईश्वराद्भेदस्यात्मनां बहुत्वनित्यत्वयोश्चाभिधीयमानत्वात्। एवं नित्यानामात्मनां बहुत्वे प्रामाणिके सति ज्ञानस्वरूपत्वेन सर्वेषामेकरूपत्वेऽपि भेदकाकारः आत्मयाथात्म्यवेदनक्षमैरवगम्यते। [१]"असन्ततेश्चाव्यतिकरः" इत्यनन्तरमेवचात्मबहुत्वं वक्ष्यति ॥ ४३ ॥

अपि स्मर्यते । २ । ३ । ४४ ॥

[२]"ममैवांशो जीवलोके जीवभूतस्सनातनः" इति जीवस्य पुरुषोत्तमांशत्वं स्मर्यते ; अतश्चायमंशः ॥ ४४ ॥

अंशत्वेऽपि जीवस्य ब्रह्मैकदेशत्वेन जीवगता दोषा ब्रह्मण एवेत्याशङ्क्याह—

प्रकाशादिवत्तु नैवं परः । २ । ३ । ४५ ॥

तुशब्दश्चोद्यं व्यावर्तयति ; प्रकाशादिवज्जीवः परमात्मनोंऽशः यथाऽग्न्यादित्यादेर्भास्वतो भारूपः प्रकाशोंऽशो भवति, यथा गवाश्वशुक्लकृष्णादीनां गोत्वादिविशिष्टानां वस्तूनां गोत्वादीनि विशेषणान्यंशाः, यथा वा देहिनो देवमनुष्यादिर्देहोंऽशः;तद्वत्।एकवस्त्वेकदेशत्वं ह्यंशत्वम्, विशिष्टस्यैकस्य वस्तुनो विशेषणमंश एवा तथाच विवेचकाः विशिष्टे वस्तुनि विशेषणांशोऽयम्, विशेष्यांशोयमिति व्यपदिशन्ति। विशेषणविशेष्ययोरंशांशित्वेऽपि स्वभाववैलक्षण्यं दृश्यते। एवं जीवपरयोर्विशेषणविशेष्ययोरंशांशित्वं, स्वभावभेदश्चोपपद्यते। तदिदमुच्यते—नैवं पर इति। यथाभूतो जीवः,न तथाभूतः परः। यथैवहि प्रभायाः प्रभावानन्यथाभूतः, तथा प्रभास्थानीयात्स्वांशाज्जीवादंशी परोऽप्यर्थान्तरभूत इत्यर्थः। एवं

१. शारी २-३-७ ॥—२. गी. १५-७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जीवपरयोर्विशेषणविशेष्यत्वकृतं स्वभाववैलक्षण्यमाश्रित्य भेदनिर्देशाः प्रवर्तन्ते; अभेदनिर्देशास्तु पृथक्सिद्ध्यनर्हविशेषणानां विशेष्यपर्यन्तत्वमाश्रित्य मुख्यत्वेनोपपद्यन्ते। १"तत्त्वमसि" २"अयमात्मा ब्रह्म" इत्यादिषु, तच्छब्दब्रह्मशब्दवत् त्वमयमात्मेतिशब्दा अपि जीवशरीरकब्रह्मवाचकत्वेनैकार्थाभिधायित्वादित्ययमर्थः प्रागेव प्रपञ्चितः ॥ ४५ ॥

स्मरन्ति च । २ । ३ । ४६ ॥

एवं प्रभाप्रभावद्रूपेण शक्तिशक्तिमद्रूपेण शरीरात्मभावेन चांशांशिभावं जगद्ब्रह्मणोः पराशरादयः स्मरन्ति ३"एकदेशस्थितस्याग्नेर्ज्योत्स्ना विस्तारिणी यथा । परस्य ब्रह्मणश्शक्तिस्तथेदमखिलं जगत्" ४"यत्किञ्चित्सृज्यते येन सत्त्वजातेन वै द्विज । तस्य सृज्यस्य सम्भूतौ तत्सर्वं वै हरेस्तनुः" इत्यादिना। चकराच्छ्रुतयोऽपि—५"यस्यात्मा शरीरम्" इत्यादिना आत्मशरीरभावेनांशांशित्वं वदन्तीत्युच्यते ॥ ४६ ॥

एवं ब्रह्मणोंऽशत्वे,ब्रह्मप्रवर्त्यत्वे, ज्ञत्वे च सर्वेषां समाने केषांचिद्वेदाध्ययनतदर्थानुष्ठानाद्यनुज्ञा, केषांचित्तत्परिहारः, केषांचिद्दर्शनस्पर्शनाद्यनुज्ञा, केषांचित्तत्परिहारश्च, शास्त्रेषु कथमुपपद्यत इत्याशङ्क्याह—

अनुज्ञापरिहारौ देहसम्बन्धाज्ज्योतिरादिवत् । २ । ३ । ४७ ॥

सर्वेषां ब्रह्मांशत्वज्ञत्वादिनैकरूपत्वे सत्यपि ब्राह्मणक्षत्रियवैश्यशूद्रादिरूपशुच्यशुचिदेहसम्बन्धनिबन्धनावनुज्ञापरिहारावुपपद्येते; ज्योतिरादिवत्—यथाग्नेरग्नित्वेनैकरूपत्वेऽपि श्रोत्रियागारादग्निराहियते ; श्मशानादेस्तु परिहियते ; यथाचान्नादि श्रोत्रियादेरनुज्ञायते ; अभिशस्तादेस्तु परिहियते ॥ ४७ ॥

---

१. छा. ६-१०-३ ॥—२. बृ. ६-४-५ ॥—३. वि. पु. १-२२-५६॥—४. वि. पु. १-२२-३८ ॥—५. बृ. ५-७-२२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

असन्ततेश्चाव्यतिकरः । २ । ३ । ४८ ॥

ब्रह्मांशत्वादिनैकरूपत्वे सत्यपि जीवानामन्योन्यभेदादणुत्वेन प्रतिशरीरं भिन्नत्वाच्च भोगव्यतिकरोऽपि न भवति । भ्रान्तब्रह्मजीववादे चोपहितब्रह्मजीववादे च जीवपरयोर्जीवानां च भोगव्यतिकरादयस्सर्वे दोषास्सन्तीत्यभिप्रायेण स्वपक्षे भोगव्यतिकराभाव उक्तः॥ ४८॥

ननु भ्रान्तब्रह्मजीववादेऽप्यविद्याकृतोपाधिभेदाद्भोगव्यवस्थादय उपपद्यन्ते; अत आह--

आभास एव च । २ । ३ । ४९ ॥

अखण्डैकरसप्रकाशमात्रस्वरूपस्य स्वरूपतिरोधानपूर्वकोपाधिभेदोपपादनहेतुराभास एवाप्रकाशैकस्वरूपस्य प्रकाशतिरोधानं प्रकाशनाश एवेति प्रागेवोपपादितम् । 'आभासा एव' इति वा पाठः;तथासति हेतव आभासाः, चकारात्[1] "पृथगात्मानं प्रेरितारं च मत्वा"[2] "ज्ञाज्ञौ द्वौ"[3] "तयोरन्यः पिप्पलं स्वाद्वत्ति" इत्यादिश्रुतिविरोधश्च । अविद्यापरिकल्पितोपाधिभेदेऽपि सर्वोपाधिभिरुपहितस्वरूपस्यैकत्वाभ्युपगमात् भोगव्यतिकरस्तदवस्थ एव ॥ ४९ ॥

पारमार्थिकोपाध्युपहितब्रह्मजीववादेऽप्युपाधिभेदहेतुभूतानामदृष्टवशाद्व्यवस्था भविष्यतीत्याशङ्क्याह--

अदृष्टानियमात् । २ । ३ । ५० ॥

उपाधिपरम्पराहेतुभूतस्यादृष्टस्यापि ब्रह्मस्वरूपाश्रयत्वेन नियमहेत्वभावादव्यवस्थैव,उपाधिभिरदृष्टैश्च स्वसम्बन्धेन ब्रह्मस्वरूपच्छेदासम्भवात् ॥ ५० ॥

---

१ ॥—२. श्वे. १-६, ९ ॥—३. श्वे. ४-६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अभिसन्ध्यादिष्वपि चैवम् । २ । ३ । ५१ ॥

अदृष्टहेतुभूताभिसन्ध्यादिष्वप्युक्तादेव हेतोरनियम एव ॥५१॥

प्रदेशभेदादिति चेन्नान्तर्भावात् । २ । ३ । ५२॥

यद्यप्येकमेव ब्रह्मस्वरूपम्, तच्छेदानर्हं नानाविधोपाधिभिस्सम्बध्यते; तथाप्युपाधिसम्बन्धिब्रह्मप्रदेशभेदादुपपद्यत एव भोगव्यवस्थेति चेत्—तन्न, उपाधीनां तत्तत्र गमनात्सर्वप्रदेशानां सर्वोपाध्यन्तर्भावाद्व्यतिकरस्तदवस्थ एव । प्रदेशभेदेन सम्बन्धेऽपि सर्वस्य ब्रह्मप्रदेशत्वात्तत्प्रदेशसम्बन्धि दुःखं ब्रह्मण एव स्यात्। पूर्वत्र[१] "नित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतरनियमो वाऽन्यथा" [२] "उपलब्धिवदनियमः" इत्याभ्यां सूत्राभ्यां वेदबाह्यानां सर्वगतजीववादिनां दोष उक्तः;अत्र तु[३] "आभास एव च" इत्यादिभिस्सूत्रैर्वेदावलम्बिनामात्मैकत्ववादिनां दोष उच्यते ॥

इति श्रीशारीरकमीमांसाभाष्ये अंशाधिकरणम् ॥ ७ ॥

इति श्रीभगवद्रामानुजविरचिते शारीरकमीमांसाभाष्ये
द्वितीयस्याध्यायस्य तृतीयः पादः ॥ ३ ॥

वेदान्तसारे—अंशो नानाव्यपदेशादन्यथाचापि दाशकितवादित्वमधीयत एके ॥ जीवात्मा परमपुरुषांशः, ४"पृथगात्मानं प्रेरितारं च मत्वा"५"स कारणं करणाधिपाधिपः" इत्यादिनानाव्यपदेशात्; अन्यथा६"तत्त्वमसि" ७"अयमात्मा ब्रह्म"इति ऐक्योपदेशाच्च८"ब्रह्म दाशाः" इत्यादिसर्वजीवानामप्यैक्यमधीयत एके ; अंशत्वाभ्युपगमेह्युभयं मुख्यं भवति ॥ ४२ ॥

मन्त्रवर्णात् ॥ ९"पादोऽस्य विश्वा भूतानि" इति मन्त्रवर्णाच्च ॥ ४३ ॥

अपिस्मर्यते॥१०"ममैवांशो जीवलोके जीवभूतस्सनातनः"इत्यादिना ॥

१॥—२॥—३.शारी.२-३. ३२,३६,४९॥—४. श्वे. १-६ ॥—५. श्वे. ६-९ ॥—६. छा. ६-१४-३ ॥—७.बृ. ६-४-५ ॥—८.—९. पुरुषसूक्तम् ॥—१०. गी.१५-७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रकाशादिवत्तु नैवं परः ॥ ब्रह्मांशत्वेऽपि जीवस्य, जीवो यत्स्वरूपो यत्स्वभावश्च, नैवं परः—निरवद्यः सर्वज्ञः सत्यसङ्कल्प एव सर्वदा । कथं? प्रकाशादिवत् ; प्रकाशविशिष्टानां मणिप्रभृतीनां प्रकाशः विशिष्टैकदेशत्वेन यथांशः ; आदिशब्दाद्विशेषणतैकस्वभावजातिगुणशरीराणि गृह्यन्ते । विशेषणानां विशिष्टैकदेशतया तदंशत्वेऽपि विशेषणविशेष्ययोः स्वरूपस्वभावभेदो न विरुद्धः ; १"य आत्मनि तिष्ठन्यस्याऽऽत्मा शरीरम्" इति हि श्रुतिः ॥ ४५ ॥

स्मरन्ति च ॥ चिच्चिदात्मकजगतो ब्रह्मांशत्वं प्रकाशादिवदिति पराशरादयः स्मरन्ति२"एकदेशस्थितस्याग्नेः ज्योत्स्ना विस्तारिणी यथा । परस्य ब्रह्मणश्शक्तिस्तथेदमखिलं जगत्"३"तत्सर्वं वै हरेस्तनुः"४"तानि सर्वाणि तद्वपुः" इत्यादिषु ॥ ४६ ॥

अनुज्ञापरिहारौ देहसम्बन्धाज्ज्योतिरादिवत्॥ब्रह्मांशत्वेऽपि सर्वजीवानां कस्यचिद्वेदाध्ययनादौ अनुज्ञा, कस्यचित् परिहारः, इत्येतौ ब्राह्मणादिदेहविशेषसम्बन्धादुपपद्येते ; यथाग्न्यादेः श्रोत्रियागारश्मशानादिसम्बन्धात्॥

असन्ततेश्चाव्यतिकरः ॥ प्रतिदेहं भिन्नत्वात्, अणुत्वेन तत्रतत्र परिच्छिन्नत्वाच्च, ज्ञानसुखाद्यव्यतिकरः । अज्ञानोपाधिभ्यां ब्रह्मैव सम्बध्यते इति पक्षद्वयेऽपि न तत्तद्व्यवस्था॥ ४८॥

आभासा एव च ॥ पक्षद्वयेऽपि हेतवश्च आभासाः ॥ ४९ ॥

अदृष्टानियमात् ॥ सत्यमिथ्योपाधिकृतत्वेऽपि आत्मनां ब्रह्मणः एव अज्ञानमुपाधिश्च इति तत्तत्कृतेनादृष्टादिनापि न नियमः ॥ ५० ॥

अभिसन्ध्यादिष्वपि चैवम् ॥अदृष्टहेतुभूताभिसन्ध्यादिष्वपि चैवमेव

प्रदेशभेदादिति चेन्नान्तर्भावात् ॥उपाधिसम्बन्धिब्रह्मप्रदेशभेदात् व्यवस्था— इति चेत्—न, उपाधिषु गच्छत्सु सर्वप्रदेशानां तदन्तर्भावात् ॥

इति वेदान्तसारे अंशाधिकरणम् ॥ ७ ॥

इति श्रीभगवद्रामानुजविरविरचिते श्रीवेदान्तसारे

द्वितीयस्याध्यायस्य तृतीयः पादः ॥ ३ ॥

---

१. बृ. ५-७-२२ ॥—२. वि-पु. १-२२-५६ ॥—३. वि-पु. १-२२-३८ ॥—४. वि-पु. १-२२-८६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वेदान्तदीपे—अंशो नानाव्यपदेशादन्यथाचापि दाशकितवादित्वमधीयत एके ॥ किं जीवः परमात्मनोऽत्यन्तभिन्नः, उत परमात्मैवाज्ञः, अथ परमात्मैवोपाधिसम्बद्धः, परमात्मांशो वेति संशयः; अत्यन्तभिन्न इति प्रथमः पक्षः,१"पृथगात्मानं प्रेरितारञ्च मत्वा"२"तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्यो अभिचाकशीति" ३"अनीशश्चात्मा बध्यते भोक्तृभावात्" ४"सर्वस्य वशी सर्वस्येशानः" इत्यादिभेदश्रुतेः, जीवपरमात्मनोः कर्मपरतन्त्रतातद्विपरीतत्वश्रुतेश्च;अभेदश्रुतयः'नरपतिरेव सर्वलोकः'इतिवदौपचारिक्यः—इति। भेदश्रुतीनामविद्वद्विषयतयावा उपाधिसम्बन्धविषयतयावा अमुख्यवृत्तिसम्भवादभेदश्रुतिमुख्यत्वाय—अज्ञः परमात्मा,उपाधिसम्बद्धो वा जीवः—इति युक्तम्। राद्धान्तस्तु—नानात्वैकत्वव्यपदेशात् परमात्मनस्सत्यसङ्कल्पत्वसर्वज्ञत्वानिरवद्यत्वश्रुतेरज्ञत्वोपाधिसम्बन्धाद्यनुपपत्तेर्जीवशब्दस्य जीवशरीरकपरमात्मवाचित्वेन५ "तत्त्वमसि" ६"अयमात्मा ब्रह्म" इति सामानाधिकरण्यस्य मुख्यत्वा च्छरीरशरीरिणोर्विशेषणविशेष्यभूतयोः स्वरूपस्वभावभेदेन च भेदश्रुतेश्च मुख्यत्वाद्विशिष्टवस्त्वेकदेशतया च विशेषणस्य परमात्मांशो जीवः; जीवशरीरत्वञ्च परमात्मनः ७"यस्यात्मा शरीरम्" इत्यादिषु सिद्धम्। सूत्रार्थस्तु—अंशः—परमात्मांशा जीवः, नानाव्यपदेशात् - भेदव्यपदेशात्, अन्यथाच अभेदव्यपदेशाच्च ; उक्तनीत्या उभयमुख्यत्वायेत्यभिप्रायः; दाशकितवादित्वमप्यधीयत एके ८" ब्रह्म दाशा ब्रह्म दासाः " इत्यादिना दाशकितवादित्वमप्यधीयत एके शाखिनः; सर्वजीवव्यापित्वादभेदोपदेशस्य तत्रात्यादरः प्रतीयत इत्यर्थः॥ ४२ ॥

मन्त्रवर्णात् ॥मन्त्रवर्णाच्चांश एव जीवः,९"पादोऽस्य विश्वा भूतानि" इति पादशब्दोऽशवाची ॥ ४३ ॥

अपिस्मर्यते ॥ १०" ममैवांशो जीवलोके जीवभूतस्सनातनः" इति जीवस्य परमात्मांशत्वं स्मर्यते च ॥ ४४ ॥

एकद्रव्यैकदेशत्वं ह्यंशत्वम्; अतो जीवस्य ब्रह्मैकदेशत्वेन जीवदोषा ब्रह्मणो दोषा एवेत्याशङ्क्याह—

प्रकाशादिवत्तु नैवं परः॥ तुशब्दश्शङ्कानिवृत्त्यर्थः;प्रकाशवतां मणिद्यु-

---

१. श्वे. १-६ ॥—२. श्वे. ४-६ ॥—३. श्वे. १-८ ॥—४. बृ. ६-४-२२ ॥—५. छा. ६-१०-३ ॥—६. बृ. ६-४-५ ॥—७. बृ. ५-७-२२ ॥—८॥—९. पुरुषसूक्तम् ॥—१०. गी. १५-७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मणिप्रभृतीनां प्रकाशविशिष्टानां विशेषणभूतः प्रकाशः यथांशः, तद्वज्जीवशरीरतया जीवविशिष्टस्य ब्रह्मणोऽशो जीवः; विशिष्टवस्त्वैकदेशतया विशेषणस्य, विशेषणं विशिष्टस्यांशः; आदिशब्दात् द्रव्यविशेषणतैकस्वभावजातिगुणशरीराणि गृह्यन्ते; विशेषणविशेष्ययोः स्वरूपस्वभावभेदाद्विशेषणभूतो जीवः यत्स्वरूपो यत्स्वभावश्च, नैवं परः - सर्वज्ञस्सत्यसङ्कल्पो नित्यनिरवद्यश्चेत्यर्थः ॥ ४५ ॥

स्मरन्ति च॥ प्रकाशादित् जीवस्यांशत्वं पराशरादयः स्मरन्ति १"एकदेशस्थितस्याग्नेर्ज्योत्स्ना विस्तारिणी यथा । परस्य ब्रह्मणश्शक्तिस्तथेदमखिलं जगत्" । तथा परं प्रति शरीरत्वं च २"यत्किञ्चित्सृज्यते येन सत्त्वजातेन वै द्विज । तस्य सृज्यस्य सम्भूतौ तत्सर्वं वै हरेस्तनुः" इति ॥ ४६ ॥

ब्रह्मांशत्वेन च सर्वेषामात्मनां समत्वाद्भेदाध्ययनादौ केषांचिदनुज्ञा, केषांचित्परिहारश्च कथमुपपद्यत इत्यत्राह—

अनुज्ञापरिहारौ देहसम्बन्धाज्ज्योतिरादिवत् ॥ ब्राह्मणादिशुच्यशुचिदेहसम्बन्धात् अनुज्ञापरिहारौ उपपद्यते,ज्योतिरादिवत्*ज्योतिः—अग्निः यथा श्रोत्रियागारादग्निराहृियते, श्मशानादेस्तु परिहृियते; यथाचान्नादिः श्रोत्रियादेरनुज्ञायते, अभिशस्तादेश्च परिहृियते; तद्वत् ॥ ४७ ॥

असन्ततेश्चाव्यतिकरः ॥ जीवानां प्रतिशरीरं भिन्नत्वादणुत्वेन तत्र-तत्रावच्छिन्नत्वाच्च न भोगव्यतिकरश्च। अज्ञब्रह्मजीववादे चोपहितब्रह्मजीववादे चाज्ञानसम्बन्धिचोपाधिसम्बन्धि च ब्रह्मैवेति भोगव्यवस्था न सिद्ध्यतीत्यभिप्रायः ॥ ४९ ॥

आभासा एव च ॥ अज्ञब्रह्मजीववादे सर्वज्ञस्य ब्रह्मणः अज्ञानकल्पनस्वरूपातिरोधानकल्पनाहेतवः आभासा एव । चकारान्निरवद्यत्वादिश्रुतिविरोधश्च ॥ ४९ ॥

पारमार्थिकोपाधिसम्बन्धिब्रह्मजीववादे अनाद्यदृष्टप्रवाहेणोपधिप्रवाहानादित्वात्तत्सम्बन्धिनि ये दोषाः, न ते ब्रह्मणि प्रसज्यन्त इत्यत्राह—

अदृष्टानियमात् ॥ अदृष्टैस्तत्कृतोपाधिभिश्च ब्रह्मणश्छेदासम्भवात्तत्कृता दोषा ब्रह्मण्येव सम्भवेयुः ॥ ५० ॥

---

१. वि-पु. १-२२-५६ ॥—२. वि-पु. १-२२-३८ ॥

* ज्योतिषाऽग्नेरन्नस्य च शुच्यशुचिदेशसम्बन्धादनुज्ञापरिहारौ, तद्वत् पा ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अभिसन्ध्यादिष्वपि चैवम् ॥ अदृष्टहेतुभूताभिसन्ध्यादिष्वप्युपाधिब्रह्मव्यतिरिक्तवस्त्वन्तराभावात्पूर्वपूर्वोपाधियुक्तं ब्रह्मैवेति न कश्चिद्विशेषः॥

प्रदेशभेदादिति चेन्नान्तर्भावात् ॥ उपाधिसम्बन्धिब्रह्मप्रदेशादनुपहितब्रह्मप्रदेशो भिद्यते ; अतोऽव्यवस्थेति चेन्न, उपाधिषु गच्छत्सु पूर्वमनुपहितब्रह्मप्रदेशस्याप्यन्तर्भावात् ॥ ५२ ॥

इति वेदान्तदीपे अंशाधिकरणम् ॥ ७ ॥

इति श्रीभगवद्रामानुजविरचिते श्रीवेदान्तदीपे

द्वितीयस्याध्यायस्य तृतीयः पादः॰

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीमते रामानुजाय नमः

श्रीभगवद्रामानुजविरचिते

श्रीशारीरकमीमांसाभाष्ये

(द्वितीयाध्याये - चतुर्थः पादः-प्राणोत्पत्त्यधिकरणम् ॥)

तथा प्राणाः । २ । ४ । १ ॥

ब्रह्मव्यतिरिक्तस्य वियदादेः कृत्स्नस्य कार्यत्वेनोत्पत्तावुक्तायां जीवस्य कार्यत्वेऽपि स्वरूपान्यथाभावलक्षणोत्पत्तिरपोदिता; तत्प्रसङ्गेन जीवस्वरूपं शोधितम्; सम्प्रति जीवोपकरणानामिन्द्रियाणां प्राणस्य चोत्पत्त्यादिप्रकारो विशोध्यते । तत्र किमिन्द्रियाणां कार्यत्वं जीववत्; उत वियदादिवदिति चिन्त्यते । किं युक्तम्? जीववदेवेत्याह पूर्वपक्षी—तथा प्राणाः—इति । प्राणाः—इन्द्रियाणि। यथा जीवो नोत्पद्यते; तथेन्द्रियाण्यपि नोत्पद्यन्ते । कुतः? श्रुतेः । यथा जीवस्यानुत्पत्तिः श्रुतेरवगम्यते; तथा [1]प्राणानामप्यनुत्पत्तिः श्रुतेरेवावगम्यते। तथा प्राणा इति [2]प्रमाणमप्यतिदिश्यते।का पुनरत्र श्रुतिः?[2] "असद्वा इदमग्र आसीत् तदाहुः किं तदासीदिति ऋषयो वा व ते अग्रे सदासीत् तदाहुः के ते ऋषय इति प्राणा वा व ऋषयः" इति जगदुत्पत्तेः प्रागिन्द्रियाणां सद्भावः श्रूयते । प्राणशब्दे बहुवचनादिन्द्रियाण्येवेति निश्चीयते । नचेयं श्रुतिः

१. प्रमाणमपि श्रुतिदिश्यते. पा ॥—२. शतपथ. ६-१-१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

१"वायुश्चान्तरिक्षं चैतदमृतम्"२"सैषाऽनस्तमिता देवता यद्वायुः"इतिवच्चिरकालावस्थायित्वेन परिणेतुं शक्या,३"असद्वा इदमग्र आसीत्" इति कृत्स्नप्रपञ्चप्रलयवेलायामप्यवस्थितत्वश्रवणात्। उत्पत्तिवादिन्यस्तु जीवोत्पत्तिवादिन्य इव नेतव्या इति ॥

(सिद्धान्तः)

एवं प्राप्तेऽभिधीयते—वियदादिवदेव प्राणाश्चोत्पद्यन्ते;कुतः? ४"सदेव सोम्येदमग्र आसीत्" ५"आत्मा वा इदमेक एवाग्र आसीत्" इत्यादिषु प्राक्सृष्टेरेकत्वावधारणात्,६"एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि च" इतीन्द्रियाणामुत्पत्तिश्रवणाच्च, प्रागवस्थानासम्भवात्। नचात्मोत्पत्तिवादवदिन्द्रियोत्पत्तिवादाः परिणेतुं शक्याः, आत्मवदुत्पत्तिप्रतिषेधश्रुतीनां नित्यत्वश्रुतीनां चादर्शनात्।३"असद्वा इदमग्र आसीत्" इत्यादिवाक्येऽपि प्राणशब्देन परमात्मैव निर्दिश्यते। ७"सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जिहते" इति प्राणशब्दस्य परमात्मन्यपि प्रसिद्धेः। ३"प्राणा वा व ऋषयः" इति ऋषिशब्दश्च सर्वज्ञे तस्मिन्नेव युज्यते। न त्वचेतनेष्विन्द्रियेषु ॥ १ ॥

ऋषयः, प्राणा इति च बहुवचनश्रुतिः कथमुपपद्यत इति चेत्—तत्राह—

गौण्यसम्भवात्तत्प्राक्छ्रुतेश्च । २ । ४ । २ ॥

बहुवचनश्रुतिर्गौणी, बह्वर्थासम्भवात् ; तस्यैव परमात्मनः सृष्टेः प्रागवस्थानश्रुतेरेव ॥ २ ॥

तत्पूर्वकत्वाद्वाचः । २ । ४ । ३ ॥

इतश्च प्राणशब्दः परमात्मवचनः; वाचः - परमात्मव्यतिरिक्तवि-

---

१. तै. ४ ३-३ ॥—२.—३. शतपथ. ६-१-१ ॥—४. छां. ६-२-१ ॥—५. ऐत. १-अ. १-खं. १ ॥—६. मु. २-१-३ ॥—७. छां. १-११-५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वयस्य नामधेयस्य वाग्विषयभूतवियदादिसृष्टिपूर्वकत्वात् । १"तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यां व्याक्रियत" इति नामरूपभाजामभावात्तदानीं वागादीन्द्रियकार्याभावाच्च तानि न सन्तीत्यर्थः ॥ ३ ॥

इति श्रीशारीरकमीमांसाभाष्ये प्राणोत्पत्त्यधिकरणम् ॥ १ ॥

वेदान्तसारे—तथा प्राणाः॥ यथा जीवोत्पत्तिः नित्यत्वश्रुतेर्नोपपद्यते; तथेन्द्रियाण्यपि २"असद्वा इदमग्र आसीत्...ऋषयो वा व तेऽग्रे सदासीत्... प्राणा वा व ऋषयः" इति प्रलयकाले प्राणानां स्थित्युपदेशात् ॥ १ ॥

नैवम्—

गौण्यसम्भवात्तत्प्राक्छ्रुतेश्च ॥ तस्य परमात्मन एव सृष्टेः प्रागवस्थानश्रुतेः ऋषिशब्दः प्राणशब्दश्च परमात्मन्येव; बहुत्वासम्भवात् बहुवचनश्रुतिर्गौणी ॥ २ ॥

तत्पूर्वकत्वाद्वाचः ॥ परमात्मनः सृष्टिपूर्वकत्वात् इत रेषां नामयोगस्य तदानीं प्राणशब्दो नेन्द्रियविषयः ॥ ३ ॥

इति वेदान्तसारे प्राणोत्पत्त्यधिकरणम् ॥ १ ॥

वेदान्तदीपे—तथा प्राणाः ॥ किं जीववदिन्द्रियाण्यपि नोत्पद्यन्ते, उत वियदादिवदुत्पद्यन्त इति संशयः । नोत्पद्यन्त इति पूर्वः पक्षः । प्रलयकाले अवस्थानश्रुतेः, उत्पत्तिवादाः जीवोत्पत्तिवादवन्नेयाः । २" असद्वा इदमग्र आसीत्...ऋषयो वा व तेऽग्रे सदासीत् के ते ऋषय इति प्राणा वा व ऋषयः" इतीन्द्रियाणां तदानीं स्थितिश्श्रूयते। राद्धान्तस्तु—प्राक्सृष्टेरेकत्वावधारणादिन्द्रियाणाम् ३"एतस्माज्जायते" इत्युत्पत्तिवादात्, उत्पत्तिनिषेधनित्यत्ववचनाभावाच्च,वियदादिवदुत्पद्यन्ते।२"प्राणा वा व ऋषयः"इति प्राणशब्दनिर्दिष्टः परमात्मा ४ । सूत्रार्थस्तु—तथा प्राणाः यथा जीवा नोत्पद्यन्ते तथा प्राणा अपि ॥ १ ॥

बहुत्वासम्भवाद्बहुवचनश्रुतिर्गौणीत्याह—

---

१. बृ. ३-४-७ ॥—२. शतपथ. ६-१-६ ॥—३. मु २-१-३ ॥—४. प्राणशब्दस्य * "प्राणमभिसंविशन्ति" इति परमात्मन्यपि प्रसिद्धेः २"प्राणा वाव ऋषयः"इति तस्यैव द्रष्टृत्वासम्भवात् . पा ॥ * छा. १-११-५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गौण्यसम्भवात्तत्प्राक्छ्रुतेश्च ॥ १"२प्राणा वा" इति बहुवचनश्रुतिर्गौणी, तदानीं बहुत्वासम्भवात्, तस्य परमात्मन एव प्रागवस्थानश्रुतेश्च ॥ २ ॥

तत्पूर्वकत्वाद्वाचः ॥ इतश्च; वाचः परमात्मव्यतिरिक्तनामधेयस्य तत्पूर्वकत्वात् वियदादिसृष्टिपूर्वकत्वादित्यर्थः ; ३"तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यां व्याक्रियत" इत्यादिश्रुतेः। अतः परमात्मैव प्राणशब्दनिर्दिष्टः ॥ ३ ॥

इति वेदान्तदीपे प्राणोत्पत्त्यधिकरणम् ॥ १ ॥

(श्रीशारीरकमीमांसाभाष्ये सप्तगत्यधिकरणम् ॥ २ ॥)

सप्त गतेर्विशेषितत्वाच्च । २ । ४ । ४ ॥

तानीन्द्रियाणि किं सप्तैव स्युः, अथवैकादशेति चिन्त्यते। श्रुतिविप्रतिपत्तेस्संशयः। किं प्राप्तम् ; सप्तेति । कुतः ? गतेर्विशेषितत्वाच्च। गतिस्तावज्जायमानेन म्रियमाणेन च जीवेन सह लोकेषु सञ्चरणरूपा सप्तानामेव श्रूयते४"सप्त इमे लोका येषु चरन्ति प्राणा गुहाशया निहितास्सप्तसप्त" इति। वीप्सा पुरुषभेदाभिप्राया।विशेषिताश्च ते गतिमन्तः प्राणाः स्वरूपतः ५"यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह। बुद्धिश्च न विचेष्टेत तामाहुः परमां गतिम्" इति । शरीरान्तस्सञ्चरणं विहाय मोक्षार्थगमनं परमा गतिः । एवं जीवेन सह जन्ममरणयोस्सप्तानामेव गतिश्रवणात् योगदशायां ज्ञानानीति विशेषितत्वाच्च जीवस्य करणानि श्रोत्रत्वक्चक्षु

---

१. शतपथ. ६-१-६॥ २. चस्त्वर्थः; तुशब्दात् पक्षो व्यावृत्तः;इन्द्रियाण्युत्पद्यन्त एव; कुतः? तत्प्राक् श्रुतेः तस्य परमात्मन एव प्रागवस्थानश्रुतेः * "सदेवसोम्येदमग्र आसीत्" †"आत्मावा इदमेक एवाग्र आसीत्"‡"एको हवै नारायण आसीत्"इति.पा।।*छा. ६-२-१॥†ऐत. १-१-१ ॥ ‡ महो. १-१ ॥— ३. बृ. ३-४-७ ॥—४. मु. २-१-८ ॥—५. कठ. २-६. १० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जिह्वाघ्राणबुद्धिमनांसि सप्तैवेति गम्यते। यानि त्वितराणि विषयाणां ग्राहकत्वेन [१]"अष्टौ ग्रहाः" [२]"सप्त वै शीर्षण्याः प्राणाः द्वाववाञ्चौ" इत्यादिषु चतुर्दशपर्यन्तानि प्राणप्रतिपादकवाक्येषु वाक्पाणिपादपायूपस्थाहङ्कारचित्ताख्यानीन्द्रियाणि प्रतीयन्ते, तेषां जीवेन सह गतिश्रवणाभावाज्जीवस्याल्पाल्पोपकारकत्वमात्रेणौपचारिकः प्राणव्यपदेशः ॥ ४ ॥

(सिद्धान्तः)

इति प्राप्ते प्रचक्ष्महे—

हस्तादयस्तु स्थितेऽतो नैवम् । २ । ४ । ५॥

न सप्तैवेन्द्रियाणि, अपि त्वेकादश, हस्तादीनामपि शरीरे स्थिते जीवे तस्य भोगोपकरणत्वात्, कार्यभेदाच्च। दृश्यते हि श्रोत्रादीनामिव हस्तादीनामपि कार्यभेद आदानादिः; अतस्तेऽपि सन्त्येव। अतो नैवम्—अतो हस्तादयो न सन्तीत्येवं न मन्तव्यमित्यर्थः। अध्यवसायाभिमानचिन्तावृत्तिभेदान्मन एव बुद्ध्यहङ्कारचित्तशब्दैर्व्यपदिश्यत इत्येकादशेन्द्रियाणि। अतः [३]"दशेमे पुरुषे प्राणाः आत्मैकादशः"इति—आत्मशब्देन मनोऽभिधीयते; [४]"इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचराः" [५]"तैजसानीन्द्रियाण्याहुर्देवा वैकारिका दश। एकादशं मनश्चात्र" इत्यादिश्रुतिस्मृतिसिद्धेन्द्रियसङ्ख्या स्थिता। अधिकसङ्ख्यावादाः मनोवृत्तिभेदाभिप्रायाः; न्यूनव्यपदेशास्तु तत्तत्र विवक्षितगमनादिकार्यविशेषप्रयुक्ताः ॥ ५ ॥

इति श्रीशारीरकमीमांसाभाष्ये सप्तगत्यधिकरणम् ॥ २ ॥

वेदान्तसारे—सप्त गतेर्विशेषितत्वाच्च॥ सप्तैवेन्द्रियाणि[६]"सप्त प्राणाः" [७]"यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह। बुद्धिश्च" इति सप्तानामेव सहगतेस्तेषामेव योगे विशेषितत्वाच्च ॥ ४ ॥

---

१. बृ. ५-२-९ ॥—२. यजु. ७-३-१०॥—३. बृ. ५-९-४ ॥—४. गी. १३-५ ॥—५. वि-पु. १-२-४७ ॥—६. मु. २-१-८ ॥—७. कठ. २-६-१० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हस्तादयस्तु स्थितेऽतो नैवम्॥ हस्तादयोऽपि इन्द्रियाणि, जीवे देहान्तरवस्थिते उपकारकत्वाविशेषात्; अतो न सप्तैव, अपित्वेकादश। १" दशेमे पुरुषे प्राणा आत्मैकादशः" २"इन्द्रियाणि दशैकञ्च" इति श्रुतिस्मृतिभ्याम्। बुद्ध्यादयः मनोवृत्तिभेदाः। सप्तानां गतिश्रवणं विशेषणञ्च तेषां प्राधान्यात्॥ ५॥

इति वेदान्तसारे सप्तगत्यधिकरणम्॥ २॥

वेदान्तदीपे—सप्त गतेर्विशेषितत्वाच्च॥ किमिन्द्रियाणि सप्तैव, उतैकादशेति संशयः। सप्तैवेति पूर्वः पक्षः—३ " सप्त प्राणाः प्रभवन्ति " इत्यादिषु सप्तानामेव जीवेन सह सञ्चारश्रवणात् ४" यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह। बुद्धिश्च" इतिसप्तानामेव योगकाले ज्ञानानि इति विशेषितत्वाच्च; श्रोत्रादीनि ज्ञानेन्द्रियाणि मनो बुद्धिश्चेति सप्तैव। राद्धान्तस्तु—श्रोत्रादीनि ज्ञानेन्द्रियाणि वागादीनिच कर्मेन्द्रियाणि मन इत्येकादशःकथं? वाग्घस्तादीनामपि श्रोत्रादिवत्कार्यभेदेन जीवोपकरणत्वाविशेषात् १" दशेमे पुरुषे प्राणा आत्मैकादशः" २" इन्द्रियाणि दशैकंच" इत्यादिश्रुतिस्मृतिभ्यः; वागादीनां जीवेन सह गमनाभावात्सप्तानामेव प्रयाणकाले गतिश्रवणं, योगकाले विशेषितत्वं च ज्ञानेन्द्रियाणां मनसस्तद्वृत्तिरूपबुद्धेश्च प्राधान्यात्। सूत्रार्थस्तु —सप्तगतेर्विशेषितत्वाच्च—सप्तानामेव गतिश्रवणात् ज्ञानानि पञ्च मनो बुद्धिश्चेति विशेषितत्वाच्च तानि सप्तैव॥ ४॥

हस्तादयस्तु स्थितेऽतो नैवम्॥नैवम्, न सप्तैवेन्द्रियाणीत्यर्थः, श्रोत्रादीनि ज्ञानेन्द्रियाणि पञ्च वाग्घस्तादीनि च कर्मेन्द्रियाणि पञ्च मनश्चेत्येकादश; तत्र श्रोत्रादीनि जीवेन सह शरीरान्तरगमनेऽपि गच्छन्ति; वाग्घस्तादीनि कर्मेन्द्रियाणि तु स्थिते शरीरे तेनैव सहोत्पत्तिविनाशयोर्गीन्युपकारकाणि; अतो नैवम्—इत्यन्वयः; एषां जीवोपकारकत्वाविशेषात्, १" दशेमे पुरुषे प्राणा आत्मैकादशः" इत्यादिवचनाच्चेत्यभिप्रायः॥ ५॥

इति वेदान्तदीपे सप्तगत्यधिकरणम्॥ २॥

---

१. बृ. ५-९-४॥—२. गी. १३-५॥—३. मु. २-१-८॥—४. कठ. २-६-१०॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

(श्रीशारीरकमीमांसाभाष्ये प्राणाणुत्वाधिकरणम्॥३॥)

अणवश्च । २ । ४ । ६ ॥

१"त एते सर्व एव समाः सर्वेऽनन्ताः" इत्यानन्त्यश्रवणाद्विभुत्वं प्राणानाम्—

(सिद्धान्तः)

इति प्राप्तेऽभिधीयते—२"प्राणमनूत्क्रामन्त सर्वे प्राणा अनूत्क्रामन्ति" इत्युत्क्रान्त्यादिश्रवणात्परिमितत्वे सिद्धे सत्युत्क्रान्त्यादिषु पार्श्वस्थैरनुपलभ्यमानत्वादणवश्च प्राणाः। आनन्त्यश्रुतिस्तु १"अथ यो हैतानन्तानुपास्ते" इत्युपासनश्रवणादुपास्यप्राणविशेषणभूतकार्यबाहुल्याभिप्राया ॥ ६ ॥

श्रेष्ठश्च । २ । ४ । ७ ॥

प्राणसंवादे शरीरस्थितिहेतुत्वेन श्रेष्ठतया निर्णीतो मुख्यप्राणः ३"आनीदवातं स्वधया तदेकम्" इति महाप्रलयसमये स्वकार्यभूतप्राणनसद्भावश्रवणात्, "एतस्माज्जायते" इति जन्मश्रवणस्य जीवजन्मश्रवणवदुपपत्तेर्नोत्पद्यत इत्याशङ्क्य प्राक्सृष्टेरेकत्वावधारणादिविरोधात्, ४"एतस्माज्जायते प्राणः" इति पृथिव्यादितुल्योत्पत्तिश्रवणात्, उत्पत्तिनिषेधाभावाच्च, जायत एव श्रेष्ठश्च प्राण इत्युच्यते। ३"आनीदवातम्" इति तु न जैवं श्रेष्ठं प्राणमभिप्रेत्योच्यते; अपितु परस्य ब्रह्मण एकस्यैव विद्यमानत्वमुच्यते। ३"अवातम्" इति तत्रैव श्रवणात्। पूर्वेणैव तुल्यन्यायत्वेऽपि पृथग्योगकरणमुत्तरचिन्तार्थम् ॥ ७ ॥

इति श्रीशारीरकमीमांसाभाष्ये प्राणाणुत्वाधिकरणम्॥ ३ ॥

१. छ. ३-५-१३ ॥—२. छ. ६-४-२ ॥—३.—४. मु. २-१-३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वेदान्तसारे—अणवश्च ॥ तानि चाणूनि, १ "प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति" इति गतिश्रवणात् ॥ ६ ॥

श्रेष्ठश्च ॥ श्रेष्ठः पञ्चवृत्तिप्राणोऽप्युत्पद्यते।उत्तरचिन्तार्थोऽयमनुवादः॥

इति वेदान्तसारे प्राणाणुत्वाधिकरणम् ॥ ३ ॥

वेदान्तदीपे—अणवश्च॥ इन्द्रियाणि किं सर्वगतानि, उताणुपरिमाणानीति संशयः; सर्वगतानीति पूर्वः पक्षः,१"त एते सर्व एव समास्सर्वेऽनन्ताः" इति प्राणानामानन्त्यश्रवणात्। राद्धान्तस्तु २"प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति"इति श्रवणात् परिमितत्वे सति अप्रत्यक्षत्वात् अणवः। आनन्त्यश्रुतिस्तु २"अथ यो हैताननन्तानुपास्ते" इत्युपासनविधानादुपासनफलबाहुल्यविषया ॥ ६ ॥

श्रेष्ठश्च ॥ श्रेष्ठः प्राणश्चोत्पद्यते। नात्र न्यायातिदेशः, अधिकाशङ्काभावात्। पृथग्योगकरणमुत्तरचिन्तार्थम्। श्रेष्ठः पञ्चवृत्तिः प्राणः। प्राणश्रैष्ठ्यं तु प्राणसंवादे तस्य श्रैष्ठ्याभिधानात् ॥ ७ ॥

इति वेदान्तदीपे प्राणाणुत्वाधिकरणम् ॥ ३ ॥

(श्रीशारीरकमीमांसाभाष्ये वायुक्रियाधिकरणम् ॥ ४ ॥)

न वायुक्रिये पृथगुपदेशात् । २ । ४ । ८ ॥

सोऽयं श्रेष्ठः प्राणः किं महाभूतद्वितीयवायुमात्रम्; तस्य वा स्पन्दरूपक्रियाः अथवा वायुरेव कश्चन विशेषमापन्नः—इति विशये वायुरेवेति प्राप्तम्, "यः प्राणस्स वायुः" इति व्यपदेशात्। यद्वा वायुमात्रे प्राणत्वप्रसिद्ध्यभावादुच्छ्वासनिःश्वासादिवायुक्रियायां प्राणशब्दप्रसिद्धेश्च तत्क्रियैव—

(सिद्धान्तः)

इति प्राप्ते वायुमात्रम्, नच तत्क्रियेत्युच्यते; कुतः, पृथगुपदे-

---

१. बृ. ३-५-१३ ॥—२. बृ. ६-४-२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शात्—[१]"एतस्माज्जायते प्राणो मनस्सर्वेंद्रियाणि च। खं वायुः" इति तत एव पृथगुपदेशात् वायुक्रियापि न भवति प्राणः; नहि तेजःप्रभृतीनां क्रिया तैस्सह पृथग्द्रव्यतयोपदिश्यते [२]"यः प्राणस्स वायुः" इति तु वायुरेवावस्थान्तरमापन्नः प्राणः; न तेजः प्रभृतिवत्तत्त्वान्तरमिति ज्ञापनार्थम्। उच्छ्वासनिश्वासादावपि प्राणः स्पन्दत इति क्रियावति द्रव्य एव प्राणशब्दप्रसिद्धिः; न क्रियमात्रे ॥ ८ ॥

किमयं प्राणो वायोर्विकारस्सन्नग्निवद्भूतान्तरम्[१], नेत्याह—

चक्षुरादिवत्तु तत्सहशिष्ट्यादिभ्यः ।२।४।९॥

नायं भूतविशेषः; अपितु चक्षुरादिवज्जीवोपकरणविशेषः। तच्चोपकरणत्वमुपकरणभूतैरिन्द्रियैस्सहशिष्ट्यादिभ्योऽवगम्यते। चक्षुरादिभिस्सहायं प्राणश्शिष्यते प्राणसंवादादिषु। तत्सजातीयत्वे हि तैस्सह शासनं युज्यते। प्राणशब्दपरिगृहीतेषु करणेष्वस्य विशिष्याभिधानमादिशब्देन गृह्यते;[३]"अथ ह य एवायं मुख्यः प्राणः" [४]"योऽयं मध्यमः प्राणः" इत्यादिषु विशिष्याभिधानात् ॥ ९ ॥

चक्षुरादिवदस्यापि करणत्वे तद्वदस्यापि जीवं प्रत्युपकारविशेषरूपक्रियया भवितव्यम्; सा तु न दृश्यते; अतो नायं चक्षुरादिवद्भवितुमर्हतीति चेत्—तत्राह—

अकरणत्वाच्च न दोषस्तथा हि दर्शयति।२।४।१०

अकरणत्वात्—करणं क्रिया, अक्रियत्वात् अस्य प्राणस्य जीवं प्रत्युपकारविशेषरूपक्रियारहितत्वाच्च यो दोष उद्भाव्यते, स नास्ति; यत उपकारविशेषरूपां शरीरेन्द्रियधारणादिरूपां क्रियां दर्शयति श्रुतिः—[५]"यस्मिन्नुत्क्रान्ते इदं शरीरं पापिष्ठतरमिव दृश्यते सवः श्रेष्ठः"

१. मु २-१-३ ॥—२॥—३. छा. १-२-७॥—४॥—५. छा. ५-१-७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इत्युक्त्वा वागाद्युत्क्रमणेऽपि शरीरस्येन्द्रियाणां च स्थितिं दर्शयित्वा प्राणोत्क्रमणे शरीरेन्द्रियशैथिल्याभिधानात्। अतः प्राणापानव्यानोदानसमानाकारेण पञ्चधाऽवस्थितोऽयं प्राणः शरीरेन्द्रियधारणादिना जीवस्योपकरोतीति चक्षुरादिवत्करणत्वम् ॥ १० ॥

नन्वेवं नामभेदात्कार्यभेदाच्च प्राणापानादयस्तत्त्वान्तराणि स्युः; तत्राह—

पञ्चवृत्तिर्मनोवद्व्यपदिश्यते । २ । ४ । ११ ॥

यथा कामादिवृत्तिभेदे तत्कार्यभेदेऽपि न कामादिकं मनसस्तत्त्वान्तरं [१]"कामस्सङ्कल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव" इति वचनात् । एवं [१]"प्राणोऽपानो व्यान उदानस्समान इत्येतत्सर्वं प्राण एव" इति वचनात् अपानादयोऽपि प्राणस्यैव वृत्तिविशेषाः; न तत्त्वान्तरमित्यवगम्यते ॥ ११ ॥

इति श्रीशारीरकमीमांसाभाष्ये वायुक्रियाधिकरणम् ॥ ४ ॥

वेदान्तसारे—न वायुक्रिये पृथगुपदेशात् ॥ पञ्चवृत्तिप्राणः न वायुमात्रम्, तत्क्रिया वा, [२]"एतस्माज्जायते प्राणः खं वायुः" इति पृथगुपदेशात्॥

चक्षुरादिवत्तु तत्सहशिष्ट्यादिभ्यः॥ वायोः पृथग्भूतोऽयं नाम्न्यादिवत् भूतान्तरम्; वायुरेव देहधारणयोग्याकारमापन्नः चक्षुरादिवत् जीवोपकरणम्, चक्षुरादिभिस्सहोपदेशतत्तुल्योपकारतन्मुख्यत्वेभ्यः ॥ ९ ॥

अकरणत्वाच्च न दोषस्तथा हि दर्शयति॥ करणम्—क्रिया; न जीवोपकाररूपक्रियारहितत्वे दोषः; यतः श्रुतिरेव देहेन्द्रियाद्यशैथिल्यकरणं दर्शयति, प्राणोत्क्रमणे देहेन्द्रियादिशैथिल्याभिधानात् ॥ १० ॥

पञ्चवृत्तिर्मनोवद्व्यपदिश्यते ॥ प्राण एक एव स्ववृत्तिभिः पञ्चभिः प्रा-

---

१. बृ. ३-५-३ ॥—२. मु. २-१-३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

णापानादिनामभाग्भवति ; कामादिभिर्यथैकमेव मनः १"कामः सङ्कल्पः" इत्यारभ्य १"एतत्सर्वं मन एव" इति ॥ ११ ॥

इति वेदान्तसारे वायुक्रियाधिकरणम् ॥ ४ ॥

वेदान्तदीपे—न वायुक्रिये पृथगुपदेशात् ॥ किमयं श्रेष्ठप्राणो वायुमात्रम्, उत तत्क्रिया, अथ वायुरेव कंचन विशेषमापन्नः—इति संशयः । वायुमात्रमिति प्रथमः पक्षः, २"यः प्राणस्स वायुः" इतिव्यपदेशात् । वायुमात्रे प्राणप्रसिद्ध्यभावात्,उच्छ्वासनिश्वासरूपवायुक्रियायां प्राणप्रसिद्धेः, वायोः क्रियाविशेष एव प्राण इति द्वितीयः पक्षः । राद्धान्तस्तु—न वायुमात्रं तत्क्रिया वा प्राणः;अपितु देहधारणयोग्यतादिरूपविशेषमापन्नो वायुः,३"एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि च । खं वायुः" इति वायुप्राणयोः पृथगुत्पत्त्युपदेशात्। क्रियायाश्च पृथगुपदेशो न सम्भवति,तेजःप्रभृतिष्वदर्शनात्। चक्षुरादिकरणैस्सह जीवोपकरणतयोपदेशात् , देहेन्द्रियधारणरूपोपकाराधिक्याच्चक्षुरादिभ्यः प्राधान्यवचनाच्च न क्रियामात्रम्।सूत्रार्थस्तु—न वायुक्रिये पृथगुपदेशात्—वायुमात्रं तत्क्रिया वा न प्राणः; पृथगुपदेशात्—३"प्राणः जायते; ३"खं वायुः" इति हि पृथगुत्पत्तिरुपदिश्यते ॥ ८ ॥

वायोः पृथगुपदिष्टतया तस्मादन्योऽयं प्राणः किमग्न्यादिवद्भूतान्तरमित्याशङ्क्याह—

चक्षुरादिवत्तु तत्सहशिष्ट्यादिभ्यः ॥ तुशब्दश्शङ्कानिवृत्त्यर्थः ; प्राणो नाकाशादिवद्भूतान्तरम् ; अपितु वायुरेवावस्थान्तरमापन्नः चक्षुरादिवत् जीवोपकरणम्। तच्च उपकरणत्वमुपकरणभूतैरिन्द्रियैः सहशिष्ट्यादिभ्योऽवगम्यते । शिष्टिः—शासनम् उपदेशः । उपदिश्यते ह्ययं प्राणश्चक्षुरादिभिस्सह प्राणसंवादादिषु । तत्सजातीयत्वे ह्येतदुपपद्यते । प्राणशब्दगृहीतेषु करणेष्वस्य ४"अथ ह्य एवायं मुख्यः प्राणः"इति विशिष्याभिधानमादिशब्देनोक्तम्।तदपि तत्सजातीयत्वे हि सम्भवति ॥ ९ ॥

अकरणत्वाच्च न दोषस्तथाहि दर्शयति ॥ अकरणत्वात्-करणं क्रिया, अकरणत्वं क्रियारहितत्वम् । अक्रियत्वादस्य प्राणस्य जीवं प्रत्युपकारवि-

१. बृ. ३-५-३ ॥—२ ॥—३. मु. २-१-३ ॥—४. छा. १-२-७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शेषरूपक्रियारहितत्वाच्च यो दोष उद्भाव्यते ; स नास्ति । यत उपकारविशेषरूपां शरीरेन्द्रियधारणात्मकक्रियां दर्शयति श्रुतिः—१"यस्मिन्नुत्क्रान्त इदं शरीरं पापिष्ठतरमिव दृश्यते स वश्रेष्ठः" इति वागादिमुख्यप्राणपर्यन्तानि करणानि प्रत्येकमभिधाय प्राणोत्क्रमणे शरीरेन्द्रियशैथिल्याभिधानात् ॥ १० ॥

प्राणापानादिनामभेदेन पञ्चधाऽवस्थित एक एव प्राण इत्याह—

पञ्चवृत्तिर्मनोवद्व्यपदिश्यते॥ प्राणापानादिवृत्तिभेदात्प्राण एव पञ्चधा व्यपदिश्यते ; मनोवत्—यथैकमेव मनः कामादिवृत्तिभेदेन तैश्शब्दैरभिधीयत इति श्रुतिराह,२"कामस्सङ्कल्पः" इत्यारभ्य२"ह्रीर्धीर्भीरित्येतत्सर्वं मन एव" इति । अपानादि समानपर्यन्तं व्यपदिश्य २"एतत्सर्वं प्राण एव" इति व्यपदेशात्प्राण एव पञ्चवृत्तिरित्यवगम्यते ॥ ११ ॥

इति वेदान्तदीपे वायुक्रियाधिकरणम् ॥ ४ ॥

(श्रीशारीरकमीमांसाभाष्ये श्रेष्ठाणुत्वाधिकरणम् ॥ ५ ॥)

अणुश्च । २ । ४ । १२ ॥

अणुश्चायम् , पूर्ववदुत्क्रान्त्यादिश्रवणात् ३"तमुत्क्रामन्तं प्राणोऽनूत्क्रामति" इत्यादिषु । अधिकाशङ्का तु ४"सम एभिस्त्रिभिर्लोकैस्समोऽनेन सर्वेण" ५"प्राणे सर्वं प्रतिष्ठितम्" ६"सर्वं हीदं प्राणेनाहृतम्" इत्यादिश्रवणात् महापरिमाण इति ॥

(सिद्धान्तः)

परिहारस्तु—उत्क्रान्त्यादिश्रवणात्परिच्छिन्नत्वे निश्चिते सर्वस्य प्राणिजातस्य प्राणायत्तस्थितित्वेन वैभववादोपपत्तिः—इति ॥ १२ ॥

इति श्रीशारीरकमीमांसाभाष्ये श्रेष्ठाणुत्वाधिकरणम् ॥ ५ ॥

---

१. छा. ५-१-७॥—२. बृ. ३-५-३॥—३. बृ. ६-४-२॥—४. बृ. ३-३-२२॥—५॥—६॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वेदान्तसारे—अणुश्च॥१"प्राणोऽनूत्क्रामति"इत्युत्क्रान्तेः अणुः॥१२॥

इति वेदान्तसारे श्रेष्ठाणुत्वाधिकरणम् ॥ ५ ॥

वेदान्तदीपे—अणुश्च ॥ किमयं प्राणस्सर्वगतः, उताणुरिति संशयः। सर्वगत इति पूर्वः पक्षः २"सम एभिस्त्रिभिर्लोकैस्समः" इत्यादिना प्राणस्यानन्त्यव्यपदेशात् । राद्धान्तस्तु—१"त मुत्क्रामन्तं प्राणोऽनूत्क्रामति" इत्युत्क्रान्तिवचनादिन्द्रियवत्प्राणश्चाणुः। एवमणुत्वे निश्चिते सति सर्वस्य प्राणायत्तस्थितित्वेन वैभववादः । सूत्रमपि व्याख्यातम् ॥ १२ ॥

इति वेदान्तदीपे श्रेष्ठाणुत्वाधिकरणम् ॥ ५ ॥

(श्रीशारीरकमीमांसाभाष्ये ज्योतिराद्यधिष्ठानाधिकरणम्॥)

ज्योतिराद्यधिष्ठानं तु तदामननात्प्राणवता शब्दात् । २ । ४ । १३ ॥

सश्रेष्ठानां प्राणानां ब्रह्मण उत्पत्तिरियत्तापरिमाणं चोक्तम्; तेषां प्राणानामग्न्यादिदेवताधिष्ठितत्वं च पूर्वमेव ३"अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम्" इत्यनेन सूत्रेण प्रसङ्गादुपपादितम्; जीवस्य च स्वभोगसाधनानामेषामधिष्ठातृत्वं लोकसिद्धम्, ४"एवमेवैष एतान् प्राणान् गृहीत्वा स्वे शरीरे यथाकामं परिवर्तते" इत्यादिश्रुतिसिद्धं च। तदिदं जीवस्याग्न्यादिदेवतानां च प्राणविषयमधिष्ठानं किं स्वायत्तम्, उत परमात्मायत्तमिति विशये नैरपेक्ष्यात्स्वायत्तम् ॥

(सिद्धान्तः)

इति प्राप्ते उच्यते—ज्योतिराद्यधिष्ठानमिति। प्राणवता—जीवेन सह ज्योतिरादीनामग्न्यादिदेवतानां प्राणविषयमधिष्ठानम्, तदामननात्—तस्य परमात्मनः आमननाद्भवति । आमननम्—आभिमुख्येन मननम्,

१. बृ. ६-४-२ ॥—२. बृ. ३-३-२२ ॥—३. शारी. २-१-५॥—४. बृ. ४-१-१८ ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

परमात्मनस्सङ्कल्पादेव भवतीत्यर्थः। कुत एतत्? शब्दात्–इन्द्रियाणां साभिमानिदेवतानां जीवात्मनश्च स्वकार्येषु परमपुरुषमननायत्तत्वशास्त्रात्। यथाऽन्तर्यामिब्रह्मणादिषु [१]"योऽग्नौ तिष्ठन्नग्नेरन्तरो यमग्निर्न वेद यस्याग्निश्शरीरं योऽग्निमन्तरो यमयति स त आत्माऽन्तर्याम्यमृतः" [१]"यो वायौ तिष्ठन्" [१]"य आदित्ये तिष्ठन्" [१]"य आत्मनि तिष्ठन्" [१]"यश्चक्षुषि तिष्ठन्" इत्यादि। यथा च [२]"भीषाऽस्माद्वातः पवते भीषोदेति सूर्यः। भीषाऽस्मादग्निश्चेन्द्रश्च। मृत्युर्धावति पञ्चमः"इति। तथा [३]"एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः" इत्यादि॥

तस्य च नित्यत्वात्। २। ४। १४॥

सर्वेषां परमात्माधिष्ठितत्वस्य नित्यत्वात्, स्वरूपानुबन्धित्वेन नियतत्वाच्च तत्सङ्कल्पादेवैषामधिष्ठातृत्वमवर्जनीयम्। [४]"तत्सृष्ट्वा तदेवानुप्राविशत् तदनुप्रविश्य सच्च त्यच्चाभवत्" इत्यादिना परमपुरुषस्य नियन्तृत्वेन सर्वचिदचिद्वस्त्वनुप्रवेशः स्वरूपानुबन्धी श्रूयतेः स्मर्यते च [५]"विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्" इति॥ १४॥

इति श्रीशारीरकमीमांसाभाष्ये ज्योतिराद्यधिष्ठानाधिकरणम्॥ ६॥

वेदान्तसारे—ज्योतिराद्यधिष्ठानं तु तदामननात्प्राणवता शब्दात्॥ जीवेन सह अन्नमयादेः इन्द्रियाद्यधिष्ठानं परमात्मसङ्कल्पादेव भवति; [६]"योऽग्नौ तिष्ठन् योऽग्निमन्तरो यमयति, इत्यादिशब्दात्॥ १३॥

तस्य च नित्यत्वात्॥ सर्वस्य तन्नियाम्यत्वनियमात्॥ १४॥

इति वेदान्तसारे ज्योतिराद्यधिष्ठानाधिकरणम्॥ ६॥

---

१. बृ. ५-७-५, ७, ९, २२, १८॥—२. तै. आन. ८-१॥—३. बृ. ५-८-९॥—४. तै. आन. ६-२, ३॥—५. गी. १०-४२॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वेदान्तदीपे—ज्योतिराद्यधिष्ठानं तु तदामननात्प्राणवता शब्दात्॥ अन्नमयादीनां जीवस्य चेन्द्रियाधिष्ठानं परमात्मायत्तमिति १"परात्तु तच्छ्रुतेः" इत्युक्तमेव स्मारयति विषयव्याप्तिज्ञापनाय। प्राणवता—जीवेन सह ज्योतिरादेः—अन्नमयादेः वागाद्यधिष्ठानम् तदामननात्—परमात्मामननाद्भवति। आमननम्—आभिमुख्येन मननं तत्सङ्कल्पादेव भवतीत्यर्थः; २"योऽग्नौ तिष्ठन्... योऽग्निमन्तरो यमयति" इत्यादिशब्दात्॥ १३॥

तस्य च नित्यत्वात्॥ सर्वेषामात्मतयाऽनुप्रविश्य, सर्वानियमनस्य नित्यत्वात् परमात्मनः अवर्जनीयत्वादित्यर्थः, ३"तत्सृष्ट्वा तदेवानुप्राविशत्" इति श्रुतेः॥ १४॥

इति वेदान्तदीपे ज्योतिराद्यधिष्ठानाधिकरणम्॥ ६॥

(श्रीशारीरकमीमांसाभाष्ये इन्द्रियाधिकरणम्॥७॥)

त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात्।२।४।१५॥

किं सर्वे प्राणशब्दनिर्दिष्टा इन्द्रियाणि, उत श्रेष्ठप्राणव्यतिरिक्ता एवेति विशये प्राणशब्दवाच्यत्वात्, करणत्वाच्च सर्व एवेन्द्रियाणि॥

(सिद्धान्तः.)

इति प्राप्ते उच्यते—श्रेष्ठव्यतिरिक्ता एव प्राणा इन्द्रियाणि; कुतः? श्रेष्ठादन्येष्वेव प्राणेषु तद्व्यपदेशात्। ४"इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचराः" इत्यादिभिर्हि चक्षुरादिषु समनस्केष्वेव इन्द्रियशब्दो व्यपदिश्यते॥ १५॥

भेदश्रुतेर्वैलक्षण्याच्च। २। ४। १६॥

५"एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणिच" इत्यादिष्विन्द्रियेभ्यः प्राणस्य पृथक्श्रवणात्प्राणव्यतिरिक्तानामेवेन्द्रियत्वमवगम्यते। मनसः पृथक्श्रवणेऽपि तस्यान्यत्रेन्द्रियान्तर्भाव उक्तः ६"मनष्षष्ठानीन्द्रिया-

१. शारी. २-३-४० ॥—२. बृ. ५-७-५ ॥—३. तै. आन. ६-२ ॥—४. गी. १३-५ ॥—५. मु. २-१-३ ॥—६. गी. १५-७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

णि" इत्यादौ। वैलक्षण्यं च चक्षुरादिभ्यः श्रेष्ठप्राणस्योपलभ्यते; सुषुप्तौ हि प्राणस्य वृत्तिरुपलभ्यते, चक्षुरादीनां तु वृत्तिर्नोपलभ्यते। कार्यं च चक्षुर्वागादीनां समनस्कानां ज्ञानकर्मसाधनत्वम्; प्राणस्य तु शरीरेन्द्रियधारणम्; प्राणाधीनधारणत्वाच्चेन्द्रियेषु प्राणशब्दव्यपदेशः; तथा च श्रुतिः [१]"त एतस्यैव सर्वे रूपमभवन् तस्मादेत एतेनाख्यायन्ते" इति। रूपमभवन्—शरीरमभवन्, तदधीनप्रवृत्तयोऽभवन्नित्यर्थः॥ १६ ॥

इति श्रीशारीरकमीमांसाभाष्ये इन्द्रियाधिकरणम् ॥ ७ ॥

वेदान्तसारे—त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात् ॥ श्रेष्ठादन्यत्र ये प्राणाः, त इन्द्रियाणि, तेष्वेवेन्द्रियव्यपदेशात्, [२]"इन्द्रियाणि दशैकञ्च" इत्यादि ॥ १५ ॥

भेदश्रुतेर्वैलक्षण्याच्च॥ [३]"एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि च" इति भेदेनोत्पत्तिश्रुतेः इन्द्रियवृत्त्युपरमेऽपि प्राणवृत्त्यनुपरमवैलक्षण्याच्च॥ १६ ॥

इति वेदान्तसारे इन्द्रियाधिकरणम् ॥ ७ ॥

वेदान्तदीपे—त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात् ॥ किं प्राणशब्दनिर्दिष्टास्सर्व एवेन्द्रियाणि, उत श्रेष्ठव्यतिरिक्ताः प्राणा इति संशयः। सर्व एवेति पूर्वः पक्षः, सर्वेषामविशेषेण प्राणशब्दनिर्देशात्, करणत्वाच्च। सिद्धान्तस्तु—श्रेष्ठव्यतिरिक्ताः प्राणा इन्द्रियाणि, तेष्वेवेन्द्रियशब्दनिर्देशात्; [२]"इन्द्रियाणि दशैकञ्च" [४]"एकादशं मनश्चात्र" इति। एषामपि प्राणशब्दनिर्देशः प्राणाधीनवृत्तित्वेन। तथा च श्रुतिः [१]"त एतस्यैव सर्वे रूपमभवन् तस्मादेत एतेनाख्यायन्ते" इति। रूपमभवन्—शरीरमभवन्, तदधीनवृत्तयोऽभवन्नित्यर्थः। सूत्रार्थस्तु—श्रेष्ठादन्यत्र ये प्राणाः, त इन्द्रियाणि, तेष्वेव तद्व्यपदेशात्—इन्द्रियव्यपदेशात्॥ १५ ॥

भेदश्रुतेर्वैलक्षण्याच्च—[३]"एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि च"

१॥—२. गी. १३-५ ॥—३. मु. २-१-३ ॥—४. वि. पु. १-२-४७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति समनस्केन्द्रियेभ्यो भेदेन प्राणस्योत्पत्तिश्रुतेः, इन्द्रियेषूपरतेष्वपि प्राणवृत्तेर्वृत्तिवैलक्षण्याच्च ॥ १६ ॥

इति वेदान्तदीपे इन्द्रियाधिकरणम् ॥ ७ ॥

श्रीशारीरकमीमांसाभाष्ये संज्ञामूर्तिक्लृप्त्यधिकरणम्॥८॥

संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात्॥२।४।१७॥

भूतेन्द्रियादीनां समष्टिसृष्टिः, जीवानां कर्तृत्वं च परस्माद्ब्रह्मण इत्युक्तं पुरस्तात्। जीवानां स्वेन्द्रियाधिष्ठानं च परायत्तमिति चानन्तरं स्थिरीकरणाय स्मारितम्। या त्वियं नामरूपव्याकरणात्मिका प्रपञ्चव्यष्टिसृष्टिः, सा किं समष्टिजीवरूपस्य हिरण्यगर्भस्यैव कर्म, उत तेजःप्रभृतिशरीरकस्य परस्यावादिसृष्टिवद्धिरण्यगर्भशरीरकस्य परस्य ब्रह्मण, इतीदानीं चिन्त्यते। किं युक्तम्? समष्टिजीवस्येतिः; कुतः? [1]"अनेनाऽनुप्रविश्य नामरूपे व्याकरवाणि" इति जीवकर्तृकत्वश्रवणात्। न हि परा देवता स्वेन रूपेण नामरूपे व्याकरवाणीत्यैक्षत; अपितु स्वांशभूतेन जीवरूपेण, [1]"अनेन जीवेनाऽत्मना" इति वचनात्। नन्वेवं चारेणानुप्रविश्य परबलं सङ्कलयानीतिवत् [1]"व्याकरवाणि" इत्युत्तमपुरुषः कर्तृस्थक्रियश्च प्रविशतिर्लाक्षणिकस्स्यात्। नैवम्, तत्र राजचारयोः स्वरूपभेदाल्लाक्षणिकत्वम्, इह तु जीवस्यापि स्वांशत्वेन स्वरूपत्वात्तेन रूपेण प्रवेशो व्याकरणं चात्मन एवेति न लाक्षणिकत्वप्रसङ्गः। नच सहयोगलक्षणेयं तृतीया, कारकविभक्तौ सम्भवन्त्यामुपपदविभक्तेरन्याय्यत्वात्। नच करणे तृतीया, ब्रह्मकर्तृकयोः प्रवेशव्याकरणयोर्जीवस्य साधकतमत्वाभावात्। नच जीवस्य कर्तृत्वं प्रवेशमात्रे पर्यवस्यति, नामरूपव्याकरणं तु ब्रह्मण एवेति शक्यं वक्तुम्, क्त्वाप्रत्ययेन समानक

१. छा. ६-३-२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तृकत्वप्रतीतेः । जीवस्य स्वांशत्वेन स्वरूपत्वेऽपि परस्वरूपव्याकृत्यर्थः [१]"अनेन जीवेन" इति पराक्त्वेन परामर्शः । अतो हिरण्यगर्भकर्तृकेयं नामरूपव्याक्रिया । अतएव च स्मृतिषु चतुर्मुखकर्तृकसृष्टिप्रकरणे नामरूपव्याकरणं सङ्कीर्त्यते[२]"नामरूपं च भूतानां कृत्यानां च प्रपञ्चनम् । वेदशब्देभ्य एवादौ देवादीनां चकार सः" इत्यादि ॥

(सिद्धान्तः)

एवं प्राप्तेऽभिधीयते–संज्ञामूर्तिक्लृप्तिस्तु—इति । तुशब्दः पक्षं व्यावर्तयति ; संज्ञामूर्तिक्लृप्तिः–नामरूपव्याकरणम् ; तत्त्रिवृत्कुर्वतः परस्यैव ब्रह्मणः, तस्यैव नामरूपव्याकरणोपदेशात् । त्रिवृत्करणं कुर्वत एव हि नामरूपव्याकरणमुपदिश्यते–[१]"सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनाऽत्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि तासां त्रिवृतं त्रिवृतमेकैकां करवाणि" इति समानकर्तृकत्वप्रतीतेः। त्रिवृत्करणं तु चतुर्मुखस्याण्डान्तर्वर्तिनो न सम्भवति, त्रिवृत्कृतैस्तेजोबन्नैर्ह्यण्डमुत्पाद्यते; चतुर्मुखस्य चाण्डे सम्भवः स्मर्यते–[२]"तस्मिन्नण्डेऽभवद्ब्रह्मा सर्वलोकपितामहः" इति । अतस्त्रिवृत्करणं परस्यैव ब्रह्मणः; तत्समानकर्तृकं नामरूपव्याकरणं च तस्यैवेति विज्ञायते । कथं तर्हि [१]"अनेन जीवेन" इति सङ्गच्छते ; [१]"आत्मना जीवेन" इति सामानाधिकरण्यात् जीवशरीरं परं ब्रह्मैव जीवशब्देनाभिधीयते; यथा [४]"तत्तेज ऐक्षत" [४]"तदपोऽसृजत" [४]"ता आप ऐक्षन्त" [४]"ता अन्नमसृजन्त" इति तेजःप्रभृतिशरीरकं परमेव ब्रह्माभिधीयते । अतो जीवसमष्टिभूताहिरण्यगर्भशरीरकस्य परस्यैव ब्रह्मणः कर्म नामरूपव्याकरणम् । एवं च [१]"प्रविश्य नामरूपे व्याकरवाणि" इति प्रविशतिरुत्तमपुरुषश्चाक्रिष्टौ मुख्यार्थावेव भवतः। प्रवेशव्याकरणयोस्समानकर्तृकत्वमप्युपपद्यते । चतुर्मुखशरीरकस्य परस्यैव ब्रह्म-

१. छा. ६-३-२ ॥—२. वि. पु. १-५-६३ ॥—३ ॥—४. छा. ६-२-३, ४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

णः कर्म देवादिविचित्रसृष्टिरिति चतुर्मुखकर्तृकसृष्टिप्रकरणे नामरूपव्याक्रियोपदेशश्चोपपद्यते। अतः [१]"सेयं देवता" इत्यादिवाक्यस्यायमर्थः—इमाः—तेजोऽबन्नरूपास्तिस्रो देवताः अनेन जीवेन—जीवसमष्टिविशिष्टेनाऽत्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि—देवादिविचित्रसृष्टितन्नामधेयानि च करवाणि। तदर्थमन्योन्यसंसर्गमप्राप्तानामेषां तेजोबन्नानां विशेषसृष्ट्यसमर्थानां तत्सामर्थ्यायैकैकां त्रिवृतंत्रिवृतं करवाणि—इति। अतः परस्यैव ब्रह्मणः कर्मेदं नामरूपव्याकरणम् ॥ १७ ॥

अथ स्यात् नामरूपव्याकरणस्य त्रिवृत्करणेनैककर्तृकत्वात्परमात्मकर्तृकमिति न शक्यते वक्तुम्, त्रिवृत्करणस्यापि जीवकर्तृकत्वसम्भवात्। अण्डसृष्ट्युत्तरकालं हि चतुर्मुखसृष्टजीवेषु त्रिवृत्करणप्रकार उपदिश्यते—[२]"यथा तु खलु सोम्येमास्तिस्रो देवताः पुरुषं प्राप्य त्रिवृत्त्रिवृदेकैका भवति तन्मे विजानाहीति" [३]"अन्नमशितं त्रेधा विधीयते तस्य यः स्थविष्ठो भागस्तत्पुरीषं भवति यो मध्यमस्तन्मांसं योऽणिष्ठः तन्मनः" इत्यादिना। तथा पूर्वस्मिन्नपि वाक्ये [२]"यदग्नेरोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्य" इत्यादिना चतुर्मुखसृष्टाग्न्यादित्यचन्द्रविद्युत्सु त्रिवृत्करणं प्रदर्श्यते। नामरूपव्याकरणोत्तरकालं च त्रिवृत्करणं श्रूयते। [४]"सेयं देवतेमास्तिस्रो देवताः अनेन जीवेनाऽत्मनाऽनुप्रविश्य नामरूपे व्याकरोत्तासां त्रिवृतंत्रिवृतमेकैकामकरोत्" इति। तत्राह—

मांसादि भौमं यथाशब्दमितरयोश्च। २। ४। १८॥

यदुक्तमण्डसृष्ट्युत्तरकालं चतुर्मुखसृष्टदेवतादिविषयोऽयं [१]"तासां त्रिवृतंत्रिवृतमेकैकामकरोत्" इति त्रिवृत्करणोपदेश इति; तन्नोपपद्यते, [३]"अन्नमशितं त्रेधा विधीयते" इत्यत्र मांसमनसोः पुरीषाद-

१. छा. ६-३-२॥—२. छा. ६-४-७, १॥—३. छा. ६-५-१॥—४. छा. ६-३-३३,४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

णुत्वेनाणीयस्त्वेन च व्यपदिष्टयोः कारणानुविधायित्वेनाप्यतैजसत्वप्रसङ्गात्, [१]"आपः पीताः" इत्यत्रापि मूत्रप्राणयोः स्थविष्ठाणीयसोः पार्थिवत्वतैजसत्वप्रसङ्गाच्च। नचैवमिष्यते;मांसादि भौममिष्यते–पुरीषवन्मांसमनसी अपि भौमे–पार्थिवे इष्येते [१]"अन्नमशितं त्रेधा" इति प्रक्रमात्। यथाशब्दमितरयोश्च–इतरयोरपि [१]"आपः पीताः" [१]"तेजोऽशितम्" इति पर्याययोर्यथाशब्दं विकारा इष्यन्ते। [१]"आपः पीता-स्त्रेधा विधीयन्ते" इत्यपामेव त्रेधा परिणामः शब्दात्प्रतीयते; तथा[१]"तेजोऽशितं त्रेधा विधीयते" इत्यपि तेजस एव त्रेधा परिणामः शब्दात्प्रतीयते; अतः पुरीषमांसमनांसि पृथिवीविकाराः, मूत्रलोहितप्राणाः अब्विकाराः, अस्थिमज्जावाचस्तेजोविकारा इति प्रतिपत्तव्यम्; [१]"अन्नमयं हि सोम्य मनः, आपोमयः प्राणस्तेजोमयी वाक्" इति वाक्यशेषाविरोधाच्च। अतः [२]"तासां त्रिवृतंत्रिवृतमेकैकामकरोत्" इत्युक्तस्त्रिवृत्करणप्रकारः [१]"अन्नमशितम्" इत्यादिना न प्रदर्श्यते; तथा सति मनःप्राणवाचां त्रयाणामप्यणीयस्त्वेन तैजसत्वात् [१]"अन्नमयं हि सोम्य मनः" इत्यादिर्विरुध्येत। प्रागेव त्रिवृत्कृतानां पृथिव्यादीनां पुरुषं प्राप्तानाम् [१]"अन्नमशितम्" इत्यादिनैकैकस्य त्रेधा परिणाम उच्यते। अण्डसृष्टेः प्रागेव च तेजोबन्नानां त्रिवृत्करणेन भवितव्यम्, अत्रिवृत्कृतानां तेषां कार्यारम्भासामर्थ्यात्। अन्योन्यसंयुक्तानामेव हि कार्यारम्भसामर्थ्यम्; तदेव च त्रिवृत्करणम्। तथा च स्मर्यते [३]"नानावीर्याः पृथग्भूतास्ततस्ते संहतिं विना। नाशक्नुवन् प्रजास्रष्टुमसमागम्य कृत्स्नशः॥ समेत्यान्योन्यसंयोगं परस्परसमाश्रयाः। महदाद्या विशेषान्ता ह्यण्डमुत्पादयन्ति ते"इति। अत एव च [२]"अनेन जीवेनाऽत्मनाऽनुप्रविश्य नामरूपे व्याकरोत् तासां त्रिवृतंत्रिवृतमेकैकामकरोत्" इति पाठक्रमोऽ-

१. छा. ६-५-२, १, ३, ४ ॥—२. छा. ६-३-४ ॥—३. वि. पु. १-२-५२,५३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

र्यक्रमेण बाध्यते। अण्डान्तर्वर्तिष्वग्न्यादित्यादिषु त्रिवृत्करणप्रदर्शनं श्वेतकेतोश्शुश्रूषोरण्डान्तर्वर्तित्वेन ; तस्य बहिष्ठवस्तुषु त्रिवृत्करणप्रदर्शनायोगाभ्त्रिवृत्कृतानां कार्येषु अग्न्यादित्यादिषु क्रियते ॥ १८ ॥

स्यादेतत् ; १"अन्नमशितम्" १"आपः पीताः" १"तेजोऽशितम्" इति त्रिवृत्कृतानामन्नादीनामेकैकस्य तेजोबन्नात्मकत्वेन त्रिरूपस्य कथमन्नमापस्तेज इत्येकैकरूपेण व्यपदेश उपपद्यत इति; तत्राह—

वैशेष्यात्तु तद्वादस्तद्वादः । २ । ४ । १९ ॥

वैशेष्यं - विशेषभावः । त्रिवृत्करणेन त्रिरूपेऽप्येकैकस्मिन्नन्नाद्याधिक्यात्तत्तत्तन्नादिवादः । द्विरुक्तिरध्यायसमाप्तिं द्योतयति ॥ १९ ॥

इति श्रीशारीरकमीमांसाभाष्ये संज्ञामूर्तिकृप्त्यधिकरणम् ॥ ३ ॥

इति श्रीभगवद्रामानुजविरचिते शारीरकमीमांसाभाष्ये
द्वितीयस्याध्यायस्य चतुर्थः पादः ॥ ४ ॥
समाप्तश्चाध्यायः ॥

वेदान्तसारे—संज्ञामूर्तिकृप्तिस्तु त्रिवृत्कुर्वत उपदेशात् ॥ देवादिनामरूपव्यष्टिसृष्टिः चतुर्मुखशरीरकात् परमात्मन एव ; न केवलचतुर्मुखात् । "नामरूपे व्याकरवाणि तासां त्रिवृतंत्रिवृतमेकैकां करवाणि" इति त्रिवृत्करणं कुर्वतो नामरूपव्याकरणोपदेशात् । त्रिवृत्करणन्तु केवलचतुर्मुखस्य न सम्भवति ; त्रिवृत्कृतैस्तेजोबन्नैरण्डमुत्पाद्य पश्चाच्चतुर्मुखसृष्टिः, २"तदण्डमभवद्धैमं.....तस्मिञ्जज्ञे स्वयं ब्रह्मा" इत्यादिस्मृतेः ॥ १७ ॥

मांसादि भौमं यथाशब्दमितरयोश्च ॥ १"अन्नमशितं त्रेधा विधीयते" इत्यत्र प्रागुक्तत्रिवृत्करणादर्थान्तभूरतः अण्डान्तर्वर्तिपुरुषभुक्तान्नादीनां परिणामप्रकार उच्यते । अन्यथा मांसमनसोः पुरीषादणीयस्त्वेनाप्यत्वतैजसत्वप्रसक्तिः । तथा सति १"अन्नमशितं त्रेधा" इति भूमेरेव त्रिधात्वोपक्रमः,

१. छा. ६-५-१, २, ३ ॥—२. मनुः. १-९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

१"अन्नमयं हि सोम्य मनः" इति मनसो भौमत्वञ्च विरुध्यते। तथेतरयोरप्तेजसोः त्रैविध्यं विरुध्यते। तदिदमाह—मांसादि भौमं यथाशब्दमितरयोश्च—इति। पुरीषवन्मांसमनसी अपि भौमे इतीहोच्यते। तथा मूत्रवल्लोहितप्राणावप्याप्यौ; तथा अस्थिवन्मज्जावाचौ तैजस्यौ ॥ १८ ॥

पूर्वमेव त्रिवृत्कृतं चेत्—त्र्यात्मकं वस्तु कथमन्नमापस्तेज इत्युच्यते इत्यत्राह—

वैशेष्यात्तु तद्वादस्तद्वादः ॥ अन्नादिभूयस्त्वेन वैशेष्यादन्नादिवादः ॥

इति वेदान्तसारे संज्ञामूर्तिकृप्त्यधिकरणम् ॥ ८ ॥

इति श्रीभगवद्रामानुजविरचिते श्रीवेदान्तसारे
द्वितीयस्याध्यायस्य चतुर्थः पादः ॥ ४ ॥
समाप्तश्चाध्यायः ॥

वेदान्तदीपे—संज्ञामूर्तिकृप्तिस्तु त्रिवृत्कुर्वत उपदेशात् ॥ किं प्रपञ्चव्यष्टिसृष्टिः जीवभूतचतुर्मुखात्, उत तच्छरीरकात्परमात्मन एवेति संशयः। केवलाच्चतुर्मुखादिति पूर्वः पक्षः, २"अनेन जीवेनाऽत्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि" इति व्यतिरेकश्रुतेः। जीवस्य परमात्मांशत्वेन व्याकरवाणीत्युत्तमपुरुषनिर्देशोऽपि कथञ्चिदुपपद्यते। राद्धान्तस्तु—२"नामरूपे व्याकरवाणि तासां त्रिवृतंत्रिवृतमेकैकां करवाणि" इति त्रिवृत्करणं कुर्वत एव नामरूपव्याक्रियोपदेशात्परमात्मन एव नामरूपव्याकरणरूपव्यष्टिसृष्टिः। त्रिवृत्करणं तु न चतुर्मुखेन कर्तुं शक्यम्, अण्डसृष्ट्युत्तरकालभावित्वाच्चतुर्मुखोत्पत्तेः, त्रिवृत्कृतैरेव तेजोवन्नैरण्डसृष्टिसम्भवाच्च। ३"तदण्डमभवद्धैमं सहस्रांशुसमप्रभम्। तस्मिञ्जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः" इतिहि स्मर्यते। ४"नानावीर्याः पृथग्भूतास्ततस्ते संहतिं विना। नाशक्नुवन् प्रजास्रष्टुमसमागम्य कृत्स्नशः॥ समेत्यान्योन्यसंयोगं परस्परसमाश्रयाः। महदादिविशेषान्ता ह्यण्डमुत्पादयन्ति ते" इतिच। अतश्चतुर्मुखशरीरकात्परमात्मन एव व्यष्टिसृष्टिः। एवं सति व्याकरवाणीत्युत्तमपुरुषनिर्देशस्समञ्जसः। २"अनेन जीवेन" इतिव्यतिरेकनिर्देशोऽपि जीवशरीरकेणात्मनेत्यन्वयात्समञ्जसः। जीवशब्दस्तेजःप्रभृतिशब्दवज्जीवशरीरकब्रह्मवाचीति ह्युक्तम्। "अनेन जीवेनात्मना" इति सामानाधिकरण्यञ्च मुख्यम्; २"अनुप्रविश्य नामरूपे व्याकरवाणि" इति समानकर्तृ-

१. छा. ६-५-४॥—२. छा. ६-३-२॥—३. मनु. १-९॥—४. वि. पु. १-२-५२,५३॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कत्वनिर्देशश्च। सूत्रार्थस्तु-संज्ञामूर्तिकृप्तिस्तु-तुशब्दश्शङ्काव्यावृत्त्यर्थः।नामरूपकृप्तिः परमात्मन एव; कुतः? त्रिवृत्कुर्वत उपदेशात्—त्रिवृत्करण कुर्वत एव नामरूपव्याकरणोपदेशात् । त्रिवृत्करणन्तु परमात्मन एव कर्मेत्युक्तम् ॥ १७ ॥

१"अन्नमशितं त्रेधा विधीयते" इत्यादिना चतुर्मुखसृष्टवस्तुषु त्रिवृत्करणप्रकारो ह्युपदिश्यते ; अतश्चतुर्मुखेन केवलेन तच्छक्यमित्याशङ्क्याह—

मांसादि भौमं यथाशब्दमितरयोश्च ॥ २"तासां त्रिवृतंत्रिवृतमेकैकां करवाणि" इति निर्दिष्टं त्रिवृत्करणम् १"अन्नमशितं त्रेधा विधीयते" इत्यादिना नोपदिश्यते ; १"तस्य यस्स्थविष्ठो धातुस्तत्पुरीषं यो मध्यमस्तन्मांसं योऽणिष्ठस्तन्मनः" इति मांसाद्यपि हि भौममेवोपदिश्यते । १"अन्नमशितं त्रेधा" इति प्रक्रमात्, १"अन्नमयं हि सोम्य मनः" इति वाक्यशेषाच्च । तेजोबन्नानां त्रिवृत्करणप्रकारे ह्युपदिश्यमाने मांसमनसोः पुरीषाद्भौमादणीयस्त्वेनाप्यत्वं तैजसत्वं च प्रसज्यते । तथेतरयोरप्यप्तेजःपर्याययोः १"आपः पीताः" १"तेजोऽशितम्" इति त्रयाणां त्रयाणां भागानां यथाशब्दमाप्यत्वं तैजसत्वमेवोपदिश्यते । तत्रापि हि १"आपः पीताः" १"तेजोऽशितम्" इत्युपक्रमः ; वाक्यशेषश्च १"आपोमयः प्राणः तेजोमयी वाक्" इति । प्रागुक्तत्रिवृत्करणप्रकारे हि मूत्रप्राणयोस्स्थविष्ठत्वाणीयस्त्वाभ्यां भौमत्वतैजसत्वप्रसक्तिः । "१तेजोऽशितम्"इत्यत्रापि पूर्वयोर्भौमत्वाप्यत्वप्रसक्तिः। अतोऽत्र प्रागेव त्रिवृत्कृतस्यान्नादेस्स्वस्यैव त्रेधा परिणाम उपदिश्यते ॥ १८ ॥

प्रागेव त्रिवृत्कृतं चेत्—कथं केवलान्नादिशब्दैरुच्यते ? इत्यत्राह—

वैशेष्यात्तु तद्वादस्तद्वादः ॥ वैशेष्यं—विशेषभावः । त्रिवृत्कृतेष्वेकैकस्मिन्नत्रतत्रान्नाद्याधिक्यरूपविशेषभावादन्नादिवादः । द्विरुक्तिरध्यायपरिसमाप्तिद्योतनार्था ॥ १९ ॥

इति वेदान्तदीपे संज्ञामूर्तिकृप्त्यधिकरणम् ॥ ८ ॥

इति श्रीभगवद्रामानुजविरचिते श्रीवेदान्तदीपे
द्वितीयस्याध्यायस्य चतुर्थः पादः ॥ ४ ॥
समाप्तश्चाध्यायः ॥

---

१. छा. ६-५-१, २, ३, ४ ॥—२. छा. ६-३-३ ॥

For Private And Personal Use Only

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीमते रामानुजाय नमः

श्रीभगवद्रामानुजविरचिते

श्रीशारीरकमीमांसाभाष्ये

(तृतीयाध्याये-प्रथमः पादः-तदन्तरप्रतिपत्त्यधिकरणम्॥)

तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्याम् । ३ । १ । १ ॥

अतिक्रान्ताध्यायद्वयेन निखिलजगदेककारणं निरस्तनिखिलदोषगन्धमपरिमितोदारगुणसागरं सकलेतरविलक्षणं परं ब्रह्म मुमुक्षुभिरुपास्यतया वेदान्ताः प्रतिपादयन्तीत्ययमर्थः स्मृतिन्यायविरोधपरिहारपरपक्षप्रतिक्षेपवेदान्तवाक्यपरस्परविरोधपरिहाररूपकार्यस्वरूपसंशोधनैस्तदुपबृंहणत्वहेतुभिस्सह स्थापितः; अतोऽध्यायद्वयेन ब्रह्मस्वरूपं प्रतिपादितम् । उत्तरेणेदानीं तत्प्राप्त्युपायैस्सह प्राप्तिप्रकारश्चिन्तयितुमिष्यते । तत्र तृतीयाध्याये उपायभूतोपासनविषया चिन्ता वर्तते । उपासनारम्भाभ्यर्हितोपायश्च प्राप्यवस्तुव्यतिरिक्तवैतृष्ण्यम्, प्राप्यतृष्णाचेति; तत्सिद्ध्यर्थं जीवस्य लोकान्तरेषु सञ्चरतो जाग्रतस्स्वपतस्सुषुप्तस्य मूर्च्छतश्च दोषाः, परस्य च ब्रह्मणस्तद्रहितता, कल्याणगुणाकरत्वं च प्रथमद्वितीययोः पादयोः प्रतिपाद्यन्ते । तत्र देहाद्देहान्तरं गच्छन्नयं जीवो देहान्तरारम्भहेतुभिर्भूतसूक्ष्मैस्सम्परिष्वक्त एव गच्छति, उत नेति चिन्तायां—यत्रयत्र जीवो याति; तत्रतत्र भूतसूक्ष्माणां सुलभत्वादसम्परि-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ष्वक्तो यातीति प्राप्तम्।पश्चादपि पूर्वपक्षबीजान्युपन्यस्य निरसिष्यति ॥

(सिद्धान्तः)

तत्र सिद्धान्तमाह–तदन्तरप्रतिपत्तौ रंहति सम्परिष्वक्तः—इति। [१]"संज्ञामूर्तिक्लृप्तिः" इति मूर्तिशब्देन देहः प्रस्तुतः; स तच्छब्देन परामृश्यते। तदन्तरप्रतिपत्तौ–देहान्तरगमने भूतसूक्ष्मैस्सम्परिष्वक्तो जीवो रंहति–गच्छतीत्यर्थः। कुतः? प्रश्ननिरूपणाभ्यां–प्रश्नप्रतिवचनाभ्याम्। पञ्चाग्निविद्यायामेवं प्रश्नप्रतिवचने आम्नायेते—श्वेतकेतुं किलारुणेयं पाञ्चालः प्रवाहणः कर्मिणां गन्तव्यदेशं, पुनरावृत्तिप्रकारं, देवयानपितृयाणपथव्यावर्तने, अमुष्य लोकस्याप्रासारं च वेत्थेति पृष्ट्वेदमपि पप्रच्छ—[२]"वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति" इति। तत इमं पञ्चिमं प्रश्नं प्रतिब्रुवंश्च द्युलोकमग्नित्वेन रूपयित्वा [३]"तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति तस्या आहुतेस्सोमो राजा सम्भवति" इत्यादिना–देवाख्याः जीवस्य प्राणाः अग्नित्वेन रूपिते द्युलोके श्रद्धाख्यं वस्तु प्रक्षिपन्ति; सा च श्रद्धा सोमराजाख्यामृतमयदेहरूपेण परिणमते; तं चामृतमयं देहं त एव प्राणाः पर्जन्येऽग्नित्वेन रूपिते प्रक्षिपन्ति; स च देहस्तत्र प्रक्षिप्तो वर्षं भवति; तच्च वर्षं त एव प्राणाः पृथिव्यामग्नित्वरूपितायां प्रक्षिपन्ति; तच्च तत्र प्रक्षिप्तमन्नं भवति; तच्चान्नं त एव पुरुषेऽग्नित्वरूपिते प्रक्षिपन्ति; तच्च तत्र रेतो भवति; तच्च त एव योषायामग्नित्वरूपितायां प्रक्षिपन्ति; तच्च तत्र प्रक्षिप्तं गर्भो भवतीत्युक्त्वा आह—[४]"इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति" इति। एवं पञ्चम्यामाहुतौ हुतायामापः पुरुषशब्दाभिलप्या भवन्तीत्यर्थः। एवमुक्ते पूर्वास्वप्याहुतिष्वनुवर्तमानानामेवापां सूक्ष्मरूपाणामिदानीं पुरुषाकारत्वं भवतीत्युक्तं भवति। अत एवं प्रश्नप्रतिवचनाभ्यां देहहेतुभूतैर्भूतसूक्ष्मैस्सह तत्रतत्र यातीति गम्यते ॥ १ ॥

---

१. शारी. २-४-१७ ॥—२. छा. ५-३-३ ॥—३. छा. ५-४-२ ॥—४. छा.५-९-१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ननु [1]"आपः पुरुषवचसः" इत्युक्ते अपां पुरुषाकारपरिणामप्रतीतेर्गच्छता जीवेन तासामेव परिष्वङ्गः प्रतीयते; अतः कथं सर्वेषां भूतसूक्ष्माणां परिष्वङ्ग इति; तत्राह—

त्र्यात्मकत्वात्तु भूयस्त्वात् । ३ । १ । २ ॥

तुशब्दश्शोद्यं व्यावर्तयति । देहारम्भकाणामपां केवलानां न देहारम्भसम्भवः । देहाद्यारम्भाय हि [2]"तासां त्रिवृतंत्रिवृतमेकैकामकरोत्" इति त्रिवृत्करणम् । केवलानामपां श्रवणं तु तासां भूयस्त्वात् । देहे च लोहितादिभूयस्त्वेनारम्भकेष्वपां भूयस्त्वं गम्यते ॥ २ ॥

प्राणगतेश्च । ३ । १ । ३ ॥

इतश्च भूतसूक्ष्मपरिष्वक्तस्य गमनमिति गम्यते । उत्क्रामति जीवे प्राणानां तदनुगतिश्श्रूयते—[3]"तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति" इति । स्मर्यते च—[4]"मनषष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति । शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात्" इति । नच निराश्रयाणां गतिरुपपद्यत इति तदाश्रयभूतानां भूतसूक्ष्माणामपि गतिरभ्युपगन्तव्या ॥ ३ ॥

अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात् । ३ । १ । ४ ॥

[5]"यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति, वातं प्राणश्चक्षुरादित्यम्" इत्यादिना प्राणानां जीवमरणकाले अग्न्यादिष्वप्ययश्रवणान्न तेषां जीवेन सह गमनमिति गतिश्रुतिरन्यथा नेयेतिचेत्—न, भाक्तत्वात् अग्न्यादिष्वप्ययश्रवणस्य । कथं भाक्तत्वम्? [5]"ओषधीर्लोमानि वनस्पतीन् केशाः" इत्यनपियद्भिर्लोमादिभिस्सह श्रवणात् । अतश्चक्षुराद्य-

१. छा. ५-९-१ ॥—२. छा. ६-३-३॥—३. बृ. ६-४-२ ॥—४. मो. १५-७॥
५. बृ. ५-२-१३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्ययश्रुतिरधिष्ठातृदेवतापक्रमणपरा ॥ ४ ॥

प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः।३।१।५॥

यदुक्तमद्भिस्सूक्ष्माभिर्भूतान्तरसंसृष्टाभिः परिष्वक्तो जीवो गच्छतीति प्रश्नप्रतिवचनाभ्यामवगम्यत इति ; तन्नोपपद्यते, द्युलोकाग्निविषये प्रथमे होमे अपां होम्यत्वाश्रवणात् । [१]"तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति" इति श्रद्धैव होम्यत्वेन श्रुता । श्रद्धा नाम जीवस्य मनोवृत्तिविशेषत्वेन प्रसिद्धा । अतो नापस्तत्र होम्या इति चेत्—न, यतः ताः—आप एव श्रद्धाशब्देन तत्राभिधीयन्ते; कुतः? प्रश्नप्रतिवचनोपपत्तेः। [२] "वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति" इतिप्रश्नस्य प्रतिवचनोपक्रमे हि श्रद्धा द्युलोकाग्नौ होम्यत्वेन श्रुता ; तत्र यदि श्रद्धाशब्देनापो नोच्येरन् ; ततोऽन्यथा प्रश्नोऽन्यथा प्रतिवचनमित्यसङ्गतं स्यात् । [३] "इति तु पञ्चम्यामाहुतावापः पुरुषवचसः" इति प्रतिवचननिगमनं च श्रद्धाया अप्त्वमेव सूचयति। [२]"वेत्थ यथा" इति हि प्रश्नगतः प्रकारः [३]"इति तु पञ्चम्याम्" इतीतिशब्देन परिहारे निगम्यते । श्रद्धासोमराजवर्षान्नरेतोगर्भरूपेणापां परिणाममुक्त्वा ह्येवमापः पुरुषवचस इति निगम्यते । श्रद्धाशब्दस्य चाप्सु वैदिकप्रयोगो दृश्यते—[४]"अपः प्रणयति श्रद्धा वा आपः" इति। [१]"श्रद्धां जुह्वति तस्या आहुतेस्सोमो राजा सम्भवति"इति सोमाकारेण परिणामश्चापामेवोपपद्यते । अतो भूतान्तरसंसृष्टाभिरद्भिस्सम्परिष्वक्तो जीवो रंहतीत्युपपन्नम् ॥ ५ ॥

अश्रुतत्वादितिचेन्नेष्टादिकारिणां प्रतीतेः।३।१।६॥

यत्पुनरुक्तमद्भिस्संपरिष्वक्तो जीवो यातीत्ययमर्थ एतस्माद्वाक्यादवगम्यत इति ; तन्नोपपद्यते, अस्मिन्वाक्ये जीवस्याश्रवणात् । अत्र हि

छा. ५-४-२ ॥—२. छा. ५-३-३ ॥—३. छा. ५-९-१ ॥—४. ३. अष्ट. २-४-३३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रद्धादय एवाम्ववस्थाविशेषा होम्यत्वेन श्रुताः; न तु जीवस्तत्परिष्वक्त इतिचेत्—तन्न, इष्टादिकारिणां प्रतीतेः—अस्मिन्नेव वाक्ये ह्युत्तरत्र ब्रह्मज्ञानविधुरेष्टापूर्तदत्तकारिणो द्युलोकं प्राप्य सोमराजानो भवन्ति; पुण्यकर्मावसाने च पुनरागत्य गर्भं प्राप्नुवन्तीत्युच्यते [१] "अथ य इमे ग्रामे इष्टापूर्ते दत्तमित्युपासते ते धूममभिसम्भवन्ति" इत्यारभ्य [१]"पितृलोकादाकाशमाकाशाच्चन्द्रमसमेष सोमो राजा तद्देवानामन्नं तं देवा भक्षयन्ति" [१]"तस्मिन्यावत्सम्पातमुषित्वाऽथैतमेवाध्वानं पुनर्निवर्तन्ते"[१] "योयो ह्यन्नमत्ति यो रेतस्सिञ्चति तद्भूय एव भवति" इति। अत्रापि द्युलोकाग्नौ [२]"श्रद्धां जुह्वति तस्या आहुतेस्सोमो राजा सम्भवति" इति तदेकार्थत्वाच्छ्रद्धावस्थदेहविशिष्टस्सोमरूपदेहविशिष्टो भवतीत्युक्तमिति गम्यते। देहस्य जीवविशेषणतैकस्वरूपस्य वाचकः शब्दो विशेष्ये जीव एव पर्यवस्यति; अतस्सम्परिष्वक्तो जीवो यातीत्युपपद्यते॥ ६॥

ननुच [१]"तं देवा भक्षयन्ति" इति देवैर्भक्ष्यमाणत्ववचनात् [१]"सोमो राजा"इति न जीव उच्यते, जीवस्यानदनीयत्वात्; तत्राह—

भाक्तं वानात्मवित्वात्तथाहि दर्शयति। ३।१।७॥

वाशब्दश्चोद्यं व्यावर्तयति। इष्टादिकारिणोऽनात्मवित्त्वात्स देवानां भोगोपकरणत्वेनेहामुत्र च वर्तते। इहेष्टादिना तदाराधनं कुर्वन्नुपकरोति; आराधनमीतैर्देवैर्दत्तममुं लोकं प्राप्य तत्र तत्समानभोगस्तदुपकरणंभवति। [३]"यथा पशुरेवं स देवानाम्" इत्यनात्मविदो देवानामुपकरणत्वं दर्शयति श्रुतिः। स्मृतिरप्यात्मविदां ब्रह्मप्राप्तिमनात्मविदां च देवभोग्यत्वं दर्शयति [४]"देवान् देवयजो यान्ति मद्भक्ता यान्ति मामपि" इति। अतो जीवस्य देवानां भोगोपकरणत्वाभिप्रायमन्नत्वेन भक्ष्यत्ववचनम्; अतस्तद्भाक्तम्। तेन तृप्तिरेव च देवानां भक्षणमिति श्रूयते [५]"न वै देवा अश्नन्ति न पिब-

१. छा. ५-१०-३,४,५,६, ॥— २. छा. ५-४-२ ॥— ३. बृ. ३-४-१० ॥— ४. गी. ७-२३ ॥—५. छा. ३-६-१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न्ति एतदेवामृतं दृष्ट्वा तृप्यन्ति"इति। तस्माद्भूतसूक्ष्मैस्सम्परिष्वक्तो जीवो रंहतीति सिद्धम् ॥ ७ ॥

इति श्रीशारीरकमीमांसाभाष्ये तदन्तरप्रतिपत्त्यधिकरणम् ॥ १ ॥

वेदान्तसारे—तदन्तरप्रतिपत्तौ रंहति सम्परिष्वक्तः प्रश्ननिरूपणाभ्याम् ॥ जीवो देहाद्देहान्तरप्राप्तौ भूतसूक्ष्मैस्संपरिष्वक्तो यातीति पञ्चाग्निविद्यायां प्रश्नप्रतिवचनाभ्यामवगम्यते । १"वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति" इति प्रश्नः, २"इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति" इति प्रतिवचनम्।३उत्तरैस्सूत्रैरर्थोऽभिव्यज्यते । सचायमर्थः—जीवो ब्राह्मणादिदेहस्थः ४स्वाहादानादिकर्मकृत् तत्तत्फलभोगायास्मादेहादुत्थाय गच्छन्, एतद्देहस्थाभिः भूतान्तरसंसृष्टाभिः सूक्ष्माकाराभिरद्भिः सम्परिष्वक्तोऽग्नित्वेन निरूपितं द्युलोकं प्राप्य ताभिरेवामृतमयदेहाकारपरिणताभिरद्भिः परिष्वक्तो देवानां शेषत्वमुपगम्य तैस्सह तत्र भोगमनुभूय कर्मावसाने भुक्तशिष्टब्राह्मणादियोनिप्रापककर्मणा सह पुनरपीमं कर्मलोकमागम्य,कर्म कर्तुं ताभिः परिष्वक्तोऽग्नित्वरूपितं पर्जन्यं प्राप्य, वर्षधाराभिस्सहाग्नित्वनिरूपितपृथिवीमुपगम्य, व्रीह्यादिसस्येन संयुज्य, अन्नाकारपरिणतेन तेन सहाग्नित्वनिरूपितं पुरुषं प्राप्य, तत्र शुक्राकारपरिणताभिस्ताभिरद्भिः परिष्वक्तोऽग्नित्वनिरूपितां योषितं प्राप्य, तत्र गर्भाकारपरिणताभिस्ताभिरद्भिः पुरुषशब्दाभिलपनीयाभिः परिष्वक्तः कर्मानुरूपं ब्राह्मणादिरूपेण जायते—इति ॥ १ ॥

त्र्यात्मकत्वात्तु भूयस्त्वात् ॥ सर्वस्य त्रिवृत्करणेन त्र्यात्मकत्वात् भूतान्तरसंसृष्टा एवापो भूयस्त्वेनाप्छब्देनोच्यन्ते ॥ २ ॥

प्राणगतेश्च ॥ ५"प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति" इति जीवेन सहेन्द्रियगतेरुत्क्रदाश्रयत्वेन देहगमनं प्रतीयते ॥ ३ ॥

अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात् ॥ ६"अग्निं वागप्येति" इतीन्द्रियाणामग्न्यादिगतिश्रुतेर्न जीवेन गमनमितिचेत्—न, वागाद्यभिमानिदेवतासु भाक्तत्वात् वागादिशब्दानाम्, ६"ओषधीर्लोमानि" इत्यनपियद्भिर्लोमादिभिस्सहपाठात् ॥ ४ ॥

---

१. छा. ५-३-३ ॥—२. छा. ५-९-१ ॥—३. तयोरुत्तरसूत्रैरर्थोऽभि. पा ॥—४. यागदानादि. पा ॥—५. बृ. ६-४-२॥—६. बृ. ५-२-१३॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः ॥ प्रथमे—द्युलोकेऽपामश्रवणात् नापो गच्छन्ति ; १"एतस्मिन्नग्नौ देवाश्श्रद्धां जुह्वति" इति श्रद्धैव श्रुतेति चेत्—न, आप एव श्रद्धाशब्देनोच्यन्ते—इत्यप्सु पृष्टासु तदुत्तरत्वोपपत्तेर्गम्यते ; २"श्रद्धा वा आपः" इति श्रूयते ॥ ५ ॥

अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः ॥ अत्र प्रश्नप्रतिवचनयोराप एव प्रतीयन्ते ; न तत्परिष्वक्तो जीव इति चेत्—न, उत्तरत्र ३"अथ य इमे ग्रामे इष्टापूर्ते दत्तमित्युपासते" इत्यादाविष्टादिकारिणां गमनप्रकारवचनात् । द्युलोकाग्निसम्बन्ध्यप्छब्दवाच्यस्य १"तस्या आहुतेस्सोमो राजा सम्भवति" इति सोमभूतस्यैव ३"सोमो राजा" इति प्रत्यभिज्ञानादद्भिः परिष्वक्तस्सच्छरीरक एव आप इत्युच्यते इत्यवगम्यते ॥ ६ ॥

भाक्तं वानात्मवित्त्वात्तथाहि दर्शयति ॥ ३"एष सोमो राजा... तन्देवा भक्षयन्ति" इति सोमापन्नस्य देवैर्भक्ष्यमाणत्ववचनं, भाक्तम्—अनात्मवित्त्वेन देवोपकरणत्वाभिप्रायम् । तथा हि दर्शयति श्रुतिः । ४"यथा पशुरेवं स देवानाम्" इति पशुवद्देवोपकरणत्वन्दर्शयति ; तथात्मविदामनात्मविदाञ्च परमपुरुषोपकरणत्वं देवोपकरणत्वञ्च स्मर्यते ५"देवान्देवयजो यान्ति मद्भक्ता यान्ति मामपि" इति ॥ ७ ॥

इति वेदान्तसारे तदन्तरप्रतिपत्त्यधिकरणम् ॥ १ ॥

वेदान्तदीपे—तदन्तरप्रतिपत्तौ रंहति सम्परिष्वक्तः प्रश्ननिरूपणाभ्याम् ॥ देही देहान्तरगमने देहकारणभूतैर्भूतसूक्ष्मैस्संयुक्तो गच्छति, नेति संसयः । न संयुक्तो गच्छतीति पूर्वः पक्षः, देहारम्भाय तत्रतत्र भूतसूक्ष्माणां सुलभत्वात् । राद्धान्तस्तु—पञ्चाग्निविद्यायां ६"वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति" ७"इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति" इति प्रश्नप्रतिवचने आम्नायेते । देहारम्भिका आपस्त्रिवृत्करणेन भूतान्तरसंसृष्टाः द्युलोकपर्जन्यपृथिवीपुरुषरूपाग्निषु जीवेन सह प्रविष्टाः पञ्चम्यामाहुतौ योषिदग्निप्रवेशवेलायां पुरुषशब्दाभिलपनीया भवन्तीति प्रतीयते ; पुरुषाकारतां भजन्त इत्यर्थः । अतो भूतसूक्ष्मैस्सम्परिष्वक्त एव गच्छतीति।सूत्रार्थस्तु—तदन्तरप्रतिपत्तौ—८"संज्ञामूर्तिक्लृप्तिः"इत्यत्र मूर्तिशब्देन दे-

---

१. छा. ५-४-२ ॥—२. ३. अष्ट. २-४ ३३ ॥—३ छा. ५-१०, ३, ४ ॥—४ ॥—५. गी. ७-२३॥—६.छा. ५-३-३॥—७.छा.५-९-१॥—८. शारी.२-४-१७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हः प्रस्तुतत्वच्छब्देन परामृश्यते ; देहान्तरप्रतिपत्तौ। रंहति सम्परिष्वक्तः—जीवो भूतसूक्ष्मैस्सम्परिष्वक्तो गच्छति । कुतः ; प्रश्ननिरूपणाभ्यां—पञ्चाग्निविद्यान्तर्गतप्रश्नप्रतिवचनाभ्यां तथाऽवगम्यत इत्यर्थः ॥ १ ॥

कथमविशेषेणाप्छब्देन सर्वेषामभिधानमित्याशङ्क्याह—

त्र्यात्मकत्वात्तु भूयस्त्वात्॥ तुशब्दश्शङ्कानिवृत्त्यर्थः । अपां त्रिवृत्करणेन त्र्यात्मकत्वादाप इति भूतान्तरसंसृष्टा आपोऽभिधीयन्ते, अपां भूयस्त्वात् आधिक्यादप्छब्देनाभिधानम् ॥ २ ॥

प्राणगतेश्च ॥ इतश्च भूतसूक्ष्मैस्संयुक्तो याति । १"तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति" इति प्राणानाम्-इन्द्रियाणां जीवेन सह गमनश्रुतेः इन्द्रियाणां देहाश्रयत्वेन देहोऽपि भूतसूक्ष्मरूपेण गच्छतीति गम्यते । स्मर्यते च २"मनष्षष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति" इत्यादिना ॥ ३ ॥

अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात् ॥ ३"यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वातं प्राणश्चक्षुरादित्यम्" इति मरणवेलायां वागादीनामग्न्यादिष्वप्ययश्रुतेर्जीवेन सह गमनश्रुतिरन्यथा नेयेतिचेत् ; तन्न, भाक्तत्वात् तत्र वागादिशब्दानाम् । वागाद्यभिमानिदेवतासु हि तत्र वागादयश्शब्दाः । ३"ओषधीर्लोमानि वनस्पतीन्केशाः" इत्यनपियद्भिर्लोमादिभिस्सहपाठात् ॥४॥

प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः ॥ प्रथमे—द्युलोकाग्निहोमे अपामश्रवणात् आपो भूतान्तरसंसृष्टा गच्छन्तीति वक्तुं न शक्यते ; तत्र हि ४"तस्मिन्नेतस्मिन्नग्नौ देवाश्श्रद्धां जुह्वति" इति श्रद्धैव होम्यत्वेन श्रूयत इति चेत्—न, ताः - आप एव हि श्रद्धाशब्देनोच्यन्ते, प्रतिवचनस्य प्रश्नानुगुण्योपपत्तेः । ५"वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति" इत्यपां पुरुषवचस्त्वप्रकारे पृष्टे स एव हि प्रतिवक्तव्यः ; अतश्श्रद्धाशब्देन ता आप एवोच्यन्ते । ६"श्रद्धा वा आपः" इति हि श्रूयते ॥ ५ ॥

अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः ॥ ५"आपः पुरुषवचसो भवन्ति" ४"श्रद्धां जुह्वति" इति द्युलोकादिष्वाप एव हि गच्छन्तीति श्रूयते ; न तत्परिष्वक्तो जीवः । अतः प्रश्नप्रतिवचनयोर्जीवस्याश्रुतत्वात्तत्संयुक्तो जीवो गच्छतीति न शक्यते वक्तुमिति चेत्—तन्न, इष्टादिकारिणां प्रतीतेः-

१. बृ. ६-४-२ ॥—२. गी. १५-७॥—३. बृ. ५-२-१३॥—४. छा.५-४-२॥—५. छा. ५-३-३ ॥—६. ३-अष्ट. २-४-३३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तेः—उत्तरत्र १"अथ य इमे ग्रामे इष्टापूर्ते दत्तमित्युपासते ते धूममभिसम्भवन्ति" इत्यादौ इष्टादिकारिणां जीवानां द्युलोकादिगमनपुनरावृत्तिप्रकारवचने द्युलोकाग्निसम्बद्धस्याप्छब्दवाच्यस्य सोममापन्नस्य प्रत्यभिज्ञानादत्राप इति तत्संयुक्तो जीव एवोच्यते ॥ ६ ॥

१"आकाशाच्चन्द्रमसमेष सोमो राजा तद्देवानामन्नं तं देवा भक्षयन्ति" इति धूमादिना गतस्य देवैर्भक्ष्यमाणत्वश्रवणात्, जीवस्याऽनदनीयत्वाच्च न जीवस्तत्रोक्त इत्याशङ्क्याह—

भाक्तं वाऽनात्मवित्त्वात्तथाहि दर्शयति ॥ वाशब्दश्शङ्काव्यावृत्त्यर्थः। १"तं देवा भक्षयन्ति"इति भक्ष्यत्ववचनं भाक्तम्—केवलेष्टादिकारिणामनात्मवित्त्वादेवोपकरणत्वाभिप्रायम् । अनात्मविदः केवलेन्द्रादिदेवयाजिनो हि देवान्प्राप्य तदुपकरणं भवन्ति । तथा हि दर्शयति श्रुतिः २"यथा पशुरेवं स देवानाम्" इति । अतो भूतसूक्ष्मैस्सम्परिष्वक्तो जीवो रंहति ॥ ७ ॥

इति वेदान्तदीपे तदन्तरप्रतिपत्त्यधिकरणम् ॥ १ ॥

(श्रीशारीरकमीमांसाभाष्ये कृतात्ययाधिकरणम् ॥ २ ॥)

कृतात्ययेऽनुशयवान्दृष्टस्मृतिभ्यां यथेतमनेवं च। ३।१।८॥

केवलेष्टापूर्तदत्तकारिणां धूमादिना पितृयाणेन पथा गमनं कर्मफलावसाने पुनरावर्तनं चाम्नातं १"यावत्सम्पातमुषित्वाऽथैतमेवाध्वानं पुनर्निवर्तन्ते" इति । तत्र प्रत्यवरोहन् जीवः किमनुशयवान् प्रत्यवरोहति, उत नेति संशय्यते । किं युक्तम्? कर्मणः कृत्स्नस्योपभुक्तत्वात् नानुशयवानिति प्राप्तम् । अनुशयो ह्युपभुक्तशिष्टं कर्म । तच्च कृत्स्नफलपभोगे सति नावशिष्यते । २ "यावत्सम्पातमुषित्वा" इति वचनात् कृत्स्नोपभोगश्च ज्ञायते । सम्पतन्त्यनेन स्वर्गं लोकमिति सम्पातः कर्मोच्यते। श्रुत्यन्तरं च

१. छा. ५-१०-३, ४, ५ ॥—२. बृ. ३-४-१० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

१ "प्राप्यान्तं कर्मणस्तस्य यत्किञ्चेह करोत्ययम्। तस्माल्लोकात्पुनरेत्यस्मै लोकाय कर्मणे" इति ॥

(सिद्धान्तः.)

एवं प्राप्तेऽभिधीयते—अनुशयवान् प्रत्यवरोहति—इति। कुतः? दृष्टस्मृतिभ्यां—श्रुतिस्मृतिभ्यामित्यर्थः। श्रुतिस्तावत्—२ "तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन् ब्राह्मणयोनिं क्षत्रिययोनिं वैश्ययोनिं वा अथ य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्येरन् श्वयोनिं वा सूकरयोनिं वा चण्डालयोनिंवा" इति प्रत्यवरूढान् प्रति श्रूयते। अमुष्माल्लोकात्प्रत्यवरूढेषु रमणीयकर्माणो रमणीयां ब्राह्मणादियोनिं प्रतिपद्यन्ते; कपूयचरणाः-कुत्सितकर्माणः कुत्सितां श्वसूकरचण्डलादियोनिं प्रतिपद्यन्त इति प्रत्यवरूढानां पुण्यपापकर्मयोगं दर्शयति। स्मृतिरपि—३ "वर्णा आश्रमाश्च स्वकर्मनिष्ठाः प्रेत्य कर्मफलमनुभूय ततः शेषेण विशिष्टदेशजातिकुलरूपायुश्श्रुतवित्तवृत्तसुखमेधसो जन्म प्रतिपद्यन्ते विष्वञ्चो विपरीता नश्यन्ति" इति। तथा—४ "ततः परिवृत्तौ कर्मफलशेषेण जातिं रूपं वर्णं बलं मेधां प्रज्ञां द्रव्याणि धर्मानुष्ठानमिति प्रतिपद्यन्ते तच्चक्रवदुभयोर्लोकयोस्सुख एव वर्तते" इति। २"यावत्सम्पातम्" इति फलदानप्रवृत्तकर्मविशेषविषयम्; १"यत्किञ्चेह करोत्ययम्" इतीदमपि तद्विषयमेव। अभुक्तफलानामकृतप्रायश्चित्तानां च कर्मणां कर्मान्तरफलानुभवान्नाशोऽप्यनुपपन्नः। अतोऽमुं लोकं गतास्सानुशया एव यथेतमनेवं च पुनर्निवर्तन्ते—आरोहणप्रकारेण प्रकारान्तरेण च पुनर्निवर्तन्त इत्यर्थः। आरोहणं हि धूमराज्यपरपक्षदक्षिणायनषण्मासपितृलोकाकाशचन्द्रक्रमेण; अवरोहणं तु चन्द्रमसः स्थानादाकाशवायुधूमाभ्रमेघक्रमेण। तत्राकाशावरोहणाद्यथेतम्; वाय्वादिप्राप्तेः पितृलोकाद्यप्राप्तेश्चानेवम् ॥ ८ ॥

१. ब्र. ६-४-६॥—२. छा. ५-१०-७, ५॥—३. गौतम. २-प्र. ११-अ. १२,१३॥—४. आपस्तम्ब. २-१-२-३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चरणादितिचेन्न तदुपलक्षणार्थेति काष्णाजिनिः । ३ । १ । ९ ॥

१"रमणीयचरणाः" १"कपूयचरणाः" इति न चरणशब्देन पुण्यपापरूपं कर्माभिधीयते, चरणशब्दस्य लोकवेदयोराचारे प्रसिद्धेः; लौकिकाः खलु चरणमाचारः शीलं वृत्तमिति पर्यायानभिमन्यन्ते; वेदे च २"यान्यनवद्यानि कर्माणि तानि सेवितव्यानि" २"यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि" इति चरणकर्मणी भेदेन व्यपदिश्येते; अतः चरणात्—शीलात् योनिविशेषप्राप्तिः, नानुशयादितिचेत्—तन्न, चरणश्रुतिः कर्मोपलक्षणार्थेति काष्णाजिनिराचार्यो मन्यते, केवलादाचारात्सुखदुःखप्राप्त्यसम्भवात् । सुखदुःखे हि पुण्यपापरूपकर्मफले ॥ ९ ॥

आनर्थक्यमितिचेन्न तदपेक्षत्वात् । ३ । १ । १० ॥

एवं तर्ह्यफलत्वादाचारस्य स्मृतिविहितस्यानर्थक्यमेवेति चेत्—तन्न, तदपेक्षत्वात्पुण्यस्य कर्मणः। आचारवत एव पुण्यकर्मस्वधिकारः—३"सन्ध्याहीनोऽशुचिर्नित्यमनर्हस्सर्वकर्मसु"४"आचारहीनं न पुनन्ति वेदाः" इत्यादिवचनेभ्यः । अतश्चरणश्रुतिः कर्मोपलक्षणार्थेति काष्णाजिनेरभिप्रायः ॥ १० ॥

सुकृतदुष्कृते एवेति तु बादरिः । ३ । १ । ११ ॥

'पुण्यं कर्माचरति''पापं कर्माचरति'इति कर्मणि चरतेः प्रयोगात्, पृथङ्निर्देशस्य च प्रत्यक्षश्रुतिसिद्धाचारानुमितश्रुतिसिद्धविषयत्वेन गोबलीवर्दन्यायेनोपपत्तेः । मुख्ये सम्भवति न लक्षणा न्याय्येति सुकृतदुष्कृते एव चरणशब्दाभिधेये इति बादरिराचार्यो मन्यते । अत्र बादरिमतमेव स्वमतम्; आचारानुमितश्रुतिविहितसन्ध्यावन्दनादेः कर्मान्तराधिकार-

१. छा. ५-१०-७ ॥—२. तै. शिक्षा. ११-२ ॥—३ ॥—४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सम्पादनं फलमिति तु स्वीकृतम् । अतस्सानुशया एव प्रत्यवरोहन्ति ॥

इति श्रीशारीरकमीमांसाभाष्ये कृतात्ययाधिकरणम् ॥ २ ॥

वेदान्तसारे—कृतात्ययेऽनुशयवान्दृष्टस्मृतिभ्यां यथेतमनेवं च ॥ कृतस्य कर्मणोऽन्ते निवर्तमानो भुक्तशिष्टकर्मवान्निवर्तत इति श्रुतिस्मृतिभ्यामवगम्यते । १"रमणीयचरणाः...रमणीयां योनिमापद्यन्ते" इति श्रुतिः । २"ततः परिवृत्तौ कर्मफलशेषेण जातिं रूपम्" इत्यादिका स्मृतिः । आरोहप्रकारेण मार्गैकदेशः, प्रकारान्तरेण चैकदेशः ॥ ८ ॥

चरणादितिचेन्न तदुपलक्षणार्थेति काष्णाजिनिः ॥ १"रमणीयचरणाः" इति चरणशब्दान्नानुशयः, चरणशब्दस्य स्मार्ताचारविषयत्वादिति चेत्—न, अनुशयोपलक्षणार्था आचारश्रुतिः, तस्यैव सुखसाधनत्वात् ॥ ९ ॥

आनर्थक्यमितिचेन्न तदपेक्षत्वात् ॥ स्मार्ताचारस्यानुपयोगात् आनर्थक्यमिति चेत्—न, तदपेक्षत्वात् सर्वस्य पुण्यकर्मणः, ३"सन्ध्याहीनोऽशुचिर्नित्यमनर्हस्सर्वकर्मसु" इति वचनादिति काष्णाजिनिमतम् ॥ १० ॥

सुकृतदुष्कृते एवेति तु बादरिः ॥ १"रमणीयचरणाः...कपूयचरणाः" इति चरणशब्देन सुकृतदुष्कृते एवाभिधीयेते । 'पुण्यं कर्माचरति' इति प्रसिद्धेरिति बादरिः। एतदेव स्वीकृतम् ; स्मार्ताचारापेक्षं सर्वं पुण्यं कर्मेति च स्वीकृतम् ॥ ११ ॥

इति वेदान्तसारे कृतात्ययाधिकरणम् ॥ २ ॥

वेदान्तदीपे—कृतात्ययेऽनुशयवान्दृष्टस्मृतिभ्यां यथेतमनेवं च ॥ धूमादिना गतो निवर्तमानो जीवः सानुशयो निवर्तते, उत नेति संशयः । नेति पूर्वः पक्षः । अनुशयो हि भुक्तशिष्टं कर्म । १"यावत्सम्पातमुषित्वा" ४"प्राप्यान्तं कर्मणः" इत्यादिश्रुतिभ्यः कृत्स्नस्य कर्मणोऽनुभूततापप्रतीतेः नानुशयवान्निवर्तते । राद्धान्तस्तु—१"तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन् ब्राह्मणयोनिं क्षत्रियोनिं वैश्ययोनिं वा अथ य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्येरन् श्वयोनिं वा सूकरयोनिं वा

---

१. छा. ५-१०-७, ५ ॥—२. आपस्तम्ब. २-१-२-३॥—३॥—४. बृ. ६-४-६॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चण्डालयोनिं वा'' इति रमणीयचरणा ब्राह्मणादियोनिं, कपूयचरणाः कुत्सितकर्माणः श्वसूकारादियोनिं प्रतिपद्यन्त इति श्रुतेः। १''प्राप्यान्तं कर्मणः'' इत्यादिश्रुतिः फलप्रदानप्रवृत्तकर्मविषयेति सानुशयो निवर्तते। सूत्रार्थस्तु—कृतात्यये कृतस्य पूर्वकर्मणोऽत्यये, अनुशयवान् भुक्तशिष्टकर्मवान्निवर्तते; कुतः? दृष्टस्मृतिभ्याम्—श्रुतिस्मृतिभ्यामवगम्यते;२''तद्य इह रमणीयचरणाः'' इत्यादिश्रुतिः; ३''ततः परिवृत्तौ कर्मफलशेषेण जातिं रूपम्'' इत्यादिका स्मृतिः, यथेतमनेवं च—आरोहणप्रकारेण प्रकारान्तरेण च निवर्तन्ते। चन्द्रमसस्थानादाकाशमित्यारोहणक्रमेणावरोहन्ति, वायुधूमाभ्रादिना प्रकारान्तरेणच ॥ ८ ॥

चरणादितिचेन्न तदुपलक्षणार्थेति कार्ष्णाजिनिः ॥ २''रमणीयचरणाः''इति रमणीयाचारस्य स्मृतिविहितस्य ब्राह्मण्यादिप्राप्तिसाधनत्वश्रवणात् न सकर्मा प्रत्यवरोहतीति चेत्—तन्न, चरणश्रुतिः कर्मोपलक्षणार्थेति कार्ष्णाजिनिराचार्यो मन्यते, पुण्यस्यैव कर्मणस्सुखप्राप्तिसाधनत्वात् ॥ ९ ॥

आनर्थक्यमितिचेन्न तदपेक्षत्वात् ॥ स्मृतिविहितस्याचारस्याकिञ्चित्करत्वेनानर्थक्यं प्रसज्यत इति चेत्—न, तदपेक्षत्वात्—आचारापेक्षत्वात्सुखसाधनभूतपुण्यकर्मणः; ४'' सन्ध्याहीनोऽशुचिर्नित्यमनर्हस्सर्वकर्मसु '' इति सर्वं हि पुण्यकर्माचारापेक्षमेवेति कार्ष्णाजिनेर्मतम् ॥ १० ॥

सुकृतदुष्कृते एवेति तु बादरिः ॥ तुशब्दः पूर्वमतव्यावृत्त्यर्थः; २''रमणीयचरणाः.. कपूयचरणाः'' इति चरणशब्देन सुकृतदुष्कृते एव कर्मणी प्रतिपाद्येते; 'पुण्यं कर्माचरति' इति चरतेः कर्मणि प्रसिद्धेः न लक्षणा न्याय्येति बादरिर्मन्यते। इदमेव सूत्रकाराभिप्रेतम्, तुशब्देन पूर्वमताद्व्यावृत्तेः सुकृतदुष्कृते एवेति व्यावर्तनात्। 'आनर्थक्यमितिचेन्न तदपेक्षत्वात्' इति तु स्वीकृतम् ॥ ११ ॥

इति वेदान्तदीपे कृतात्ययाधिकरणम् ॥ २ ॥

(श्रीशारीरकमीमांसाभाष्ये अनिष्टादिकार्यधिकरणम् ॥३॥)

अनिष्टादिकारिणामपि च श्रुतम्। ३। १। १२ ॥

---

१. बृ. ६-४-६ ॥—२. छा. ५-१०-७ ॥—३. आपस्त. २-१-२-३ ॥—४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

केवलेष्टापूर्तदत्तकारिणश्चन्द्रमसं गत्वा सानुशया एव निवर्तन्त इत्युक्तम् ; इदानीमनिष्टादिकारिणोऽपि चन्द्रमसं गच्छन्ति,नेति चिन्त्यते। ये विहितं न कुर्वन्ति, निषिद्धं च कुर्वन्ति, त उभयेऽपि पापकर्माणोऽनिष्टादिकारिणः। किं युक्तम्? तेऽपि चन्द्रमसं गच्छन्तीति ; कुतः? तेषामपि हि तद्गमनं श्रुतं–[१]"ये वैकेचास्माल्लोकात्प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति" इत्यविशेषेण सर्वेषामेव गतिश्रवणात् ॥ १२ ॥

एवं तर्हि सुकृतदुष्कृतकारिणोरुभयोरप्यविशिष्टैव गतिस्स्यात् ; नेत्याह—

संयमने त्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात् । ३ । १ । १३ ॥

तुशब्दश्शङ्कां व्यावर्तयति ; इतरेषाम् - अनिष्टादिकारिणां चन्द्रारोहावरोहौ संयमने-यमशासने तत्प्रयुक्तयातना अनुभूयैव, नान्यथा ; कुतः? तद्गतिदर्शनात्–दृश्यते हि पापकर्मणां यमवश्यतया तद्गमनम् [२]"अयं लोको नास्ति न पर इतिमानी पुनःपुनर्वशमापद्यते मे" [३] "वैवस्वतं सङ्गमनं जनानां यमं राजानम्" इत्यादिषु ॥ १३ ॥

स्मरन्तिच । ३ । १ । १४ ॥

स्मरन्ति च सर्वेषां यमवश्यतां पराशरादयः [४] "सर्वे चैते वशं यान्ति यमस्य भगवन्निति" इत्यादिषु ॥ १४ ॥

अपि [५] । ३ । १ । १५ ॥

पापकर्मणां गन्तव्यत्वेन रौरवादीन् सप्त नरकानपि स्मरन्ति॥१५

ननु सप्तसु लोकेषु गच्छतां कथं यमसदनप्राप्तिः, अत आह—

---

१. कौषी. अ. १. २ ॥—२ ॥—३. आरण. २. प्र. १. प ॥ –४. वि. पु. ३-७-५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तत्रापि तद्व्यापारादविरोधः । ३ । १ १६ ॥

तेष्वपि सप्तसु यमाज्ञयैव गमनादविरोधः । अतोऽनिष्टादिकारिणामपि यमलोकं प्राप्य स्वकर्मानुरूपं यातनाश्चानुभूय पश्चाच्चन्द्रारोहावरोहौ स्तः ॥ १६ ॥

(सिद्धान्तः)

इति प्राप्त उच्यते—

विद्याकर्मणोरिति तु प्रकृतत्वात् । ३ । १ । १७॥

तुशब्दः पक्षव्यावृत्त्यर्थः। अनिष्टादिकारिणामपि चन्द्रप्राप्तिरस्तीत्येतन्नोपपद्यते ; कुतः ? विद्याकर्मणोरिति विद्याकर्मणोः फलभोगार्थत्वाद्देवयानपितृयाणयोः । एतदुक्तं भवति—अनिष्टादिकारिणां यथा विद्याविधुरत्वाद्देवयानेन पथा गमनं न सम्भवति ; तद्वदेवेष्टापूर्तदत्तविधुरत्वात्पितृयाणेन चन्द्रगमनमपि न सम्भवति—इति । देवयानपितृयाणयोः विद्याविषयत्वं पुण्यकर्मविषयत्वं च कथमवगम्यत इति चेत्—प्रकृतत्वात्तयोः । प्रकृता हि देवयाने विद्या, पितृयाणेच कर्म [१]"तद्य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धा तप इत्युपासते" इत्युक्त्वा [१]" तेऽर्चिषमभिसम्भवन्त्यर्चिषोऽहः" इत्यादिना देवयानवचनात्, [२] "अथ य इमे ग्राम इष्टापूर्ते दत्तमित्युपासते " इत्युक्त्वा [२] " ते धूममभिसम्भवन्ति" इत्यादिना पितृयाणवचनाच्च। [३] "ये वै के चास्माल्लोकात्प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति" इत्येतदपि वचनं ' य इष्टादिकारिणः ते सर्वे' इति परिणेयम् ॥

ननु पापकर्मणां चन्द्रगमनाभावे पञ्चमाहुत्यसम्भवाच्छरीरारम्भ एव नोपपद्यते ; [४] " पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति " इति हि

१. छा. ५-१०-१ ॥—२. छा . ५-१०-३ ॥—३. कौषी. १. अ. २ ॥—४. छा. ५-९-१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शरीराम्भश्श्रूयते, सा चाहुतिश्चन्द्रप्राप्तिपूर्विकेति दर्शितम्; अतश्शरीरारम्भायैव तेषामपि चन्द्रारोहावरोहाववश्याभ्युपेत्याविद्यत आह—

न तृतीये तथोपलब्धेः । ३ । १ । १८ ॥

* तृतीयस्थानस्य शरीरारम्भाय न पञ्चमाहुत्यपेक्षा; कुतः? तथोपलब्धेः—तृतीयस्थानशब्देन केवलपापकर्माण उच्यन्ते, तेषां देहारम्भे पञ्चमाहुत्यनपेक्षत्वमुपलभ्यते [१] "वेत्थ यथा केनासौ लोको न संपूर्यते" इत्यस्य प्रश्नस्य प्रतिवचने [२] "अथैतयोः पथोर्न कतरेण च तानीमानि क्षुद्राण्यसकृदावर्तीनि भूतानि भवन्ति जायस्वम्रियस्वेत्येतत्तृतीयं स्थानं तेनासौ लोको न संपूर्यते" इति तृतीयस्थानस्य द्युलोकारोहावरोहाभावेन द्युलोकासंपूर्तिवचनादस्य तृतीयस्थानस्य शरीरारम्भाय न पञ्चमाहुत्यपेक्षा । [३] "पञ्चम्यामाहुतौ" इतिचापां पञ्चमाग्निसम्बन्धस्य पुरुषवचस्त्वहेतुत्वमात्रं प्रतिपादयति, नान्यन्निवारयति, अवधारणाश्रवणात् ॥

स्मर्यतेऽपि च लोके । ३ । १ । १९ ॥

पुण्यकर्मणामपि केषाञ्चित्पञ्चमाहुत्यनपेक्षया देहारम्भो लोके स्मर्यते द्रौपदीधृष्टद्युम्नप्रभृतीनाम् ॥ १९ ॥

दर्शनाच्च । ३ । १ । २० ॥

श्रुतावपि दृश्यते केषाञ्चित्पञ्चमाहुत्यनपेक्षया देहारम्भः [३] "तेषां खल्वेषां भूतानां त्रीण्येव बीजानि भवन्ति आण्डजं जीवजमुद्भिज्जम्" इति एवमुद्भिज्जस्वेदजयोः भूतयोः पञ्चमाहुतिमन्तरेणोत्पत्तिर्दृश्यते ॥ २० ॥

ननु स्वेदजानामत्र न सङ्कीर्तनमास्ति [३] "त्रीण्येव बीजानि" इति वचनात्; तत्राह—

---

*तृतीयस्य स्थानस्य. पा॥—१. छा. ५-३-३॥—२. छा. ५-१० ८ ॥—३. छा. ६-३-१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तृतीयशब्दावरोधस्संशोकजस्य। ३ । १ । २१ ॥

संशोकजस्य-स्वेदजस्यापि [१] "आण्डजं जीवजमुद्भिज्जम्" इत्यत्र तृतीयेनोद्भिज्जशब्देनावरोधः सङ्ग्रहो विद्यत इत्यर्थः;अतः केवलपापकर्मणां चन्द्रप्राप्तिर्न सम्भवति ॥ २१ ॥

इति श्रीशारीरकमीमांसाभाष्ये अनिष्टादिकार्यधिकरणम् ॥ ३ ॥

वेदान्तसारे—अनिष्टादिकारिणामपि च श्रुतम् ॥ इष्टापूर्ताद्यकुर्वतामपि चन्द्रगमनमस्ति [२]"ये वै केचास्माल्लोकात्प्रयन्ति चन्द्रमसमेव ते" इत्यविशेषात् ॥ १२ ॥

संयमने त्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात् ॥ इष्टापूर्ताद्यकुर्वतां यमसदने तत्फलमनुभूयारोहादिः, [३]"वैवस्वतं सङ्गमनम्" इत्यादौ तद्गतिदर्शनात् ॥ १३ ॥

स्मरन्ति च ॥ [४]"सर्वे चैते वशं यान्ति यमस्य" इति ॥ १४ ॥

अपि सप्त ॥ सप्त रौरवादीनपि स्मरन्ति ॥ १५ ॥

तत्रापि तद्व्यापारादविरोधः ॥ तत्रापि यमव्यापारादेव यमवश्यतायाः अविरोधः ॥ १६ ॥

विद्याकर्मणोरिति तु प्रकृतत्वात् ॥ विद्याकर्मणोः फलं ब्रह्मागमनं चन्द्रगमनञ्च। कथम् ? [५]"तद्य इत्थं विदुः तेऽर्चिषमभिसम्भवन्ति" [६]"इष्टापूर्ते दत्तमित्युपासते ते धूममभिसम्भवन्ति" इति प्रकृतत्वात् ब्रह्मचन्द्रगमनयोः। अतः पापिनां न तद्गतिप्रसङ्गः ॥ १७ ॥

न तृतीये तथोपलब्धेः ॥ न च पापिनां द्युलोकगमनाय चन्द्रलोकगमनापेक्षा, तेषान्द्युलोकगमनाभावोपलब्धेः—[७]"अथैतयोः पथोर्न कतरेण च" इत्यारभ्य, [७]"एतत्तृतीयं स्थानं तेनासौ लोको न सम्पूर्यते" इति । तृतीयस्थानमिति पापकर्माण उच्यन्ते ॥ १८ ॥

---

१. छा. ६-३-१ ॥—२. कौषी. १. अ. २ ॥—३. आरण्. २. प्र. १. प ॥—४. वि. पु. ३-७-५ ॥—५. छा. ५-१०-१॥—६. छा. ५-१०-३॥—७.छा.५-१०-८॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्मर्यतेऽपि च लोके ॥ लोके च द्रौपद्यादीनां पुण्यकर्मणामपि पञ्चमाहुत्यनपेक्षदेहारम्भस्स्मर्यते ॥ १९ ॥

दर्शनाच्च ॥ तथा श्रुतावपि दृश्यते १"भूतानां त्रीण्येव बीजानि भवन्ति आण्डजं जीवजमुद्भिज्जम्" इति स्वेदजोद्भिज्जयोस्तदनपेक्षत्वम् ॥ २० ॥

तृतीयशब्दावरोधस्संशोकजस्य ॥ स्वेदजस्य उद्भिज्जशब्देन सङ्ग्रह इत्यर्थः ॥ २१ ॥

इति वेदान्तसारे अनिष्टादिकार्यधिकरणम् ॥ ३ ॥

वेदान्तदीपे—**अनिष्टादिकारिणामपि च श्रुतम् ॥** विहिताकरणप्रतिषिद्धसेवारताः पापकर्माणोऽपि धूमादिना चन्द्रमसं गत्वा निवर्तन्ते,उत नेति संशयः । गत्वैव निवर्तन्त इति पूर्वः पक्षः, २"ये वै केचास्माल्लोकात्प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति" इति सर्वेषामविशेषेण चन्द्रगमनश्रुतेः । राद्धान्तस्तु—३"अथ य इमे ग्रामे इष्टापूर्ते दत्तमित्युपासते ते धूममभिसम्भवन्ति" इति धूमादिना चन्द्रगमनस्य पुण्यकर्मफलत्वश्रवणात् तद्रहिताः पापकर्माणो न गच्छन्ति—इति । २"यवैकेच" इति वचनं सर्वेषां पुण्यकर्मणां चन्द्रगमनविषयम् । सूत्रार्थस्तु—अनिष्टादिकारिणामपिच श्रुतम्—अनिष्टादिकारिणामपि इष्टापूर्ताद्यकुर्वतां पापिनामपि चन्द्रगमनमस्ति, २"ये वै केचास्माल्लोकात्प्रयन्ति" इति यतोऽविशेषेण श्रुतम् ॥ १२ ॥

संयमने त्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात् ॥ इयांस्तु विशेषः, संयमने-यमशासने पापफलमनुभूय इतरेषां पापिनां चन्द्रारोहावरोहौ ; कुतः ? तद्गतिदर्शनात् पापिनां यमसदनगतिदर्शनात् ४"वैवस्वतं सङ्क्रमनं जनानाम्" इत्यादौ ॥ १३ ॥

स्मरन्ति च ॥ ५"सर्वे चैते वशं यान्ति यमस्य भगवन्किल" इति पराशरादयस्स्मरन्ति च ॥ १४ ॥

अपि सप्त ॥ सप्तापि रौरवादयो लोकाः पापिनां गन्तव्यत्वेन स्मर्यन्ते ॥ १५ ॥

---

१ छा. ६-३-१ ॥—२. कौषी. १. अ. २॥—३. छा. ५-१०-३॥—४. आरण. २. प्र. १. प ॥—५. वि. पु. ३-७-५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ननु सप्तसु लोकेषु गच्छतां कथं यमसदनप्राप्तिः ; तत्राह—

तत्रापि तद्व्यापारादविरोधः ॥ सप्तस्वपि रौरवादिलोकेषु यमव्यापारादेव गमनाद्यमवश्यताया अविरोधः । अतः पापिनामपि यमयातना अनुभूय चन्द्रारोहावरोहावर्जनीयौ ॥ १६ ॥

इति प्राप्त उच्यते—

विद्याकर्मणोरिति तु प्रकृतत्वात् ॥ तुशब्दः पक्षव्यावृत्त्यर्थः ; न च पापकर्मणामर्चिरादिना ब्रह्मगमनं, धूमादिना चन्द्रगमनं च सम्भवति, तयोर्विद्याकर्मणोः फलत्वात् । कथमिदमवगम्यते तत्फलत्वम् ?; इति प्रकृतत्वात्—इत्थं प्रकृतत्वात् । विद्याकर्मणी हि प्रकृत्य तत्फलत्वेन गतिद्वयं प्रतिपाद्यते १"तद्य इत्थं विदुर्येचेमेऽरण्ये श्रद्धा तप इत्युपासते तेऽर्चिषमभिसम्भवन्ति"इति, २"अथ य इमे ग्राम इष्टापूर्ते दत्तमित्युपासते ते धूममभिसम्भवन्ति" इति च । पापिनां विद्यारहितत्वेन ब्रह्मगमनाभाववत् पुण्यकर्मरहितत्वेन चन्द्रगमनमपि न सम्भवतीत्यर्थः ॥ १७ ॥

३"पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति" इति पञ्चमाहुत्या देहारम्भश्रवणात् तस्याश्चन्द्रगमनपूर्वकत्वेन पापिनामपि देहारम्भाय चन्द्रगमनमवश्यम्भावीत्याशङ्क्याह—

न तृतीये तथोपलब्धेः ॥ केवलपापकर्माणः - तृतीयस्थानम् ; न तृतीये स्थाने देहारम्भाय पञ्चमाहुत्यपेक्षाऽस्ति ; तथोपलब्धेः—४"वेत्थ यथा केनासौ लोको न सम्पूर्यते" इति द्युलोकस्याप्राप्ता क इति प्रश्नस्य प्रतिवचने ५"अथैतयोः पथोर्न कतरेण च तानीमानि क्षुद्राण्यसकृदावर्तीनि भूतानि भवन्ति जायस्वम्रियस्वेत्येतत्तृतीयं स्थानं तेनासौ लोको न सम्पूर्यते"इति तृतीयस्य स्थानस्य द्युलोकाप्राप्तिश्रवणात् तस्य देहारम्भे पञ्चमाहुत्यनपेक्षत्वं ह्युपलभ्यते ॥ १८ ॥

स्मर्यतेऽपि च लोके ॥ पुण्यकर्मणामपि केषाञ्चिद्दौपद्यादीनां देहारम्भे पञ्चमाहुत्यनपेक्षत्वं शिष्टलोकेऽपि च स्मर्यते ॥ १९ ॥

दर्शनाच्च ॥ श्रुतावपि दृश्यते केषाञ्चिद्देहारम्भे पञ्चमाहुत्यनपेक्षत्वं—

---

१. छा. ५-१०-१॥—२. छा. ५-१०-३॥—३. छा. ५-९-१॥—४.छा. ५-३-३॥—५. छा. ५-१०-८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

१"तेषां खल्वेषां भूतानां त्रीण्येव बीजानि भवन्त्याण्डजं जीवजमुद्भिज्जम्" इति स्वेदजोद्भिज्जयोर्देहारम्भे पञ्चमाद्युत्यनपेक्षत्वम् ॥ २० ॥

१"आण्डजं जीवजमुद्भिज्जम्" इत्यत्र स्वेदजस्य ग्रहणं न दृश्यत इत्याशङ्क्याह—

तृतीयशब्दावरोधस्संशोकजस्य ॥१"आण्डजं जीवजमुद्भिज्जम्" इत्यत्र तृतीयेनोद्भिज्जशब्देन संशोकजस्य स्वेदजस्य अवरोधः सङ्ग्रह इत्यर्थः। अतः केवलपापकर्मणां चन्द्रारोहावरोहौ न सम्भवतः ॥ २१ ॥

इति वेदान्तदीपे अनिष्टादिकार्याधिकरणम् ॥ ३ ॥

(श्रीशारीरकमीमांसाभाष्ये तत्स्वाभाव्यापत्त्यधिकरणम् ॥)

तत्स्वाभाव्यापत्तिरुपपत्तेः । ३ । १ । २२ ॥

इष्टादिकारिणो भूतसूक्ष्मपरिष्वक्तास्सानुशयाश्चन्द्रमसोऽवरोहन्तीत्युक्तम् ;अवरोहप्रकारश्च २ "अथैतमेवाध्वानं पुनर्निवर्तन्ते यथेतमाकाशम् आकाशाद्वायुं वायुर्भूत्वा धूमो भवति धूमो भूत्वाऽभ्रं भवति अभ्रं भूत्वा मेघो भवति, मेघो भूत्वा प्रवर्षति" इति वचनात् । "यथेतमनेवञ्च" इत्युक्तम् ; तत्रास्याकाशादिप्रतिपत्तौ देवमनुष्यादिभाववदाकाशादिभावः, उत * तत्सादृश्यापत्तिमात्रमिति विशये श्रद्धावस्थस्य सोमभाववदविशेषादाकाशादिभावः—

(सिद्धान्तः)

इति प्राप्ते तत्स्वाभाव्यापत्तिरेवेत्युच्यते । तत्स्वाभाव्यापत्तिः—तत्सादृश्यापत्तिरित्यर्थः। कुत एतत्? उपपत्तेः-सोमभावमनुष्यभावादौ हि सुखदुःखोपभोगाय तद्भावः; अत्र त्वाकाशादौ सुखदुःखोपभोगाभावात्तद्भा-

---

१. छा. ६-३-१॥—२.छा.५-१०-५॥—* तत्सादृश्यमात्रम्, तत्साभाव्यापत्तिमात्रम्. पा ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वानुपपत्तेस्तदापत्तिवचनं तत्संसर्गकृततत्सादृश्यापत्त्यभिप्रायम् ॥ २२ ॥

इति श्रीशारीरकमीमांसाभाष्ये तत्स्वाभाव्यापत्त्यधिकरणम् ॥ ४ ॥

वेदान्तसारे—तत्स्वाभाव्यापत्तिरुपपत्तेः ॥ १"**यथेतमाकाशम्**" **इत्यादिना आकाशसादृश्यापत्तिः प्रत्यवरोहत उपदिश्यते, तत्रतत्र सुखदुःखानुभवाभावोपपत्तेः । तदनुभवार्थं हि तत्तच्छरीरता ॥ २२ ॥**

इति वेदान्तसारे तत्स्वाभाव्यापत्त्यधिकरणम् ॥ ४ ॥

वेदान्तदीपे—तत्स्वाभाव्यापत्तिरुपपत्तेः ॥ धूमादिना चन्द्रमसं प्राप्तस्य प्रत्यवरोहप्रकार आम्नायते १"**यथेतमाकाशमाकाशाद्वायुं वायुर्भूत्वा धूमो भवति धूमो भूत्वाऽभ्रं भवति अभ्रं भूत्वा मेघो भवति मेघो भूत्वा प्रवर्षति**"**इति। अत्राकाशादिभावः, किं देवमनुष्यादिभाववदाकाशादिशरीरत्वम्, उत तत्सादृश्यापत्तिरिति संशयः । आकाशादिशरीरत्वमिति पूर्वः पक्षः, श्रद्धावस्य सोमराजभाववत् ; तत्र हि तच्छरीरत्वमेवोच्यते । सिद्धान्तस्तु—आकाशादिप्राप्तौ सुखदुःखानुभवाभावात् तत्सादृश्यापत्तिरेव । सुखदुःखानुभवाय हि सोमादिशरीरत्वम्। सूत्रार्थस्तु—तत्स्वाभाव्यापत्तिः-आकाशादिसादृश्यापत्तिः, उपपत्तेः-सुखदुःखानुभवाभावोपपत्तेः ॥ २२ ॥**

इति वेदान्तदीपे तत्स्वाभाव्यापत्त्यधिकरणम् ॥ ४ ॥

(श्रीशारीरकमीमांसाभाष्ये नातिचिराधिकरणम् ॥ ७ ॥)

नातिचिरेण विशेषात् । ३ । १ । २३ ॥

आकाशप्राप्तिप्रभृति यावद्ब्रह्मादिप्राप्ति किं तत्रतत्र नातिचिरं तिष्ठति, उतानियम इति विशये नियमहेत्वभावादनियमः—

---

१. छा. ५-१०-५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

(सिद्धान्तः)

इति प्राप्ते उच्यते—नातिचिरेण—इति। कुतः? विशेषात्—उत्तरत्र व्रीह्यादिप्राप्तौ १"अतो वै खलु दुर्निष्पतरम्"इति विशिष्य कृच्छ्रनिष्क्रमणत्वाभिधानात् पूर्वत्र ह्याकाशादिप्राप्तावचिरनिष्क्रमणं गम्यते।दुर्निष्पतरमिति च्छान्दसस्तशब्दलोपः; दुर्निष्पतरं—दुःखनिष्क्रमणतरमित्यर्थः ॥

इति श्रीशारीरकमीमांसाभाष्ये नातिचिराधिकरणम् ॥ ५ ॥

वेदान्तसारे—नातिचिरेण विशेषात् ॥ व्रीह्यादिप्राप्तेः प्रागाकाशादिषु नातिचिरं तिष्ठति, १"अतो वै खलु दुर्निष्पतरम्" इति व्रीह्यादावेव विशेषवचनात् ॥ २३ ॥

इति वेदान्तसारे नातिचिराधिकरणम् ॥ ५ ॥

वेदान्तदीपे—नातिचिरेण विशेषात् ॥ आकाशवायुधूमाभ्रमेघवर्षप्राप्तौ किं तत्रतत्र नातिचिरं तिष्ठति, उतानियम इति संशयः । अनियम इति पूर्वः पक्षः, नातिचिरेणेति विशेषवचनाभावात्। राद्धान्तस्तु—उत्तरत्र व्रीह्यादिभावे१"अतो वै खलु दुर्निष्पतरम्"इति विशिष्य चिरेण गमनवचनं ततः प्राचीनेष्वचिरगमनं द्योतयतीत्याकाशादियावद्व्रीह्यादिभावप्राप्ति नातिचिरं तिष्ठति—इति । सूत्रमपि व्याख्यातम् ॥ २३ ॥

इति वेदान्तदीपे नातिचिराधिकरणम् ॥ ५ ॥

(श्रीशारीरकमीमांसाभाष्ये अन्याधिष्ठिताधिकरणम्॥६॥)

अन्याधिष्ठिते पूर्ववदभिलापात् । ३ । १ । १ । २४ ॥

अवरोहन्तो जीवाः व्रीह्यादिभावेन जायन्त इति श्रूयते १"मेघो

---

१. छा. ५-१०-६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भूत्वा प्रवर्षति त इह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा जायन्ते" इति। ते किमन्यैर्भोक्तृभिर्व्रीह्यादिशरीरैरधिष्ठितान्व्रीह्यादीनाश्लिष्यन्ति, उत ते भोक्तारो व्रीह्यादिशरीरा जायन्त इति विशये [१] "जायन्ते" इति वचनाद्देवो जायते मनुष्यो जायत इतिवद्व्रीह्यादिशरीरा एव—

(सिद्धान्तः)

इति प्राप्त उच्यते—अन्याधिष्ठिते-इति। जीवान्तरेणाधिष्ठिते व्रीह्यादिशरीरे तेषां संश्लेषमात्रमेव। कुतः? पूर्ववदभिलापात्—आकाशादिमेघपर्यन्तवत्केवलतद्भावाभिलापात्। यत्र हि भोक्तृत्वमभिप्रेतम्; तत्र तत्साधनभूतं कर्माभिलप्यते [१] "रमणीयचरणाः···कपूयचरणाः" इति। इह चाकाशादिवन्नाभिलप्यते कर्म, फलप्रदाने प्रवृत्तस्य स्वर्गोपभोग्यफलस्येष्टादेः कर्मणः स्वर्गोपभोगादेव समाप्तत्वात्, अनारब्धस्य [१] "रमणीयचरणाः ...कपूयचरणाः" इति वक्ष्यमाणत्वात्, मध्ये कर्मान्तराभावाच्च। अत आकाशादिभाववचनवद्व्रीह्यादिभावेन जन्मवचनमौपचारिकम् ॥ २४ ॥

अशुद्धमितिचेन्न शब्दात्। ३। १। २५ ॥

नैतदस्ति—यदन्याधिष्ठिते व्रीह्यादिशरीरे संश्लेषमात्रम्, भोक्तृत्वहेत्वभावान्न व्रीह्यादिभावेन जन्म—इति भोक्तृत्वहेतुसद्भावात् स्वर्गोपभोग्यफलमिष्टादिकर्मैवाशुद्धम्—पापमिश्रम्, अग्नीषोमीयादिहिंसायुक्तत्वात्। हिंसा च [२] "न हिंस्यात्सर्वा भूतानि" इति निषिद्धत्वात्पापमेव। नचात्र पदाहवनीयादिवदुत्सर्गापवादभावस्सम्भवति, भिन्नविषयत्वात्। अग्नीषोमीयहिंसाविधिर्हिंसायाः क्रतूपकारकत्वं बोधयति; [२] "न हिंस्यात्" इति तु हिंसायाः प्रत्यवायफलत्वम्। अथोच्येत—अग्नीषोमीयादिषु विधितः प्रवृत्तेर्न तद्विषयं निषेधविधिरास्कन्दति, रागप्राप्तविषयत्वात्तस्येति;

१. छा. ५-१०-६,७ ॥—२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नैवम्, इहापि रागप्राप्तेरविशिष्टत्वात्। [१]"स्वर्गकामो यजेत"इत्येवमादौ हि कामिनः कर्तव्यतया यागाद्युपदेशाद्यागादेः स्वर्गादिसाधनत्वमवगम्य फलरागत एव यागादौ प्रवर्तते। अग्नीषोमीयादिष्वपि तेषां फलसाधनभूतस्य यागादेरुपकारकत्वं शास्त्रादवगम्य रागादेव प्रवर्तते। लौकिक्यामपि हिंसायां केनचित्प्रमाणेन हिंसायाः स्वसमीहितसाधनत्वमवगम्य रागात्प्रवर्तत इति न कश्चन विशेषः। तथा नित्येष्वपि कर्मसु [२]"सर्ववर्णानां स्वधर्मानुष्ठाने परमपरिमितं सुखम्" इत्यादिवचनात्फलसाधनत्वमवगम्य रागादेव प्रवृत्तिरिति तेषामप्यशुद्धियुक्तत्वम्। अत इष्टादीनां पापमिश्रत्वेनाशुद्धियुक्तानां स्वर्गेऽनुभाव्यं फलं स्वर्गेऽनुभूय हिंसांशस्य फलं व्रीह्यादिस्थावरभावेनानुभूयते। स्थावरभावं च पापफलं स्मरन्ति [३]"शरीरजैः कर्मदोषैर्याति स्थावरतां नरः"इति। अतो व्रीह्यादिभावेन भोगायानुशयिनो जायन्त इति चेत्—तन्न, कुतः? शब्दात्—अग्नीषोमीयादेस्संज्ञपनस्य स्वर्गलोकप्राप्तिहेतुतया हिंसात्वाभावशब्दात्। पशोर्हि संज्ञपननिमित्तां स्वर्गलोकप्राप्तिं वदन्तं शब्दमामनन्ति [४]"हिरण्यशरीर ऊर्ध्वः स्वर्गं लोकमेति" इत्यादिकम्। अतिशयिताभ्युदयसाधनभूतो व्यापारोऽल्पदुःखदोऽपि न हिंसा; प्रत्युत रक्षणमेव। तथा च मन्त्रवर्णः [५]"न वा उ एतन्म्रियसे न रिष्यसि देवान् इदेषि पथिभिस्सुगेभिः। यत्र यन्ति सुकृतो नापि दुष्कृतस्तत्र त्वा देवस्सविता दधातु" इति। चिकित्सकं च तादात्विकाल्पदुःखकारिणमपि रक्षकमेव वदन्ति, पूजयन्ति च तज्ज्ञाः॥

रेतस्सिग्योगोऽथ। ३। १। २६॥

इतश्चौपचारिकं व्रीह्यादिजन्मवचनम्, व्रीह्यादिभाववचनानन्तरं[६]"यो यो ह्यन्नमत्ति यो रेतस्सिञ्चति तद्भूय एव भवति" इति रेतस्सिग्भावोऽ-

१. यजु. २-५-५॥— २. आपस्तम्ब. २-१-२-२॥—३. मनु. १-२-९॥—४॥—५. यजु. २-का. ६.प्र. ९ अनु. ४९ प॥—६. छा. ५-१०-६॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नुशयिनां श्रूयमाणो यथा तद्योगमात्रं प्रतिपादयति ; तद्वद्रीह्यादिभावोऽपीत्यर्थः ॥ २६ ॥

योनेश्शरीरम् । ३ । १ । २७ ॥

योनिप्राप्तेः पश्चादेवानुशयिनां शरीरप्राप्तिः, तत्रैव सुखदुःखोपभोगसद्भावात् । ततः प्रागाकाशादिप्राप्तिप्रभृति तद्योगमात्रमेवेत्यर्थः ॥

इति श्रीशारीरकमीमांसाभाष्ये अन्याधिष्ठिताधिकरणम् ॥ ६ ॥

इति श्रीभगवद्रामानुजविरचिते शारीरकमीमांसाभाष्ये
तृतीयस्याध्यायस्य प्रथमः पादः ॥ १ ॥

वेदान्तसारे—अन्याधिष्ठिते पूर्ववदभिलापात् ॥ १"त इह व्रीहियवाः" इत्यादौ चान्यजीवाधिष्ठिते व्रीहियवादौ संश्लेषमात्रम्, अवरोहतः आकाशादिष्विव जननहेतुविरहिताभिलापात् । १"जायन्ते" इति वचनमौपचारिकम् । यत्र ब्राह्मणादिजन्मास्ति, तत्र १"रमणीयचरणाः" इति हि हेतुरभिलप्यते ॥ २४ ॥

अशुद्धमितिचेन्न शब्दात्॥ अवरोहतः पूर्वानुष्ठितयागादिषु अग्नीषोमीयादिहिंसागर्भत्वेन अशुद्धं कर्मास्तीतिचेत्—न, २"हिरण्यशरीर ऊर्ध्वस्स्वर्गं लोकमेति' ३"न वा उ वेतन्म्रियसे न रिष्यसि" इति पशुसंज्ञपनस्याहिंसात्वशब्दात् ॥ २५ ॥

रेतस्सिग्योगोऽथ ॥ १"योयो ह्यन्नमत्ति यो रेतस्सिञ्चति" इति अन्नेन संसृष्टस्य रेतस्सिचा योगमात्रमनन्तरमुच्यते; अतः पूर्वमपि व्रीह्यादियोगमात्रम् ॥ २६ ॥

योनेश्शरीरम् ॥ योनिप्राप्तेः पश्चादेवावरोहता शरीरं प्राप्यते ॥ २७ ॥

इति वेदान्तसारे अन्याधिष्ठिताधिकरणम् ॥ ६ ॥

इति श्रीभगवद्रामानुजविरचिते श्रीवेदान्तसारे तृतीयस्याध्यायस्य
प्रथमः पादः ॥ १ ॥

---

१. छा. ५-१०-६, ७ ॥—२ ॥—३. यजु. ४-९-६-४६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वेदान्तदीपे—अन्याधिष्ठिते पूर्ववदभिलापात्॥ अवरोहन्तो जीवाः व्रीह्यादिभावेन जायन्त इति श्रूयते १"मेघो भूत्वा प्रवर्षति त इह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा इति जायन्ते" इति। ते किं व्रीह्यादिशरीरा जायन्ते, उतान्यैः क्षेत्रज्ञैर्व्रीह्यादिशरीरैरधिष्ठितान्व्रीह्यादीनाश्लिष्यन्तीति संशयः। १"जायन्ते" इति वचनाद्व्रीह्यादिशरीरभोक्तारो जायन्त एवेति पूर्वः पक्षः। राद्धान्तस्तु — व्रीह्यादिजन्महेतुभूतकर्मविशेषाश्रवणाद्व्रीह्यादिसंश्लेषमात्रमेव। १"जायन्ते" इति जन्मवचनमौपचारिकम्। ब्राह्मणादिशरीरभावे हि १"रमणीयचरणाः...कपूयचरणाः" इति जन्महेतुभूतं पुण्यपापरूपं कर्म श्रूयते। सूत्रार्थस्तु—अन्याधिष्ठिते—अन्यक्षेत्रज्ञाधिष्ठिते व्रीह्यादौ, संश्लेषमात्रम्, कुतः? पूर्ववदभिलापात्—आकाशादिभाववत्केवलव्रीह्यादिभावाभिलापात्; जन्महेतुभूतकर्मानभिलापादित्यर्थः॥ २४॥

अशुद्धमितिचेन्न शब्दात्॥ यद्यपि व्रीह्यादिभावेन जायन्त इत्यत्र जन्महेतुभूतं कर्म न श्रुतम्; तथापि पूर्वश्रुतमिष्टादिकर्माग्नीषोमीयादिहिंसागर्भत्वेनाशुद्धम्। हिंसात्वेनाशुचिव्रीह्यादिजन्मनोऽपि हेतुर्भवतीति चेत्—न, अहिंसात्वशब्दात् पशोर्हि संज्ञपनस्य स्वर्गावाप्तिसाधनभावबादिशब्दः श्रूयते— २"हिरण्यशरीर ऊर्ध्वस्स्वर्गं लोकमेति" ३"न वा उ वेतन्म्रियसे न रिष्यसि" इत्यादिः॥ २५॥

रेतस्सिग्योगोऽथ॥ इतश्च व्रीह्यादिसंश्लेषमात्रम्, व्रीह्यादिभावानन्तरं रेतस्सिग्योगश्श्रूयते १"यो यो ह्यन्नमत्ति यो रेतस्सिञ्चति तद्भूय एव भवति"इति।अत्र हि पुरुषसंश्लेषमात्रमेव श्रुतम्;एवमेव व्रीह्यादिभावेऽपीत्यर्थः॥

योनेश्शरीरम्॥ योनिप्राप्तेः पश्चादेवावरोहतो जीवस्य शरीरप्राप्तिः, तत्रैव सुखदुःखोपभोगात्। ततः प्रागाकाशादिषु तत्तत्संश्लेषमात्रमेवेत्यभिप्रायः॥ २७॥

इति वेदान्तदीपे अन्याधिष्ठिताधिकरणम्॥ ६॥

इति श्रीभगवद्रामानुजविरचिते श्रीवेदान्तदीपे तृतीयस्याध्यायस्य प्रथमः पादः॥ १॥

---

१. छा. ५-१०-६,७॥—२॥—३. यजु. ४-९-६-४६॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीमते रामानुजाय नमः.

श्रीभगवद्रामानुजविरचिते

श्रीशारीरकमीमांसाभाष्ये

(तृतीयाध्याये - द्वितीयः पादः-प्राणोत्पत्त्यधिकरणम् ॥)

सन्ध्ये सृष्टिराह हि । ३ । २ । १ ॥

एवं कर्मानुरूपगमनागमनजन्मादियोगेन जाग्रतो जीवस्य दुःखित्वं ख्यापितम्; इदानीमस्य स्वप्नावस्था परीक्ष्यते। स्वप्नमधिकृत्य श्रूयते [१]"न तत्र रथा न रथयोगा न पन्थानो भवन्ति अथ रथान् रथयोगान् पथस्सृजते न तत्रानन्दा मुदः प्रमुदो भवन्ति अथानन्दान् मुदः प्रमुदः सृजते न तत्र वेशान्ताः पुष्करिण्यः स्रवन्त्यो भवन्ति अथ वेशान्ताः पुष्करिण्यः स्रवन्त्यस्सृजते स हि कर्ता"इति। तत्र संशयः—किमियं रथादिसृष्टिर्जीवेनैव क्रियते; आहोस्विदीश्वरेण—इति । किंयुक्तम्? सन्ध्ये सृष्टिर्जीवेनेति । कुतः? सन्ध्यं-स्वप्नस्थानमुच्यते, [२]"सन्ध्यं तृतीयं स्वप्नस्थानम्" इति वचनात्; सा तु जीवेनैव क्रियते [१]"सृजते स हि कर्ता" इत्याह हि । स्वप्नदृग्जीव एव तत्र प्रतीयते ॥ १ ॥

निर्मातारं चैके पुत्रादयश्च । ३ । २ । २ ॥

किञ्च—एनं जीवं स्वप्ने कामानां निर्मातारमेके शाखिनोऽधीयते [३]"य एषु सुप्तेषु जागर्ति कामंकामं पुरुषो निर्मिमाणः" इति । पुत्रादयश्च तत्र काम्यमानतया कामशब्देन निर्दिश्यन्ते, नेच्छामात्रम्; पूर्वत्र हि[४]"स-

१. बृ. ६-३-१० ॥—२ ॥—३. कठ. २-५-८ ॥—४. कठ. १-१-२५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वान् कामान् छन्दतः प्रार्थयस्व" [१]"शतायुषः पुत्रपौत्रान् वृणीष्व"इति पुत्रादय एव कामाः प्रकृताः। अतो रथादीन् जीवः स्वप्ने सृजति; जीवस्य च सत्यसङ्कल्पत्वं प्रजापतिवाक्ये श्रुतम्; अत उपकरणाद्यभावेऽपि सृष्टिरुपपद्यते ॥ २ ॥

(सिद्धान्तः)

इति प्राप्तेऽभिधीयते—

मायामात्रं तु कात्स्न्र्येनानभिव्यक्त-स्वरूपत्वात् । ३ । २ । ३ ॥

तुशब्दः पक्षं व्यावर्तयति; स्वप्ने रथपुष्करिण्याद्यर्थजातं मायामात्रं परमपुरुषसृष्टमित्यर्थः । मायाशब्दो ह्याश्चर्यवाची [२]"जनकस्य कुले जाता देवमायेव निर्मिता" इत्यादिषु तथा दर्शनात् । अत्रापि [२]"न तत्र रथा न रथयोगा न पन्थानः"—सकलेतरपुरुषानुभाव्यतया न भवन्तीत्यर्थः;[३]"अथ रथान्रथयोगान्पथः सृजते"-स्वप्नदृगनुभाव्यतया तत्कालमात्रावसानान् सृजत इत्याश्चर्यरूपत्वमेवाह । एवंविधाश्चर्यरूपा सृष्टिस्सत्यसङ्कल्पस्य परमपुरुषस्यैवोपपद्यते, न जीवस्य; तस्य सत्यसङ्कल्पत्वादियुक्तस्यापि संसारदशायां कात्स्न्र्येनानभिव्यक्तस्वरूपत्वान्न जीवस्य तथाविधाश्चर्यसृष्टिरुपपद्यते। [४]"कामंकामं पुरुषो निर्मिमाणः" इति च परमपुरुषमेव निर्मातारमाह—[४]"य एषु सुप्तेषु जागर्ति" [४]"तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते । तस्मिन् लोकाश्श्रितास्सर्वे तदु नात्येति कश्चन" इत्युपक्रमोपसंहारयोः परमपुरुषासाधारणस्वभावप्रतीतेः । [३]"अथ वेशान्तान् पुष्करिण्यः स्रवन्त्यः सृजते स हि कर्ता" इति च तया श्रुत्यैकार्थ्यात्परमपुरुषमेव कर्तारमाह ॥ ३ ॥

स्वाभाविकं चेज्जीवस्यापहतपाप्मत्वादिकम्, कुतस्तन्नाभिव्यज्यत इत्यत आह—

१.कठ १-१-२३ ॥२. श्रीरामायणे. बालकाण्डे. १-२७ ॥—३. बृ. ६-३-१० ॥—४. कठ. २-५-८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ। ३। २। ४॥

तुशब्दश्शङ्काव्यावृत्त्यर्थः; पराभिध्यानात् – परमपुरुषसङ्कल्पात्, अस्य जीवस्य स्वाभाविकं रूपं तिरोहितम्; अनादिकर्मपरम्परया कृतापराधस्य ह्यस्य स्वाभाविकं कल्याणरूपं परमपुरुषस्तिरोधापयति; ततः तत्सङ्कल्पादेव हि अस्य-जीवस्य बन्धमोक्षौ श्रुतौ [१]"यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते अथ सोऽभयं गतो भवति यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते अथ तस्य भयं भवति" [१]"एष ह्येवानन्दयाति" [२]"भीषाऽस्माद्वातः पवते" इत्यादिषु॥ ४॥

देहयोगाद्वा सोऽपि। ३। २। ५॥

सोऽपि तिरोभावो देहयोगद्वारेण वा भवति, सूक्ष्माचिच्छक्तियोगद्वारेण वा; सृष्टिकाले देहावस्थेनाचिद्वस्तुना संयोगाद्भवति, प्रलयकाले नामरूपविभागानर्हातिसूक्ष्माचिद्वस्तुयोगात्। अतोऽनभिव्यक्तस्वरूपत्वात्स्वप्ने जीवो न रथादीन् सङ्कल्पमात्रेण स्रष्टुं शक्नोति। [३]"तस्मिल्लोकाश्श्रितास्सर्वे तदु नात्येति कश्चन" इति सर्वेषु सुप्तेषु जागरणं सर्वलोकाश्रयत्वमित्यादयो हि परमपुरुषस्यैव सम्भवन्ति। अतो जीवानामल्पाल्पकर्मानुगुणफलानुभवार्थं तावन्मात्रकालावसानान् तदेकानुभाव्यानर्थानुत्पादयति॥ ५॥

सूचकश्च हि श्रुतेराचक्षते च तद्विदः।३। २। ६॥

इतश्च स्वाप्ना अर्था न जीवसङ्कल्पपूर्वकाः; यतः स्वप्नोऽभ्युदयानभ्युदययोस्सूचकः श्रुतेरवगम्यते[४]"यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति। समृद्धिं तत्र जानीयात्तस्मिन् स्वप्ननिदर्शने" इति; [५]"अथ स्वप्ने

१. तै.आन. ७-२॥—२.तै.आन. ८-१॥—३.कठ. ५-८॥—४.छा.५-२-९॥—५॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पुरुषं कृष्णं कृष्णदन्तं पश्यति स एनं हन्ति" इत्यादेश्च । स्वप्नाध्याय-विदश्च स्वप्नं शुभाशुभयोस्सूचकमाचक्षते । सूचकत्वं च स्वसङ्कल्पायत्त-स्य नोपपद्यते; तथाचाशुभस्यानिष्टत्वाच्छुभस्य सूचकमेव सृष्ट्वा पश्येत् । अतः स्वप्ने सृष्टिरीश्वरेणैव कृता ॥ ६ ॥

इति श्रीशारीरकमीमांसाभाष्ये सन्ध्याधिकरणम् ॥ १ ॥

वेदान्तसारे—सन्ध्ये सृष्टिराह हि ॥ सन्ध्ये-स्वप्ने १"अथ रथान् र-थयोगान्" इत्यादिना अभिहिता सृष्टिर्जीवकृता; १"पुष्करिण्यस्रवन्त्यस्सृजते स हि कर्ता" इति स्वप्नदृशं जीवमेव कर्तारम् आह श्रुतिः ॥ १ ॥

निर्मातारं चैके पुत्रादयश्च ॥ २"य एषु सुप्तेषु जागर्ति कामंकामं पुरुषो निर्मिमाणः" इति । एनं जीवं स्वाप्नार्थनिर्मातारम् एके शाखिनोऽधीय-ते । अत्र कामशब्दनिर्दिष्टाः काम्यमानतया पुत्रादयः; पूर्वत्र ३"सर्वान् कामाञ् छन्दतः" इत्युक्त्वा ४"शतायुषः पुत्रपौत्रान्" इति विवृतत्वात् ॥ २ ॥

मायामात्रं तु कात्स्न्र्येनानभिव्यक्तस्वरूपत्वात् ॥ स्वप्ने या रथादि-सृष्टिः, तदिदमीश्वरकृतं मायामात्रं स्वप्नदृशैवानुभाव्यं तत्कालमात्रावसानमि-त्याश्चर्यतया मायेत्युक्तम्। जीवस्य सत्यसङ्कल्पत्वादिकं स्वाभाविकं स्वरूपं संसा-रदशायां कात्स्न्र्येनानभिव्यक्तमिति न तस्य सङ्कल्पमात्रात् सृष्टिरुपपद्यते।१"स हि कर्ता" १"पुरुषो निर्मिमाणः" इति न जीवविषयम्, २"तस्मिल्लोकाश्रि-तास्सर्वे" इति वचनात् ॥ ३ ॥

स्वाभाविकस्य अनभिव्यक्तिहेतुमाह—

पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ ॥ जीवस्याना-द्यपचारप्रवाहेण पराभिध्यानादेव तिरोहितम्; तदपचारात्तदनुवृत्तेर्हि अस्य बन्धविपर्ययौ, ५"अथ तस्य भयं भवति" ५"अथ सोऽभयङ्गतो भवति" इति श्रुतेः ॥ ४ ॥

देहयोगाद्वा सोऽपि ॥ सोऽपि-तिरोभावः, देवमनुष्यादिदेहाकारा-चिद्योगात् सृष्टिवेलायाम्, नामरूपविभागानर्हसूक्ष्माकाराचिद्योगात् प्रलये ॥

सूचकश्च हि श्रुतेराचक्षते च तद्विदः ॥ ६"अथ स्वप्ने पुरुषं कृष्णम्"

---

१. बृ. ६-३-१० ॥—२. कठ. २-५-८॥—३. कठ. १-१-२५॥—४. कठ. १-१-२३॥—५. तै. आन. ७-२ ॥—६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इत्यादिश्रुतेः शुभाशुभसूचकश्च हि स्वप्नः; स्वप्नविदश्चाचक्षते तत्;अतो न जीवस्स्रष्टा स्वाप्नार्थानाम् ॥ ६ ॥

इति वेदान्तसारे सन्ध्याधिकरणम् ॥ १ ॥

वेदान्तदीपे—सन्ध्ये सृष्टिराह हि ॥ स्वप्नमधिकृत्य श्रूयते—१"न तत्र रथा न रथयोगा न पन्थानो भवन्त्यथ रथान्रथयोगान्पथस्सृजते" इत्यारभ्य, १"अथ वेशान्तान्पुष्करिण्यस्स्रवन्त्यस्सृजते स हि कर्ता" इति। किं स्वाप्नानामप्यर्थानां स्रष्टा जीव एव? उत परमात्मेति संशयः। स्वप्नदृशो जीवस्य सन्निधानात् १"स हि कर्ता" इति स एव परामृश्यते; जीवस्यापि सत्यसङ्कल्पत्वं प्रजापतिवाक्योदितमिति स एव स्रष्टेति पूर्वः पक्षः। राद्धान्तस्तु—जीवस्य सत्यसङ्कल्पत्वं स्वाभाविकमपि संसारदशायां परमपुरुषसङ्कल्पात्तिरोहितमिति न जीवस्य सत्यसङ्कल्पमात्रेण स्रष्टृत्वमुपपद्यते। अतः परमपुरुष एव सकलेतरपुरुषानुभवाविषयान् तत्तत्पुरुषमात्रेणानुभाव्यान् तत्तत्कालावसानान् स्वाप्नानर्थान् सृजति। सूत्रार्थस्तु—सन्ध्ये-स्वप्ने श्रूयमाणा रथादिसृष्टिः स्वप्नदृशा जीवेन कृता; कुतः? आह हि १"स हि कर्ता" इति तस्यैव परामर्शादित्यर्थः॥

निर्मातारं चैके पुत्रादयश्च ॥ एनमेव जीवं निर्मातारं स्वाप्नानामर्थानाम् एके शाखिनोऽधीयते २"य एषु सुप्तेषु जागर्ति कामंकामं पुरुषो निर्मिमाणः"इति। अत्र कामशब्दनिर्दिष्टाः काम्यमानतया पुत्रादय एव। चशब्दोऽवधारणे। अत्र हि ३"सर्वान् कामान्" इति कामशब्देन प्रस्तुतान् ४"शतायुषः पुत्रपौत्रान्वृणीष्व" इति विविनक्ति ॥ २ ॥

मायामात्रं तु कात्स्न्र्येनानभिव्यक्तस्वरूपत्वात्॥ तुशब्दात्पक्षो विपरिवर्तते; न जीवेन सृष्टं स्वाप्नमर्थजातम्; अपितु पारमेश्वरमायामात्रं—सकलेतरपुरुषानुभवाविषयं तदेकानुभाव्यं तत्कालावसानमाश्चर्यरूपमर्थजातमीश्वरस्सृजतीत्यर्थः। जीवस्य स्वतः सत्यसङ्कल्पत्वादेः कृत्स्नस्य संसारदशायामनभिव्यक्तस्वरूपत्वात् तस्य हि सङ्कल्पमात्रेण स्रष्टृत्वं नोपपद्यते। २"कामंकामं पुरुषो निर्मिमाणः" इति च परमपुरुषमेव निर्मातारमाह—२"य एषु सुप्तेषु जागर्ति" २"तस्मिल्लोकास्श्रितास्सर्वे तदु नात्येति कश्चन" इत्युपक्रमोपसंहारयोः परमपुरुषासाधारणधर्मप्रतीतेः। १"स हि कर्ता" इति च तेनैकार्थ्यात् परमपुरुषमेवाह ॥ ३ ॥

---

१. बृ. ६-३-१० ॥—२. कठ. २-५-८ ॥—३. कठ. १-२५॥—४. कठ.१-१-२३॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्वाभाविकं चेज्जीवस्य सत्यसङ्कल्पत्वादिकम्, कथं नाभिव्यज्यत इत्या शङ्क्याह—

पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ ॥ तुशब्दश्शङ्का-निवृत्त्यर्थः; परमपुरुषाभिध्यानादस्य स्वाभाविकं रूपमनादिकर्मप्रवाहेण कृतापराधतया तिरोहितम्; ततो ह्यस्य बन्धविपर्ययौ—ततः परमपुरुषसङ्कल्पादेव हि, अस्य—जीवस्य, बन्धविपर्ययौ—संसारमोक्षौ श्रूयेते—१"को ह्येवान्यात्कः प्राण्याद्यदेष आकाश आनन्दो न स्यात् एष ह्येवानन्दयाति" २"परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते" इत्यादौ ॥ ४ ॥

तिरोधानप्रकारमाह—

देहयोगाद्वा सोऽपि ॥ सोऽपि; तिरोधानभावः देहयोगाद्वा भवति; वाशब्दो विकल्पार्थः; व्यवस्थितश्च विकल्पः; देवमनुष्यादिदेहाकारपरिणताचिद्योगात्सृष्टिवेलायाम्, नामरूपविभागानर्हसूक्ष्मदशापन्नाचिद्योगेन प्रलयकाले ॥ ५ ॥

सूचकश्च हि श्रुतेराचक्षते च तद्विदः ॥ इतश्च स्वाप्ना रथादयो न जीवसङ्कल्पकृताः; यतस्स्वप्नश्शुभाशुभयोस्सूचक इति श्रुतेरवगम्यते—३"यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति। समृद्धिं तत्र जानीयात्तस्मिन् स्वप्ननिदर्शने" ४"अथ स्वप्ने पुरुषं कृष्णं कृष्णदन्तम्" इत्यादिषु। स्वप्नाध्यायविदश्चाचक्षते। जीवसङ्कल्पकृतत्वे हि सूचकत्वं न सम्भवति; स्वसङ्कल्पकृतत्वे हि शुभानामेव सूचकानर्थान् सृष्ट्वा तानेव पश्यति। अतस्स्वाप्नानामर्थानां परमपुरुष एव स्रष्टा ॥ ६ ॥

इति वेदान्तदीपे सन्ध्याधिकरणम् ॥ १ ॥

(श्रीशारीरकमीमांसाभाष्ये तदभावाधिकरणम् ॥ २ ॥)

तदभावो नाडीषु तच्छ्रुतेरात्मनिच । ३ । २ । ७ ॥

इदानीं सुषुप्तिस्थानं परीक्ष्यते; इदमाम्नायते ५"यत्रैतत्सुप्तस्समस्तस्सम्प्रसन्नः स्वप्नं न विजानाति आसु तदा नाडीषु सृप्तो भवति"

१. तै.आन. ७-१ ॥—२. छा. ८-३-४॥—३. छा.५-२-९ ॥—४॥—५.छा.८-६-३॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति ; तथा [१]"अथ यदा सुषुप्तो भवति यदा न कस्यचन वेद हिता नाम नाड्यो द्वासप्ततिसहस्राणि हृदयात्पुरीततमभिप्रतिष्ठन्ते ताभिः प्रत्यवसृप्य पुरीतति शेते" इति; तथा–[२]"यत्रैतत्पुरुषः स्वपिति नाम सता सोम्य तदा सम्पन्नो भवति" इति। एवं नाड्यः पुरीतद्ब्रह्म च सुषुप्तिस्थानत्वेन श्रूयन्ते; किमेषां विकल्पः समुच्चयो वेति विशये निरपेक्षत्वप्रतीतेः युगपदनेकस्थानतृप्त्यसम्भवाच्च विकल्पः—

(सिद्धान्तः)

इति प्राप्त उच्यते–तदभावः–इति। तदभावः - स्वप्नाभावः-सुषुप्तिः नाडीषु पुरीतत्यात्मनि च भवति,एषां स्थानानां समुच्चय इत्यर्थः। कुतः? तच्छ्रुतेः-त्रयाणां स्थानत्वश्रुतेः। न च कार्यभेदेन समुच्चये सम्भवति पाक्षिकबाधगर्भविकल्पो न्याय्यः। सम्भवति च प्रासादखट्वापर्यङ्कवन्नाड्यादीनां कार्यभेदः। तत्र नाडीपुरीततौ प्रासादखट्वास्थानीयौ ; ब्रह्म तु पर्यङ्कस्थानीयम्। अतो ब्रह्मैव साक्षात्सुषुप्तिस्थानम् ॥ ७ ॥

अतः प्रबोधोऽस्मात् । ३ । २ । ८ ॥

यतो ब्रह्मैव साक्षात्सुषुप्तिस्थानम्,अतः अस्मात्–ब्रह्मणः एषां जीवानां प्रबोधः श्रूयमाण उपपद्यते–[३]"सत आगम्य न विदुः सत आगच्छामहे" इत्यादिषु ॥ ८ ॥

इति श्रीशारीरकमीमांसाभाष्ये तदभावाधिकरणम् ॥ २ ॥

वेदान्तसारे—तदभावो नाडीषु तच्छ्रुतेरात्मनि च ॥ स्वप्नाभावः सुषुप्तिः, [४]"आसु तदा नाडीषु सृप्तो भवति" [२]"सता सोम्य तदा सम्पन्नो भवति" इति श्रुतेः नाडीषु परमात्मनि[१]"पुरीतति शेते" इति श्रुतेः पुरीतति च; प्रासादखट्वापर्यङ्कवदविरोधः ॥ ७ ॥

अतः प्रबोधोऽस्मात् ॥ [३]"सत आगम्य न विदुः" इति ब्रह्मणः प्रबोधश्रुतिः अत एव ॥ ८ ॥

इति वेदान्तसारे तदभावाधिकरणम् ॥ २ ॥

---

१. बृ. ४-१-१९ ॥—२. छा. ६-८-१ ॥—३. छा. ६-१०-२॥—४. छा. ८-६-३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वेदान्तदीपे—तदभावो नाडीषु तच्छ्रुतेरात्मनि च ॥ नाड्यः पुरीतत् ब्रह्म च सुषुप्तिस्थानत्वेन श्रूयन्ते; किमेषां विकल्पः, उत समुच्चय इति संशयः । विकल्प इति पूर्वः पक्षः—१"आसु तदा नाडीषु सृप्तो भवति"२"ताभिः प्रत्यवसृप्य पुरीतति शेते" ३"सता सोम्य तदा सम्पन्नो भवति" इति त्रयाणां नैरपेक्ष्यप्रतीतेः । राद्धान्तस्तु—प्रासादखट्वापर्यङ्कवत् कार्यभेदेन समुच्चये सम्भवति पाक्षिकबाधगर्भविकल्पो न युक्त इति समुच्चयो न्याय्यः । तत्र पर्यङ्कस्थानीयं ब्रह्म, यतः पर्यङ्कवत्साक्षाद्ब्रह्म सुषुप्तिस्थानम् । सूत्रार्थस्तु—तदभावः स्वप्नाभावः; सुषुप्तिरित्यर्थः । सुषुप्तिः नाडीष्वात्मनि च; चकारात्पुरीततिच; तच्छ्रुतेः—त्रयाणां सुषुप्तिस्थानत्वश्रुतेः । उक्तेन न्यायेन समुच्चयो न्याय्य इत्यभिप्रायः ॥ ७ ॥

अतः प्रबोधोऽस्मात् ॥ अस्मात्-ब्रह्मणः प्रबोधश्रुतिरत एवोपपद्यते; ४ "सत आगम्य न विदुस्सत आगच्छामहे" इति श्रूयते ॥ ८ ॥

इति वेदान्तदीपे तदभावाधिकरणम् ॥ २ ॥

(श्रीशारीरकमीमांसाभाष्ये कर्मानुस्मृतिशब्दविध्यधिकरणम् ॥ ३ ॥)

स एव तु कर्मानुस्मृतिशब्दविधिभ्यः । ३ । २ । ९ ॥

किं सुषुप्त एव प्रबोधसमये उत्तिष्ठति, उतान्य इति संशये अस्य सकलोपाधिविनिर्मुक्तस्य ब्रह्मणि सम्पन्नस्य मुक्तादविलक्षणत्वेन प्राचीनशरीरेन्द्रियादिसम्बन्धाभावादन्यः—

(सिद्धान्तः)

इति प्राप्त उच्यते—स एव तु-इति । तुशब्दः पक्षं व्यावर्तयति; स एवोत्तिष्ठति; कुतः? कर्मानुस्मृतिशब्दविधिभ्यः । कर्म तावत्—सुषुप्तेन पूर्वकृतं पुण्यपापरूपं तत्त्वज्ञानात्प्राक्तेनैव भोक्तव्यम् । अनुस्मृतिरपि-य एवाहं सुप्तः, स एव प्रबुद्धोऽस्मीति । शब्दोऽपि-सुषुप्तप्रबुद्धस्सएवेति दर्शयति—४"त इह व्याघ्रो वा सिंहो वा वृको वा वराहो वा कीटो वा पतङ्गो वा दंशो वा मशको वा यद्यद्भवन्ति तथा भवन्ति" इति । विधयश्च

१. छा. ८-६-३ ॥—२. बृ. ४-३-१९ ॥—३. छा. ६-८-१ ॥—४. छा. ६-१०-२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मोक्षार्थास्सुषुप्तस्य मुक्तत्वेऽनर्थकास्स्युः । नचासौ सर्वोपाधिविनिर्मुक्त आविर्भूतस्वरूपः—१"तद्यत्रैतत्सुषुप्तः" इति सुषुप्तं प्रकृत्य १"नाह खल्वयमेवं सम्प्रत्यात्मानं जानात्ययमहमस्मीति नो एवेमानि भूतानि विनाशमेवापीतो भवति नाहमत्र भोग्यं पश्यामि" इति वचनात् । मुक्तस्य च २"परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते" ३"स तत्र पर्येति जक्षत्क्रीडन्रममाणः" ४"स स्वराड्भवति तस्य सर्वेषु लोकेषु कामचारो भवति" ५"सर्व ह पश्यः पश्यति सर्वमाप्नोति सर्वशः" इति सर्वज्ञत्वादिः श्रूयते । अतस्सुषुप्तस्संसरन्नेव आयस्तसर्वकरणो ज्ञानभोगाद्यशक्तो विश्रमस्थानं परमात्मानमुपसम्पद्याश्वस्तः पुनर्भोगायोत्तिष्ठति ॥ ९ ॥

इति श्रीशारीरकमीमांसाभाष्ये कर्मानुस्मृतिशब्दविध्यधिकरणम् ॥ ३ ॥

वेदान्तसारे—स एव तु कर्मानुस्मृतिशब्दविधिभ्यः ॥ सता सम्पन्नोऽपि सुप्त एव प्रबुद्ध उत्तिष्ठति, ज्ञानवैधुर्येण कृतस्य कर्मणस्तेनानुभाव्यत्वात्, पूर्वानुभूतप्रत्यभिज्ञानात्, ६"त इह व्याघ्रो वा" इत्यादि—६"यद्यद्भवन्ति तथा भवन्ति" इति शब्दात्, मोक्षोपायविध्यानर्थक्याच्च ॥ ९ ॥

इति वेदान्तसारे कर्मानुस्मृतिशब्दविध्यधिकरणम् ॥ ३ ॥

वेदान्तदीपे—स एव तु कर्मानुस्मृतिशब्दविधिभ्यः ॥ किं सुषुप्त एव प्रबोधकाले उत्तिष्ठति ? स एव वा अन्यो वेत्यनियम इति संशयः । सुषुप्तस्य सर्वोपाधिविनिर्मुक्तस्य ब्रह्मणि सम्पन्नस्य मुक्तादविलक्षणत्वेन प्राचीनशरीरसम्बन्धाभावात्स एवेति नियमो न सम्भवतीति पूर्वः पक्षः । सुषुप्तस्य ब्रह्मज्ञानाभावेन पूर्वकृतस्य कर्मणः तेनैवोपभोक्तव्यत्वात्, सोऽहमिति प्रत्यभिज्ञानात्, ७"त इह व्याघ्रो वा सिंहो वा" इत्यारभ्य ७"यद्यद्भवन्ति तथा भवन्ति" इति शब्दात्, मोक्षसाधनविध्यानर्थक्याच्च स एवोत्तिष्ठतीति राद्धान्तः । न चासौ शरीरेन्द्रियसम्बन्धविनिर्मुक्तः, अपि तु करणकलेबरप्रवर्तनायासादाश्वसाय ब्रह्मण्यपीतः पुनराश्वस्तः प्रवर्तनायोत्तिष्ठति । सूत्रमपि

१. छा. ८-११-२ ॥—२. छा. ८-३-४ ॥—३. छा. ८-१२-३॥—४.छा. ७-२५-२ ॥—५. छा. ७-२६-२ ॥—६. छा. ६-१०-२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

व्याख्यातम् ॥ ९ ॥

इति वेदान्तदीपे कर्मानुस्मृतिशब्दविध्यधिकरणम् ॥ ३ ॥

(श्रीशारीरकमीमांसाभाष्ये मुग्धाधिकरणम् ॥ ४ ॥)

मुग्धेऽर्धसम्पत्तिः परिशेषात् । ३ । २ । १० ॥

मुग्धमधिकृत्य चिन्त्यते; किमियं मूर्च्छा सुषुप्त्यादिष्वन्यतमावस्था, उतावस्थान्तरमिति विशये सुषुप्त्यादीनामन्यतमावस्थायामेव मूर्च्छामसिद्ध्युपपत्तेरवस्थान्तरकल्पने प्रमाणाभावादन्यतमावस्था—

(सिद्धान्तः)

इति प्राप्त उच्यते—मुग्धेऽर्धसम्पत्तिः—इति । मुग्धे पुरुषे या तस्यावस्था, सा मरणायार्धसम्पत्तिः । कुतः? परिशेषात्—न तावत्स्वप्नजागरौ, ज्ञानाभावात्; निमित्तवैरूप्यादाकारवैरूप्याच्च न सुषुप्तिमरणे । निमित्तं हि मूर्च्छाया अभिघातादिः। पारिशेष्यान्मरणायार्धसम्पत्तिर्मूर्च्छा। मरणं हि सर्वप्राणदेहसम्बन्धोपरतिः; सूक्ष्मप्राणदेहसम्बन्धावस्थितिर्मूर्च्छा ॥

इति श्रीशारीरकमीमांसाभाष्ये मुग्धाधिकरणम् ॥ ४ ॥

वेदान्तसारे—मुग्धेऽर्धसम्पत्तिः परिशेषात् ॥ मूर्च्छिते पुरुषे या अवस्था, सा मरणायार्धसम्पत्तिरिति हेतुभेदात्, आकारभेदात्, अपुनरुत्थाननियमाभावाच्च ज्ञायते ॥ १० ॥

इति वेदान्तसारे मुग्धाधिकरणम् ॥ ४ ॥

वेदान्तदीपे—मुग्धेऽर्धसम्पत्तिः परिशेषात् ॥ किं मूर्च्छा मरणादर्थान्तरम्, उत मरणमेवेति संशयः । सर्वेन्द्रियप्राणव्यापारोपरतेः मरणमेवेति पूर्वः पक्षः ।आकारवैरूप्येण सूक्ष्मप्राणास्तित्वावगतेः मरणायार्धसम्पत्तिरिति सिद्धान्तः । सूत्रार्थस्तु—मुग्धे मूर्च्छिते पुरुषे याऽवस्था, सा मरणायाऽर्धसम्पत्तिः । कुतः ? परिशेषात् । प्राणादिसर्वव्यापारोपरतेः न जागराद्यव

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

क्षा, न च गतप्राणा, आकारवैलक्षण्येन सूक्ष्मप्राणास्तित्वावगतेः; मूर्च्छितस्यैव कस्यचित्पुनर्जीवन दर्शनाच्च न मरणमिति परिशेषान्मरणाद्यर्थसम्पत्तिरित्यवगम्यते ॥ १० ॥

इति वेदान्तदीपे मुग्धाधिकरणम् ॥ ४ ॥

(श्रीशारीरकमीमांसाभाष्ये उभयलिङ्गाधिकरणम् ॥ ५ ॥)

न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि ।३।२।११

दोषदर्शनाद्वैराग्योदयाय जीवस्यावस्थाविशेषा निरूपिताः, इदानीं ब्रह्मप्राप्तितृष्णाजननाय प्राप्यस्य ब्रह्मणो निर्दोषत्वकल्याणगुणात्मकत्वप्रतिपादनायारभते । तत्र जागरस्वप्नसुषुप्तिमुग्ध्युत्क्रान्तिषु स्थानेषु तत्तत्स्थानप्रयुक्ता जीवस्य ये दोषाः, ते तदन्तर्यामिणः परस्य ब्रह्मणोऽपि तत्तत्तावस्थितस्य सन्ति, नेति विचार्यते । किं युक्तम्? सन्तीति। कुतः? तत्तदवस्थशरीरेऽवस्थानात् । ननु [१]"सम्भोगप्राप्तिरिति चेन्न वैशेष्यात्" [२]"स्थित्यदनाभ्यांच" इत्यादिषु परस्याकर्मवश्यत्वेन दोषाभाव उक्तः,तत्कथमकर्मवश्यस्य परस्य ब्रह्मणस्तत्तत्स्थानसम्बन्धादोष उच्यते; इत्थमुच्यते–कर्माण्यपि देहसम्बन्धमापादयन्त्यपुरुषार्थजननानि भवन्ति–इति [३]"देहयोगाद्वा" इत्यत्रोक्तम्; तच्च देहसम्बन्धस्यापुरुषार्थत्वेन भवति; इतरथा कर्माण्येव दुःखं जनयिष्यन्ति;किं देहसम्बन्धेन; अतोऽकर्मवश्यत्वे सत्यपि नानाविधाशुचिदेहसम्बन्धोऽपुरुषार्थ एव; अतस्तन्नियमनार्थं स्वेच्छया तत्प्रवेशेऽप्यपुरुषार्थसम्बन्धोऽवर्जनीयः; पूयशोणितादिमज्जनं हि स्वेच्छाकारितमप्यपुरुषार्थ एव । अतो यद्यपि जगदेककारणं सर्वज्ञत्वादिकल्याणगुणाकरं च ब्रह्म, तथापि [४]"यः पृथिव्यां तिष्ठन्" [४]"य आत्मनि तिष्ठन्" [४]"यश्चक्षुषि तिष्ठन्" [४]"यो रेतसि तिष्ठन्" इत्या-

१. शारी. १-२-८ ॥—२ शारी. १-३-६॥—३. शारी. ३-२-५ ॥—४. बृ. ५-७-३, २२, १८, २३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दिवचनात् तत्रतत्रावस्थितस्य तत्तत्सम्बन्धरूपापुरुषार्थास्सन्ति–इति ॥

(सिद्धान्तः)

एवं प्राप्ते प्रचक्ष्महे—न स्थानतोऽपि परस्य–इति । न पृथिव्यात्मादिस्थानतोऽपि परस्य ब्रह्मणः अपुरुषार्थगन्धस्सम्भवति । कुतः? उभयलिङ्गं सर्वत्र हि–यतः सर्वत्र श्रुतिस्मृतिषु परं ब्रह्म उभयलिङ्गम् उभयलक्षणमभिधीयते, निरस्तनिखिलदोषत्वकल्याणगुणाकरत्वलक्षणोपेतमित्यर्थः । १"अपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासस्सत्यकामस्सत्यसङ्कल्पः" २"समस्तकल्याणगुणात्मकोऽसौ स्वशक्तिक्लेशाद्भूतभूतसर्गः" २"तेजोबलैश्वर्यमहावबोधसुवीर्यशक्त्यादिगुणैकराशिः । परः पराणां सकला न यत्र क्लेशादयस्सन्ति परावरेशे" ३"समस्तहेयरहितं विष्णाख्यं परमं पदम्" इत्यादिश्रुतिस्मृतिभ्यः उभयलक्षणं हि ब्रह्मावगतम् ॥ ११ ॥

भेदादितिचेन्न प्रत्येकमतद्वचनात्। ३।२। १२।

यथा जीवस्य प्रजापतिवाक्यावगतापहतपाप्मत्वाद्युभयलिङ्गस्यापि देवादिदेहयोगरूपावस्थाभेदादपुरुषार्थयोगः, तथाऽन्तर्यामिणः परस्यापि स्वतोऽपहतपाप्मत्वाद्युभयलिङ्गस्य तत्तद्देवादिशरीरयोगरूपावस्थाभेदादपुरुषार्थयोगोऽवर्जनीय इति चेत्–तन्न, प्रत्येकमतद्वचनात्—४"यः पृथिव्यां तिष्ठन्" ४"य आत्मनि तिष्ठन्" इत्यादिषु प्रतिपर्यायं ५"सत आत्माऽन्तर्याम्यमृतः" इत्यन्तर्यामिणोऽमृतत्ववचनेन तत्रतत्र स्वेच्छया नियमनं कुर्वतस्तत्तत्सम्बन्धप्रयुक्तापुरुषार्थप्रतिषेधात् । जीवस्य तु तत्स्वरूपं तिरोहितमिति ६"पराभिध्यानात्तु तिरोहितम्" इत्यत्रोक्तम् । ननु स्वेच्छया कुर्वतोऽपि तत्तद्वस्तुस्वभावायत्तापुरुषार्थसम्बन्धोऽवर्जनीय इत्युक्तम्; नैतद्युक्तम्, नह्यचिद्वस्त्वपि स्वभावतोऽपुरुषार्थस्वरूपम्; कर्म-

१. छा. ८-१-५ ॥—२. वि. पु. ६-५-८४, ८५ ॥—३. वि. पु १-२२-५३ ॥—४. बृ. ५-७-३, २२ ॥—५ बृ. ५-७-३, २३ ॥—६. शारी. ३-२-४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वश्यानां तु कर्मस्वभावानुगुण्येन परमपुरुषसङ्कल्पादेकमेव वस्तु कालभेदेन पुरुषभेदेन च सुखाय दुःखाय च भवति ; वस्तुस्वरूपप्रयुक्ते तु तादृप्ये सर्वं सर्वदा सर्वस्य सुखायैव दुःखायैव वा स्यात् ; नचैवं दृश्यते; तथाचोक्तं–[१]"नरकस्वर्गसंज्ञे वै पापपुण्ये द्विजोत्तम । वस्त्वेकमेव दुःखाय सुखायेर्ष्यागमाय च। कोपाय च यतस्तस्माद्वस्तु वस्त्वात्मकं कुतः। तदेव प्रीतये भूत्वा पुनर्दुःखाय जायते। तदेव कोपाय यतः प्रसादाय च जायते । तस्माद्दुःखात्मकं नास्ति न च कंचित्सुखात्मकम्" इति । अतो जीवस्य कर्मवश्यत्वात्तत्तत्कर्मानुगुण्येन तत्तद्वस्तुसम्बन्ध एवापुरुषार्थस्स्यात्; परस्य तु ब्रह्मणः स्वाधीनस्य स एव सम्बन्धस्तत्तद्विचित्रनियमनरूपलीलारसायैव स्यात् ॥ १२ ॥

अपिचैवमेके । ३ । २ । १३ ॥

अपिच एके-शाखिनः एकस्मिन्नेव देहसंयोगे जीवस्यापुरुषार्थं परस्य तु तदभावं नियमनरूपैश्वर्यायत्तदीप्तियोगं च स्वशब्देनाधीयते–[२]"द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते । तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति" इति ॥

अथ स्यात्–[३]"अनेन जीवेनाऽत्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि"इति ब्रह्मात्मकजीवानुप्रवेशपूर्वकं नामरूपव्याकरणमिति ब्रह्मणोऽपि तदात्मभूतस्य देवमनुष्यादिरूपत्वं तन्नामभाक्त्वंचास्ति, ततश्च [४]"ब्राह्मणो यजेत" इत्यादिविधिनिषेधशास्त्रगोचरत्वेन कर्मवश्यत्वमवर्जनीयमिति; तत्राह—

अरूपवदेव हि तत्प्रधानत्वात् । ३ । २ । १४ ॥

देवादिशरीरानुप्रवेशे तेन रूपेण युक्तमप्यरूपवदेव तत् ब्रह्म-रूप-

१. वि. पु. २-६. ४६-४७-४८॥—२. मु. ३-१-१॥—३. छा. ६-३-२॥—४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रहिततुल्यमेव; जीववच्छरीरित्वनिबन्धनं कर्मवश्यत्वमस्य न विद्यत इत्यर्थः। कुतः? निर्वाहकत्वेन प्रधानत्वात्। [१]"आकाशो हवै नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म"इति सर्वानुप्रवेशेऽपि नामरूपकार्यास्पर्शेन नामरूपयोर्निर्वोढृत्वमेव ब्रह्मणः प्रतिपादयति।ननु-तच्छरीरकत्वेन तदन्तर्यामित्वे कथमरूपवदिति रूपसम्बन्धरहिततुल्यत्वमुच्यते?इत्थं–यथा जीवस्य तत्तज्जन्यसुखदुःखभाक्त्वेन तत्तद्रूपसम्बन्धः,तथा तदभावात्परस्यारूपवत्त्वम्।विधिनिषेधशास्त्राण्यपि कर्मवश्यमेवाधिकुर्वन्ति; तस्मादरूपतुल्यमेव परं ब्रह्म। ततश्चान्तर्यामिरूपेणावस्थितमपि ब्रह्म निरस्तनिखिलदोषत्वकल्याणगुणाकरत्वरूपोभयलिङ्गमेव ॥ १४ ॥

ननु च [२]" सत्यं ज्ञानमनन्तं ब्रह्म " इत्यादिभिर्निर्विशेषप्रकाशैकस्वरूपं ब्रह्मावगम्यते ,अन्यच्च सर्वज्ञत्वसत्यसङ्कल्पत्वजगत्कारणत्वसर्वान्तरात्मत्वसत्यकामत्वादिकं [३]"नेतिनेति" इत्यादिभिः प्रतिषिध्यमानत्वेन मिथ्याभूतमित्यवगन्तव्यम्; तत्कथं कल्याणगुणाकरत्वनिरस्तनिखिलदोषत्वरूपोभयलिङ्गत्वं ब्रह्मण इति; अत आह—

प्रकाशवच्चावैयर्थ्यात्। ३। २। १५॥

यथा [२]" सत्यं ज्ञानमनन्तं ब्रह्म " इत्यादिवाक्यावैयर्थ्यात्प्रकाशस्वरूपत्वं ब्रह्मणोऽभ्युपगम्यते; तथा सत्यसङ्कल्पत्वसर्वज्ञत्वजगत्कारणत्वसर्वात्मकत्वनिरस्तनिखिलाविद्यादिदोषत्वाद्यभिधायिवाक्यावैयर्थ्यादुभयलिङ्गमेव ब्रह्म ॥ १५ ॥

आह च तन्मात्रम्। ३। २। १६॥

किञ्च [२]" सत्यं ज्ञानमनन्तम् " इत्यादिवाक्यं ब्रह्मणः प्रकाशस्वरूपतामात्रं प्रतिपादयति, नान्यत्सत्यसङ्कल्पत्वादिकं वाक्यान्तरावगतं निषेधति; [३]" नेतिनेति " इति च निषेधविषयोऽनन्तरमेव वक्ष्यते ॥

१. छा. ८-१४-१ ॥—२. तै. आन. १-१ ॥—३. बृ. ४-३-६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दर्शयति चाथो अपि स्मर्यते । ३। २। १७॥

दर्शयति च वेदान्तगणः कल्याणगुणाकरत्वं निरस्तनिखिलदोषत्वं च [१]"तमीश्वराणां परमं महेश्वरं तं दैवतानां परमं च दैवतम्। स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता नचाधिपः। न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते। पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च"[२]"यस्सर्वज्ञस्सर्ववित् यस्य ज्ञानमयं तपः" [३]"भीषाऽस्माद्वातः पवते भीषोदेति सूर्यः" [३]"स एको ब्रह्मण आनन्दः" [४]"यतो वाचो निवर्तन्ते। अप्राप्य मनसा सह। आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चनेति [५]"निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्" इत्यादि। स्मर्यते च [६]"यो मामजमनादिं च वेत्ति लोकमहेश्वरम्" [७]"विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्" [८]"मयाऽध्यक्षेण प्रकृतिस्सूयते सचराचरम्। हेतुनाऽनेन कौन्तेय जगद्धि परिवर्तते" [९]"उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः। यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः" [१०]"सर्वज्ञस्सर्वकृत्सर्वशक्तिज्ञानबलर्धिमान्। अन्यूनश्चाप्यवृद्धिश्च स्वाधीनो नादिमान्वशी। कृमतन्द्रीभयक्रोधकामादिभिरसंयुतः। निरवद्यः परः प्राप्तेर्निराधिष्ठोऽक्षरः क्रमः"इत्यादिः। अतस्सर्वत्रावस्थितस्यापि ब्रह्मण उभयलिङ्गत्वात्तत्तत्स्थानप्रयुक्ता दोषा न परं ब्रह्म स्पृशन्ति ॥ १७ ॥

अत एवचोपमा सूर्यकादिवत् । ३। २। १८॥

यतो नानाविधेषु स्थानेषु स्थितस्यापि परस्य ब्रह्मणो न तत्प्रयुक्तदोषभाक्त्वम्, अत एव जलदर्पणादिप्रतिबिम्बितसूर्यादिवत्परमात्मा

---

१. श्वे. ६-७, ८ ॥—२. मु. १-१-९ ॥—३. तै. आ. ८-४ ॥—४. तै. आ ९-१ ॥— ५. श्वे. ६-१९ ॥— ६. गी. १०-३ ॥— ७. गी. १०-४२ ॥— ८. गी. ९-१० ॥—९. गी. १५-१७ ॥—१०. वि. पु. ५-१-४७, ४८, ४९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तत्तत्तावस्थितोऽपि निर्दोष इति शास्त्रेषूपमा क्रियते—१"आकाशमेकं हि यथा घटादिषु पृथग्भवेत् । तथात्मैको ह्यनेकस्थो जलाधारेष्विवांशुमान्। एक एव हि भूतात्मा भूतेभूते व्यवस्थितः । एकधा बहुधाचैव दृश्यते जलचन्द्रवत्" इत्यादिषु ॥ १८ ॥

अत्र चोदयति—

अम्बुवदग्रहणात्तु न तथात्वम् । ३। २। १९॥

तुशब्दश्चोद्यं द्योतयति । अम्बुवदिति सप्तम्यन्तात् वतिः । अम्बुदर्पणादिषु यथा सूर्यमुखादयो गृह्यन्ते; न तथा पृथिव्यादिषु स्थानेषु परमात्मा गृह्यते । अम्बादिषु हि सूर्यादयो भ्रान्त्या तत्रस्था इव गृह्यन्ते, न परमार्थतस्तत्रस्थाः । इह तु २"यः पृथिव्यां तिष्ठन्" २"योऽप्सु तिष्ठन्" २"य आत्मनि तिष्ठन्" इत्येवमादिना परमार्थत एव परमात्मा पृथिव्यादिषु स्थितो गृह्यते । अतस्सूर्यादेरम्बुदर्पणादिप्रयुक्तदोषाननुषङ्गस्तत्तत्र स्थित्यभावादेव । अतो न तथात्वं—दार्ष्टान्तिकस्य न दृष्टान्ततुल्यत्वमित्यर्थः ॥ १९ ॥

परिहरति—

वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवं दर्शनाच्च । ३। २। २० ॥

पृथिव्यादिस्थानान्तर्भावात्स्थानिनः परस्य ब्रह्मणः स्वरूपतो गुणतश्च पृथिव्यादिस्थानगतवृद्धिह्रासादिदोषभाक्त्वमात्रं सूर्यादिदृष्टान्तेन निवर्त्यते। कथमिदमवगम्यते? उभयसामञ्जस्यादेवम्—उभयदृष्टान्तसामञ्जस्यादेवमिति निश्चीयते।१"आकाशमेकंहि यथाघटादिषु पृथग्भवेत्"१"जलाधारेष्विवांशुमान्" इति दोषवत्स्वनेकेषु वस्तुषु वस्तुतोऽवस्थितस्या-

१. याज्ञवल्क्य. प्रायश्चित्त. अध्यात्मप्र. १४४ ॥—२. बृ-५-७-३, ४, २२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

काशस्य, वस्तुतोऽनवस्थितस्यांशुमतश्चोभयस्य दृष्टान्तस्योपादानं हि परमात्मनः पृथिव्यादिगतदोषभात्त्वनिवर्तनमात्रे प्रतिपाद्ये समञ्जसं भवति। घटकरकादिषु यथा वृद्धिह्रासभाक्षु पृथक्पृथक्संयुज्यमानमप्याकाशं वृद्धिह्रासादिदोषैर्न स्पृश्यते; यथा च जलाधारेषु विषमेषु दृश्यमानोंऽशुमान् तद्गतवृद्धिह्रासादिभिर्न स्पृश्यते; तथाऽयं परमात्मा पृथिव्यादिषु नानाकारेष्वचेतनेषु चेतनेषु च स्थितस्तत्तद्गतवृद्धिह्रासादिदोषैरसंस्पृष्टस्सर्वत्र वर्तमानोऽप्येक एवास्पृष्टदोषगन्धः कल्याणगुणाकर एवा एतदुक्तं भवति —यथा जलादिषु वस्तुतोऽनवस्थितस्यांशुमतो हेत्वभावाज्जलादिदोषानभिष्वङ्गः, तथा पृथिव्यादिष्ववस्थितस्यापि परमात्मनो दोषप्रत्यनीकाकारतया दोषहेत्वभावान्न दोषसम्बन्धः—इति। दर्शनाच्च—दृश्यते चैवं सर्वात्मना साधर्म्याभावेऽपि विवक्षितांशसाधर्म्यादृष्टान्तोपादानं, सिंह इव माणवक इत्यादौ। अतः स्वभावतो निरस्तनिखिलाज्ञानादिदोषगन्धस्य समस्तकल्याणगुणाकरस्य पृथिव्यादिस्थानतोऽपि न दोषसम्भवः ॥२०॥

अथ स्यात्—१"द्वे वाव ब्रह्मणो रूपे मूर्तं चामूर्तमेवच" इति प्रकृत्य समस्तं स्थूलसूक्ष्मरूपं प्रपञ्चं ब्रह्मणो रूपत्वेन परामृश्य २"तस्य ह वा एतस्य पुरुषस्य रूपं यथा माहारजनं वासः"इत्यादिना आकारविशेषं चाभिधाय २"अथात आदेशो नेतिनेति नह्येतस्मादितिनेत्यन्यत्परमस्ति" इति सर्वं प्रकृतं ब्रह्मणः प्रकारमितिशब्देन परामृश्य तत्सर्वं प्रतिषिध्य सर्वविशेषाधिष्ठानं सन्मात्रमेव ब्रह्म; विशेषास्त्वेवंविधं स्वस्वरूपमजानता ब्रह्मणा कल्पिता इति दर्शयति; अतः कथमुभयलिङ्गत्वं ब्रह्मण इति—अत्राह—

प्रकृतैतावत्त्वं हि प्रतिषेधति ततोब्रवीति च भूयः। ३। २। २१॥

१. बृ. ४-३-१ ॥—२. बृ. ४-३-६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नैतदुपपद्यते—यद्ब्रह्मणः प्रकृतविशेषवत्त्वं १"नेतिनेति" इति प्रतिषिध्यत—इति, तथा सति भ्रान्तजल्पितायमानत्वात्। न हि ब्रह्मणो विशेषणतया प्रमाणान्तराप्रज्ञातं सर्वं तद्विशेषणत्वेनोपदिश्य पुनस्तदेवानुन्मत्तः प्रतिषेधति। यद्यपि निर्दिश्यमानेषु केचन पदार्थाः प्रमाणान्तरप्रसिद्धाः; तथापि तेषां ब्रह्मणः प्रकारत्वमप्रज्ञातमेव, इतरेषां तु स्वरूपं ब्रह्मणः प्रकारत्वं चाज्ञातम्। अतस्तेषामनुवादासम्भवादत्रैवोपदिश्यन्ते। अतस्तन्निषेधो नोपपद्यते। यस्मादेवं, तस्मात्प्रकृतैतावत्त्वं ब्रह्मणः प्रतिषेधतीदं वाक्यम्। ये ब्रह्मणो विशेषाः प्रकृताः; तद्विशिष्टतया ब्रह्मणः प्रतीयमानेयत्ता १"नेतिनेति" इति प्रतिषिध्यते। नेतिनेति—नैवं नैवम्, उक्तप्रकारमात्रविशिष्टं न भवति ब्रह्म; उक्तप्रकारविशिष्टतया या ब्रह्मण इयत्ता प्रकृता; साऽत्र इतिशब्देन परामृश्यत इत्यर्थः। यतश्च निषेधानन्तरं ब्रह्मणो भूयो गुणजातं ब्रवीति, अतश्च प्रकृतविशेषणयोगित्वमात्रं ब्रह्मणः प्रतिषेधति। ब्रवीति हि भूयो गुणजातं—१"न ह्येतस्मादितिनेत्यन्यत्परमस्त्यथ नामधेयं सत्यस्यसत्यमिति प्राणा वै सत्यं तेषामेष सत्यम्" इति। अयमर्थः—इति नेति यद्ब्रह्म प्रतिपादितम्, तस्मादेतस्मादन्यद्वस्तु परं नह्यस्ति; ब्रह्मणोऽन्यत् स्वरूपतो गुणतश्चोत्कृष्टं नास्तीत्यर्थः। तस्य च ब्रह्मणः सत्यस्य सत्यमिति नामधेयम्। तस्य च निर्वचनं १"प्राणा वै सत्यं तेषामेष सत्यम्" इति। प्राणशब्देन प्राणसाहचर्याज्जीवाः परामृश्यन्ते; ते तावत्सत्यम्, वियदादिवत्स्वरूपान्यथाभावरूपपरिणामाभावात्;तेषामेष सत्यम्—तेभ्योऽप्येष परमपुरुषस्सत्यम्, जीवानां कर्मानुगुण्येन ज्ञानसङ्कोचविकासौ विद्येते; परमपुरुषस्य त्वपहतपाप्मनस्तौ न विद्येते; अतस्तेभ्योऽप्येष सत्यम्। अतश्चैवं वाक्यशेषोदितगुणजातयोगात् १"नेतिनेति" इति ब्रह्मणस्सवि-

१. बृ. ४-३-६ ॥—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शेषत्वं न प्रतिषिध्यते ; अपि तु पूर्वप्रकृतेयत्तामात्रम् । अत उभयलिङ्गमेव परं ब्रह्म ॥ २१ ॥

ब्रह्मणः प्रमाणान्तरागोचरत्वेन तत्सम्बन्धितया मूर्तामूर्तादिरूपानुवादेन तन्निषेधासम्भवात्प्रकृतेयत्ताप्रतिषेध उक्तः ; तदेव प्रमाणान्तरागोचरत्वं द्रढयति—

तदव्यक्तमाह हि । ३ । २ । २२ ॥

तत्—ब्रह्म प्रमाणान्तरेण न व्यज्यते, आह हि शास्त्रं [१]"न सन्दृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम्" [२]"न चक्षुषा गृह्यते नापि वाचा" इत्यादि ॥

हेत्वन्तरं चाह—

अपि संराधने प्रत्यक्षानुमानाभ्याम् । ३ । २ । २३ ॥

अपि च संराधने—सम्यक्प्रीणने भक्तिरूपापन्ने निदिध्यासन एवास्य साक्षात्कारः ; नान्यतेति श्रुतिस्मृतिभ्यामवगम्यते । [३]"नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन । यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम् [२]"ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यति निष्कलं ध्यायमानः" इति श्रुतिः । स्मृतिरपि [४]"नाहं वेदैर्न तपसा न दानेन न चेज्यया" [४]"भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन । ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप" इति । भक्तिरूपापन्नमेवोपासनं संराधनम्—तस्य प्रीणनमिति पूर्वमेवोक्तम्। अतो निदिध्यासनाय ब्रह्मस्वरूपमुपदिशत् [५]"द्वे वाव ब्रह्मणः" इत्यादि-

१. तै. नारा. १. अनु. १० ॥—२. मु. ३-१ ८ ॥—३. मु. ३-२-३ ॥—४. गी. ११-५३, ५४ ॥—५. बृ. ४-३-१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शास्त्रं ब्रह्मणो मूर्तामूर्तरूपद्वयादिविशिष्टतां प्रागसिद्धां नानुवदितुं क्षमम् ॥ २३ ॥

प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्मण्यभ्यासात् । ३ । २ । २४ ॥

इतश्च प्रकृतैतावत्त्वमेव प्रतिषेधति ; न मूर्तामूर्तादिविशिष्टत्वम् ; यतस्साक्षात्कृतपरब्रह्मस्वरूपाणां वामदेवादीनां दर्शने प्रकाशादिवत्-ज्ञानानन्दादिस्वरूपवन्मूर्तादिप्रपञ्चविशिष्टताया अपि ब्रह्मगुणत्वावैशेष्यं प्रतीयते—[१]"तद्धेतत्पश्यन्नृषिर्वामदेवः प्रतिपेदे अहं मनुरभवं सूर्यश्च" इत्यादि। ब्रह्मस्वरूपभूतप्रकाशानन्दादिश्च तेषां वामदेवादीनां संराधनात्मके कर्मण्यभ्यासादुपलभ्यते। तद्वच्चाभ्यस्तसंराधनानां तेषां मूर्तामूर्तादिविशिष्टत्वमप्यविशेषेण प्रतीयत इत्यर्थः ॥ २४ ॥

उक्तं ब्रह्मण उभयलिङ्गत्वमुपसंहरति—

अतोऽनन्तेन तथाहि लिङ्गम् । ३ । २ । २५ ॥

अतः—उक्तैर्हेतुभिर्ब्रह्मणः अनन्तेन कल्याणगुणगणेन विशिष्टत्वं सिद्धम्। तथा हि सत्युभयलिङ्गं ब्रह्मोपपन्नं भवति ॥ २५ ॥

इति श्रीशारीरकमीमांसाभाष्ये उभयलिङ्गाधिकरणम् ॥ ५ ॥

वेदान्तसारे—न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि ॥ जागरादिषु चतसृष्ववस्थास्वन्तर्यामित्वेन स्थितेरपि परस्य ब्रह्मणो न कश्चन दोषः ; यतस्सर्वत्र श्रुतिस्मृतिषु निरस्तनिखिलदोषसम्बन्धत्वसमस्तकल्याणगुणाकरत्वरूपोभयलिङ्गं परं ब्रह्म श्रुतम्—[२]"अपहतपाप्मा...सत्यसङ्कल्पः" [३]"निरवद्यम्" [४]"यस्सर्वज्ञस्सर्ववित्" [५]"समस्तकल्याणगुणात्मकोऽसौ" [६]"सकला न यत्र क्लेशादयः" इत्यादिषु ॥ ११ ॥

---

१. बृ. ३-४-१०॥—२. छा. ८-१-५ ॥—३. श्वे. ६-१९ ॥—४. मु. १-१-९॥—५, ६. वि. पु. ६-५-८४, ८५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भेदादिति चेन्न प्रत्येकमतद्वचनात् ॥ जीवस्य स्वतोऽपहतपाप्मनोऽपि शरीरसम्बन्धित्वावस्थाभेदाद्यथा दोषसम्बन्धः, तथा परस्यापि १"यस्य पृथिवी शरीरम्" इत्यादिशरीरसम्बन्धित्वाद्दोष इति चेत्—न, १"यस्य पृथिवी शरीरम्" इत्यादिषु प्रतिपर्यायं २"स त आत्माऽन्तर्याम्यमृतः" इति निर्दोषत्ववचनात् ॥ १२ ॥

अपि चैवमेके ॥ एकस्मिन् शरीरेऽवस्थितयोर्जीवपरयोर्यो विशेष उक्तः, एवमेके स्वशब्देनाधीयते—३"द्वा सुपर्णा" इत्यारभ्य, ३"पिप्पलं स्वाद्वत्त्यनश्नन्योऽभिचाकाशीति" इति ॥ १३ ॥

अरूपवदेव हि तत्प्रधानत्वात्॥ मनुष्यादिशरीरेषु शरीरित्वेऽपि रूपरहितवस्तुवदेव वर्तते तत् ब्रह्म, जीवनामरूपयोरपि निर्वोढृत्वेन प्रधानत्वात्। तथाहि श्रुतिः, ४"नामरूपयोर्निर्वहिता ते यदन्तरा" इति नामरूपयोरन्तरा अस्पृष्टो मध्ये वर्तते, अवश्य इत्यर्थः ॥ १४ ॥

प्रकाशवच्चावैयर्थ्यात् ॥ यथा ५"सत्यं ज्ञानम्" इति वाक्यावैयर्थ्यात् स्वप्रकाशतया ज्ञानस्वरूपं ब्रह्म ; तथा ६"निरवद्यम्" ७"यस्सर्वज्ञः" ८"पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च" इत्यादिपरश्शतवाक्यावैयर्थ्यात् निरवद्यं कल्याणगुणाकरञ्चेत्युभयलिङ्गमेव ॥ १५ ॥

आह च तन्मात्रम् ॥ ५"सत्यं ज्ञानम्" इति ज्ञानस्वरूपतामात्रमाह, नान्यन्निवारयति, अविशेषात्, विरोधाभावाच्च ॥ १६ ॥

दर्शयति चाथो अपि स्मर्यते ॥ दर्शयति च निर्दोषत्वं कल्याणगुणाकरत्वञ्च वेदान्तगणः ६"निष्कलं निष्क्रियं शान्तम्" ९"तमीश्वराणाम्" इत्यादिः ; १०"यो मामजमनादिम्" इत्यादिना स्मर्यते च तत् ॥ १७ ॥

अत एवचोपमा सूर्यकादिवत् ॥ यतः पृथिव्यादौ सर्वत्र स्थितस्यापि निर्दोषत्वं कल्याणगुणाकरत्वञ्च ; अत एव शास्त्रेषु जलसूर्यकादिवदित्युपमा ११"आकाशमेकं हि यथा.. जलाधारेष्विवांशुमान्" इति ॥ १८ ॥

चोदयति—

---

१ बृ.५-७-३॥—२. बृ. ५-७.३...२३॥—३.मु-३.१-१॥—४.छा.८-१४--१॥—५. तै. आ. १-१॥—६. श्वे. ६-१९ ॥—७. मु. १-१-९॥—८. श्वे.६-८॥—९. श्वे. ६-७ ॥—१०. गी. १०-३ ॥—११याज्ञवल्क्य. प्रायश्चित्त. अध्यात्म प्र. १४४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अम्बुवदग्रहणात्तु न तथात्वम् ॥ अम्बुनि सूर्यो यथा गृह्यते, न तथा परमात्मा पृथिव्यादौ ; अत्र परमार्थतस्स्थितः; अतो न निर्दोषत्वमिति ॥

वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवं दर्शनाच्च ॥ नेति वर्तते । नैवम् , पृथिव्यादिष्वन्तर्भावात् परस्य तद्गतवृद्धिह्रासभाक्त्वं दृष्टान्तेन निवर्त्यते इत्युभयदृष्टान्तोपादानसामञ्जस्यादवगम्यते । १"आकाशमेकं हि यथा" इति वस्तुतस्स्थितमाकाशं , वस्तुतोऽनवस्थितञ्च सूर्यकमुभयमुपादत्ते । अनवस्थितस्य यथा न दोषस्पर्शः ; तथा स्थितस्यापि हेत्वभावादिति ज्ञापयितुम् । विवक्षितधर्मसाम्यज्ञापनाय सिंह इवेति दृष्टान्तो दृश्यते । अथवा दर्शनाच्चेति, २"अश्व इव रोमाणि विधूय पापम्" इत्यादौ विवक्षितसाम्यान्वयो दार्ष्टान्तिके हि दृश्यते । अश्वो हि रोमाणि सहजानि स्वावयवभूतानि मूर्तद्रव्याणि स्वशरीरं कम्पयन् कानिचिन्मुञ्चति ; अत्मा तु स्वेन कदाचिदनुष्ठितानि क्षणध्वंसितया विनष्टानि कर्माणि भगवदप्रीतिकराणीति भगवता स्वाप्रीतिकृतदुःखानि दातुं प्रवृत्तेन उपासनप्रीतिकृतानुग्रहान्निवर्तितानीति तत्सम्पर्काभावमनुसन्दधाति ॥ २० ॥

३"अथात आदेशो नेति नेति" इति सकलविशेषप्रतिषेधान्नोभयलिङ्गमित्यत आह—

प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः॥ ४"द्वे वाव ब्रह्मणो रूपे" इत्यारभ्य, कृत्स्नप्रपञ्चस्य ब्रह्मणो रूपत्वेनाप्रज्ञातस्य रूपत्वमुपदिश्य, पुनस्तस्यैव प्रतिषेधासम्भवात् प्रकृतैतावन्मात्रन्न भवतिः ब्रह्मेति ब्रह्मणः प्रकृतेयत्तां ३"नेति नेति" इति प्रतिषेधति ; ततः पश्चात् पूर्वमनुक्तं गुणगणं ब्रवीति च—३"नह्येतस्मादितिनेत्यन्यत्परमस्ति" इति । इति नेति निर्दिष्टाद्ब्रह्मणोऽन्यन्न ह्यस्तीत्युत्कृष्टम् ; ३"अथ नामधेयं सत्यस्य सत्यम्" इति च । तन्निर्वचनम् ३"प्राणा वै सत्यं तेषामेष सत्यम्" इति। प्राणाः—जीवात्मानः विद्यादिवदुत्पत्त्यभावात्सत्यम् ; तेभ्योऽप्येष सत्यं, ज्ञानसङ्कोचाद्यभावात्। अतः प्रकृतेयत्तापतिषेधादुभयलिङ्गमेव ॥ २१ ॥

प्रत्यक्षेण सन्मात्रं ब्रह्मैव गृह्यते, अन्यत्सर्वं भ्रान्तमिति, ३"नेति नेति" इति निषेधार्थ इत्यत आह—

तदव्यक्तमाह हि ॥ ब्रह्मस्वरूपं न केनापि प्रमाणेन व्यज्यते ; तथा

---

१. याज्ञवल्क्य. प्रायश्चित्त. अध्यात्मप्र. १४४ ॥—२. छा. ८-१३-१ ॥ —३. बृ. ४-३-६ ॥—४. बृ. ४-३-१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ऽऽह हि श्रुतिगणः, १"न सन्दृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम्" इत्यादिः । प्रत्यक्षादिना तु पटादेरेवास्तित्वं गृह्यते; न ब्रह्मणः ॥ २२ ॥

अपि संराधने प्रत्यक्षानुमानाभ्याम् ॥ *अपिचात्यर्थप्रियानुध्यानरूपसम्यक्प्रीणने सति ब्रह्मस्वरूपं गृह्यत इति श्रुतिस्मृतिभ्यामवगम्यते। २"नायमात्मा प्रवचनेन लभ्यः" इति श्रुतिः । ३"नाहं वेदैः" इत्यादिस्मृतिः॥ २३॥

प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्मण्यभ्यासात्॥ संराधनकर्मण्यभ्यासात् येषां ब्रह्मस्वरूपदर्शनं जातम्; तद्दर्शने ज्ञानानन्दादेरिव जगदैश्वर्यस्यावैशेष्यं प्रतीयते ४"अहं मनुरभवं सूर्यश्च" इत्यादौ ॥ २४ ॥

अतोऽनन्तेन तथाहि लिङ्गम् ॥ अतः ५"द्वे वाव ब्रह्मणो रूपे" इत्यादिनोपदिष्टेनानन्तेन कल्याणगुणगणेन योगो ब्रह्मणस्सिद्धः । तथा सत्युभयलिङ्गमेव ब्रह्म ॥ २५ ॥

इति वेदान्तसारे उभयलिङ्गाधिकरणम् ॥ ५ ॥

वेदान्तदीपे—न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि ॥ किं जीवस्येव तदन्तर्यामिणः परस्य ब्रह्मणोऽपि जागरादिस्थानप्रयुक्तदोषास्सम्भवन्ति, उत नेति संशयः । ६"यः पृथिव्यां तिष्ठन्" ६" य आत्मनि तिष्ठन्" ६"यश्चक्षुषि तिष्ठन्" ६"यो रेतसि तिष्ठन्" इत्यादिना जीवस्येव सर्वावस्थास्वस्थितिवचनात् छन्दतोऽपि पूयशोणितादिमज्जनमपुरुषार्थ एवेति सर्वे दोषास्तम्भवन्तीति पूर्वः पक्षः । राद्धान्तस्तु—७"अपहतपाप्मा विजरः" ८"निरवद्यं निरञ्जनम्" ७"सत्यकामस्सत्यसङ्कल्पः;" ९"यस्सर्वज्ञस्सर्ववित्" १०"यो मामजमनादिं च वेत्ति लोकमहेश्वरम्" ११"परः पराणां सकला न यत्र क्लेशादयस्सन्ति परावरेशे"इत्यादिश्रुतिस्मृतिभ्यो निरस्तनिखिलदोषगन्धतासार्वज्ञ्यसत्यसङ्कल्पत्वाद्युभयलक्षणस्वरूपावगतेः परस्य ब्रह्मणस्सर्वत्रान्तर्यामितयाऽवस्थितस्यापि न दोषगन्धस्तम्भवति; अपि तु सर्वनियमनरूपलीलारस एव॥

सूत्रार्थस्तु—न स्थानतोऽपि परस्य—पृथिव्यात्मादिष्वन्तर्यामितयाऽव-

---

१. तै. ना. अम्भस् ॥—२. मु. ३-२-३॥—३. गी. ११-५४॥—४. बृ. ३-४-१० ॥ ५. बृ. ४-३-१॥—६. बृ. ५-७-३-२२,१८,२३॥—७. छा. ८-१ ५॥—८. श्वे. ६-१९॥ ९. मु. १-१-९॥—१०. गी-१०-३॥—११. वि.पु.६-५-८५॥ *अपि अपिचेत्यर्थः। प्रियानु.पा॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्थितस्यापि परस्य ब्रह्मणः जीवस्य तत्रतत्रावस्थितस्य ये दोषा उक्ताः, ते न सम्भवन्ति ; कुतः ? उभयलिङ्गं सर्वत्र—हिहेंतौ, यतस्सर्वत्र श्रुतिस्मृतिषु निरस्तनिखिलदोषत्वसमस्तकल्याणगुणात्मकत्वरूपोभयलिङ्गम् उभयलक्षणं परं ब्रह्मावगतम् ॥ ११ ॥

भेदादिति चेन्न प्रत्येकमतद्वचनात् ॥ यथा जीवस्य स्वतोऽपहतपाप्मत्वादिगुणकस्यापि देवादिशरीरसम्बन्धितयाऽवस्थाभेदादुक्तदोषसम्बन्धित्वम् ; एवं परस्यापि १"यस्य पृथिवी शरीरम्" इति शरीरसम्बन्धित्वावस्थाभेदात्ते दोषास्स्युरिति चेत्—न,प्रत्येकं-प्रतिपर्यायम् , अतद्वचनात् - दोषासम्बन्धित्ववचनात् । १"यस्य पृथिवी शरीरम्" इत्यादिषु १"एष त आत्माऽन्तर्याम्यमृतः" इत्यन्तर्यामिणो हि निर्दोषत्वमुच्यते ; जीवस्य तु पराभिध्यानात्तत्स्वरूपं तिरोहितमित्युक्तम् । अतश्शरीरसम्बन्धित्वेऽपि परस्यैते न दोषाः ॥ १२ ॥

अपिचैवमेके ॥ अपि च यदिदं जीवपरयोरेकस्मिन् शरीरे शरीरित्वेनावस्थितयोर्दोषसम्बन्धित्वं तद्विपरीतत्वं चोक्तम् , एवमेके शाखिनस्स्वशब्देनाधीयते—२"द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते । तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति" इति ॥ १३ ॥

मनुष्यादिशरीरेषु शरीरित्वमेव जीवस्य नामरूपभाक्त्वेन कर्मवश्यताहेतुः, तत्परस्याप्यविशिष्टं चेत्—कथं परस्य ब्रह्मणोऽकर्मवश्यत्वेन कर्मफलानशनमुच्यते—इत्यत आह—

अरूपवदेव हि तत्प्रधानत्वात् ॥ मनुष्यादिशरीरेषु शरीरित्वेऽप्यरूपवदेव हि तत् परं ब्रह्म ; कुतः ? प्रधानत्वात् निर्वाहकत्वात् ; जीवस्य नामरूपभाक्त्वेन कर्मफलाशनं निर्वोढुं परस्य तत्तच्छरीरे शरीरित्वेनावस्थानम् ; यथाह—१"यस्य पृथिवी शरीरम्" ३"यस्याऽत्मा शरीरम्...आत्मानमन्तरो यमयति" ४"अन्तः प्रविष्टश्शास्ता जनानां सर्वात्मा" "५आकाशो हवै नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म" इति । अत उभयलिङ्गमेव परं ब्रह्म ॥१४॥

६"सत्यं ज्ञानमनन्तं ब्रह्म" इति प्रकाशैकस्वरूपता ब्रह्मण उच्यते, कथमुभयलिङ्गत्वमित्यत आह—

---

१. बृ. १-७-३-२२, १८, २३, ॥—२. मु. ३-१-१ ॥ —३. बृ. ५-७-२२॥—४. आरण्म्. ३-प्र. २१-पं ॥—५. छा. ८-१४-१ ॥—६. तै. आ. १-१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रकाशवच्चावैयर्थ्यात् ॥ यथा १"सत्यं ज्ञानम्" इति वाक्यावैयर्थ्यात्प्रकाशो ब्रह्मणस्स्वरूपमित्यवगम्यते; तथा २"यस्सर्वज्ञस्सर्ववित्" ३"पराऽस्य शक्तिर्विविधैव श्रूयते" इत्यादिवाक्यावैयर्थ्यात्कल्याणगुणाकरत्वं च ब्रह्मणस्स्वरूपमित्यवगम्यते इत्युभयलिङ्गमेव ॥ १५ ॥

आह च तन्मात्रम् ॥ १"सत्यं ज्ञानम्" इति वाक्यं ब्रह्मणो ज्ञानं स्वरूपमित्येतावन्मात्रमाह; न पुनः कल्याणगुणाकरत्वं निषेधति ॥ १६ ॥

दर्शयति चाथो अपि स्मर्यते ॥ दर्शयति च वेदान्तवाक्यगणो निरस्तनिखिलदोषत्वं कल्याणगुणाकरत्वं च ३"निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्" ५"तमीश्वराणां परमं महेश्वरं तं दैवतानां परमं च दैवतम्" इत्यादिकः। स्मर्यते च ६"यो मामजमनादिं च वेत्ति लोकमहेश्वरम्" ७"अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा। मत्तः परतरं नान्यत्" इत्यादिषु॥ १७॥

अत एव चोपमा सूर्यकादिवत्॥ यतो ब्रह्मणो निरस्तनिखिलदोषत्वकल्याणगुणाकरत्वेनोभयलिङ्गत्वात् पृथिव्यादिस्थानतोऽपि न तत्तत्प्रयुक्तदोषगन्धसम्भवः; अत एव शास्त्रेषु च जलसूर्यकाद्युपमा क्रियते ८"आकाशमेकं हि यथा घटादिषु पृथग्भवेत्। तथात्मैको ह्यनेकस्थो जलाधारेष्विवांशुमान्" इत्यादिषु ॥ १८ ॥

अम्बुवदग्रहणात्तु न तथात्वम् ॥ तुशब्दश्चोद्यं द्योतयति; अम्बुनीवाग्रहणात् ;यथाऽम्बुनि सूर्यः तत्रानवस्थित एव भ्रान्त्या तत्र स्थित इव गृह्यते; न तथा परमात्मा पृथिव्यादौ गृह्यते; ९"यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरः" इति परमार्थतस्स्थितो गृह्यते; अतो न तथात्वं—न सूर्यस्येव तत्प्रयुक्तदोषगन्धाभावः परमात्मनः, परमार्थतस्स्थितत्वात् ॥ १९ ॥

वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवं दर्शनाच्च ॥ पृथिव्यादिषु विषमेषु स्थानेषु स्थितस्यापि परमात्मन तदन्तर्भावात्—तत्रावस्थानतः तत्प्रयुक्तवृद्धिह्रासभाक्त्वं ८"जलाधारेष्विवांशुमान्" इति दृष्टान्तेन निवर्त्यते। कुतोऽवगम्यते एतावन्मात्रमिति; उभयसामञ्जस्यादेवम्—उभयदृष्टान्तोपादानसामञ्जस्यादेवमवगम्यते। ८"आकाशमेकं हि यथा घटादिषु पृथग्भवेत्" इति

१. तै. आ. १-१-॥—२. मु. १-१-९ ॥—३. श्वे. ६-८ ॥—४. श्वे. ६-१९॥—५. श्वे. ६-७ ॥—६. गी. १०-३ ॥—७. गी. ७-६॥—८. याज्ञवल्क्य. प्रायश्चित्त. अध्यात्मप्र. १४४ ॥—९. बृ. ५-७-३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

घटकरकादिषु विषमेष्ववस्थितमाकाशं, १"जलाधारेष्विवांशुमान्" इति चांशुमन्तं परमार्थतस्स्थितमनवस्थितं चोभयं दृष्टान्ततयोपादाय १"तथाऽऽत्मैको ह्यनेकस्थः" इति निगमनात् तत्तत्स्थानप्रयुक्तवृद्धिह्रासभाक्त्वनिवर्तनमात्रं विवक्षितमित्यवगम्यते। अन्यत्रापि दृष्टान्तदार्ष्टान्तिकयोस्सर्वसाम्याभावेऽपि 'सिंह इव माणवकः" इत्यादिषु दृष्टान्तोपादानदर्शनाच्चैवमवगम्यते ॥ २० ॥

२"अथात आदेशो नेतिनेति" इत्यादिना पूर्वप्रकृतस्य मूर्तामूर्तप्रपञ्चस्य ब्रह्मणो रूपत्वप्रतिषेधान्निष्प्रपञ्चं सन्मात्रमेव ब्रह्म ; न पुनरुक्तस्वरूपमुभयलिङ्गमित्याशङ्क्याह—

प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीतिच भूयः॥ हीति - हेतौ । ३"द्वे वाव ब्रह्मणो रूपे मूर्तं चामूर्तमेवच" इत्यादिना स्थूलस्य सूक्ष्मस्य च प्रपञ्चस्य ब्रह्मणो रूपतया प्रमाणान्तराप्रज्ञातस्य अत्रैव रूपतयोपदिष्टस्य निषेधासम्भवात् प्रकृतैतावत्त्वं हि ब्रह्मणः प्रतिषेधति, पूर्वप्रकृतैतावन्मात्रं न भवति ब्रह्मेतिहि ४"अथात आदेशो नेतिनेति" इत्यत्र प्रतिपाद्यत इत्यर्थः । ततो ब्रवीति च भूयः—ततः-पूर्वोक्ताद्भूयस्त्वं ब्रवीति च वाक्यशेषः, ४"नह्येतस्मादितिनेत्यन्यत्परमस्ति अथ नामधेयं सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्यम्" इति—इति नेति निर्दिष्टादेतस्माद्ब्रह्मणोऽन्यन्नह्यस्ति; परब्रह्मणोऽन्यत्स्वरूपतो गुणतश्चोत्कृष्टं न ह्यस्तीत्यर्थः । ४"सत्यस्य सत्यम्" इति ब्रह्मणो नामधेयम् , तस्य निर्वचनम्—४"प्राणा वै सत्यं तेषामेष सत्यम्" इति । प्राणसाहचर्याज्जीवात्मानः प्राणाः । ते हि वियदादिवदनुत्पाद्यत्वेन सत्यम् । तेभ्योऽप्येष सत्यम्,ते हि कर्मानुगुणदेहयोगेन जन्मवन्तः; तदप्यस्य नास्तीति तेषामेष सत्यम् , ज्ञानसङ्कोचविकासरूपविकारस्याप्यसम्भवात् । अतः प्रमाणान्तराप्रज्ञातस्वरूपस्य ब्रह्मणो मूर्तामूर्तप्रपञ्चप्रकारतयोपदेशात् ,पुनरपि प्रकारविशेषोपदेशाच्च, ४"अथात आदेशो नेतिनेति" इति पूर्वप्रकृतेयत्ता ब्रह्मणः प्रतिषिध्यत इत्यर्थः ॥ २१ ॥

ननु च वस्तुतः प्रत्यक्षेण निर्विशेषसन्मात्रमेव गृह्यते;तदतिरिक्तं भ्रान्त्या प्रतीयमानं सविशेषरूपमनूद्य ५"नेतिनेति" इति निषिध्यत इत्यत्राह—

तदव्यक्तमाह हि ॥ ब्रह्मणः प्रमाणान्तराप्रज्ञाततां द्रढयति; तत् ब्रह्म न केनापि प्रमाणेन व्यक्तम् ; तथा आह हि श्रुतिः—६"न संदशे तिष्ठति रूप-

१. याज्ञवल्क्य. प्रायश्चित्त. अध्यात्म. १४४ ॥—२. बृ. ४-३-६ ॥—३. बृ. ४-३-१ ॥—४. बृ. ४-३-६ ॥—५. तै. ना. अम्भर्. ३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मस्य" इत्यादिका ॥ २२ ॥

अपि संराधने प्रत्यक्षानुमानाभ्याम् ॥ अपिच संराधन एवोपलभ्यते; संराधनं सम्यक्प्रीतियुक्तं भजनम्, उपासनमिति यावत्। उपासनरूपतत्प्रीणनेन विना केनापि नोपलभ्यत इति श्रुतिस्मृतिभ्यामवगम्यते। १"नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन। यमेवैष वृणुते तेन लभ्यः" २"नाहं वेदैर्न तपसा न दानेन न चेज्यया...भक्त्या त्वनन्यया शक्यः" इति हि श्रुतिस्मृती। अतः केनापि प्रमाणेनानभिव्यक्तस्वरूपत्वाद्ब्रह्मणः ३"द्वे वाव ब्रह्मणो रूपे" इत्यादिना ब्रह्मणः प्रकारतयोपदिष्टं जगदैश्वर्यं ४"नेतिनेति" इति न निषिध्यते; किन्तु प्रकृतेयत्तामात्रं तु निषिध्यते ॥ २३ ॥

प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्मण्यभ्यासात् ॥ इतश्च ज्ञानानन्दवज्जगदैश्वर्यमपि ब्रह्मणो रूपम्; येषां वामदेवादीनां संराधनरूपकर्मण्यभ्यासात्प्रकाशश्च सञ्जातः—दर्शनं सञ्जातम्; तेषां दर्शने प्रकाशादिवत् ज्ञानादेरिव जगदैश्वर्यस्याप्यवैशेष्यं प्रतीयते, ५"तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदे अहं मनुरभवं सूर्यश्च" ६"अहं कक्षीवान्" इत्यादौ ॥ २४ ॥

अतोऽनन्तेन तथा हि लिङ्गम् ॥ अतोऽनन्तेन कल्याणगुणगणेन योगो ब्रह्मणस्सिद्धः। तथा सत्युभयलिङ्गमेव ब्रह्म ॥ २५ ॥

इति वेदान्तदीपे उभयलिङ्गाधिकरणम् ॥ ५ ॥

(श्रीशारीरकमीमांसाभाष्ये अहिकुण्डलाधिकरणम् ॥ ६ ॥)

उभयव्यपदेशात्त्वहिकुण्डलवत् । ३ । २ । २६ ॥

मूर्तामूर्तात्मकस्य अचित्प्रपञ्चस्य ब्रह्मणो रूपत्वं३"द्वे वाव ब्रह्मणो रूपे" इत्यादिनोपदिश्यते। ४"अथात आदेशो नेतिनेति" इति मूर्तामूर्ताचिद्वस्तुरूपतया ब्रह्मण इयत्ता प्रतिषिध्यते। ४"नह्येतस्मादितिनेत्यन्यत्परमस्ति" इति ब्रह्मणोऽन्यदुत्कृष्टं नह्यस्तीति प्रतिपादितम्। तदुपपादनाय

१. ३. कठ. २-२३ ॥—२. गी. १३-५३, ५४॥—३. बृ. ४-३-१-६॥—४. बृ. ४-३-६॥—५. बृ. ३-४-१०॥—६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

[1]"अथ नामधेयं सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्यम्" इति प्राणशब्दनिर्दिष्टेभ्यश्चेतनेभ्योऽप्येष सत्यमिति कदाचिदपि ज्ञानादिसङ्कोचाभावादुक्तम्। तथा[2]"प्रधानक्षेत्रज्ञपतिर्गुणेशः"[3]"पतिं विश्वस्याऽत्मेश्वरं" [4] "नित्यो नित्यानां चेतनश्चेतनानाम्" इत्यादिश्रुतेश्चायमर्थोऽवगम्यते। तस्याचिद्वस्तुनो ब्रह्मरूपत्वप्रकार इदानीं चिन्त्यते, ब्रह्मणो निर्दोषत्वसिद्ध्यर्थम्—किमस्याचिद्वस्तुनो ब्रह्मरूपत्वमहिकुण्डलन्यायेन, उत प्रभाप्रभावतोरिवैकजातियोगेन, उत जीवस्येव विशेषणविशेष्यतयांशांशिभावेन—इति। इह स्थाप्यमानं विशेषणविशेष्यभावमङ्गीकृत्य [5]"प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्" [6]"तदनन्यत्वमारम्भणशब्दादिभ्यः" इत्यत्र सूक्ष्मचिदचिद्वस्तुविशिष्टाद्ब्रह्मणः स्थूलचिदचिद्वस्तुविशिष्टस्योत्पत्तिरनन्यत्वं चोक्तम्। किं युक्तम्? अहिकुण्डलवदिति; कुतः? उभयव्यपदेशात् [7]"ब्रह्मैवेदं सर्वम्" [8]"आत्मैवेदं सर्वम्" इति तादात्म्यव्यपदेशात्, [9]"हन्ताहमिमास्तिस्रो देवताः अनेन जीवेनाऽत्मनाऽनुप्रविश्य" इत्यादिभेदव्यपदेशाच्च। अहेः कुण्डलभाव*ऋजुभाववत् तस्यैव ब्रह्मणस्संस्थानविशेषा एवाचिद्वस्तूनि॥

प्रकाशाश्रयवद्वा तेजस्त्वात् । ३ । २ । २७ ॥

वाशब्दः पक्षव्यावृत्त्यर्थः; ब्रह्मस्वरूपस्यैवाचिद्रूपेणावस्थाने भेदश्रुतयो ब्रह्मणोऽपरिणामित्ववादिन्योऽपि बाधिता भवेयुः; अतो यथा तेजस्त्वेन प्रभातदाश्रययोरपि तादात्म्यम्; एवमचित्प्रपञ्चस्य ब्रह्मणो रूपत्वमित्यर्थः॥ २७॥

पूर्ववद्वा । ३ । २ । २८ ॥

वाशब्दः पक्षद्वयव्यावृत्त्यर्थः; एकस्यैव द्रव्यस्यावस्थाविशेषयोगे

---

१. बृ. ४-३-६॥—२. श्वे. ६-१६॥—३. तै. ना. ३-अनु॥—४. श्वे. ६-१३॥—५. शारी. १-४-२३॥—६. शारी. २-१-१५॥—७. बृ. ४-५-१॥—८. छा. ७-२५-२॥—९. छा. ६-३-२॥—*रज्जु. पा॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ब्रह्मस्वरूपस्यैवाचिद्द्रव्यरूपत्वादुक्तदोषादनिर्मोक्षः । अथ प्रभातदाश्रययोरिवाचिद्ब्रह्मणोर्ब्रह्मत्वजातियोगमात्रम्; एवं तर्ह्यश्वत्वगोत्ववद्ब्रह्मापीश्वरे चिदचिद्वस्तुनोश्चानुवर्तमानं सामान्यमिति सकलश्रुतिस्मृतिव्यवहारविरोधः। पूर्ववदेव[१] "अंशो नानाव्यपदेशात्" [२] "प्रकाशादिवत्तु नैवं परः" इति जीववत्पृथक्सिद्ध्यनर्हविशेषणत्वेनाचिद्वस्तुनो ब्रह्मांशत्वम् ; विशिष्टवस्त्वेकदेशत्वेनाभेदव्यवहारो मुख्यः,विशेषणविशेष्ययोः स्वरूपस्वभावभेदेन भेदव्यवहारो मुख्यः, ब्रह्मणो निर्दोषत्वं च रक्षितम् । तदेवं प्रकाशजातिगुणशरीराणां मणिव्यक्तिगुण्यात्मनः प्रत्यपृथक्सिद्धिलक्षणविशेषणतया यथांशत्वम्; तथेह जीवस्याचिद्वस्तुनश्च ब्रह्म प्रत्यंशत्वम्॥२८

प्रतिषेधाच्च । ३। २। २९॥

[३] "स वा एष महानज आत्माऽजरोऽमरः [४] "नास्य जरयैतज्जीर्यति" इत्यादिभिः ब्रह्मणोऽचिद्धर्मप्रतिषेधाच्च विशेषणविशेष्यत्वेनैवांशांशिभाव इत्यर्थः । अतस्सूक्ष्मचिदचिद्वस्तुविशिष्टं कारणभूतं ब्रह्म, स्थूलचिदचिद्वस्तुविशिष्टं कार्यभूतं ब्रह्मेति कारणात्कार्यस्यानन्यत्वम्, कारणभूतब्रह्मविज्ञानेन कार्यस्य ज्ञाततेत्यादि सर्वमुपपन्नम्; ब्रह्मणो निर्दोषत्वं च रक्षितम् । ब्रह्मणो निर्दोषत्वेन कल्याणगुणाकरत्वेनचोभयलिङ्गत्वमपि सिद्धम् ॥ २९ ॥

इति श्रीशारीरकमीमांसाभाष्ये अहिकुण्डलाधिकरणम् ॥ ६ ॥

वेदान्तसारे—उभयव्यपदेशात्त्वहिकुण्डलवत्॥[५] "आत्मैवेदं सर्वम्" [६] "अस्मान्मायी सृजते" इत्येकत्वनानात्वव्यपदेशात् अहेः कुण्डलभावादिवत् ब्रह्मस्वरूपस्यैव [७] "द्वे वाव ब्रह्मणो रूपे" इत्यादिनोक्तः पृथिव्यादिभावः ॥२६॥

प्रकाशाश्रयवद्वा तेजस्त्वात् ॥ प्रकाशतदाश्रययोर्यथा स्वरूपभेदेऽपि

---

१. शारी. २-३-४२ ॥—२. शारी.२-३-४५॥—३ बृ.६-४ २५॥—४.छा.८-१-५॥—५. छा. ७-२५-२ ॥—६. श्वे. ४-९ ॥—७. बृ. ३-३-१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तेजस्त्वयोगेन ऐक्यम् ; एवमचिद्ब्रह्मणो*ऽप्यैकजातियोगेन ॥ २७ ॥

पूर्ववद्वा ॥ वाशब्दः पक्षद्वयव्यावृत्त्यर्थः ; यथा पूर्वत्र जीवस्य प्रकाशजातिगुणशरीरवद्विशेषणतैकस्वभावतया विशिष्टैकदेशत्वेनांशत्वम् ; एवमचिद्वस्तुनोऽपि।१"आत्मैवेदं सर्वम्" इति चिदचितोरेकेनैव शब्देन ऐक्याभिधानमित्यंशत्वमप्येकरूपमिति 'पूर्ववद्वा' इत्युक्तम् । इतरपक्षयोर्ब्रह्मणस्सदोषतादि दुर्वारमित्यर्थः । २"यस्य पृथिवी शरीरम्" २"यस्यात्मा शरीरम्" इति चिदचिद्वस्तुनोरुशरीरतया तद्विशेषणस्वभावता सिद्धा ॥ २८ ॥

प्रतिषेधाच्च ॥ ३"नास्य जरयैतज्जीर्यति" इत्यादिनाऽचिद्धर्मप्रतिषेधाच्चैवम् ॥ २९ ॥

इति वेदान्तसारे अहिकुण्डलाधिकरणम् ॥ ६ ॥

वेदान्तदीपे — उभयव्यपदेशात्त्वहिकुण्डलवत् ॥ ४"द्वे वाव ब्रह्मणो रूपे" इत्यादिनोपदिष्टमचिद्वस्तुनो ब्रह्मरूपत्वं किं ब्रह्मस्वरूपस्यैवाचिद्रूपेण परिणामाद्भवति, उत परस्मिन्ब्रह्मण्यचिद्वस्तुनि चैकजातियोगात्, अथ जीववद्ब्रह्मशरीरतया ब्रह्मविशेषणत्वेनेति संशयः। भिन्नत्वाभिन्नत्वरूपोभयव्यपदेशोपपत्तये ब्रह्मैवाचिद्रूपेण परिणमत इति प्रथमः पक्षः । तथा तु सति ब्रह्मणो निर्दोषत्वादिकं बाध्येतेत्येकजातियोगेनेति द्वितीयः पक्षः । एवं सति १"आत्मैवेदं सर्वम्"५"ब्रह्मैवेदं सर्वम्" इति ब्रह्मस्वरूपस्यैव सर्वशब्दवाच्यत्वव्यपदेशबाधस्स्यात् । नह्येकैव गोव्यक्तिः 'खण्डो गौः, मुण्डो गौः, पूर्णशृङ्गो गौः' इत्यादिसर्वगोव्यक्तिवाचकशब्दैरभिधीयते । अतो जीवस्येव ब्रह्मशरीरतया ब्रह्मविशेषणत्वेनाचिद्वस्तुनोऽपि ब्रह्मांशत्वमिति सिद्धान्तः। सूत्रार्थस्तु—तुशब्दोऽवधारणे । अहेः कुण्डलभावादिवद्ब्रह्मस्वरूपस्यैवाचिद्रूपेणावस्थानम् ; कुतः ? नानात्वैकत्वोभयव्यपदेशात् ॥ २६ ॥

प्रकाशाश्रयवद्वा तेजस्त्वात् ॥ वाशब्दोऽनन्तरोक्तव्यावृत्त्यर्थः ; यथा प्रकाशतदाश्रययोः तेजस्त्वेनैकजातियोगादभिन्नत्वं, भिन्नत्वञ्च, एवमचिद्ब्रह्मणोरपि ॥ २७ ॥

---

* ऐक्यमेकजाति. पा ॥ १. छा. ७-२५-२॥—२. बृ. ५-७-३-२२॥—३. छा.८-१-५॥—४. बृ. ४-३-१॥—५. बृ. ४-५-१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पूर्ववद्वा ॥ वाशब्दः पक्षद्वयव्यावृत्त्यर्थः ; पूर्ववत्—यथा पूर्वत्र १"अंशो नानाव्यपदेशात्" २"प्रकाशादिवत्तु नैवं परः" इत्युभयव्यपदेशोपपत्तये, ब्रह्मणो निर्दोषत्वसिद्धये च प्रकाशजातिगुणशरीरवत् पृथक्सिद्ध्यनर्हविशेषणतया जीवस्य ब्रह्मांशत्वमुक्तम् ; एवमचिद्वस्तुनोऽपि । अचिद्वाचिशब्देनाप्यचिद्वस्तुविशिष्टं ब्रह्मैवाभिधेयमिति ३"आत्मैवेदं सर्वं" ४"ब्रह्मैवेदं सर्वम्" इत्यभेदव्यपदेशोपपत्तिः। विशेषणविशेष्ययोस्स्वरूपस्वभावभेदज्ञापनाय विशेषणविशेष्यौ निष्कृष्य भेदेन व्यपदेशश्चोपपद्यते।५ 'क्षरं त्वविद्या ह्यमृतं तु विद्या विद्याविद्ये ईशते यस्तु सोऽन्यः" इति ब्रह्मणो निर्दोषत्वञ्च ॥ २८ ॥

प्रतिषेधाच्च ॥ ६"स वा एष महानज आत्माऽजरोऽमरः" ७'नास्य जरयैतज्जीर्यति विजरो विमृत्युः" इत्यादिभिः ब्रह्मणोऽचिद्धर्मप्रतिषेधाच्च विशेषणविशेष्यभावेनैवांशांशिभाव इत्यर्थः ॥ २९ ॥

इति वेदान्तदीपे अहिकुण्डलाधिकरणम् ॥ ६ ॥

(श्रीशारीरकमीमांसाभाष्ये पराधिकरणम् ॥ ७ ॥)

परमतस्सेतून्मानसम्बन्धभेदव्यपदेशेभ्यः । ३ । २ । ३० ॥

इदानीमस्मात्परस्माज्जगन्निमित्तोपादानरूपपरमकारणात्परब्रह्मणः परमपि किञ्चित्तत्त्वमस्तीति कैश्चिद्धेत्वाभासैराशङ्क्य निराक्रियते,अस्योपास्यस्य निर्दोषत्वानवधिकातिशयासङ्ख्येयकल्याणगुणाकरत्वस्थेन्ने । तत्रेयमाशङ्का-यदिदं परं ब्रह्मोभयलिङ्गम् ; एतस्मान्निखिलजगत्कारणात्परमपि किञ्चित्तत्त्वमस्ति । कथम्? ८"अथ य आत्मा स सेतुर्विधृतिः" इत्यस्य परस्य सेतुत्वव्यपदेशात् । सेतुशब्दस्य च लोके कूलान्तरप्राप्तिहेतौ प्रसिद्धेरितोऽन्यदनेन प्राप्तव्यमस्तीति गम्यते। तथा ९"एतं सेतुं तीर्त्वाऽन्धस्सन्ननन्धो भवति"इति तरितव्यता चास्याभिधीयते; अतश्चान्यत्प्राप्य-

१. शारी. २-३ ४२॥—२. शारी. २-३-४५ ॥—३. छा. ७-२५-२॥—४. बृ. ४-५-१ ॥—५. श्वे. ५-१ ॥—६. बृ. ६-४-२५ ॥—७. छा. ८-१-५ ॥ —८. छा. ८-४-१ ॥—९. छा. ८-४-२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मस्ति। उन्मानव्यपदेशाच्च—उन्मितं—परिमितम् इदं परं ब्रह्म,[१]"चतुष्पाद्ब्रह्म" [२]"षोडशकलम्"इत्युन्मानव्यपदेशात्। सचायमुन्मानव्यपदेशस्तेन सेतुना प्राप्यस्यानुन्मितस्यास्तितां द्योतयति। तथा सम्बन्धव्यपदेशश्च सेतुसेतुमतोः प्रापकत्वप्राप्यत्वलक्षणो दृश्यते, [३]"अमृतस्य परं सेतुं दग्धेन्धनमिवानलम्" [४]"अमृतस्यैष सेतुः" इति। अतश्च परात्परमस्ति। भेदेन च परात्परं व्यपदिश्यते, [५]"परात्परं पुरुषमुपैति" [६]"परात्परं यन्महतो महान्तम्" इतिच। तथा [७]"तेनेदं पूर्णं पुरुषेण सर्वम्" [८]"ततो यदुत्तरतरं तदरूपमनामयम्" इति। अत एभ्यो हेतुभ्यः परस्माद्ब्रह्मणः परमपि किञ्चिदस्तीति गम्यत इति ॥ ३० ॥

(सिद्धान्तः)

एवं प्राप्तेऽभिधीयते—

सामान्यात्तु। ३। २। ३१ ॥

तुशब्दः पक्षं व्यावर्तयति; यत्तावदुक्तं सेतुव्यपदेशात्परापरमस्तीति; तन्नोपपद्यते। न ह्ययमत्र किञ्चित्प्राप्यं प्रति सेतुरुच्यते, [९] "एषां लोकानामसम्भेदाय" इति सेतुसामान्येन सर्वलोकासङ्करकरत्वश्रुतेः।सिनोति—बध्नाति स्वस्मिन् सर्वं चिदचिद्वस्तुजातमसङ्कीर्णमिति सेतुरुच्यते। [९]"एतं सेतुं तीर्त्वा" इति तरतिश्च प्राप्तिवचनः। यथा 'वेदान्तं तरति' इति ॥ ३१ ॥

बुद्ध्यर्थः पादवत्। ३। २। ३२ ॥

योऽयं [१]"चतुष्पाद्ब्रह्म"[२] "षोडशकलम्"[१०]"पादोऽस्यविश्वा भूतानि"इत्युन्मानव्यपदेशः; स बुद्ध्यर्थः—उपासनार्थः, [११]"सत्यं ज्ञानमनन्तं

१. छा. ३-१८-२ ॥—२. प्रश्न. ६-१ ॥—३. श्वे. ६-१९॥—४. मु. २-२-५ ॥—५. मु. ३-२-८ ॥—६. तै. नारा. १-५ ॥—७. श्वे. ३-९ ॥—८. श्वे. ३-१० ॥—९. छा. ८-४-१, २ ॥—१०. पुरुषसू. ॥—११. तै. आनं १. अनु. १ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ब्रह्म"इत्यादिभिर्जगत्कारणस्य ब्रह्मणोऽपरिच्छिन्नत्वावगमात्स्वत उन्मितत्वासम्भवात्।जगत्कारणत्वं हि तस्यैव श्रूयते–[१]"तस्माद्वा एतस्मादात्मन आकाशस्सम्भूतः" [२]"सोऽकामयत बहु स्यां प्रजायेयेति" इति। अतो यथा [३]"वाक्पादः प्राणः पादः चक्षुः पादो मनः पादः" इत्यादिना ब्रह्मणो वागादिपादव्यपदेश उपासनार्थः; एवमयमपि ॥ ३२ ॥

स्वयमनुन्मितस्य कथमुपासनार्थतयाऽप्युन्मानसम्भवः; तत्राह—

स्थानविशेषात्प्रकाशादिवत् । ३ । २ । ३३ ॥

प्रतिपन्नवागादिस्थानविशेषरूपोपाधिभेदात्तत्सम्बन्धितयोन्मितत्वानुसन्धानं सम्भवति; यथा प्रकाशाकाशादेर्विततस्य वातायनघटादिस्थानभेदैः परिच्छिद्यानुसन्धानसम्भव इत्यर्थः ॥ ३३ ॥

उपपत्तेश्च । ३ । २ । ३४ ॥

यदुक्तम्–[४]"अमृतस्यैषसेतुः"इति प्राप्यप्रापकसम्बन्धव्यपदेशात्प्रापकात्परं प्राप्यमस्तीति; तन्न,प्राप्यस्य परमपुरुषस्य स्वप्राप्तौ स्वस्यैवोपायत्वोपपत्तेः। [५]"नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन। यमैवष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम्" इत्यनन्योपायत्वश्रवणात् ॥ ३५ ॥

तथाऽन्यप्रतिषेधात्। ३ । २। ३५॥

यत्पुनरुक्तं–[६]"ततो यदुत्तरतरं" [७]"परात्परं पुरुषम्" [८]"अक्षरात्परतः परः" इत्यादिभेदव्यपदेशात्परात्परमस्तीति–तन्नोपपद्यते, तत्रैव ततोऽन्यस्य परस्य प्रतिषेधात्, [९]"यस्मात्परं नापरमस्ति किञ्चिद्यस्मान्नाणीयो न ज्यायोऽस्ति कश्चित्" इति। यस्मादपरं परं नास्ति कि-

१. तै. आनं १. अनु. २ ॥ —२. तै. आनं ६. अनु. २ ॥ —३ छा. ३-१८-२ ॥ —४. मु. २. २-५ ॥ —५. मु. ३.२ ३ ॥—६. श्वे. ३. अ. १० ॥—७. मु. ३ २-८ ॥—८. मु. २-१-२ ॥—९. श्वे. ३-९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्चित्—न केनापि प्रकारेण परमस्तीत्यर्थः। तथाऽन्यत्रापि [१]"न ह्येतस्मादितिनेत्यन्यत्परमस्ति" इति—इति नेति निर्दिष्टादेतस्माद्ब्रह्मणोऽन्यत्परं न ह्यस्तीत्यर्थः। तथा [२]"न तस्येशे कश्चन तस्य नाम महद्यशः" इति। तद्धि जगदुपादानकारणतयाऽनन्तरमुक्तं [३]"सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि" [२]"स आपः प्रदुधे उभे इमे" इत्यादिना। [४]"अद्भ्यस्सम्भूतो हिरण्यगर्भ इत्यष्टौ" इति च जगत्कारणं पुरुषमेनं प्रत्यभिज्ञापयति। [५]"ततो यदुत्तरतरम्" इति किमुच्यत इतिचेत्—पूर्वत्र [६]"वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात्। तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय" इति परस्य ब्रह्मणो महापुरुषस्य वेदनमेवामृतत्वसाधनम्, नान्योऽमृतत्वस्य पन्था इत्युपदिश्य तदुपपादनाय [७]"यस्मात्परं नापरमस्ति किञ्चिद्यस्मान्नाणीयो न ज्यायोऽस्ति कश्चित्।वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम्" इति पुरुषस्य परत्वं, तद्व्यतिरिक्तस्य परत्वासम्भवञ्च प्रतिपाद्य [५]"ततो यदुत्तरतरं तदरूपमनामयम्-य एतद्विदुरमृतास्ते भवन्त्यथेतरे दुःखमेवापियन्ति" इति पूर्वोक्तमर्थं हेतुतो निगमयति—यदुत्तरतरं पुरुषतत्त्वम्, तदेवारूपमनामयं यतः, ततो य एतत्पुरुषतत्त्वं विदुः, त एवामृता भवन्ति, अथेतरे दुःखमेवापियन्ति—इति। अन्यथोपक्रमविरोधोऽनन्तरोक्तिविरोधश्च। [८]"परात्परं पुरुषमुपैति दिव्यम्" इति पूर्वत्र [९]"अक्षरात्परतः परः" इति-अक्षरात्-अव्याकृतात् यः परः-समष्टिपुरुषः;तस्मात्परो योऽदृश्यत्वादिगुणकस्सर्वज्ञः परमपुरुषः, स एवेहापि 'परात्परः' इति समष्टिपुरुषात्परत्वेनोच्यते ॥ ३५ ॥

अनेन सर्वगतत्वमायामशब्दादिभ्यः।३।२।३६॥

अनेन-ब्रह्मणा, सर्वगतत्वम्-सर्वस्य जगतो व्यप्तत्वम्, आयामशब्दा-

---

१. बृ. ४-३-६॥—२. तै. नारा. १-९॥—३. तै.नारा.१-८॥—४.तै.नारा.१-११॥—५. श्वे. ३-१०॥—६. ७. श्वे. ३-८-९॥—८. मु. ३-२-८॥—९. मु. २-१-२॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दिभ्यः-सर्वव्याप्तिवाचिशब्देभ्योऽवगम्यमानमस्मात्परं नास्तीत्यवगमयति। आयामशब्दस्तावत् १"तेनेदं पूर्णं पुरुषेण सर्वम्" २"यच्च किञ्चिज्जगत्यस्मिन् दृश्यते श्रूयतेऽपि वा।अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः" ३"नित्यं विभुं सर्वगतं सुसूक्ष्मं यद्भूतयोनिं परिपश्यन्ति धीराः"। आदिशब्दात् ४"ब्रह्मैवेदं सर्वम्" ५"आत्मैवेदं सर्वम्" इत्यादयो गृह्यन्ते। अत इदं परं ब्रह्मैव सर्वस्मात्परम् ॥ ३६ ॥

इति श्रीशारीरकमीमांसाभाष्ये पराधिकरणम् ॥ ७ ॥

वेदान्तसारे—परमतस्सेतून्मानसम्बन्धभेदव्यपदेशेभ्यः ॥ ६' जन्माद्यस्य यतः" इत्यादिना ७' प्रतिषेधाच्च" इत्येतदन्तेन यत्परमकारणं ब्रह्म प्रतिपादितम् ; अतः परमपि किञ्चित्तत्त्वमस्तीति युक्त्याभासेनाशङ्क्यते। ८"अथ य आत्मा स सेतुः"८"एतं सेतुं तीर्त्वा"९"चतुष्पाद्ब्रह्म" १०"अमृतस्यैष सेतुः" इत्यादिभिरस्य ब्रह्मणः सेतुत्वतरितव्यत्वपरिमितत्वप्रापकत्वव्यपदेशेभ्यः, ११"तेनेदं पूर्णं पुरुषेण सर्वं" १२"ततो यदुत्तरतरम्" इत्येतस्मादर्थान्तरव्यपदेशाच्चान्यत्परमस्तीति ॥ ३० ॥

सामान्यात्तु ॥ तुशब्देनैतद्व्यावर्तयति ; नैतद्युक्तम् ; कुतः?१२"न ह्येतस्मादितिनेत्यन्यत्परमस्ति" इति मूर्तामूर्तप्रपञ्चप्रकारतया तद्विशिष्टात् इति नेति निर्दिष्टात् ब्रह्मणोऽन्यत्परन्नास्तीत्यादिनिषेधसहस्रात् । परस्मिन् ब्रह्मणि सेतुत्वव्यपदेशः प्रशासनात् सर्वलोकासङ्करकरत्वेन सेतुसामान्याच्चु । तथाहि—८"अथ य आत्मा स सेतुर्विधृतिरेषां लोकानामसम्भेदाय' इति। १३"सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत" इत्यारभ्य उक्तजगन्निमित्तोपादानभूतस्यैव ब्रह्मणः १३"एतमितः प्रेत्याभिसम्भविताऽस्मि" इति परमप्राप्यत्ववचनात् तरतिरपि प्राप्तिवचनः ॥ ३१ ॥

बुद्ध्यर्थः पादवत् ॥ ९"चतुष्पात्"इति उन्मानव्यपदेशोऽपि ९"वाक्पादः चक्षुः पादः" इतिवदुपासनार्थः ॥ ३२ ॥

---

१. श्वे. ३-९ ॥—२. पुरुषसूक्तम् ॥—३. मु. १-१-६ ॥—४. बृ. ४-५-१ ॥—५. छा. ७-२५-२ ॥—६. शारी. १-१-२॥—७. शारी. ३-२-२९ ॥—८. छा. ८-४-१, २ ॥—९. छा. ३-१८-२ ॥—१०. मु. २-२-५ ॥—११. श्वे. ३-१०॥—१२. बृ ४-३-६ ॥—१३. छा. ३-१४-१, ४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्थानविशेषात्प्रकाशादिवत् ॥ अपरिमितस्यापि स्थानविशेषसम्बन्धादवच्छिद्यानुसन्धानं युज्यते, प्रकाशाकाशादेरिव विततस्यापि वातायनघटादिना ॥ ३३ ॥

उपपत्तेश्च ॥ प्राप्यस्यैव परमात्मनः प्रापकत्वोपपत्तेः; यथाह—१"यमेवैष वृणुते तेन लभ्यः" इति ॥ ३४ ॥

तथाऽन्यप्रतिषेधात् ॥ २"यस्मात्परन्नापरमस्ति किञ्चिद्यस्मान्नाणीयो न ज्यायोऽस्ति कश्चित्" इत्यस्मिन्वाक्ये पुरुषादन्यस्य ज्यायस्त्वप्रतिषेधादितोऽधिकन्नास्ति । २"ततो यदुत्तरतरम्"इति तु यतः पुरुषतत्त्वादन्यदुत्कृष्टन्नास्ति ; तत उत्तरतरं पुरुषतत्त्वमेवारूपमनामयम् ; २"य एतद्विदुरमृतास्ते भवन्ति अथेतरे दुःखमेवापि यन्ति" इत्युपक्रमप्रतिज्ञातं सहेतुकमुपसंहृतम् । २"तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्थाः"इत्युपक्रमे प्रतिज्ञातम् ; अन्यथा उपक्रमविरोधश्च ॥ ३५ ॥

अनेन सर्वगतत्वमायामशब्दादिभ्यः ॥ ३" अणोरणीयान्महतो महीयान्" २"तेनेदं पूर्णं पुरुषेण सर्वम्" ४"व्याप्य नारायणस्थितः" ५"नित्यं विभुं सर्वगतं सुसूक्ष्मम्" इत्यादिशब्दैरनेन ब्रह्मणा स्वव्यतिरिक्ततत्त्वस्य व्याप्तत्वमवगतम् ; त ७ तस्मात्परं वारयति ॥ ३६ ॥

इति वेदान्तसारे पराधिकरणम् ॥ ७ ॥

वेदान्तदीपे—परमतस्सेतून्मानसम्बन्धभेदव्यपदेशेभ्यः ॥ ६" यतो वा इमानि" इत्यादिना जगज्जन्मादिकारणतया निर्दिष्टात्परस्माद्ब्रह्मणोऽपि परं तत्त्वं किञ्चिदस्ति, नेति संशयः । इतोऽपि परमस्तीति पूर्वः पक्षः। ७"अथ य आत्मा स सेतुः" इत्यस्य सेतुत्वव्यपदेशात्, ७"एतं सेतुं तीर्त्वा" इत्यस्य तरितव्यत्वोपदेशाच्चातोऽन्यदप्यस्तीति गम्यते । ८"चतुष्पाद्ब्रह्म" ९"षोडशकलम्"इति परिमितत्वव्यपदेशाच्चापरिमितमन्यदस्तीति प्रतीयते। १०"अमृतस्यैष सेतुः" इति प्रापकत्वश्रुतेश्चानेन प्राप्यमन्यदस्तीति प्राप्यप्रापकरूपसम्बन्धात्प्रतीयते । तथा २"तेनेदं पूर्णं पुरुषेण सर्वम्" २"ततो यदुत्तरतरम्" इति पुरुषशब्दनिर्दिष्टाद्ब्रह्मण उत्तरतरत्वेन भेदव्यपदेशाच्चान्यत्परमस्ति । रा-

---

१. मु. ३-२-३॥—२. श्वे. ३-९-१०-८॥—३. तै.नारा.१०-१॥—४.पुरुषसूक्ते॥—५. मु १-१-६ ॥—६. तै. भृ. १-अनु॥—७. छा. ८-४-१, २ ॥ —८. छा. ३-१८-२॥—९. प्रश्न. ६-१ ॥—१०. मु. २-२-५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्धान्तस्तु—१"न ह्येतस्मादिति नेत्यन्यत्परमस्ति" इति नेति निर्दिष्टात् मूर्तामूर्तरूपाद्ब्रह्मणोऽन्यत्परं नास्तीति परतत्त्वनिषेधात्कारणाद्ब्रह्मणोऽन्यत्परं नास्ति। सेतुत्वव्यपदेशस्तु २"एषां लोकानामसम्भेदाय" इति सर्वलोकासङ्करकरत्वकृतः। २"एतं सेतुं तीर्त्वा" इति तरतिरपि 'वेदान्तं तरति' इतिवत्प्राप्तिवचनः। ३"चतुष्पाद्ब्रह्म" ४"षोडशकलम्" इत्युन्मानव्यपदेशोऽपि ३"वाक्पादः ...चक्षुः पादः" इतिवदुपासनार्थः। सम्भवति चापरिमितस्यापि तत्तद्देशसम्बन्धितयोन्मितत्वानुसन्धानम्। ५"अमृतस्यैष सेतुः" इति स्वस्यैवामृतस्य स्वयमेव प्रापकमुच्यते, ६"यमेवैष वृणुते तेन लभ्यः"इत्यादिश्रुतेः। ७"ततो यदुत्तरतरम्" इत्यपि ७"तेनेदं पूर्णम्" इति निर्दिष्टात्पुरुषादन्यस्य न परत्वमाह; अपि तु ७"तमेवं विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय" इति पूर्वप्रतिज्ञातं पुरुषवेदनस्यामृतत्वहेतुत्वमन्यस्य चापथत्वं सहेतुकमुपसंहरति। ७"यस्मात्परं नापरमस्ति किञ्चित्" इत्यारभ्य "७तेनेदं पूर्णं पुरुषेण सर्वम्" इति पुरुषस्य सर्वस्मात्परत्वं ज्यायस्त्वमन्यस्य परत्वाभावं च प्रतिपाद्य ततो हेतोः यदुत्तरतरं पुरुषतत्त्वम्; तदेवारूपमनामयम्; ७"य एतद्विदुरमृतास्ते भवन्ति अथेतरे दुःखमेवापि यन्ति" इति पूर्वप्रतिज्ञातमेवोपसंहृतम्॥

सूत्रार्थस्तु—परमतः-८"जन्माद्यस्य यतः" इत्यारभ्य ९"अतोऽनन्तेन तथाहि लिङ्गम्" इत्यन्तेन प्रतिपादितान्निखिलजगदेककारणात्सर्वान्तरात्मनो निरस्तनिखिलदोषगन्धानवधिकातिशयानन्तकल्याणगुणाकरात्परस्माद्ब्रह्मणः परमपि किञ्चिदस्तीति कश्चिन्मन्यते। कुतः? सेतून्मानसम्बन्धभेदव्यपदेशेभ्यः। व्याख्याताश्चैते॥ ३०॥

सामान्याच्तु॥ तुशब्दः पक्षं व्यावर्तयति; सेतुत्वव्यपदेशस्तावत् तस्मात्परं नावगमयति, सेतुसामान्यात्—साद्दश्याज्जगद्विधृतिरूपात् ब्रह्मणस्तथाव्यपदेश इति श्रुतिरेव सेतुशब्दं व्याचष्टे—१०"अथ य आत्मा स सेतुर्विधृतिरेषां लोकानामसम्भेदाय" इति। यद्यत्स्वभावा लोकास्सृष्टास्तत्तत्स्वभावासङ्कराय सर्वान् लोकानयमेव सेतुवद्बिभर्तीति सेतुरित्यर्थः॥ ३१॥

बुद्ध्यर्थः पादवत्॥ ३"चतुष्पाद्ब्रह्म" ११"पादोऽस्य विश्वा भूतानि"

---

१. बृ. ४-३-६॥—२. छां. ८-४. १-२॥—३. छां. ३-१८-२॥—४. प्रश्न. ६-१॥—५. मु. २. २-५॥—६. मु. ३-२-३॥—७. श्वे. ३-अ. १०-९-८॥—८. शारी. १-१-२॥—९. शारी. ३-२-२५॥—१०. छां. ८-४. १॥—११. पुरुषसू.॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इत्युन्मानव्यपदेशस्तथाऽनुसन्धानार्थः ; १"वाक्पादः...चक्षुः पादः" इति वत् ॥ ३२ ॥

अपरिमितस्वरूपस्यानुसन्धानार्थतयापि कथं परिमितत्वमित्यत आह—

स्थानविशेषात्प्रकाशादिवत् ॥ प्रतिपन्नवागादिस्थानविशेषसम्बन्धात्तत्तत्स्थानसम्बन्धित्वेनावच्छिद्यानुसन्धानं युज्यते ; यथा प्रकाशादेर्विततस्यापि वातायनघटादौ ॥ ३३ ॥

उपपत्तेश्च ॥ २"अमृतस्यैष सेतुः" इत्यमृतस्य स्वस्य स्वयमेव प्रापक इति सेतुत्वव्यपदेशोपपत्तेश्चान्यत्परमस्तीति कल्पनं न युज्यते । ३"नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन । यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम्" इति हि श्रूयते ॥ ३४ ॥

तथाऽन्यप्रतिषेधात्॥ ४"तेनेदं पूर्णं पुरुषेण सर्वं"४"ततो यदुत्तरतरम्" इति पुरुषादन्यस्य न परत्वमाह—५"न तस्येशे कश्चन" ६"न ह्येतस्मादिति नेत्यन्यत्परमस्ति" ४"यस्मात्परं नापरमस्ति किञ्चिद्यस्मान्नाणीयो न ज्यायोऽस्ति कश्चित्" यस्मादपरं परं नास्ति किञ्चिदित्यर्थः; एवमादिषु पुरुषादन्यस्य परत्वप्रतिषेधात् । ४"ततो यदुत्तरतरम्" इति तु यतः पुरुषतत्त्वमेवोत्तरतरम् ; ततो हेतोः यदुत्तरतरं पुरुषतत्त्वम् ; तदेव ४"अरूपमनामयम्" इत्यादिना व्याख्यातम्। ४"य एतद्विदुरमृतास्ते भवन्ति"इति—४"तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यते अयनाय" इति प्रतिज्ञातमेवोपसंहृतम् । ५"न तस्येशे कश्चन तस्य नाम महद्यशः" इति च पुरुषतत्त्वमेव वदति। अनन्तरम् ७"अद्भ्यस्सम्भूतो हिरण्यगर्भ इत्यष्टौ" इति पुरुषतत्त्ववाचिनैकवाक्यत्वावगमात् ८"अम्भस्यपारे" ९"यमन्तस्समुद्रे कवयो वयन्ति" इति च प्रक्रमात् ॥ ३५ ॥

अनेन सर्वगतत्वमायामशब्दादिभ्यः॥ अनेन ब्रह्मणा सर्वस्य व्याप्तत्वं ४"तेनेदं पूर्णं पुरुषेण सर्वम्" १०"अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः" ११"नित्यं विभुं सर्वगतं सुसूक्ष्मं तद्व्ययं यद्भूतयोनिं परिपश्यन्ति धीराः" इत्यायामशब्देभ्यः—सर्वव्याप्तिवाचिशब्देभ्योऽवगम्यते । एवमवगम्यमानमेतस्मात्परं वारयतीत्यर्थः । आदिशब्दात् १२"आत्मैवेदं सर्वम्"इत्यादि-

---

१. छा. ३ १८-२॥—२. मु. २-२-५॥—३. मु ३ २-३॥—४. श्वे. ३-९,१०,८॥—५. तै.नारा. १-९ ॥—६. बृ ४-३-६ ॥—७. तै. नारा. १-११ ॥—८. तै. ना. १-१ ॥—९. तै. नारा. १-३ ॥—१०. तै. नारा. ११-२५ ॥—११. मु. १-१-६ ॥—१२. छा. ७-२५-२॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यो गृह्यन्ते। अतः १"यतो वा इमानि" इत्यादिनाऽवगतजगन्निमित्तोपादानकारणाद्ब्रह्मणोऽन्यत्परं न विद्यते ॥ ३६ ॥

इति वेदान्तदीपे पराधिकरणम् ॥ ७ ॥

(श्रीशारीरकमीमांसाभाष्ये फलाधिकरणम् ॥ ८ ॥)

फलमत उपपत्तेः । ३ । २ । ३७ ॥

उक्तमुपासिसिषोपजननार्थं जीवस्य सर्वावस्थासु सदोषत्वं, प्राप्यस्य च परमपुरुषस्य निर्दोषत्वं, कल्याणगुणाकरत्वं, सर्वस्मात्परत्वञ्च; अतः परमुपासनं विवक्षन्नुपासीनानां परस्मादेवास्मात्पुरुषात्तत्प्राप्तिरूपमपवर्गाख्यं फलमिति सम्प्रति ब्रूते। तुल्यन्यायतया शास्त्रीयमैहिकामुष्मिकमपि फलम् अत एव परस्मात्पुरुषाद्भवतीति सामान्येन 'फलमतः' इत्युच्यते। कुत एतत्? उपपत्तेः—स एव हि सर्वज्ञस्सर्वशक्तिर्महोदारो यागदानहोमादिभिरुपासनेन चाराधित ऐहिकामुष्मिकभोगजातं स्वस्वरूपावाप्तिरूपमपवर्गं च दातुमीष्टे; नह्यचेतनं कर्म क्षणध्वंसि कालान्तरभाविफलसाधनं भवितुमर्हति ॥ ३७ ॥

श्रुतत्वाच्च । ३ । २ । ३८ ॥

२"स वा एष महानज आत्माऽन्नादो वसुदानः" ३"एष ह्येवानन्दयाति" इति भोगापवर्गरूपं फलमयमेव ददातीतिहि श्रूयते ॥ ३८ ॥

सम्प्रति पूर्वपक्षमाह—

धर्म जैमिनिरत एव । ३ । २ । ३९ ॥

अत एव-उपपत्तेः,शास्त्राच्च यागदानहोमोपासनरूपधर्ममेव फलप्रदं जैमिनिराचार्यो मन्यते। लोके हि कृष्यादिकर्म, दानादिकं च कर्म सा-

---

१. तै. भृगु. १-अनु ॥—२. बृ. ६-४-२४ ॥—३. तै. आनं. ७-१ ॥—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

क्षाद्वा, परम्परयावा स्वयमेव फलसाधनं दृष्टम्; एवं वेदेऽपि यागदानहोमादीनां साक्षात्फलसाधनत्वाभावेऽपि परम्परया अपूर्वद्वारेण फलसाधनत्वमुपपद्यते। तथा [१]"यजेत स्वर्गकामः" इत्यादिशास्त्रमपि सिषाधयिषितस्वर्गस्य कर्तव्यतया यागाद्यभिदधदन्यथानुपपत्त्या अपूर्वद्वारेण फलसाधनत्वमवगमयति ॥ ३९ ॥

पूर्वं तु बादरायणो हेतुव्यपदेशात्।३।२।४०॥

तुशब्दः पक्षव्यावृत्त्यर्थः; पूर्वोक्तं परमपुरुषस्यैव फलप्रदत्वं भगवान्बादरायणो मन्यते। कुतः? हेतुव्यपदेशात्—[२]"यज-देवपूजायाम्" इति देवताराधनभूतयागाद्याराध्यभूताग्निवाय्वादिदेवतानामेव तत्तत्फलहेतुतया तस्मिंस्तस्मिन्नपि वाक्ये व्यपदेशात् [३]"वायव्यं श्वेतमा लभेत भूतिकामो वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयति"इत्यादिषुकामिनस्सिषाधयिषितफलसाधनत्वप्रकारोपदेशोऽपिविध्यपेक्षित एवेति नातत्परत्वशङ्का युक्ता।एवमपेक्षितेऽपि फलसाधनत्वप्रकारे शब्दादेवावगते सति तत्परित्यागमश्रुतापूर्वादिपरिकल्पनं च प्रामाणिका न सहन्ते।लिङादयोऽपि देवताराधनभूतयागादेः प्रकृत्यर्थस्य कर्तृव्यापारसाध्यतां व्युत्पत्तिसिद्धां शब्दानुशासनानुमतामभिदधतिः नान्यदलौकिकमिति प्रागेवोक्तम् । तदेवं [३]"वायुर्वै क्षेपिष्ठा देवता" इत्यादिशब्दाद्वाय्वादीनां फलप्रदत्वमवगम्यते।वाय्वाद्यात्मना च परमपुरुष एवाराध्यतया फलप्रदायित्वेन चावतिष्ठत इति श्रूयते [४]"इष्टापूर्ते बहुधा जातं जायमानं विश्वं बिभर्ति भुवनस्य नाभिः । तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदु चन्द्रमाः" इति । अन्तर्यामिब्राह्मणे च [५]" यो वायौ तिष्ठन्यस्य वायुश्शरीरम्"

---

१. यजुषि. २-५-५ ॥—२. धातु-भ्वादि ॥—३. यजु. २-कां. १-प्र. १-पं॥—४. तै. नारा. १-१ ॥—५. बृ. ५-७-७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

१"योऽग्नौ तिष्ठन्"१"य आदित्ये तिष्ठन्" इत्यादि श्रूयते।स्मर्यते च २"यो-यो यांयां तनुं भक्तः श्रद्धयाऽर्चितुमिच्छति। तस्यतस्याचलां श्रद्धां तामेव विदधाम्यहम्॥ स तया श्रद्धया युक्तस्तस्याराधनमीहते। लभते च ततः कामान् मयैव विहितान् हि तान्" इति, ३"अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेवच" इति। प्रभुरिति—फलप्रदायीत्यर्थः। २"देवान् देवयजो यान्ति मद्भक्ता यान्ति मामपि" ३"यान्ति मद्याजिनोऽपि माम्" इति च। लोके च कृष्यादिभिर्विचित्ररूपान् द्रव्यविशेषान् सम्पाद्य तैः राजानं भृत्यद्वारेण साक्षाद्वाऽर्चयन्ति; अर्चितश्च राजा तत्तदर्चनानुगुणं फलं प्रयच्छन् दृश्यते। वेदान्तास्त्वतिपतितसकलेतरप्रमाणसम्भावनाभूमिं निरस्तसमस्ताविद्यादिदोषगन्धं स्वाभाविकानवधिकातिशयापरिमितोदारगुणसागरं पुरुषोत्तमं प्रतिपाद्य,तदाराधनरूपाणि च यागदानहोमात्मकानि, स्तुतिनमस्कारकीर्तनार्चनध्यानानि च तदाराधनानि,आराधितात्परस्मात्पुरुषाद्भोगापवर्गरूपं फलं च, वदन्तीति सर्वं समञ्जसम्॥ ४०॥

इति श्रीशारीरकमीमांसाभाष्ये फलाधिकरणम्॥ ८॥

इति श्रीभगवद्रामानुजविरचिते शारीरकमीमांसाभाष्ये तृतीयस्याध्यायस्य द्वितीयः पादः॥ २॥

वेदान्तसारे—फलमत उपपत्तेः॥ अतः परस्माद्ब्रह्मण एव कर्मभिरुपासनेन चाराधितात् भोगापवर्गरूपफलं सिद्ध्यति; कर्म क्षणध्वंसि न कालान्तरभाविफलायालमिति सर्वज्ञात् परमकारुणिकात् फलसिद्धिरुपपद्यते॥३॥

श्रुतत्वाच्च॥ श्रुतमेव हि ४"अन्नादो वसुदानः" ५"एष ह्येवानन्दयाति" इति अस्यैव फलदायित्वम्॥ ३८॥

धर्मं जैमिनिरत एव॥ धर्ममेव अतः—उपपत्तेः, श्रुतत्वाच्च, फलप्रदायिनं जैमिनिर्मेने। उपपत्तिस्तु कृष्यादेर्मर्दनादेश्च कर्मणस्साक्षात्परम्परया-

---

१. बृ. ५-७-५, ९॥—२. गी. ७-२१,२२,२३॥—३. गी. ९-२४,२५॥—४. बृ. ६-४-२४॥—५. तै. आनं. ७-१॥—६. साधनं. पा॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वा फलसिद्धिदर्शनम् । श्रुतत्वञ्च कामिनः कर्तव्यतया कर्मविधानान्यथानुपपत्त्या कर्मैवापूर्वद्वारेण तत्तत्फलसाधनमिति निश्चयः ॥ ३९ ॥

पूर्वं तु बादरायणो हेतुव्यपदेशात् ॥ पूर्वोक्तं परमपुरुषस्यैव फलदायित्वं भगवान् बादरायणो मन्यते, १"वायव्यं श्वेतमालभेत" इत्यादिषु १"स एवैनं भूतिं गमयति" इति भगवदात्मकतया वाय्वादेः कर्मविधिष्वेव फलहेतुत्वव्यपदेशात् । वाक्यशेषस्थं विध्यपेक्षितं हि २"प्रतितिष्ठन्ति ह वा" इत्यादिषु स्वीक्रियते । ३"यो वायौ तिष्ठन्" इति हि श्रूयते ॥ ४० ॥

इति वेदान्तसारे फलाधिकरणम् ॥ ८ ॥

इति श्रीभगवद्रामानुजविरचिते श्रीवेदान्तसारे तृतीयस्याध्यायस्य द्वितीयः पादः ॥ २ ॥

वेदान्तदीपे—फलमत उपपत्तेः ॥ किं वेदोदितं यागदानहोमादिकमुपासनाख्यं च ४"यजेत"५"उपासीत" इति कामिनो मुमुक्षोश्च कर्तव्यतया श्रूयमाणं कर्मैवापूर्वद्वारेण भोगापवर्गरूपफलदम्, उत तत्तदाराधनैः प्रीतः परमपुरुष एव फलद इति संशयः । कर्मैवेति पूर्वः पक्षः, लोके मर्दनादेः कृष्यादेश्च कर्मण एव साक्षात्परम्परया वा फलप्रदत्वदर्शनात् । वेदे च ४"यजेत स्वर्गकामः" ५"आत्मानमेव लोकमुपासीत" इति कामिनो मुमुक्षोश्च कर्तव्यतया श्रूयमाणं कर्म तत्तत्फलसाधनतयाऽवगतं क्षणिकमप्यपूर्वद्वारेण भोगापवर्गरूपसर्वफलप्रदम् । राद्धान्तस्तु—कर्तव्यतयाऽवगतस्य यागादेरुपासनस्य च ६"यज देवपूजायाम्" इत्यादिनाऽवगतधात्वर्थस्वाभाव्यात्, १"वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयति" इति वाक्यशेषाच्च, ७'इष्टापूर्तं बहुधा जातं जायमानं विश्वं बिभर्ति भुवनस्य नाभिः । तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदु चन्द्रमाः" ८"स तया श्रद्धया युक्तस्तस्याराधनमीहते । लभते च ततः कामान्मयैव विहितान्हि तान्" ९"अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च" १०"स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः" ११"तत्प्रसादात्परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम्" इत्यादिश्रुतिस्मृतिभ्यश्च, परमपुरुष एव कर्मभिरुपासनेन चाराधितो भोगापवर्गरूपफलप्रदः । लोके च कृष्या-

---

१. यजु. २-कां. १-प्र. १-पं.।—२ ।।—३ बृ. ५-७-७।।—४. यजुषि. २-५-५ ।। ५. छा. १-१-१; बृ. ३-४ १५ ।।—६. धातु-भ्वादि ।। —७. तै. ना. १-६ ।।—८. गी. ७-२२ ।।—९. गी. ९-२४ ।।—१०. गी. १८-४६ ।।—११. गी. १८-६२ ।।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दिकर्मभिस्तस्यादिकमुत्पाद्य, तेन भृत्यद्वारेण साक्षाद्वा राजानमभ्यर्च्य, तत एवापेक्षितानि लभन्ते ; अतः परमपुरुष एव फलप्रदः ॥

सूत्रार्थस्तु—फलमत उपपत्तेः—अतः—परस्माद्ब्रह्मण एव कर्मभिरुपासनेन चाराधितात् भोगापवर्गरूपफलम् । कुतः ? उपपत्तेः—कर्म हि क्षणध्वंसि न कालान्तरभाविफलायालम् ; स हि सर्वज्ञस्सर्वशक्तिः परमकारुणिको महोदारः अनादिरनन्तश्च सर्वेश्वरः स्वाराधनरूपेण कर्मणा आराधितः फलप्रद इत्युपपद्यते ॥ ३७ ॥

श्रुतत्वाच्च ॥१"स वा एष महानज आत्मा अन्नादो वसुदानः"२"एष ह्येवानन्दयाति" इति भोगापवर्गरूपं फलमयमेव ददातीति हि श्रूयते ॥ ३८ ॥

धर्म जैमिनिरत एव ॥ यागादिकमुपासनात्मकं च धर्ममेव फलप्रदं जैमिनिराचार्यो मन्यते, अतएव—उपपत्तेश्श्रुतत्वाच्चेत्यर्थः । लोके कृष्यादेर्मर्दनादेश्च कर्मण एव साक्षात्परम्परया वा फलदायित्वदर्शनात् वेदेऽपि तथैव युक्तमित्युपपत्तिः । उपपद्यते चापूर्वद्वारेण साधनत्वम् । ३"यजेत स्वर्गकामः" ४"ब्रह्मविदाप्नोति परम्" इति कामिनः कर्तव्यतया कर्मविधानान्यथानुपपत्त्या कर्मैवापूर्वद्वारेण फलसाधनमित्यवगम्यते ॥ ३९ ॥

पूर्वं तु बादरायणो हेतुव्यपदेशात् ॥ तुशब्दः पक्षव्यावृत्त्यर्थः । पूर्वोक्तं परमपुरुषस्यैव फलप्रदत्वं भगवान् बादरायणो मन्यते । कुतः ? हेतुव्यपदेशात्—५"वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयति"इति वाय्वाद्यात्मना अवस्थितस्य परमपुरुषस्यैव फलप्रदत्वव्यपदेशात् । ६"यो वायौ तिष्ठन्" इति च वाय्वाद्यात्मना स एव व्यवस्थितश्श्रूयते, ७" तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदु चन्द्रमाः" इति च । तत्परित्यागेनापूर्वस्य फलसाधनत्वकल्पने श्रुतहानमश्रुतकल्पनं च । विध्यपेक्षितफलसाधनत्वप्रकारे वाक्यशेषेणावगते सति न फलसाधनत्वप्रकारकल्पनं न्याय्यम्; यथैव हि रात्रिसत्रादिष्वधिकारी न कल्प्यइत्यर्थः ॥ ४० ॥

इति वेदान्तदीपे फलाधिकरणम् ॥ ८ ॥

इति श्रीभगवद्रामानुजविरचिते श्रीवेदान्तदीपे तृतीयस्याध्यायस्य द्वितीयः पादः ॥ २ ॥

---

१. बृ. ६-४-२४ ॥—२. तै. आनं. ७-१॥—३. यजुषि. २-५-५॥—४. तै. आनं-१. अनु. १॥—५. यजु. २-कां. १-प्र. १-पं॥—६. बृ. ५-७-७ ॥—७. तै. नारा. १-७॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीमते रामानुजाय नमः.

श्रीभगवद्रामानुजविरचिते

श्रीशारीरकमीमांसाभाष्ये

(तृतीयाध्याये-तृतीयः पादः-सर्ववेदान्तप्रत्ययाधिकरणम्॥)

सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात्। ३। ३। १॥

उक्तं ब्रह्मोपासिसिषोपजननाय वक्तव्यं ब्रह्मणः फलदायित्वपर्यन्तम्; इदानीं ब्रह्मोपासनानां गुणोपसंहारविकल्पनिर्णयाय विद्याभेदचिन्ता प्रस्तूयते। प्रथमं तावदेकस्या वैश्वानरविद्यादिकायाः अनेकशाखासु श्रूयमाणायाः किमेकविद्यात्वम्, उत विद्याभेद इति चिन्त्यते। अविशेषपुनश्श्रवणस्य प्रकरणान्तरस्य च भेदकत्वाच्छाखान्तरे चोभयोरवर्जनीयत्वाद्विद्याभेद इति प्राप्तम्। अत एव [१]"तेषामेवैतां ब्रह्मविद्यां वदेत शिरोव्रतं विधिवद्यैस्तु चीर्णम्" इति शिरोव्रतवतामाथर्वणिकानामेव विद्योपदेशनियम उपपद्यते। विद्यैक्ये हि विद्याङ्गस्य शिरोव्रतस्यान्येषामपि शाखिनां प्राप्तेर्नियमो नोपपद्यते—

(सिद्धान्तः)

एवं प्राप्त उच्यते—सर्ववेदान्तप्रत्ययमेकमुपासनमिति। कुतः? चोदनाद्यविशेषात्-चोदना तावत्[२]"उपासीत"[३]"विद्यात्"इत्येवंजातीयको धात्वर्थविशेषविधिः। आदिशब्देन[४]"एकं वा संयोगरूपचोदनाख्या-

१. मु. ३-२-१० ॥—२. छा. १-१. १; बृ. ३-४-५ ॥—३. कठ. ६-१७ ॥—४. पूर्व. २-४-९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषात्" इति कर्मकाण्डशाखान्तराधिकरणसूत्रोक्तास्संयोगरूपाख्या गृह्यन्ते। एषां चोदनादीनामविशेषात् सैवेयं विद्येति शाखान्तरे प्रत्यभिज्ञायते। तथाहि—छान्दोग्यवाजसनेयकयोः [१]"वैश्वानरमुपास्ते" इति चोदना तावदेकरूपा; वेद्यैकनिरूपणीयस्वरूपस्य विदिपर्यायस्योपासेर्वेद्यभूतवैश्वानरैक्याद्रूपमप्यविशिष्टम्; आख्या च वैश्वानरविद्येत्यविशिष्टा; फलसंयोगोऽप्युभयत्रापि ब्रह्मप्राप्तिरूपोऽविशिष्टः। अत एभिः प्रत्यभिज्ञानाच्छाखान्तरेऽपि विद्यैक्यम् ॥ १ ॥

यत्तूक्तमविशेषपुनश्श्रवणात्प्रकरणान्तराच्च विधेयभेदप्रतीतेर्न विद्यैक्यमिति, तदनुभाष्य परिहरति—

भेदान्नेति चेदेकस्यामपि। ३। ३। २॥

अविशेषपुनश्श्रुत्या प्रकरणान्तराच्च विधेयभेदान्न विद्यैक्यमिति चेत्—एकस्यामपि विद्यायां प्रतिपत्तृभेदात्पुनश्श्रुतिः प्रकरणान्तरं चोपपद्यते। यत्र ह्येकस्मिन् प्रतिपत्तरि पुनश्श्रुतिः प्रकरणान्तरं च विद्यते; तत्रान्यथानुपपत्त्या विधेयभेदाद्विद्याभेदः, प्रतिपत्तृभेदे तु तत्प्रतिपत्त्यर्थतया पुनश्श्रुत्याद्युपपत्तेस्तत्र न विधेयान्तरसम्भवः ॥ २ ॥

यच्चोक्तं शिरोव्रतवतामाथर्वणिकानामेव विद्योपदेशनियमदर्शनाद्विद्याभेदः प्रतीयत इति, तत्राह—

नैतदस्ति—शिरोव्रतोपदेशनियमदर्शनं विद्याभेदं द्योतयति—इति, शिरोव्रतस्य विद्याङ्गत्वाभावात्। स्वाध्यायस्य तथात्वे हि तन्नियमः—स्वाध्यायस्य तथात्वसिद्ध्यर्थं—तज्जन्यसंस्कारभाक्त्वसिद्ध्यर्थं हि शिरोव्रतोपदेशनियमः, न विद्यायाः। कुत एतत्? [२]"नैतदचीर्णव्रतोऽधीयीत" इति तस्याध्ययनसंयोगात्; समाचारेऽधिकाराच्च—समाचाराख्ये ग्रन्थे[३]"इदमपि वेदव्रतेन व्याख्यातम्" इत्यतिदेशात्। [४]"तेषामेवैतां ब्रह्मविद्यां वदेत"

१. छां. ५-१८-१ ॥—२. मु. ३-२, ११॥—३. समाचारे॥—४. मु. ३-२,१०॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वेदविद्यामित्यर्थः । सववच्च तन्नियमः—यथाहि सवहोमास्सप्त सूर्योदयश्च-तोदनपर्यन्ता आथर्वणिकैकाग्निसम्बन्धिनस्तत्रैव भवन्ति ; न त्रेताग्निषु ॥

दर्शयति च । ३ । ३ । ३ ॥

दर्शयति च श्रुतिरुपासनस्य सर्ववेदान्तप्रत्ययत्वम्;तथाहि—छान्दोग्ये [१]"तस्मिन्यदन्तस्तदन्वेष्टव्यम्" इत्युक्त्वा [२]"किं तदत्र विद्यते यदन्वेष्टव्यम्" इति प्रश्नपूर्वकम् अपहतपाप्मत्वादिगुणाष्टकविशिष्टः परमात्मा तस्मिन्नुपास्य इत्युक्तम् ; तैत्तिरीयके तुच्छान्दोग्यस्थं प्रतिनिर्देशमुपजीव्य [३]"तत्रापि दहं गगनं विशोकस्तस्मिन्यदन्तस्तदुपासितव्यम्" इति गुणाष्टकविशिष्टस्य परमात्मन उपासनमुच्यते ; तदुभयत्र विद्यैकत्वेन गुणोपसंहारादेवोपपद्यते ॥ ३ ॥

तदेवं शाखान्तराधिकरणन्यायसिद्धं विद्यैक्यं स्थिरीकृत्य तत्प्रयोजनमाह—

उपसंहारोऽर्थाभेदाद्विधिशेषवत्समाने च ।३।३।४॥

एवं सर्ववेदान्तेषु समाने सत्युपासने वेदान्तान्तरान्नातानां गुणानां वेदान्तान्तर उपसंहारः कर्तव्यः; कुतः? विधिशेषवदर्थाभेदात्—यथैकस्मिन्वेदान्ते श्रुतो वैश्वानरदहरादिविधिशेषो गुणस्तद्विद्यासम्बन्धात्तदुपकाररूपप्रयोजनसिद्ध्यर्थमनुष्ठीयते ; तथा वेदान्तान्तरोदितोऽपि तद्विद्यासम्बन्धित्वेन तदुपकाराविशेषादुपसंहर्तव्य इत्यर्थः । चशब्दोऽवधारणे ॥ ४ ॥

इति श्रीशारीरकमीमांसाभाष्ये सर्ववेदान्तप्रत्ययाधिकरणम् ॥ १ ॥

---

१. छा. ८-१-१ ॥—२. छा. ८-१-२ ॥—३.तै. नारा. १०-२३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वेदान्तसारे—सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् ॥ सर्ववेदान्तप्रत्ययं दहराद्युपासनमेकमेव १"विद्यात्" २"उपासीत" इति कर्मविधिष्विव चोदनाफलसंयोगरूपाख्यानामविशेषात् ॥ १ ॥

भेदान्नेतिचेदेकस्यामपि ॥ अविशेषपुनश्श्रुतिर्भेदापादिकेति न विद्यैक्यमिति चेत्—विद्यैक्येऽपि शाखान्तरे प्रतिपत्तृभेदान्न भेदः ॥ २ ॥

स्वाध्यायस्य तथात्वे हि समाचारेऽधिकाराच्च सववच्च तन्नियमः॥ आथर्वणवेदे ३"तेषामेवैतां ब्रह्मविद्यां वदेत" इति शिरोव्रतवतां नियमः शिरोव्रतस्य स्वाध्यायाङ्गत्वेन, ४"नैतदचीर्णव्रतोऽधीयीत" इति तस्याध्ययनसम्बन्धावगमात्, समाचाराख्यग्रन्थे ५"इदमपि वेदव्रतेन व्याख्यातम्"इति वेदव्रतत्वावगमाच्च । ३"ब्रह्मविद्याम्" इत्यत्र ब्रह्मशब्दो वेदविषयः । यथा सवहोमास्तेषामेव, तथा शिरोव्रतमिति तत्र विद्याभेदलिङ्गम् ॥ ३ ॥

दर्शयतिच ॥ श्रुतिरेव विद्यैक्यं दर्शयति; छान्दोग्ये दहरविद्योक्तं गुणाष्टकं तैत्तिरीयके केवलं ६"तस्मिन्यदन्तः" इति वदति ॥ ४ ॥

उपसंहारोऽर्थाभेदाद्विधिशेषवत्समाने च ॥ एवं सर्वत्र विद्यैक्ये अन्यत्रोक्तानामन्यत्रोपसंहारः तद्विद्योपकाररूपार्थैक्यात्; यथैकविधिशेषतया विहिताङ्गानामिति ॥ ५ ॥

इति वेदान्तसारे सर्ववेदान्तप्रत्ययाधिकरणम् ॥ १ ॥

वेदान्तदीपे—सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् ॥ किं सर्वेषु वेदान्तेषु श्रूयमाणा दहरविद्या एकैव, उत विद्यान्तरमिति संशयः। अविशेषपुनश्श्रवणस्य प्रकरणान्तरस्य च विद्याभेदहेतुत्वात् विद्यान्तरमिति पूर्वः पक्षः। चोदनाफलसंयोगरूपाख्यानामविशेषात्, प्रतिपत्तृभेदेन पुनश्श्रवणोपपत्तेः, तत एव प्रकरणान्तरत्वाभावाच्च, विद्यैक्यमिति राद्धान्तः। विद्यासु गुणोपसंहारादिचिन्तार्थं शाखान्तराधिकरणोक्तन्यायः तत्फलं च स्थिरीकृतम्। सूत्रार्थस्तु—सर्ववेदान्तप्रत्ययमेकं दहराद्युपासनम्, कुतः? चोदनाद्यविशेषात्॥ १॥

भेदान्नेति चेदेकस्यामपि॥ अविशेषपुनश्श्रुत्या विद्याभेदावगमान्न विद्यैक्यमिति चेत्—एकस्यामपि विद्यायां शाखान्तरे प्रतिपत्तृभेदात्पुनश्श्रवण-

---

१.कठ. ६-१७ ॥—२. छा. १-१ १ ॥—३. मु. ३-२-१०॥—४. मु. ३-२-११ ॥—५. समाचारे ॥—६. छा. ८-१-१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मर्थवदिति न विद्याभेदः ॥ २ ॥

१"तेषामेवैतां ब्रह्मविद्यां वदेत शिरोव्रतं विधिवद्यैस्तु चीर्णम्" इत्याथर्वणिकानां शिरोव्रतस्य विद्योपदेशाङ्गत्वनियमदर्शनं विद्याभेदं द्योतयति, विद्यैक्ये ह्याथर्वणिकानामेवेति नियमो नोपपद्यत इत्याशङ्क्याह—

स्वाध्यायस्य तथात्वे हि समाचारेऽधिकाराच्च सववच्च तन्नियमः॥

शिरोव्रतं न विद्याङ्गम् , अपि तु स्वाध्यायस्य तथात्वेहि-स्वाध्यायस्य तज्जन्यसंस्कारभाक्त्वे हि तन्नियमः, २"नैतदचीर्णव्रतोऽधीयीत" इत्यध्ययनसम्बन्धात्, समाचाराख्ये ग्रन्थे ३"इदमपि वेदव्रतेन व्याख्यातम्' 'इति वेदव्रतत्वावगमाच्च । १"ब्रह्मविद्यां वदेत"—वेदविद्यामित्यर्थः। सववच्च तन्नियमः—यथाहि सवहोमास्सप्तसूर्यादयः शतौदनपर्यन्ता आथर्वणिकैकाग्निसम्बन्धिनः तत्रैव भवन्ति, तथेदमप्याथर्वणवेदसम्बन्धित्वेन तत्रैव भवति ॥ ३ ॥

दर्शयति च ॥ दर्शयति च श्रुतिरुपासनस्य सर्ववेदान्तप्रत्ययत्वम्; छान्दोग्ये दहरविद्यायां ४"तस्मिन्यदन्तः" इति विहितमपहतपाप्मत्वादिगुणाष्टकं तैत्तिरीयके केवलं ५"तस्मिन्यदन्तस्तदुपासितव्यम्" इत्येवोक्तम्; तदुभयत्र विद्यैकत्वे सम्भवति ॥ ४ ॥

उपसंहारोऽर्थाभेदाद्विधिशेषवत्समाने च ॥ तदेवं सर्ववेदान्तेषु दहराद्युपासने समाने-एकस्मिन् सति तत्तदुपासने वेदान्तान्तरविहितस्य गुणस्य वेदान्तान्तरे चोपसंहारः कर्तव्यः ; कुतः? अर्थाभेदात् तद्विद्याङ्गत्वेन तदुपकाराभेदात् । विधिशेषवत् —यथैकस्मिन्वेदान्ते वैश्वानरविद्यादिविधिशेषतया विहितस्य गुणस्य तदुपकारायोपसंहारः; तथा वेदान्तान्तरेऽपि तद्विद्याङ्गत्वाविशेषादुपसंहारो न्याय्यः ॥ ५ ॥

इति वेदान्तदीपे सर्ववेदान्तप्रत्ययाधिकरणम् ॥ १ ॥

श्रीशारीरकमीमांसाभाष्ये अन्यथात्वाधिकरणम् ॥२॥

अन्यथात्वं शब्दादितिचेन्नाविशेषात् । ३ । ३ । ६ ॥

एवं चोदनाद्यविशेषाद्विद्यैकत्वम्, एकत्वे च गुणोपसंहारः कर्तव्य

---

१. मु. ३-२१०॥—२. मु. ३-२-११॥—३.समाचारे ॥—४. छा. ८-१-१॥—५. तै. ना. १०-२३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इत्युक्तम्; अतः परं काश्चन विद्या अधिकृत्य प्रत्यभिज्ञाहेतुभूतचोदनाद्यविशेषोऽस्ति, नेति निरूप्य निर्णीयते। अस्त्युद्गीथविद्या वाजिनां छन्दोगानां च। वाजिनां तावत् [१]"द्वया ह प्राजापत्या देवाश्चासुराश्च" इत्यारभ्य [१]"ते ह देवा ऊचुः हन्तासुरान्यज्ञ उद्गीथेनात्ययाम" इत्युद्गीथेनासुरविध्वंसनं प्रतिज्ञायोद्गीथे वागादिमनःपर्यन्तदृष्टौ असुरैरभिभवमुक्त्वा [२]"अथ हेममासन्यं प्राणमूचुः" इत्यादिना उद्गीथे प्राणदृष्ट्या असुरपराभवमुक्त्वा [२]"भवत्यात्मना परास्य द्विषन् भ्रातृव्यो भवति य एवं वेद" इति शत्रुपराजयफलायोद्गीथे प्राणदृष्टिर्विहिता। एवं छन्दोगानामपि [३]"देवासुरा ह वै यत्र संयेतिरे" इत्यारभ्य [३]"तद्ध देवा उद्गीथमाजह्रुरनेनैनानभिहनिष्यामः" इत्युद्गीथेनासुरपराभवं प्रतिज्ञाय तद्वदेवोद्गीथे वागादिदृष्टौ दोषमभिधाय [४]"अथ ह य एवायं मुख्यः प्राणस्तमुद्गीथमुपासाञ्चक्रिरे" इत्यादिना उद्गीथे प्राणदृष्ट्या असुरपराभवमुक्त्वा [४]"यथाऽश्मानमाखणमृत्वा विध्वंसते एवं हैव स विध्वंसते य एवं विदि पापं कामयते" इति शत्रुपराभवाय उद्गीथे प्राणदृष्टिर्विहिता। वेदनविषयविधिप्रत्ययाश्रवणेऽपि फलसाधनत्वश्रवणाद्वेदनविषयो विधिः कल्प्यते। उद्गीथविद्यायाः क्रत्वर्थत्वेन क्रतुसाद्गुण्यफलत्वेऽप्यार्थवादिकमपि फलं तदविरुद्धं ग्राह्यमेवेति देवताधिकरणे प्रतिपादितम्। तत्र संशय्यते—किमत्र विद्यैक्यम्, उत नेति। किं युक्तम्? विद्यैक्यमिति। कुतः? उभयत्रोद्गीथस्यैवाध्यस्तप्राणभावस्योपास्यत्वश्रवणाच्चोदनाद्यविशेषात्। फलसंयोगस्तावच्छत्रुपरिभवरूपो न विशिष्यते। रूपमप्यध्यस्तप्राणभावोद्गीथाख्योपास्यैक्यादविशिष्टम्। चोदना च विदिधात्वर्थगताऽविशिष्टा। आख्या चोद्गीथविद्येत्यविशिष्टा। अत्र राद्धा-

---

१. बृ. ३-३-१॥—२. बृ. ३-३-७॥—३. छा-१-२-१॥—४. छा. १-२-७,८॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न्तिच्छायया परिचोद्य परिहरति—अन्यथात्वं शब्दादिति चेन्नाविशेषात्—इति। यदुक्तं विद्यैक्यमिति, तन्नोपपद्यते, रूपभेदात्; रूपान्यथात्वं हि शब्दादेव प्रतीयते; वाजसनेयके हि [१]"अथ हेममासन्यं प्राणमूचुस्त्वं न उद्गायेति तथेति तेभ्य एष प्राण उदगायत्" इत्युद्गानस्य कर्तरि प्राणदृष्ट्याऽसुरपराभवमुक्त्वा [१] "य एवं वेद" इति कर्तर्येव प्राणदृष्टिरेवंशब्दादवगम्यते। छान्दोग्ये [२] "अथ ह य एवायं मुख्यः प्राणस्तमुद्गीथमुपासाञ्चक्रिरे" इत्युद्गानस्य कर्मण्युद्गीथे प्राणदृष्ट्या असुरपराभवमुक्त्वा [२] "य एवंविदि पापं कामयते" इत्येवंशब्दात्कर्मण्येवोद्गीथे प्राणदृष्टिर्विहिता। अत एकत्र कर्तरि प्राणदृष्टिशब्दादन्यत्र कर्मणि प्राणदृष्टिशब्दाच्च रूपान्यथात्वं स्पष्टम्। रूपान्यथात्वे च विधेयभेदे सति केवलचोदनाद्यविशेषोऽकिञ्चित्कर इति विद्याभेद इतिचेत्—तन्न, अविशेषात्—अविशेषेण ह्युभयत्र उद्गीथसाधनकपरपरिभव उपक्रमे प्रतीयते; वाजसनेयके [३]"ते ह देवा ऊचुर्हन्तासुरान्यज्ञ उद्गीथेनात्याम" इत्युपक्रमे श्रूयते; छान्दोग्येऽपि [४]"तद्ध देवा उद्गीथमाजह्रुरनेनैनानभिहनिष्यामः" इति। अत उपक्रमाविरोधाय [१]"तेभ्य एष प्राण उदगायत्" इत्यध्यस्तप्राणभाव उद्गीथ उद्गानकर्मभूत एव पाकादिष्वोदनादिवत्सौकार्यातिशयविवक्षया कर्तृत्वेनोच्यते; अन्यथोपक्रमगत उद्गीथशब्दः कर्तरि लाक्षणिकः स्यात्, अतो विद्यैक्यम्॥ ६॥

(सिद्धान्तः)

इति प्राप्ते प्रचक्ष्महे—

न वा प्रकरणभेदात्परोवरीयस्त्वादिवत्। ३।३।७॥

नवेति पक्षं व्यावर्तयति; नचैतदस्ति, यद्विद्यैक्यमिति; कुतः? प्रकरणभेदात् [५]"ओमित्येतदक्षरमुद्गीथमुपासीत" इति प्रकृतमुद्गीथावय-

१. बृ. ३-३-७॥—२. छा. १-२-७, ८॥—३. बृ. ३-३-१॥—४. छा. १-२-१॥—५. छा. १-१-१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वभूतं प्रणवं प्रस्तुत्य[१] "एतस्य वा अक्षरस्योपव्याख्यानं भवति"[२] "देवासुरा हवै यत्र संयेतिरे" इत्यारभ्य [३] "अथ ह य एवायं मुख्यः प्राणस्तमुद्गीथमुपासाञ्चक्रिरे" इत्युद्गीथावयवभूतप्रणवविषयमुपासनं छन्दोगा अधीयते; वाजिनस्तु तादृशप्राचीनप्रकरणाभावात् [४] "हन्तासुरान्यज्ञ उद्गीथेनात्ययाम" इति कृत्स्नमुद्गीथं प्रस्तुत्य [५] "अथ हेममासन्यं प्राणमूचुस्त्वं न उद्गाय" इत्यादिकृत्स्नोद्गीथविषयमधीयते; अतः प्रकरणभेदेन विधेयभेदः, विधेयभेदे च रूपभेद इति न विद्यैक्यम्; किञ्च[३] "अथ ह य एवायं मुख्यः प्राणस्तमुद्गीथमुपासाञ्चक्रिरे" इति पूर्वप्रकृत उद्गीथावयवभूतः प्रणव एवाध्यस्तप्राणभावश्छन्दोगानामुपास्यः; वाजिनां तु कृत्स्नस्योद्गीथस्य कर्तोद्गाता प्राणदृष्ट्योपास्य इति। [५] "अथ हेममासन्यं प्राणमूचुस्त्वं न उद्गायेति तथेति तेभ्य एष प्राण उदगायत्" इत्युद्गातरि प्राणाध्यासं निर्दिश्य [५] "य एवं वेद" इत्युद्गातैवाध्यस्तप्राणभाव उपास्यो विधीयते; अतश्च रूपभेदः। नचोद्गातर्युपास्ये विहिते [४] "उद्गीथेनात्ययाम" इत्याख्यायिकोपक्रमविरोधश्शङ्कनीयः, उद्गातुरुपासने उद्गीथस्योद्गानकर्मभूतस्यावश्यापेक्षितत्वात्तस्यापि परपरिभवाख्यं फलं प्रति हेतुत्वात्। अतो रूपभेदाद्विद्याभेद इति चोदनाद्यविशेषेऽपि न विद्यैक्यम्। परोवरीयस्त्वादिवत्—[६] यथैकस्यामपि शाखायामुद्गीथावयवभूते प्रणवे परमात्मदृष्टिविधानसाम्येऽपि हिरण्मयपुरुषदृष्टिविधानात् परोवरीयस्त्वादिगुणविशिष्टदृष्टिविधानमर्थान्तरभूतम् ॥ ७ ॥

संज्ञातश्चेत्तदुक्तमस्ति तु तदपि । ३। ३। ८॥

उद्गीथविद्येति संज्ञैक्यात् तत्-विद्यैक्यमुक्तं चेत्—तत्-संज्ञैक्यं विधेयभेदेऽप्यस्त्येव; यथा अग्निहोत्रसंज्ञा नित्याग्निहोत्रे, कुण्डपायिनामयना-

---

१. छा. १-१-१० ॥—२. छा. १-२-१॥—३. छा. १-२-७॥—४. बृ. ३-३-१॥—५. बृ. ३-३-७ ॥—६. यथैकस्यामेव. पा ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अग्निहोत्रेच ; यथाचोद्गीथविद्येति छान्दोग्ये प्रथमप्रपाठकोदितासु बह्वीषु विद्यासु ॥ ८ ॥

व्याप्तेश्च समञ्जसम् । ३ । ३ । ९ ॥

छान्दोग्ये प्रथमप्रपाठके उत्तरास्वपि विद्यासूद्गीथावयवस्य प्रणवस्य प्रथमप्रस्तुतस्योपास्यत्वेन व्याप्तेश्च तन्मध्यगतस्य [१]"तद्ध देवा उद्गीथमाजहुः" इत्युद्गीथशब्दस्य प्रणवविषयत्वमेव समञ्जसम् । अवयवे च समुदायशब्दः 'पटो दग्धः' इत्यादिषु दृश्यते । अतश्चोद्गीथावयवभूतः प्रणव एवोद्गीथशब्दनिर्दिष्ट इति स एव प्राणदृष्ट्योपास्यश्छान्दोग्ये प्रतिपत्तव्यः। वाजसनेयके तु कृत्स्नोद्गीथविषय उद्गीथशब्द इति कृत्स्नोद्गीथस्य कर्तोद्गाता प्राणदृष्ट्योपास्य इति विद्यानानात्वं सिद्धम् ॥ ९ ॥

इति श्रीशारीरकमीमांसाभाष्ये अन्यथात्वाधिकरणम् ॥ २ ॥

पूर्वकाण्डोक्तं स्वीकृत्यात्र वक्तव्यमाह—

वेदान्तसारे—अन्यथात्वं शब्दादितिचेन्नाविशेषात् ॥ वाजिनां छन्दोगानाञ्चोद्गीथे प्राणदृष्ट्योपासनं शत्रुपरिभवफलं हि विहितम् ; तत्र विवैक्यं पूर्वपक्षं हृदि निधाय राद्धान्तच्छायया चोदयति । वाजिनां प्राणदृष्ट्योपासनमुद्गीथकर्तृविषयमितरत्र कर्मविषयमिति शब्दादेव प्रतीयते ; [२]"अथ हेममासन्यं प्राणमूचुस्त्वन्न उद्गायेति तथेति तेभ्य उदगायत्" इत्यादिनोद्गीथकर्तृविषयं वाजिनाम् ; छन्दोगानान्तु [३]"य एवायम्मुख्यः प्राणस्तमुद्गीथमुपासाञ्चक्रिरे" [४] इत्युद्गीथविषयमिति चेत्—तदिदमाह—अन्यथात्वं शब्दादितिचेदिति न, उपक्रमाविशेषात् [५]"हन्तासुरान्यज्ञ उद्गीथेनात्ययाम" इत्येकत्र, अन्यत्रापि [१]"तद्ध देवा उद्गीथमाजहुरनेनैनानभिहनिष्यामः" इति ॥ ६ ॥

न वा प्रकरणभेदात्परोवरीयस्त्वादिवत् ॥ नैवं, प्रकरणं ह्युभयत्र भिद्यते [६]"ओमित्येतदक्षरमुद्गीथमुपासीत" इत्युद्गीथावयवभूतप्रणवविषयं छ-

---

१. छा. १-२-१ ॥—२. बृ. ३-३-७ ॥—३. छा. १-२-७ ॥—४. इत्युद्गीथकर्मविषय. पा ॥—५. बृ. ३-३-१ ॥—६. छा. १-१-१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न्दोगानाम् ; १"हन्तासुरान्यज्ञ उद्गीथेनात्ययाम" इति तु वाजिनां कृत्स्नोद्गीथविषयमिति रूपभेदाद्विद्याभेदः । यथा एकस्यामपि शाखायामुद्गीथोपासने हिरण्मयपुरुषदृष्टेः परोवरीयस्त्वादिविशिष्टदृष्टिर्भिद्यते ॥ ७ ॥

संज्ञातश्चेत्तदुक्तमस्ति तु तदपि ॥ उद्गीथविद्येति संज्ञैक्याद्विद्यैक्यमुक्तञ्चेत्—विधेयभेदेऽपि संज्ञैक्यमस्त्येव ; यथा नैयमिकाग्निहोत्रे कुण्डपायिनामयनाग्निहोत्रे चेत्येवमादिषु ॥ ८ ॥

व्याप्तेश्च समञ्जसम् ॥ प्रथमप्रपाठके उपक्रमवदुत्तरास्वपि प्रणवस्योपास्यत्वव्याप्तेः मध्ये च २"उद्गीथमुपासाञ्चक्रिरे" इति प्रणवविषयत्वमेव समञ्जसम् ॥ ९ ॥

इति वेदान्तसारे अन्यथात्वाधिकरणम् ॥ २ ॥

वेदान्तदीपे—अन्यथात्वं शब्दादिति चेन्नाविशेषात्॥ अस्ति ह्युद्गीथविद्या वाजिनां छन्दोगानां च ; वाजिनां तावत् १"हन्तासुरान्यज्ञ उद्गीथेनात्ययाम" इत्यारभ्य, उद्गीथे प्राणदृष्ट्योपासनं शत्रुपरिभवफलं विहितम् ; छन्दोगानामपि ३"तद्ध देवा उद्गीथमाजह्रुरनेनैनानभिहनिष्यामः" इत्यारभ्य, उद्गीथे प्राणदृष्ट्योपासनमेव शत्रुपरिभवफलमुक्तम् । किमुभयत्र विद्यैक्यम्, उत विद्याभेद इति संशयः । चोदनाद्यविशेषाद्विद्यैक्यमिति पूर्वः पक्षः । राद्धान्तस्तु—यद्यप्युभयत्रोद्गीथे प्राणदृष्ट्योपासनमविशिष्टमुक्तम् ;तथापि छन्दोगानाम् ४"ओमित्येतदक्षरमुद्गीथमुपासीत" इति प्रकृत्य ३"उद्गीथमाजह्रुरनेनैनानभिहनिष्यामः" इत्युद्गीथावयवे प्रणवे प्राणदृष्ट्योपासनमुक्तम् ; वाजिनान्तु १"हन्तासुरान्यज्ञ उद्गीथेनात्ययाम" इत्युपक्रमादविशेषेण कृत्स्नोद्गीथे प्राणदृष्ट्योपासनमुक्तम् ।२" अथ ह य एवायं मुख्यः प्राणस्तमुद्गीथमुपासाञ्चक्रिरे" इति च्छन्दोगानामुद्गानकर्मण्युद्गीथावयवे प्रणवे प्राणदृष्टिविधानात्, वाजिनां तु ५"अथ हेममासन्यं प्राणमूचुस्त्वं न उद्गायेति तथेति तेभ्य एष प्राण उदगायत्" इति कृत्स्नोद्गीथस्य कर्तरि प्राणदृष्टिविधानाच्चोभयत्र रूपभेदाद्विद्याभेद इति ॥

सूत्रार्थस्तु—अन्यथात्वं शब्दादितिचेदिति राद्धान्तच्छायया परिचोद्य, नाविशेषादिति पूर्वपक्षी परिहरति । २"अथ ह य एवायं मुख्यः प्राणस्तमुद्गी-

१. बृ ३-३-१ ॥—२. छा. १-२-७ ॥—३. छा. १-२-१ ॥—४. छा. १-१-१ ॥—५. बृ. ३-३-७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

थमुपासाञ्चक्रिरे" १"अथ हेममासन्यं प्राणमूचुस्त्वं न उद्गायेति तथेति तेभ्य एष प्राण उदगायत्" इत्येकत्रोद्गीथे प्राणदृष्टिशब्दात्, इतरत्रोद्गातरि प्राणदृष्टिशब्दाच्च, रूपान्यथात्वमितिचेत्—न रूपभेदः; कुतः? अविशेषात्—उपक्रमे ह्यविशेषेण २"उद्गीथेनात्ययाम" ३"उद्गीथमाजह्रुरनेनैनानभिहनिष्यामः" इत्युद्गीथस्यैवोपास्यत्वप्रतीतेः। ४"त्वं न उद्गायेति तथेति तेभ्य एष प्राण उदगायत्" इति कर्मण्येवोद्गीथे कर्तृत्वमुपचर्यत इति युक्तम्; अन्यथोपक्रमविरोधस्स्यात्॥

न वा प्रकरणभेदात्परोवरीयस्त्वादिवत्॥ नचैतदस्ति—यद्रूपैक्याद्विद्यैक्यमिति; कुतः? प्रकरणभेदात्—छान्दोग्येहि ५" ओमित्येतदक्षरमुद्गीथमुपासीत" इत्युद्गीथावयवभूतं प्रणवमुपास्यं प्रकृत्य, ३ "उद्गीथमाजह्रुः" इति वचनादुद्गीथावयवभूतः प्रणव एवोद्गीथशब्देनोच्यत इत्यवगम्यते; वाजसनेयके त्वविशेषेण २"उद्गीथेनात्ययाम" इत्युपक्रमात् कृत्स्नोद्गीथ उपास्यः प्रकृतः; अत उद्गीथे प्राणदृष्ट्यविशेषेऽपि रूपभेदाद्विद्याभेदः। परोवरीयस्त्वादिवत्—यथैकस्यामपि शाखायाम् उद्गीथावयवभूते प्रणवे परमात्मदृष्टिविधानसाम्येऽपि हिरण्मयपुरुषदृष्टिविधानात्परोवरीयस्त्वादिगुणविशिष्टदृष्टिविधानमर्थान्तरमिति रूपभेदः; तद्वदत्रापि। एवं प्रकरणभेदेनोपक्रम एवैकत्रोद्गीथावयवविषयत्वेनान्यत्र कृत्स्नोद्गीथविषयत्वेन चोपासनभेदे सिद्धे सत्युपसंहारस्थं कर्मविषयं कर्तृविषयं च प्राणदृष्टिविधानं यथाश्रुतमवतिष्ठत इत्यभिप्रायः॥ ७॥

संज्ञातश्चेत्तदुक्तमस्ति तु तदपि॥ उद्गीथविद्येति संज्ञैक्यात् तत् विधेयैक्यमुक्तं चेत्-तत् संज्ञैक्यं विधेयभेदेऽपि अस्ति तु-अस्त्येवेत्यर्थः;यथा नित्याग्निहोत्रे,कुण्डपायिनामयनाग्निहोत्रेच; यथाच छान्दोग्ये प्रथमप्रपाठकोदितासु बह्वीषु विद्यासूद्गीथविद्येति संज्ञैक्यम्॥ ८॥

व्याप्तेश्च समञ्जसम्॥ प्रथमप्रपाठके उपक्रमवदुत्तरास्वप्युद्गीथविद्यासूद्गीथावयवस्य प्रणवस्यैवोपास्यत्वव्याप्तेर्मध्यगतस्य ३"तद्ध देवा उद्गीथमाजह्रुः" इत्युद्गीथशब्दस्यापि प्रणवविषयत्वमेव समञ्जसम्॥ ९॥

इति वेदान्तदीपे अन्यथात्वाधिकरणम्॥ २॥

---

१. बृ. ३-३-७॥—२. बृ. ३-३-१॥—३. छा. १-२-१॥—४. बृ. ३-३-७॥—५. छा. १-१-१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सर्वाभेदादन्यत्रेमे । ३ । ३ । १० ॥

छान्दोग्यवाजसनेयकयोः प्राणविद्या आम्नायते [१]"यो ह वै ज्येष्ठं च श्रेष्ठं च वेद ज्येष्ठश्च ह वै श्रेष्ठश्च भवति प्राणो वा व ज्येष्ठश्च श्रेष्ठश्च" इत्यादि । तत्र ज्यैष्ठ्यश्रैष्ठ्यगुणकं प्राणमुपास्यं प्रतिपाद्य वाक्चक्षुःश्रोत्र-मनस्सु वसिष्ठत्वप्रतिष्ठात्वसम्पत्त्वायतनत्वाख्यान् गुणान् प्रतिपाद्य वागादीनां देहस्य च प्राणायत्तस्थितित्वेन तदायत्ततत्तत्कार्यत्वेन च प्राणस्य श्रैष्ठ्यं प्रतिपाद्य वागादिसम्बन्धितया श्रुतान्वसिष्ठत्वादीन् गुणांश्च प्राण-सम्बन्धितया प्रतिपादयति । एवं छान्दोग्यवाजसनेयकयोर्ज्यैष्ठ्यश्रैष्ठ्य-गुणको वसिष्ठत्वादिगुणकश्च प्राण उपास्यः प्रतिपाद्यते । कौषीतकिनां तु प्राणविद्यायां तथैव ज्यैष्ठ्यश्रैष्ठ्यगुणकः प्राण उपास्यः प्रतिपादितः ; न पुनर्वसिष्ठत्वादयो वागादिसम्बन्धिनो गुणाः प्राणसम्बन्धितया प्रतिपा-दिताः। तत्र संशयः—किमत्र विद्या भिद्यते, उत नेति। किं युक्तम्? भिद्यत इति । कुतः? रूपभेदात् । यद्यप्युभयत्र प्राण एव जैष्ठ्यश्रैष्ठ्यगुणक उ-पास्यः ; तथाप्येकत्र वसिष्ठत्वादिभिरपि गुणैर्युक्तः प्राण उपास्यः प्रती-यते ; इतरत्र तु तद्विधुर इत्युपास्यरूपभेदाद्विद्याभेदः—

(सिद्धान्तः)

इति प्राप्ते ब्रूमः—सर्वाभेदादन्यत्रेमे-नात्र विद्याभेदः, अन्यत्र कौ-षीतकिनां प्राणविद्यायामपि इमे—वसिष्ठत्वादयो गुणा उपास्यास्सन्ति; कुतः? सर्वाभेदात्—प्रतिज्ञातप्राणज्यैष्ठ्यश्रैष्ठ्योपपादनप्रकारस्य सर्वस्य तत्राप्यभेदात्। तथाहि—छन्दोगवाजसनेयिनां प्राणविद्यायाम् [२]"एता ह वै देवता अहंश्रेयसे व्यूदिरे" [३]"अहंश्रेयसे विवदमानाः" इति चोपक्र-

१. छा. ५-१-१ ॥—२. छा. ५-१-६ ॥—३. बृ. ८-१-७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

म्य वागाद्येकैकापक्रमणे अन्येषां सप्राणानामिन्द्रियाणां शरीरस्य च स्थितिं तत्तत्कार्यं चाविकलं प्रतिपाद्य प्राणोत्क्रमणे सर्वेषां विशरणमकार्यकरत्वं चाभिधाय सर्वेषां प्राणाधीनस्थितित्वतदधीनकार्यत्वाभ्यां प्राणस्य ज्यैष्ठ्यमुपपादितम् । एवमुपपादितं वागादिकार्यस्य प्राणाधीनत्वम् १"अथ हैनं वागुवाच यदहं वसिष्ठोऽस्मि त्वं तद्वसिष्ठोऽसि" इत्यादिना वागादिभिरनूद्यते । कौषीतकिनां प्राणविद्यायामपि प्राणज्यैष्ठ्यश्रैष्ठ्यप्रतिपादनाय वागादिषु वसिष्ठत्वादयः प्रतिपादिताः । २"अथ हेमा देवताः प्रजापतिं पितरमेत्याब्रुवन् को वै नः श्रेष्ठः" इत्यादिना वागादिगता गुणा वागादयश्च देहश्च प्राणधीना इति प्राणस्य ज्यैष्ठ्यमुपपादितम् । वागादिभिः स्वस्वगुणानां वसिष्ठत्वादीनां प्राणाधीनत्वानुवादमात्रं तु न कृतम् । नैतावता रूपभेदः, वागादीनां वसिष्ठत्वादिगुणान्वितानां प्राणाधीनकार्यत्वोपपादनेनैव प्राणस्य वागादिवसिष्ठत्वादिगुणहेतुत्वस्य सिद्धत्वात् । तदेव हि प्राणस्य वसिष्ठत्वादिगुणयोगित्वम् ; यद्वागादिवसिष्ठत्वादिहेतुत्वम्। अतोऽत्रापि वसिष्ठत्वादिगुणयोगात्प्राणो ज्येष्ठः प्रतिपन्न इति नास्ति विद्याभेदः ॥ १० ॥

इति श्रीशारीरकमीमांसाभाष्ये सर्वाभेदाधिकरणम् ॥ ३ ॥

वेदान्तसारे—सर्वाभेदादन्यत्रेमे ॥ ३"यो ह वै ज्येष्ठश्च श्रेष्ठश्च वेद.. प्राणो वा व ज्येष्ठश्च श्रेष्ठश्च" इति वाजिनां छन्दोगानां कौषीतकिनाञ्च प्राणविद्यायां वागादिकरणग्रामस्थितेः तत्कार्यस्य च प्राणहेतुकत्वेन तिसृष्वप्येकरूपेण प्राणज्यैष्ठ्यमुपपादितम्; वागादिगतवसिष्ठत्वादिसम्बन्धित्वमपि प्राणस्योभयत्रोक्तम्; कौषीतकिनान्तु तन्नोक्तम्; तथाऽपि सर्वत्र ज्यैष्ठ्योपपादनप्रकारस्य सर्वस्याभेदाद्विद्यैक्यमिति कौषीतकिप्राणविद्यायामपि वसिष्ठत्वादय उपसंहार्याः ॥ १० ॥

इति वेदान्तसारे सर्वाभेदाधिकरणम् ॥ ३ ॥

---

१. छा. ५-१-१३ ॥—२. ॥—३. छा. ५-१-१ ॥—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वेदान्तदीपे—सर्वाभेदादन्यत्रेमे ॥ १"यो ह वै ज्यैष्ठं च श्रेष्ठं च वेद ज्येष्ठश्च ह वै श्रेष्ठश्च भवति प्राणो वा व ज्यैष्ठश्च श्रेष्ठश्च" इति छन्दोगानां वाजिनां कौषीतकिनां च प्राणविद्याऽऽम्नाता। तत्र छान्दोग्यवाजसनेयकयोस्सर्वस्यैकरूप्यात्प्राणविद्यैकैव । कौषीतकिप्राणविद्यायाश्चास्याश्च भेदोऽस्ति, उत नास्तीति संशयः। अस्ति भेद इति पूर्वःपक्षः। यद्यपि सर्वत्र ज्यैष्ठ्यश्रैष्ठ्यगुणकः प्राण एक एवोपास्यः;तथापि छन्दोगानां वाजसनेयिनां च ज्यैष्ठ्यश्रैष्ठ्यगुणकस्य प्राणस्य वागादिगतवसिष्ठत्वादिगुणसम्बन्धित्वमपि शन्दादेव प्रतीयते।कौषीतकिनां तु न तथेति रूपभेदाद्विद्याभेदः। राद्धान्तस्तु—यद्यपि कौषीतकिप्राणविद्यायां वागादिगतवसिष्ठत्वादिसम्बन्धित्वमपि प्राणस्य शन्दान्नाभिहितम् ; तथापि तत्रापि प्राणस्य ज्यैष्ठ्यश्रैष्ठ्योपपादनं वागादीनां स्थितेः तत्तत्कार्यस्य च प्राणाधीनत्वेनेत्येतदविशिष्टमिति वागादिगतवसिष्ठत्वादेरपि प्राणहेतुकत्वानुसन्धानेन विना प्राणस्य ज्यैष्ठ्यश्रैष्ठ्यानुसन्धानमनुपपन्नमिति कौषीतकिप्राणविद्यायामपि वागादिगतवसिष्ठत्वादिसम्बन्ध्येव प्राण उपास्य इति रूपाभेदाद्विद्यैक्यम् ॥

सूत्रार्थस्तु—सर्वाभेदादन्यत्रेमे—अन्यत्र - कौषीतकिप्राणविद्यायामपि,इमे वसिष्ठत्वादयस्सन्त्येव । कुतः ? सर्वाभेदात् - प्राणज्यैष्ठ्यश्रैष्ठ्योपपादनप्रकारस्य सर्वस्य तत्राप्यभेदात्। वागादीनां स्थितेः *कार्यस्य च प्राणहेतुकत्वेन हि प्राणस्य ज्यैष्ठ्यं श्रैष्ठ्यं चात्राप्युपपादितम्।अतो वागादिगतकार्यसामर्थ्यरूपवसिष्ठत्वादिसम्बन्धित्वं प्राणस्यात्राप्युक्तमेवेत्यर्थः ॥ १० ॥

इति वेदान्तदीपे सर्वाभेदाधिकरणम् ॥ ३ ॥

(श्रीशारीरकमीमांसाभाष्ये आनन्दाद्यधिकरणम् ॥ ४॥)

प्राणविद्याङ्गविषयमन्यदपि निरूपणमनन्तरमेव करिष्यते । यथा प्राणस्य वसिष्ठत्वाद्यनुसन्धानेन विना ज्यैष्ठ्यश्रैष्ठ्यानुसन्धानानुपपत्तेरनुक्तानामपि वसिष्ठत्वादीनां कौषीतकिप्राणविद्यायां प्राप्तिः; तथा ब्रह्मस्वरूपानुसन्धानं यैर्गुणैर्विना नोपपद्यते; ते ब्रह्मविद्यासु सर्वास्वप्यनुसन्धेया इत्ययमर्थः प्रतिपाद्यते—

---

१. छा. ५-१-१ ॥ *त्कार्य. पा ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आनन्दादयः प्रधानस्य । ३ । ३ । ११ ॥

अत्र ब्रह्मस्वरूपगुणानां सर्वासु परविद्यासूपसंहारोऽस्ति, नेति विचार्यते । अप्रकरणाधीतानामुपसंहारे प्रमाणाभावात्प्रकरणश्रुतानामेवोपसंहार इति ॥

(सिद्धान्तः)

एवं प्राप्ते ब्रूमः— आनन्दादयः प्रधानस्य-अभेदादिति वर्तते ; प्रधानस्य गुणिनो ब्रह्मणस्सर्वेषूपासनेष्वभेदात्,गुण्यपृथग्भावाद्गुणानां, सर्वत्रानन्दादयस्तद्गुणा उपसंहर्तव्याः ॥ ११ ॥

एवं तर्हि गुण्यपृथग्भावादेवानन्दादिवत्प्रियशिरस्त्वादयोऽपि [१]"तस्य प्रियमेव शिरः" इत्यादौ ब्रह्मगुणत्वेन श्रुतास्सर्वत्र प्रसज्येरन्; नेत्याह—

प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे । ३ । ३ । १२ ॥

ब्रह्मस्वरूपगुणानां प्राप्तावुच्यमानायां प्रियशिरस्त्वादीनामप्राप्तिः, तेषामब्रह्मगुणत्वात् ; ब्रह्मणः पुरुषविधत्वरूपणमात्रान्तर्गतत्वात्प्रियशिरस्त्वादीनाम् । अन्यथा शिरःपक्षपुच्छाद्यवयवभेदे सति ब्रह्मणोऽप्युपचयापचयौ प्रसज्येयाताम् । तथा च सति [२]"सत्य ज्ञानमनन्तं ब्रह्म" इत्यादि विरुध्यते ॥ १२ ॥

नन्वेवमेव ब्रह्मसम्बन्धिनामेवैश्वर्यगाम्भीर्यौदार्यकारुण्यादीनां गुणानामनन्तानां गुण्यपृथक्स्थितत्वमात्रेण तत्राश्रुतानामप्युपसंहारे सर्वे सर्वत्र प्रसज्येरन्, आनन्त्यादुपसंहाराशक्तिश्च; तत्राह—

इतरे त्वर्थसामान्यात् । ३ । ४ । १३ ॥

---

१. तै. भा. ५-२ ॥—२. तै. भा. १. अनु. १ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तुशब्दश्चोद्यं व्यावर्तयति ; इतरेतु - आनन्दादयः अर्थसामान्यात्सर्वत्रानुवर्तन्ते । ये त्वर्थसमानाः - अर्थस्वरूपनिरूपणधर्मत्वेनार्थप्रतीत्यनुबन्धिनः ; तेऽर्थस्वरूपवत्सर्वत्रानुवर्तन्ते । ते च गुणास्सत्यज्ञानानन्दामलत्वानन्तत्वानि । १"यतो वा इमानि" इत्यादिना जगत्कारणतयोपलक्षितं ब्रह्म २"सत्यं ज्ञानमनन्तं ब्रह्म"३"आनन्दो ब्रह्म" इत्यानन्दादिभिर्हि स्वरूपतो निरूप्यते । अत उपास्यब्रह्मस्वरूपावगमाय सर्वासु विद्यास्वानन्दादयोऽनुवर्तन्ते । ये तु निरूपितस्वरूपस्य ब्रह्मणः कारुण्यादयो गुणाः प्रतिपन्नाः;तेषां गुण्यपृथक्स्थितत्वेऽपि प्रतीत्यनुबन्धित्वाभावात्-ये यत्र श्रुताः, ते तत्रोपसंहार्याः-इति निरवद्यम् ॥ १३ ॥

यत्तूपचयापचयप्रसङ्गात्प्रियशिरस्त्वादयो ब्रह्मणः पुरुषविधत्वरूपणमात्रार्थाः ; न तु ब्रह्मगुणाः। तर्ह्यतथारूपस्य ब्रह्मणस्तथात्वेन रूपणं किमर्थं क्रियते; अतथाभूतस्य हि तथात्वरूपणे केनचित्प्रयोजनेन भवितव्यम् ; यथा ४"आत्मानं रथिनं विद्धि" इत्यादिनोपासकस्य तदुपकरणानां च रथिरथादित्वरूपणम् उपासनोपकरणभूतशरीरेन्द्रियादिवशीकरणार्थं क्रियत इत्युक्तम् । नचेह तथाविधं किञ्चिप्रयोजनं दृश्यते इति बलाद्ब्रह्मगुणत्वं प्रियशिरस्त्वादीनामभ्युपेत्यम् । तत्राह–

आध्यानाय प्रयोजनाभावात् । ३। ३। १४ ॥

प्रयोजनान्तराभावादाध्यानायायं रूपणोपदेशः क्रियते । आध्यानम् अनुचिन्तनम्, उपासनमुच्यते। २"ब्रह्मविदाप्नोति परम्" इत्यत्रोपदिष्टाध्यानरूपवेदनसिद्धये ह्यानन्दमयब्रह्मप्रतिपत्त्यर्थमानन्दमयं ब्रह्म प्रियमोदादिरूपेण विभज्य शिरःपक्षादित्वेन रूपयित्वोपदिश्यते । यथाऽन्नमयः पुरुषः अयं देहः शिरःपक्षादिभिः २"तस्येदमेव शिरः" इ-

१. तै. भृगु. १. अनु ॥---२. तै. आ. १. अनु-१ ॥ —३. तै. भृगु. ६. अनु ॥ —४. कठ. १-अ. ३-३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्यादिना बुद्धावारोप्यते; यथा च प्राणमयमनोमयविज्ञानमयाः १"तस्य प्राण एव शिरः"इत्यादिना प्राणाद्यवयवैर्बुद्धावारोप्यन्ते; एवमेभ्योऽर्थान्तरभूतस्तदन्तरात्मा आनन्दमयोऽपि प्रियमोदादिभिरेकदेशैः शिरःप्रभृतित्वेन रूपितैराध्यानाय बुद्धावारोप्यते। एवमानन्दमयोपलक्षणत्वात्प्रियशिरस्त्वादीनां न सर्वदा आनन्दमयप्रतीतावनुवर्तन्ते ॥ १४ ॥

आत्मशब्दाच्च। ३। ३। १५॥

२"अन्योऽन्तर आत्माऽऽनन्दमयः"इत्यात्मशब्देन निर्देशादात्मनश्च शिरःपक्षपुच्छासम्भवात्प्रियशिरस्त्वादयस्तस्य सुखप्रतिपत्त्यर्थं रूपणमात्रमिति गम्यते ॥ १५ ॥

ननु ३"अन्योऽन्तर आत्मा प्राणमयः" ४"अन्योऽन्तर आत्मा मनोमयः"इत्यात्मशब्दस्यानात्मस्वपि पूर्वं प्रयुक्तत्वात् २"अन्योऽन्तर आत्माऽऽनन्दमयः"इत्यात्मशब्दस्य परमात्मविषयत्वं कथं निश्चीयते?तत्राह—

आत्मगृहीतिरितरवदुत्तरात्। ३। ३। १६॥

२"अन्योऽन्तर आत्माऽऽनन्दमयः"इत्यत्रात्मशब्देन परमात्मन एव ग्रहणम्; इतरवत्—यथेरत्र५"आत्मा वा इदमेक एवाग्र आसीत् स ईक्षत लोकान्नु सृजै" इत्यादिष्वात्मशब्देन परमात्मन एव ग्रहणम्; तद्वत्। कुत एतत्? उत्तरात्- ६"सोऽकामयत बहु स्यां प्रजायेय"इत्यानन्दमयविषयादुत्तराद्वाक्यात् ॥ १६ ॥

अन्वयादिति चेत्स्यादवधारणात्। ३। ३। १७॥

पूर्वत्र प्राणमयादिष्वनात्मस्वात्मशब्दान्वयदर्शनान्नोत्तरान्निश्चेतुं शक्यत इति चेत्—स्यादवधारणात्—स्यादेव निश्चयः; कुतः? अवधारणात्

१. तै. आ. २-अनु. ३ ॥—२. तै. आन. ५-अनु. २ ॥—३. तै. आन. २-अनु. ३-२॥—४. तै. आन. ३-२॥—५. ऐतरेय. १-१-१॥—६. तै.आन. ६-२॥—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पूर्वत्रापि [१]"तस्माद्वा एतस्मादात्मन आकाशस्सम्भूतः" इति परमात्मन एव बुद्ध्याऽवधारितत्वात् अन्नमयादनन्तरे प्राणमये प्रथमं परमात्मबुद्धिरवतीर्णा;तदनन्तरं च प्राणमयादनन्तरे मनोमये;ततो विज्ञानमये; तत आनन्दमये प्रक्रान्ता परमात्मबुद्धिस्तदन्तराभावादुत्तराच्च [२]"सोऽकामयत" इति वाक्यात्प्रतिष्ठितेत्युपक्रमेऽप्यपरमात्मनि परमात्मबुद्ध्या आत्मशब्दान्वयः इति निरवद्यम् ॥ १७ ॥

इति श्रीशारीरकमीमांसाभाष्ये आनन्दाद्यधिकरणम् ॥ ४ ॥

वेदान्तसारे—आनन्दादयः प्रधानस्य ॥ अभेदादिति वर्तते; ब्रह्मस्वरूपनिरूपणान्तर्गतामलत्वज्ञानानन्दादयो गुणाः सर्वासु परविद्यासूपसंहार्याः, गुणिनो ब्रह्मणस्सर्वत्राभेदात् ॥ ११ ॥

प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे ॥ ३"तस्य प्रियमेव शिरः" इति प्रियशिरस्त्वादीनामप्राप्तिः, ब्रह्मगुणत्वाभावात्तेषाम् । शिरःपक्षादिभेदे ब्रह्मगुणे सति ब्रह्मण उपचयापचयप्रसक्तिः ॥ १२ ॥

इतरे त्वर्थसामान्यात् ॥ आनन्दादयः स्वरूपनिरूपणान्तर्गततया ब्रह्मसमाना इत्युपसंहार्या एव ॥ १३ ॥

आध्यानाय प्रयोजनाभावात् ॥ प्रियशिरस्त्वाद्युपदेशः ब्रह्मणोऽनुचिन्तनार्थः, प्रयोजनान्तराभावात् ॥ १४ ॥

आत्मशब्दाच्च ॥ ३"अन्योऽन्तर आत्माऽऽनन्दमयः" इत्यात्मशब्दाच्च शिरःपक्षादयो न ब्रह्मगुणाः ॥ १५ ॥

आत्मगृहीतिरितरवदुत्तरात् ॥ परमात्मन एवात्मशब्देन ग्रहणमिति २"सोऽकामयत बहु स्यां प्रजायेय"इत्युत्तरात् बहुभवनसङ्कल्पाभिधायिनो वाक्यादवगम्यते ; ४"आत्मा वा इदमेक एवाग्र आसीत्" इत्यात्मशब्दादिवत् ॥

अन्वयादिति चेत्स्यादवधारणात् ॥ पूर्वत्र प्राणमयादिष्वात्मशब्दान्वयात्कथमुत्तरान्निर्णय इति चेत्—१"आत्मन आकाशस्सम्भूतः" इत्यवगत-

---

१. तै.आन.१-अनु.२ ॥—२. तै. आ. ६-अनु. २ ॥—३. तै. आन-५-२ ॥—४. ऐतरेय. १-अनु. १-खं. १ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्यात्मन एव प्राणमयादिष्ववधारणात् स्यादेव परमात्मैवेति निर्णयः ॥ १७ ॥
इति वेदान्तसारे आनन्दाद्यधिकरणम् ॥ ४ ॥

वेदान्तदीपे—आनन्दादयः प्रधानस्य॥सत्यज्ञानानन्दामलत्वानन्तत्वरूपाः ब्रह्मस्वरूपनिरूपकगुणाः सर्वासु परविद्यासूपसंहर्तव्याः,उत नेति संशयः। नोपसंहर्तव्या इति पूर्वः पक्षः, अप्रकरणाधीतानामुपसंहारे प्रमाणाभावात्, ब्रह्मगुणानामसंख्येयत्वेनोपसंहाराशक्तेश्च। राद्धान्तस्तु—ज्ञानानन्दादीनां ब्रह्मस्वरूपनिरूपकगुणत्वेन तैर्विना ब्रह्मस्वरूपानुसन्धानानुपपत्तेः सर्वासूपसंहर्तव्याः—इति। सूत्रार्थस्तु—सर्वाभेदादेस्यतोऽभेदादिति वर्तते ; आनन्दादयो गुणाः सर्वासूपसंहर्तव्याः, प्रधानस्य—गुणिनो ब्रह्मणस्सर्वासु विद्याखभेदात्। सर्वासु परविद्यासु ब्रह्मैकमेवानुसन्धेयं चेत्,तैर्गुणैर्विना ब्रह्मस्वरूपानुसन्धानमशक्यम्; ते च ज्ञानानन्दादयोऽनुसन्धेया इत्यर्थः ॥ ११ ॥

प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे ॥ आनन्दादीनां प्राप्तावपि १"तस्य प्रियमेव शिरः। मोदो दक्षिणः पक्षः" इति प्रियशिरस्त्वादीनामप्राप्तिः, ब्रह्मस्वरूपगुणत्वाभावात्तेषाम्। ब्रह्मणश्शिरःपक्षादिभेदे स्वरूपे सति ब्रह्मण उपचयापचयौ प्रसज्येयाताम्। ततश्च २"सत्यं ज्ञानमनन्तं ब्रह्म" ३"आनन्दोऽजरः" इत्यादिर्विरुध्यते ॥ १२ ॥

प्रियशिरस्त्वादिभ्य आनन्दादीनां विशेषमाह—

इतरे त्वर्थसामान्यात् ॥ इतरे - आनन्दादयः अर्थसामान्यात् - ब्रह्मस्वरूपसामान्यात्सर्वास्वनुवर्तन्ते। ब्रह्मस्वरूपनिरूपरूपणधर्मत्वेन ब्रह्मस्वरूपसमाना हि ते ॥ १३ ॥

प्रियशिरस्त्वादयो ब्रह्मस्वरूपधर्मा न भवन्ति चेत्—तदभिधानं किमर्थमित्यत आह—

अध्यानाय प्रयोजनाभावात् ॥ अनुचिन्तनार्थं तदभिधानं, प्रयोजनान्तराभावात्। ४"ब्रह्मविदाप्नोति परम्" इति वेदितव्यतयोपदिष्टं ब्रह्मानन्दमयं प्रियमोदादिरूपेण विभज्य शिरःपक्षादित्वेन रूपयित्वा बुद्धावारोप्यत इत्यर्थः ॥ १४ ॥

---

१. तै. आन. ५-२ ॥—२. तै. आन. १-१ ॥ —३. कौषी. ३-९ ॥—४. तै. आन. १-अनु. १ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आत्मशब्दाच्च ॥ १"अन्योऽन्तर आत्माऽऽनन्दमयः" इत्यात्मशब्दाच्च प्रियशिरस्त्वादयो न ब्रह्मस्वरूपधर्माः; शिरःपक्षादयो हि नात्मधर्माः ॥ १५ ॥

आत्मगृहीतिरितरवदुत्तरात्॥ १"अन्योऽन्तर आत्मा" इत्यात्मशब्देन परमात्मन एव गृहीतिः—ग्रहणम् ; इतरवत् २"आत्मा वा इदमेक एवाग्र आसीत्" इत्यात्मशब्देन यथा परमात्मनो ग्रहणम्, तद्वत् । कथमिदमवगम्यते?, तदेकार्थादुत्तरात् ३"सोऽकामायत बहु स्यां प्रजायेय" इत्यादिवाक्यात् ॥१६॥

अन्वयादिति चेत्स्यादवधारणात्॥ पूर्वेषु४"अन्योऽन्तर आत्मा प्राणमयः" इत्यादिवाक्येष्वनात्मस्वप्यात्मशब्दान्वयात्कथमुत्तरवाक्यान्निर्णय इति चेत्—५"तस्माद्वा एतस्मादात्मन आकाशस्सम्भूतः" इति प्रकृतस्यात्मन एव प्राणमयादिष्वानन्दमयपर्यन्तेषु आत्मशब्देनावधारणात् स्यादेव निर्णयः। अतः प्रियशिरस्त्वादीनामनात्मधर्मत्वात्, ज्ञानानन्दादीनामात्मस्वरूपनिरूपणधर्मत्वाच्च, तेषामेव सर्वत्रोपसंहारः ॥ १७ ॥

इति वेदान्तदीपे आनन्दाद्यधिकरणम् ॥ ४ ॥

(श्रीशारीरकमीमांसाभाष्ये कार्याख्यानाधिकरणम् ॥ ५ ॥)

कार्याख्यानादपूर्वम् । ३ । ३ । १८ ॥

पूर्वप्रस्तुतप्राणविद्याशेषभूतमिदानीं चिन्त्यते । छान्दोग्यवाजसनेयकयोः ज्येष्ठं च श्रेष्ठं च प्राणमुपास्यमुक्त्वा प्राणस्य वासस्त्वेनापोऽभिधीयन्ते । छान्दोग्ये तावत् ६"स होवाच किं मे वासो भविष्यतीत्याप इति होचुस्तस्माद्वा एतदशिष्यन्तः पुरस्ताच्चोपरिष्टाच्चाद्भिः परिदधति लम्भुको ह वासो भवत्यनग्नो भवति" इति । वाजसनेयके ७"किं मे वासः" इति प्राणेन पृष्टा वागादयः ऊचुः ७"आपो वास इति तद्विद्वांसश्चोत्तिया अशिष्यन्त आचामन्त्यशित्वा चाचामन्त्येतमेव तदनमनग्नं कुर्वन्तो

---

१. तै. आन. ५-अनु. २ ॥—५. ऐतरेय. १-अ. १-खं. १॥—३. तै.आन-६-२॥—४. तै. आन. २-अनु. २ ॥—५. तै. आन. १-अनु. २ ॥—६. छा. ५-२-२ ॥—७. बृ. ८-१-१४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मन्यन्ते" [१]"तस्मादेवंविदशिष्यन्नाचामेदशित्वा चाचामेदेतमेव तदनमनग्नं कुरुते" इति। तत्र संशयः—किमत्राचमनं विधीयते, उतापां प्राणवासस्त्वानुसन्धानमिति। [१]"अशिष्यन्नाचामेदशित्वा चाचामेत्" इत्याचमने विधिप्रत्ययश्रवणात्, [१]"एतमेव तदनमनग्नं कुरुते" इति वेदने विधिप्रत्ययाभावादनग्नतासङ्कीर्तनस्य स्तुत्यर्थतयाऽन्वयोपपत्तेश्च, भोजनाङ्गस्याचमनस्य स्मृत्याचारप्राप्तत्वेन विधिप्रत्ययबलात्प्राणविद्याङ्गमाचमनानन्तरं विधीयते—

(सिद्धान्तः)

इति प्राप्ते ब्रूमः—आचमनीयानामपां प्राणस्य वासस्त्वानुसन्धानमेवेह अपूर्वम्—अप्राप्तं विधीयते, कार्याख्यानात्—अप्राप्ताख्यानात्, अप्राप्ताख्याने शब्दस्यार्थवत्त्वादित्यर्थः। एतदुक्तं भवति—[२]"किं मे वासः" [२]"आपो वासः" [३]"अद्भिः परिदधति" [१]"एतमेव तदनमनग्नं कुरुते" इत्युपक्रमोपसंहारयोर्वाक्यस्यापां प्राणवासोदृष्टिपरत्वप्रतीतेराचमनस्य स्मृत्याचारप्राप्तत्वादाचमनमनूद्याचमनीयास्वप्सु प्राणवासस्त्वानुसन्धानं विधीयते इति। अत एव च्छान्दोग्ये [३]" तस्माद्वा एतदशिष्यन्तः पुरस्ताच्चोपरिष्टाच्चाद्भिः परिदधति" इत्यद्भिः परिधानमेवोक्तम्; नाचमनम् ॥

इति श्रीशारीरकमीमांसाभाष्ये कार्याख्यानाधिकरणम् ॥ ५ ॥

वेदान्तसारे—कार्याख्यानादपूर्वम् ॥ ४" यो ह वै ज्येष्ठश्च श्रेष्ठश्च वेद" इति प्राणविद्यां विधाय अपां प्राणवासस्त्वमुक्त्वा [१]"तस्मादेवंविदशिष्यन्नाचामेदशित्वा चाचामेदेतमेव तदनमनग्नं कुरुते" इत्याचमनस्य सदाचारप्राप्तत्वादाचमनमनूद्य आचमनीयानामपां प्राणवासस्त्वानुसन्धानमप्राप्तं विधीयते इति युक्तम्, अप्राप्तस्यैव विधेयतया ख्यापनात्। अत्रानुवादसरूपो वि-

१ ॥—२. बृ. ८-१-१४ ॥ —३. छा. ५-२-२ ॥ —४. बृ. ६-१-१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

धिः कल्प्यते इत्यर्थः ॥ १८ ॥

इति वेदान्तसारे कार्याख्यानाधिकरणम् ॥ ५ ॥

वेदान्तदीपे—कार्याख्यानादपूर्वम् ॥ छान्दोग्यवाजसनेयकयोः ज्येष्ठं च श्रेष्ठं च प्राणमुपास्यं विधाय १"सहोवाच किं मे वासो भविष्यतीत्याप इति होचुः" इत्यपां प्राणस्य वासस्त्वमुक्त्वा १"तस्माद्वा एतदतिशिष्यन्तः पुरस्ताद्वोपरिष्टाद्वाद्भिः परिदधति लम्भुको ह वासो भवत्यन्नो भवति" इति च्छान्दोग्ये। वाजसनेयके चापां प्राणवासस्त्वमुक्त्वा२"तस्मादेवंविदतिशिष्यक्षाचामेदशित्वा चाचामेदेतमेव तदनमनन्नं कुरुते" इति । आचमनेन प्राणमनन्नं कुरुत इत्यर्थः । अत्राशनात्पुरस्तादुपरिष्टाच्च किमाचमनं प्राणविद्याङ्गं विधीयते, उताचमनीयानामपां प्राणवासस्त्वानुसन्धानं विधीयत इति संशयः। २"आचामेत्" इत्याचमने विधिप्रत्ययश्रवणात्, स्मृत्याचारप्राप्तादाचमनादाचमनान्तरं प्राणविद्याङ्गं विधीयत इति पूर्वः पक्षः। राद्धान्तस्तु—२"अशित्वा चाचामेत्" इत्याचमनं चात्र प्रतीयते; आचमनीयानामपां प्राणवासस्त्वानुसन्धानं च ३"आपो वासः" १"अद्भिः परिदधति" २"एतमेव तदनमनन्नं कुरुते" इति प्रतीयते । तत्राचमनं तावत् स्मृत्याचारप्राप्तम्; अपां प्राणवासस्त्वानुसन्धानमप्राप्तम् । ३ "अनन्नं कुर्वन्तो मन्यन्ते" २"अनन्नं कुरुते" इत्यनुवादसरूपं प्रतीयते । तत्राचमनान्तरकल्पनादाचमनमनूद्याचमनीयानामपां प्राणवासस्त्वानुसन्धानमप्राप्तं विधीयत इति युक्तम् । २"तदनमनन्नं कुरुते" इति ४"वचनानि त्वपूर्वत्वात्" ५"विधिर्वा स्यादपूर्वत्वात्" इति न्यायेन विधिवचनमेव भवति । सूत्रार्थस्तु—अपूर्वम् अप्राप्तमपां प्राणवासस्त्वानुसन्धानं विधेयम्, न पुनः प्राप्तमाचमनम्। कुतः ? कार्याख्यानात्—कार्यस्य अप्राप्तार्थस्याख्यानस्वभावत्वाच्छास्त्रस्येत्यर्थः ॥ १८ ॥

इति वेदान्तदीपे कार्याख्यानाधिकरणम् ॥ ५ ॥

---

१. छा. ५-२-२ ॥—२ ॥ —३. बृ. ८-१-१४ ॥—४. पूर्वमीमांसा. ३-५-२१ ॥ —५. पूर्वमीमांसा. ३-४-१२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

समान एवं चाभेदात् । ३ । ३ । १९ ॥

वाजसनेयके अग्निरहस्ये शाण्डिल्यविद्याऽऽम्नाता[१] "सत्यं ब्रह्मेत्युपासीत अथ खलु क्रतुमयोऽयं पुरुषः" इत्यारभ्य [१] "स आत्मानमुपासीत मनोमयं प्राणशरीरं भारूपं सत्यसङ्कल्पमाकाशात्मानम्" इति । तथा तस्मिन्नेव बृहदारण्यके पुनरपि शाण्डिल्यविद्याऽऽम्नायते [२] "मनोमयोऽयं पुरुषो भास्सत्यं तस्मिन्नन्तर्हृदये यथा व्रीहिर्वा यवो वा स एष सर्वस्य वशी सर्वस्येशानस्सर्वस्याधिपतिस्सर्वमिदं प्रशास्ति यदिदं किञ्च" इति। तत्र संशयः—किमत्र विद्या भिद्यते, उत नेति । संयोगचोदनाख्यानामविशेषेऽपि वशित्वाद्युपास्यगुणभेदेन रूपभेदाद्विद्याभेदः—

(सिद्धान्तः)

इति प्राप्ते उच्यते—समान एवमिति । यथाऽग्निरहस्ये मनोमयप्राणशरीरभारूपसत्यसङ्कल्पत्वगुणगणः श्रुतः; एवं बृहदारण्यकेऽपि मनोमयत्वादिके समाने सत्यधिकस्य वशित्वादेश्च सत्यसङ्कल्पत्वगुणाभेदान्न रूपभेदः; अतो विद्यैक्यम् ॥ १९ ॥

इति श्रीशारीरकमीमांसाभाष्ये समानाधिकरणम् ॥ ६ ॥

वेदान्तसारे—समान एवं चाभेदात्॥ अग्निरहस्ये बृहदारण्यके चाम्नाता शाण्डिल्यविद्या एकत्र [१] "स आत्मानमुपासीत मनोमयं प्राणशरीरं भारूपं सत्यसङ्कल्पमाकाशात्मानम्" इति । इतरत्र [२] "मनोमयोऽयं पुरुषो भास्सत्यन्तस्मिन्नन्तर्हृदये यथा व्रीहिर्वा यवो वा स एष सर्वस्य वशी सर्वस्येशानस्सर्वस्याधिपतिस्सर्वमिदं प्रशास्ति" इति । उभयत्र मनोमयत्वादिके समानेऽपि वशित्वादेस्सत्यसङ्कल्पत्वविततिरूपेणाभेदादैक्यम् ॥ १९ ॥

इति वेदान्तसारे समानाधिकरणम् ॥ ६ ॥

---

१. वाजसनेयके. अग्निरहस्ये ॥—२. बृ. ७-६-१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वेदान्तदीपे—समान एवंचाभेदात्॥ वाजसनेयके ऽग्निरहस्ये बृहदारण्यके च शाण्डिल्यविद्या ऽऽम्नाता । अग्निरहस्ये तावत् १" स आत्मानमुपासीत मनोमयं प्राणशरीरं भारूपं सत्यसङ्कल्पमाकाशात्मानम्" इति। बृहदारण्यके च २"मनोमयोऽयं पुरुषो भास्सत्यं तस्मिन्नन्तर्हृदये यथा व्रीहिर्वा यवो वा स एष सर्वस्य वशी सर्वस्येशानस्सर्वस्याधिपतिस्सर्वमिदं प्रशास्ति' इति। किमत्र विद्याभेदः, उत नेति संशयः । एकत्र सत्यसङ्कल्पत्वमधिकं श्रुतम् ; इतरत्र वशित्वादयोऽधिका इतिरूपभेदाद्विद्याभेद इति पूर्वः पक्षः। राद्धान्तस्तु —उभयत्र मनोमयत्वादिके समाने सति वशित्वादेस्सत्यसङ्कल्पत्वविततिरूपतया तेनाभेदान्न रूपभेद इति विद्यैक्यम्। सूत्रार्थस्तु—मनोमयत्वादिके समाने सति विद्यैक्यम्, एवं चाभेदात्—वशित्वादिगुणेनाप्यभेदात् ; वशित्वादिर्हि सत्यसङ्कल्पत्वविततिः॥ १९ ॥

इति वेदान्तदीपे समानाधिकरणम् ॥ ६ ॥

(श्रीशारीरकमीमांसाभाष्ये सम्बन्धाधिकरणम् ॥ ७ ॥)

सम्बन्धादेवमन्यत्रापि । ३ । ३ । २० ॥

बृहदारण्यके श्रूयते-३"सत्यं ब्रह्म" इत्युपक्रम्य ४"तद्यत्सत्यमसौ स आदित्यो य एषएतस्मिन् मण्डले पुरुषोयश्चायं दक्षिणेऽक्षिन्" इत्युपक्रम्य आदित्यमण्डलेऽक्षणि च सत्यस्य ब्रह्मणो व्याहृतिशरीरत्वेनोपास्यत्वमुक्त्वा ५ "तस्योपनिषदहरित्यधिदैवतम्" ५ "तस्योपनिषदहमित्यध्यात्मम्" इति द्वे उपनिषदौ—रहस्यनामनी उपासनशेषतयाऽम्नायेते; ते किं यथाश्रुतस्थानविशेषनियतत्वेन व्यवस्थिते, उतोभयत्रोभे अनियमेनेति संशये सत्यस्य व्याहृतिशरीरस्यैवोपास्यस्य ब्रह्मणो द्वयोः स्थानयोस्सम्बन्धादुपास्यैक्येन रूपाभेदात्संयोगाद्यभेदाच्च विद्यैक्यादनियमेने-

---

१. ॥—२. बृ. ७-६-१ ॥—३. बृ.७-४-२॥—४. बृ. ७-५-१॥ —५. बृ. ७-५-३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ति प्राप्तम् । तदिदमुच्यते—सम्बन्धादेवमन्यत्रापीति । यथा मनोमयत्वादिगुणविशिष्टस्यैकत्वादुपास्यैक्येन रूपाभेदाद्विद्यैक्याद्गुणोपसंहारः ; एवमन्यत्राक्ष्यादित्यसम्बन्धिनो ब्रह्मणस्सत्यस्यैकत्वेन विद्यैक्यादुभयोरुभयत्रोपसंहारः ॥ २० ॥

(सिद्धान्तः)

एवं प्राप्ते प्रचक्ष्महे—

न वा विशेषात् । ३ । ३ । २१ ॥

न वैतदस्ति—यद्विद्यैक्यादुपसंहारः—इति । कुतः ? विशेषात्—उपास्यरूपविशेषात् । ब्रह्मण एकत्वेऽप्येकत्रादित्यमण्डलस्थतया उपास्यत्वम् , इतरत्राक्ष्याधारतयोपास्यत्वमिति स्थानसम्बन्धित्वभेदेन रूपभेदाद्विद्याभेदः । नैवं शाण्डिल्यविद्यायाः उपास्यस्थानं भिद्यते, उभयत्र हृदयाधारत्वेनोपास्यत्वात् । अतो व्यवस्थिते इति ॥ २१ ॥

दर्शयति च । ३ । ३ । २२ ॥

दर्शयति चाक्ष्याधारादित्याधारयोर्गुणानुपसंहारं [१]"तस्यैतस्य तदेव रूपं यदमुष्य रूपम्" इत्यादिना रूपाद्यतिदेशेन । स्वतो ह्यप्राप्तावतिदेशेन प्राप्त्यपेक्षा ॥ २२ ॥

इति श्रीशारीरकमीमांसाभाष्ये सम्बन्धाधिकरणम् ॥ ७ ॥

वेदान्तसारे—सम्बन्धादेवमन्यत्रापि ॥ २"य एष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेऽक्षिन्" इत्युपक्रम्य सत्यस्य ब्रह्मणः आदित्यमण्डले अक्षणि चोपास्यत्वमुक्त्वा, [२]"तस्योपनिषदहरित्यधिदैवतम्" [३]"तस्योपनिषदहमित्यध्यात्मम्" इति द्वे नामनी आम्नायेते ; उभयत्रैकस्यैवोपास्यस्य सम्बन्धाक्यमित्युभयत्रोभे नामनी ॥ २० ॥

न वा विशेषात् ॥ नैतत् , आदित्याक्षिस्थानसंबन्धभेदादुपास्यस्य विद्याभेद इति तत्र नियते नामनी ॥ २१ ॥

---

१. छा. १-७-५ ॥—२. ह. ७-५-१ ॥—३. ह. ७-५-३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दर्शयतिच ॥ दर्शयति च श्रुतिर्विद्याभेदम् १"तस्यैतस्य तदेव रूपं यदमुष्य रूपम्" इति रूपातिदेशं ब्रुवती ॥ २२ ॥

इति वेदान्तसारे सम्बन्धाधिकरणम् ॥ ७ ॥

वेदान्तदीपे—सम्बन्धादेवमन्यत्रापि ॥ बृहदारण्यके—२"य एष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेऽक्षिन्" इत्युपक्रम्य आदित्यमण्डलेऽक्षणि च सत्यस्य ब्रह्मणो व्याहृतिशरीरत्वेनोपास्यत्वमुक्त्वा, ३"तस्योपनिषदहरित्यधिदैवतम्" ३"तस्योपनिषदहमित्यध्यात्मम्" इति द्वे रहस्यनामनी उपासनशेषतयाऽम्नायेते । ते किं यथाश्रुतस्थाननियते, उतोभयत्रोभे इति संशयः । उभयोस्स्थानयोरेकरूपस्यैवोपास्यत्वाद्विद्यैक्यमित्यनियते नामनी इति पूर्वःपक्षः। अक्ष्यादित्यस्थानसम्बन्धित्वरूपाकारभेदाद्रूपभेद इति विद्याभेदात् द्वे नामनी नियते इति राद्धान्तः । सूत्रार्थस्तु—यथा मनोमयत्वादिगुणविशिष्टस्यैकस्यैवोपास्यत्वेनोभयत्र विद्यैक्यम् ; एवमन्यत्राक्ष्यादित्याधारस्याप्येकस्यैव सत्यस्य ब्रह्मणस्स्थानद्वयसम्बन्धान्न रूपभेद इति विद्यैक्यात् द्वे नामनी अनियते ॥ २० ॥

न वा विशेषात् ॥ नचैतदस्ति—यद्विद्यैक्यादुभयत्रोभे नामनी अनियते इति । कुतः? विशेषात् । उभयत्र हि रूपं विशिष्यते, एकत्रादित्यस्थानसम्बन्धि, इतरत्राक्षिस्थानसम्बन्धि ब्रह्मेति रूपभेदाद्विद्याभेद इति नियते नामनी ॥ २१ ॥

दर्शयति च ॥ दर्शयति च श्रुतिर्विद्याभेदेन गुणानुपसंहारं १"तस्यैतस्य तदेव रूपं यदमुष्य रूपम्" इत्यादिना रूपाद्यतिदेशेन । स्वतो ह्यप्राप्तावतिदेशेन प्राप्तयपेक्षा ॥ २२ ॥

इति वेदान्तदीपे सम्बन्धाधिकरणम् ॥ ७ ॥

(श्रीशारीरकमीमांसाभाष्ये सम्भृत्यधिकरणम् ॥ ८ ॥)

सम्भृतिद्युव्याप्त्यपि चातः । ३ । ३ । २३ ॥

१. छा. १-७-५ ॥—२. बृ. ७-५-१ ॥—३. बृ. ७-५-२, ३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तैत्तिरीयके नारायणीयानां खिलेषु च १"ब्रह्म ज्येष्ठा वीर्या सम्भृतानि ब्रह्माग्रे ज्येष्ठं दिवमाततान। ब्रह्म भूतानां प्रथमोऽत जज्ञे तेनार्हति ब्रह्मणा स्पर्धितुं कः" इति ब्रह्मणि ज्येष्ठानां वीर्याणां सम्भृतिः, द्युव्याप्तिश्चेत्यादिगुणजातमाम्नातम्। तेषामुपासनविशेषमनारभ्याधीतानां गुणानां सर्वासु विद्यासूपसंहारे प्राप्त उच्यते—

—●●◆◆(सिद्धान्तः.)◆◆●●—

सम्भृतिद्युव्याप्त्यपि—इति। सम्भृतिद्युव्याप्तीति समाहारद्वन्द्वत्वादेकवद्भावः। सम्भृत्यादिकमनारभ्याधीतमपि अत एव स्थानभेदाद्व्यवस्थाप्यम्; न सर्वत्रोपसंहर्तव्यम्। कथमनारभ्याधीतानां स्थानविशेषनियतत्वम्; स्वसामर्थ्यादिति ब्रूमः। द्युव्याप्तिस्तावद्धृदयाद्यल्पस्थानगोचरासु विद्यासु नोपसंहर्तुं शक्या; सम्भृत्यादयोऽपि तत्सहचारिणस्तत्तुल्यदेशा इत्यल्पस्थानविषयासु विद्यास्वनुपसंहार्याः। शाण्डिल्यदहरादिविद्यास्वल्पस्थानविषयासु २"ज्यायान् पृथिव्याः" ३"यावान्वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाशः" इत्यादयस्तत्तत्राशक्योपसंहाराः मनोमयत्वापहतपाप्मत्वादिविशिष्टस्योपास्यस्य माहात्म्यप्रतिपादनपराः॥

इति श्रीशारीरकमीमांसाभाष्ये सम्भृत्यधिकरणम् ॥ ८ ॥

वेदान्तसारे—सम्भृतिद्युव्याप्त्यपि चातः॥ १"ब्रह्म ज्येष्ठा वीर्या संभृतानि ब्रह्माग्रे ज्येष्ठन्दिवमाततान" इत्यादिज्येष्ठानां वीर्याणां ब्रह्मणि संभृतिः द्युव्याप्तिश्च ब्रह्मण इत्येतदनारभ्याधीतमपि न सर्वोपासनशेषभूतम्; अतो द्युव्याप्तिसामर्थ्यादल्पस्थानव्यतिरिक्तेषूपासनेषु प्राप्नोति। संभृत्याद्यपि द्युव्याप्तिसहपठितं तत्रैव ॥ २३ ॥

इति वेदान्तसारे सम्भृत्यधिकरणम् ॥ ८ ॥

---

१. ॥—२. छा. ३-१४-३ ॥—३. छा. ८-१-३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वेदान्तदीपे-सम्भृतिद्युव्याप्त्यपि चातः॥तैत्तिरीयके नारायणीयानां खिलेषु च १"ब्रह्म ज्येष्ठा वीर्या सम्भृतानि ब्रह्माग्रे ज्येष्ठं दिवमाततान ब्रह्मभूतानां प्रथमोत जज्ञे तेनार्हति ब्रह्मणा स्पर्धितुं कः" इति ब्रह्मणि ज्येष्ठानां गुणानां सम्भृतिर्द्युव्याप्तिश्चेत्यादिगुणजातमाम्नातम्।किमेषां सर्वासु विद्यासूपसंहारः,उत स्थानविशेषोपासनेषु नियम इति संशयः।अनारभ्याधीतत्वादेषां सर्वासूपसंहारः—इति पूर्वः पक्षः। राद्धान्तस्तु-यद्यपि न स्थानविशेषसम्बन्ध्युपासनमारभ्याधीता एते ; तथापि द्युव्याप्तिसामर्थ्यात्तस्य हृदयाद्यल्पस्थानेषूपसंहारायोगात् तत्साहचर्याच्चेतरेषामल्पस्थानविहितासु विद्यासु नोपसंहारः—इति।सूत्रार्थस्तु—सम्भृतिद्युव्याप्तीति—समाहार२द्वन्द्वैकवद्भावः । सम्भृतिप्रभृतिगुणजातमप्यत एव स्थानविशेषसम्बन्धनियमान्नियतम् ; न सर्वत्रोपसंहार्यम् । द्युव्याप्तिर्हि स्वसामर्थ्याद्वल्पस्थानानर्हतया तादितरस्थाननियता । सम्भृत्याद्यपि तत्साहचर्यात्तथैव ॥ २३ ॥

इति वेदान्तदीपे सम्भृत्यधिकरणम् ॥ ८ ॥

(श्रीशारीरकमीमांसाभाष्ये पुरुषविद्याधिकरणम् ॥ ९ ॥)

पुरुषविद्यायामपि चेतरेषामनाम्नानात् ।३।३।२४॥

तैत्तिरीयके पुरुषविद्याऽऽम्नायते ३"तस्यैवंविदुषो यज्ञस्याऽत्मा यजमानश्श्रद्धा पत्नी शरीरमिध्ममुरो वेदिर्लोमानि बर्हिः" इत्यादिका । छान्दोग्येऽपि पुरुषविद्याऽऽम्नायते ४"पुरुषो वाव यज्ञस्तस्य यानि चतुर्विंशतिवर्षाणि" इत्यादिका । तत्र संशयः-किमत्र विद्या भिद्यते, उत नेति । पुरुषविद्येति नामैक्यात्पुरुषावयवेषु यज्ञावयवकल्पनसाम्येन रूपैक्यात् तैत्तिरीयके फलसंयोगाश्रवणात् ५"प्र ह षोडशं वर्षशतं जीव-

---

१. यजु. २. अष्ट. ४-प्रश्न. ७-अनु॥—२. द्वन्द्वैनैकवद्भावः. पा॥—३. तै. नारायण. ५२-अनु॥—४. छा. ३-१६-१॥—५. छा. ३-१६-७॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ति" इति च्छान्दोग्ये श्रुतस्यैव पुरुषविद्याफलत्वात्फलसंयोगस्याप्यविशेषाद्विद्यैक्यम् ॥

(सिद्धान्तः)

इति प्राप्ते उच्यते—उभयत्राम्नातयोर्विद्ययोः पुरुषविद्यात्वेऽपि विद्याभेदोऽस्त्येव ; कुतः ? इतरेषामनाम्नानात्—एकस्यां शाखायामाम्नातानां गुणानामन्यत्रानाम्नानात् । तथा हि [१]"यत्सायं प्रातर्मध्यन्दिनं च तानि सवनानि" इत्यादयस्तैत्तिरीयके आम्नाताः छान्दोग्ये सवनत्वेन नाम्नायन्ते ; त्रेधा विभक्तं पुरुषायुषं छान्दोग्ये सवनत्वेन कल्प्यते ; छान्दोग्ये श्रुतानामशिशिषादीनां दीक्षादित्वकल्पनं तैत्तिरीयके न कृतम् ; यजमानपत्न्यादिपरिकल्पनं चान्यथा । अतो रूपमुभयत्र भिद्यते । तथा फलसंयोगोऽपि भिद्यते; तैत्तिरीयके हि पूर्वानुवाके [२]"ब्रह्मणे त्वामहस ओमित्यात्मानं युञ्जीत" इति ब्रह्मविद्यामभिधाय तत्फलत्वेन [२]"ब्रह्मणो महिमानमाप्नोति" इत्युक्त्वा [१]"तस्यैवं विदुषः" इत्यादिना आम्नाता पुरुषविद्याऽस्यैव ब्रह्मविदुषो यज्ञत्वकल्पनमिति गम्यते॥

अतो ब्रह्मविद्याङ्गत्वाद्ब्रह्मप्राप्तिरेवात्र फलम् ; [३]"फलवत्सन्निधावफलं तदङ्गम्" इति न्यायात्तैत्तिरीयकाम्नाता पुरुषविद्या ब्रह्मविद्याङ्गमिति गम्यते । छान्दोग्ये त्वायुःप्राप्तिफला पुरुषविद्येत्युक्तम् । अतो रूपसंयोगयोर्भेदाद्विद्याभेद इत्येकत्राम्नातानां गुणानामितरत्रानुपसंहारः ॥ २४ ॥

इति श्रीशारीरकमीमांसाभाष्ये पुरुषविद्याधिकरणम् ॥ ९ ॥

वेदान्तसारे—पुरुषविद्यायामपि चेतरेषामनाम्नानात् ॥ छान्दोग्ये तैत्तिरीयके चाम्नाता पुरुषविद्या भिन्ना, यजमानपत्न्यादीनां यज्ञावयवानामितरेषां सवनत्रयादीनां चैकत्राम्नातानामन्यत्रानाम्नानात्, फलभेदाच्च । तैत्तिरीयके आत्मादीनां यजमानत्वकल्पनं सायंप्रातर्मध्यन्दिनानां सवनत्वकल्पनं ब्रह्ममहिमप्राप्तिफलम् । अत्र फलस्याश्रवणात् पूर्वप्रस्तुतफलं ब्रह्मविद्याङ्गम् । छा-

१. तै. नारायणं. ५२-अनु॥—२. तै. नारायणं ५१-अनु ॥—३. पूर्वमीमांसा न्यायः॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न्दोग्ये चाशिशिषादीनां दीक्षात्वकल्पनं त्रेधा विभक्तपुरुषायुषस्य च सवनत्रयकल्पनम्; १"शतं जीवति" इति च फलम् ॥ २४ ॥

इति वेदान्तसारे पुरुषविद्याधिकरणम् ॥ ९ ॥

वेदान्तदीपे—पुरुषविद्यायामपि चेतरेषामनाम्नानात्॥ तैत्तिरीयके पुरुषविद्याऽऽम्नाता २"तस्यैवं विदुषो यज्ञस्याऽत्मा यजमानश्श्रद्धा पत्नी शरीरम्" इत्यादिका। छान्दोग्येऽपि ३"पुरुषो वाव यज्ञस्तस्य यानि चतुर्विंशतिवर्षाणि" इत्यादिका। किमत्र विद्याभेदः - उत नेति संशयः। पुरुषविद्येति संज्ञैक्यात्, तैत्तिरीयके फलसम्बन्धानाम्नानात्, छान्दोग्ये १"शतं जीवति" इत्यनेनैकफलत्वाच्च विद्यैक्यमिति पूर्वः पक्षः। राद्धान्तस्तु—पुरुषविद्येति संज्ञैक्येऽपि सवनत्रयकल्पनाप्रकारभेदाद्यजमानपत्न्यादिकल्पनाप्रकारभेदाच्च रूपभेदात्, तैत्तिरीयके—पूर्वानुवाकगतस्य २"ब्रह्मणो महिमानमाप्नोति" इति ब्रह्मविद्याफलस्यैव सन्निधानात् अफलस्यास्य तदङ्गतया तत्फलत्वात् फलभेदाच्च विद्याभेदः। सूत्रार्थस्तु—पुरुषविद्यायामपि उभयत्र रूपभेदाद्विद्याभेदः, कुतः? इतरेषामनाम्नानात् - इतरशाखोदितानां तदितरशाखायामनाम्नानात्; छान्दोग्ये—तैत्तिरीयकाम्नातानां यजमानपत्न्यादीनां सवनानां चानाम्नानात्, तैत्तिरीयके च च्छान्दोग्याम्नातानां यज्ञावयवानामनाम्नानादित्यर्थः। तैत्तिरीयके हि २"आत्मा यजमानश्श्रद्धा पत्नी" इति यजमानादिकल्पनम्, २"यत्सायं प्रातर्मध्यन्दिनं च तानि सवनानि"इतिच सवनत्रयकल्पनम्,छान्दोग्ये चाशिशिषादीनां दीक्षात्वादिकल्पनम्, पुरुषायुषंत्रेधा विभज्य सवनत्रयकल्पनं चेति यज्ञावयवकल्पनप्रकारभेदाद्रूपभेदः स्पष्टः। फलमपि तथैवेति इतरेषामिति फलस्यापि ग्रहणम् ॥ २४ ॥

इति वेदान्तदीपे पुरुषविद्याधिकरणम् ॥ ९ ॥

(श्रीशारीरकमीमांसाभाष्ये वेधाद्यधिकरणम् ॥ १० ॥)

वेधाद्यर्थभेदात् । ३ । ३ । २५ ॥

आथर्वणिका उपनिषदारम्भे ४"शुक्रं प्रविध्य हृदयं प्रविध्य"इत्या

---

१. छा. ३-१६-७ ॥—२. तै. नारा. ५२-अनु ॥—३. छा. ३-१६-१ ॥—४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दीन्मन्त्रानधीयते; सामगाश्च रहस्यब्राह्मणारम्भे १ "देव सवितः प्रसुव यज्ञं प्रसुव" इत्याद्यामनन्ति; काठकास्तैत्तिरीयकाश्च २ "शं नो मित्रश्शं वरुणः" इत्यादिकम्; शाट्यायनिनश्च ३"श्वेतोऽश्वो हरिनीलोऽसि" इत्यादिकम्; ऐतरेयिणस्तु महाव्रतब्राह्मणमधीयते ४"इन्द्रो हवै वृत्रं हत्वा महानभवत्" इत्यादिः कौषीतकिनोऽपि महाव्रतब्राह्मणमेव ५"प्रजापतिर्वै संवत्सरस्तस्यैष आत्मा यन्महाव्रतम्" इतिः वाजसनेयिनस्तु प्रवर्ग्यब्राह्मणं ६"देवा हवै सत्रं निषेदुः" इत्यादि। तत्र संशयः—किमुपनिषदारम्भेष्वधीताः ७"शुक्रं प्रविध्य" २"शं नो मित्रः" इत्यादयो मन्त्राः प्रवर्ग्यादीनि च कर्माणि विद्याङ्गम्, उत नेति। किं युक्तम्? विद्याङ्गमिति। कुतः? सन्निधिसमाम्नानात् विद्याङ्गत्वप्रतीतेः। यद्यपि ७"शुक्रं प्रविध्य" इत्यादीनां मन्त्राणां प्रवर्ग्यादेश्च कर्मणः श्रुतिलिङ्गवाक्यैर्बलवद्भिर्यथायथं कर्मसु विनियोगोऽवगम्यते; तथाऽपि २"शं नो मित्रः"८"सह नाववतु" इत्यादेर्मन्त्रस्यान्यत्र विनियोगाभावाद्विद्याधिकाराच्च विद्याङ्गत्वमवर्जनीयमिति सर्वासु विद्यासु इमे मन्त्राः उपसंहर्तव्याः—

(सिद्धान्तः.)

एवं प्राप्ते प्रचक्ष्महे—वेधाद्यर्थभेदात्७"शुक्रं प्रविध्य हृदयं प्रविध्य" २"ऋतं वदिष्यामि सत्यं वदिष्यामि" ९ "ऋतमवादिषं सत्यमवादिषं" १०"तेजस्विनाऽवधीतमस्तु मा विद्विषावहै" इत्यादिभिर्लिङ्गैरभिचाराध्ययनादिष्वेषां विनियोगावगमान्न विद्याङ्गत्वम्। एतदुक्तं भवति—यथा ७"हृदयं प्रविध्य" इत्यादिमन्त्रसामर्थ्यात् ७"शुक्रं प्रविध्य" इत्यादीनामभिचारादिशेषत्वमवगम्यते; एवमेव २"ऋतं वदिष्यामि" १०"तेजस्विनावधीतमस्तु" इत्यादिमन्त्रसामर्थ्यादेव स्वाध्यायशेषत्वं २"शं नो मित्रः" इत्यादिमन्त्राणामवगम्यते; अतो न तेषां विद्याङ्गत्वम्" इति। ७"शुक्रं प्र-

१.सामसु. रहस्यब्राह्मणे ॥—२. तै. शी. १-अनु॥—३ ॥—४ ॥—५॥—६ ॥—७ ॥—८. तै. आन. १-अनु ॥—९. तै. शी. १२-अनु-१॥—१०. तै. भृग. १-अनु-१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विध्य" इत्यादीनां प्रवर्ग्यादिब्राह्मणानां चेह पाठो दिवाकीर्त्यत्वारण्येनुवाक्यत्वकृतः ॥ २५ ॥

इति श्रीशारीरकमीमांसाभाष्ये वेधाद्यधिकरणम् ॥ १० ॥

वेदान्तसारे—वेधाद्यर्थभेदात् ॥ उपनिषदारम्भेष्वधीत १"शुक्रं प्रविध्य हृदयं प्रविध्य" इत्यादिमन्त्रवत्, महाव्रतादिमन्त्रवच्च २"शं नो मित्रः" ३"सह नाववतु" इतिमन्त्रावपि मन्त्रसामर्थ्येन प्रयोजनभेदावगमादध्ययनशेषभूताविति न विद्याङ्गभूतौ ॥ २५ ॥

इति वेदान्तसारे वेधाद्यधिकरणम् ॥ १० ॥

वेदान्तदीपे—वेधाद्यर्थभेदात् ॥ आथर्वणिकास्तैत्तिरीयका ऐतरेयिण इत्येवमादयः उपनिषदारम्भेषु १"शुक्रं प्रविध्य हृदयं प्रविध्य" २"शं नो मित्रश्शं वरुणः"३"सह नाववतु"इत्यादिमन्त्रान्महाव्रतादीनि च कर्माण्यधीयते। किमेषां विद्याङ्गत्वम्, उत नेति संशयः। सन्निधिसमाम्नानाद्विद्याङ्गत्वमिति पूर्वः पक्षः। राद्धान्तस्तु— १"शुक्रं प्रविध्य हृदयं प्रविध्य" इत्यादिमन्त्रसामर्थ्यात्, महाव्रतादीनां च कर्मणां श्रुत्यादिभिश्चाभिचारद्वादशाहादिषु विनियोगवत् १"शं नो मित्रश्शं वरुणः" ३"सह नाववतु" इत्यादेर्मन्त्रस्य च १"ऋतं वदिष्यामि सत्यं वदिष्यामि" ३"तेजस्विनावधीतमस्तु" इति मन्त्रसामर्थ्यादध्ययने विनियोग इति न विद्याङ्गत्वम्। सूत्रार्थस्तु—वेधाद्यर्थभेदादित्यस्य वेधाद्यर्थभेदवत् १"सत्यं वदिष्यामि" ३"तेजस्विनावधीतमस्तु" इति शंनोमित्रादेर्मन्त्रस्याप्यध्ययनसम्बन्धरूपार्थभेदान्न विद्याङ्गत्वमित्यभिप्रायः। अतः शंनोमित्रादिमन्त्र एवाधिकरणस्य विषयः ॥ २५ ॥

इति वेदान्तदीपे वेधाद्यधिकरणम् ॥ १० ॥

(श्रीशारीरकमीमांसाभाष्ये हान्यधिकरणम् ॥ ११ ॥)

हानौ तूपायनशब्दशेषत्वात्कुशाच्छन्दस्तुत्युपगानवत्तदुक्तम् । ३ । ३ । २६ ॥

छन्दोगा आमनन्ति–४"अश्व इव रोमाणि विधूय पापं चन्द्र इव

१॥—२. तै.ब्रा. १-अनु-१॥—३.तै. आर.१-अनु-१॥—४. छा. ८-१३-१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

राहोर्मुखात्प्रमुच्य। धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसम्भवानि" इति; आथर्वणिकाश्च [१]"तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति" इति; शाट्यायनिनस्तु [२]"तस्य पुत्रा दायमुपयन्ति सुहृदस्साधुकृत्यां द्विषन्तः पापकृत्याम्" इत्यादि; कौषीतकिनस्तु [३]"तत्सुकृतदुष्कृते धूनुते तस्य प्रिया ज्ञातयस्सुकृतमुपयन्ति अप्रिया दुष्कृतम्" इति। एवं क्वचित्पुण्यपापयोर्हानिः, क्वचित्प्रियाप्रियेषु तत्प्राप्तिः, क्वचिदुभयं च श्रुतम्। तदुभयमेकैकविद्यायां श्रुतमपि सर्वविद्याङ्गमास्थेयम्, सर्वब्रह्मविद्यानिष्ठस्यापि ब्रह्म प्राप्नुवतः पुण्यपापप्रहाणस्यावश्यंभावित्वात् प्रहीणविषयत्वाच्चोपायनस्य। तच्चिन्तनं च विधीयमानं सर्वविद्याङ्गं भवितुमर्हति। तत्रेदं विचार्यते—हानिचिन्तनमुपायनचिन्तनमुभयचिन्तनं च विकल्प्येरन्, उपसंहियेरन्वा। किं युक्तम्? विकल्प्येरन्निति। कुतः? पृथगाम्नानसामर्थ्यात्। समुच्चये हि सर्वत्रोभयानुसन्धानं स्यात्, तच्च कौषीतकीवाक्येनैव सिद्धमित्यन्यत्राम्नानमनर्थकमेव स्यात्। अतोऽनेकत्राम्नानस्य विकल्प एव प्रयोजनम्। नचाध्येतृभेदेन परिहर्तुं शक्यमनेकत्राम्नानम्; अविशेषपुनश्श्रवणं ह्यध्येतृभेदपरिहार्यम्; अत्र तु हानिरेव द्वयोः शाखयोः, उपायनमेव चैकस्याम्। न च विद्याभेदेन व्यवस्थापयितुं शक्यम्, सर्वशेषभूतमिदमनुसन्धानमित्युक्तत्वात्॥

(सिद्धान्तः)

अत्रेदमुच्यते—हानौ तूपायनशब्दशेषत्वात्-इति।तुशब्दः पक्षं व्यावर्तयति; हानाविति प्रदर्शनार्थम्; केवलायां हानौ केवले चोपायने श्रूयमाणे तयोरितरेतरसमुच्चयोऽवश्यंभावी; कुतः? उपायनशब्दशेषत्वात्-उपायनशब्दस्य हानिवाक्यशेषत्वात्। उपायनवाक्यस्य हि हानिवाक्यशेषत्वमेवोचितम्, विदुषा त्यक्तयोः पुण्यपापयोः प्रवेशस्थानवाचित्वा-

---

१. मु. ३-१-३ ॥—२ ॥—३. कौषी. १-अ. ४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दुपायनवाक्यस्य । प्रदेशान्तरान्नातस्य वाक्यस्य प्रदेशान्तरान्नातवाक्यशेषत्वे दृष्टान्ता उपन्यस्यन्ते—कुशाच्छन्दस्स्तुत्युपगानवदिति । कालापिनः [१]"कुशा वानस्पत्याः" इत्यामनन्ति; शाट्यायनिनां तु [२]"औदुम्बर्यः कुशाः" इति वाक्यं सामान्येन वानस्पत्यत्वेनावगताः कुशाः औदुम्बर्य इति विशिष्यत्तद्वाक्यशेषतामापद्यते; तथा [३]"देवासुराणां छन्दोभिः" इत्यादिना अविशेषेण देवासुराणां छन्दसां प्रसङ्गे [४]"देवच्छन्दांसि पूर्वम्" इति वचनं क्रमविशेषं प्रतिपादयत्तद्वाक्यशेषतां गच्छति; तथा [५]"हिरण्येन षोडशिनः स्तोत्रमुपाकरोति" इत्यविशेषेण प्राप्ते [६]"समयाविषिते सूर्ये षोडशिनः स्तोत्रमुपाकरोति" इति विशेषविषयं वाक्यं तद्वाक्यशेषतां भजते; तथा [७]"ऋत्विज उपगायन्ति" इत्यविशेषप्राप्तस्य [८]"नाध्वर्युरुपगायेत्" इति वाक्यमनध्वर्युविषयतामवगमयत्तद्वाक्यशेषत्वमृच्छति; एवं सामान्येनावगतमर्थं विशेषे व्यवस्थापयितुं क्षमस्य वाक्यस्य तच्छेषत्वमनभ्युपगच्छद्भिस्तयोरर्थयोर्विकल्पस्समाश्रयितव्यः; स च सम्भवन्त्यां गतौ न युज्यते; तदुक्तं पूर्वस्मिन् काण्डे [९]" अपितु वाक्यशेषस्स्यादन्याय्यत्वाद्विकल्पस्य विधीनामेकदेशः स्यात्" इति । तदेवं केवलहानोपायनवाक्ययोरेकवाक्यत्वात्केवलस्य हानस्य, केवलस्योपायनस्याभावाद्विकल्पो नोपपद्यते । कौषीतकिनामुभयान्नानमविशेषपुनश्श्रवणत्वेन प्रतिपत्तृभेदादविरुद्धम् ॥ २६ ॥

इति श्रीशारीरकमीमांसाभाष्ये हान्यधिकरणम् ॥ ११ ॥

वेदान्तसारे—हानौ तूपायनशब्दशेषत्वात्कुशाच्छन्दस्स्तुत्युपगानवत्तदुक्तम् ॥ विदुषो ब्रह्म प्राप्नुवतः पुण्यपापयोर्विमोचनमेकस्यां शाखायां विदुषस्तच्चिन्तनार्थमधीतम्; विमुक्तयोः प्रवेशस्थानमेकस्यां शाखायां पुण्यप्रवेशस्थानं सुहृदः; दुष्कृतस्य शत्रव इति; एकस्यां शाखायां विमोचनं प्रवेशस्थानं चेत्युभयमाम्नातम्, सर्वं तच्चिन्तनार्थम्; हानाविति प्रदर्शनार्थम्; हाना-

१ ॥—२ ॥—३ ॥—४ ॥—५ ॥—६. ६-कां. ६-प्र. ११-अनु ॥—७ ॥—८. ६-कां. ३-प्र. १-अनु. ६-पं ॥—९. पूर्वमीमांसा सू ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वुपायनेचेत्यर्थः; हानिः विमोचनम्; उपायनं प्रवेशनम्; केवलहानावाम्नातायां केवले चोपायने आम्नाते इतरेतरसमुच्चयो न्याय्यः; न विकल्पः, उपायनशब्दस्य हानिवाक्यशेषत्वात् ; तच्छेषत्वञ्च स्वकृतयोः प्रवेशस्थानवाचित्वेन तदपेक्षत्वात्। यथा १"वानस्पत्याः कुशाः" इत्येतद्वाक्यशेषभूतम् २"औदुम्बर्यः कुशाः" इति प्रदेशान्तरस्थम् ; यथाच ३"देवासुराणां छन्दोभिः" इत्येतद्वाक्यशेषभूतं ४"देवच्छन्दांसि पूर्वम्" इति प्रदेशान्तरस्थम् ; यथा च ५"हिरण्येन षोडशिनस्स्तोत्रमुपाकरोति" इत्येतद्वाक्यशेषभूतं ६"समया विषिते सूर्ये षोडशिनस्स्तोत्रम् ; इति; यथा च ७"ऋत्विज उपगायन्ति" इत्येतच्छेषभूतं ८"नाध्वर्युरुपगायेत्" इति । एवमुपायनवाक्यस्य हानिवाक्यशेषतया सम्भवन्त्यां गतौ न विकल्पो न्याय्यः। तदुक्तम् ९"अपि तु वाक्यशेषस्यादन्याय्यत्वाद्विकल्पस्य" इत्यादिना ॥ २६ ॥

इति वेदान्तसारे हान्यधिकरणम् ॥ ११ ॥

वेदान्तदीपे—हानौ तूपायनशब्दशेषत्वात्कुशाच्छन्दस्स्तुत्युपगानवत्तदुक्तम् ॥ विदुषो ब्रह्म प्राप्नुवतः पुण्यपापयोर्विमोचनं द्वयोश्शाखयोश्श्रुतम् ; विमुक्तयोः पुण्यपापयोरन्यत्र प्रवेश एकस्यां शाखायां श्रुतः ; विमोचनं प्रवेशश्चोभयमेकस्याम् ; १०"तदा विद्वान्पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति"११"अश्व इव रोमाणि विधूय पापं चन्द्र इव राहोर्मुखात्प्रमुच्य। धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसम्भवामि" इति च केवलविमोचनम् ; १२"तस्य पुत्रा दायमुपयन्ति सुहृदस्साधुकृत्यां द्विषन्तः पापकृत्यां" इति केवलप्रवेशः;१३"तत्सुकृतदुष्कृते धूनुते तस्य प्रिया ज्ञातयस्सुकृतमुपयन्ति अप्रिया दुष्कृतम्" इत्युभयम्; किं केवलहानिचिन्तनं केवलोपायनचिन्तनमुभयचिन्तनं च सर्वासु विद्यासु विकल्पेनानुष्ठेयम्, उत समुच्चयेनेति संशयः। तथातथाऽऽम्नातस्यार्थवत्त्वाय विकल्प इति पूर्वः पक्षः। राद्धान्तस्तु—पुण्यपापप्रवेशस्य विमोचनापेक्षत्वेन शाखान्तरस्थस्यापि प्रवेशवाक्यस्य शाखान्तरस्थविमोचनवाक्यशेषत्वात् वाक्यद्वयेनैकार्थविधानात्समुच्चयः एकस्यां शाखायामुभयविधानं प्रतिपत्तृभेदेन परिह्रियते ॥

सूत्रार्थस्तु—हानौ त्विति तु शब्दः पक्षव्यावृत्त्यर्थः; हानाविति प्रदर्शना-

---

१ ॥—२ ॥—३ ॥—४ ॥—५ ॥—६. यजु. ६-कां. ६-प्र.११-अनु ॥—७ ॥—८. यजु. ६-कां. ३-प्र. १-अनु. ६-पं ॥—९ ॥—१०. मु. ३-१-३ ॥—११. छा. ८-१३-१ ॥— १२ ॥—१३. कौषी. १-अ. ४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

र्थम् ; केवलविमोचने केवले चोपायने श्रूयमाणे तयोरितरेतरसमुच्चयोऽवश्यम्भावी; कुतः? उपायनशब्दशेषत्वात्—उपायनशब्दस्य हानिवाक्यशेषत्वादित्यर्थः । त्यक्तयोः पुण्यपापयोः प्रवेशस्थानवाचित्वादुपायनवाक्यस्य हानिवाक्यशेषत्वमवगम्यते । प्रदेशान्तरास्नातवाक्यस्य प्रदेशान्तरास्नातवाक्यशेषत्वे दृष्टान्तानाह—कुशाच्छन्दस्स्तुत्युपगानवत्-इति।यथा १"वानस्पत्याः कुशाः" इति प्रदेशान्तरास्नातस्य वाक्यस्य २"औदुम्बर्यः कुशाः" इति तद्विशेषवाचिप्रदेशान्तरस्थम् ; यथा च ३"देवासुराणां छन्दोभिः" इति सामान्यतः प्रदेशान्तरास्नातस्य ४"देवच्छन्दांसि पूर्वम्" इति तत्क्रमविशेषवाचि प्रदेशान्तरस्थम्; यथा च ५"हिरण्येन षोडशिनस्स्तोत्रमुपाकरोति" इति प्रदेशान्तरस्थस्य तत्कालविशेषवाचि ६ "समयाविषिते सूर्ये षोडशिनस्स्तोत्रमुपाकरोति" इति प्रदेशान्तरस्थम् ; यथा च ७"ऋत्विज उपगायन्ति" इति प्रदेशान्तरस्थस्य ८"नाध्वर्युरुपगायेत्" इति तत्पर्युदासरूपं प्रदेशान्तरस्थम् ; एवमुपायनवाक्यस्य हानिवाक्यशेषतया सम्भवन्त्यां गतौ न विकल्पो युक्तः; तदुक्तं पूर्वस्मिन् काण्डे ९"अपितु वाक्यशेषस्स्यादन्याय्यत्वाद्विकल्पस्य" इत्यादिना ॥ २६ ॥

इति वेदान्तदीपे हान्यधिकरणम् ॥ ११ ॥

(श्रीशारीरकमीमांसाभाष्ये साम्परायाधिकरणम् ॥ १२ ॥)

साम्पराये तर्तव्याभावात्तथा ह्यन्ये । ३ । ३ । २७ ॥

सुकृतदुष्कृतयोर्हानमुपायनं च सर्वासु विद्यासु चिन्तनीयमित्युक्तम्; तद्धानं किं देहवियोगकाले देहादुत्क्रान्तस्याध्वनि च, उत देहवियोगकाल एवेति विशये उभयत्रेति युक्तम्, उभयथा श्रुतत्वात्; एवं हि कौषीतकिनस्समामनन्ति१०"स एतं देवयानं पन्थानमापद्याग्निलोकं गच्छति"इत्युपक्रम्य ११"स आगच्छति विरजां नदीं तां मनसाऽत्येति तत्सुकृतदुष्कृते धूनुते" इति। अत्र वाक्ये अध्वनि सुकृतदुष्कृतहानिः प्रतीयते। ताण्डिनस्तु

---

१. ॥—२. ॥—३. ॥—४. ॥—
५. ॥—६. यजु-६ कां-६. प्र. ११-अनु ॥—७. ॥—
८. ६-कां. ३-प्र. ६-प ॥—९. ॥—१०. कौषी. १-३-४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

१"अश्व इव रोमाणि विधूय पापं चन्द्र इव राहोर्मुखात्प्रमुच्य । धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसम्भवामि" इति । अत्र तु देहवियोगकाल इति प्रतीयते ; शाट्यायनकेऽपि २"तस्य पुत्रा दायमुपयन्ति सुहृदस्साधुकृत्यां द्विषन्तः पापकृत्याम्" इति पुत्रेषु दायसङ्क्रान्तिसमकालं सुकृतदुष्कृतसङ्क्रमणं श्रूयमाणं देहवियोगकाल इति गम्यते । अतस्सुकृतदुष्कृतयोरेकदेशो देहवियोगकाले हीयते ; शेषस्त्वध्वनि—

इति प्राप्ते उच्यते—साम्पराये-इति । साम्पराये—देहादपक्रमणकाले एव विदुषस्सुकृतदुष्कृते निरवशेषं हीयेते । कुतः? तर्तव्याभावात्—विदुषो देहवियोगात्पश्चात्सुकृतदुष्कृताभ्यां तरितव्यभोगाभावात्। विद्याफलभूतब्रह्मप्राप्तिव्यतिरेकेण हि सुकृतदुष्कृताभ्यां भोक्तव्ये सुखदुःखे न विद्येते। तथा चान्ये देहवियोगादूर्ध्वं ब्रह्मप्राप्तिव्यतिरिक्तसुखदुःखोपभोगाभावमधीयते ३"अशरीरं वा व सन्तं न प्रियाप्रिये स्पृशतः"३"एष सम्प्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते" ४"तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्ये" इति ॥ २७॥

छन्दत उभयाविरोधात् । ३ । ३ । २८ ॥

एवमर्थस्वाभाव्यात्सुकृतदुष्कृतहानिकालेऽवधृते सत्युभयाविरोधेन—श्रुतेरर्थस्वभावस्य चाविरोधेन छन्दतः—यथेष्टं पदानामन्वयो वर्णनीयः । कौषीतकीवाक्ये ५"तत्सुकृतदुष्कृते धूनुते" इति चरमश्रुतो वाक्यावयवः ५"एतं देवयानं पन्थानमापद्य" इति प्रथमश्रुतावयवात्प्रागनुगमयितव्य इत्यर्थः ॥ २८ ॥

अत्र पूर्वपक्षी प्रत्यवतिष्ठते—

गतेरर्थवत्त्वमुभयथाऽन्यथा हि विरोधः ।३। ३।२९॥

---

१. छा. ८-१-१३ ॥—२. ॥—३. छा. ८-१२-१,२ ॥—४. छा. ६-१४-२ ॥—५. कौषी. १-अ. ४,३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सुकृतदुष्कृतयोरेकदेशस्य देहवियोगकाले हानिः, शेषस्य च पश्चादिति उभयधा कर्मक्षये सत्येव गतेरर्थवत्त्वम्—देवयानगतिश्रुतेरर्थवत्त्वमित्यर्थः। अन्यथा हि विरोधः—देहवियोगकाल एव सर्वकर्मक्षये सूक्ष्मशरीरस्यापि विनाशस्स्यात्; तथा सति केवलस्यात्मनो गमनं नोपपद्यते। अत उत्क्रान्तिसमये विदुषो निश्शेषकर्मक्षयो नोपपन्नः ॥२९॥

अत्रोत्तरम्—

उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत् ।३।३।३०॥

उपपन्न एवोत्क्रान्तिकाले सर्वकर्मक्षयः; कथम्? तल्लक्षणार्थोपलब्धेः-क्षीणकर्मणोऽप्याविर्भूतस्वरूपस्य देहसम्बन्धलक्षणार्थोपलब्धेः।१"परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते" १"स तत्र पर्येति जक्षत्क्रीडन्रममाणः" २"स स्वराड्भवति तस्य सर्वेषु लोकेषु कामचारो भवति" ३"स एकधा भवति त्रिधा भवति" इत्यादिषु देहसम्बन्धाख्योऽर्थो ह्युपलभ्यते। अतः क्षीणकर्माणोऽपि सूक्ष्मशरीरयुक्तस्य देवयानेन गमनमुपपद्यते। कथं सूक्ष्मक्षशरीरमप्यारम्भककर्मविनाश्रेऽवतिष्ठत इति चेत्—विद्यामाहात्म्यादिति ब्रूमः। विद्या हि स्वयं सूक्ष्मशरीरस्यानारम्भिकापि प्राक्तनसुखदुःखोपभोगसाधनस्थूलशरीरस्य सर्वकर्मणां च निरवशेषक्षयेऽपि स्वफलभूतब्रह्मप्राप्तिप्रदानाय देवयानेन पथैनं गमयितुं सूक्ष्मशरीरं स्थापयति; लोकवत्—यथा लोके सस्यादिसमृद्ध्यर्थमारब्धे तटाकादिके तद्धेतुषु तदिच्छादिषु विनष्टेष्वपि तदेव तटाकादिकमशिथिलं कुर्वन्तस्तत्र पानीयपानादि कुर्वन्ति; तद्वत् ॥३०॥

अथ स्यात्—ज्ञानिनां साक्षात्कृतपरतत्त्वानां देहपातसमये कर्मणो निरवशेषक्षयाद्देहपातादूर्ध्वं सूक्ष्मशरीरमात्रं गत्यर्थमनुवर्तते, सुखदुःखानुभवो न विद्यत—इति यदुक्तम्; तन्नोपपद्यते; वसिष्ठापान्तरतपःप्र-

१. छा. ८-१२-२-३ ॥—२. छा. ७-२५-२ ॥—३. छा. ७-२६-२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भृतीनां साक्षात्कृतपरतत्त्वानां देहपातादूर्ध्वं देहान्तरसङ्गमः, पुत्रजन्मविपत्त्यादिनिमित्तसुखदुःखानुभवश्च दृश्यते—इति। अत उत्तरं पठति—

यावदधिकारमवस्थितिराधिकारिकाणाम्। ३। ३। ३१॥

नास्माभिस्सर्वेषां ज्ञानिनां देहपातसमये सुकृतदुष्कृतयोर्विनाश उक्तः; अपितु येषां ज्ञानिनां देहपातानन्तरमर्चिरादिका गतिः प्राप्ता, तेषां देहपातसमये सुकृतदुष्कृतहानिरुक्ता। वसिष्ठादीनां त्वाधिकारिकाणां न देहपातानन्तरमर्चिरादिगतिप्राप्तिः, प्रारब्धस्याधिकारस्यासमाप्तत्वात्। तेषां कर्मविशेषेणाधिकारविशेषं प्राप्तानां यावदधिकारसमाप्ति तदारम्भकं कर्म न क्षीयते। प्रारब्धस्य हि कर्मणो भोगादेव क्षयः। अत आधिकारिकाणां तदारम्भकं कर्म यावदधिकारमवतिष्ठते। अतस्तेषां न देहपातादनन्तरमर्चिरादिगतिप्राप्तिः॥ ३१॥

इति श्रीशारीरकमीमांसाभाष्ये साम्परायाधिकरणम्॥ १२॥

वेदान्तसारे—साम्पराये तर्तव्याभावात्तथा ह्यन्ये॥ सुकृतदुष्कृतयोर्हानिः १"अश्व इव रोमाणि विधूय...धूत्वा शरीरम्" इति देहवियोगकाले श्रुता। शाखान्तरे २"स आगच्छति विरजां नदीं...तत्सुकृतदुष्कृते धूनुते" इत्यध्वन्यपि श्रुताऽपि साम्पराये चरमदेहवियोगकाल एव चिन्तनीया, देहवियोगादूर्ध्वं ब्रह्मप्राप्तिव्यतिरेकेण तरितव्यभोगाभावात्। तथाह्यन्ये शाखिनः ३"तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये" इति देहवियोगसमनन्तरं ब्रह्मप्राप्तिमधीयते॥ २७॥

छन्दत उभयाविरोधात्॥ देहवियोगकाले पुण्यपापविमोचनश्रुतेः, देहवियोगादूर्ध्वं ब्रह्मप्राप्तिश्रुतेश्चेत्युभयश्रुत्यविरोधाद्धेतोः"सुकृतदुष्कृते धूनुते" इत्ययं श्रुतिखण्डः छन्दतो नेतव्यः ४"एतं देवयानं पन्थानमापद्यते" इति वाक्यखण्डात् प्रागनुगमयितव्य इत्यर्थः॥ २८॥

चोदयति—

---

१. छा. ८-१३-१॥—२. कौषी. १-४॥ —३. छा. ६-१४-२॥ — ४. कौषी. १-अ. ३॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गतेरर्थवत्त्वमुभयथाऽन्यथा हि विरोधः ॥ देवयानगतिश्रुतेरर्थवत्त्वमुभयत्र चिन्तायामेव ; अन्यथा देहवियोगकाल एव चिन्तायां तस्मिन्नेव सर्वकर्मक्षयाद्देहाभावेन गतिर्नोपपद्यत इति हि गतिश्रुतिविरोधः ॥ २९ ॥

परिहरति—

उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत् ॥ देहवियोगकाले सर्वकर्मक्षयेऽपि गतिविधिरुपपन्नः, ब्रह्मोपासीनानामकर्मलभ्यार्थोपलब्धेः १"स स्वराड्भवति तस्य सर्वेषु लोकेषु कामचारो भवति" इत्यादौ । यथा लोके राजानमुपासीनानामितरपुरुषासाधारणसर्वार्थसिद्धिः ॥ ३० ॥

यावदधिकारमवस्थितिराधिकारिकाणाम् ॥ वसिष्ठादीनां ज्ञानिनामपि देहपातादूर्ध्वं फलान्तरानुभवः, प्रारब्धाधिकारहेतुकर्मविनाशाभावात् । यावदधिकारसमाप्ति तद्धेतुकर्मफलानुभवाय तेषां तत्रैव स्थितिः ; नार्चिरादिप्राप्तिः । ज्ञानिनामपि प्रारब्धकर्म अनुभवेनैव नश्यतीति वक्ष्यते ॥ ३१ ॥

इति वेदान्तसारे साम्परायाधिकरणम् ॥ १२ ॥

वेदान्तदीपे—**साम्पराये तर्तव्याभावात्तथा ह्यन्ये ॥** किमिदं सुकृतदुष्कृतयोर्हानिचिन्तनं देहवियोगकाल एकदेशः क्षीयते, अध्वनि शिष्टमित्युभयत्र कर्तव्यम्, उत देहवियोगकाल एव सर्वं क्षीयत इति संशयः । उभयत्र श्रुतेः देवयानेन पथा गमनान्यथानुपपत्त्या चोभयत्रेति पूर्वः पक्षः, २"अश्व इव रोमाणि विधूय पापं चन्द्र इव राहोर्मुखात्प्रमुच्य धूत्वा शरीर मकृतं कृतात्मा ब्रह्मलोकम्"इति देहवियोगकाले ३"स आगच्छति विरजां नदीं...तत्सुकृतदुष्कृते धूनुते" इत्यध्वन्यपि हानिश्रुतेः; देहवियोगकाले सर्वकर्मक्षये हि देवयानेन गमनसाधनं कर्म न सम्भवति । राद्धान्तस्तु ४ "तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ सम्पत्स्ये" इति देहवियोगादूर्ध्वं ब्रह्मप्राप्तिव्यतिरेकेणानुभाव्यपुण्यपापफलाभावात्, २"अश्व इव रोमाणि विधूय पापम्" इत्यादिनैकार्थ्यात्, अध्वन्याम्नातमपि ३"तत्सुकृतदुष्कृते धूनुते" इति वाक्यं देहवियोगकाले सङ्गमयितव्यमिति देहवियोगकाल एव हानिचिन्तनम्। सर्वकर्मक्षयेऽपि हि विद्यासामर्थ्यादेव देवयानेन पथा गमनं चोपपद्यते । विद्या हि स्वयं सूक्ष्मशरीरस्यानारम्भिकापि प्रकृतसुखदुःखोपभोगसाधनस्थूलशरीरस्य सर्वकर्म-

---

१. छा. ७-२५-२॥—२.छा. ८-१३-१॥—३. कौषी. १-४॥—४. छा. ६-१४-२॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

णां च निरवशेषक्षयेऽपि स्वफलभूतब्रह्मप्राप्तिप्रतिपादनाय देवयानेन पथैनं गमयितुं सूक्ष्मशरीरं स्थापयति ॥

सूत्रार्थस्तु—साम्पराये—देहवियोगकाल एव चिन्तनीयम्; कुतः? तर्तव्याभावात्—देहवियोगादूर्ध्वं ब्रह्मप्राप्तिव्यतिरेकेण तरितव्यभोगाभावात् । तथा ह्यन्येऽधीयते—१"तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ सम्पत्स्ये" इति ; २"अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः" इति च ॥ २७ ॥

छन्दत उभयाविरोधात्॥ एवमर्थस्वाभाव्याद्देहवियोगकाल एव निरवशेषकर्मक्षयेऽवधृते सति ३"तत्सुकृतदुष्कृते धूनुते" इति वाक्यखण्डः उभयाविरोधात्—उभयश्रुत्यविरोधाच्छन्दतो नेयः, ४"अश्व इव रोमाणि विधूय पापं धूत्वा शरीरमकृतम्" १"तस्य तावदेव चिरम्" इत्युभयश्रुत्यविरोधाच्चिरमश्रुतोऽपि ३"तत्सुकृतदुष्कृते धूनुते" इति वाक्यखण्डः ३"एतं देवयानं पन्थानमापद्यते" इति प्रथमश्रुतखण्डात् प्रागनुगमयितव्य इत्यर्थः ॥ २८ ॥

अत्र चोद्यति—

गतेरर्थवत्त्वमुभयथाऽन्यथा हि विरोधः ॥ देवयानेन गतिश्रुतेरर्थवत्त्वं देहवियोगकालेऽध्वनि चेत्युभयथा कर्मक्षये सत्येव ; अन्यथा देहवियोगकाले एव सर्वकर्मक्षये सति सूक्ष्मशरीरस्याप्यारम्भकनाशेन स्थित्यनुपपत्तेः देवयानगतिश्रुतिर्हि विरुध्यते ॥ २९ ॥

परिहरति—

उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत् ॥ भगवन्तमुपासीनानां देहवियोगकाले सर्वकर्मक्षयेऽप्युपपन्नो देवयानः पन्थाः। कुतः? तल्लक्षणार्थोपलब्धेः—तल्लक्षणार्थः—तज्जातीयार्थः, अकर्मलभ्यार्थोपलब्धेरित्यर्थः । उपलभ्यते ह्यकर्मलभ्यार्थो ब्रह्मोपासीनानां ५"स स्वराड्भवति तस्य सर्वेषु लोकेषु कामचारो भवति" इत्यादिषु । लोकवत्—यथा लोके राजानमुपासीनानां प्राकृतपुरुषासाधारणातिरमणीयानेकार्थसिद्धिः ; तद्वत् सर्वज्ञं सत्यसङ्कल्पं महोदारं परं ब्रह्मोपासीनानां सर्वमुपपन्नमित्यर्थः ॥ ३० ॥

परं ब्रह्मोपासीनानां देहपातसमये सर्वकर्मक्षयात् देहपातादूर्ध्वं कर्मफलानुभवो न विद्यत इत्येतन्न सम्भवति, वसिष्ठादीनां ज्ञानिनामपि कर्मफलरू-

१. छा. ६-१४-२ ॥—२. छा. ८-१२-१ ॥—३. कौषी. १-अ. ४-३ ॥—४. छा. ८-१३ ॥—५. छा. ७-२५-२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पदेहान्तरसंयोगः, पुत्रजन्मविपत्त्यादिषु सुखदुःखानुभवोऽपि दृश्यते-इत्याशङ्क्याह—

यावदधिकारमवस्थितिराधिकारिकाणाम्॥येषां ज्ञानिनां देहपातादनन्तरमर्चिरादिका गतिः प्राप्ता ; तेषां देहपातादूर्ध्वं तरितव्यकर्मफलभोगाभावाद्देहपातसमय एव सर्वकर्मक्षय उक्तः । वसिष्ठादीनान्तु आधिकारिकाणां यावदधिकारसमाप्ति नार्चिरादिका गतिरस्ति ; अपित्वधिकारेऽवस्थितिरेव, अधिकारहेतुभूतकर्मणः फलदानायारब्धत्वात्। ज्ञानिनोऽप्यारब्धं हि कर्म फलानुभवेनैव क्षीयते ॥ ३१ ॥

इति वेदान्तदीपे साम्परायाधिकरणम् ॥ १२ ॥

(श्रीशारीरकमीमांसाभाष्ये अनियमाधिकरणम् ॥ १३ ॥)

अनियमस्सर्वेषामविरोधश्शब्दानुमानाभ्याम् । ३ । ३ । ३२ ॥

उपकोसलादिषु येषूपासनेष्वर्चिरादिगतिः श्रूयते ; किं तन्निष्ठानामेव तया ब्रह्मप्राप्तिः, उत सर्वेषां ब्रह्मोपासननिष्ठानामिति संशये। इतरेष्वनाम्नानात्, [1]"ये चेमेऽरण्ये श्रद्धा तप इत्युपासते" [2]"श्रद्धां सत्यमुपासते" इतीतरसकलब्रह्मविद्योपस्थापकत्वे प्रमाणाभावाच्च तन्निष्ठानामेव—

(सिद्धान्तः)

इति प्राप्तेऽभिधीयते—अनियमः—इति । सर्वेषां—सर्वोपासननिष्ठानां तयैव गन्तव्यत्वात् तन्निष्ठानामेवेति नियमो नास्ति । सर्वेषां तयैव गमने हि सति शब्दानुमानाभ्यां—श्रुतिस्मृतिभ्यामविरोधः, अन्यथा विरोध एवेत्यर्थः । श्रुतिस्तावत् छान्दोग्यवाजसनेयकयोः पञ्चाग्निविद्यायामर्चिरादिमार्गेण सर्वब्रह्मोपासननिष्ठानां गमनमाह [2]"य

छा. ५-१०-१ ॥—२. इ. ८-२१५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एवमेतद्विदुर्ये चामी अरण्ये श्रद्धां सत्यमुपासते तेऽर्चिषमभिसम्भवन्ति" इति वाजसनेयके ; [१]"तद्य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धा तप इत्युपासते तेऽर्चिषमभिसम्भवन्ति"इति छान्दोग्ये; "य इत्थं विदुः" इति पञ्चाग्निविद्यानिष्ठान् " ये चेमे " इत्यादिना श्रद्धापूर्वकं ब्रह्मोपासीनांश्चोद्दिश्यार्चिरादिका गतिरुपदिश्यते, [२]"सत्यं ज्ञानमनन्तं ब्रह्म" [३] सत्यं त्वेव विजिज्ञासितव्यम्" इति सत्यशब्दस्य ब्रह्मणि प्रसिद्धेः । तपश्शब्दस्यापि तेनैकार्थ्यात्सत्यतपश्शब्दाभ्यां ब्रह्मैवाभिधीयते । "श्रद्धापूर्वकं ब्रह्मोपासनं चान्यत्र श्रुतं [३]"सत्यं त्वेव विजिज्ञासितव्यम्" इत्युपक्रम्य [४]"श्रद्धा त्वेव विजिज्ञासितव्या" इति। स्मृतिरपि [५] "अग्निर्ज्योतिरहश्शुक्लः षण्मासा उत्तरायणम् । तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः" इति सर्वेषां ब्रह्मविदामनेनैव मार्गेण गमनमित्याह । एवंजातीयकाः श्रुतिस्मृतयो बह्व्यस्सन्ति । एवं सर्वविद्यासाधारणी इयं गतिः प्राप्तैवोपकोसलविद्यादावनूद्यते ॥ ३२ ॥

इति श्रीशारीरकमीमांसाभाष्ये अनियमाधिकरणम् ॥ १४ ॥

वेदान्तसारे—अनियमस्सर्वेषामविरोधश्शब्दानुमानाभ्याम्॥येषूपकोसलादिषूपासनेष्वर्चिरादिगतिराम्नाता, तन्निष्ठानामेव तया प्राप्तिरिति तच्चिन्तनमपि तेषामेवेति नियमाभावः; अपि तु सर्वोपासननिष्ठानाम्। तथा सत्येवश्रुतिस्मृतिभ्यामविरोधः।श्रुतिस्तावत् पञ्चाग्निविद्यायां [६]"येचामी अरण्ये श्रद्धां सत्यमुपासते तेऽर्चिषमभिसम्भवन्ति"इत्यविशेषेण श्रुता। स्मृतिरपि [५]"अग्निर्ज्योतिरहश्शुक्लः" इत्यादिका ॥ ३२ ॥

इति वेदान्तसारे अनियमाधिकरणम् ॥ १३ ॥

वेदान्तदीपे—अनियमस्सर्वेषामविरोधश्शब्दानुमानाभ्याम्॥ येषू-

---

१. छा. ५-१०-१ ॥ --२. तै. आन. १-अनु ॥ —३. छा. ७-१७. खं ॥ —४. छा. १९-खं ॥—५. गी. ८-२४ ॥—६. बृ- ८-२-१५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पासनेषूपकोसलादिष्वर्चिरादिका गतिराम्नाता । किं तन्निष्ठानामेव तया ब्रह्म प्राप्तिः, उत सर्वेषां ब्रह्मोपासननिष्ठानामिति संशयः। तन्निष्ठानामेवेति पूर्वः पक्षः, इतरेषां तया ब्रह्मप्राप्तौ प्रमाणाभावात् । यत्तु पञ्चाग्निविद्यायां साधारणं वचनम् , तदप्युपकोसलादिविषयमिति निश्चीयते । अन्यथोपकोसलादिष्वाम्नानानर्थक्यं स्यात् । राद्धान्तस्तु—पञ्चाग्निविद्यायां १"य एवमेतद्विदुः येचामी अरण्ये श्रद्धां सत्यमुपासते तेऽर्चिषमभिसम्भवन्ति" इति सामान्येन सर्वविषयं गतिश्रवणमुपकोसलादिष्वाम्नानं न बाधितुं क्षमम्, सङ्कोचकं च न भवति, विद्यास्तुत्यर्थतयाऽनुवादेनाप्युपपत्तेः । अतस्सर्वेषां तयैव ब्रह्मप्राप्तिः। सूत्रार्थस्तु—अनियमस्सर्वेषां—सर्वेषामविशेषेण तयैव प्राप्तिः। कुतः? अविरोधश्शब्दानुमानाभ्यां—तथासत्येव श्रुतिस्मृतिभ्यामविरोधः। श्रुतिश्च २"ये चेमेऽरण्ये"इत्यादिका पञ्चाग्निविद्यायां निदर्शिता; स्मृतिः ३"अग्निर्ज्योतिरहश्शुक्लः" इत्यादिका ॥ ३२ ॥

इति वेदान्तदीपे अनियमाधिकरणम् ॥ १३ ॥

(श्रीशारीरकमीमांसाभाष्ये अक्षरध्यधिकरणम् ॥ १४ ॥)

अक्षरधियां त्ववरोधस्सामान्यतद्भावाभ्यामौपसदवत्तदुक्तम् । ३ । ३ । ३३ ॥

बृहदारण्यके श्रूयते ४"एतद्वै तदक्षरं गार्गि ब्रह्मणा अभिवदन्ति अस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहमच्छायमतमोऽवाय्वनाकाशमसङ्गमरसमगन्धमचक्षुष्कमश्रोत्रमवागमनोऽतेजस्कमप्राणममुखममात्रमनन्तरमबाह्यं न तदश्नाति किंचन एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः" इति । तथा आथर्वणे ५"अथ परा यया तदक्षरमधिगम्यते यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुश्श्रोत्रं तदपाणिपादम्" इति। तत्र संशयः—किमिमे अक्षरशब्दनिर्दिष्टब्रह्मसम्बन्धितया श्रुताः अस्थूलत्वादयः प्रपञ्चप्रत्यनीकतास्वरूपास्सर्वासु ब्रह्मविद्यास्वनुसन्धेयाः, उत

१.बृ.८-२-१५॥—२.छा.५-१०-१॥—३.गी.८-२४॥—४.बृ.५-८-८॥ ५. मु.१-१-५॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यत्र श्रूयन्ते तत्रैव—इति। किं युक्तम्? यत्र श्रुतास्तत्रैवेति। कुतः? विद्यान्तरस्य रूपभूतानां गुणानां विद्यान्तरस्य रूपत्वे प्रमाणाभावात्, प्रतिषेधरूपाणामेषामानन्दादिवत्स्वरूपावगमोपायत्वाभावाच्च। आनन्दादिभिरवगतस्वरूपे हि ब्रह्मणि स्थूलत्वादयः प्रपञ्चधर्माः प्रतिषिध्यन्ते, निरालम्बनप्रतिषेधायोगात् ॥

—●●◆◆(सिद्धान्तः)◆◆●●—

एवं प्राप्ते प्रचक्ष्महे—अक्षरधियां त्ववरोधः-इति। अक्षरब्रह्मसम्बन्धिनामस्थूलत्वादिधियां सर्वब्रह्मविद्यास्ववरोधः—सङ्ग्रहणमित्यर्थः। कुतः? सामान्यतद्भावाभ्यां—सर्वेषूपासनेषूपास्यस्याक्षरस्य ब्रह्मणः समानत्वादस्थूलत्वादीनां तत्स्वरूपप्रतीतौ भावाच्च। एतदुक्तं भवति—असाधारणाकारेण ग्रहणं हि वस्तुनो ग्रहणम्। नच केवलमानन्दादि ब्रह्मणोऽसाधारणमाकारमुपस्थापयति, प्रत्यगात्मन्यप्यानन्दादेर्विद्यमानत्वात्। हेयप्रत्यनीको ह्यानन्दादिर्ब्रह्मणोऽसाधारणं रूपम्। प्रत्यगात्मनस्तु स्वतो हेयविरहिणोऽपि हेयसम्बन्धयोग्यताऽस्ति; हेयप्रत्यनीकत्वं च चिदचिदात्मकप्रपञ्चधर्मभूतस्थूलत्वादिविपरीतरूपम्। अतोऽसाधारणाकारेण ब्रह्मानुसन्दधताऽस्थूलत्वादिविशेषितज्ञानानन्दाद्याकारं ब्रह्मानुसन्धेयमिति अस्थूलत्वादीनामानन्दादिवद्ब्रह्मस्वरूपप्रतीत्यन्तर्भावात्सर्वासु ब्रह्मविद्यासु तथैव ब्रह्मानुसन्धेयमिति। गुणानां प्रधानानुवर्तित्वे दृष्टान्तमाह—औपसदवत्—इति। यथा जामदग्न्यचतूरात्रपुरोडाश्युपसद्गुणभूतः सामवेदपठितः १"अग्निर्वै होतं वेतु" इत्यादिको मन्त्रः प्रधानानुवर्तितया याजुर्वैदिकेनोपांशुत्वेन प्रयुज्यते। तदुक्तं प्रथमे काण्डे २"गुणमुख्यव्यतिक्रमे तदर्थत्वान्मुख्येन वेदसंयोगः" इति ॥ ३३ ॥

नन्वेवं सर्वासु ब्रह्मविद्यासु ब्रह्मण एव गुणित्वाद्गुणानां च प्र-

---

१ ॥ २. पूर्वमीमांसा ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

धानानुवर्तित्वात् १"सर्वकर्मा सर्वगन्धस्सर्वरसः" इत्यादेर्गुणजातस्य प्रतिविधं व्यवस्थितस्याप्यन्यवस्था स्यात्; तत्राह—

इयदामननात् । ३ । ३ । ३४ ॥

आमननम्—आभिमुख्येन मननम्—अनुचिन्तनम् । आमननाद्धेतोरियदेव गुणजातं सर्वत्रानुसन्धेयत्वेन प्राप्तम्; यदस्थूलत्वादिविशेषितमानन्दादिकम् । येन गुणजातेन विना ब्रह्मस्वरूपस्येतरव्यावृत्तस्यानुसन्धानं न सम्भवति; तदेव सर्वत्रानुवर्तनीयम्; तच्चेयदेवेत्यर्थः । इतरे तु सर्वकर्मत्वादयः प्रधानानुवर्तिनोऽपि चिन्तनीयत्वेन प्रतिविधं व्यवस्थिताः ॥ ३४ ॥

इति श्रीशारीरकमीमांसाभाष्ये अक्षरध्यधिकरणम् ॥ १४ ॥

वेदान्तसारे—अक्षरधियां त्ववरोधस्सामान्यतद्भावाभ्यामौपसदवत्तदुक्तम् ॥ २"एतद्वै तदक्षरम्" ३"अथ परा यया तदक्षरम्" इत्यारभ्य २"अस्थूलमनण्वह्रस्वमदीर्घमलोहितं" ३"यत्तदद्रेश्यमग्राह्यम्" इत्याद्यस्थूलत्वादद्रेश्यत्वादिविषयाणामक्षरब्रह्मसम्बन्धिनीनां धियां सर्वासु परविद्यासु सङ्ग्रहः, गुणिनो ब्रह्मणः सर्वत्रैकत्वात्, एतैर्गुणैर्विना सकलेतरव्यावृत्तब्रह्मानुसन्धनानुपपत्तेश्च । हेयसम्बन्धानर्हानन्दादयोऽपि प्रत्यगात्मनो ब्रह्मव्यावर्तकाः। प्रधानानुवर्तित्वं हि गुणस्वभावः; यथा जामदग्न्यचतूरात्रपुरोडाश्युपसद्गुणभूतमग्नस्य प्रधानभूतोपसदनुवर्तित्वेनोपांशुगुणकत्वम् । तदुक्तं ४"गुणमुख्यव्यतिक्रमे" इत्यादिना ॥ ३३ ॥

नैतावता सर्वत्र सर्वोपसंहारव्याप्तिरित्याह—

इयदामननात् ॥ आमननम्—आभिमुख्येन मननम् । इयदेव गुणजातं सर्वत्रोपसंहार्यम्, येन गुणजातेन सकलेतरव्यावृत्तब्रह्ममननम् ॥ ३४ ॥

इति वेदान्तसारे अक्षरध्यधिकरणम् ॥ १४ ॥

---

१. छा. ३-१४-४ ॥—२. बृ. ५-८-८ ॥—३. मु. १-१-५॥—४. पूर्वमीमांसा ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वेदान्तदीपे—अक्षरधियां त्ववरोधस्सामान्यतद्भावाभ्यामौपसदवत्तदुक्तम् ॥ बृहदारण्यके १"एतद्वैतदक्षरं गार्गि ब्राह्मणा अभिवदन्त्यस्थूलमनण्वह्रस्वम्" इत्यादि श्रूयते। तथा आथर्वणे च २"अथ परा यया तदक्षरमधिगम्यते यत्तदद्रेश्यमग्राह्यम्" इत्यादि। किमेषामस्थूलत्वादीनां सर्वासु ब्रह्मविद्यासूपसंहारः, उत यत्र श्रुताः तत्रैवेति संशयः। विद्याविशेषरूपतया श्रुतानां सर्वविद्यासाधारणत्वाभावाद्यत्र श्रुतास्तत्रैव नियता इति पूर्वः पक्षः। सिद्धान्तस्तु—अस्थूलत्वादीनामप्यानन्दादिवद्ब्रह्मस्वरूपानुसन्धानान्तर्भावात्सर्वत्रैवोपसंहारः, न केवलमानन्दादिर्ब्रह्मस्वरूपं प्रत्यगात्मनो व्यावृत्तम्, तस्यापि हि तदेव स्वरूपम्। अस्थूलत्वादिविशेषितमानन्दादि ब्रह्मणः प्रत्यगात्मनो व्यावृत्ताकारः। यद्यपि प्रत्यगात्मा स्वभावतः स्थूलत्वाद्यचेतनधर्मासम्बन्धी; तथापि तत्सम्बन्धार्हतास्त्येव। तदर्हतयापि हि पूर्वं तत्सम्बन्धस्सञ्जातः। अतो ब्रह्मणस्तदनर्हस्वरूपानुसन्धानार्थतयाऽस्थूलत्वादयस्सर्वत्रानुसन्धेयाः।सूत्रार्थस्तु—अक्षरधियाम्-अक्षरसम्बन्धिनीनामस्थूलत्वादिधियां सर्वविद्यास्ववरोधः—सङ्ग्रहणम्; कुतः? सामान्यतद्भावाभ्यां—ब्रह्मणस्सर्वत्र समानत्वात् ब्रह्मानुसन्धानान्तर्भावाच्च तासाम्। गुणानां प्रधानानुवर्तित्वं स्वभावः; औपसदवत्—यथा जामदग्न्यचतूरात्रपुरोडाश्युपसदुणभूतः 'अग्निर्होत्रं वेतु' इति मन्त्रः, सामवेदपठितत्वेन सामवेदस्वरनियतोऽपि प्रधानभूतोपसदनुवर्तित्वात् याजुर्वैदिकत्वाच्चोपसदो याजुर्वैदिकोपांशुत्वसम्बन्धी; तद्वदक्षरविद्यासम्बन्धितयाऽधीतत्वेन तद्विद्यानियता अपि प्रधानानुवर्तित्वस्वाभाव्यात्सर्वविद्यासम्बन्धिनः। तदुक्तं प्रथमकाण्डे ३"गुणमुख्यव्यतिक्रमे तदर्थत्वात्" इत्यादिना ॥

एवं तर्हि ४"सर्वकर्मा सर्वगन्धः" इत्यादीनामपि सर्वेषां ब्रह्मगुणत्वान्न क्वचिद्व्यवस्थेत्यत्राह—

इयदामननात् ॥ इयत्-अस्थूलत्वादिविशेषितमानन्दाद्येव सर्वत्रानुसन्धेयम्; कुतः? आमननाद्धेतोः। आमननम्-आभिमुख्येन मननं ब्रह्मानुसन्धानम्। ब्रह्मस्वरूपानुसन्धानं येन विना नोपपद्यते; तदेव सर्वत्रानुसन्धेयम्। अन्यत्तु तत्रतत्र व्यवस्थितमित्यर्थः ॥ ३४ ॥

इति वेदान्तदीपे अक्षरध्यधिकरणम् ॥ १४ ॥

---

१. बृ. ५-८-८ ॥—२. मु. १-१-५ ॥—३. पूर्वमीमांसासू ॥—४. छा. ३-१४-४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अन्तरा भूतग्रामवत्स्वात्मनोऽन्यथा भेदानुपपत्तिरिति चेन्नोपदेशवत् । ३ । ३ । ३५ ॥

बृहदारण्यके उषस्तप्रश्न एवमाम्नायते [१]"यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरः तन्मे व्याचक्ष्व" इति । तस्य प्रतिवचनं [२]"यः प्राणेन प्राणिति स त आत्मा सर्वान्तरो योऽपानेनापानिति स त आत्मा" इत्यादि । अतुष्टेन तेन पुनः पृष्ट आह [२]"न दृष्टेर्द्रष्टारं पश्येर्न श्रुतेश्श्रोतारं शृणुयाः न मतेर्मन्तारं मन्वीथाः न विज्ञातेर्विज्ञातारं विजानीया एष त आत्मा सर्वान्तरोऽतोऽन्यदार्तम्" इति । तथा तदनन्तरं कहोलप्रश्ने चैवमाम्नायेत [३]"यदेव साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरः तन्मे व्याचक्ष्व" इति । प्रतिवचनं च [३]" योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येति एवं हैतमात्मानं विदित्वा ब्राह्मणः पुत्रेषणायाश्च वित्तेषणायाश्च" इत्यादि " अतोऽन्यदार्तम्" इत्यन्तम् । तत्र संशय्यते—किमनयोर्विद्याभेदोऽस्ति, नेति । किं युक्तम् ? भेद इति ; कुतः? रूपभेदात् । प्रतिवचनभेदाद्रूपं भिद्यते । प्रश्नस्यैकरूप्येऽपि प्रतिवचनप्रकारो हि भेदेनोपलभ्यते । पूर्वत्र प्राणनादीनां कर्ता सर्वान्तरात्मत्वेनाच्यते ; परत्राशनायापिपासादिरहितः । अतः पूर्वत्र प्राणिता देहेन्द्रियबुद्धिमनःप्राणव्यतिरिक्तः प्रत्यगात्मोच्यते; परत्र तु तदरिक्तोऽशनायापिपासादिरहितः परमात्मा । अतो रूपं भिद्यते । भूतग्रामवतश्च प्रत्यगात्मनस्तस्य भूतग्रामस्य [४]सर्वस्यान्तरत्वेन सर्वान्तरत्वमप्युपपन्नम् । यद्यपि प्रत्यगात्मनः सर्वान्तरत्वं भूतग्राममात्रापेक्षत्वेनापेक्षिकम्, तथापि तदेव ग्राह्यम्,

---

१.बृ.५-४-१॥—२.बृ.५-४-२॥—३.बृ.५-५-१॥—४.सर्वस्यान्तरात्मत्वेन सर्वान्तरत्व. पा ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अन्यथा मुख्यान्तरात्मपरिग्रहलोभात्परमात्मस्वीकारे प्रतिवचनभेदो नोपपद्यते । प्रतिवचनं हि पूर्वत्र प्रत्यगात्मविषयम्, परमात्मनः प्राणितृत्वापानितृत्वाद्यसम्भवात् । परं च परमात्मविषयम्, अशनायापिपासाद्यतीतत्वात्। तदिदमाशङ्क्ते—अन्तरा भूतग्रामवत्स्वात्मनोऽन्यथा भेदानुपपत्तिरितिचेत्—इति । अन्तरा—सर्वान्तरत्वेन प्रथमप्रतिवचनं भूतग्रामवत्स्वात्मनः—भूतग्रामवान्—तदन्तरः स्वात्मा-प्रत्यगात्मा सर्वान्तर इत्युच्यत इत्यर्थः । अन्यथा [१]"यः प्राणेन प्राणिति" 'योऽशनायापिपासाद्यतीतः'—इति प्रतिवचनभेदानुपपत्तिरिति चेत्—

(सिद्धान्तः)

अत्रोत्तरं—नेति। न विद्याभेद इत्यर्थः । उभयत्र परविषयत्वात्प्रश्नप्रतिवचनयोः । तथाहि—[१]"यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरः" इति प्रश्नस्तावत्परमात्मविषय एव, ब्रह्मशब्दस्य परमात्मासाधारणत्वेऽपि प्रत्यगात्मन्यपि कदाचिदुपचरितप्रयोगदर्शनात्तद्व्यावृत्त्या परमात्मप्रतिपत्त्यर्थं[१]"यत्साक्षाद्ब्रह्म"इति विशेषणं क्रियते । अपरोक्षत्वमपि सर्वदेशसर्वकालसम्बन्धित्वं [२]"सत्यं ज्ञानमनन्तं ब्रह्म" इत्यनन्तत्वेनावगतस्य परमात्मन एवोपपद्यते। सर्वान्तरत्वमपि [३]"यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरः" इत्यारभ्य [४]"य आत्मनि तिष्ठन्नात्मनोऽन्तरः" इति सर्वान्तर्यामिणः परमात्मन एव सम्भवति । प्रतिवचनमपि तथैव परमात्मविषयम् । [१]"यः प्राणेन प्राणिति" इति निरुपाधिकं प्राणनस्य कर्तृत्वं परमात्मन एव, प्रत्यगात्मनस्सुषुप्तौ प्राणनस्मृतिकर्तृत्वाभावात् । एवमजानतोपस्तेन प्राणने कर्तृत्वमात्रमुक्तं मन्वानेन प्रत्यगात्मनोऽपि साधारणत्वं प्रतिवचनस्य मत्वा अतुष्टेन पुनः पृष्टस्तं प्रति प्रत्यगात्मनो व्यावृत्तं निरुपाधिकत्वेन प्राणनस्य कर्तारं परमात्मा-

१. बृ. ५-४-१ ॥—२. तै. आन. १-१ ॥—३. बृ. ५-७-३ ॥—४. बृ. ५-७-२२. मा. पा.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नमाह—[1]"न दृष्टेर्द्रष्टारं पश्येः" इत्यादिना। इन्द्रियाधीनानां दर्शनश्रवणमननविज्ञानानां कर्तारं प्रत्यगात्मानं प्राणनस्य कर्तृत्वेनोक्त इति न मन्वीथाः; तस्य सुषुप्तिमूर्च्छादौ प्राणनादेरकर्तृत्वात्। [2]"को ह्येवान्यात्कः प्राण्यात् यदेष आकाश आनन्दो न स्यात्" इति सर्वप्राणिप्राणनहेतुत्वं हि परमात्मन एवान्यत्र श्रुतम्। अतः पूर्वप्रश्नप्रतिवचने परमात्मविषये। एवमुत्तरे अपि, अशनायाद्यतीतत्वस्य परमात्मासाधारणत्वात्। उभयत्र [3]"अतोऽन्यदार्तम्" इत्युपसंहारश्चैकरूपः। प्रश्नप्रतिवचनावृत्तिस्तु कृत्स्नप्राणिप्राणनहेतोः परस्य ब्रह्मणोऽशनायाद्यतीतत्वप्रतिपादनाय। तत्र दृष्टान्तमाह—उपदेशवदिति। यथा सद्विद्यायाम् [4]"उत तमादेशमप्राक्ष्यः" इति प्रकान्ते सदुपदेशे [5]"भगवांस्त्वेव मे तद्ब्रवीत्विति" [6]"भूय एव मा भगवान् विज्ञापयतु" इति प्रश्नस्य [7]"एषोऽणिमा ऐतदात्म्यमिदं सर्वं तत्सत्यम्" इति प्रतिवचनस्य च भूयोभूय आवृत्तिस्सतो ब्रह्मणस्तत्तन्माहात्म्यविशेषप्रतिपादनाय दृश्यते; तद्वत्। अत एकस्यैव सर्वान्तरभूतस्य ब्रह्मणः कृत्स्नप्राणिप्राणनहेतुत्वाशनायाद्यतीतत्वप्रतिपादनेन रूपैक्याद्विद्यैक्यम्॥ ३५॥

अथ स्यात्-यद्यप्युभे प्रश्नप्रतिवचने परब्रह्मविषये; तथापि विद्याभेदोऽवर्जनीयः, एकत्र सर्वप्राणिप्राणनहेतुत्वेनोपास्यम्, इतरत्राशनायाद्यतीतत्वेनेत्युपास्यगुणभेदेन रूपभेदात्, प्रष्टृभेदाच्च, पूर्वत्र उषस्तः प्रष्टा; उत्तरत्र कहोलः—इति; तत्राह—

व्यतिहारो विशिंषन्ति हीतरवत्। ३।३। ३६॥

नात्र विद्याभेदः, प्रश्नप्रतिवचनाभ्यामेकरूपार्थविषयाभ्यामेकेन च विधिपदेनैकवाक्यत्वप्रतीतेः। प्रश्नद्वयं तावत्सर्वान्तरात्मत्वविशिष्टब्रह्म-

---

१. बृ. ५-४-२; ५-५-१॥—२. तै. आन. ७-१॥—३. छा. ६-१-३॥—४. छा. ६-१-७॥—५. छा. ६-५-४॥—६. छा. ६-९-४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विषयम्। द्वितीये प्रश्ने [1]"यदेव साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरः" इत्येवकारश्च पूर्वतोषस्तेन पृष्टगुणविशिष्टब्रह्मविषयत्वं कहोलप्रश्नस्यावधारयति। प्रतिवचनं चोभयत्र[2]"स त आत्मा सर्वान्तरः" इति सर्वान्तरात्मत्वविशिष्टब्रह्मविषयमेकरूपमेव। विधिप्रत्ययश्चोत्तरत्रैव दृश्यते [1]"तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत्" इति। एवं सर्वान्तरात्मत्वविशिष्टब्रह्मैकविषयत्वे द्वयोरवगते सत्येकस्मिन्नेव सर्वान्तरात्मत्वविशिष्टे ब्रह्मण्युपास्ये उषस्तकहोलयोरितरेतरबुद्धिव्यतिहारः कर्तव्यः। उषस्तस्य या सर्वान्तरात्मनो ब्रह्मणस्सर्वप्राणिप्राणनहेतुत्वविषया बुद्धिः; सा कहोलेनापि प्रष्टा कार्या; या च कहोलस्य तस्यैव ब्रह्मणोऽशनायाद्यतीतत्वविषया बुद्धिः, सा उषस्तेनापि कार्या। एवं व्यतिहारे कृते उभाभ्यां सर्वान्तरस्य ब्रह्मणो जीवव्यावृत्तिरवगता भवति। एनं सर्वान्तरात्मानं प्रत्यगात्मनो व्यावृत्तमवगमयितुं सर्वप्राणिप्राणनहेतुत्वाशनायाद्यतीतत्वप्रतिपादनेन विशिंषन्ति हि याज्ञवल्क्यस्य प्रतिवचनानि। अतो ब्रह्मणस्सर्वान्तरात्मत्वमेवोपास्यगुणः। प्राणनहेतुत्वादयस्तु तस्योपपादकाः; नोपास्याः। ननूपास्यगुणः सर्वान्तरात्मत्वमेव चेत्—प्राणनहेतुत्वस्य अशनायाद्यतीतत्वस्य च प्रष्टुः व्यतिहृत्यानुसन्धानं किमर्थम्?; तदुच्यते-सर्वप्राणिप्राणनहेतुत्वेन सर्वान्तरात्मनि जीवाद्व्यावृत्ते ब्रह्मण्युषस्तेनावगते सति कहोलेन जीवस्य सर्वात्मना असम्भावितेन स्वभावविशेषेण सर्वान्तरात्मा व्यावृत्तोऽनुसन्धेय इति कृत्वा पुनः प्रश्नः कृतः। याज्ञवल्क्योपि तदभिप्रायमभिज्ञाय प्रत्यगात्मनोऽसम्भावितमशनायादिप्रत्यनीकत्वमुक्तवान्। अतश्चोपास्यस्य व्यावृत्तिप्रतीतिसिद्ध्यर्थमुभाभ्यां परस्परबुद्धिव्यतिहारः कर्तव्यः। इतरवत्—यथेतरत्र सद्विद्यायां भूयोभूयः प्रश्नैः प्रतिवचनैश्च तदेव सद्ब्रह्म व्यवच्छिद्यते; न पुनः पूर्वप्रतिपन्नाद्गुणाद्गुणान्तरविशिष्टतयोपास्यं प्रतिपाद्यते; तद्वत् ॥ ३६ ॥

१. बृ. ५-५-१॥—२. बृ. ५-४-१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तत्रापि प्रश्नप्रतिवचनभेदे सति कथमैक्यमवगम्यत इति चेत्–तत्राह–

सैव हि सत्यादयः । ३ । ३ । ३७ ॥

सैव हि—सच्छब्दाभिहिता परमकारणभूता परा देवतैव [१]"सेयं देवतैक्षत" [२]तेजः परस्यां देवतायाम्" इति प्रकृता [३]"यथा सोम्य मधु मधुकृतो निस्तिष्ठन्ति" इत्यादिषु पर्यायेषु सर्वेषूपपाद्यते । यतः [४]"ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा" इति प्रथमपर्यायोदितास्सत्यादयस्सर्वेषु पर्यायेषूपपाद्योपसंहियन्ते ॥

केचित्तु–'व्यतिहारो विशिंषन्ति हीतरवत्' 'सैवहितसत्यादयः' इति सूत्रद्वयमधिकरणद्वयं वर्णयन्ति । तत्र पूर्वेण [५]"त्वं वाऽहमस्मि भगवो देवते अहं वै त्वमसि भगवो देवते तद्योऽहं सोऽसौ योऽसौ सोऽहम्" इति वाक्ये जीवपरयोर्व्यतिहारानुसन्धानं प्रतिपाद्यत इत्युच्यत इत्याहुः; तत् [६]"सर्वं खल्विदं ब्रह्म" [७]"ऐतदात्म्यमिदं सर्वम्" [७]"तत्त्वमसि" इत्यवगतसर्वात्मभावविषयत्वादस्य वाक्यस्य नात्र प्रतिपादनीयमपूर्वमस्तीत्यनादरणीयम् । तच्तु वक्ष्यते–[८]"आत्मेति तूपगच्छन्ति ग्राहयन्ति च" इति । नच सर्वात्मत्वानुसन्धानातिरेकेण परस्मिन् ब्रह्मणि जीवत्वानुसन्धानम्, जीवे च परब्रह्मत्वानुसन्धानं, तथ्यं सम्भवति । उत्तरेण च सूत्रेण [९]"स यो हवै तन्महद्यक्षं प्रथमजं वेद सत्यं ब्रह्म" इत्यादिवाक्यप्रतिपादितस्य सत्योपासनस्य [१०]"तद्यत्सत्यमसौ स आदित्यो य एष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेऽक्षिन्" इत्यादिवाक्यप्रतिपादितोपासनस्य चैक्यं प्रतिपाद्यत इति; तदप्ययुक्तम्,

१. छा. ६-३-२॥—२. छा. ६-८-६॥—३. छा. ६-९-१॥—४. छा. ६-८-७॥—५. ॥—६. छा. ३-१४-१ ॥—७. छा. ६-१६-३ ॥—८. आरी. ४-१-३ ॥—९. बृ. ७-४-१ ॥—१०. बृ. ७-५-१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उत्तरवाक्ये अक्ष्यादित्यस्थानभेदेन विद्याभेदस्य पूर्वमेव १"न वा विशेषात्" इत्यनेन प्रतिपादितत्वात्। नच द्वयोरनयोर्व्याहृत्यादिशरीरकत्वेन रूपवतोः २"हन्ति पाप्मानं जहाति च य एवं वेद" इति पृथक्संयोगचोदनावतोर्द्वयोरुपासनयोः ३"स यो हवै तन्महद्यक्षं प्रथमजं वेद सत्यं ब्रह्मेति जयतीमान् लोकान्" इति संयोगरूपादिमत्तया निरपेक्षेण पूर्वेणैकेनोपासनेनाभेदस्सम्भवति। नच २"हन्ति पाप्मानं जहाति" इति गुणफलाधिकारत्वम्, प्रमाणाभावात्। पूर्वेणैकविद्यात्वं प्रमाणमिति चेत्—न, इतरेतराश्रयत्वात्। एकविद्यात्वे निश्चिते पूर्वफलस्यैव प्रधानफलत्वेनोत्तरयोः फलयोर्गुणफलत्वम्, तयोर्गुणफलत्वे निश्चिते सति संयोगभेदाभावात्पूर्वेण विद्यैक्यमितीतरेतराश्रयत्वमित्येवमादिभिर्यथोक्तप्रकारमेव सूत्रद्वयम्॥ ३७॥

इति श्रीशारीरकमीमांसाभाष्ये अन्तरत्वाधिकरणम्॥ १५॥

वेदान्तसारे—अन्तरा भूतग्रामवत्स्वात्मनोऽन्यथा भेदानुपपत्तिरिति चेन्नोपदेशवत्॥ ४"य आत्मा इत्युषस्तप्रश्नः भूतग्रामवत्प्रत्यगात्मविषयः। अन्यथा ४'यः प्राणेन प्राणिति स त आत्मा' इति प्रतिवचनस्य कहोलविषयादर्शनायाद्यतीतत्वादेः भेदानुपपत्तिरितिचेत्—न, ५"य आत्मा सर्वान्तरः" इत्युभयत्र प्रश्नैकरूप्यात् परमात्मैवोभयत्र प्रतिवचनगतः। प्राणनादिहेतुत्वमशनायाद्यतीतत्वञ्च परमात्मन्येवोपपद्यते। प्राणनादिहेतुत्वं हि परमात्मन एव ६"को ह्येवान्यात्कः प्राण्यात्' इत्यादिश्रुतेः। सद्विद्योपदेशवत् प्रश्नप्रतिवचनावृत्तिरेकविषया॥ ३५॥

७प्रष्टृभेदोपि न भेदकः इत्याह—

व्यतिहारो विशिंषन्ति हीतरवत्॥ अथैक्ये निश्चिते सति प्रष्टृर्बुद्धिव्यतिहारः कार्यः। उषस्तेनाशनायाद्यतीतत्वधीः कार्या; कहोलेनापि प्राणनादिहेतुत्वधीः कार्या। उभयत्र प्रकरणगतवाक्यानि हि परमात्मानमेव विशिंष-

---

१. शारी. ३-३-२१॥—२. बृ. ७-५-२॥—३. बृ. ७-४ १॥—४. बृ. ५-४-१॥—५. बृ. ५-५-१॥—६. तै. आन. ७-१॥—७. प्रष्टृभेदादपि न भेद इत्याह. पा॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न्ति; यथा इतरत्र सद्विद्यायामपि ॥ ३६ ॥

प्रश्नाद्यावृत्तौ कथमैक्यमित्यत्राह—

सैव हि सत्यादयः ॥ १"सेयं देवतैक्षत" इति प्रस्तुता देवतैव सर्वत्र प्रश्नगता । प्रतिवचनेषु च २"तत्सत्यं स आत्मा" इत्यादय इत्यैक्यम् ॥

इति वेदान्तसारे अन्तरत्वाधिकरणम् ॥ १५ ॥

वेदान्तदीपे—अन्तरा भूतग्रामवत्स्वात्मनोऽन्यथा प्रतिवचनभेदानुपपत्तिरितिचेन्नोपदेशवत्॥ बृहदारण्यके उषस्तप्रश्नप्रतिवचनं ३"यः प्राणेन प्राणिति स त आत्मा सर्वान्तरः योऽपानेनापानिति स त आत्मा" इत्यादि ३"अतोऽन्यदार्तम्" इत्यन्तमाम्नातम् । तथा तदनन्तरं कहोलप्रश्नप्रतिवचनं ४"योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येति एतं हैतमात्मानं विदित्वा" इत्यादि ४"अतोऽन्यदार्तम्" इत्यन्तम् । किमुभयत्र विद्यैक्यम्, उत विद्याभेद इति संशयः । पूर्वत्र प्राणनादिहेतुः प्रत्यगात्मा, उत्तरत्राशनायाद्यतीतः परमात्मेत्युपास्यभेदाद्विद्याभेदः—इति पूर्वः पक्षः । राद्धान्तस्तु—३"यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरः तन्मे व्याचक्ष्व" इति उभयत्र प्रश्नस्य परमात्मविषयत्वादेकरूपत्वाच्च, सर्वप्राणिप्राणनापाननादिहेतुत्वस्य अशनायाद्यतीतत्वस्य च प्रतिवचनद्वयावगतस्य परमात्मन्येकस्मिन्नेवोपास्ये सम्भवाच्च, न विद्याभेदः। सूत्रार्थस्तु—अन्तरा ३"य आत्मा सर्वान्तरः" इत्युषस्तप्रश्नो भूतग्रामवत्स्वात्मनः—प्रत्यगात्मन इत्युपगन्तव्यः;अन्यथा प्रतिवचनभेदानुपपत्तिरिति चेत्—नात्र प्रत्यगात्मपरमात्मविषयं प्रश्नद्वयं, प्रतिवचनद्वयं च परमात्मन्येकस्मिन्नेवोपास्ये सम्भवतीत्यर्थः । उपदेशवत् ५"लब्धोऽस्युत तमादेशमप्राक्ष्यः" इति प्रक्रान्तायामेकस्यामेव सद्विद्यायां ६"भगवांस्त्वेव मे तद्ब्रवीत्विति" ७"भूय एव मा भगवान्विज्ञापयतु" इत्यादिका प्रश्नावृत्तिः, प्रतिवचनभेदश्चोपास्यमाहात्म्यविशेषप्रतिपादनपरत्वेन दृश्यते; तद्वत् ॥ ३५ ॥

प्रष्टृभेदपूर्वकप्रतिवचनप्रकारभेदाद्विद्याभेदोऽवर्जनीय एवेत्याशङ्क्याह—

व्यतिहारो विशिंषन्ति हीतरवत् ॥ ४"यदेव साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरः" इति द्वयोः प्रष्टोः प्रश्नस्यैकरूपत्वेनैकविषयत्वे निश्चिते सत्युषस्तकहोलयोः प्रतिवचनगतबुद्धिव्यतिहारः कार्यः।प्राणनादिहेतुत्वबुद्धिस्तयो-

---

१. छा. ६-३-२ ॥—२. छा. ६-१६-३ ॥—३. बृ. ५-४-१,२ ॥—४. बृ. ५-५-१॥—५. छा. ६-१-३ ॥—६. छा. ६-१-७ ॥—७. छा. ६-५-४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न्तरात्मविषया कहोलेनापि कार्या,तथाऽशनायाद्यतीतत्वबुद्धिरुषस्तेनापि कार्या। विशिषन्ति शुभयत्रापि याज्ञवल्क्यवचनान्येकं सर्वान्तरमेवोपास्यम् । इतरवत् —यथेतरत्र सद्विद्यायां सर्वाणि प्रतिवचनानि परमकारणपरब्रह्मविषयाणि; तद्वत् ॥ ३६ ॥

सद्विद्यायामप्युपास्यैक्यं प्रश्नप्रतिवचनावृत्तौ सत्यां कथमवगम्यत इत्याह—

सैव हि सत्यादयः ॥ १"सेयं देवतैक्षत" इत्यादिषु सर्वत्र सैव परा देवतैकाऽनुवर्तते । २"ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि" इति त एव सत्यादयः सर्वेषु प्रतिवचनेषूपसंहियन्ते ॥ ३७ ॥

इति वेदान्तदीपे अन्तरत्वाधिकरणम् ॥ १५ ॥

श्रीशारीरकमीमांसाभाष्ये कामाद्यधिकरणम् ॥ १६ ॥

कामादीतरत्र तत्र चायतनादिभ्यः । ३ । ३ । ३८ ॥

छान्दोग्ये श्रूयते३"अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तर आकाशस्तस्मिन्यदन्तस्तदन्वेष्टव्यम्"इत्यादिः वाजसनेयके च ४"स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेषु य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते सर्वस्य वशी सर्वस्येशानः"इत्यादि। तत्र संशयः—किमनयोर्विद्याभेदः, उत नेति। किं युक्तम्? भेद इति । कुतः? रूपभेदात् ; अपहतपाप्मत्वादिगुणाष्टकविशिष्ट आकाशः छान्दोग्ये उपास्यः प्रतीयते ; वाजनेयके त्वाकाशे शयानो वशित्वादिगुणशिष्ट उपास्यः प्रतीयते ; अतो रूपभेदाद्विद्याभेदः—

(सिद्धान्तः)

इति प्राप्ते प्रचक्ष्महे—न भेद इति । कुतः ? रूपाभेदात्—इतर-

---

१. छा. ६-३-२ ॥—२. छा. ६-८-७ ॥—३. छा. ८-१-१ ॥—४. बृ. ६-४-२२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्र तत्र च कामाद्येव हि रूपं—बाजसनेयके च्छान्दोग्ये च सत्यकामादिविशिष्टमेव ब्रह्मोपास्यमित्यर्थः । कुत एतदवगम्यते ? आयतनादिभ्यः—हृदयायतनत्वसेतुत्वविधरणत्वादिभिस्तावदुभयत्र सैव विद्येति प्रत्यभिज्ञायते ; वशित्वादयश्च वाजसनेयके श्रुताः छान्दोग्यश्रुतस्य गुणाष्टकान्यतमभूतस्य सत्यसङ्कल्पत्वस्य विशेषा एवेति सत्यसङ्कल्पत्वसहचारिणां सत्यकामत्वादीनामपहतपाप्मत्वपर्यन्तानां सद्भावमवगमयन्ति ; अतो रूपं न भिद्यते । संयोगोऽपि [१]"परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते" [२]"अभयं वै ब्रह्म भवति" इति ब्रह्मप्राप्तिरूपो न भिद्यते । आकाशशब्दः छान्दोग्ये परमात्मविषय इति, [३]"दहर उत्तरेभ्यः" इत्यत्र निर्णीतम् । वाजसनेयके त्वाकाशे शयानस्य वशित्वादिश्रवणात्तस्य शयानस्य परमात्मत्वे सति तदाधाराभिधायिन आकाशशब्दस्य [४]"तस्यान्ते सुषिरं सूक्ष्मम्" इति हृदयान्तर्गतस्य सुषिरशब्दवाच्यस्याकाशस्याभिधायकत्वमवगम्यते । अतो विद्यैक्यम् ॥ ३८ ॥

अथ स्यात्—यदुक्तं वाजसनेयके वशित्वादिभिस्सह सत्यकामत्वादिसद्भावोऽवगम्यते—इति ; तन्नोपपद्यते, वशित्वादीनामेव तत्र परमार्थतस्सद्भावाभावात् ; तदभावश्च [५]"मनसैवानुद्रष्टव्यं नेह नानास्ति किञ्चन । मृत्योस्समृत्युमाप्नोति य इह नानेव पश्यति"[५]"एकधैवानुद्रष्टव्यमेतदप्रमेयं ध्रुवम्" इति प्रकृतेन वाक्येन [५]"स एष नेतिनेत्यात्मा" इत्युत्तरेणचोपास्यस्य ब्रह्मणो निर्विशेषत्वप्रतीतेरवगम्यते ; अतो वशित्वादयोऽपि स्थूलत्वाणुत्ववन्निषेध्या इति प्रतीयन्ते, अत एव च्छान्दोग्येऽपि सत्यकामत्वादयो न ब्रह्मणः पारमार्थिका गुणा उच्यन्ते ; अतोऽपारमार्थिकत्वादेवंजातीयकानां गुणानां मोक्षार्थेषूपासनेषु लोप इति ; तत्राह—

---

१. छा. ८-३-४॥—२. बृ. ६-४-२५॥—३. शारी. १-३-१३ ॥—४. तै. ना. ११-अनु ॥—५. बृ. ६-४-१९, २०, २२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आदरादलोपः । ३ । ३ । ३९ ॥

ब्रह्मगुणत्वेन प्रमाणान्तराप्राप्तानां गुणानामेषां सत्यकामत्वादीनां १"तस्मिन् यदन्तस्तदन्वेष्टव्यम्" २"एष आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासस्सत्यकामस्सत्यसङ्कल्पः" ३"सर्वस्य वशी सर्वस्येशानः" ३"एष सर्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरण एषां लोकानामसम्भेदाय" इत्यादिभिरनयोः श्रुत्योरन्यासु च मोक्षार्थोपासनोपास्यब्रह्मगुणत्वेन सादरमुपदेशादेषामलोपः ; अपितूपसंहार एव कार्यः । छान्दोग्ये तावत् ४"तद्य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान् कामान् तेषां सर्वेषु लोकेषु कामचारो भवति" इति सत्यकामत्वादिगुणविशिष्टस्य ब्रह्मणो वेदनमभिधाय ४"अथ य इहात्मानमननुविद्य व्रजन्त्येतांश्च सत्यान्कामांस्तेषां सर्वेषु लोकेष्वकामचारो भवति" इत्यवेदननिन्दा क्रियमाणा गुणविशिष्टवेदनस्यादरं दर्शयति । तथा वाजसनेयके ३"सर्वस्य वशी सर्वस्येशानः" ३"एष सर्वेश्वर एष भूताधिपतिरेष भूतपालः" इति भूयोभूय ऐश्वर्योपदेशाद्गुणेष्वादरः प्रतीयते । एवमन्यत्रापि । न च मातापितृसहस्रेभ्योऽपि वत्सलतरं शास्त्रं प्रतारकवदपारमार्थिकान्निरसनीयान् गुणान् प्रमाणान्तराप्रतिपन्नादरेणोपदिश्य संसारचक्रपरिवर्तनेन पूर्वमेव बम्भ्रम्यमाणान्मुमुक्षून् भूयोऽपि भ्रमयितुमलम् । ५"नेह नानाऽस्ति किञ्चन" ६"एकधैवानुद्रष्टव्यम्" इति तु सर्वस्य ब्रह्मकार्यत्वेन तदात्मकत्वादेकधाऽनुदर्शनं विधायाब्रह्मात्मकत्वेन पूर्वसिद्धनानात्वदर्शनं निषेधतीत्ययमर्थः प्रागेव प्रपञ्चितः । ७"स एष नेतिनेत्यात्मा" इत्यत्र चेतिशब्देन प्रमाणान्तरप्रतिपन्नं प्रपञ्चाकारं परामृश्य न तथाविधं ब्रह्मेति सर्वात्मभूतस्य ब्रह्मणः प्र-

१. छा. ८-१-१ ॥—२. छा. ८-१-५ ॥—३. बृ. ६-४-२२ ॥ —४. छा. ८-१-६ ॥—५, ६, ७. बृ. ६-४-१९, २०, २२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पञ्चविलक्षणत्वं प्रतिपाद्यते ; तदेव चानन्तरमुपपादयति १"अग्राह्यो न हि गृह्यते अशीर्यो नहि शीर्यते असङ्गो नहि सज्यते अव्यथितो न व्यथते न रिष्यति" इति। प्रमाणान्तरग्राह्यविसजातीयत्वात्प्रमाणान्तरेण न गृह्यते ; विशरणीयविसजातीयत्वान्न विशीर्यते ; एवमुत्तरत्रानुसन्धेयम्। छान्दोग्येऽपि २"नास्य जरयैतज्जीर्यति न वधेनास्य हन्यते एतत्सत्यं ब्रह्मपुरमस्मिन् कामास्समाहिताः" इति सर्वविसजातीयत्वं ब्रह्मणः प्रतिपाद्य तस्मिन् सत्यकामत्वादयो विधीयन्ते ॥ ३९ ॥

नन्वेवमपि २"तत्र इहात्मानमनुविद्य व्रजन्त्येताँश्च सत्यान् कामांस्तेषां सर्वेषु लोकेषु कामचारो भवति स यदि पितृलोककामो भवति" इत्यादिना सत्यकामादिगुणविशिष्टवेदनस्य सांसारिकफलसम्बन्धश्रवणान्मुमुक्षोर्ब्रह्मप्रेप्सोर्न सगुणं ब्रह्मोपास्यम्; परविद्याफलं च३"परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते" इतीदमेव। अतस्सत्यकामत्वादयो ब्रह्म प्रेप्सोर्नोपसंहार्या इति ; अत उत्तरं पठति—

उपस्थितेऽतस्तद्वचनात्। ३। ३। ४०॥

उपस्थितिः—उपस्थानम्, ब्रह्मोपसम्पन्ने सर्वबन्धविनिर्मुक्ते स्वेन रूपेणाभिनिष्पन्ने प्रत्यगात्मनि अत एव—उपसम्पत्तेरेव हेतोस्सर्वेषु लोकेषु कामचार उच्यते ३"परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुषः स तत्र पर्येति जक्षत्क्रीडन्रममाणः स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वा नोपजनं स्मरन्निदं शरीरं स स्वराड्भवति तस्य सर्वेषु लोकेषु कामचारो भवति" इति। तदेतच्चतुर्थे निपुणतरमुपपादयिष्यते। अतस्सर्वेषु लोकेषु कामचारस्य मुक्तोपभोग्यफलत्वात् मुमुक्षोस्सत्यकामत्वादयो गुणा उपसंहार्याः ॥ ४० ॥

इति श्रीशारीरकमीमांसाभाष्ये कामाद्यधिकरणम् ॥ १६ ॥

---

१. बृ. ६-४-२२ ॥—२. छा. ८-१-५, ६ ॥—३. छा. ८-३-४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वेदान्तसारे–कामादीतरत्र तत्र चायतनादिभ्यः ॥ १"दहरोऽस्मिन्नन्तर आकाशस्तस्मिन्यदन्तस्तदन्वेष्टव्यम्" इत्युक्त्वा २"एष आत्माऽपहतपाप्मा" इत्यारभ्य, २"सत्यकामस्सत्यसङ्कल्पः" इति च्छान्दोग्ये; वाजिनाञ्च ३"य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते सर्वस्य वशी सर्वस्येशानः" इति। उभयत्र हृदयायतनत्वसत्यसङ्कल्पत्वतद्विशेषरूपवशित्वादिभिर्दहरविद्याप्रत्यभिज्ञानात् सत्यसङ्कल्पत्वसहचरिणोऽपहतपाप्मत्वादिसत्यसङ्कल्पत्वपर्यन्ताः उभयत्रोपसंहार्याः ॥ ३८ ॥

आदरादलोपः ॥ ४"नेह नानाऽस्ति किञ्चन" ५"स एष नेतिनेत्यात्मा" इति निषेधो न वशित्वादिगुणविषयः ५"सर्वस्य वशी सर्वस्येशानः" इति तेषामज्ञातानामादरेण विधानात्; अतो न लोपः। सर्वस्य ब्रह्मकार्यतयैक्यात् ४"नेह नानाऽस्ति" इत्यब्रह्मात्मकनानात्वं प्रतिषिध्यते, ५"स एष नेतिनेत्यात्मा" इति च ६प्राकृतविशेषविषयम् ॥ ३९ ॥

उपस्थितेऽतस्तद्वचनात् ॥ उपस्थिते-ब्रह्मोपसंपन्ने, अतः-उपसंपत्तेरेव हेतोः, ५"अक्षत्क्रीडन्नममाणः" इत्यादिना छन्दतो ब्राह्म्यादिप्राप्त्यभिधानात्, साक्षान्मोक्षफलं तत्, न सांसारिकफलमिति पराविद्यैवैषा सगुणा ॥ ४० ॥

इति वेदान्तसारे कामाद्यधिकरणम् ॥ १६ ॥

वेदान्तदीपे—कामादीतरत्र तत्र चायतनादिभ्यः ॥ छान्दोग्ये श्रूयते १"अथ यदिदमस्मिन्ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तर आकाशस्तस्मिन्यदन्तस्तदन्वेष्टव्यम्" इत्यादि प्रक्रम्य ७"तद्य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान्कामांस्तेषां सर्वेषु लोकेषु कामचारो भवति" इति; वाजसनेयके च ३"य एषोऽन्तर्हृदय आकाशस्तस्मिन् शेते सर्वस्य वशी सर्वस्येशानः" इत्यादि; किमुभयत्र विद्यैक्यम्, अत विद्याभेद इति संशयः; रूपभेदाद्विद्याभेद इति पूर्वः पक्षः; यद्यप्युभयत्र परमात्मैवोपास्यः, तथाप्येकत्राकाशशब्दाभिधेयः परमात्मोपास्यः, इतरत्राकाशे शयानः परमात्मेति हि रूपं भिद्यते। राद्धान्तस्तु—हृदयायतनत्वसत्यसङ्कल्पत्वसत्यकामत्वादेरभेदादुभयत्र तद्विशिष्टः परमात्मैवोपास्य इति रूपाभेदाद्विद्यैक्यम्; छान्दोग्ये हि १"दहरोऽस्मिन्नन्तर आकाशस्तस्मिन्यदन्तस्तदन्वेष्टव्यम्" इत्यारभ्य, ८"किं तदत्र विद्यते" इत्या-

१. छा. ८-१ १ ॥—२. छा. ८-१-५॥—३.बृ.६-४-२२॥—४.बृ.६-४-१९॥—५. छा.८-१२-३॥—६. प्रकृतविशेषविषयः. पा॥—७.छा. ८-१-६॥—८.छा. ८-१-२॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दिना परिचोद्य, १"तस्मिन्कामास्समाहिताः एष आत्माऽपहतपाप्मा विजरो विमृत्युः" इत्यारभ्य १"सत्यकामस्सत्यसङ्कल्पः" इत्युक्त्वा, २"तद्य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान्कामान्" इत्याकाशशब्दनिर्दिष्टः परमात्मा; तदन्तर्गताश्च सत्यकामत्वसत्यसङ्कल्पत्वापहतपाप्मत्वादयो गुणाः। अतः परमात्मा हृदयायतनः सत्यकामत्वादिविशिष्टः उपास्य इति वाक्येनैव निर्णीतम्। वाजसनेयके च ३"य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते सर्वस्य वशी" इत्युक्ते सति वशित्वादेस्सत्यसङ्कल्पत्वविशेषरूपतया स एव परमात्मा हृदयायतनस्सत्यसङ्कल्पत्वविशिष्ट उपास्य इति प्रतीयते। अतो दहरविद्याप्रत्यभिज्ञानात्स एव परमात्मा सत्यसङ्कल्पत्वादिगुणाष्टकविशिष्ट उपास्य इति निश्चीयते। एवं निश्चिते सत्याकाशे शयान इत्याकाशशब्दोऽपि हृदयपुण्डरीकवर्त्याकाशवाचीति रूपाभेदाद्विद्यैक्यमेव॥

सूत्रार्थस्तु—कामादीतरत्र तत्र च—वाजसनेयके च्छान्दोग्ये च सत्यकामत्वाद्येव रूपम्; कुतः? आयतनादिभ्यः हृदयायतनत्वसत्यसङ्कल्पत्वविशेषरूपवशित्वादिभ्यस्तत्सहचारिणस्सत्यकामत्वादेः प्रत्यभिज्ञानात्। ४"परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते" ५"अभयं वै ब्रह्म भवति" इति ब्रह्मप्राप्तिरूपं फलं चैकमिति विद्यैक्यम्॥ ३८॥

६"मनसैवानुद्रष्टव्यं नेह नानाऽस्ति किञ्चन" इत्यादेः पूर्वप्रकृतत्वात्, ७"एष नेति नेत्यात्मा" इति च वक्ष्यमाणत्वात्, ६"सर्वस्य वशी सर्वस्येशानः" इत्यादिविशेषाणां ब्रह्मस्वरूपत्वाभावात् कथं सत्यकामत्वादेर्मोक्षसाधनोपासनरूपत्वमित्यत आह—

आदरादलोपः॥ वशित्वादेः प्रमाणान्तराविदितरूपस्य श्रुत्येकसमधिगम्यस्यादरेण प्रतिपादनादलोपः-अप्रतिषेधः; तस्यापि ब्रह्मगुणत्वमवश्याश्रयणीयम्; ८अविशेष निषेधास्तु सकलेतरप्राकृतविशेषविषयाः,नानात्वनिषेधस्तु सर्वस्य ब्रह्मकार्यतयाऽब्रह्मात्मकत्वाभिप्रायः॥ ३९॥

सगुणोपासनस्य९"स यदि पितृलोककामो भवति" इति सांसारिकफलत्वेन न मोक्षफलत्वमित्याशङ्क्याह—

उपस्थितेऽतस्तद्वचनात्॥ उपस्थितिः - उपस्थानम्, ब्रह्मोपसम्पत्तिः; उपस्थिते-ब्रह्मोपसम्पन्ने, अतः ब्रह्मोपसंपत्तेरेव हेतोः, तद्वचनात्-पितृलोकादि.

---

१. छा. ८-१-५॥—२. छा.८-१-६॥—३. बृ. ६-४-२२॥—४. छा. ८-३-४। —५. बृ. ६-४-२५॥—६. बृ.६-४-१९॥—७.बृ.६-४-२२॥—८. विशेषनिषेधा.पा। —९. छा.८-२,१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्राप्तिवचनात् न तत्सांसारिकं फलम् ,अपितु साक्षान्मुक्तस्यैव, १"अस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते । स उत्तमः पुरुषः स तत्र पर्येति जक्षत्क्रीडन्रममाणः स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वा नोपजनं स्मरन्निदं शरीरम्" इति २"स स्वराड्भवति तस्य सर्वेषु लोकेषु कामचारो भवति" इतिच निवृत्ताविद्यस्य हि स्वेन रूपेणाभिनिष्पन्नस्यैवोच्यतेः अतो ब्रह्मोपसम्पत्तिहेतुकत्वं क्रीडनादेरवगम्यते ॥ ४० ॥

इति वेदान्तदीपे कामाद्यधिकरणम् ॥ १६ ॥

(श्रीशारीरकमीमांसाभाष्ये तन्निर्धारणानियमाधिकरणम्॥)

तन्निर्धाणानियमस्तदृष्टेः पृथग्ध्यप्रतिबन्धः फलम् । ३ । ३ । ४१ ॥

३ "ओमित्येतदक्षरमुद्गीथमुपासीत" इत्यादीनि कर्माङ्गाश्रयाण्युपासनानि कर्माङ्गभूतोद्गीथादिमुखेन जुह्वादिमुखेन पर्णतादिवत् कर्माङ्गत्वेन निरूढानुष्ठानानीत्युद्गीथाद्युपासनसम्बन्धिनो ४ "यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति" इति वर्तमाननिर्देशस्य पर्णतादिसम्बन्ध्यपापश्लोकश्रवणवत्पृथक्फलत्वकल्पनायोगात्क्रतुषु नियमेनोपसंहार्याणीति ॥

(सिद्धान्तः)

एवं प्राप्ते प्रचक्ष्महे–तन्निर्धारणानियमः–इति । निर्धारणं-निश्चयेन मनसोऽवस्थापनम्, ध्यानमित्यर्थः; तन्निर्धारणानियमः-कर्मोद्गीथाद्युपासनानामनियमः; कुतः? तदृष्टेः-उपलभ्यते द्युपासनानुष्ठानानियमः–४"तेनोभौ कुरुतो यश्चैतदेवं वेद यश्च न वेद" इत्यविदुषोऽप्यनुष्ठानवचनात् । नचाङ्गत्वे सत्युपासनस्यानुष्ठानानियम उपपद्यते । एवमुपासनस्यानङ्गत्वे निश्चिते सत्युपासनविधेः फलाकाङ्क्षायां रात्रिसत्रन्यायेन वीर्यवत्तरत्वं कर्मफलात्पृथग्भूतं फलमित्यवगम्यते । किमिदं वीर्यवत्तरत्वम्?

१. छा. ८-३-४ ॥—२. छा. ७-२५-२ ॥—३. छा. १-१-१॥—४.छा.१-१-१०॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कर्मफलस्यैवाप्रतिबन्धः । प्रतिबध्यते हि कर्मफलं प्रबलकर्मान्तरफलेन तावन्तं कालम्;तदभावोऽप्रतिबन्धः । स चाप्रतिबन्धः कर्मफलात्स्वर्गादिलक्षणात्पृथग्भूतमेव फलम् । तदिदमुच्यते-पृथग्ध्यप्रतिबन्धः फलमिति । अतः कर्माङ्गाश्रयाणामपि पृथक्फलत्वाद्गोदोहनादिवत्कर्मसमुद्गीथाद्युपासनानामनियमेनोपसंहारः ॥ ४१ ॥

इति श्रीशारीरकमीमांसाभाष्ये तन्निर्धारणानियमाधिकरणम् ॥ १७ ॥

वेदान्तसारे—तन्निर्धारणानियमस्तद्दृष्टेः पृथग्ध्यप्रतिबन्धः फलम्॥

उद्गीथाद्युपासनस्य क्रतुषु गोदोहनादिवदुपादानानियमः १"तेनोभौ कुरुतो यश्चैतदेवं वेद यश्च न वेद" इत्युद्गीथोपासनरहितस्यापि क्रत्वनुष्ठानदर्शनात् । १"यदेव विद्यया करोति तदेव वीर्यवत्तरम्" इति वर्तमाननिर्देशेऽपि क्रतुवीर्यवत्तरत्वसाधनतयोपासनविधिः कल्प्यते । वीर्यवत्तरत्वञ्च प्रबलकर्मान्तराप्रतिबन्धेनाविलम्बितफलत्वम् । अतः क्रतुफलात्पृथक्फलमुद्गीथोपासनमित्यनियमः ॥ ४१ ॥

इति वेदान्तसारे तन्निर्धारणानियमाधिकरणम् ॥ १७ ॥

वेदान्तदीपे—तन्निर्धारणानियमस्तद्दृष्टेः पृथग्ध्यप्रतिबन्धः फलम्॥

छान्दोग्ये २ 'ओमित्येतदक्षरमुद्गीथमुपासीत" इति कर्माङ्गाश्रयमुद्गीथाद्युपासनं श्रूयते; तत्किं तस्मिन्कर्मणि पर्णतादिवन्नियमेनोपादेयम्, उत गोदोहनादिवदनियमेनेति संशयः । कर्माङ्गाश्रयत्वेन पर्णतादिवत्तद्द्वारेण निरूढकार्यतया १"यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति"इति वर्तमाननिर्देशस्य पृथक्फल३प्रतिपादनायोगात् क्रत्वर्थतया नियमेनोपादेयमिति पूर्वः पक्षः। राद्धान्तस्तु—१"तेनोभौ कुरुतो यश्चैतदेवं वेद यश्च न वेद" इत्युद्गीथोपासनरहितस्यापि क्रत्वनुष्ठानदर्शनात्क्रतुफलात्स्वर्गादेः पृथग्भूतवीर्यवत्तरत्वफलभिदमुपासनमिति गोदोहनादिवदनियमः । वर्तमाननिर्देशे सत्यप्यधिकारान्तरनिश्चये सति रात्रिसत्रवत् क्रतोर्वीर्यवत्तरत्वमस्योपासनस्य कल्पनीयम्। सूत्रार्थस्तु —तन्निर्धारणानियमः—निर्धारणम्-निश्चयेन चेतसोऽवधारणम्, उपासनभि-

---

१. छा. १-१-१० ॥—२. छा. १-१-१ ॥—३. प्रतिपादकत्वायोगात्. पा ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्यर्थः; तस्य उद्गीथोपासनस्यानियमः; कुतः? तद्दृष्टेः—१"तेनोभौ कुरुतः" इत्यनियमदृष्टेः; पृथग्भूतं ह्यस्य फलम्; तच्चाप्रतिबन्धरूपम्; वीर्यवत्तरत्वं नाम-प्रबलकर्मान्तरफलेनैतस्य कर्मणः फलस्याप्रतिबन्धः, अविलम्बितत्वमित्यर्थः॥४१॥

इति वेदान्तदीपे तन्निर्धारणानियमाधिकरणम् ॥ १७ ॥

श्रीशारीरकमीमांसाभाष्ये प्रदानाधिकरणम् ॥ १८ ॥

प्रदानवदेव तदुक्तम् । ३ । ३ । ४२ ॥

दहरविद्यायां २"तद्य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान्कामान्" इति दहराकाशस्य परमात्मन उपासनमुक्त्वा २"एतांश्च सत्यान्कामान्" इति गुणानामपि पृथगुपासनं विहितम्। तत्र संशयः—गुणचिन्तनेऽपि तत्तद्गुणविशिष्टतया दहरस्यात्मनश्चिन्तनमावर्तनीयम्, उत नेति। दहराकाशस्यैवापहतपाप्मत्वादीनां गुणित्वात्तस्य च सकृदेवानुसन्धातुं शक्यत्वाद्गुणार्थं तच्चिन्तनं नावर्तनीयम्—

(सिद्धान्तः)

इति प्राप्ते उच्यते—प्रदानवदेव—इति। प्रदानवदावर्तनीयमेवेत्यर्थः। यद्यपि दहराकाश एक एवापहतपाप्मत्वादिगुणानां गुणी; स च प्रथमं चिन्तितः; तथाऽपि स्वरूपमात्राद्गुणविशिष्टाकारस्य भिन्नत्वात् ३"अपहतपाप्मा विजरः" इत्यादिना गुणविशिष्टतया चोपास्यत्वेन विहितत्वात्पूर्वं स्वरूपेणानुसंहितस्यापहतपाप्मत्वादिविशिष्टतयाऽनुसन्धानार्थमावृत्तिः कर्तव्या; यथा ४"इन्द्राय राज्ञे पुरोडाशमेकादशकपालं निर्वपेत्" ४"इन्द्रायाधिराजाय" ४"इन्द्राय स्वराज्ञे" इतीन्द्रस्यैव राजत्वादिगुणविशिष्टत्वेऽपि तत्तद्गुणसम्बन्ध्याकारस्य भिन्नत्वात्प्रदानावृत्तिः क्रियते; तदुक्तं साङ्कर्षणे ५"नाना वा देवता पृथक्त्वात्" इति ॥ ४२ ॥

इति श्रीशारीरकमीमांसाभाष्ये प्रदानाधिकरणम् ॥ १८ ॥

---

१. छा. १-१-१०॥—२. छा. ८-१-६॥—३. छा. ८-१-५ ॥— ४. यजु-२. कां. ३-प्र. ६-अनु ॥—५. संकर्षणकाण्डे ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वेदान्तसारे—प्रदानवदेव तदुक्तम् ॥ दहरविद्यायामपहतपाप्मत्वादिगुणविशिष्टोपासने, तत्तद्गुणविशिष्टस्वरूपभेदात् प्रतिगुणं गुण्यावृत्तिः; १"इन्द्राय राज्ञे" इत्यादिषु विशिष्टस्वरूपभेदात्प्रदानावृत्तिवत् । तदुक्तं २"नाना वा देवता पृथक्त्वात्" इति ॥ ४२ ॥

इति वेदान्तसारे प्रदानाधिकरणम् ॥ १८ ॥

वेदान्तदीपे—प्रदानवदेव तदुक्तम् ॥ दहरविद्यायां ३"तद्या इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान् कामान्" इत्यपहतपात्मत्वादिगुणानामपि परमात्मस्वरूपचिन्तनवत्पृथक्चिन्तनं विहितम्।किं गुणचिन्तने तत्तद्गुणविशिष्टतया परमात्मचिन्तनमावर्तनीयम्, उत नेति संशयः । परमात्मन एकस्यैव सर्वेषां गुणानां गुणित्वेन सकृदेव तच्चिन्तनोपपत्तेर्नावर्तनीयमिति पूर्वः पक्षः । राद्धान्तस्तु—गुणिनस्स्वरूपैक्येऽपि तत्तद्गुणविशिष्टाकारभेदादावर्तनीयम्—इति । सूत्रार्थस्तु—प्रदानवदावर्तनीयमेव, यथा १"इन्द्राय राज्ञे पुरोडाशमेकादशकपालमिन्द्रायाधिराजायेन्द्राय स्वराज्ञे" इतीन्द्रस्यैकत्वेऽपि राजत्वादिविशिष्टाकारभेदादेवताभेद इति प्रदानावृत्तिः; तद्वदेव। तदुक्तं सङ्कर्षे२"नाना वा देवता पृथक्त्वात्" इति ॥ ४२ ॥

इति वेदान्तदीपे प्रदानाधिकरणम् ॥ १८ ॥

(श्रीशारीरकमीमांसभाष्ये लिङ्गभूयस्त्वाधिकरणम् ॥)

लिङ्गभूयस्त्वात्तद्धि बलीयस्तदपि । ३ । ३ । ४३ ॥

तैत्तिरीया दहरविद्यानन्तरमधीयते ४"सहस्रशीर्षं देवं विश्वाक्षं विश्वशम्भुवम् । विश्वं नारायणं देवमक्षरं परमं प्रभुम्" इत्यारभ्य "सोऽक्षरः परमस्स्वराट्" इत्यन्तम् । तत्र संशयः—किं पूर्वप्रकृतविद्यैकविद्यात्वेन तदुपास्यविशेषनिर्धारणमनेन क्रियते, उत सर्ववेदान्तोदितपरविद्योपास्यविशेषनिर्धारणम्—इति। किं युक्तम्? दहरविद्योपास्यवि-

१. यजु-२. कां-३. प्र-६-अनु ॥—२.संकर्षणकाण्डे ॥—३. छा. ८-१-६ ॥—४. तै. ना-१-अनु ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शेषनिर्धारणमिति । कुतः? प्रकरणात् । पूर्वस्मिन्ननुवाके दहरविद्याहि प्रकृता १"दहं विपाप्मं परवेश्मभूतं यत्पुण्डरीकं पुरमध्यसंस्थम् । तत्रापि दहं गगनं विशोकस्तस्मिन्यदन्तस्तदुपासितव्यम्" इति । अस्मिंश्चानुवाके २"पद्मकोशप्रतीकाशं हृदयं चाप्यधोमुखम्" इत्यादिना हृदयपुण्डरीकाभिधानमस्य नारायणानुवाकस्य दहरविद्योपास्यनिर्धारणार्थत्वमुपोद्बलयतीति ॥

एवं प्राप्ते प्रचक्ष्महे–लिङ्गभूयस्त्वात्—इति । अस्य निखिलपरविद्योपास्यविशेषनिर्धारणार्थत्वे भूयांसि लिङ्गानि दृश्यन्ते ; तथा हि –परविद्यास्वक्षरशिवशम्भुपरब्रह्मपरज्योतिःपरतत्त्वपरमात्मादिशब्दनिर्दिष्टमुपास्यं वस्त्विह तैरेव शब्दैरनूद्य तस्य नारायणत्वं विधीयते ; भूयसीषु विद्यासु श्रुताननूद्य नारायणत्वविधानभूयस्त्वं नारायण एव सर्वविद्यासूपास्यमस्थूलत्वादिविशेषितानन्दादिगुणकं परं ब्रह्मेति विशेषनिर्णये भूयः बहुतरं लिङ्गं भवति । अत्र लिङ्गशब्दः चिह्नपर्यायः । चिह्नभूतं वाक्यं बहुतरमस्तीत्यर्थः । तद्धि प्रकरणाद्बलीयः । तदप्युक्तं प्रथमकाण्डे ३"श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये परदौर्बल्यमर्थविप्रकर्षात्" इति । यत्तूक्तं २"पद्मकोशप्रतीकाशम्" इत्यादिवचनं दहरशेषत्वमस्योपोद्बलयति—इति ; तन्न, बलीयसा प्रमाणेन सर्वविद्योपास्यनिर्धारणार्थत्वेऽवधूते सति दहरविद्यायामपि तस्यैव नारायणस्योपास्यत्वेन तद्वचनोपपत्तेः । नच २"सहस्रशीर्षम्" इत्यादिद्वितीयानिर्देशेन पूर्वानुवाकोदितोपासिना सम्बन्धश्शङ्कनीयः, १"तस्मिन् यदन्तस्तदुपासितव्यम्" इत्युपासिगतेन कृत्प्रत्ययेनोपास्यस्य कर्मणोऽभिहितत्वात्तदुपास्ये द्वितीयानुपपत्तेः । २"विश्वमेवेदं पुरुषः" २"तत्त्वं नारायणः परः" इत्यादिप्रथमानिर्देशाच्च प्रथमार्थे द्वितीया वेदितव्या । २"अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः" २"तस्याश्शिखाया

१. तै. ना. १०-अनु ॥—२. तै. ना. ११-अनु ॥—३. पूर्वमीमांसासू ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मध्ये परमात्मा व्यवस्थितः। स ब्रह्मा स शिवस्सेन्द्रः सोऽक्षरः परमस्स्वराट्" इति निर्देशैस्सर्वस्मात्परो नारायण एव सर्वत्रोपास्य इति निर्णीयमानत्वाच्च प्रथमार्थे द्वितीयेति निश्चीयते ॥ ४२ ॥

इति श्रीशारीरकमीमांसाभाष्ये लिङ्गभूयस्त्वाधिकरणम् ॥ १९ ॥

वेदान्तसारे—लिङ्गभूयस्त्वात्तद्धि बलीयस्तदपि ॥ १"सहस्रशीर्षं देवम्" इत्यत्र नारायणशब्देन प्रकृतदहरविद्योपास्यमात्रं न विशेष्यते, अपितु सर्वपरविद्यासूपास्यम्, तच्चिह्नभूतवाक्यभूयस्त्वादेव। अक्षरशिवशम्भुपरब्रह्मादिशब्दैस्सर्वोपास्याननूद्य नारायणत्वं हि विधीयते। प्रकरणाद्धि वाक्यं बलीयः। तदपि २"श्रुतिलिङ्ग" इत्यादिनोक्तम् ॥ ४३ ॥

इति वेदान्तसारे लिङ्गभूयस्त्वाधिकरणम् ॥ १९ ॥

वेदान्तदीपे—लिङ्गभूयस्त्वात्तद्धि बलीयस्तदपि ॥ तैत्तिरीया अधीयते १"सहस्रशीर्षं देवम्" इत्यारभ्य १"सोऽक्षरः परमस्स्वराट्" इत्यन्तम्। अस्मिन्ननुवाके नोपासनं विधीयते। किमयं पूर्वानुवाकोदितदहरविद्योपास्यविशेषनिर्धारणार्थः, उत सर्ववेदान्तोदितसर्वपरविद्योपास्यविशेषनिर्धारणार्थ इति संशयः। दहरविद्याया आनन्तर्यात्तदुपास्यविशेषनिर्धारणार्थ इति पूर्वः पक्षः, १"सहस्रशीर्षं देवम्"इति द्वितीयानिर्देशस्यानन्तरोदितोपासिना सम्बन्धस्यैव युक्तत्वाच्च। राद्धान्तस्तु—परब्रह्मपरतत्त्वपरज्योतिः परमात्माक्षरशिवशम्भुशब्दैस्सर्वपरविद्योपास्याननूद्य वाक्येनैव तेषां नारायणत्वविधानात्तस्य च प्रकरणाद्बलीयस्त्वेन सर्वविद्योपास्यनिर्धारणार्थ इति निश्चीयते। नच १"सहस्रशीर्षम्" इति द्वितीयानिर्देशः पूर्वेणोपासिना सम्बध्यते, २"तस्मिन्यदन्तस्तदुपासितव्यम्"इति कृत्प्रत्ययेन कर्माभिहितमिति तत्र द्वितीयानिर्देशायोगात्। १"नारायणः परः" १"व्याप्य नारायणस्स्थितः" १"परमात्मा व्यवस्थितः" इत्यादिभिरैकार्थ्यात्प्रथमार्थे द्वितीया। सूत्रार्थस्तु—सर्वपरविद्योपास्यनिर्धारणे लिङ्गभूयस्त्वात् तच्चिह्नभूतवाक्यभूयस्त्वादित्यर्थः। तद्धि-वाक्यं प्रकरणाद्बलीयतदपि पूर्वस्मिन्काण्डे २"श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्" इत्यादिनोक्तम्। एवं सर्वोपास्यनिर्धारणे निश्चिते सति

१. तै. ना. ११-अनु ॥—२. पूर्वमीमांसासू ॥—३. तै. ना. १०-अनु ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दहरविद्यायामप्ययमेवोपास्य इति [१]"पद्मकोशप्रतीकाशम्" इत्यादिना हृदयाद्यभिधानं च युज्यत इत्यभिप्रायः ॥ ४३ ॥

इति वेदान्तदीपे लिङ्गभूयस्त्वाधिकरणम् ॥ १९ ॥

श्रीशारीरकमीमांसाभाष्ये पूर्वविकल्पाधिकरणम्॥२०॥

पूर्वविकल्पः प्रकरणात्स्यात्क्रिया मानसवत् । ३ । ३ । ४४ ॥

वाजसनेयके अग्निरहस्ये मनश्चितादयोऽग्नयः श्रूयन्ते—[२]"मनश्चितो वाक्चितः प्राणचित चक्षुश्चितः श्रोत्रचितः कर्मचितोऽग्निचितः" इति । तत्र संशयः—किमेते मनश्चितादयस्साम्पादिकत्वेन विद्यारूपा अग्नयः क्रियामयक्रत्वनुप्रवेशेन क्रियारूपाः, आहोस्विद्विद्यामयक्रत्वनुप्रवेशेन विद्यारूपा एव—इति विशये क्रियारूपत्वं तावदाह—पूर्वविकल्पः—इत्यादिना । चित्याग्नित्वेन सम्पादितानामेषां मनश्चितादीनां क्रत्वनुप्रवेशसाकाङ्क्षाणां स्वदेशे क्रतुविध्यभावात्पूर्वत्र [३]"असद्वा इदमग्र आसीत्" इत्यादिनेष्टकचितस्याग्नेः प्रकृतत्वात् तस्य च क्रियामयक्रत्वव्यभिचारित्वेन तत्र क्रतुसन्निधानात्तत्प्रकरणगृहीता मनश्चितादयस्तेनेष्टकचितेनाग्निना विकल्प्यमानाः क्रियारूपा एव स्युः । विद्यारूपाणामपि क्रियामयक्रत्वनुप्रवेशेन क्रियारूपत्वं मानसग्रहवदुपपद्यते । यथा द्वादशाहे अविवाक्ये दशमेऽहनि मानसग्रहस्य मनोनिष्पाद्यग्रहणासादनस्तोत्रशस्त्रप्रत्याहरणभक्षणत्वेन विद्यारूपस्यापि क्रियामयक्रत्वङ्गतया क्रियारूपत्वम् ; तथेहापि ॥ ४४ ॥

अतिदेशाच्च । ३ । ३ । ४५ ॥

---

१. तै. ना. ११-अनु ॥—२ ॥—३. ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इतश्चेष्टकचितेनाग्निना मनश्चितादीनां विकल्पः क्रियारूपत्वं चावगम्यते ; १"तेषामेकैक एव तावान् यावानसौ पूर्वः" इति पूर्वस्येष्टकचितस्याग्नेर्वीर्यं मनश्चितादिष्वतिदिश्यते ; तेन तुल्यकार्यत्वाद्विकल्पः । ततश्चेष्टकचितवत्तत्क्रतुनिर्वर्तनेन तदङ्गभूताः मनश्चितादयः २(क्रियामयक्रत्वनुप्रवेशेन) क्रियारूपा एवेति ॥ ४५ ॥

एवं प्राप्ते प्रचक्ष्महे—

विद्यैव तु निर्धारणाद्दर्शनाच्च । ३ । ३ । ४६ ॥

तुशब्दः पक्षं व्यावर्तयति ; यदुक्तं मनश्चितादयः क्रियामयक्रत्वनुप्रवेशेन क्रियारूपा एवेति ; नैतदस्ति ; विद्यारूपा एवैते—विद्यारूपक्रत्वन्वयिन इत्यर्थः । कुतः ? निर्धारणादर्शनाच्च; निर्धारणं तावत्—३"ते हैते विद्याचित एव विद्यया हैवैत एवंविदश्चिता भवन्ति" इति ; वाङ्मनश्चक्षुरादिव्यापाराणामिष्टकादिवच्चयनानुपपत्तेर्मनसा सम्पादिताग्नित्वेन विद्यारूपत्वे सिद्धेऽपि ३"विद्याचित एव" ३"विद्यया हैवैते" इति चावधारणं विद्यामयक्रत्वन्वयेन विद्यारूपत्वज्ञापनार्थमिति निश्चीयते । दृश्यते चात्रैवैषां शेषी विद्यारूपः क्रतुः ४" ते मनसैवाधीयन्त मनसैवाचीयन्त मनसैषु ग्रहा अगृह्यन्त मनसास्तुवन्त मनसाशंसन् यत्किञ्च यज्ञे कर्म क्रियते, यत्किञ्च यज्ञीयं कर्म मनसैव तेषु मनोमयेषु मनश्चित्सु मनोमयमक्रियत" इति । इष्टकचितेष्वग्निषु यत्क्रियामयं यज्ञीयं कर्म क्रियते, तन्मनोनिर्वर्त्येषु मनश्चित्याग्निषु मनोमयमेवाक्रियतेति वचनात् क्रतुरपि विद्यामयोऽत्र प्रतीयते ॥ ४६ ॥

नन्वत्र विधिपदाश्रवणात् फलसम्बन्धाप्रतीतेश्चेष्टकचिताग्न्युपस्थापितक्रियामयक्रतुप्रकरणाद्विद्यामयक्रत्वन्वयेन विद्यारूपतैषां बाध्यते, नेत्याह—

श्रुत्यादिबलीयस्त्वाच्च न बाधः । ३ । ३ । ४७ ॥

१. ॥—२. कुण्डलितग्रन्थः केषुचित्कोशेषु न दृश्यते ॥—३ ॥—४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रुतिलिङ्गवाक्यानां प्रकरणाद्बलीयस्त्वेन श्रुत्याद्यवगतः क्रतुरेषां तदन्वयश्च दुर्बलेन प्रकरणेन बाधितुं न शक्यते; श्रुतिस्तावत्–[१]"ते हैते विद्याचित एव" इति। तां विवृणोति [१]"विद्यया हैवैत एवंविदश्चिता भवन्ति" इति। विद्यया विद्यामयेन क्रतुना सम्बद्धा मनश्चितादयश्चिता भवन्तीत्यर्थः। [२]"तान् हैतानेवंविदे सर्वदा सर्वाणि भूतानि चिन्वन्त्यपि स्नपते" इति लिङ्गम्। वाक्यं च [३]"एवंविदे चिन्वन्ति" इति। समभिव्याहारो वाक्यम्। एवंविदे विद्यामयक्रतुमते सर्वदा सर्वाणि भूतानि चिन्वन्तीत्यर्थः। सर्वभूतकर्तृकं सर्वकालव्यापि चयनं मनसा सम्पादितं परिमितकर्तृकालक्रियामयेष्टकचितकार्यद्वारेण क्रत्वनुप्रवेशसम्भवमलभमानं विद्यामयक्रत्वनुप्रवेशे लिङ्गं भवति ॥ ४७ ॥

यच्चेदमुक्तं – विधिप्रत्ययाश्रवणात्फलसम्बन्धाप्रतीतेश्च क्रियामयात्क्रतोरन्योऽत्र विद्यामयः क्रतुर्न सम्भवति–इति, तत्राह—

अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववद्दृष्टश्च तदुक्तम् । ३ । ३ । ४८ ॥

इष्टकचितान्वयिनः क्रियामयात्क्रतोर्विद्यामयोऽयं क्रतुः पृथक्त्वेन अनुबन्धादिभ्यः पृथक्त्वहेतुभ्योऽवगम्यते। अनुबन्धाः यज्ञानुबन्धिनो ग्रहस्तोत्रशस्त्रादयः [४]"मनसैषु ग्रहा अगृह्यन्त मनसास्तुवन्त मनसाशंसन्" इत्यादिना प्रतिपादिताः। आदिशब्देन श्रुत्यादयः पूर्वोक्ता गृह्यन्ते। श्रुत्यादिभिस्सानुबन्धैः विद्यामयक्रतुः पृथगवगम्यत इत्यर्थः। प्रज्ञान्तरपृथक्त्ववत्–यथा प्रज्ञान्तरं दहरविद्यादि क्रियामयात्क्रतोः पृथग्भूतं श्रुत्यादिभिरवगम्यते, एवमयमपि। एवं चानुबन्धादिभिः पृथग्भूते विद्यामये यज्ञेऽवगते सति विधिः परिकल्प्यते। दृष्टश्चानुवादसरूपेषु क-

१ ॥—२ ॥—३ ॥—४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ल्प्यमानो विधिः। तदुक्तं–१"वचनानि त्वपूर्वत्वात्" इति। फलं च २"तेषामेकैक एव तावान् यावानसौ पूर्वः" इत्यतिदेशात् स्वक्रतुद्वारेणेष्टकचितस्याग्नेर्यत्फलम्, तदेव मनश्चितादीनामपि स्वक्रतुद्वारेण फलमित्यवगम्यते ॥ ४८ ॥

यत्पुनरतिदेशेन तुल्यकार्यत्वावगमात्क्रियामयक्रत्वनुप्रवेशोऽवगम्यत इत्युक्तम्, तत्राह—

न सामान्यादप्युपलब्धेर्मृत्युवन्न हि लोकापत्तिः। ३। ३। ४९ ॥

नावश्यमतिदेशादवान्तरव्यापारस्यापि तुल्यतया भवितव्यम्, येन क्रियामयक्रत्वनुप्रवेश एषां स्यात्, यस्मात्कस्माच्चित्सामान्यमात्रादतिदेशोपलब्धेः; उपलभ्यते हि ३"स एष एव मृत्युर्य एष एतस्मिन् मण्डले पुरुषः" इत्यादिषु संहर्तृत्वादिसामान्यमात्रादतिदेशः; नहि तत्र मण्डलपुरुषस्य मृत्युवत्तल्लोकापत्तिः-तद्देशप्राप्तिरपि भवति; एवमिहापि मनश्चितादीनामिष्टकचिताग्निवद्भावातिदेशमात्रेणेष्टकचिताग्निदेशरूपक्रियामयक्रत्वनुप्रवेशेनापि न भवितव्यम्। अत इष्टकचिताग्नेः स्वक्रतुद्वारेण यत्फलम्, तदेव मनश्चितादीनामपि विद्यामयक्रतुद्वारेण फलमित्यतिदेशादवगम्यते॥

परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्त्वनुबन्धः। ३। ३। ५० ॥

परेण च ब्राह्मणेनास्यापि मनश्चिताद्यभिधायिनः शब्दस्य ताद्विध्यं–तद्विधत्वम्, विद्यामयप्रतिपादित्वमवगम्यते; परेणहि ब्राह्मणेन ४ "अयं वाव लोक एषोऽग्निचितस्तस्याप एव परिश्रिताः" इत्यादिना ५"स यो हैतदेवं वेद लोकंपृणानामेनं भूतमेतत्सर्वमभिसम्पद्यते" इति

१. पू. मी. ३-५-२१ ॥—२ ॥—३ ॥—४ ॥—५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पृथक्फला विद्यैव विधीयते, तथा वैश्वानरविद्यादौ च विद्यैव विधीयते। अतोऽग्निरहस्यस्य क्रियैकविषयत्वं नास्ति। एवं तर्हि विद्यामया मनश्चितादयो बृहदारण्यकेऽनुबद्धव्याः, किमर्थमिहानुबध्यन्ते;तत्रोच्यते—भूयस्त्वाच्चानुबन्धः—इति। मनश्चितादिषु सम्पादनीयानामग्न्यङ्गानां भूयस्त्वात्सन्निधाविहानुबन्धः कृतः ॥ ५० ॥

इति श्रीशारीरकमीमांसाभाष्ये पूर्वविकल्पाधिकरणम् ॥ २० ॥

वेदान्तसारे—पूर्वविकल्पः प्रकरणात्स्यात्क्रिया मानसवत्॥ १"मनश्चितो वाक्चितः प्राणचितः" इत्यादिसांपादिकाग्नीनाम् २ "असद्वा इदमग्र आसीत्" इत्यादिना पूर्वप्रकृतेष्टकचिताग्निशेषिभूतक्रियामयकत्वनुप्रवेशस्स्यात्; एषामग्नित्वेनेष्टकचिताग्निना विकल्पः; द्वादशाहाङ्गभूतमानसग्रहवत् एषां मानसानामपि क्रियामयकत्वङ्गत्वं न विरुद्धम् ॥ ४४ ॥

अतिदेशाच्च ॥ ३ "तेषामेकैक एव तावान्यावानसौ पूर्वः" इतीष्टकचिताग्निकार्यातिदेशाच्च तदङ्गत्वम् ॥ ४५ ॥

विद्यैव तु निर्धारणादर्शनाच्च ॥ विद्यैव-एते विद्यामयकत्वङ्गभूता इत्यर्थः, सांपादिकाग्नित्वेनैषां विद्यामयत्वे सिद्धेऽपि ४ "तेहैते विद्याचित एव" इति निर्धारणं हि विद्यामयकत्वन्वयेन विद्यामयत्वख्यापनायादृश्यते चात्र विद्यामयः क्रतुः ५"मनसैषु ग्रहा अगृह्यन्त" इत्यादौ ॥ ४६ ॥

श्रुत्यादिबलीयस्त्वाच्च न बाधः ॥ ४"ते हैते विद्याचित एव विद्यया हैवैते एवंविदश्चिता भवन्ति" इति श्रुत्या वाक्येन चावगतविद्यामयकत्वन्वयस्य दुर्बलप्रकरणेन न बाधः ॥ ४७ ॥

अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववद्दृष्टश्च तदुक्तम्॥ ६"मनसैषु ग्रहा अगृह्यन्त" इत्यादिक्रत्वनुबन्धैः ८"ते हैते विद्याचित एव" इति श्रुत्यादिभिश्चात्र विद्यामयक्रतुविधिः कल्प्यत इति दहरविद्यादीनां क्रियामयत्वात् पृथक्त्ववत् अस्यापि विद्यामयक्रतोस्सानुबन्धैः पृथक्त्वमवगम्यते। दृष्टश्चानुवादसरूपेऽपि विधिः ७"यदेव विद्यया करोति" इत्यादौ। तदुक्तं ८"वचनानि त्वपूर्वत्वात्" इति ॥ ४८ ॥

---

१. वाजसनेयके. अग्निरहस्ये ॥—२ ॥—३ ॥—४ ॥—५ ॥—६॥—७. छा. १-१-१० ॥—८. पू. मी. ३-५-२१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न सामान्यादप्युपलब्धेर्मृत्युवन्न हि लोकापत्तिः ॥ १"तेषामेकैक एव तावान्यावानसौ" इतीष्टकचिताग्निफलसामान्येनातिदेशः, इष्टकचिताग्नेः स्वकर्तृद्वारेण यत्फलम्, तदेवैषां विद्यामयकर्त्वनुप्रवेशेन फलमिति; न पुनरिष्टकचितातिदेशत्वमप्येषामिति, केनापि सामान्येनातिदेशोपलब्धेः। यथा २"स एष एव मृत्युर्य एष एतस्मिन्मण्डले पुरुषः" इति सर्वहरत्वमात्रेण; नहि तत्र मण्डलपुरुषस्य मृत्युदेशत्वम् ॥ ४९ ॥

परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्त्वनुबन्धः ॥ परेणच ब्राह्मणेनास्य मनश्चितादिवाचिनश्शब्दस्य विद्यामयप्रतिपादित्वमवगम्यते;३"अयं वाव लोक एषोऽग्निचितस्तस्याप एव" इत्यादिना पृथक्फला विद्यैव विधीयते। क्रियाप्रकरणे अग्निरहस्ये मनश्चितादीनामनुबन्धस्तु संपादनीयानामङ्गानां भूयस्त्वात् ॥ ५० ॥

इति वेदान्तसारे पूर्वविकल्पाधिकरणम् ॥ २० ॥

वेदान्तदीपे—पूर्वविकल्पः प्रकरणात्स्यात्क्रिया मानसवत् ॥ वाजसनेयकेऽग्निरहस्ये ४"मनश्चितो वाक्चितः प्राणचितश्चक्षुश्चितः" इत्यादिना मनश्चितादयोऽग्नयो विद्यारूपाः श्रूयन्ते। किमेते क्रियामयकर्त्वङ्गभूताः, उत विद्यामयकर्त्वङ्गभूता इति संशयः। अस्मिन् प्रकरणे विद्यामयकर्त्वनुबन्धिमानसग्रहस्तोत्रादिदर्शनेऽपि क्रतोर्विधानाभावात्, फलान्तराप्रतीतेश्च, पूर्वत्र ५"असद्वा इदमग्र आसीत्" इत्यादिनेष्टकचितस्याग्नेः प्रकृतत्वात्, मनश्चितादिषु च ६"तेषामेकैक एव तावान्यावानसौ पूर्वः" इति तत्कार्यातिदेशादिष्टकचितैनैषां विकल्पप्रतीतेश्चेष्टकचिताग्निशेषभूतक्रियामयकर्त्वनुप्रवेशेन तदङ्गभूता इति पूर्वः पक्षः। सिद्धान्तस्तु—७"ते हैते विद्याचित एव विद्यया हैवैत एवंविदश्चिता भवन्ति" इति मनश्चितादीनां साम्पादिकाग्नित्वेन विद्यारूपत्वे सिद्धेऽपि ७"ते हैते विद्याचित एव" इत्यवधारणश्रुतिर्विद्यामयकर्त्वङ्गत्वेनैषां विद्यारूपतावगत्यर्थेति निश्चयात् सन्निहितैर्मानसैः ग्रहस्तोत्रादिभिः कर्त्वनुबन्धैरनुवादसरूपवाक्यप्रतिपादितैः क्रतुदर्शने सति ८"वचनानि त्वपूर्वत्वात्" इति न्यायेन मनश्चितादीनां शेषिभूतविद्यामयक्रतोर्विधिः परिकल्प्यते। ९"तेषामेकैक एव तावान्यावानसौ पूर्वः" इत्यतिदेशेनेष्टकचिताग्नेस्स्वशेषिभूतक्रतुद्वारेण यत्फलम्, तदेवैषां स्वशेषिभूतविद्यामय

१ ॥—२ ॥—३ ॥—४. वाजसनेयके. अग्निरहस्ये ॥ —५ ॥—६ ॥—७ ॥—८. पूर्वमी. सू. ३-५-२१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

क्रतुद्वारेण फलमिति निश्चीयत इति विद्यामयक्रत्वङ्गभूता एव मनश्चितादयः। सूत्रार्थस्तु—मनश्चितादिः क्रिया स्यात्—क्रियामयक्रत्वङ्गभूत इत्यर्थः। कुतः? प्रकरणात् पूर्वप्रकृतेनेष्टकचितेनाव्यभिचरितक्रतुसम्बन्धिनोपस्थितक्रतुगृहीतत्वेन तदङ्गभूतानामेषां चाग्नित्वात्तेनेष्टकचितेन विकल्पः; विद्यारूपाणामप्येषां क्रियामयक्रत्वङ्गभावो न विरुध्यते, द्वादशाहाङ्गभूतमानसग्रहवत् ॥ ४४ ॥

अतिदेशाच्च ॥ १"तेषामेकैक एव तावान्यावानसौ पूर्वः" इति तेषु पूर्वेष्टकचितकार्यातिदेशाच्च तेनैषां विकल्पः प्रतीयते। तेन विकल्पो हि तच्छेषिभूतक्रत्वङ्गत्वेन विनैषां नोपपद्यते। अतश्च तदङ्गभूताः ॥ ४५ ॥

विद्यैव तु निर्धारणादर्शनाच्च ॥ तुशब्दः पक्षं व्यावर्तयति; मनश्चितादिः विद्यैव विद्यामयक्रत्वङ्गभूत एवेत्यर्थः। कुतः? निर्धारणात् तेषां विद्यारूपत्वे सिद्धेऽपि २"तेहैते विद्याचित एव" इति निर्धारणं विद्यामयक्रत्वङ्गतयैषां विद्यमयत्वख्यापनार्थम्। अत्रैव विद्यामयक्रतुदर्शनाच्च तदङ्गत्वमेवैषाम्। दृश्यतेचात्र विद्यामयः क्रतुः ३"मनसैषु ग्रहा अगृह्यन्त मनसास्तुवन्त मनसाशंसन्" इत्यादौ ॥ ४६ ॥

अत्र विद्यामयक्रतौ विधिपदाश्रवणात्, तत्फलसम्बन्धाप्रतीतेश्च, प्रकरणेनेष्टकचिताग्न्युपस्थापितक्रत्वङ्गताप्रतीतेश्च विद्यामयक्रत्वन्वयो बाध्यत इत्याशङ्क्याह—

श्रुत्यादिबलीयस्त्वाच्च न बाधः ॥ श्रुत्यादेः प्रकरणाद्बलीयस्त्वेन श्रुत्याद्यवगतस्य विद्यामयक्रत्वन्वयस्य प्रकरणेन न बाधः। श्रुतिस्तावत् २"ते हैते विद्याचित एव" इति। तां विवृणोति २"विद्यया हैवैत एवंविदश्चिता भवन्ति" इति। लिङ्गवाक्ये च भाष्ये दर्शिते। एवंविदः मनश्चक्षुरादिव्यापारेष्वग्नित्वं सम्पादयितुः, एते मनश्चितादयः, विद्यया प्रधानभूतया चिता भवन्तीत्यर्थः ॥ ४७ ॥

३"मनसैषु ग्रहा अगृह्यन्त" इत्यादौ विधिपदाश्रवणाद्विद्यामयक्रतुविधिर्न सम्भवतीति तदसम्भवाच्च तदन्वयोऽपि न सम्भवतीत्याशङ्क्याह—

अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववद्दृष्टश्च तदुक्तम् ॥ ग्रहस्तोत्रशस्त्रेभ्यो यज्ञानुबन्धेभ्यः इष्टकचितान्वयिनः क्रतोरत्र विधीयमानविद्यामयक्रतुपृथक्त्वमवगम्यते; प्रज्ञान्तरपृथक्त्ववत्—यथा प्रज्ञान्तराणां दहरवि-

---

१ ॥—२ ॥—३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्यादीनां पृथक्त्वहेतुभ्यः पृथक्त्वम् ; आदिशब्दात्पूर्वोक्तश्रुत्यादिर्गृह्यते ; श्रुत्यादिनाऽनुबन्धैश्च विद्यामयक्रतुविधिः कल्प्यत इत्यर्थः । दृष्टश्चानुवादसरूऽपिपे कल्प्यमानो विधिः १"यदेव विद्यया करोति" इत्यादौ । तदुक्तं २"वचनानि त्वपूर्वत्वात्" इति ॥ ४८ ॥

यत्तूक्तमतिदेशाच्चेष्टकचितशेषिभूतक्रत्वन्वयोऽवगम्यत इति, तत्राह—

न सामान्यादप्युपलब्धेर्मृत्युवन्न हि लोकापत्तिः ॥ नावश्यमतिदेशेनेष्टकचिताग्नितुल्यदेशत्वमप्याश्रयणीयम्, येनकेनचित्सामान्येनातिदेशोपलब्धेः । ३" स एष मृत्युर्य एष एतस्मिन्मण्डले पुरुषः" इतिवत्फलसामान्येन भविष्यत्यतिदेशः । नहि तत्र मण्डलपुरुषे मृत्युलोकापत्तिरप्यतिदिश्यते ; अपि तु मृत्युवत् सर्वसंहर्तृत्वमेव ॥ ४९ ॥

परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्त्वनुबन्धः ॥ परेणच ब्राह्मणेनास्य मनश्चिताद्यभिधायिनश्शब्दस्य ताद्विध्यं तद्विधत्वम्, विद्यामयप्रतिपादकत्वमवगम्यते । परेणहि ब्राह्मणेन ४"अयं वाव लोक एषोऽग्निचित्तस्यैष एव" इत्यादिना पृथक्फला विद्यैव विधीयते । अग्निरहस्ये क्रियामया एव विधीयन्त इति नास्ति नियम इत्यर्थः । क्रियाप्रकरणे त्वेषां मनश्चितादीनामनुबन्धः सम्पादनीयानामङ्गानामत्र भूयस्त्वात्क्रियते । अतो विद्यामयक्रत्वङ्गभूता एव मनश्चितादयोऽन्ये ॥ ५० ॥

इति वेदान्तदीपे पूर्वविकल्पाधिकरणम् ॥ २० ॥

(श्रीशारीरकमीमांसाभाष्ये शरीरेभावाधिकरणम् ॥२१॥)

एक आत्मनश्शरीरे भावात् । ३। ३। ५१॥

सर्वासु परविद्यासूपास्योपासनस्वरूपवदुपासकस्वरूपस्यापि ज्ञातव्यत्वमुक्तं—५"त्रयाणामेवचैवमुपन्यासः प्रश्नश्च" इति । वक्ष्यति चास्य प्रत्यगात्मनः परमात्मात्मकत्वेनानुसन्धानम् ६" आत्मेति तूपगच्छ-

१. छा. १-१-१० ॥—२. पू. मी. ३-५-२१ ॥—३ ॥—४ ॥—५. शारी. १-४-६ ॥—६. शारी. ४-१-३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न्ति ग्राहयन्ति च" इति। किमयं प्रत्यगात्मा ज्ञाता कर्ता भोक्तेहामुत्र सञ्चारक्षमोऽनुसन्धेयः, उत प्रजापतिवाक्योदितापहतपाप्मत्वादिस्वरूपः; किं युक्तम्? ज्ञातृत्वाद्याकारमात्र इत्येके मन्यन्ते; कुतः? अस्योपासकस्यात्मनः शरीरे भावात्; शरीरे वर्तमानस्य तादृशमेव रूपम्; तावतैवानुसन्धानेन तत्फलसिद्ध्युपपत्तेश्च; नहि कर्मस्वधिकृतानां स्वर्गादिफलार्थिनां ज्ञातृत्वाद्यतिरेकेण फलानुभवदशायां यादृशं रूपम्, तादृशं रूपं साधनानुष्ठानदशायामनुसन्धातव्यम्; तावतैव साधनानुष्ठानतत्फलयोरसिद्धेरतिरिक्तानुसन्धाने प्रयोजनाभावात्; तदविशेषादिहापि तथैव। ननुचात्र [१]"यथाक्रतुरस्मिन् लोके पुरुषो भवति तथेतः प्रेत्य भवति" इति विशेषवचनादपहतपाप्मत्वाद्याकार एवानुसन्धातव्य इत्यवगम्यते; नैवम्, [२]"तं यथायथोपासते" इत्युपास्यविषयत्वात्तस्य॥

(सिद्धान्तः)

एवं प्राप्ते प्रचक्ष्महे—

व्यतिरेकस्तद्भावभावित्वान्न तूपलब्धिवत्। ३। ३। ५२॥

न त्वेतदस्ति – यत् ज्ञातृत्वाद्याकार एवानुसन्धेय इति; अस्यात्मनस्संसारदशायाः मोक्षदशायां यो व्यतिरेकः, सोऽपहतपाप्मत्वादिकोऽनुसन्धेयः; अस्य मोक्षदशायां यादृशं रूपं, तादृग्रूप एवोपासनवेलायामात्माऽनुसन्धेय इत्यर्थः। कुतः? तद्भावभावित्वात्तद्रूपापत्तेः; [१]"यथाक्रतुरस्मिन् लोके पुरुषो भवति तथेतः प्रेत्य भवति" [२]"तं यथायथोपासते तथैव भवति" इति यथोपासनमेव हि प्राप्तिः श्रूयते। नच परस्वरूपमात्रविषयमेवेदमिति वक्तुं शक्यते, प्रत्यगात्मनोऽप्युपास्यभूत-

१. छा. ३-१४-१॥—२. मुद्गलोपनिषत् ३-ख॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

परब्रह्मशरीरतयोपास्यकोटिनिक्षिप्तत्वात्। अतः प्रजापतिवाक्योदितापहतपाप्मत्वादिगुणकप्रत्यगात्मशरीरपरमात्मोपासनस्य तथारूपमेव प्राप्यमित्युक्तं भवति। अत एव [१]"एवं क्रतुर्हास्मिं लोकं प्रेत्याभिसम्भविताऽस्मि"इत्युच्यते।तस्मात्प्रत्यगात्मा प्राप्याकार एवानुसन्धेयः।उपलब्धिवत्-यथा ब्रह्मोपलब्धिर्विहिता यथावस्थितब्रह्मस्वरूपविषया, तथाऽऽत्मोपलब्धिरपि यथावस्थितात्मस्वरूपविषयेत्यर्थः। कर्मस्वात्मस्वरूपानुसन्धानं कर्माङ्गम्; [२]"यजेत स्वर्गकामः" इति कर्मानुष्ठानमेव हि फलाय चोद्यते। देहातिरिक्तज्ञातृत्वाद्याकारात्मावगतिः कालान्तरभाविफलसाधनकर्माधिकारार्थेति तावन्मात्रमेव तत्रापेक्षितमिति न किञ्चिदपहीनम्॥ ५२॥

इति श्रीशारीरकमीमांसाभाष्ये शरीरेभावाधिकरणम् ॥ २१ ॥

वेदान्तसारे—एक आत्मनश्शरीरे भावात् ॥ शरीरे वर्तमानत्वादुपासितुः, तस्य च कर्तृत्वभोक्तृत्वादिस्वरूपत्वात्, तथाऽवस्थितस्याऽत्मतया परविद्यासु परमात्मोपास्य इत्येके मन्यन्ते ॥ ५१ ॥

व्यतिरेकस्तद्भावभावित्वान्न तूपलब्धिवत् ॥ नैवम्, यत् कर्तृत्वादिस्वरूपस्यैवोपासितुरात्मतया परमात्माऽनुसन्धेय इति; अपितूपासितुस्संसारिकस्वभावान्मुक्तस्वरूपस्य यो व्यतिरेकः अपहतपाप्मत्वादिगुणकत्वरूपः, सोऽनुऽसन्धेयः, तथाऽनुसन्धानभावभावित्वात् तत्स्वरूपोपलब्धेः; यथावस्थितस्वरूपब्रह्मानुसन्धानभाविनी हि ब्रह्मोपलब्धिः, तद्वत्; [३]"यथाक्रतुरस्मिन् लोके पुरुषः" इत्यादिश्रुतेः ॥ ५२ ॥

इति वेदान्तसारे शरीरेभावाधिकरणम् ॥ २१ ॥

वेदान्तदीपे—एक आत्मनश्शरीरे भावात् ॥ प्रत्यगात्मन आत्मतया हि परमात्मोपास्यः; उपासकस्यापि स्वरूपमुपास्योपासनस्वरूपवत् ज्ञातव्यमित्युक्तं [४]"त्रयाणाम्" इत्यादिना; वक्ष्यतेच [५]"आत्मेति तूपगच्छन्ति" इति। तत्र किं प्रत्यगात्मनइशरीरे वर्तमानस्य कर्तृत्वभोक्तृत्वादिविशिष्टं रूपमनुसन्धेयम्, उत प्रजापतिवाक्योदितापहतपाप्मत्वादिगुणकं यथावस्थितं रूपमिति संशयः। शरीरे वर्तमानस्य यादृशं रूपम्, तदेवानुसन्धेयमिति पूर्वः पक्षः, क-

१॥—२.यजु.२-५-५॥—३. छा. ३-१४-१॥—४. शारी.१-४-६॥—५.शारी.४-१-३॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मौविधिष्विवोपासनविधिष्वपि तावतैव साधनानुष्ठानफलानुभवयोस्सम्भवात्। १"यथाक्रतुरस्मिल्लोके पुरुषो भवति" इति तु २ "तं यथायथोपासते" इत्यनेनैकार्थ्यात्परमात्मविषयम्। राद्धान्तस्तु—३"तत्त्वमसि"४"स त आत्माऽन्तर्याम्यमृतः" इति प्रत्यगात्मन आत्मतयैव परमात्मोपास्य इति प्रत्यगात्मनस्स्वरूपमप्युपासनान्तर्गतम्; ५ "परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते" इति यथावस्थितात्मस्वरूपस्यैव ब्रह्मानुभवः फलमित्यतः १"यथाक्रतुरस्मिल्लोके पुरुषो भवति" इति न परमात्ममात्रविषयम्; अपितु प्रत्यगात्मात्मभूतोपास्यविषयमिति प्रजापतिवाक्योदितं यथावस्थितस्वरूपमेवानुसन्धेयम्; अन्यथा प्राप्योपास्ययोः प्रकारभेदात् १ "यथाक्रतुरस्मिन्" इति विरुध्यते; ६ "यजेत स्वर्गकामः" इत्यादिकर्मविधौ तु कर्तृस्वरूपानुसन्धानं न साधनान्तर्गतमिति विशेषः। सूत्रार्थस्तु—कर्तृत्वादिविशिष्टमेवात्मनस्स्वरूपमनुसन्धेयमित्येके मन्यन्ते; कुतः? शरीरे वर्तमानस्योपासितुरात्मनस्तथाभावात् ॥ ५१ ॥

व्यतिरेकस्तद्भावभावित्वान्न तूपलब्धिवत् ॥ न कर्तृत्वादिविशिष्टमनुसन्धेयम्, अपितु सांसारिकस्वरूपान्मुक्तस्वरूपस्य यो व्यतिरेकः, सोऽनुसन्धेयः; कुतः? तथोपासनभावभावित्वाद्व्यतिरिक्तस्वरूपप्राप्तेः। १"यथाक्रतुरस्मिल्लोके पुरुषो भवति"इतिह्याह। उपलब्धिवत्-यथा ब्रह्मस्वरूपोपलब्धिर्यथावस्थितब्रह्मानुसन्धानयुक्तस्यैव, तथा आत्मोपलब्धिरपि ॥ ५२ ॥

इति वेदान्तदीपे शरीरेभावाधिकरणम् ॥ २१ ॥

(श्रीशारीरकमीमांसाभाष्ये अङ्गावबद्धाधिकरणम्॥ २२॥)

अङ्गावबद्धास्तु न शाखास हि प्रतिवेदम्॥३।३।५३।

७"ओमित्येतदक्षरमुद्गीथमुपासीत" ८"लोकेषु पञ्चविधं सामोपासीत" ९"उक्थमुक्थमिति वै प्रजा वदन्ति तदिदमेवोक्थम् इयमेव पृथिवी" १० "अयं वाव लोक एषोऽग्निचितः" इत्येवमाद्याः क्रत्वङ्गाश्रया उपासना भवन्ति; ताः किं यासु शाखासु श्रूयन्ते, तास्वेव नियताः, उत

१. छा. ३-१४-१ ॥—२. मुद्गलोप. ३-ख ॥—३. छा. ६. ८-७॥—४. ३. ५-७-२२. मा.पा ॥—५.छा. ८-३-४॥—६. यजु. २-५-५ ॥—७. छा. १-१-१ ॥—८. छा. २-२-१ ॥—९ ॥—१० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सर्वासु शाखासूद्गीथादिषु सम्बध्यन्त इति विचारः। सर्ववेदान्तप्रत्ययत्वे स्थितेऽपि प्रतिवेदं स्वरभेदादुद्गीथादयो भिद्यन्त इति तत्रतत्र व्यवतिष्ठेरन्निति युक्ता शङ्का। किं युक्तम्? व्यवतिष्ठेरन्निति। कुतः? [1]"उद्गीथमुपासीत" इति सामान्येनोद्गीथसम्बन्धितया श्रुतायास्तस्यामेव शाखायां स्वरविशेषयुक्तस्योद्गीथविशेषस्य सन्निधानात्तस्मिन्नेव विशेषे पर्यवसानं युक्तमिति। एवमाद्यास्तास्वेव शाखासु व्यवतिष्ठेरन्निति॥

(सिद्धान्तः)

एवं प्राप्ते प्रचक्ष्महे—अङ्गावबद्धास्तु—इति। तुशब्दः पक्षं व्यावर्तयति; नह्युद्गीथाद्यङ्गावबद्धा उपासनास्तास्वेव शाखासु व्यवतिष्ठेरन्; अपितु प्रतिवेदं सम्बध्येरन्; सर्वासु शाखास्वित्यर्थः। हिशब्दो हेतौ। यस्माच्छ्रुत्यैवोद्गीथाद्यङ्गमात्रावबद्धाः, तस्माद्यत्रोद्गीथादयः, तत्र सर्वत्र सम्बध्येरन्। यद्यपि स्वरभेदेनोद्गीथव्यक्तयो भिद्यन्ते; तथापि सामान्येनोद्गीथश्रुत्या सर्वा व्यक्तयस्सन्निहिता इति न क्वचिद्व्यवस्थायां प्रमाणमस्ति। सर्वशाखाप्रत्ययन्यायेन च सर्वासु शाखासु क्रतुरेकः। अतस्सर्वासु शाखास्वेकस्य क्रतोस्सन्निधानात् क्रत्वङ्गभूतोद्गीथादयोऽपि सन्निहिता इति नैकस्य सन्निधिविशेषोऽस्तीति न व्यवस्था॥ ५३॥

मन्त्रादिवद्वाऽविरोधः। ३। ३। ५४॥

वाशब्दश्चार्थे; आदिशब्देन जातिगुणसङ्ख्यासादृश्यक्रमद्रव्यकर्माणि गृह्यन्ते; यथा मन्त्रादीनामेकैकशाखास्नातानामपि शेषिणः क्रतोस्सर्वशाखास्वेकत्वेन यथायथं श्रुत्यादिभिस्सर्वासु शाखासु विनियोगो न विरुध्यते; तद्वदिहाप्यविरोधः॥ ५४॥

इति श्रीशारीरकमीमांसाभाष्ये अङ्गावबद्धाधिकरणम्॥ २२॥

वेदान्तसारे—अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम्॥ उद्गीथादिक्रत्वङ्गाश्रया उपासनाः यासु शाखासु श्रूयन्ते; तास्वेव कार्या इति नह्यस्ति

१. छा. १-१-१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नियामकम्; अत उद्गीथानुबन्धित्वात् प्रतिशाखं कार्याः ॥ ५३ ॥

मन्त्रादिवद्वाऽविरोधः ॥ वाशब्दोऽवधारणे; यथा क्रत्वङ्गभूतानां मन्त्राणामेकैकशाखागतानामपि सर्वशाखागतक्रत्वन्वयेनाविरोधः ॥ ५४ ॥

इति वेदान्तसारे अङ्गावबद्धाधिकरणम् ॥ २२ ॥

वेदान्तदीपे—अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम् ॥ १ "ओमित्येतदक्षरमुद्गीथमुपासीत" इत्युद्गीथादिक्रत्वङ्गाश्रया उपासनाइश्रूयन्ते; ताः किं यासु शाखासु श्रूयन्ते, तास्वेव व्यवस्थिताः, उत सर्वासु शाखासु सम्बद्धा इति संशयः। शाखासु स्वरभेदात्प्रतिशाखमुद्गीथभेदेन यत्र श्रूयन्ते, तत्रस्योद्गीथादेस्सन्निधानात्तेनैवान्विता व्यवस्थिता इति पूर्वः पक्षः। राद्धान्तस्तु—यद्यप्युद्गीथव्यक्तिभेदो विद्यते, तथापि तत्रतत्र चोद्गीथजातीयत्वेन सम्बन्धात्सर्वेषां चोद्गीथजातीयत्वाविशेषात् १ "उद्गीथमुपासीत" इति श्रुत्यैव सर्वसम्बन्ध इति सर्वशाखासु सम्बध्यन्ते। सूत्रार्थस्तु—न त्वङ्गावबद्धा उपासनास्तासु शाखासु व्यवस्थिताः, अपितु प्रतिवेदं सर्वशाखासु सम्बध्यन्त इत्यर्थः। हिर्हेतौ। यस्मादुद्गीथजातीयत्वाविशेषेण सर्वसम्बन्धः, तस्मादित्यर्थः ॥ ५३ ॥

मन्त्रादिवद्वाऽविरोधः ॥ वाशब्दश्चार्थे; यथा मन्त्रादीनां क्रत्वङ्गभूतानामेकैकशाखाभिहितानां सर्वशाखासु क्रतोरेकत्वेन सर्वत्र सम्बन्धो न विरुध्यते; तद्वच्चाविरोधः ॥ ५४ ॥

इति वेदान्तदीपे अङ्गावबद्धाधिकरणम् ॥ २२ ॥

(श्रीशारीरकमीमांसाभाष्ये भूमज्यायस्त्वाधिकरणम्॥२३॥)

भूम्नः क्रतुवज्ज्यायस्त्वं तथाहि दर्शयति।३।३।५५

२"प्राचीनशाल औपमन्यवः"इत्यारभ्य वैश्वानरविद्या आम्नाता; तत्र वैश्वानरः परमात्मा त्रैलोक्यशरीर उपास्यश्श्रुतः स्वर्लोकादित्यवाय्वाकाशाप्पृथिव्यवयवः; तत्र च द्यौर्मूर्धा, आदित्यश्चक्षुः, वायुः प्राणः, आकाशस्सन्देहः मध्यकाय इत्यर्थः; आपो वस्तिः,पृथिवी पादावित्यव-

१. छा. १-१-१ ॥—२. छा. ५-११-१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यवविशेषाः । तत्र संशयः—किमस्य त्रैलोक्यशरीरस्य व्यस्तस्योपासनं कर्तव्यम्, उत व्यस्तस्य समस्तस्यच, अथ समस्तस्यैवेति। किं युक्तम्? व्यस्तस्येति;कुतः? उपक्रमे व्यस्तोपासनोपदेशात् । तथाह्युपदिश्यते—औपमन्यवादयः किलोद्दालकषष्ठाः केकयमश्वपतिमुपसद्य [१]"आत्मानमेवेमं वैश्वानरं सम्प्रत्यध्येषि तमेव नो ब्रूहि" इति पप्रच्छुः । स च तेभ्यः प्रत्येकं स्वोपास्यान् द्युप्रभृतीनुक्तवद्भ्यो मूर्धादिषु व्यस्तेषूपासनं तत्तत्फलं चोक्तवान् [२]"अत्त्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले य एतमेवमात्मानं वैश्वानरमुपास्ते मूर्धा त्वेष आत्मन इति एष वै सुतेजा आत्मा वैश्वानरः" इत्यादिना । तेषुतेषूपासनेषूपास्यस्य वैश्वानरत्वं चाह । अतो व्यस्तस्योपासनं कर्तव्यम् । परत्र [३]"यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते" इति । द्युप्रभृतिप्रदेशावच्छिन्नमात्रे वैश्वानरे उक्तस्य मूर्धाद्युपासनस्य समासेनोपसंहार इत्यवगन्तव्यम् । अपर आह—एवमेव समस्तस्याप्युपासनं कार्यमिति, पृथक्फलनिर्देशात् [३]"यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्ति" इति । नचैतावता वाक्यभेदः; यथा भूमविद्योपक्रमे नामाद्युपासनं तत्तत्फलञ्चाभिधाय [४]"एष तु वा अतिवदति यस्सत्येनातिवदति" इत्यादिना भूमविद्यामुपदिश्य [५]"स स्वराड्भवति तस्य सर्वेषु लोकेषु कामचारो भवति" इति तत्फलञ्च व्यपदिशति; तत्र भूमविद्यापरत्वेऽपि वाक्यस्य नामाद्यवान्तरोपासनं तत्तत्फलं चाङ्गीक्रियते, तथा इहापीति ॥

(सिद्धान्तः)

एवं प्राप्तेऽभिधीयते—भूम्नो ज्यायस्त्वमिति । भूम्नः—विपुलस्य समस्तस्यैव, ज्यायस्त्वं—प्रामाणिकत्वमित्यर्थः; एकवाक्यत्वावगतेः ।

१. छा. ५-११-६ ॥—२. छा. ५-१२-२ ॥ —३. छा. ५-१८-१ ॥ —४. छा. ७-१६-१ ॥—५. छा. ७-२५-२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तथा हि १"प्राचीनशाल औपन्यवः" इत्युपक्रम्य १"उद्दालको ह वै भगवन्तोऽयमारुणिस्सम्प्रतीममात्मानं वैश्वानरमध्येति तं ह्न्ताभ्यागच्छाम" इति वैश्वानरात्मबुभुत्सयौपमन्यवादयः पञ्च महर्षयः तमुद्दालकमुपेत्य तत्र वैश्वनरात्मवेदनमलभमानास्तेन च सहाश्वपतिं केकयं वैश्वानरात्मवेदिनमुपसङ्गम्य २"आत्मानमेवेमं वैश्वानरं सम्प्रत्यध्येषि तमेव नो ब्रूहि" इति पृष्ट्वा तत्सकाशात् परमात्मानं वैश्वानरं स्वर्लोकादिपृथिव्यन्तशरीरमुपास्यमवगम्य तत्फलं च सर्वलोकसर्वभूतसर्वात्मान्नभूतब्रह्मानुभवमवगतवन्त इत्योपसंहारतो वाक्यस्यैकत्वमवगम्यते । एवमेकवाक्यत्वेऽवगते सत्यवयवविशेषेषूपास्तिवचनं फलनिर्देशश्च समस्तोपासनैकदेशानुवादमात्रमिति निश्चीयते । क्रतुवत्—यथा ३"वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते" इति विहितस्यैव क्रतोरेकदेशाः ३"यदष्टाकपालो भवति" इत्यादिभिरनूद्यन्ते ; तथा समस्तोपासनमेव न्याय्यम् , न व्यस्तोपासनम् । तथाहि दर्शयतीयं श्रुतिः व्यस्तोपासने अनर्थं ब्रुवती ४"मूर्धा ते व्यपतिष्यद्यन्मां नागमिष्यः" इति ५"अन्धोऽभविष्यो यन्मां नागमिष्यः" इत्यादिका । अत इदमप्यपास्तं, यन्नामाद्युपासनसाम्यमुक्तम् । तत्रहि नामाद्युपासनेष्वनर्थो न श्रुतः, नामाद्युपासनेभ्यो भूमोपासनस्यातिशयितफलत्वं श्रुतम् ६"एष तु वा अतिवदति यस्सत्येनातिवदति" इति । तत एव तत्र भूमविद्यापरत्वेऽपि वाक्यस्य नामाद्युपासनानां सफलानां विवक्षितत्वम् ; अन्यथाऽतिशयितफलत्वनिमित्तातिवादेन भूमविद्यास्तुत्यनुपपत्तेः, अतस्समस्तोपासनमेव न्याय्यम् ॥ ५५ ॥

इति श्रीशारीरकमीमांसाभाष्ये भूमज्यायस्त्वाधिकरणम् ॥ २३ ॥

---

१. छा. ५-११-१,२ ॥—२. छा. ५-११-६ ॥ —३. यजु. २-२-५-अनु ॥ —४. छा. ५-१२-२ ॥—५. छा. ५-१३-२ ॥—६. छा. ७-१६-१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वेदान्तसारे—भूम्नः क्रतुवज्ज्यायस्त्वं तथाहि दर्शयति ॥ वैश्वानरविद्यायां त्रैलोक्यशरीरतयोपास्यस्य स्वर्लोकादिपृथिव्यन्तानां वैश्वानरात्मनो मूर्धादिपादपर्यन्तावयवत्वमभिधाय १"यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते स सर्वेषु लोकेषु" इत्यादिना ब्रह्मानुभवः फलं चाभिहितम्। तत्र मूर्धाद्यवयवोपासनात् भूम्नः समस्तोपासनस्य ज्यायस्त्वं प्रामाणिकत्वमस्ति, तत्रैव ब्रह्मानुभवफलाभिधानात्। तत्रावयवोपासनम्, तत्रतत्र फलकीर्तनं च क्रताविव द्रष्टव्यम्। यथा २"वैश्वानरन्द्वादशकपालं निर्वपेत्पुत्रे जाते" इत्युक्त्वा,२"यदष्टाकपालो भवति"इत्यादौ; तथा समस्तोपासनस्यैव श्रैष्ठ्यन्दर्शयति श्रुतिः ३"दिवमेव भगवो राजन्" इत्यवयवोपासनेऽभिहिते ३"मूर्धा ते व्यपतिष्यद्यन्मान्नागमिष्यः" इत्यादिनाऽनर्थं ब्रुवती ॥ ५५ ॥

इति वेदान्तसारे भूमज्यायस्त्वाधिकरणम् ॥ २३ ॥

वेदान्तदीपे—भूम्नः क्रतुवज्ज्यायस्त्वं तथाहि दर्शयति ॥ वैश्वानरविद्यायां स्वर्लोकादित्यवाय्वाकाशपृथिव्यवयवो वैश्वानरात्मोपास्यश्श्रुतः; तत्र किं व्यस्तस्यैवोपासनं कार्यम्, उत व्यस्तस्य समस्तस्यच, अथ समस्तस्यैवेति संशयः। ३" औपमन्यव कं त्वमात्मानमुपास्स इति दिवमेव भगवो राजन्" इत्यादिना स्वर्लोकादिपृथिव्यन्तानां वैश्वानरात्मनो मूर्धादिपादान्तावयवत्वमभिधाय, तत्रतत्र व्यस्तस्यैवोपासनं फलं च विहितमिति पश्चात् १ "यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते" इति पूर्वोक्तस्य समासेनोपसंहार इति युक्तम्; अतो व्यस्तस्यैवोपासनं कार्यमिति प्रथमः पक्षः। समस्तोपासनस्य १"सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वान्नमत्ति" इति व्यस्तोपासनफलेभ्यः फलान्तरविधानाद्व्यस्तस्य समस्तस्यचोपासनं कार्यमिति द्वितीयः पक्षः। राद्धान्तस्तु—४"आत्मानं वैश्वानरं सम्प्रत्यध्येषि तमेव नो ब्रूहि" इत्यारभ्य वैश्वानरात्मनस्स्वर्लोकादिपृथिव्यन्तानां मूर्धादिपादान्तावयवत्वमभिधाय, १"यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते स सर्वेषु लोकेषु" इत्युपसंहारादेकस्यैव वैश्वानरात्मनः त्रैलोक्यशरीरस्य परस्य ब्रह्मणः उपासनं विधाय फलं च १"सर्वेष्वात्मस्वान्नमत्ति" इति ५"तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवं ह्यस्य सर्वे पाप्मानः प्रदूयन्ते"इतिच सर्वेषामात्मनामविशे-

१. छा. ५-१८-१ ॥—२. यजु. २-२-५-अनु ॥—३. छा. ५-१२-१,२ ॥ —४. छा.५-११-६॥—५. छा.५-२४-३॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

षेण भोग्यभूतं परं ब्रह्मानुभवति, तद्विरोधिनश्च सर्वपाप्मनः दहतीत्युक्तमिति गम्यते । अत एकवाक्यत्वात्समस्तस्यैवोपासनं कार्यम् । व्यस्तवादस्तु स्वर्लोकादीनां मूर्धाद्यवयवत्वज्ञापनार्थः । तत्रतत्र च फलवादः१"वैश्वानरं द्वादशकपालं निर्वपेत्पुत्रे जाते यदष्टाकपालो भवति" इत्यादिवद्द्रष्टव्यः । सूत्रार्थस्तु—भूम्नो ज्यायस्त्वम्-समस्तोपासनस्य श्रैष्ठ्यम् ; प्रामाणिकत्वमित्यर्थः । एकवाक्यत्वावगतेः व्यस्तवादः क्रतुवद्द्रष्टव्यः। "वैश्वानरं द्वादशकपालं निर्वपेत्...यदष्टाकपालः" इत्यादिः क्रताविवेत्यर्थः । तथाहि दर्शयति—समस्तोपासनस्य ज्यायस्त्वमेव दर्शयति श्रुतिः—२"मूर्धा ते व्यपतिष्यन्मां नागमिष्यः" इत्यादिना व्यस्तोपासनेऽनर्थं ब्रुवती ॥ ५५ ॥

इति वेदान्तदीपे भूमज्यायस्त्वाधिकरणम् ॥ २३ ॥

(श्रीशारीरकमीमांसाभाष्ये शब्दादिभेदाधिकरणम्॥२४॥)

नाना शब्दादिभेदात् । ३ । ३ । ५६ ॥

इह ब्रह्मविद्यास्सर्वाः ब्रह्मप्राप्तिरूपमोक्षैकफलाः सद्विद्याभूमविद्यादहरविद्योपकोसलविद्याशाण्डिल्यविद्यावैश्वानरविद्यानन्दमयविद्याक्षरविद्यादिका एकशाखागताश्शाखान्तरगताश्चोदाहरणम् ; अन्याः प्राणाद्येकविषयफलाश्च । किमत्र विद्यैक्यम्, उत विद्याभेद इति संशय्यते । अत्रैवासां परस्परभेदे समर्थिते सत्येकस्या दहरविद्यादिकायास्सर्ववेदान्तप्रत्ययन्यायः । किं युक्तम् ? विद्यैक्यमिति । कुतः ? वेद्यस्य ब्रह्मण एकत्वात् ; वेद्यं हि विद्याया रूपम् ; अतो रूपैक्याद्विद्यैक्यमिति॥

(सिद्धान्तः)

एवं प्राप्तेऽभिधीयते—नाना—इति । नानाभूता विद्याः; कुतः ? शब्दादिभेदात्—आदिशब्देनाभ्याससङ्ख्यागुणप्रक्रियानामधेयानि गृह्यन्ते ; शब्दान्तरादिभिरत्र विधेयभेदहेतवोऽनुबन्धभेदाः दृश्यन्ते ; यद्यपि वेदोपासीतेत्यादयः शब्दाः प्रत्ययावृत्त्यभिधायिनः ;प्रत्ययाश्च ब्र-

१. यजु. ५-५-२ ॥—२. छा. ५-१२-२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्रैकविषयाः ; तथाऽपि तत्तत्प्रकरणोदितजगदेककारणत्वापहतपाप्मत्वादिविशेषणविशिष्टब्रह्मविषयप्रत्ययावृत्त्यवबोधिनः प्रत्ययावृत्तिरूपाः विद्या भिन्दन्ति । ब्रह्मप्राप्तिरूपफलसम्बन्ध्युपासनविशेषाभिधायीनि च निराकाङ्क्षाणि वाक्यानि प्रतिप्रकरणं विलक्षणविद्याभिधायीनीति निश्चीयते । अस्मिन्नर्थे [1]"शब्दान्तरे कर्मभेदः" इत्यादिभिः पूर्वकाण्डोदितैस्सूत्रैस्सिद्धेऽपि पुनरिह प्रतिपादनं वेदान्तवाक्यानि अविधेयज्ञानपराणीति कुदृष्टिनिरसनाय । अतो विद्याभेद इति स्थितम् ॥ ५६ ॥

इति श्रीशारीरकमीमांसाभाष्ये शब्दादिभेदाधिकरणम् ॥ २४ ॥

वेदान्तसारे—नाना शब्दादिभेदात् ॥ सद्विद्याभूमविद्यादीनां ब्रह्मण एकस्यैवोपास्यत्वे तत्प्राप्तेरेव फलत्वेऽप्युपास्यत्वप्रकारभेदाद्विद्याभेदः । प्रकारभेदश्च शब्दान्तराद्यनुबन्धभेदादवगम्यते। पूर्वकाण्डोदितमपि ज्ञानस्याविधेयत्वं शृण्वतां निरसनाय पुनरारब्धम् ॥ ५६ ॥

इति वेदान्तसारे शब्दादिभेदाधिकरणम् ॥ २४ ॥

वेदान्तदीपे—नाना शब्दादिभेदात् ॥ सद्विद्यादहरविद्याशाण्डिल्यविद्याभूमविद्यादिकाः ब्रह्मोपासनरूपाः ब्रह्मप्राप्तिफलाः किमेकविद्या, उत नानेति संशयः । उपास्यस्य ब्रह्मणः फलस्य चैकत्वात्, 'वेद' 'उपासीत' इति च पर्यायत्वादेकविद्येति पूर्वः पक्षः । ब्रह्मण एकत्वेऽपि जगदेककारणत्वापहतपाप्मत्वाद्यनुबन्धभेदहेतुभिः पूर्वकाण्डोदितानुबन्धभेदहेतुभिश्शब्दान्तरादिभिरेवानुबन्धभेदान्नानाभूता इति राद्धान्तः । शब्दान्तरादिभिस्तत्रोदितैरेव विद्याभेदसिद्धावपीह पुनर्वचनं ब्रह्मप्राप्तिहेतुभूतं वेदान्तोदितं ज्ञानमविधेयमिति कुदृष्टिनिरासार्थम् । सूत्रार्थस्तु—सद्विद्याभूमविद्यादिका नानाभूताः, ब्रह्मण एकत्वेऽपि सद्भूमापहतपाप्मादिशब्दभेदात् । आदिशब्दात् अभ्यासस्तुत्यागुणप्रक्रियानामधेयानि गृह्यन्ते ॥ ५६ ॥

इति वेदान्तदीपे शब्दादिभेदाधिकरणम् ॥ २४ ॥

---

१ पूर्व-मी. १-१-२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विकल्पोऽविशिष्टफलत्वात् । ३ । ३ । ५७ ॥

ब्रह्मप्राप्तिफलानां सद्विद्यादहरविद्यादीनां नानात्वमुक्तम् ; इदानीमासां विद्यानामेकस्मिन् पुरुषे प्रयोजनवत्त्वेन समुच्चयोऽपि सम्भवति, उत प्रयोजनाभावाद्विकल्प एवेति विशये—किं युक्तम् ; समुच्चयोऽपि सम्भवतीति ; कुतः एकफलानां भिन्नशास्त्रार्थानामपि समुच्चयदर्शनात् । दृश्यते ह्येकस्यैव स्वर्गादेस्साधनानामग्निहोत्रदर्शपूर्णमासादीनां तस्यैव स्वर्गस्य भूयस्त्वापेक्षयैकत्र पुरुषे समुच्चयः ; एवमिहापि ब्रह्मानुभवभूयस्त्वापेक्षया समुच्चयोऽपि सम्भवतीति ॥

(सिद्धान्तः)

एवं प्राप्ते प्रचक्ष्महे—विकल्प एव ; न समुच्चयस्सम्भवतीति । कुतः ? अविशिष्टफलत्वात्—सर्वासां हि ब्रह्मविद्यानामनवधिकातिशयानन्दब्रह्मानुभवः फलमविशिष्टं श्रूयते [१]"ब्रह्मविदाप्नोति परम्" [२]"स एको ब्रह्मण आनन्दः श्रोत्रियस्य चाकामहतस्य" [३]"यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम् । तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति" इत्यादिभ्यः । ब्रह्म हि स्वस्य परस्य च स्वयमनुभूयमानमनवधिकातिशयानन्दं भवति । स च तादृशो ब्रह्मानुभव एकया विद्ययाऽवाप्यते चेत्—किमन्ययेति न समुच्चयसम्भवः । स्वर्गादेर्हि देशतः कालतः स्वरूपतश्च परिमितत्वेन तत्र देशाद्यपेक्षया भूयस्त्वसम्भवात्तदर्थिनस्समुच्चयस्सम्भवति ; इह तु तद्विपरीतस्वरूपे ब्रह्मणि तन्न सम्भवति । सर्वाश्च विद्याः ब्रह्मानुभवविरोध्यनादिकर्माविद्यानिरसनमुखेन ब्रह्मप्राप्तिफला इत्यविशिष्टफलत्वात्सर्वा-

१. तै. आन. १-अनु. १ ॥—२. तै. आन. ८-अनु. ४ ॥—३. मु. ३-१-३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सां विकल्प एव ॥ ५७ ॥

ब्रह्मप्राप्तिव्यतिरिक्तफलास्तु विद्यास्वर्गादिफलकर्मवद्यथेष्टं विकल्पेरन्, समुच्चीयेरन्वा, तासां परिमितफलत्वेन भूयस्त्वापेक्षासम्भवात्। तदाह—

काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात्। ३। ३। ५८॥

अपरिमितफलत्वाभावादित्यर्थः ॥ ५८ ॥

इति श्रीशारीरकमीमांसाभाष्ये विकल्पाधिकरणम् ॥ २५ ॥

वेदान्तसारे—विकल्पोऽविशिष्टफलत्वात् ॥ एकस्मिन्नुपासके सर्वासां परविद्यानां विकल्पः, अपरिच्छिन्नानन्दरूपब्रह्मानुभवफलस्याविशिष्टत्वात् ॥ ५७ ॥

काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात्॥ ब्रह्मव्यतिरिक्तविद्याफलस्य परिमितत्वात् भूयस्त्वापेक्षया समुच्चयस्संभवति, यथाकामं समुच्चीयेरन् ; विकल्पेरन्वा ॥ ५८ ॥

इति वेदान्तसारे विकल्पाधिकरणम् ॥ २५ ॥

वेदान्तदीपे—विकल्पोऽविशिष्टफलत्वात् ॥ सद्विद्याभूमविद्यादिकानां ब्रह्मप्राप्तिफलानामेकस्मिन्पुरुषे समुच्चयोऽपि संभवति, नेति संशयः। अग्निहोत्रदर्शपूर्णमासज्योतिष्टोमादीनां स्वर्गैकफलानां तत्र भूयस्त्वापेक्षया यथैकस्मिन्पुरुषे समुच्चयो दृश्यते ; तथाऽत्रापि ब्रह्मानुभवभूयस्त्वापेक्षयैकस्मिन् पुरुषे समुच्चयस्सम्भवति— इति पूर्वः पक्षः। देशतः कालतस्स्वरूपतश्चानवच्छिन्नानन्दस्वरूपब्रह्मानुभवस्सर्वासां परविद्यानां फलम् ; तच्चैकया विद्ययाऽवाप्तमित्येकस्मिन्पुरुषे विद्यान्तरसमुच्चयः प्रयोजनाभावान्न सम्भवतीति सर्वासां विकल्पः—इति राद्धान्तः। सूत्रमपि व्याख्यातम् ॥ ५७ ॥

काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात् ॥ ब्रह्मप्राप्तिव्यतिरिक्तफला विद्याः काम्याः। तास्तु यथेष्टं समुच्चीयेरन् ; विकल्पेरन्वा, पू-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वर्हेत्वभावात्—तत्फलस्यापरिमितत्वाभावात्; भूयस्त्वापेक्षया समुच्चयस्तम्भवतीत्यर्थः ॥ ५८ ॥

इति वेदान्तदीपे विकल्पाधिकरणम् ॥ २५ ॥

श्रीशारीरकमीमांसाभाष्ये यथाश्रयभावाधिकरणम् ॥

अङ्गेषु यथाश्रयभावः । ३ । ३ । ५९ ॥

उद्गीथादिकृत्वङ्गेष्वाश्रिताः १ "ओमित्येतदक्षरमुद्गीथमुपासीत" इत्यादिका विद्याः किमुद्गीथादिवत्कृत्वर्थतया कृतुषु नियमेनोपादेयाः, उत गोदोहनादिवत्पुरुषार्थतया यथाकाममिति विशये—नियमेनोपादेया इति युक्तम्। ननु चासां पुरुषार्थत्वेनानियमः प्रतिपादितः २"तन्निर्धारणानियमस्तद्दृष्टेः पृथग्ध्यप्रतिबन्धः फलम्" इत्यत्र। सत्यम्; तदेव द्रढयितुं कैश्चिल्लिङ्गदर्शनैर्युक्त्या चाक्षिप्यते। तत्र हि ३"तेनोभौ कुरुतः" इत्यनियमदर्शनात्पृथक्फलत्वमुक्तम्; उपासनाश्रयभूतोद्गीथादिवदुपासनानामप्यङ्गतयोपादाननियमे बहवो हेतव उपलभ्यन्ते; न चात्र ४"गोदोहनेन पशुकामस्य प्रणयेत्" इत्यादिवदुपासनाविधिवाक्ये फलसम्बन्धः श्रूयते; १"उद्गीथमुपासीत" इत्युद्गीथादिसम्बन्धितयैवोपासनं प्रतीयते। ३"यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरम्" इति वर्तमानापदेशरूपवाक्यान्तराद्धि फलसम्बन्धो ज्ञायते; स्ववाक्येनैवाव्यभिचरितक्रतुसम्बन्ध्युद्गीथादिसम्बन्धेन निर्ज्ञातक्रत्वङ्गभावस्य वाक्यान्तरस्थवर्तमानफलसम्बन्धनिर्देशोऽर्थवादमात्रं स्यात्, अपापश्लोकश्रवणादिवत्। अतो यथोद्गीथादय उपासनाश्रयाः क्रत्वङ्गतया प्रयोगविधिना नियमेनोपादीयन्ते; तथा तदाश्रिताश्चोपासनास्तन्मु-

१. छा. १-१-१ ॥—२. शारी. ३-३-४१ ॥—३. छा. १-१-१० ॥—४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्तेन कर्त्वङ्गभूता इति नियमेनोपादेया एव ॥ ५९ ॥

शिष्टेश्च । ३ । ३ । ६० ॥

शिष्टिः शासनम्, विधानमित्यर्थः । [1]"उद्गीथमुपासीत" इत्युद्गीथाङ्गतयोपासनविधानाच्चोपादाननियमः । [2]"गोदोहनेन पशुकामस्य प्रणयेत्" इत्यादिवद्विधिवाक्येऽधिकारान्तराभवणादुद्गीथाङ्गभाव एव हि विधेय इति गम्यते ॥ ६० ॥

समाहारात् । ३ । ३ । ६१ ॥

[3]"होतृषदनाद्वैवापि दुरुद्गीथमनुसमाहरति" इत्युपासनस्य समाहारनियमो दृश्यते । दुरुद्गीथं वेदनविहीनमुद्गीथम् । वेदनहानावन्येन समाधानं ब्रुवत्तस्य नियमेनोपादानं दर्शयति ॥ ६१ ॥

गुणसाधारण्यश्रुतेश्च । ३ । ३ । ६२ ॥

उपासनगुणस्य उपासनाश्रयस्य प्रणवस्य सोपासनस्य [4]"तेनेयं त्रयी विद्या वर्तते ओमित्याश्रावयत्योमिति शंसत्योमित्युद्गायति" इति साधारण्यश्रुतेश्चोपासनसमाहारो गम्यते । [4]"तेन" इति प्रकृतपरामर्शात्सोपासन एव प्रणवस्सर्वत्र सञ्चरति । अत उपासनस्य प्रणवसहभावनियमदर्शनाच्चोद्गीथाद्युपासनानामुद्गीथादिवन्नियमेनोपादानम् ॥

(सिद्धान्तः)

इति प्राप्त उच्यते–

न वा तत्सहभावाश्रुतेः । ३ । ३ । ६३ ॥

नचैतदस्ति–यदुद्गीथाद्युपासनानां क्रतुषूद्गीथादिवदुपादाननियमः –इति । कुतः ? तत्सहभावाश्रुतेः–उद्गीथाङ्गभावाश्रुतेरित्यर्थः । अङ्गभा-

---

१. छा. १-१-१ ॥—२ ॥—३. छा. १-५-५ ॥—४. छा. १-१-९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वे हि सहभावनियमो भवति । यद्यपि [1]"उद्गीथमुपासीत" इत्यस्मिन् पदसमुदायेऽधिकारान्तरं न प्रतीयते; तथापि तदनन्तरमेव [2]"यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति" इति विद्यायाः क्रतुवीर्यवत्तरत्वं प्रति साधनभावः प्रतिपाद्यते । तेन क्रतुफलात्पृथग्भूतफलसाधनभूता विद्या [1]"उद्गीथमुपासीत" इति कर्तव्यतया विधीयते। क्रतुफलात्पृथग्भूतफलसाधनतयाऽवगतस्योपासनस्य क्रत्वङ्गभूतोद्गीथाङ्गतया विनियोगो नोपपद्यते । अथ उपासनस्याश्रयापेक्षायां सन्निहित उद्गीथ आश्रयमात्रं भवति । उद्गीथश्च क्रत्वङ्गभूत इति क्रतुप्रयुक्तोद्गीथाद्याश्रये उपासने क्रत्वधिकारिण एव क्रतोर्वीर्यवत्तरत्वेच्छानिमित्तमिदमधिकारान्तरमिति न क्रतुषु तदुपादाननियमः। वीर्यवत्तरत्वं च क्रतुफलस्य प्रबलकर्मान्तरफलेनाप्रतिबन्ध इत्युक्तम् । क्रतोरविलम्बितफलत्वमित्यर्थः । पर्णतादीनां तु [2]"यदेव विद्यया करोति तदेव वीर्यवत्तरं भवति" इति विद्यायाः फलसाधनत्ववदपापश्लोकश्रवणादिफलं प्रति साक्षात्साधनभावो न श्रुत इति क्रत्वङ्गभूतजुह्वाद्यङ्गतया विनियोगाविरोधात्तदङ्गभूतानां फलान्तरसाधनभावकल्पनानुपपत्तेस्तत्र फलश्रुतिरर्थवादमात्रं स्यात् ॥६३॥

दर्शनाच्च । ३ । ३ । ६४ ॥

दर्शयति च श्रुतिरुपासनोपादानानियमम् [3]"एवं विद्धवै ब्रह्मा यज्ञं यजमानं सर्वाश्चर्त्विजोऽभिरक्षति" इति ब्रह्मणो वेदनेन सर्वेषां रक्षणं ब्रुवती । उद्गातृप्रभृतीनां वेदनस्यानियमे सत्येतदुपपद्यते । अनेन लिङ्गेन पूर्वोक्तानां समाहारादिलिङ्गानां प्रायिकत्वमवगम्यते। अतोऽनि-

---

१. छा. १-१-१ ॥—२. छा. १-१-१० ॥—३. छा. ४-१७-१० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यम एवेति स्थितम् ॥ ६४ ॥

इति श्रीशारीरकमीमांसाभाष्ये यथाश्रयभावाधिकरणम् ॥ २६ ॥

इति श्रीभगवद्रामानुजविरचिते शारीरकमीमांसाभाष्ये तृतीयस्याध्यायस्य तृतीयः पादः ॥ ३ ॥

वेदान्तसारे—अङ्गेषु यथाश्रयभावः ॥ १"उद्गीथमुपासीत" इत्युद्गीथाद्यङ्गेष्वाश्रितानामुद्गीथादिवत् क्रत्वङ्गभाव एव, गोदोहनादिवत् स्वर्गाद्ये फलान्तराश्रवणात् उद्गीथादिसम्बन्धितया क्रत्वङ्गभावो न विरुध्यत इति॥५९॥

शिष्टेश्च ॥ १"उद्गीथमुपासीत" इति विधेः २ "यदेव विद्यया करोति" इत्यत्र विध्यभावाच्चाङ्गभावो न विरुद्धः ॥ ६० ॥

समाहारात् ॥ ३"उद्गीथमनुसमाहरति" इति वेदनहानावन्येन समाधानं श्रुवत् वेदनस्याङ्गतां द्योतयति ॥ ६१ ॥

गुणसाधारण्यश्रुतेश्च ॥ प्रकृतोपासनस्यैव ४"ओमित्याश्रावयत्योमिति शंसत्योमित्युद्गायति" इति सर्वत्र सञ्चरतः प्रणवस्य गुणत्वेनोपासनस्यापि सञ्चारादुपासनोपादाननियमो गम्यते । अतः पूर्वोक्तोपादाननियमो न संभवति॥

न वा तत्सहभावाश्रुतेः ॥ नैतत्, अङ्गभावाश्रुतेः । अङ्गभावो हि सहभावः। २" यदेव विद्यया करोति...तदेव वीर्यवत्तरम्" इति फलान्तरसाधनतयाऽवगतस्योपासनस्याङ्गभावासंभवात्, १"उद्गीथमुपासीत" इत्युद्गीथाश्रवतामात्रप्रतिपादनात् ॥ ६३ ॥

दर्शनाच्च ॥५"एवं विद्धवै ब्रह्मा यज्ञं यजमानं सर्वोऽऋत्विजोऽभिरक्षति" इति ब्रह्मणो वेदनेन सर्वरक्षणं श्रुवती श्रुतिरुद्गातृप्रभृतीनां वेदनस्य नाङ्गतां दर्शयतीति उपासनोपादाननियमस्सिद्धः ॥ ६४ ॥

इति वेदान्तसारे यथाश्रयभावाधिकरणम् ॥ २६ ॥

इति श्रीभगवद्रामानुजविरचिते श्रीवेदान्तसारे तृतीयस्याध्यायस्य तृतीयः पादः ॥ ३ ॥

---

१. छा. १-१-१ ॥—२. छा. १-१-१०॥—३. छा. १-५-५ ॥—४. छा. १-१-९ ॥—५. छा. ४-१७-१० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वेदान्तदीपे—अङ्गेषु यथाश्रयभावः ॥ कर्माङ्गाश्रयाणामुद्गीथादिषूपासनानां गोदोहनादिवदधिकारान्तरत्वेनोपादाननियमः पूर्वोक्तस्सम्भवति, नेति संशयः। न सम्भवतीति पूर्वः पक्षः, १"उद्गीथमुपासीत" इत्युपासनविधौ फलान्तराश्रवणात्, उद्गीथसम्बन्धावगतक्रत्वङ्गभावाविरोधात्। एवं विधिवाक्येनैव क्रत्वङ्गभावेऽवगते सति२"यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति...तेनोभौ कुरुतः"इति च वर्तमाननिर्देशः३"न स पापं श्लोकं शृणोति"इतिवदर्थवादमात्रं स्यात्।राद्धान्तस्तु—२"यदेव विद्यया करोति... तदेव वीर्यवत्तरम्"इति विद्यायाः क्रतुवीर्यवत्तरत्वं प्रति साक्षात्साधनभावोऽवगम्यते।एवं फलसाधनतयाऽवगता विद्या किमाश्रित्य फलं करोतीत्यपेक्षायाम् १"ओमित्येतदक्षरमुद्गीथमुपासीत" इत्युद्गीथमाश्रित्य कुर्यादिति क्रत्वङ्गभूतोद्गीथाश्रयत्वमात्रं प्रतीयते; अतः फलान्तरसाधनतयाऽवगतस्य क्रत्वङ्गभावो नोपपद्यत इति गोदोहनादितुल्यतयोपादानानियमस्सिध्यत्येव। ३"यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोति" इत्यत्र तु पर्णताया जुहूसम्बन्धात्प्रागपापश्लोकश्रवणं प्रति साक्षात्साधनभावो न श्रूयते; पर्णतासम्बन्धिषुरुषसम्बन्धमात्रं श्रुतम्; तस्तु ३"पर्णमयी जुहूः" इति श्रुत्यैव प्रथमावगतक्रत्वङ्गभावं न निरुणद्धीत्यर्थवादमात्रमिति विशेषः। सूत्रार्थस्तु—अङ्गेषु - उद्गीथादिष्वाश्रितानामुपासनानां यथाश्रयभावः—उद्गीथादिवदङ्गभावः, गोदोहनादिवत् तस्मिन्वाक्ये फलसम्बन्धाश्रवणादङ्गभावो न विरुध्यत इत्यर्थः ॥ ५९ ॥

शिष्टेश्च ॥ शिष्टिः-शासनम्, विधानम् १ "उद्गीथमुपासीत" इति विधानाच्च वर्तमाननिर्देशावगतफलसम्बन्धात्प्रागेवोद्गीथसम्बन्धोऽवगत इति तदङ्गभावो न विरुध्यते। अत उपादाननियमः ॥ ६० ॥

समाहारात् ॥ इतश्च ४"होतृषदनाद्यैर्वापि दुरुद्गीथमनुसमाहरति" इत्युद्गीथवेदनहानावन्येन समाधानं ब्रुवत् वेदनस्योपादाननियमं दर्शयति। दुरुद्गीथं वेदनहीनमुद्गीथम् ॥ ६१ ॥

गुणसाधारण्यश्रुतेश्च ॥ इतश्चोपादाननियमोऽवगम्यते। प्रणवगुणत्वेनावगतस्योपासनस्य साधारण्यं हि श्रूयते५"तेनेयं त्रयी विद्या वर्तते ओमित्याश्रावयत्योमिति शंसत्योमित्युद्गायति" इति। तेनेति प्रकृतपरामर्शात्सोपा-

---

१. छा. १-१-१ ॥—२. छा. १-१-१० ॥—३. ३-कां. ५-प्र. ७-अनु ॥ —४. छा. १-५-५ ॥—५. छा. १-१-९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सन एव प्रणवस्सर्वत्र सञ्चरति । अतः प्रणवसहभावनियमदर्शनादुपादाननियमो निश्चीयते ॥ ६२ ॥

न वा तत्सहभावाश्रुतेः ॥ न वोपादाननियमः, तत्सहभावाश्रुतेः—उद्गीथाद्यङ्गभावाश्रुतेरित्यर्थः । क्रत्वङ्गभावो हि सहभावः। १"यदेव विद्यया करोति...तदेव वीर्यवत्तरम्" इति वीर्यवत्तरत्वसाधनतयाऽवगताया विद्यायाः क्रत्वङ्गतया विनियोगासम्भवात् तदङ्गभावो हि न श्रूयते। यत्र साक्षात्फलसाधनत्वं प्रतिपाद्यते; तत्र फलसाधनत्वं प्रथमं प्रतीयत इति तस्य क्रत्वङ्गतया विनियोगो न सम्भवतीत्यभिप्रायः ॥ ६३॥

दर्शनाच्च॥२"एवं विद्वं वै ब्रह्मा यज्ञं यजमानं सर्वाश्चर्त्विजोऽभिरक्षति" इति ब्रह्मणो वेदनेन यज्ञस्य यजमानस्य ऋत्विजां च रक्षणं स्रुवस्यन्येषां वेदनाभावं दर्शयति । तच्चोद्गीथोपासनस्यानङ्गत्वे सत्येवोपपद्यते । अतश्चोपादाननियमः ॥ ६४ ॥

इति वेदान्तदीपे यथाश्रयभावाधिकरणम् ॥ २६ ॥

इति श्रीभगवद्रामानुजविरचिते श्रीवेदान्तदीपे तृतीयस्याध्यायस्य तृतीयः पादः ॥ ३ ॥

---

१. छा. १-१-१० ॥—२. छा. ४-१७-१० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीमते रामानुजाय नमः

श्रीभगवद्रामानुजविरचिते

श्रीशारीरकमीमांसाभाष्ये

(तृतीयाध्याये - चतुर्थः पादः - पुरुषार्थाधिकरणम् ॥१॥)

पुरुषार्थोऽतश्शब्दादिति बादरायणः । ३ । ४ । १ ॥

गुणोपसंहारानुपसंहारफला विद्यैकत्वनानात्वचिन्ता कृता; इदानीं विद्यातः पुरुषार्थः, उत विद्याङ्गकात्कर्मण इति चिन्त्यते । किं युक्तम् ? अतः - विद्यातः पुरुषार्थ इति भगवान् बादरायणो मन्यते; कुतः ? शब्दात्—दृश्यते ह्यौपनिषदः शब्दो विद्यातः पुरुषार्थं ब्रुवन् १"ब्रह्मविदाप्नोति परम्" २"वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात् । तमेवं विद्वानमृत इह भवति । नान्यः पन्था विद्यतेऽयनाय" ३"यथा नद्यः स्यन्दमानास्समुद्रे अस्तं गच्छन्ति नामरूपे विहाय । तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम्"इत्यादि॥ १॥

अत्र पूर्वपक्षी प्रत्यवतिष्ठते—

शेषत्वात्पुरुषार्थवादो यथान्येष्विति जैमिनिः । ३ । ४ । २ ॥

१. तै. आ. १-अनु ॥—२. पुरुषसूक्तम् ॥—३. मु. ३-२-८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नैतदेवम्-यद्विद्यातः पुरुषार्थावाप्तिश्शब्दादवगम्यते—इति। न शेषः १"ब्रह्मविदाप्नोति परम्" इत्यादिशब्दो वेदनात्पुरुषार्थावाप्तिमवगमयति, कर्मसु कर्तृभूतस्याऽत्मनो याथात्म्यवेदनप्रतिपादनपरत्वात्।अतः कर्तुस्संस्कारद्वारेण विद्यायाः क्रतुशेषत्वात्तत्र फलश्रुतिरर्थवादमात्रम्;यथाऽन्येषु द्रव्यादिषु—इति जैमिनिराचार्यो मन्यते। तदुक्तं २"द्रव्यगुणसंस्कारकर्मसु परार्थत्वात्फलश्रुतिरर्थवादस्स्यात्" इति। ननुच कर्मसु कर्तुर्जीवादन्यो मुमुक्षुभिः प्राप्यतया वेदान्तेषु वेद्य उपदिश्यत इति प्रागेवोपपादितं—३"नेतरोऽनुपपत्तेः" ४"भेदव्यपदेशाच्च" ५"अनुपपत्तेस्तु न शारीरः" ६"इतरपरामर्शात्स इति चेन्नासम्भवात्" इत्येवमादिभिस्सूत्रैः; तदेव ब्रह्म तत्त्वमस्यादिसामानाधिकरण्येन जीवादनतिरिक्तमित्येतदपि ७"अधिकं तु भेदनिर्देशात्" इत्येवमादिभिर्निरस्तम्; सामानाधिकरण्यनिर्देशश्च ८"ऐतदात्म्यमिदं सर्वं" ९"सर्वं खल्विदं ब्रह्म" इति चेतनाचेतनसाधारणः; १०"यः पृथिव्यां तिष्ठन्" ११ "य आत्मनि तिष्ठन्" इत्यादिनाऽवगततत्तदात्मतयाऽवस्थितिनिबन्धन इति १२"अवस्थितेरिति काशकृत्स्नः" इत्यादिभिरुपपादितम्; तत्कथं कर्मसु कर्तुरात्मनो याथात्म्योपदेशपरा वेदान्तशब्दा इति विद्यायाः कर्माङ्गत्वं प्रतिपाद्यते?। उच्यते—वेदान्तवाक्येष्वेव विद्यायाः कर्मप्राधान्यं सूचयद्भिर्लिङ्गैस्तदुपबृंहितसामानाधिकरण्यनिर्देशेन च वेदान्तशब्दा देहातिरिक्तजीवस्वरूपयाथात्म्योपदेशपरा इति बलादभ्युपगमनीयमिति पूर्वपक्षिणोऽभिप्रायः। ननु च कर्तृसंस्कारमुखेन विद्यायाः क्रत्वनुप्रवेशो न शक्यते वक्तुम्, कर्तुर्लौकिकवैदिकसाधारणत्वेनाव्यभिचरितक्रतुसम्बन्धित्वाभावात्। नैवम्,

---

१. तै. आ. १-अनु॥—२. पूर्वमीमांसा.४-३-१ ॥—३. शारी.१-१-१७॥—४. शारी.१-१-१८॥—५. शारी. १-२-३ ॥—६. शारी. १-३-१७ ॥—७. शारी. २-१-२२ ॥—८. छा.६-८-७॥—९. छ. ३-१४-१॥—१०. बृ.५-७-३॥—११. बृ.५-७-२२. मा-पा ॥—१२. शारी. १-४-२२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लौकिकस्य कर्मणः कर्तुर्देहादव्यतिरिक्तत्वेऽप्युपपत्तेर्देहातिरिक्तनित्यात्मस्वरूपस्य क्रतावेवोपयोगात्तत्स्वरूपप्रतिपादनमुखेन क्रत्वनुप्रवेशो न विरुध्यते । अतो विद्यायाः क्रतुशेषत्वान्नातः पुरुषार्थः ॥ २ ॥

कानि पुनस्तानि लिङ्गानि ; यदुपबृंहितसामानाधिकरण्यनिर्देशेन वेदान्तशब्दा जीवस्वरूपपरा इति निर्णीयन्ते । तत्राह—

आचारदर्शनात् । ३ । ४ । ३ ॥

ब्रह्मविदां प्राधान्येन कर्मस्वेवाचारो दृश्यते—अश्वपतिः कैकयः किल आत्मवित्तमस्तद्विज्ञानायोपगतांस्तानृषीन् प्रत्याह—[१]"यक्ष्यमाणो ह वै भगवन्तोऽहमस्मि" इति । तथा जनकादयो ब्रह्मविदग्रेसराः कर्मनिष्ठाः स्मृतिषु दृश्यन्ते [२]"कर्मणैव हि संसिद्धिमास्थिता जनकादयः" [३]"इयाज सोऽपि सुबहून् यज्ञान् ज्ञानव्यपाश्रयः" इति । अतो ब्रह्मविदां कर्मप्रधानत्वदर्शनाद्विद्यायाः कर्तृस्वरूपवेदनरूपत्वेन कर्माङ्गत्वमेवेति न विद्यातः पुरुषार्थः ॥ ३ ॥

लिङ्गमिदम् ; प्राप्तिरुच्यतामित्यत्राह—

तच्छ्रुतेः । ३ । ४ । ४ ॥

श्रुतिरेव हि विद्यायाः कर्माङ्गत्वमाह—[४]"यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति" इति । नेयं श्रुतिः प्रकरणाद्द्वीथमात्रविषयेति व्यवस्थापयितुं शक्या; यतः प्रकरणाच्छ्रुतिर्बलीयसी; [४]"यदेव विद्यया करोति" इति विद्यामात्रविषया हीयं श्रुतिः ॥ ४ ॥

समन्वारम्भणात् । ३ । ४ । ५ ॥

[५]"तं विद्याकर्मणी समन्वारभेते" इति विद्याकर्मणोस्साहित्यं च

---

१. छा. ५-११-५ ॥—२. गी. ३-२० ॥—३. वि. ६-६-१२ ॥—४. छा. १-१-१० ॥—५. बृ. ६-४-२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दृश्यते। साहित्यं चोक्तेन न्यायेन विद्यायाः कर्माङ्गत्वे सत्येव भवति ॥

तद्वतो विधानात् । ३ । ४ । ६ ॥

विद्यावतः कर्मविधानाद्विद्या कर्माङ्गमित्यवगम्यते—[१]"आचार्यकुलाद्वेदमधीत्य यथाविधानं गुरोः कर्मातिशेषेणाभिसमावृत्य कुटुम्बे शुचौ देशे" इत्यादौ। [१]"वेदमधीत्य" इत्यध्ययनवतः कर्माणि विदधद्अर्थावबोधपर्यन्ताध्ययनवत एव विदधाति। अर्थावबोधपर्यन्तं ह्यध्ययनमिति स्थापितम्। अतो ब्रह्मविद्यापि कर्मसु विनियुक्तेति न पृथक्फलायावकल्पते ॥ ६ ॥

नियमात् । ३ । ४ । ७ ॥

इतश्च न विद्यातः पुरुषार्थः। [२]"कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः" इत्यात्मविदः पुरुषायुषस्य सर्वस्य कर्मसु नियमेन विनियोगात्कर्मण एव फलमित्यवगम्यते। विद्या तु कर्माङ्गमिति ॥ ७ ॥

(सिद्धान्तः)

एवं प्राप्ते प्रचक्ष्महे—

अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात् । ३ । ४ । ८ ॥

तुशब्दात्पक्षो व्यावृत्तः; विद्यात एव पुरुषार्थः; कुतः? अधिकोपदेशात्—कर्मसु कर्तुर्जीवाद्धेयप्रत्यनीकानवधिकातिशयासङ्ख्येयकल्याणगुणाकरत्वेनाधिकस्यार्थान्तरभूतस्य परस्य ब्रह्मणो वेद्यतयोपदेशात् भगवतो बादरायणस्य विद्यातः [३]फलमित्येवमेव मतम्। लिङ्गानि तिष्ठन्तु; वेद्यतयोपदेशस्तु तावत्कर्तुः प्रत्यगात्मनोऽधिकस्यैव। कथम्? तद्दर्शनात्—प्रत्यगात्मन्यशुद्धे शुद्धेऽप्यसम्भावनीयानन्तगुणाकरस्य वेद्यस्य

१. छा. ८-१५-१ ॥—२. ईशावास्य-२ ॥—३. पुरुषार्थ इत्ये. पा ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निरस्तनिखिलहेयगन्धस्य स्वसङ्कल्पकृतजगदुदयविभवलयलीलस्य सर्वज्ञस्य सर्वशक्तेर्वाङ्मनसापरिच्छेद्यानन्दस्य जीवाधिपस्य कृत्स्नस्य प्रशासितुः परस्य ब्रह्मणो वेदनोपदेशवाक्येषु दर्शनात्[१] "अपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासस्सत्यकामस्सत्यसङ्कल्पः" [२] "तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजत" [३] "यस्सर्वज्ञस्सर्ववित्" [४] "पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च" [५] "स एको ब्रह्मण आनन्दः" [६] "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चनेति" [७] "एष सर्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरणः" [८] "स कारणं करणाधिपाधिपो नचास्य कश्चिज्जनिता नचाधिपः" [९] "एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः (एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ विधृते तिष्ठतः)" [१०] "भीषास्माद्वातः पवते। भीषोदेति सूर्यः। भीषास्मादग्निश्चेन्द्रश्च। मृत्युर्धावति पञ्चमः" इत्यादिषु। तस्माद्वेदनोपदेशशब्देषु कर्तुः प्रत्यगात्मनः खद्योतकल्पस्याविद्यादिहेयसम्बन्धयोग्यस्य गन्धोऽपि नास्तीति परमपुरुषविषयाया विद्यायास्तत्प्राप्तिरूपममृतत्वं तत्तत्र श्रूयमाणं फलमिति विद्यातः पुरुषार्थ इति सुष्ठूक्तम् ॥ ८ ॥

लिङ्गान्यपि निरस्यन्ते—

तुल्य तु दर्शनम् । ३ । ४ । ९ ॥

यदुक्तं—ब्रह्मविदां कर्मानुष्ठानदर्शनाद्विद्या कर्माङ्गम्—इति; तन्न विद्याया अनङ्गत्वेऽपि तुल्यं दर्शनम्, ब्रह्मविदां कर्मानुष्ठानदर्शनमनैकान्तिकमित्यर्थः, अननुष्ठानस्यापि दर्शनात् । दृश्यते हि ब्रह्मविदां कर्म-

---

१. छा. ८-१-५॥—२. छा. ६-२-३॥—३. मु. १-१-९ ॥—४. श्वे. ६-८ ॥—५. तै. आन. ८-४ ॥—६. तै. आन. ४-१ ॥—७. बृ. ६-४-२२ ॥ —८. श्वे. ६-९ ॥—९. बृ. ५ ८-९॥—*कुण्डलितो वाक्यशेषः केषुचित्कोशेषु न दृश्यते ॥—१०. तै.आ. ८-१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्यागः १"ऋषयः कावषेयाः किमर्था वयमध्येष्यामहे किमर्था वयं यक्ष्यामहे" इत्यादौ । अतो ब्रह्मविदां कर्मत्यागदर्शनान्न विद्या कर्माङ्गम्। कथमिदमुपपद्यते–ब्रह्मविदां कर्मानुष्ठानमननुष्ठानञ्च ? फलाभिसन्धिरहितस्य यज्ञादिकर्मणो ब्रह्मविद्याङ्गत्वात्तथाविधस्य कर्मणोऽनुष्ठानदर्शनमुपपद्यते । वक्ष्यतिच्च२"सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्"इति। फलार्थस्य तस्यैव यज्ञादेः कर्मणो मोक्षैकफलब्रह्मविद्याविरोधित्वात्तस्याननुष्ठानदर्शनमुपपन्नतरम् । विद्यायाः कर्माङ्गत्वे कर्मत्यागः कथमपि नोपपद्यते॥ ९ ॥

यदुक्तं-श्रुत्यैव विद्यायाः कर्माङ्गत्वमवगम्यते इति ; तत्राह—

असार्वत्रिकी । ३ । ४ । १० ॥

न सर्वविद्याविषयेयं श्रुतिः ; अपितूद्गीथविद्याविषयैव ३ "यदेव विद्यया करोति" इति यच्छब्दस्यानिर्धारितविशेषस्य ४"उद्गीथमुपासीत" इति प्रस्तुतोद्गीथविशेषनिष्ठत्वात् । नहि यत्करोति, तद्विद्ययेति सम्बध्यते; यदेव विद्यया करोति, तदेव वीर्यवत्तरमिति विद्यया क्रियमाणं यच्छब्देन निर्दिश्य तस्य हि वीर्यवत्तरत्वमुच्यते ॥ १० ॥

यच्चेदमुक्तं ५"तं विद्याकर्मणी समन्वारभेते " इति विद्याकर्मणोस्साहित्यदर्शनाद्विद्या कर्माङ्गम्–इति ; तत्राह—

विभागश्शतवत् । ३ । ४ । ११ ॥

५"तं विद्याकर्मणी समन्वारभेते" इत्यत्रोक्तेन न्यायेन विद्याकर्मणोर्भिन्नफलत्वाद्विद्या स्वस्मै फलाय समन्वारभते, कर्म च स्वस्मै फलायेति विभागो द्रष्टव्यः । शतवत्–यथा क्षेत्ररत्नविक्रयिणं शतद्वयमन्वेतीत्युक्ते क्षेत्रार्थं शतम्, रत्नार्थं शतमिति विभागः प्रतीयते; तथेहापि ॥

अध्ययनमात्रवतः । ३ । ४ । १२ ॥

---

१ ॥—२. शारी. ३-४-२६ ॥—३. छा. १-१-१० ॥—४. छा. १-१-१ ॥—५. बृ. ६-४-२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यदुक्तं विद्यावतः कर्मविधानाद्विद्या कर्माङ्गम्–इतिः नैतदुक्तम्, १"वेदमधीत्य" इत्यध्ययनमात्रवतो विधानात्। नचाध्ययनविधिरेवार्थबोधे प्रवर्तयति, आधानवदध्ययनस्याक्षरराशिग्रहणमात्रे पर्यवसानात्। गृहीतस्य च स्वाध्यायस्य फलवत्कर्मावबोधित्वदर्शनात्तन्निर्णयफले तदर्थविचारे पुरुषः स्वयमेव प्रवर्तते; ततः कर्मार्थी कर्मज्ञाने प्रवर्तते, मोक्षार्थी च ब्रह्मज्ञान इति न विद्या कर्माङ्गम्। यद्यप्यध्ययनविधिरेवार्थावबोधे प्रवर्तयति; तथापि न विद्या कर्माङ्गम्, अर्थज्ञानादर्थान्तरत्वाद्विध्यायाः। यथा ज्योतिष्टोमादिकर्मस्वरूपविज्ञानात्फलसाधनभूतं कर्मानुष्ठानमर्थान्तरम्; तथाऽर्थज्ञानरूपाद्ब्रह्मस्वरूपविज्ञानादर्थान्तरमेव ध्यानोपासनादिशब्दवाच्या पुरुषार्थसाधनभूता विद्येति न तस्याः कर्मसम्बन्धगन्धो विद्यते॥ १२॥

नाविशेषात्। ३। ४। १३॥

यच्चोक्तं २"कुर्वन्नेवेह कर्माणि" इत्यात्मविदं ज्ञानाद्ध्यावर्त्य यावज्जीवं कर्मानुष्ठाने नियमयतीति; तन्नोपपद्यते; अविशेषात्-नह्ययं नियमः फलसाधनभूतस्वतन्त्रकर्मविषय इति विशेषहेतुरस्ति,विद्याङ्गभूतकर्मविषयतयाऽप्युपपत्तेः। ३"कर्मणैव हि संसिद्धिमास्थिता जनकादयः" इति च विदुषस्त्वाप्रयाणादुपासनस्यानुवर्तमानत्वात्॥ १३॥

एवमर्थस्वाभाव्येन चोद्यं परिहृत्य २"कुर्वन्नेवेह कर्माणि" इत्यस्य वाक्यस्यार्थमाह—

स्तुतयेऽनुमतिर्वा। ३। ४। १४॥

वाशब्दोऽवधारणार्थः; २"ईशावास्यमिदं सर्वम्" इति विद्याप्रकरणाद्विद्यास्तुतये सर्वदा कर्मानुष्ठानानुमतिरियम्। विद्यामाहात्म्यात्स-

१. छा. ८-१५-१॥—२. ईशावास्य. २॥—३. गी. ३-२०॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

र्वदा कर्म कुर्वन्नपि न लिप्यते कर्मभिरिति हि विद्या स्तुता भवति। वाक्यशेषश्चैवमेव दर्शयति–[१]"एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे" इति। अतो न कर्माङ्गं विद्या ॥ १४ ॥

कामकारेण चैके । ३ । ४ । १५ ॥

अपि चैवमेके शाखिनः कामकारेण ब्रह्मविद्यानिष्ठस्य गार्हस्थ्यत्यागमधीयते [२]" किं प्रजया करिष्यामो येषां नोयमात्माऽयं लोकः" इति। विदुषो विरक्तस्य कामकारेण गार्हस्थ्यकर्मत्यागं ब्रुवदिदं वचनं ब्रह्मविद्यायाः कर्मानङ्गत्वं दर्शयति। यज्ञादिकर्माङ्गत्वेहि विद्यायाः विद्यानिष्ठस्य कामकारेण गार्हस्थ्यत्यागो न सम्भवति। अतो न विद्या कर्माङ्गम् ॥ १५ ॥

उपमर्दं च । ३ । ४ । १६ ॥

पुण्यापुण्यरूपस्य समस्तसांसारिकदुःखमूलस्य कर्मणो ब्रह्मविद्ययोपमर्दं च प्रतिवेदान्तमधीयते। [३]" भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे"इत्यादिकम्। तद्विद्यायाः कर्माङ्गत्वे न सङ्गच्छते ॥ १६ ॥

ऊर्ध्वरेतस्सु च शब्दे हि । ३ । ४ । १७ ॥

ऊर्ध्वरेतस्स्वाश्रमेषु ब्रह्मविद्यादर्शनात्तेष्वग्निहोत्रदर्शपूर्णमासादिकर्माभावाच्च न विद्या कर्माङ्गम्। ननूर्ध्वरेतस आश्रमा न सन्त्येव [४]"यावज्जीवमग्निहोत्रं जुहोति" इत्यादिनाऽग्निहोत्रदर्शपूर्णमासादीनां यावज्जीवाधिकारश्रुतेः; श्रुतिविरुद्धानां स्मृतीनां चाप्रामाण्यात्। अत आह–शब्दे हि–इति। वैदिक एव हि शब्दे ते दृश्यन्ते[५]"त्रयो धर्मस्कन्धाः" [६]"ये चेमेऽरण्ये श्रद्धा तप इत्युपासते" [२]"एतमेव प्रव्राजिनो लोकमिच्छन्तः

१. ईशा. १-२ ॥—२. बृ. ६-४-२२ ॥—३. मु. २-२-८॥—४. आपस्तम्बश्रौत. ३-१४-८ ॥ बह्वृच इति शाबरः ॥—५. छा. २-२३-१॥—६. छा.५-१०-१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रव्रजन्ति" इत्यादौ। यावज्जीवश्रुतिस्त्वविरक्तविषया ॥ १७ ॥

परामर्शं जैमिनिरचोदनाच्चापवदति हि।३।४।१८॥

यदिदं १"त्रयो धर्मस्कन्धाः" इत्यादौ वैदिके शब्दे ऊर्ध्वरेतस आश्रमा दृश्यन्ते; अतस्ते सन्त्येवेति; नैतदुपपद्यते; यतः १"त्रयो धर्मस्कन्धाः"इत्यादिषु वाक्येषु तेषामाश्रमाणां परामर्शमात्रं क्रियते–अनुवादमात्रमित्यर्थः। कुत एतत्? अचोदनात्–अविधानादित्यर्थः। न ह्यत्र विधिशब्दः श्रूयते; १"त्रयो धर्मस्कन्धाः" इत्यादिना हि प्रकृतं प्रणवेन ब्रह्मोपासनं स्तूयते, १"ब्रह्मसंस्थोऽमृतत्वमेति" इत्युपसंहारात्। अतोऽन्यार्थमनुवादमात्रमत्र क्रियते तेषामाश्रमाणाम्। २"ये चेमेऽरण्ये श्रद्धा तप इत्युपासते" इति च देवयानविधिपरत्वाच्चत्रापि नाश्रमान्तरविधिसम्भवः। अपि चापवदति हि श्रुतिराश्रमान्तरं ३"वीरहा वा एष देवानां योऽग्निमुद्वासयते" इत्यादिका। अत ऊर्ध्वरेतस आश्रमा न सन्तीति जैमिनिराचार्यो मन्यते ॥ १८ ॥

अनुष्ठेयं बादरायणस्साम्यश्रुते ।३।४।१९॥

गृहस्थाश्रमवदाश्रमान्तरमप्यनुष्ठेयं भगवान् बादरायणो मन्यते। कुतः? साम्यश्रुतेः-उपादेयतयाऽभिमतगृहस्थाश्रमसाम्यं हि तेषामप्याश्रमाणां श्रूयते। १"त्रयो धर्मस्कन्धाः" इत्यारभ्य ब्रह्मसंस्थस्तुत्यर्थतया सङ्कीर्तनं गृहस्थाश्रमस्येतरेषां च समानम्; अथ गृहस्थाश्रमस्यानुवादः प्राप्तौ सत्यामेव संभवतीति तस्य प्राप्तिरवश्याभ्युपेत्येति मतम्; तदितरेषामपि समानमन्यत्राभिनिवेशात्। नच गार्हस्थ्यधर्म एव १"यज्ञोऽध्ययनं दानं तपो ब्रह्मचर्यम्" इति सर्वैश्शब्दैरभिधीयते, ब्रह्मचर्यतपसोर्गृहस्थस्यैव सम्भवादिति युक्तम्, १"त्रयो धर्मस्कन्धाः" इति त्रित्वेन संगृह्य १"प्रथमो...द्वितीयः....तृतीयः" इति विभागवचनानुपपत्तेः। अतः

१. छा. २-२३-१॥—२.छा.५-१०-१॥—३.यजु. १-कां. ५-प्र. २-अनु ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

१"यज्ञोऽध्ययनं दानम्" इति गृहस्थाश्रम उच्यते। अध्ययनशब्दो वेदाभ्यासपरः। तपश्शब्देन वैखानसपारिव्राज्ययोर्ग्रहणम्, उभयोः तपःप्रधानत्वात्। तपश्शब्दो हि कायक्लेशे रूढः; स च द्वयोरपि समानः। ब्रह्मचारिधर्म एव ब्रह्मचर्यशब्देनाभिधीयते। २"ब्रह्मसंस्थोऽमृतत्वमेति" इति परत्र श्रूयमाणो ब्रह्मसंस्थशब्दो यौगिकः सर्वाश्रमसाधारणः, सर्वेषामाश्रमिणां ब्रह्मसंस्थासम्भवात्। ब्रह्मणि संस्था—संस्थितिः ब्रह्मसंस्थत्वम्; तच्च सर्वेषां सम्भवत्येव। ब्रह्मनिष्ठाविकलाः केवलाश्रमिणः पुण्यलोकभाजः; तेष्वेव ब्रह्मनिष्ठोऽमृतत्वभाग्भवति। तदेतद्विस्पष्टमुक्तं भगवता पराशरेण ३"प्राजापत्यं ब्राह्मणानाम्" इत्यारभ्य ४"ब्राह्मं संन्यासिनां स्मृतम्" इत्यन्तेन वर्णानामाश्रमाणां च केवलानां ब्रह्मलोकप्राप्त्यन्तं फलमभिधाय ५"एकान्तिनस्सदा ब्रह्मध्यायिनो योगिनो हि ये। तेषां तत्परमं स्थानं यद्वै पश्यन्ति सूरयः" इति तेष्वेव ब्रह्मनिष्ठानां ब्रह्मप्राप्तिमभिदधता। अतो गृहस्थाश्रमतुल्याः ऊर्ध्वरेतस आश्रमा अपि दृश्यन्त इति तेऽप्यनुष्ठेयाः। ६"ये चेमेऽरण्ये श्रद्धा तप इत्युपासते" इतिच अरण्ये इति तपःप्रधानाश्रमप्राप्त्यपेक्षत्वाद्देवयानविधानस्य तत्रापि तत्प्राप्तिरङ्गीकरणीया॥ १९॥

परामर्शपक्षे विधानपक्षे च गृहस्थाश्रमतुल्यमेषामप्यनुष्ठेयत्वमित्युपपाद्य विधिरेवायमाश्रमाणां सर्वेषां, नानुवाद इत्युपपादयितुमाह—

विधिर्वा धारणवत्। ३। ४। २०॥

वाशब्दोऽवधारणार्थः। विधिरेवायमाश्रमाणाम्; धारणवत्—यथा दिष्टाग्निहोत्रे ७"अधस्तात्समिधं धारयन्ननुद्रवेदुपरि हि देवेभ्यो धारयति" इत्यत्रानुवादसरूपादपि वाक्यादुपरि धारणस्याप्राप्तत्वाद्विधिराश्रीयते; तदुक्तं शेषलक्षणे ८"विधिस्तु धारणेऽपूर्वत्वात्" इति; तथाऽत्राप्यप्राप्त-

१. छा. २-२३-१॥—२. वि-पु. १-६-३४॥—३. वि-पु. १-६-३७॥—४. वि-पु. १-६-३९॥—५. छा. ५-१०-१॥—६॥—७. पू. मी. ३-४-१५॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्वाद्विधिरेवाश्रयणीयः । [1]"ब्रह्मचर्यं समाप्य गृही भवेत् गृहाद्वनी भूत्वा प्रव्रजेत् यदिवेतरथा ब्रह्मचर्यादेव प्रव्रजेत् गृहाद्वा वनाद्वा यदहरेव विरजेत् तदहरेव प्रव्रजेत्" इति जाबालानामाश्रमविधिमसन्तमिव कृत्वैतेष्वन्यपरेष्वपि वाक्येष्वाश्रमप्राप्तिरवश्याश्रयणीयेत्युपपादितम् । एवमाश्रमान्तरविधानादृणश्रुतिर्यावज्जीवश्रुतिरपवादश्रुतिश्चाविरक्तविषया एवेति वेदितव्याः । अन्याश्च ब्रह्मविदः कर्मणामाप्रयाणादवश्यकर्तव्यताविधायिन्यः श्रुतयः स्मृतयश्च स्वस्वाश्रमधर्मविषयाः । अत ऊर्ध्वरेतस्सु च ब्रह्मविद्याविधानाद्विद्यातः पुरुषार्थ इति सिद्धम् ॥ २० ॥

इति श्रीशारीरकमीमांसाभाष्ये पुरुषार्थाधिकरणम् ॥ १ ॥

वेदान्तसारे—पुरुषार्थोऽतश्शब्दादिति बादरायणः ।। विद्यातः पुरुषार्थः इति भगवान् बादरायणो मेने;[2]"ब्रह्मविदाप्नोति परम्"[2]"यो वेद... सोऽश्नुते सर्वान् कामान् सह" इत्यादिशब्दात् ॥ १ ॥

शेषत्वात्पुरुषार्थवादो यथान्येष्विति जैमिनिः ।। [3]"तत्त्वमसि" इत्यादिसामानाधिकरण्येन कर्मसु कर्तुरेव ब्रह्मत्वावगमात् तद्वेदनस्य तत्संस्कारतया कर्मशेषत्वात् द्रव्यादिष्विव फलश्रुतिरर्थवादः ॥ २ ॥

आचारदर्शनात् ।। [4]"यक्ष्यमाणो ह वै भगवन्तोऽहम्" इत्यादौ ब्रह्मविदः कर्मप्रधानाचारदर्शनात् विद्या कर्माङ्गम् ॥ ३ ॥

तच्छ्रुतेः ।। [5]"यदेव विद्यया करोति" इति श्रुत्यैव विद्यायाः कर्मसु विनियोगात् । यत्करोति, तद्विद्यया इति हि श्रुतिः । यद्विद्यया साधनभूतया कर्म करोति, तत्कर्म वीर्यवत्तरमिति वा ॥ ४ ॥

समन्वारम्भणात् ।। [6]"तं विद्याकर्मणी समन्वारभेते" इति विद्याकर्मणोरेकस्मिन्पुरुषे साहित्यदर्शनाच्च विद्या कर्माङ्गम् ॥ ५ ॥

तद्वतो विधानात् ।। [7]"आचार्यकुलाद्वेदमधीत्य...अभिसमावृत्य कुटुम्बे" इत्यादौ अर्थज्ञानपर्यन्ताध्ययनवतः कर्मविधानाच्च । अध्ययनं ह्यर्थज्ञानपर्यन्तम् ॥ ६ ॥

---

१ जाबालोप. ४. ख।—२. तै. आन. १-अनु ॥—३. छा. ६-८-७॥—४. छा. ५-११-५॥—५. छा. १-१-१० ॥—६. बृ. ६-४-२ ॥—७. छा. ८-१५-१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नियमात् ॥ १"कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः" इत्यात्मविदो जीवस्य कर्मसु विनियोगाच्च ॥ ७ ॥

अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात् ॥ न विद्या कर्माङ्गम्; अपितु विद्यातः पुरुषार्थ इत्येवमेव भगवतो बादरायणस्य मतम्, कर्तुः प्रत्यगात्मनोऽर्थान्तरभूतस्यैव वेद्यतयोपदेशात्। तत्कथम् १२"बहु स्यां प्रजायेयेति" ३"स कारणं करणाधिपाधिपः" इत्यादिवाक्येषु वेद्यस्याधिकत्वदर्शनात् ॥ ८ ॥

तुल्यं तु दर्शनम् ॥ विद्यायाः प्राधान्येऽपि तुल्यमाचारदर्शनम्; ४"ऋषयः कावषेयाः किमर्था वयमध्येष्यामहे" इत्यादौ ब्रह्मविदां कर्मत्यागो हि दृश्यते। अनुष्ठानन्तु फलाभिसन्धिरहितस्य विद्याङ्गत्वेन; त्यागस्तु फलाभिसन्धियुक्तस्येति न विरोधः ॥ ९ ॥

असार्वत्रिकी ॥ ५"यदेव विद्यया करोति" इति न सार्वत्रिकी विद्योच्यते ५"यदेव विद्यया" इति प्रसिद्धवस्निर्देशात्; प्रसिद्धिश्चोद्गीथविद्यायाः, ५"यदेव विद्यया करोति...तदेव वीर्यवत्तरं भवति" इति प्रकृतोद्गीथविद्यायुक्तस्य कर्मणो हि वीर्यवत्तरत्वसाधनभावो विधीयते ॥ १० ॥

विभागश्शतवत् ॥ ६"तं विद्याकर्मणी समन्वारभेते" इति विद्याकर्मणोर्भिन्नफलत्वेन स्वस्मै फलायान्वेतीति विभागः; यथा क्षेत्ररत्नविक्रयिणे शतद्वयमन्वेतीत्यत्र क्षेत्रार्थं शतम्, रत्नार्थं शतमिति ॥ ११ ॥

अध्ययनमात्रवतः ॥ ७"वेदमधीत्य" इत्यध्ययनमात्रवतः कर्मविधानात् न विद्या कर्माङ्गम्; अध्ययनविधिर्हि अक्षरराशिग्रहणमात्रे पर्यवस्यतीत्युक्तम्, अर्थावबोधपर्यन्तत्वेऽप्यर्थज्ञानादर्थान्तरभूता "विद्यात्."'"उपासीत" इति विहिता विद्या प्रत्ययावृत्तिरूपा ॥ १२ ॥

नाविशेषात् ॥ १"कुर्वन्नेवेह कर्माणि" इत्यत्र स्वतन्त्रे कर्मणि विद्वदायुषो विनियोग इति विशेषहेत्वभावात्, १"ईशावास्यमिदं सर्वम्" इति प्रकरणाच्च विद्याङ्गभूतमेवच तत्कर्मेति ज्ञायते, अतो न विद्या कर्माङ्गम् ॥ १३ ॥

स्तुतयेऽनुमतिर्वा ॥ विद्यास्तुतये कर्मानुमतिर्वा। विद्यामाहात्म्यात् सर्वदा कर्म कुर्वन्नपि तैर्न लिप्यते इति हि विद्या स्तुता स्यात्। १"न कर्म लिप्यते नरे" इति च वाक्यशेषः ॥ १४ ॥

---

१. ईशावास्य. २ ॥—२. छा. ६-२-३ ॥—३. श्वे. ६-९॥—४. ॥—५. छा. १-१-१० ॥—६. बृ. ६-४-२ ॥—७. छा. ८-१५-१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कामकारेण चैके ॥ १"किं प्रजया करिष्यामः"इत्यादिना कामकारेण गार्हस्थ्यत्यागमधीयत एके; अतश्च विद्यैव प्रधानभूता ॥ १५ ॥

उपमर्दं च ॥ विद्यया सर्वकर्मोपमर्दश्चाधीयते २"क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे" इत्यादिना ॥ १६ ॥

ऊर्ध्वरेतस्सु च शब्दे हि ॥ ऊर्ध्वरेतस्स्वाश्रमेषु विद्यादर्शनात् तेषु चाग्निहोत्राद्यभावान्न विद्या कर्माङ्गम् । ते चाश्रमास्सन्त्येव ; ३"त्रयो धर्मस्कन्धाः" इति वैदिके शब्दे हि दृश्यते ॥ १७ ॥

परामर्शं जैमिनिरचोदनाचापवदतिहि ॥ ३"त्रयो धर्मस्कन्धाः" इत्यत्र चोदनाभावादुपासनस्तुत्यर्थमनुवादमेव जैमिनिर्मेने । ४"वीरहा वा एष देवानां योऽग्निमुद्वासयते" इत्यपवदति चाश्रमान्तरम् ॥ १८ ॥

अनुष्ठेयं बादरायणस्साम्यश्रुतेः ॥ गृहस्थाश्रमवदाश्रमान्तरमप्यनुष्ठेयमिति बादरायणमतम् , ३"त्रयो धर्मस्कन्धाः" इति सर्वाश्रमसाम्यश्रुतेः॥

विधिर्वा धारणवत् ॥ ५"उपरि हि देवेभ्यो धारयति" इत्यप्राप्तत्वेन यथा विधिः ; तद्वत् ॥ २० ॥

इति वेदान्तसारे पुरुषार्थाधिकरणम् ॥ १ ॥

वेदान्तदीपे—**पुरुषार्थोऽतश्शब्दादिति बादरायणः॥** किं विद्यातः पुरुषार्थः, उत कर्मण इति संशयः । कर्मण इति पूर्वः पक्षः, कर्माङ्गत्वाद्विद्यायाः । कर्मसु कर्तृभूतप्रत्यगात्मनो याथात्म्यप्रतिपादनपराणि वेदान्तवाक्यानि। विद्यायाः कर्माङ्गत्वं च ६"यदेव विद्यया करोति...तदेव वीर्यवत्तरम्" इति श्रुत्यैवावगम्यते । नच प्रकृतोद्गीथोपासनविषयत्वमस्य वक्तुं शक्यते,६"यदेव विद्यया करोति" इति श्रुत्यैव सर्वकर्मसु विद्याया विनियुक्तत्वात् । श्रुतिश्च प्रकरणाद्बलीयसी। विद्यायाः कर्माङ्गत्वं कथमित्यपेक्षायां ७"तत्त्वमसि"८"अयमात्मा ब्रह्म" इति सामानाधिकरण्येन कर्माङ्गभूतकर्तृयाथात्म्यानुसन्धानद्वारेण विद्यायाः कर्माङ्गत्वमित्यवगम्यते । अतः कर्तृसंस्काररूपत्वाद्ब्रह्मविद्यायाः कर्मण एव पुरुषार्थः । तत्रतत्र फलश्रुतिरर्थवादस्स्यात् । विद्यायाः कर्माङ्गत्वे

---

१. बृ. ६-४-२२ ॥—२. मु. २-२-८ ॥—३. छा. २-२३-१ ॥—४. यजु. १-का. ५-प्र. २-अनु॥—५॥—६. छा. १-१-१०॥—७. छा. ६-८-७॥—८. बृ. ६-४-५॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भूयांसि लिङ्गानि च दृश्यन्ते सर्ववेदान्तेषु । सिद्धान्तस्तु—कर्मसु कर्तुः प्रत्यगात्मनोऽर्थान्तरभूतस्य स्वसङ्कल्पकृतजगदुदयविभवलयलीलस्य निखिलहेयप्रत्यनीककल्याणैकतानानन्तज्ञानानन्दैकस्वरूपस्य सर्वेश्वरस्य सत्यसङ्कल्पस्य करणाधिपरूपप्रत्यगात्माधिपस्य वेद्यस्य वेदनरूपाया विद्यायाः १"ब्रह्मविदाप्नोति परम्" इत्यादिषु ब्रह्मप्राप्तिरूपफलोपदेशात् विद्यात एव फलम् । २"यदेव विद्यया करोति" इति श्रुतिः प्रसिद्धवन्निर्देशात्, प्रसिद्धिश्च प्रकृतोद्गीथोपासनस्यैवेति. प्रस्तुतोद्गीथोपासनविशेषनिष्ठा । ३"तत्त्वमसि" इति सामानाधिकरण्यं च तच्छब्दनिर्दिष्टस्य स्वसङ्कल्पकृतजगज्जन्मस्थितिध्वंसादिकस्य परस्य ब्रह्मणो न जीवस्वरूपत्वपरम्; अपितु जगत्कारणस्य ब्रह्मणो जीवशरीरकतया जीवस्यात्मत्वपरमिति ४"अधिकं तु भेदनिर्देशात्" इत्यादिषूक्तम्। ५"य आत्मनि तिष्ठन्...यस्यात्मा शरीरम्" इति च प्रत्यगात्मन आत्मत्वं परस्य ब्रह्मणः श्रुत्यन्तरे व्यक्तम् । सूत्रार्थस्तु—पुरुषार्थोऽतः—विद्यातः; कुतः? १"ब्रह्मविदाप्नोति परम्" इत्यादिशब्दात् ॥ १ ॥

शेषत्वात्पुरुषार्थवादो यथाऽन्येष्विति जैमिनिः ॥३"तत्त्वमसि"इत्यादिसामानाधिकरण्येन ब्रह्मणः कर्मसु कर्तृस्वरूपत्वावगमाद्विद्यायाः कर्तृसंस्कारद्वारेण कर्मशेषत्वात्तत्र पुरुषार्थवादोऽर्थवादमात्रम् ; यथा अन्येषु द्रव्यसंस्कारादिष्विति जैमिनिराचार्यो मन्यते ॥ २ ॥

आचारदर्शनात् ॥ इतश्च विद्या कर्माङ्गम्; ब्रह्मविदामाचारो हि कर्मप्रधानो दृश्यते । यथाऽश्वपतिः कैकयो ब्रह्मविद्श्रेसरः ६"यक्ष्यमाणो ह वै भगवन्तोऽहमस्मि" इत्याह । ७"कर्मणैव हि संसिद्धिमास्थिता जनकादयः" इति च स्मर्यते ॥ ३ ॥

लिङ्गमिदम्; प्राप्तिरुच्यतामित्यत्राह—

तच्छ्रुतेः ॥ २"यदेव विद्यया करोति"इत्यादिकायाश्रुतेर्विद्यायाः कर्माङ्गत्वमवगम्यते । नच दुर्बलेन प्रकरणेन श्रुतिर्विद्याविशेषोद्गीथविषयोपासने व्यवस्थाप्यते ॥ ४ ॥

समन्वारम्भणात् ॥ ८"तं विद्याकर्मणी समन्वारभेते" इति विद्याकर्मणोरेकस्मिन्पुरुषे साहित्यं च विद्यायाः कर्माङ्गत्वे हि भवति ॥ ५ ॥

---

१. तै. आन. १-अनु१ ॥—२. छा. १-१-१० ॥—३. छा.६-८-७॥—४.ब्रा-री. २-१-२२ ॥—५. बृ. ५-७-२२॥ मा-पा ॥—६.छा.५-११-५ ॥—७ गी. ३-२०॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तद्वतो विधानात्॥ विद्यावतः कर्मविधानाच्च विद्या कर्माङ्गम्। १"आचार्यकुलाद्वेदमधीत्य यथाविधानं गुरोः कर्मातिशेषेणाभिसमावृत्य कुटुम्बे" इत्यादिनाऽध्ययनवतः कर्माणि विदधदर्थावबोधपर्यन्तत्वाद्ध्ययनस्य विद्यावत एव कर्माणि विदधातीत्यवगम्यते ॥ ६ ॥

नियमात् ॥ २"कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः" इत्यात्मविदामायुषः कर्मसु नियमदर्शनाच्च कर्मण एव पुरुषार्थः; न विद्यात इत्यवगम्यते। अतश्च विद्या कर्माङ्गम् ॥ ७ ॥

अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात् ॥ तुशब्दात्पक्षो व्यावृत्तः। बादरायणस्यैवं—विद्यातः फलमिति मतम्; कुतः? अधिकोपदेशात्—कर्मसु कर्तुः प्रत्यगात्मनोऽधिकस्य - अर्थान्तरभूतस्य वेद्यस्य वेदनभूतविद्यायाः फलसाधनत्वोपदेशात्। तद्दर्शनात्—दृश्यते हि वेदान्तवाक्येऽधिकविषयत्वं विद्यायाः। एवमेव हि ३"तदैक्षत बहु स्यां प्रजायेयेति"४"सोऽकामयत बहु स्यां प्रजायेय" इत्यादिषु बहुभवनसङ्कल्पपूर्वकसृष्ट्यादेः कर्तुस्सर्वेश्वरस्य करणाधिपाधिपस्यानवधिकातिशयज्ञानानन्दैकस्वरूपस्य निखिलहेयप्रत्यनीकस्य वेद्यस्य विद्या ब्रह्मप्राप्तिफलाय विधीयते ॥ ८ ॥

तुल्यं तु दर्शनम् ॥ विद्यायाः प्रधानत्वेऽपि ब्रह्मविदामाचारदर्शनं तुल्यं—कर्मणामनाचारदर्शनमप्यस्तीत्यर्थः, ५"ऋषयः कावषेयाः किमर्था वयमध्येष्यामहे किमर्था वयं यक्ष्यामहे" इत्यादौ। कर्मानुष्ठानदर्शनं तु फलाभिसन्धिरहितस्य कर्मणो विद्याङ्गत्वात्; त्यागस्तु फलाभिसन्धियुक्तस्य विद्याविरोधित्वादित्यभिप्रायः ॥ ९ ॥

असार्वत्रिकी ॥ ६"यदेव विद्यया करोति" इति श्रुतिः सर्वविद्यायाः कर्माङ्गत्वं विदधातीत्येतदसङ्गतम्; अत्र विद्याशब्दाभिहिता तु न सार्वत्रिकी, अपितूद्गीथविद्या। यत्करोति, तद्विद्ययेति नैवं पदान्वयः; अपितु यदेव विद्यया करोति, तदेव वीर्यवत्तरमिति। विद्यया क्रियमाणस्यान्यतोऽवगतस्य वीर्यवत्तरत्वं प्रति साधनभावोऽवगम्यते, यदेवेति प्रसिद्धवन्निर्देशात्। अन्यतोऽवगतिर्हि ७"उद्गीथमुपासीत" इति सन्निहितोद्गीथविद्यायाः ॥ १० ॥

---

१. छा. ८-१५-१ ॥—२. ईशावास्य. २॥—३. छा. ६-२-३ ॥—४. तै. आन. ६-अनु २॥—५ ॥—६. छा. १-१-१० ॥—७. छा. १-१-१ ॥—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विभागः शतवत् ॥ १"तं विद्याकर्मणी समन्वारभेते" इत्यत्र विद्या च स्वस्मै फलाय कर्म च स्वस्मै फलायान्वारभत इति विभागो द्रष्टव्यः, यतो विद्याकर्मणोर्भिन्नफलत्वमुक्तम्; शतवत्-यथा क्षेत्ररत्नविक्रयिणं शतद्वयमन्वेतीत्युक्ते, क्षेत्रार्थं शतम्, रत्नार्थं शतमिति विभागोऽवगम्यते; तद्वत् ॥ ११ ॥

अध्ययनमात्रवतः ॥ २"वेदमधीत्य" इत्यध्ययनमात्रवत एव कर्मविधानात् अनेन विद्याया न कर्माङ्गत्वमवगतम्; अध्ययनविधिर्ह्यर्थाधानक्षमयवदक्षरराशिग्रहणमात्रे पर्यवस्यति; गृहीतस्य स्वाध्यायस्य फलवदर्थावबोधित्वदर्शनात्तन्निर्णयफलमीमांसाश्रवणे अधीतवेदः पुरुषस्वयमेव प्रवर्तते। अर्थावबोधपर्यन्तत्वेऽप्यर्थज्ञानादर्थान्तरभूता स्मृतिप्रत्यवावृत्तिरूपा "विद्यात्" "उपासीत" इति शास्त्रविहिता विद्या न कर्माङ्गम् ॥ १२ ॥

नाविशेषात् ॥ ३"कुर्वन्नेवेह कर्माणि" इति ब्रह्मविदामायुषः कर्मणि नियमो दृश्यत इत्येतन्न संभवति, अविशेषात्-विदुष एवेति विशेषाभावात्किमित्यविदुषो न स्यात्, विदुषस्त्वाप्रयाणादुपासनानुवृत्तिदर्शनादर्थस्वभावाद्विदुष एवेत्यभिप्रायः ॥ १३ ॥

स्तुतयेऽनुमतिर्वा ॥ वाशब्दोऽवधारणे। ३"ईशा वास्यमिदं सर्वम्" इति विद्याप्रकरणाद्विद्यास्तुतये कर्मानुमतिरेव। विद्यामाहात्म्यात्सर्वदा कर्माणि कुर्वन्नपि तैर्न लिप्यत इति हि स्तुता भवति विद्या। वाक्यशेषे च ४"न कर्म लिप्यते नरे" इति श्रूयते ॥ १४ ॥

कामकारेण चैके ॥ एके शाखिनः कामकारेण च विद्यानिष्ठस्य गार्हस्थ्यत्यागमधीयते। ५"किं प्रजया करिष्यामो येषां नोऽयमात्माऽयं लोकः" इति गार्हस्थ्यकर्मत्यागं श्रुवद्वाक्यं विद्या प्रधानमिति दर्शयति ॥ १५ ॥

उपमर्दं च ॥ विद्यया सर्वकर्मोपमर्दं चाधीयते ६"क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे" इति; तद्विद्यायाः कर्माङ्गत्वे न सङ्गच्छते ॥ १६ ॥

ऊर्ध्वरेतस्सु च शब्दे हि ॥ ऊर्ध्वरेतस्स्वाश्रमेषु ब्रह्मविद्यादर्शनात् तेषु चाग्निहोत्रादिकर्माभावान्न विद्या कर्माङ्गम्। ते चाश्रमास्सन्त्येव; यतो वैदिके शब्दे तेऽपि दृश्यन्ते ६"त्रयो धर्मस्कन्धा यज्ञोऽध्ययनं दानम्" इति

---

१. बृ. ६-४-२ ॥—२. छा. ८-१५-१ ॥—३. ईशावास्य. २, १ ॥—४. बृ. ६-४-२२ ॥—५. मु. २-२-८ ॥—६. छा. २-२३-१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

१"ये चेमेऽरण्ये श्रद्धा तप इत्युपासते" २"एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति" इत्यादौ । ३"यावज्जीवमग्निहोत्रम्" इत्यादिका तु श्रुतिरविरक्तविषया ॥ १७ ॥

परामर्शं जैमिनिरचोदनाचापवदति हि ॥ ४"त्रयो धर्मस्कन्धाः" इत्यादिषु तेषामाश्रमाणामचोदनात्-अविधानात् उपासनास्तुत्यर्थं परामर्शम्-अनुवादं जैमिनिराचार्यो मन्यते । अपि च अपवदति हि श्रुतिराश्रमान्तरं ५"वीरहा वा एष देवानां योऽग्निमुद्वासयते" इत्यादिका । अतस्ते न सन्त्येव ॥

अनुष्ठेयं बादरायणस्साम्यश्रुतेः ॥ गृहस्थाश्रमवदाश्रमान्तरमप्यनुष्ठेयं भगवान् बादरायणो मन्यते; कुतः ? तस्यापि तत्साम्यश्रुतेः—४"त्रयो धर्मस्कन्धाः" इत्येवमादौ हि सर्वेषामाश्रमाणामेकरूपं सङ्कीर्तनम् ॥ १९ ॥

विधिर्वा धारणवत् ॥ वाशब्दोऽवधारणे; सर्वेषामाश्रमाणां विधिरेवायम् । धारणवत्—यथा ६"अधस्तात्समिधं धारयन्ननुद्रवेत्" ६"उपरि हि देवेभ्यो धारयति" इत्यनुवादसरूपेऽप्युपरिधारणस्याप्राप्तत्वेन विधिराश्रीयते; एवमिहाश्रमाणामपि। अतः ऊर्ध्वरेतस्स्वपि विद्यादर्शनाद्विद्याताः पुरुषार्थ इति ॥

इति वेदान्तदीपे पुरुषार्थाधिकरणम् ॥ १ ॥

(श्रीशारीरकमीमांसाभाष्ये स्तुतिमात्राधिकरणम् ॥ २ ॥)

स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात् ।३।४।२१

इदमिदानीं चिन्त्यते ७"स एष रसानां रसतमः परमः पराध्योऽष्टमो यदुद्गीथः" इति एवंजातीयकानि वाक्यानि ऋत्ववयवभूतोद्गीथादिस्तुतिमात्रपराणि, आहोस्विदुद्गीथादिषु रसतमादिदृष्टिविधानार्थानीति । अत्र प्रतिपादितमुपासनपरत्वमङ्गीकृत्योपासनस्य पुरुषार्थत्वेन ऋतुषूपादानानियम उक्तः । किं युक्तम् ? स्तुतिमात्रपराणीति । कुतः ? उद्गीथाद्युपादानात् । ऋत्वङ्गभूतानि ह्युद्गीथादीन्युपादाय तेषां र-

---

१. छा. ५-१०-१ ॥—२. बृ. ६-४-२२ ॥—३ ॥—४. छा. २-२३-१ ॥—५. यजु. १-कां. ५-प्र. २-अनु ॥—६ ॥—७. छा. १-१-३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सतमादित्वं प्रतिपादितम्; यथा जुह्वादीनां पृथिव्यादित्वं प्रतिपादयतो वचनस्य १"इयमेव जुहूः स्वर्गो लोक आहवनीयः"इत्यादिकस्य तत्स्तुतिमात्रपरत्वम्, तथेहापि। तदिदमाशङ्कते—स्तुतिमात्रमुपादानादितिचेत्—इति।उद्गीथाद्युपादानात्तत्स्तुतिमात्रमेवैषां वाक्यानां विवक्षितमिति चेत्—

(सिद्धान्तः)

अत्रोत्तरं—नापूर्वत्वात्—इति। न स्तुतिमात्रत्वमुपपद्यते; कुतः? अपूर्वत्वात्—अप्राप्तत्वात्। न ह्युद्गीथादयो रसतमादितया प्रमाणान्तरेण प्रतिपन्नाः; येन तत्प्राप्तस्त्यवुच्त्यर्थं रसतमादित्वेनानूद्येरन्। नचोद्गीथादिविधिरत्र सन्निहितः; येन १"इयमेव जुहूस्स्वर्गो लोक आहवनीयः" इत्यादिवत्तदेकवाक्यत्वेन यया कयाचन विधया तत्स्तुतिपरत्वमाश्रीयेत। अतः क्रतुवीर्यवत्तरत्वादिफलसिद्ध्यर्थमुद्गीथादिषु रसतमादिदृष्टिविधानमेव न्याय्यम्॥ २१॥

भावशब्दाच्च। ३। ४। २२॥

२"उपासीत" इत्यादिभावशब्दाच्च विधिपरत्वमेव न्याय्यम्। विधिप्रत्ययायुक्तो हि क्रियाशब्दो विधेयमेव स्वार्थमवगमयति। तस्मादुपासनविधानार्था एताश्श्रुतयः॥ २२॥

इति श्रीशारीरकमीमांसाभाष्ये स्तुतिमात्राधिकरणम्॥ २॥

वेदान्तसारे—स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात्॥ उद्गीथादिषु रसतमत्वादिदृष्टिविधिर्न सम्भवति; १"इयमेव जुहूस्स्वर्गो लोक आहवनीयः" इतिवत्, कर्माङ्गभूतोद्गीथाद्युपादाय तस्य रसतमत्ववचनं तत्स्तुतिमात्रमिति चेत्—नैतत्, जुह्वादिविधिवदुद्गीथादिविधेरत्रासन्निधानात्। रसतमत्वादेश्चाप्राप्तत्वाद्रसतमत्वादिदृष्टिविधिरेव॥ २१॥

भावशब्दाच्च॥ २"उद्गीथमुपासीत" इति विधिप्रत्ययाच्च॥ २२॥

इति वेदान्तसारे स्तुतिमात्राधिकरणम्॥ २॥

१॥—२. छा. १-१-१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वेदान्तदीपे—स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात् ॥ भावशब्दाच्च॥ १"ओमित्येतदक्षरमुद्गीथमुपासीत"१"स एष रसानां रसतमः परमः परार्ध्योऽष्टमो यदुद्गीथः"इत्येतज्जातीयके किं कर्माङ्गाश्रयाणां दृष्टिविशेषाणां विधिराश्रेयः,उतोद्गीथादिस्तुतिमात्रमिति संशयः।विधित्वे सिद्धे हि गोदोहनादिवद्भवति;विधित्वमेव नसम्भवतीति पूर्वः पक्षः।२"इयमेव जुहूरस्वर्गो लोकआहवनीयः"इतिवत् कर्माङ्गभूतोद्गीथादिसम्बन्धितयोपादानाद्रसतमत्वादेः तत्स्तुतिमात्रत्वमेव; न रसतमत्वादिदृष्टिविधिः । राद्धान्तस्तु—जुह्वादिविधिवदुद्गीथादिविधेरत्रासन्निधानात्,रसतमत्वादेरप्राप्तत्वाच्च,१"उपासीत"इति विधिप्रत्ययेन च, न स्तुतिमात्रम्, तद्दृष्टिविधिरेव । सूत्रद्वयमपि व्याख्यातम् ॥२१, २२॥

इति वेदान्तदीपे स्तुतिमात्राधिकरणम् ॥ २ ॥

(श्रीशारीरकमीमांसाभाष्ये पारिप्लवार्थाधिकरणम् ॥ ३ ॥)

पारिप्लवार्था इति चेन्न विशेषितत्वात्।३।४।२३॥

३"प्रतर्दनो ह वै दैवोदासिरिन्द्रस्य प्रियं धामोपजगम" ४"श्वेतकेतुर्हारुणेय आस" इत्येवमादीनि वेदान्तेष्वाख्यानानि किं पारिप्लवप्रयोगार्थानि, उत विद्याविशेषप्रतिपादनार्थानीति चिन्तायाम् ५"आख्यानानि शंसन्ति"इत्याख्यानानां पारिप्लवे विनियोगान्न विद्याप्रधानत्वं न्याय्यमिति चेत्—

(सिद्धान्तः)

न सर्वाण्याख्यानानि पारिप्लवप्रयोगे विनियोगमर्हन्ति; कुतः? विशेषितत्वाद्विनियोगस्य । ५"आख्यानानि शंसन्ति" इत्युक्त्वा तत्रैव ६"मनुर्वैवस्वतो राजा" इत्यादिना मन्वादीनामाख्यानानि विशेष्यन्ते; अतस्तेषामेव तत्र विनियोग इति गम्यते । तस्मान्न सर्वा वेदान्तेष्वाख्यानश्रुतयः पारिप्लवप्रयोगार्थाः; अपि तु विद्याविध्यर्थाः ॥ २३ ॥

१. छा. १-१-१, ३॥ २ ॥—३ कौ. ३-१ ॥—४. छा. ६-१-१ ॥—५॥—६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तथा चैकवाक्योपबन्धात् । ३ । ४ । २४॥

१"आत्मा वा अरे द्रष्टव्यः" इत्यादिविधिनैकवाक्यतयोपबन्धाद्याख्यानानां विद्याविध्यर्थान्येव तानीति गम्यते; यथा२"सोऽरोदीत्" इत्येवमादेः कर्मविध्यर्थत्वम्; न पारिप्लवार्थत्वम् ॥ २४ ॥

इति श्रीशारीरकमीमांसाभाष्ये पारिप्लवार्थाधिकरणम् ॥ ३ ॥

वेदान्तसारे—पारिप्लवार्था इति चेन्न विशेषितत्वात् ॥ वेदान्तेषु तत्तद्विद्यारम्भेऽधीताः ३"प्रतर्दनो ह वै" इत्याद्याख्यायिकाः पारिप्लवार्थाः, ४"आख्यानानि शंसन्ति" इति तत्र विनियोगात्—इतिचेत्—न; तत्रैव ५"मनुर्वैवस्वतः" इत्याद्याख्यानानां विशेषितत्वात् तेषामेव तत्र विनियोगः ॥ २३ ॥

तथा चैकवाक्योपबन्धात् ॥ विद्याविधिनैकवाक्यत्वाच्च ६"सोऽरोदीत्" इत्यादिवत् विद्यास्तुत्यर्था एताः २४ ॥

इति वेदान्तसारे पारिप्लवार्थाधिकरणम् ॥ ३ ॥

वेदान्तदीपे—पारिप्लवार्था इति चेन्न विशेषितत्वात्॥ तथा चैकवाक्योपबन्धात् ॥ ३"प्रतर्दनो ह वै दैवोदासिः" इत्यादयो वेदान्तेष्वाख्यानविशेषाः किं पारिप्लवप्रयोगार्थाः, उत तत्रतत्र विद्याविशेषप्रतिपादनार्थाः इति संशयः। ४"आख्यानानि शंसन्ति" इति पारिप्लवे विनियोगात्तदर्था इति पूर्वः पक्षः। राद्धान्तस्तु—४"आख्यानानि शंसन्ति" इत्युक्त्वा ५"मनुर्वैवस्वतो राजा" इति मन्वाद्याख्याने विनियोगस्य विशेषितत्वात्, ३"तं मामायुरमृतमित्युपास्स्व" १"आत्मा वा अरे द्रष्टव्यः" इत्यादिविधिनैकवाक्यत्वाच्च, २"सोऽरोदीत्"इत्यादिवद्विद्याविध्यर्था एवासूत्रद्वयमपि व्याख्यातम्॥२३,२४॥

इति वेदान्तदीपे पारिप्लवार्थाधिकरणम् ॥ ३ ॥

---

१. बृ. ६-५-६ ॥—२. यजु. १-५-१॥—३. कौ. ३-१ ॥—४ ॥—५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अत एव चाग्नीन्धनाद्यनपेक्षा । ३ । ४ । २५ ॥

स्तुतिप्रसङ्गादवान्तरसङ्गतिविशेषेणार्थद्वयं चिन्तितम्। विद्यावन्त ऊर्ध्वरेतस आश्रमिणस्सन्तीत्युक्तम् १"ऊर्ध्वरेतस्सु च शब्दे हि" इत्यादिभिस्सूत्रैः।इदानीमूर्ध्वरेतसो यज्ञाद्यभावात्तदङ्गिका विद्या न सम्भवतीत्याशङ्क्याह—अत एव चाग्नीन्धनाद्यनपेक्षा—इति। यत ऊर्ध्वरेतस आश्रमिणो विद्यासम्बन्धित्वेन श्रुत्या परिगृह्यन्ते२" ब्रह्मसंस्थोऽमृतत्वमेति" ३"ये चेमेऽरण्ये श्रद्धा तप इत्युपासते" ४"एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति" ५"यदिच्छन्तो ब्रह्मचर्यं चरन्ति" इत्यादिकया; अत एवोर्ध्वरेतस्सु विद्या अग्नीन्धनाद्यनपेक्षा—अग्नीन्धनम्—अग्न्याधानम्; आधानपूर्वकाग्निहोत्रदर्शपूर्णमासादिकर्मानपेक्षा तेषु विद्या। केवलस्वाश्रमविहितकर्मापेक्षेत्यर्थः॥ २५॥

इति श्रीशारीरकमीमांसाभाष्ये अग्नीन्धनाद्यधिकरणम्॥ ४॥

वेदान्तसारे—अत एव चाग्नीन्धनाद्यनपेक्षा॥ ऊर्ध्वरेतसाम् ४"एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति" इत्यादिश्रुतेरेव विद्यावत्त्वात् तेष्वाधानाद्यनपेक्षा विद्या॥ २५॥

इति वेदान्तसारे अग्नीन्धनाद्यधिकरणम्॥ ४॥

वेदान्तदीपे—अत एव चाग्नीन्धनाद्यनपेक्षा॥ ऊर्ध्वरेतस्स्वाश्रमेषु ब्रह्मविद्या सम्भवति, नेति संशयः। यज्ञाद्यभावात्तेषां तदङ्गिका विद्या न सम्भवतीति पूर्वः पक्षः। राद्धान्तस्तु—५"यदिच्छन्तो ब्रह्मचर्यं चरन्ति" ४"एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति" इत्यादिश्रुतेः तेषां विद्यावत्त्वावग-

१ शारी. ३ ४-१७॥—२. छा.२-२३-१॥—३. छा.५-१०-१॥—४. बृ. ६-४-२२॥—५. कठ. १-२-१५॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मात्तेष्वग्निहोत्राद्यनपेक्षा विद्येति निश्चीयते । सूत्रार्थस्तु—अतएव-विद्यावत्त्व-श्रुतेरेव आधानाद्यनपेक्षा तेषु विद्या । अग्नीन्धनं हि—अग्न्याधानम्॥ २५ ॥

इति वेदान्तदीपे अग्नीन्धनाद्यधिकरणम् ॥ ४ ॥

श्रीशारीरकमीमांसाभाष्ये सर्वापेक्षाधिकरणम् ॥ ५ ॥

सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् । ३ । ४ । २६ ॥

यदि विद्या यज्ञाद्यनपेक्षैवामृतत्वं साधयति ; तर्हि गृहस्थेष्वपि तदनपेक्षैव साधयितुमर्हति, यज्ञादिश्रुतिरपि १"विविदिषन्ति" इति शब्दात्कर्मणो वेदनाङ्गतां न प्रतिपादयतीति—

सिद्धान्तः

अत आह—सर्वापेक्षा-इति। अग्निहोत्रादिसर्वकर्मापेक्षैव विद्या कर्मवत्सु गृहस्थेषु ; कुतः ? यज्ञादिश्रुतेः । १"तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन" इत्यादिना यज्ञादयो हि विद्याङ्गत्वेन श्रूयन्ते । यज्ञादिना विविदिषन्ति वेदितुमिच्छन्ति, यज्ञादिभिर्वेदनं प्राप्तुमिच्छन्तीत्यर्थः । यज्ञादीनां ज्ञानसाधनत्वे सत्येव यज्ञादिभिः ज्ञानं प्राप्तुमिच्छन्तीति व्यपदेश उपपद्यते ; यथा असेर्हननसाधनत्वे सति असिना जिघांसतीति व्यपदेशः। अतो यज्ञादीनां ज्ञानसाधनत्वमवगम्यते । ज्ञानं च वाक्यार्थज्ञानादर्थान्तरभूतं ध्यानोपासनादिशब्दवाच्यं विशदतमप्रत्यक्षतापन्नस्मृतिरूपं निरतिशयप्रियमहरहरभ्यासाधेयातिशयमाप्रयाणदनुवर्तमानं मोक्षसाधनमित्युक्तमस्माभिः पूर्वमेव ; वक्ष्यति च २"आवृत्तिरसकृदुपदेशात्" इत्यादिना । एवंरूपं च ध्यानमहरहरनुष्ठीयमानैर्नित्यनैमित्तिककर्मभिः परमपुरुषाराधनरूपैः परमपुरुषप्रसादद्वारेण जायत इति यज्ञादिना विविदिषन्तीति शब्देन प्रतिपाद्यते । अतः कर्मवत्सु गृहस्थेषु यज्ञादिनित्यनैमित्तिकसर्वकर्मापेक्षा

१. बृ. ६-४-२२ ॥—२. शारी. ४-१-१॥—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विद्या। अश्ववत्—यथा गमनसाधनभूतोऽश्वः स्वपरिकरबन्धपरिकर्मापेक्षः;एवं मोक्षसाधनभूताऽपि विद्या नित्यनैमित्तिककर्मपरिकरापेक्षा। तदिदमाह स्वयमेव भगवान् १"यज्ञदानतपः कर्म न त्याज्यं कार्यमेव तत्। यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्" २"यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम्। स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः" इति ॥ २६ ॥

इति श्रीशारीरकमीमांसाभाष्ये सर्वापेक्षाधिकरणम् ॥ ५ ॥

वेदान्तसारे—सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् ॥ कर्मवत्सु गृहस्थेष्वग्निहोत्रादिसर्वकर्मापेक्षा विद्या ३"ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन" इत्यादिश्रुतेः।यथाचाश्वो गमनसाधनभूतोऽपि स्वपरिकरबन्धापेक्षो गमने। ऊर्ध्वरेतस्सु च स्वाश्रमकर्मापेक्षा ॥ २६ ॥

इति वेदान्तसारे सर्वापेक्षाधिकरणम् ॥ ५ ॥

वेदान्तदीपे—सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् ॥ कर्मवत्सु गृहस्थेषु किं यज्ञादिकर्मापेक्षा विद्या, उत तत्रापि केवलैवेति संशयः। ऊर्ध्वरेतस्सु यज्ञाद्यनपेक्षैवामृतत्वं साधयति चेत्—कर्मनिरपेक्षाया विद्याया एव साधनत्वमभ्युपगमनीयम्। तथा सति गृहस्थेष्वपि तन्निरपेक्षैव साधयितुं समर्थेति पूर्वः पक्षः। नहि स्वर्गादिसाधनभूतमग्निहोत्रादिकर्म पुरुषभेदेन नानाविधाङ्गकं दृष्टम्। ३"विविदिषन्ति" इति शब्दोऽपि वेदनेच्छायां कर्माणि विनियुङ्क्ते, न विद्यायाम्। राद्धान्तस्तु—कर्मवत्सु गृहस्थेषु यज्ञादिसर्वकर्मापेक्षा विद्या; कुतः? यज्ञादिश्रुतेः - ३"तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन" इतिहि यज्ञादयो विद्याङ्गत्वेन विनियुज्यन्ते। अतो गृहस्थेषु कर्मापेक्षा विद्या। इच्छाया इष्यमाणप्रधानत्वात्३"विविदिषन्ति" इतीष्यमाणं ज्ञानमेवेत्यवगम्यते। यथा गमनसाधनभूतोऽश्वः स्वपरिकरबन्धरूपपरिकर्मापेक्षः; एवं मोक्षसाधनभूता विद्यापि नित्यनैमित्तिकपरिकर्मापेक्षा। ऊर्ध्वरेतस्सु च स्वाश्रमविहितं कर्मैव परिकर्म भवतीति तेष्वपि विद्यासम्बन्धश्शास्त्रादवगम्यते। शास्त्रैकसमधिगम्ये हि यथाशास्त्रमभ्युपगमनीयम्। सूत्रमपि व्याख्यातम् ॥ २६ ॥

इति वेदान्तदीपे सर्वापेक्षाधिकरणम् ॥ ५ ॥

---

१. गी. १८-५ ॥—२. गी.१८-४६ ॥—३. बृ. ६.४-२२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शमदमाद्युपेतस्स्यात्तथापि तु तद्विधेस्तदङ्गतया तेषामप्यवश्यानुष्ठेयत्वात् । ३ । ४ २७ ॥

गृहस्थस्य शमदमादीन्यप्यनुष्ठेयानि, उत नेति चिन्तायाम्—आन्तरबाह्यकरणव्यापाररूपत्वात्कर्मानुष्ठानस्य, शमदमादीनां तद्विपरीतरूपत्वाच्चाननुष्ठेयानि—

(सिद्धान्तः)

इति प्राप्त उच्यते—यद्यपि गृहस्थः करणव्यापाररूपकर्मसु प्रवृत्तः, तथाऽपि स विद्वान् शमदमाद्युपेतस्स्यात्; कुतः? तदङ्गतया तद्विधेः—विद्याङ्गतया तेषां विधेः [1]"तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुस्समाहितो भूत्वाऽऽत्मन्येवाऽत्मानं पश्येत्" इति। विद्योत्पत्तेश्चित्तसमाधानरूपत्वेन दृष्टपरिकरत्वाच्छमादीनां, विद्यानिर्वृत्तये तेषां—शमादीनामप्यवश्यानुष्ठेयत्वाच्च तान्यप्यनुष्ठेयानि। नच करणव्यापारतद्विपर्ययरूपत्वेन कर्मणां शमदमादीनां च परस्परविरोधः, भिन्नविषयत्वात्—विहितेषु करणव्यापारः, अविहितेषु प्रयोजनशून्येषु च तदुपशम इति। नच करणव्यापाररूपकर्मसु वर्तमानस्य वासनावशाच्छमादीनामुपादेयत्वासम्भवः, विहितानां कर्मणां परमपुरुषाराधनतया तत्प्रसादद्वारेण निखिलविपरीतवासनोच्छेदहेतुत्वात्। अतो गृहस्थस्य शमदमादयोऽप्यनुष्ठेयाः ॥ २७ ॥

इति श्रीशारीरकमीमांसाभाष्ये शमदमाद्यधिकरणम् ॥६ ॥

वेदान्तसारे—शमदमाद्युपेतस्स्यात्तथापि तु तद्विधेस्तदङ्गतया तेषामप्यवश्यानुष्ठेयत्वात् ॥ गृहस्थो विहितकर्मव्यापृतोऽपि [1]"शान्तो दान्तः"

१. बृ. ६-४-२३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इत्यादिना शमदमादिविधेस्तद्युक्तस्यात्, विद्यानिष्पत्तये शमदमादीनामवश्यानुष्ठेयत्वात् । शान्त्युपरतिप्रभृतिभिर्विना विद्यानिष्पत्त्यनुपपत्तेः ॥ २७ ॥

इति वेदान्तसारे शमदमाद्यधिकरणम् ॥ ६ ॥

वेदान्तदीपे—शमदमाद्युपेतस्स्यात्तथापि तु तद्विधेस्तदङ्गतया तेषामप्यवश्यानुष्ठेयत्वात् ॥ किं विद्यानिर्वृत्तये गृहस्थैश्शमदमादय उपादेयाः, उत नेति संशयः । गृहस्थानामान्तरबाह्यकरणव्यापाररूपकर्माङ्गकत्वाद्विद्यायाः, तद्विपरीतरूपशमदमाद्युपादानासामर्थ्यादूर्ध्वरेतस्सु कर्मरहितेषु शमादिविनियोगो भविष्यति, यथा यज्ञादिविनियोगः कर्मवत्सु गृहस्थेषु । तस्मादनुपादेयाश्शमादय इति पूर्वः पक्षः । राद्धान्तस्तु—[१]"तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुस्समाहितो भूत्वाऽऽत्मन्येवात्मानं पश्येत्" इति सामान्येन विद्याङ्गतया विनियोगाद्गृहस्थैरप्युपादेयाः । न च कर्मवतां तेषां शमाद्युपादानासामर्थ्यम्, भिन्नविषयत्वाच्छमादेः । विहितेषु हि कर्मसु करणव्यापारः; अविहितेषु प्रयोजनशून्येषु च शमदमादयः । अतश्शमादिविनियोगो यज्ञादिविनियोगवन्न सङ्कोचमर्हति—इति । सूत्रार्थस्तु—यद्यपि गृहस्थो यज्ञादिकर्मसु विनियुक्तः, तथापितु शमदमाद्युपेतस्स्यात् ; कुतः? [१]"शान्तो दान्तः" इत्यादिना तद्विधेः तदङ्गतया-विद्याङ्गतया विद्यानिष्पत्तये तेषामवश्यानुष्ठेयत्वाच्च । एकाग्रतानिष्पाद्यत्वाच्छमदमादिभिरेव विद्यानिष्पत्तिरित्यर्थः । यज्ञादिकर्माण्यपि पापनिबर्हणद्वारेणैकाग्रतामापादयन्तीत्यभिप्रायः ॥ २७ ॥

इति वेदान्तदीपे शमदमाद्यधिकरणम् ॥ ६ ॥

श्रीशारीरकमीमांसाभाष्ये सर्वान्नानुमत्यधिकरणम् ॥

सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात्॥ ३।४।२८॥

वाजिनां छन्दोगानां च प्राणविद्यायां [२]"न ह वा अस्यानन्नं जग्धं भवति नानन्नं परिगृहीतं भवति" [३]"नह वा एवंविदि किञ्चनानन्नं भवति" इति प्राणविदः सर्वान्नानुमतिः सङ्कीर्त्यते; किमियं प्राणविद्यानि-

१. बृ. ६-४-२३ ॥—२. बृ. ८-१-१४ ॥—३. छा. ५-२-१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ष्ठस्य सर्वान्नानुमतिः सर्वदा, उत प्राणात्ययापत्ताविति विशये, विशेषानुपादानात्सर्वदा—

(सिद्धान्तः)

इति प्राप्त उच्यते—प्राणात्यये—इति । चशब्दोऽवधारणे; प्राणात्ययापत्तावेवेत्यर्थः । कुतः? तदर्शनात्—दृश्यते ह्यन्यत्र ब्रह्मविदामपि प्राणात्ययापत्तावेव सर्वान्नाभ्यनुज्ञा; किं पुनः प्राणविदः । उषस्तिः किल चाक्रायणो ब्रह्मविदग्रेसरो मटचीहतेषु कुरुषु दुर्भिक्षदूषितेष्विभ्यग्रामे वसन्नशनेन प्राणसंशयमापन्नो ब्रह्मविद्यानिष्पत्तये प्राणानामनवसादमाकाङ्क्षमाण इभ्यं कुल्माषान् खादन्तं भिक्षमाणस्तेन च उच्छिष्टेभ्योऽन्ये न विद्यन्त इति प्रत्युक्तः पुनरपि [१]"एतेषां मे देहि" इत्युक्त्वा तेनचेभ्येनोच्छिष्टेभ्य आदाय दत्तान् कुल्माषान् प्रतिगृह्यानुपानप्रतिग्रहमिभ्येनार्थितः [१]"उच्छिष्टं वै मे पीतं स्यात्" इति वदंश्चाक्रायणः किमेते कुल्माषा अनुच्छिष्टा इति इभ्येन पर्यनुयुक्तः [१]"न वा अजीविष्यमिमानखादन्...कामो म उदपानम्"इति कुल्माषाखादने स्वस्य प्राणसंशयापत्तेस्तावन्मात्रखादनेन धृतप्राणस्य स्वस्योच्छिष्टोदकपानं कामकारितं निषिद्धं स्यादित्युक्त्वा स्वखादितशेषं जायायै दत्त्वा तया च रक्षितानपरेद्युर्याजनेनार्जिजीषया जिगमिषुः पुनरपि प्राणसंशयमापन्नस्तानेवेभ्योच्छिष्टान् स्वोच्छिष्टभूतान् पर्युषितांश्चखाद । अतो ब्रह्मविदामपि प्राणसंशय एव सर्वान्नानुमतिदर्शनादत्राविशेषेण कीर्तितमपि प्राणविदस्सर्वान्नीनत्वं प्राणात्ययापत्ताववेति निश्चीयते ॥ २८ ॥

अबाधाच्च । ३ । ४ । २९ ॥

[२]"आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिः" इति ब्रह्मविद्योत्पत्तावाहारशुद्धिविधानाबाधादपि ब्रह्मविदां सर्वान्नीनत्वमापद्विषयमवगम्यते । एवं ब्रह्मविदामतिशयितशक्तीनामपि सर्वान्नीनत्वस्यापद्वि-

१. छा. १-१०-३, ४ ॥—२. छा. ७-२६-२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

षयत्वात्प्राणविदोऽल्पशक्तेः सर्वान्नानुमतिरापद्विषयैव ॥ २९ ॥

अपि स्मर्यते । ३ । ४ । ३० ॥

अपि च आपद्विषयमेव सर्वान्नीनत्वं ब्रह्मविदामन्येषां च स्मर्यते —१"प्राणसंशयमापन्नो योऽन्नमत्ति यतस्ततः। लिप्यते न स पापेन पद्मपत्रमिवाम्भसा" इति ॥ ३० ॥

शब्दश्चातोऽकामकारे । ३ । ४ । ३१ ॥

यतो ब्रह्मविदामन्येषां च सर्वान्नीनत्वमापद्विषयमेव ; अत एव सर्वेषामकामकारे शब्दः—कामकारस्य प्रतिषेधकः शब्दो वर्तते । अस्ति हि कठानां संहितायां कामकारस्य प्रतिषेधकः शब्दः २"तस्माद्ब्राह्मणस्सुरां न पिबति पाप्मना ३नोत्सृजा इति" इति । पाप्मना संस्पृष्टो न भवानीति मत्वा ब्राह्मणः सुरां न पिबतीत्यर्थः ॥ ३१ ॥

इति श्रीशारीरकमीमांसाभाष्ये सर्वान्नानुमत्यधिकरणम् ॥ ७ ॥

वेदान्तसारे—सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात् ॥ प्राणविद्यानिष्ठस्य ४"नह वा एवंविदि किञ्चनानन्नं भवति" इति सर्वान्नानुमतिर्न सर्वदा; अपितु प्राणात्ययापत्तावेव, अतिशयितशक्तेर्ब्रह्मविदोऽप्युच्छिष्टभक्षणादिः प्राणात्ययापत्तावेवेति दर्शनात् ॥ २८ ॥

अबाधाच्च ॥ ५"आहारशुद्धौ सत्त्वशुद्धिः" इत्याहारशुद्धिविधेरबाधाच्च प्राणसंशय एव ॥ २९ ॥

अपि स्मर्यते ॥ १"प्राणसंशयमापन्नो योऽन्नमत्ति यतस्ततः" इत्यादिना स्मर्यते च प्राणसंशय एवेति ॥ ३० ॥

शब्दश्चातोऽकामकारे ॥ २"तस्माद्ब्राह्मणस्सुरान्न पिबेत्" इति कामकारनिवृत्तिशब्दश्चातएव ; यतः प्राणसंशय एव सर्वान्नानुमतिः ॥ ३१ ॥

इति वेदान्तसारे सर्वान्नानुमत्यधिकरणम् ॥ ७ ॥

१॥—२॥—३. नोत्संसृजा इति. पा ॥—४. छा. ५-२-१॥—५. छा. ७-२६-२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वेदान्तदीपे—सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात् ॥ वाजिनां छन्दोगानां च प्राणविद्यायां [1]"नह वा एवंविदि किञ्चनानन्नं भवति" इति सर्वान्नानुमतिस्सङ्कीर्त्यते । किं प्राणविदस्सर्वान्नानुमतिस्सर्वदा, उत प्राणात्ययापत्ताविति संशयः । अविशेषात्सर्वदेति पूर्वः पक्षः । अतिशयितशक्तेर्ब्रह्मविदोऽपि उच्छिष्टपरिग्रहणभक्षणयोः प्राणात्ययापत्तावेव दर्शनादल्पशक्तेः प्राणविदः किं पुनरिति प्राणात्ययापत्तावेवेति राद्धान्तः। सूत्रार्थस्तु—चशब्दोऽवधारणे ; प्राणविदस्सर्वान्नानुमतिः प्राणात्यय एव ; कुतः ? तद्दर्शनात्—अतिशयितशक्तेर्ब्रह्मविदः प्राणात्यय एव सर्वान्नानुमतिदर्शनात् ॥ २८ ॥

अबाधाच्च ॥ २"आहारशुद्धौ सत्त्वशुद्धिस्सत्त्वशुद्धौ ध्रुवा स्मृतिः" इत्याहारशुद्धिविधेरबाधाच्च प्राणात्यय एव ॥ २९ ॥

अपि स्मर्यते ॥ ३"प्राणसंशयमापन्नो योऽन्नमत्ति यतस्ततः । लिप्यते न स पापेन पद्मपत्रमिवाम्भसा" इति प्राणसंशय एव सर्वान्नानुमतिः स्मर्यते च ॥ ३० ॥

शब्दश्चातोऽकामकारे ॥ यतस्सर्वान्नानुमतिः प्राणात्यये ; अतोऽकामकारे शब्दश्च—कामकारस्य प्रतिषेधकशब्दश्चोपपद्यत इत्यर्थः ॥ अस्ति हि कठानां कामकारप्रतिषेधकश्शब्दः ४"तस्माद्ब्राह्मणस्सुरां न पिबति पाप्मना ५नोत्सृजा" इति । पाप्मना संस्पृष्टो न भवानीति मत्वा सुरां न पिबतीत्यर्थः॥

इति वेदान्तदीपे सर्वान्नानुमत्यधिकरणम् ॥ ७ ॥

(श्रीशारीरकमीमांसाभाष्ये विहितत्वाधिकरणम् ॥ ८ ॥)

विहितत्वाच्चाश्रमकर्मापि । ३।४।३२॥

यज्ञादिकर्माङ्गिका ब्रह्मविद्येत्युक्तम् ; तानि च यज्ञादीनि कर्माण्यमुमुक्षुणा केवलाश्रमिणाऽप्यनुष्ठेयानि, उत नेति चिन्तायां, विद्याङ्गानां सतां [6]केवलाश्रमशेषत्वे नित्यानित्यसंयोगविरोधः प्रसज्यत इ-

---

१. छा. ५-२-१ ॥ २. छा. ७-२६-२ ॥—३ ॥—४ ॥—५. नोत्संसृजा इति. पा ॥— ६. केवलाश्रमिशेषत्वे. पा ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ति यज्ञादीनां [१]केवलाश्रमधर्मत्वं न सम्भवति—

(सिद्धान्तः)

इति प्राप्त उच्यते—आश्रमकर्मापि–इति। आश्रमस्य कर्मापि भवति। केवलाश्रमिणापि अनुष्ठेयानीत्यर्थः। कुतः? २"यावज्जीवमग्निहोत्रं जुहोति" इत्यादिना विहितत्वात्—जीवननिमित्ततया नित्यवद्विहितत्वादित्यर्थः॥ ३२॥

तथा विद्याङ्गतया च २"तमेतं वेदानुवचनेन" इत्यादिना विहितत्वाद्विद्याशेषतयाप्यनुष्ठेयानीत्याह–

सहकारित्वेन च। ३। ४। ३३॥

विद्योत्पत्तिद्वारेण विद्यासहकारितयाऽप्यनुष्ठेयानि। अग्निहोत्रादीनामिव जीवनाधिकारस्वर्गाधिकारवत् विनियोगपृथक्त्वेनोभयार्थत्वं न विरुध्यत इत्यर्थः॥ ३३॥

तद्वदेव कर्मान्तरत्वमपि नास्तीत्याह–

सर्वथापि त एवोभयलिङ्गात्। ३। ४। ३४॥

सर्वथा–विद्यार्थत्वे आश्रमार्थत्वेऽपि, त एव यज्ञादय इति प्रतिपत्तव्यम्; न कर्मस्वरूपभेद इत्यर्थः। कुतः? उभयलिङ्गात्–उभयत्र श्रुतौ यज्ञादिशब्दैः प्रत्यभिज्ञाप्य विनियोगात्, कर्मस्वरूपभेदे प्रमाणाभावाच्च॥ ३४॥

अनभिभवं च दर्शयति। ३। ४। ३५॥

३"धर्मेण पापमपनुदति" इत्यादिभिश्च तानेव यज्ञादिधर्मानिर्दिश्य तैर्विद्याया अनभिभवं–पापकर्मभिरुत्पत्तिप्रतिबन्धाभावं दर्शयति। अहरहरनुष्ठीयमानैर्हि यज्ञादिभिर्विशुद्धेऽन्तःकरणे प्रत्यहं प्रकृष्यमाणा

१. केवलाश्रमिधर्मत्वं. पा॥— २॥—३. तै. ना. ५०-अनु॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विद्योत्पद्यते । अतस्त एवोभयत्र यज्ञादयः ॥ ३५ ॥

इति श्रीशारीरकमीमांसाभाष्ये विहितत्वाधिकरणम् ॥ ८ ॥

वेदान्तसारे–विहितत्वाच्चाश्रमकर्मापि ॥ यज्ञादिकर्म १"यावज्जीवमग्निहोत्रम्" इत्यादिना विहितत्वात् विद्यारहितकेवलाश्रमिणामप्यनुष्ठेयम् ॥

सहकारित्वेन च ॥ २"तमेतं वेदानुवचनेन" इत्यादिश्रुतेर्विद्याङ्ग तया विधेर्विद्यासहकारित्वेन विदुषा चानुष्ठेयम् ॥ ३३ ॥

सर्वथापि त एवोभयलिङ्गात् ॥ उभयत्र विनियोगेऽपि यज्ञादयस्त एव, उभयत्र प्रत्यभिज्ञानाख्यालिङ्गात् । कर्मस्वरूपैक्येऽपि विनियोगपृथक्त्वेन न विरोधः ॥ ३४ ॥

अनभिभवं च दर्शयति ॥ ३"धर्मेण पापमपनुदति" इति विद्योत्पत्तिप्रतिबन्धकपापनिवर्तनेन विद्याया अनभिभवं कर्मानुष्ठानकार्यञ्च दर्शयति॥

इति वेदान्तसारे विहितत्वाधिकरणम् ॥ ८ ॥

वेदान्तदीपे–विहितत्वाच्चाश्रमकर्मापि ॥ किं यज्ञादयो विद्याङ्गभूताः केवलाश्रमस्याप्यङ्गभूताः, उत नेति संशयः। केवलाश्रमस्याप्यङ्गत्वे नित्यानित्यसंयोगरूपविरोधः प्रसज्यत इति नाङ्गभूताः केवलाश्रमस्येति पूर्वः पक्षः । राद्धान्तस्तु—यदैकेनैव विनियोगेनोभयाङ्गत्वमिष्यते ; तदा नित्यानित्यसंयोगविरोधः । इह तु १"यावज्जीवमग्निहोत्रं जुहुयात्" २"तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन" इति विनियोगपृथक्त्वेन विरोधः परिहियते ; यथाऽग्निहोत्रादीनामेव कर्मणाम् । जीवनाधिकारकामनाधिकारयोरिवाधिकारभेदस्यास्फुटत्वात्तत्स्फुटीकरणाय पुनरिह चिन्त्यते । सूत्रार्थस्तु—१"यावज्जीवमग्निहोत्रं जुहुयात्" इत्यादिना केवलगृहस्थाश्रमिणो जीवननिमित्ततया विहितत्वादेव यज्ञादि केवलाश्रमकर्मापि ॥ ३२ ॥

सहकारित्वेन च ॥ २"तमेतं वेदानुवचनेन" इत्यादिना विद्यासाधनत्वेन विहितत्वाच्च विद्यासहकारित्वेन चानुष्ठेयं यज्ञादिकर्म । विनियोगपृथक्त्वेन विरोधः परिहियत इत्यभिप्रायः ॥ ३३ ॥

१.आपस्तम्बश्रौत. ३-१४-८॥ बहृच इति शाबरः॥—२. बृ.६-४-२२॥—३.तै.ना.५०-अनु॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सर्वथापि त एवोभयलिङ्गात्॥ सर्वथापि—उभयत्र विनियोगेऽपि त एव यज्ञादयः। कुतः? उभयलिङ्गात्—उभयत्र प्रत्यभिज्ञानाख्यलिङ्गात् ॥ ३४॥

अनभिभवं च दर्शयति ॥ १"धर्मेण पापमपनुदति" इत्यादिभिश्च यज्ञादिधर्मान्निर्दिश्य तैर्विद्यायाः अनभिभवं—पापकर्मभिरुत्पत्तिप्रतिबन्धाभावं दर्शयति। अत उभयत्र विनियोगात्केवलाश्रमिणां मुमुक्षूणां चानुष्ठेया यज्ञादयः॥

इति वेदान्तदीपे विहितत्वाधिकरणम् ॥ ८ ॥

श्रीशारीरकमीमांसाभाष्ये विधुराधिकरणम्॥ ९ ॥

अन्तरा चापि तु तद्दृष्टेः । ३।४।३६ ॥

चतुर्णामाश्रमिणां ब्रह्मविद्यायामधिकारोऽस्ति ; विद्यासहकारिण आश्रमधर्मा इति चोक्तम् । ये पुनराश्रमानन्तरा वर्तन्ते विधुरादयः; तेषां ब्रह्मविद्यायामधिकारोऽस्ति, नवेति विशये—आश्रमधर्मैतिकर्तव्यताकत्वाद्विद्यायाः, अनाश्रमिणां चाश्रमधर्माभावान्नास्त्यधिकारः—

सिद्धान्तः

इति प्राप्त उच्यते—अन्तराचापितु—इति। तुशब्दः पक्षव्यावृत्त्यर्थः; चशब्दोऽवधारणे। अन्तरा वर्तमानानाम्—अनाश्रमिणामपि विद्यायामधिकारोऽस्त्येव। कुतः? तद्दृष्टेः—दृश्यते हि रैक्वभीष्मसंवर्तादीनामनाश्रमिणामपि ब्रह्मविद्यानिष्ठत्वम्। नचाश्रमधर्मैरेव विद्यानुग्रह इति शक्यं वक्तुम्, २"यज्ञेन दानेन तपसानाशकेन" इति दानादीनामाश्रमेषु ३अनैकान्तिकानामप्यनुग्राहकत्वदर्शनात्। यथोर्ध्वरेतस्सु विद्यानिष्ठत्वदर्शनादग्निहोत्रादिव्यतिरिक्तैरेव विद्यानुग्रहः क्रियते; तथाऽनाश्रमिष्वपि विद्यादर्शनादाश्रमानियतैर्जपोपवासदानदेवताराधनादिभिर्विद्यानुग्रहश्शक्यते कर्तुम् ॥ ३६ ॥

---

१. तै. ना. ५०-अनु ॥—२. बृ. ६-४-२२ ॥—३. अनेकान्तानां. पा ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अपि स्मर्यते । ३ । ४ । ३७ ॥

अपिच अनाश्रमिणामपि जपादिभिरेव विद्यानुग्रहः स्मर्यते[१] "जप्येनापि च संसिध्येद्ब्राह्मणो नात्र संशयः । कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते" इति । संसिध्येत्—जपाद्यनुगृहीतया विद्यया सिद्धो भवतीत्यर्थः ॥ ३७ ॥

विशेषानुग्रहश्च । ३ । ४ । ३८ ॥

न केवलं न्यायस्मृतिभ्यामयमर्थस्साधनीयः;श्रूयते चानाश्रमनियतैर्धर्मविशेषैर्विद्यानुग्रहः [२]"तपसा ब्रह्मचर्येण श्रद्धया विद्ययाऽऽत्मानमन्विष्येत्" इति ॥ ३८ ॥

अतस्त्वितरज्ज्यायो लिङ्गाच्च । ३। ४। ३९॥

तुशब्दोऽवधारणे;अतः-अनाश्रमित्वात् इतरत्—आश्रमित्वमेव ज्यायः; अनाश्रमित्वमापद्विषयम् ; शक्तस्य त्वाश्रमित्वमेवोपादेयमित्यर्थः; भूयोधर्मकाल्पधर्मकयोरतुल्यकार्यत्वात्; लिङ्गाच्च-स्मृतेरित्यर्थः । स्मर्यते च शक्तं प्रत्याश्रमस्योपादेयत्वम् [३]"अनाश्रमी न तिष्ठेत्तु दिनमेकमपि द्विजः" इत्यादिना । निवृत्तब्रह्मचर्यस्य मृतभार्यस्य च अवैराग्ये सति दारालाभ आपत् ॥ ३९ ॥

इति श्रीशारीरकमीमांसाभाष्ये विधुराधिकरणम् ॥ ९ ॥

वेदान्तसारे—अन्तरा चापि तु तद्दृष्टेः ॥ आश्रमानन्तरा वर्तमानो विधुरादिरनाश्रमी ; तस्यापि विद्याधिकारोऽस्ति , रैक्वादिष्वनाश्रमिषु ब्रह्मविद्याधिकारदर्शनात् ॥ ३६ ॥

अपि स्मर्यते॥ अनाश्रमिणोऽपि जपादिना विद्यानुग्रहः स्मर्यते १"जप्येनापि च संसिद्ध्येत्" इति ॥ ३७ ॥

---

१. मनु. २-८७ ॥—२. प्रश्नोप. १-१० ॥—३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषानुग्रहश्च॥ आश्रमानियतधर्मविशेषेण विद्यानुग्रहश्च श्रूयते१ "तपसा ब्रह्मचर्येण श्रद्धया विद्यया चाऽत्मानम्" इत्यादिना ॥ ३८ ॥

अतस्त्वितरज्ज्यायो लिङ्गाच्च॥ अनाश्रमित्वादाश्रमित्वं ज्यायः, धर्मभूयस्त्वात्, २ "अनाश्रमी न तिष्ठेत्तु" इति स्मृतेश्च॥ ३९॥

इति वेदान्तसारे विधुराधिकरणम् ॥ ९ ॥

वेदान्तदीपे—अन्तरा चापि तु तद्दृष्टेः ॥ विधुरादीनामनाश्रमिणां ब्रह्मविद्यायामधिकारोऽस्ति, नेति संशयः। आश्रमधर्मैतिकर्तव्यताकत्वाद्विद्यायाः तदभावात्तेषामधिकार इति पूर्वः पक्षः।राद्धान्तस्तु—ऊर्ध्वरेतस्स्विव रैक्वादिष्वनाश्रमिषु विद्यानिष्ठत्वदर्शनादाश्रमानियतैर्जपोपवासदानादिभिरेव तेषां विद्यानुग्रहो भवतीत्यस्त्येवाधिकारः। सूत्रार्थस्तु—तुशब्दात्पक्षो व्यावृत्तः। चशब्दोऽवधारणे। अन्तराऽपि—आश्रमानन्तरा वर्तमानानामनाश्रमिणामप्यधिकारोऽस्त्येव। कुतः? तद्दृष्टेः-रैक्वादिषु विद्यानिष्ठत्वदृष्टेः ॥ ३६ ॥

अपि स्मर्यते॥ अपि च अनाश्रमिणामपि जपादिभिरेव विद्यानुग्रहः स्मर्यते ३ "जप्येनापि च संसिध्येद्ब्राह्मणो नात्र संशयः" इत्यादिना ॥ ३७ ॥

विशेषानुग्रहश्च ॥आश्रमानियतधर्मविशेषेण विद्यानुग्रहश्श्रूयते च१ "तपसा ब्रह्मचर्येण श्रद्धया विद्यया चाऽऽत्मानमन्विच्छेत्" इति ॥ ३८ ॥

अतस्त्वितरज्ज्यायो लिङ्गाच्च ॥ अतः-अनाश्रमित्वादितरत्-आश्रमित्वं ज्यायः, धर्मभूयस्त्वात्; लिङ्गाच्च-स्मृतेश्चेत्यर्थः २ "अनाश्रमी न तिष्ठेत्तु दिनमेकमपि द्विजः" इति हि स्मर्यते। तस्मादनाश्रमित्वेन विद्यानिष्ठत्वमापद्विषयमित्यभिप्रायः ॥ ३९ ॥

इति वेदान्तदीपे विधुराधिकरणम् ॥ ९ ॥

श्रीशारीरकमीमांसाभाष्ये तद्भूताधिकरणम् ॥ १० ॥

तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमात्तद्रूपाभावेभ्यः । ३ । ४ । ४०॥

नैष्ठिकवैखानसपरिव्राजकाश्रमेभ्यः प्रच्युतानामपि ब्रह्मविद्याया-

---

१. प्रश्न. १-१० ॥—२ ॥—३. मनु. २-८७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मधिकारोऽस्ति, नेति चिन्तायां–विधुरादिवदनाश्रमैकान्तैर्दानादिभि. र्विद्यानुग्रहसम्भवादस्त्यधिकारः—

(सिद्धान्तः)

इति प्राप्त उच्यते–तद्भूतस्य तु नातद्भावः–इति। तुशब्दः पक्षव्यावृत्त्यर्थः; तद्भूतस्य–नैष्ठिकाद्याश्रमनिष्ठस्य, नातद्भावः–अतथाभावः, अनाश्रमित्वेनावस्थानं न सम्भवति; कुतः? तद्रूपाभावेभ्यो नियमात्–तद्रूपाणि-तेषां नैष्ठिकादीनां रूपाणि-वेषाः, धर्मा इत्यर्थः; तेषामभावाः-तद्रूपाभावाः; तेभ्यः शास्त्रैर्नियमात्। नैष्ठिकाद्याश्रमप्रविष्टान् स्वाश्रमधर्मनिवृत्तिभ्यो नियच्छन्ति हि शास्त्राणि [१]"ब्रह्मचार्याचार्यकुलवासी तृतीयोऽत्यन्तमात्मानमाचार्यकुलेऽवसादयन्" इति, [२]"अरण्यमियात्ततो न पुनरेयात्" इति, [३]"सन्न्यस्याग्निं न पुनरावर्तयेत्"इतिच। अतो विधुरादिवत् नैष्ठिकादीनामनाश्रमित्वेनावस्थानासम्भवान्न तानधिकरोति ब्रह्मविद्याः जैमिनेरपि–इत्यविगानं दर्शयन्नुक्तं स्वाभिमतं द्रढयति॥ ४०॥

अथ स्यात्–नैष्ठिकादीनां ब्रह्मचर्यात्प्रच्युतानां प्रायश्चित्तादधिकारस्सम्भवति; अस्ति च प्रायश्चित्तमधिकारलक्षणे निरूपितम् [४]"अवकीर्णिपशुश्च तद्वत्" इति। अतः प्रच्युतब्रह्मचर्यस्य प्रायश्चित्तसम्भवात्कृतप्रायश्चित्तो ब्रह्मविद्यायामधिकरिष्यति–इतिः तत्राह—

नचाधिकारिकमपि पतनानुमानात्तद्योगात्। ३।४।४१॥

अधिकारलक्षणोक्तमपि प्रायश्चित्तं नैष्ठिकादीनां तत्रष्टानां न सम्भवति; कुतः? पतनानुमानात्तदयोगात्—नैष्ठिकादीनां प्रच्युतानां पत-

१. छा. २-२३-१ ॥—२ ॥—३. यजुषि. काठके ॥—४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नस्मृतेस्तस्य प्रायश्चित्तस्यासम्भवात्—[1]"आरूढो नैष्ठिकं धर्मं यस्तु प्रच्यवते द्विजः। प्रायश्चित्तं न पश्यामि येन शुध्येत्स आत्महा" इति। अतोऽधिकारलक्षणोक्तं प्रायश्चित्तमितरब्रह्मचारिविषयम् ॥ ४१ ॥

उपपूर्वमपीत्येके भावमशनवत्तदुक्तम् ।३। ४।४२॥

नैष्ठिकादीनां ब्रह्मचर्यप्रच्यवनमुपपूर्वम्-उपपातकम्, महापातकेष्वपरिगणितत्वादिति तत्र प्रायश्चित्तस्य भावं—विद्यमानतामप्येके आचार्या मन्यन्ते; अशनवत्—यथा मद्यशनादिनिषेधस्तत्प्रायश्चित्तं चोपकुर्वाणस्य नैष्ठिकादीनां च समानम्; तदुक्तं स्मृतिकारैः [2] "उत्तरेषां चैतदविरोधि" इति। गुरुकुलवासिनो यदुक्तं, तत्स्वाश्रमाविरोध्युत्तरेषामप्याश्रमिणां भवतीत्यर्थः। तद्वदिहापि ब्रह्मचर्यप्रच्यवने प्रायश्चित्त[3]सम्भवाद्ब्रह्मविद्यायोग्यताप्यस्ति ॥ ४२ ॥

बहिस्तूभयथापि स्मृतेराचाराच्च ।३।४।४३॥

तुशब्दो मतान्तरव्यावृत्त्यर्थः; उपपातकत्वे महापातकत्वेऽप्येते बहिर्भूता एव ब्रह्मविद्याधिकारिभ्यः; ब्रह्मविद्यायामनधिकृता इत्यर्थः। कुतः? स्मृतेः-पूर्वोक्तात् पतनस्मरणात्। यद्यपि कल्मषनिर्हरणाय कैश्चिद्वचनैः प्रायश्चित्ताधिकारो विद्यते,तथापि कर्माधिकारानुगुणशुद्धिहेतुमायश्चित्तं न सम्भवति, [1]"प्रायश्चित्तं न पश्यामि येन शुध्येत्स आत्महा" इति स्मृतेरित्यर्थः। आचाराच्च—शिष्टा हि नैष्ठिकादीन् भ्रष्टान् कृतप्रायश्चित्तानपि वर्जयन्ति, तेभ्यो ब्रह्मविद्यादिकं नोपदिशन्ति; अतस्तेषां नास्ति ब्रह्मविद्यायामधिकारः ॥ ४३ ॥

इति श्रीशारीरकमीमांसाभाष्ये तद्भूताधिकरणम् ॥ १० ॥

---

१. आग्नेय. १६ ५-२३॥—२. गौत. १-प्र.३-अ. ४-सू॥—३. सद्भावात् .पा॥—४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वेदान्तसारे—तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमात्तद्रूपाभावेभ्यः ॥ नैष्ठिकादिनिष्ठस्य प्रच्युत्य स्थितिर्न सम्भवत्येव, नियमात् तद्रूपनिवृत्तिभ्यः । यथा; नियच्छन्ति हि १"अत्यन्तमात्मानमाचार्यकुलेऽवसादयन्" इति२"अरण्यमियात्ततो न पुनरेयात्"इतिच ३"सन्नथस्याग्निं न पुनरावर्तयेत्" इति च । अतस्तेषां प्रच्युत्य स्थित्यभावाद्विद्यानधिकारः । जैमिनेरप्येवम् ॥

नचाधिकारिकमपि पतनानुमानात्तदयोगात्॥ ४"अवकीर्णिपशुश्च तद्वत्" इत्यधिकारलक्षणोक्तं प्रायश्चित्तमपि तस्य न सम्भवति, तस्य प्रायश्चित्तानधिकारस्मृतेः तदसम्भवात्, ५"आरूढो नैष्ठिकं धर्मम्"इत्यारभ्य५"प्रायश्चित्तं न पश्यामि" इत्यादिस्मृतेः ॥ ४१ ॥

उपपूर्वमपीत्येके भावमशनवत्तदुक्तम् ॥ उपपातकत्वात् प्रायश्चित्तमेके मध्वशननिषेधतत्प्रायश्चित्तवदिति ; तदुक्तम् ६"उत्तरेषाञ्चैतदविरोधि" इति ॥ ४२ ॥

बहिस्तूभयथापि स्मृतेराचाराच्च॥ उपपातकत्वेऽपि अन्यथापि कर्माधिकारबहिष्कृता एते; तथा स्मृतेः ५"प्रायश्चित्तन्न पश्यामि येन शुद्ध्येत्स आत्महा" इति, शिष्टबहिष्काराच्च ॥ ४३ ॥

इति वेदान्तसारे तद्भूताधिकरणम् ॥ १० ॥

वेदान्तदीपे—तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमात्तद्रूपाभावेभ्यः ॥ नैष्ठिकवैखानसपरिव्राजकानां स्वाश्रमेभ्यः प्रच्युतानामपि विद्याधिकारोऽस्ति, नेति संशयः । विधुरादिवज्ज्ञपादिभिरनुग्रहसम्भवादस्त्येवाधिकार इति पूर्वः पक्षः।राद्धान्तस्तु—नैष्ठिकादीनां स्वाश्रमभ्रष्टानां प्रायश्चित्ताभावस्मरणाच्छिष्टबहिष्कृतत्वाच्च तेषामनधिकारः इति।सूत्रार्थस्तु-तद्भूतस्य तु नातद्भावः—नैष्ठिकादिभूतस्यातथाभावो न सम्भवति ; कुतः ? तद्रूपाभावेभ्यः शास्त्रैः नियमात् , तद्रूपाभावाः नैष्ठिकाद्याश्रमधर्माभावाः ; तेभ्यो नियच्छन्ति हि शास्त्राणि । १"ब्रह्मचार्याचार्यकुलवासी तृतीयोऽत्यन्तमात्मानमाचार्यकुलेऽवसादयन्" इति नैष्ठिकस्य तत्रैव नियमः ; २"अरण्यमियात्ततो न पुनरेयात्" इति च वैखानसस्य , ३"सन्नथस्याग्निं न पुनरावर्तयेत्" इति च परि-

१.छा.२-२३-१ ॥—२ ॥—३ ॥—४ ॥—५ आग्नेय. १६-५-२३॥—६.गौत. १-प्र. ३-अ. ४-सू ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

व्राजकस्य ; अत एव तेषामनाश्रमित्वेनावस्थानाभावाद्विद्याधिकारो न सम्भवति । जैमिनेरप्यविगीतोऽयम् ॥ ४० ॥

नचाधिकारिकमपि पतनानुमानात्तदयोगात् ॥ आधिकारिकम् अधिकारलक्षणोक्तम् १"अवकीर्णिपशुश्च तद्वत्" इत्येतत्प्रायश्चित्तं नैष्ठिकस्य न सम्भवति ; कुतः ? पतनानुमानान्नैष्ठिकस्य तदयोगात् । तस्य हि पतनं स्मर्यते प्रायश्चित्ताभाववचनेन २"आरूढो नैष्ठिकं धर्मं यस्तु प्रच्यवते द्विजः । प्रायश्चित्तं न पश्यामि येन शुध्येत्स आत्महा" इति । अत उपकुर्वाणब्रह्मचारिविषयमाधिकारिकम् ॥ ४१ ॥

उपपूर्वमपीत्येके भावमशनवत्तदुक्तम् ॥ एके प्रायश्चित्तभावमपि मन्यन्ते, यत उपपूर्वम् उपपातकमिदम् ; अशनवत्—मद्यशनादिनिषेधतत्प्रायश्चित्तवद्भवतीत्यर्थः । अत उपकुर्वाणस्य ब्रह्मचारिणः उक्तमाधिकारिकमस्यापि भवतीति । तदुक्तं स्मृतिकारैः ३"उत्तरेषां चैतदविरोधि" इति । उपकुर्वाणे ब्रह्मचारिण्युक्तो धर्मः उत्तरेषा चाश्रमिणां स्वाश्रमाविरोधी भवत्येवेत्यर्थः॥ ४२॥

बहिस्तूभयथापि स्मृतेराचाराच्च ॥ उभयथापि उपपातकत्वे महापातकत्वेऽपि नैष्ठिकात्प्रच्युतो बहिर्भूतः कर्माधिकारात्, २"प्रायश्चित्तं न पश्यामि" इति स्मृतेः, आचाराच्च ; वर्जयन्तिह्येनं शिष्टा विद्योपदेशादौ। यद्यपि कल्मषनिबर्हणाय कैश्चित्प्रायश्चित्तमुच्यते, तथापि कर्माधिकारापादिनी शुद्धिस्तेषां न सम्भवतीत्यभिप्रायः ॥ ४३ ॥

इति वेदान्तदीपे तद्भूताधिकरणम् ॥ १० ॥

(श्रीशारीरकमीमांसाभाष्ये स्वाम्यधिकरणम् ॥ ११ ॥)

स्वामिनः फलश्रुतेरित्यात्रेयः । ३ । ४ । ४४ ॥

कर्माङ्गाश्रयाण्युद्गीथाद्युपासनानि किं यजमानकर्तृकाणि, उतर्त्विक्कर्तृकाणीति चिन्तायां—यजमानकर्तृकाणीत्यात्रेयो मन्यते ; कुतः? फलश्रुतेः—वेदान्तविहितेषु दहराद्युपासनेषु फलोपासनयोरेकाश्रयत्वदर्शना-

---

१ ॥—२. आग्नेय. १६-५-२३॥—३. गौत. १-प्र. ३-अ. ४-सू॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दिह च क्रतुफलाप्रतिबन्धरूपस्योद्गीथोपासनफलस्य यजमानाश्रयत्वश्रवणादित्यर्थः । न च गोदोहनादिवदङ्गाश्रयत्वेन यजमानकर्तृकत्वासम्भवः; गोदोहनादिषु ह्यध्वर्युकर्तृकप्रणयनाश्रयगोदोहनोपादानमन्येनाशक्यम्; इह तूद्गातृकर्तृकेऽप्युद्गीथे तस्योद्गीथादेः *रसतमत्वानुसन्धानं यजमानेनैव कर्तुं शक्यते ॥ ४४ ॥

(सिद्धान्तः)

इति प्राप्तेऽभिधीयते—

आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रियते ।३ । ४ । ४५ ॥

आर्त्विज्यम्—ऋत्विजः कर्मोद्गीथाद्युपासनमित्यौडुलोमिराचार्यो मन्यते; कुतः? तस्मै हि—प्रयोजनाय ऋत्विक्परिक्रियते; फलसाधनभूतस्य साङ्गस्य क्रतोरुपादानायेत्यर्थः । कर्मविधिषु[१] "ऋत्विजो वृणीते"[२] "ऋत्विग्भ्यो दक्षिणां ददाति" इति ऋत्विक्कर्तृकत्वशास्त्रेण फलसाधनभूतं साङ्गं कर्म ऋत्विग्भिरनुष्ठेयमित्यवगम्यते; तदन्तर्गतानि कायिकानि मानसानि च कर्माणि ऋत्विक्कर्तृकाण्येव; नच शक्त्यशक्ती तस्य निबन्धनम् । यद्यप्युद्गीथाद्युपासनं पुरुषार्थः, तथापि ऋत्वधिकृताधिकारत्वात्क्रतोश्च साङ्गस्य ऋत्विक्कर्तृकत्वात्,[३] "यदेव विद्यया करोति...तदेव वीर्यवत्तरम्" इति ऋत्विक्कर्तृकक्रियोपयोगित्वेन विद्यायास्तदेककर्तृकत्वश्रवणात्, ऋत्विक्कर्तृकाण्येतानि; दहरादिष्वपासनेषु ऋत्विक्कर्तृकत्वाश्रवणात्,[४] "शास्त्रफलं प्रयोक्तरि" इति न्यायाच्च फलिकर्तृकत्वमेव ॥ ४५ ॥

इति श्रीशारीरकमीमांसाभाष्ये स्वाम्यधिकरणम् ॥ ११ ॥

वेदान्तसारे—स्वामिनः फलश्रुतेरित्यात्रेयः ॥ उद्गीथाद्युपासनं यज-

---

*रसतमादित्वानुसं. पा ॥—१. यजुः. ६-३-७॥—२ ॥—३. छा. १-१-१० ॥—४. पू. मी. ३-७-१८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मानेनानुष्ठेयम्, तस्यैव क्रतुवीर्यवत्तरत्वादिफलश्रुतेरित्यात्रेयः ॥ ४४ ॥

आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रियते ॥ कर्मस्वरूपवत्तदङ्गाश्रयमप्यार्त्विज्यम्; साङ्गफलसाधनकर्मानुष्ठानाय हि ऋत्विक्परिक्रियते॥ ४५॥

इति वेदान्तसारे स्वाम्यधिकरणम् ॥ ११ ॥

वेदान्तदीपे—स्वामिनः फलश्रुतेरित्यात्रेयः ॥ उद्गीथाद्युपासनं किं यजमानेनानुष्ठेयम्, उत ऋत्विजेति संशयः । १"यदेव विद्यया करोति...तदेव वीर्यवत्तरम्" इति क्रतुवीर्यवत्तरत्वफलं यजमानस्येति दहरोपासनादिवद्यजमानेनानुष्ठेयमिति पूर्वः पक्षः । कर्माङ्गाश्रयत्वादस्योपासनस्य कर्मणश्चार्त्विज्यत्वेन एतदपि ऋत्विजाऽनुष्ठेयं,गोदोहनादिवादिति राद्धान्तः।सूत्रार्थस्तु—स्वामिनः-यजमानस्योद्गीथाद्युपासने कर्तृत्वम्, कुतः? तस्यैव फलश्रुतेरित्यात्रेयो मन्यते ॥ ४४ ॥

आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रियते ॥ क्रत्वङ्गाश्रयत्वेन क्रत्वधिकृतस्यैवास्मिन्नुपासनेऽधिकारात् क्रतोश्चार्त्विज्यत्वेन एतदप्यार्त्विज्यमित्यौडुलोमिराचार्यो मन्यते, यजमानफलसाधनत्वेऽपि क्रतोस्तदनुष्ठानाय हि ऋत्विक्परिक्रियते ॥ ४५ ॥

इति वेदान्तदीपे स्वाम्यधिकरणम् ॥ ११ ॥

(श्रीशारीरकमीमांसाभाष्ये सहकार्यन्तरविध्यधिकरणम् ॥)

सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् । ३ । ४ । ४६ ॥

२"तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत् बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिः" इत्यत्र बाल्यपाण्डित्यवन्मौनमपि विधीयते, उतानूद्यत इति विशये—मौनपाण्डित्यशब्दयोः ज्ञानार्थत्वात्,२"पाण्डित्यं निर्विद्य" इति विहितमेव ज्ञानम् २"अथ मुनिः" इत्यनूद्यते; विधिशब्दो नात्रत्र श्रूयत इति ॥

---

१. छा. १-१-१० ॥—२ बृ. ५-५-१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

(सिद्धान्तः)

एवं प्राप्ते ब्रूमः—सहकार्यन्तरविधिः–इति । तद्वतः-विद्यावतः ; विध्यादिवत्-विधीयते इति यज्ञादिस्सर्वाश्रमधर्मः शमदमादिश्च विधिशब्देनोच्यते; आदिशब्देन श्रवणमनने गृह्येते; सहकार्यन्तरविधिरित्यत्रापि विधीयत इति विधिः, सहकार्यन्तरं विधिश्चेति सहकार्यन्तरविधिः; एतदुक्तं भवति–यथा [१]"तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन" इत्यादिना [२]"शान्तो दान्तः" इत्यादिना च सहकारी यज्ञादिश्शमदमादिश्च विधीयते; यथाच [३]"श्रोतव्यो मन्तव्यः" इति श्रवणमनने चार्थप्राप्ते विद्यासहकारित्वेन गृह्येते; तथा [४]"तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य" इत्यादिना पाण्डित्यं, बाल्यं, मौनमिति त्रितयं विद्यायास्सहकार्यन्तरं विधीयते–इति । मौनं च पाण्डित्यादर्थान्तरमित्याह–पक्षेणेति। मुनिशब्दस्य पक्षेण प्रकृष्टमननशीले व्यासादौ प्रयोगदर्शनात् मौनं पाण्डित्यबाल्ययोर्द्वयोस्तृतीयम् । यद्यपि [४]"अथ मुनिः" इत्यत्र विधिप्रत्ययो न श्रूयते ; तथापि मौनस्याप्राप्तत्वाद्विधेयत्वमङ्गीकरणीयम्–अथ मुनिस्स्यात्–इति । इदं च मौनं श्रवणप्रतिष्ठार्थान्मननादर्थान्तरभूतमुपासनालम्बनस्य पुनःपुनस्संशीलनं तद्भावनारूपम् । तदेवं वाक्यार्थः—ब्राह्मणः - विद्यावान् पाण्डित्यं निर्विद्य-उपास्यं ब्रह्मतत्त्वं परिशुद्धं परिपूर्णं च विदित्वा श्रवणमननाभ्यामप्राप्तं वेदनं प्रतिलभ्येत्यर्थः; तच्च भगवद्भक्तिकृतसत्त्वविवृद्धिकृतम् ; यथोक्तं [५]"नाहं वेदैः" इत्यारभ्य [५]"भक्त्या त्वनन्यया शक्यः...ज्ञातुम्" इति। श्रुतिश्च [६]"यस्य देवे परा भक्तिः" [७]"नायमात्मा प्रवचनेन" इत्यादिका । बाल्येन तिष्ठासेत्; बाल्यस्वरूपं चानन्तरमेव वक्ष्यते ; बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिस्स्यात्–बाल्यपाण्डित्ये यथावदुपादाय परिशुद्धे परिपूर्णे ब्रह्मणि मन-

१. बृ. ६-४-२२ ॥—२. बृ. ६-४-२३ ॥—३. बृ. ४-४-५ ॥—४. बृ. ५-५-१ ॥—५. गी. ११-५३-५४ ॥—६. श्वे. ६-अ. २३ ॥—७. कठ २-२३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नशीलो भवेत्, निदिध्यासनरूपविद्यावाप्तये। एवमेव त्रितयोपादानेन लब्धविद्यो भवतीत्याह [१]"अमौनं च मौनं च निर्विद्याथ ब्राह्मणः" इति। अमौनं मौनेतरसहकारिकलापः; तं च मौनं च यथावदुपाददानो विद्याकाष्ठां तदेकनिष्पाद्यां लभेतेत्यर्थः। [१]"स ब्राह्मणः केन स्यात्" इति उक्तादुपायात्किमन्योऽप्युपायोऽस्तीति पृष्टे [१]"येन स्यात्तेनेदृश एव" इति—येन मौनपर्यन्तेन ब्राह्मणस्स्यादित्युक्तम्, तेनैवेदृशस्स्यात्; न केनाप्यन्येनोपायेनेति परिहृतम्। अतस्सर्वेष्वाश्रमेषु स्थितस्य विदुषो यज्ञादिस्वाश्रमधर्मवत्पाण्डित्यादिकं मौनतृतीयं विद्यायास्सहकार्यन्तरं विधीयते॥ ४६॥

अथ स्यात्—यदि सर्वेष्वाश्रमेषु स्थितानां विदुषां तत्तदाश्रमधर्मसहकारिणी मौनतृतीयसचिवा विद्या ब्रह्मप्राप्तिसाधनमुच्यते; कथं तर्हि च्छान्दोग्ये[२]"अभिसमावृत्य कुटुम्बे शुचौ देशे" इत्यारभ्य [२]"स खल्वेवं वर्तयन्यावदायुषं ब्रह्मलोकमभिसम्पद्यते न च पुनरावर्तते" इति यावदायुषं गार्हस्थ्यधर्मेण स्थितिदर्शनमुपपद्यते; अत आह—

कृत्स्नभावात्तु गृहिणोपसंहारः। ३। ४। ४७॥

तुशब्दश्चोद्यं व्यावर्तयति; कृत्स्नभावात्-कृत्स्नेषु भावात्, कृत्स्नेष्वाश्रमेषु विद्यायास्सद्भावात् गृहिणोऽप्यस्तीति तेनोपसंहारः; तस्मात्सर्वाश्रमधर्मप्रदर्शनार्थो गृहिणोपसंहार इत्यभिप्रायः॥ ४७॥

तथैतस्मिन्नपि वाक्ये [१]"ब्राह्मणः पुत्रेषणायाश्च वित्तेषणायाश्च लोकेषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरति" इति पारिव्राज्यैकान्तधर्मं प्रतिपाद्य [१]"तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य" इत्यादिना पारिव्राज्यधर्मस्थितिहेतुकमौनतृतीयसहकारिविधानं प्रदर्शनार्थमित्याह—

मौनवदितरेषामप्युपदेशात्। ३। ४। ४८॥

१. बृ. ५-५-१॥—२. छा. ८-१५ १॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सर्वेषणाविनिर्मुक्तस्य भिक्षाचरणपूर्वकमौनोपदेशः सर्वेषामाश्रमधर्माणां प्रदर्शनार्थः; कुतः? एवं विधमौनोपदेशवदितरेषामाश्रमिणामपि [1]"त्रयो धर्मस्कन्धाः" इत्यारभ्य [1]"ब्रह्मसंस्थोऽमृतत्वमेति" इति ब्रह्मप्राप्त्युपदेशात्। उपपादितश्च पूर्वमेव ब्रह्मसंस्थशब्दः सर्वाश्रमिसाधारण इति। अतस्सुष्ठूक्तं—यज्ञादिसर्वाश्रमधर्मवन्मौनतृतीयः पाण्डित्यादिर्विद्यासहकारित्वेन विधीयते—इति॥ ४८॥

इति श्रीशारीरकमीमांसाभाष्ये सहकार्यन्तरविध्यधिकरणम् ॥ १२ ॥

वेदान्तसारे—सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् ॥ २"तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य" इत्यारभ्य २"अथ मुनिः" इत्यत्र विद्यावतो यज्ञादिवत् बाल्यपाण्डित्ययोस्तृतीयं सहकार्यन्तरं मौनं विधीयते, पक्षेण प्रकृष्टमननशीले मुनिशब्दप्रयोगात्; विद्याभ्यासरूपमननमिदमप्राप्तमेव ॥ ४६ ॥

कृत्स्नभावात्तु गृहिणोपसंहारः ॥ कृत्स्नेष्वाश्रमिषु विद्यासद्भावात् छान्दोग्ये ३"अभिसमावृत्य कुटुम्बे" इत्यारभ्य ३"स स्वल्वेवं वर्तयन्यावदायुषम्" इति गृहिणोपसंहारस्सर्वेषां प्रदर्शनार्थः। तुशब्दो हि गृहिण एवेति शङ्काव्यावृत्त्यर्थः ॥ ४७ ॥

मौनवदितरेषामप्युपदेशात् ॥ २"अथ मुनिः" इत्यत्रापि २"अथ भिक्षाचर्यञ्चरति" इति पारिव्राज्येनोपसंहारः प्रदर्शनार्थः, मौनभिक्षाचर्यवदितराश्रमधर्माणां यज्ञादीनामप्युपदेशात् ॥ ४८ ॥

इति वेदान्तसारे सहकार्यन्तरविध्यधिकरणम् ॥ १२ ॥

वेदान्तदीपे—सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् ॥ २"तस्माद्ब्राह्मणः पाण्डित्यन्निर्विद्य बाल्येन तिष्ठासेत् बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिः" इत्यत्र मौनं विद्याङ्गतया विधीयते, उतानूद्यत इति संशयः। मौनस्य मननरूपत्वात् ४"श्रोतव्यो मन्तव्यः" इति च प्राप्तत्वे-

---

१. छा. २-२३-१ ॥—२. बृ. ५-५-१ ॥—३. छा ८-१५-१ ॥—४. बृ. ४-४-५॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नानूद्यत इति पूर्वः पक्षः। राद्धान्तस्तु—मुनिशब्दस्य प्रकृष्टमननशीले प्रसिद्धेः, प्रकृष्टमननमुपास्यविषयाभ्यासरूपं विद्यानिष्पत्तये विधीयत इति। सूत्रार्थस्तु—तद्वतः-विद्यावतः, सहकार्यन्तरं-मौनं विधिः; विधीयत इति विधिरिति मौनं विधिरित्युक्तम्। विध्यादिवत्—अत्रापि विधीयत इति विधिः यज्ञदानप्रभृत्याश्रमधर्मः, आदिशब्दाच्छ्रवणमनने गृह्येते। आश्रमधर्मवच्छ्रवणमननवच्च पाण्डित्यबाल्ययोस्तृतीयमिदं सहकार्यन्तरं मौनमपूर्वं विधीयते; कुत इत्यत आह पक्षेणेति। मुनिशब्दस्य प्रकृष्टमननयुक्ते पक्षेण—प्रसिद्धेरित्यर्थः॥ ४६॥

कृत्स्नभावाच्च गृहिणोपसंहारः॥ सर्वाश्रमिणां विद्यावत्त्वेऽपि च्छान्दोग्ये १"स खल्वेवं वर्तयन्यावदायुषं ब्रह्मलोकमभिसम्पद्यते" इति गृहस्थधर्मेणोपसंहारः सर्वाश्रमधर्मप्रदर्शनार्थः। कुतः? कृत्स्नभावात्—कृत्स्नेषु भावात्—कृत्स्नेष्वाश्रमिषु विद्यायास्सद्भावादित्यर्थः॥ ४७॥

मौनवदितरेषामप्युपदेशात्॥ २"अथ मुनिः" इत्यस्मिन्वाक्ये२"अथ भिक्षाचर्यं चरति"इति पारिव्राज्यैकान्तधर्मेणोपसंहारोऽपि सर्वाश्रमधर्मप्रदर्शनार्थः, भिक्षाचर्यमौनादिवदितरेषामाश्रमधर्माणां यज्ञादीनामप्युपदेशात्॥ ४८॥

इति वेदान्तदीपे सहकार्यन्तरविध्यधिकरणम्॥ १२॥

(श्रीशारीरकमीमांसाभाष्ये अनाविष्काराधिकरणम्॥)

अनाविष्कुर्वन्नन्वयात्। ३। ४। ४९॥

२"तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत्" इत्यत्र विदुषा बाल्यमुपादेयतया श्रुतम्। बालस्य भावः, कर्म वा बाल्यम्। बालभावस्य वयोवस्थाविशेषस्यानुपादेयत्वात्कर्मैवेह गृह्यते। तत्र किं बालस्य कर्म कामचारादिकं सर्वं विदुषोपादेयम्, उत डम्भादिरहितत्वमेवेति विशये विशेषाभावात्सर्वमुपादेयम्; नियमशास्त्राणि च विशेषविधिनाऽनेन बाध्यन्त इति॥

---

१. छा. ८-१५-१॥—२. बृ. ५-५-१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

(सिद्धान्तः)

एवं प्राप्तेऽभिधीयते—अनाविष्कुर्वन्निति। बालस्य यत्स्वभावानाविष्काररूपं कर्म; तदुपाददानो वर्तेत विद्वान्। कुतः? अन्वयात्—तस्यैवान्वयात्। १"बाल्येन तिष्ठासेत्" इत्यस्मिन्विधौ तस्यैव ह्यन्वयसम्भवः; इतरेषां विद्याविरोधित्वश्रवणात् २"नाविरतो दुश्चरितान्नाशान्तो नासमाहितः। नाशान्तमानसो वापि प्रज्ञानेनैनमाप्नुयात्" ३"आहारशुद्धौ सत्त्वशुद्धिः" इत्यादिषु॥ ४९॥

इति श्रीशारीरकमीमांसाभाष्ये अनाविष्काराधिकरणम्॥ १३॥

वेदान्तसारे—अनाविष्कुर्वन्नन्वयात्॥ १"पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत्" इति बाल्यमित्यविशेषेण श्रुतावपि बालकर्म स्वमाहात्म्यानाविष्काररूपं विद्यान्वययोग्यतया विधीयते॥ ४९॥

इति वेदान्तसारे अनाविष्काराधिकरणम्॥ १३॥

वेदान्तदीपे—अनाविष्कुर्वन्नन्वयात्॥ १"तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत् बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिः" इत्यत्र किं बालस्य कर्म कामचारादिकं सर्वं विदुषोपादेयम्, उत विद्यामाहात्म्यानाविष्कार इति संशयः। १"बाल्येन तिष्ठासेत्" इत्यविशेषविधानात्कामचारादिकं सर्वमप्युपादेयमिति पूर्वः पक्षः; विदुषो विशेषविधानात्, विद्यामाहात्म्याच्च, निषेधश्रुतयो बाधिता भवेयुः—इति। राद्धान्तस्तु—पाण्डित्यप्रयुक्तस्वमाहात्म्यानाविष्कार एव विद्यान्वययोग्यतयोपादेयः, इतरस्य कामचारादेः २"नाविरतो दुश्चरितात्" इत्यादिशास्त्रैर्विद्योत्पत्तिविरोधित्वावगमात्। अतो यथा बालः स्वाभिजनाद्यनाविष्कुर्वन्वर्तते; तथा विद्वान्वर्ततेत्येतदेव युक्तम्। सूत्रमपि व्याख्यातम्॥ ४९॥

इति वेदान्तदीपे अनाविष्काराधिकरणम्॥ १३॥

---

१. बृ. ५-५-१॥—२. कठ. २-२४॥—३. छा. ७-२६-२॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ऐहिकमप्रस्तुतप्रतिबन्धे तद्दर्शनात् । ३ । ४ । ५० ॥

द्विविधा विद्या—अभ्युदयफला, मुक्तिफला च । तत्राभ्युदयफला स्वसाधनभूतैः पुण्यकर्मभिः पुण्यकर्मानन्तरमेव उत्पद्यते, उतानन्तरं कालान्तरे वेत्यनियम इति संशयः । पूर्वकृतैः पुण्यकर्मभिर्हि विद्वान् जायते ; यथोक्तं भगवता [1]"चतुर्विधा भजन्ते मां जनास्सुकृतिनोऽर्जुन" इति । साधने निर्वृत्ते विलम्बहेत्वभादनन्तरमेव—

(सिद्धान्तः)

इति प्राप्त उच्यते—ऐहिकमप्रस्तुतप्रतिबन्धे—इति।ऐहिकम्—अभ्युदयफलमुपासनम् , अप्रस्तुतप्रतिबन्धे-अप्रस्तुते-प्रबलकर्मान्तरप्रतिबन्धे सत्यनन्तरम्, प्रतिबन्धे सति तदुत्तरकालमित्यनियमः । कुतः ? तद्दर्शनात्-दृश्यते हि प्रबलकर्मान्तरेण कर्मफलप्रतिबन्धाभ्युपगमः श्रुतौ [2]"यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरम्" इत्युद्गीथविद्यायुक्तस्य कर्मणः फलाप्रतिबन्धश्रवणात् ॥ ५० ॥

इति श्रीशारीरकमीमांसाभाष्ये ऐहिकाधिकरणम् ॥ १४ ॥

वेदान्तसारे—ऐहिकमप्रस्तुतप्रतिबन्धे तद्दर्शनात् ॥ अभ्युदयफलमुपासनं स्वसाधनभूतपुण्यकर्मानन्तरमुत्पद्यत इति नायं नियमः, प्रबलकर्मान्तरप्रतिबन्धाभावे तदनन्तरं , प्रतिबन्धे तु तस्मिन्समाप्ते " तदेव वीर्यवत्तरम् " इति प्रतिबन्धाभावे फलदर्शनात् ॥ ५० ॥

इति वेदान्तसारे ऐहिकाधिकरणम् ॥ १४ ॥

वेदान्तदीपे—ऐहिकमप्रस्तुतप्रतिबन्धे तद्दर्शनात् ॥ मोक्षव्यतिरिक्ताभ्युदयफलमुपासनं किं स्वसाधनभूतपुण्यकर्मानन्तरमेवोत्पद्यते, उतानन्तरम-

१. गी. ७-१६ ॥—२. छा. १-१-१० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न्यदा वेत्यनियम इति संशयः। साधननिर्वृत्तौ विलम्बहेत्वभावादनन्तरमेवेति पूर्वः पक्षः। राद्धान्तस्तु—अप्रस्तुते प्रबलकर्मान्तरप्रतिबन्धे सत्यनन्तरम्, प्रस्तुते तदुत्तरकालमित्यनियमः। दृश्यते हि प्रबलकर्मान्तरेण फलप्रतिबन्धः १"यदेव विद्यया करोति...तदेव वीर्यवत्तरम्" इति उद्गीथोपासनस्य क्रतोः कर्मान्तरेण फलाप्रतिबन्धः फलमिति, २"पृथग्व्यप्रतिबन्धः फलम्" इत्यभ्युपगमात्। सूत्रमपि व्याख्यातम्। ऐहिकम्-अभ्युदयफलमित्यर्थः॥ ५० ॥

इति वेदान्तदीपे ऐहिकाधिकरणम् ॥ १४ ॥

(श्रीशारीरकमीमांसाभाष्ये मुक्तिफलाधिकरणम्॥ १५॥)

एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः। ३। ४। ५१ ॥

मुक्तिफलस्याप्युपासनस्य स्वसाधनभूतैरतिशयितकर्मभिरुत्पत्तावेवमेव कालानियमः, तस्यापि पूर्ववत्प्रतिबन्धाभावप्रतिबन्धसमाप्तिरूपावस्थावगतेः—अत्रापि तस्य हेतोस्समानत्वादित्यर्थः ॥

सर्वेभ्यः कर्मभ्यो मुक्तिफलविद्यासाधनस्य कर्मणः प्रबलत्वात्प्रतिबन्धासम्भव इत्यधिकाशङ्का ॥

तत्रापि ब्रह्मविदपचाराणां पूर्वकृतानां प्रबलानां सम्भवात्प्रति३बन्धसम्भव इति परिहारः। द्विरुक्तिरध्यायपरिसमाप्तिं द्योतयति ॥

इति श्रीशारीरकमीमांसाभाष्ये मुक्तिफलाधिकरणम् ॥ १५ ॥

इति श्रीभगवद्रामानुजविरचिते शारीरकमीमांसाभाष्ये
तृतीयस्याध्यायस्य चतुर्थः पादः॥ ४ ॥

समाप्तश्चाध्यायः ॥ ३ ॥

---

१. छा. १-१-१० ॥—२. शारी. ३-३-४१ ॥—३. प्रतिबन्धसम्भवतीति परिहारः. पा॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वेदान्तसारे—एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः॥

एवं मुक्तिफलोपासनस्यापि प्रतिबन्धभावाभावयोरित्यनियमः, प्रतिबन्धाभाव एवेति फलोदयावस्थावधृतेः ॥ ५१ ॥

इति वेदान्तसारे मुक्तिफलाधिकरणम् ॥ १५ ॥

इति श्रीभगवद्रामानुजविरचिते श्रीवेदान्तसारे तृतीयस्याध्यायस्य चतुर्थः पादः ॥ ४ ॥

समाप्तश्चाध्यायः ॥ ३ ॥

वेदान्तदीपे—एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः॥

किं मुक्तिफलान्युपासनानि स्वसाधनभूतातिशयितपुण्यकर्मानन्तरमुत्पद्यन्ते, उत पूर्ववदनियम इति संशयः । मुक्तिफलोपासनसाधनभूतकर्मणां सर्वकर्मभ्यो बलवत्तरत्वेन प्रतिबन्धाभावादनन्तरमेवोत्पद्यत इति पूर्वः पक्षः । तत्रापि ब्रह्मविदप्चारस्य ततोऽपि बलवत्तरत्वेन प्रतिबन्धसम्भवादनियम एवेति राद्धान्तः। सूत्रार्थस्तु—मुक्तिफलानामप्येवमनियमः । कुतः?तदवस्थावधृतेः—प्रतिबन्धाभावे सति फलावधृतेः । द्विरुक्तिरध्यायपरिसमाप्तिं द्योतयति ॥ ५१ ॥

इति वेदान्तदीपे मुक्तिफलाधिकरणम् ॥ १५ ॥

इति श्रीभगवद्रामानुजविरचिते श्रीवेदान्तदीपे तृतीयस्याध्यायस्य चतुर्थः पादः ॥ ४ ॥

समाप्तश्चाध्यायः ॥ ३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीमते रामानुजाय नमः

श्रीभगवद्रामानुजविरचिते

श्रीशारीरकमीमांसाभाष्ये

(चतुर्थाध्याये - प्रथमः पादः - आवृत्त्यधिकरणम्॥ १ ॥)

आवृत्तिरसकृदुपदेशात् । ४ । १ । १ ॥

तृतीयेऽध्याये साधनैस्सह विद्या चिन्तिता । अथेदानीं विद्यास्वरूपविशोधनपूर्वकं विद्याफलं चिन्त्यते । तत्र १"ब्रह्मविदाप्नोति परम्" २"तमेव विदित्वाऽतिमृत्युमेति"३"ब्रह्म वेद ब्रह्मैव भवति"४"यदा पश्यः पश्यते रुक्मवर्णम्" इत्यादिवेदान्तवाक्येषु ब्रह्मप्राप्तिसाधनतया विहितं वेदनं किं सकृत्कृतमेव शास्त्रार्थः, उतासकृदावृत्तमिति संशयः । किं युक्तम्? सकृत्कृतमिति; ३"ब्रह्म वेद ब्रह्मैव भवति" इति वेदनमात्रस्यैव विधानात्, असकृदावृत्तौ प्रमाणाभावात् । नचावघातादिवद्वेदनस्य ब्रह्मापरोक्ष्यं प्रति दृष्टोपायत्वाद्यावत्कार्यमावृत्तिरिति शक्यं वक्तुम्, वेदनस्य दृष्टोपायत्वाभावात् । ज्योतिष्टोमादिकर्माणि, वेदान्तविहितं च वेदनं परमपुरुषाराधनरूपम्, आराधिताच्च परमपुरुषाद्धर्मार्थकाममोक्षाख्यपुरुषार्थावाप्तिरिति हि ५"फलमत उपपत्तेः" इत्यत्र प्रतिपादितम् । अतो ज्योतिष्टोमादिवद्यथाशब्दं सकृत्कृतमेव शास्त्रार्थः—

(सिद्धान्तः)

१. तै. आन. १-१ ॥—२. श्वे. ३-८ ॥—३. मु. ३-२-९ ॥—४. मु. ३-१-३ ॥—५. शारी. ३-२-३७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति प्राप्ते प्रचक्ष्महे—आवृत्तिरसकृत्—इति। असकृदावृत्तमेव वेदनं शास्त्रार्थः; कुतः? उपदेशात्—ध्यानोपासनपर्यायेण वेदनशब्देनोपदेशात्। तत्पर्यायत्वं च विद्युपास्तिध्यायतीनामेकस्मिन्विषये वेदनोपदेशपरवाक्येषु प्रयोगादवगम्यते। तथाहि [१]"मनो ब्रह्मेत्युपासीत" इत्युपासिनोपक्रान्तोऽर्थः [२]"भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं वेद" इति विदिनोपसंहियते; तथा [३]"यस्तद्वेद यत्स वेद स मयैतदुक्तः" इत्युपक्रमे विदिनोक्तं रैक्कस्य ज्ञानम् [४]"अनु म एतां भगवो देवतां शाधि यां देवतामुपास्से" इत्युपासिनोपसंहियते; तथा [५]"ब्रह्मविदाप्नोति परम्" इत्यादिवाक्यसमानार्थेषु वाक्येषु [६]"आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" [७]"ततस्तु तं पश्यति निष्कलं ध्यायमानः" इत्यादिषु ध्यायतिना वेदनमभिधीयते; ध्यानं च चिन्तनम्; चिन्तनं च स्मृतिसन्ततिरूपम्; न स्मृतिमात्रम्; उपास्तिरपि तदेकार्थः, एकाग्रचित्तवृत्तिनैरन्तर्ये प्रयोगदर्शनात्; तदुभयैकार्थ्यात् असकृदावृत्तसन्ततस्मृतिरिह [८]"ब्रह्म वेद ब्रह्मैव भवति" [९]"ज्ञात्वा देवं मुच्यते सर्वपाशैः" इत्यादिषु वेदनादिशब्दैरभिधीयते इति निश्चीयते॥ १॥

लिङ्गाच्च। ४। १। २॥

लिङ्गं - स्मृतिः। स्मृतेश्चायमर्थोऽवगम्यते। स्मर्यते हि मोक्षसाधनभूतं वेदनं स्मृतिसन्ततिरूपं [१०]"तद्रूपप्रत्यये चैका सन्ततिश्चान्यनिस्स्पृहा। तज्ज्ञानं प्रथमैर्षड्भिरङ्गैर्निष्पाद्यते तथा" इति। तस्मादसकृदावृत्तमेव वेदनं शास्त्रार्थः॥ २॥

इति श्रीशारीरकमीमांसाभाष्ये आवृत्त्यधिकरणम्॥ १॥

---

१. छा. ३-१८-१॥—२. छा. ३-१८-३,४,५,६॥—३. छा. ४-१-४॥—४. छा. ४-२-२॥—५. तै. आन. १-१॥—६. बृ. ४-४-५॥—७. मु. ३-१-८॥—८. मु. ३-२-९॥—९. श्वे. १-८॥—१०. विष्णु. ६-७-९१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वेदान्तसारे—आवृत्तिरसकृदुपदेशात् ॥ १"ब्रह्मविदाप्नोति परम्" इत्यादिषु मोक्षसाधनं वेदनमसकृदावृत्तम्, "विद्यात्" "उपासीत" इति विद्युपास्योरुपक्रमोपसंहारथोर्व्यतिकरेणोपदेशात् ॥ १ ॥

लिङ्गाच्च ॥ लिङ्गं - स्मृतिः ; २"मां ध्यायन्त उपासते । तेषामहं समुद्धर्ता" ३"तद्रूपप्रत्यये चैका सन्ततिश्चान्यनिस्स्पृहा। तज्ज्ञानम्"इत्यादिस्मृतेश्च ॥ २ ॥

इति वेदान्तसारे आवृत्त्यधिकरणम् ॥ १ ॥

वेदान्तदीपे—आवृत्तिरसकृदुपदेशात् ॥ १"ब्रह्मविदाप्नोति परम्" ४"तमेवं विद्वानमृत इह भवति" इत्यादिवेदान्तविहितं वेदनं किं सकृत्कृतमेव शास्त्रार्थः, उतासकृदावृत्तमिति संशयः । सकृत्कृतमेवेति पूर्वः पक्षः, ५"स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति"इत्यादौ वेदनस्यैव मुक्त्युपायत्वप्रतिपादनात्, सकृत्कृतेऽपि वेदने शास्त्रार्थनिर्वृत्तेः, तस्यासकृदावृत्तौ प्रमाणाभावात् । राद्धान्तस्तु—६"यस्तद्वेद यत्स वेद स मयैतदुक्तः"इत्युपक्रम्य, ७"अनु म एतां भगवो देवतां शाधि यां देवतामुपास्से" इत्येकस्मिन्वाक्ये विद्युपास्योर्व्यतिकरेण प्रयोगदर्शनात्, समानार्थेषु १"ब्रह्मविदाप्नोति परम्" ८"आत्मा वा अरे द्रष्टव्यश्श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" इत्यादिषु ध्यानविद्योर्व्यतिकरदर्शनाच्च, ध्यानोपासनादिशब्दवाच्यमसकृदावृत्तं स्मृतिसन्तानरूपवेदनमेव शास्त्रार्थ इति निश्चीयते।सूत्रार्थस्तु—*आवृत्तिरसकृत्-ब्रह्मप्राप्तिसाधनं वेदनमसकृदावृत्तमेव शास्त्रार्थः ; वेदनं ध्यानशब्दवाच्यमित्यर्थः । कुतः? उपदेशात्—९"ओमित्येवं ध्यायथात्मानं" १०"निचाय्य तं मृत्युमुखात्प्रमुच्यते"११"आत्मानमेव लोकमुपासीत" ८"आत्मा वा अरे द्रष्टव्यः" इत्यादिना उपासनोपसंहारोपदेशात् । उपासनं चाविच्छिन्नस्मृतिसन्तानरूपमिति पूर्वमेवोक्तम् ॥ १ ॥

लिङ्गाच्च ॥ लिङ्गं-स्मृतिः। स्मर्यते चायमर्थः२"मां ध्यायन्त उपासते । तेषामहं समुद्धर्ता मृत्युसंसारसागरात्"१२"ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपा-

---

१. तै.आ. १-१॥—२. गी. १२-६, ७॥—३. विष्णु ६-७-९१॥—४. पुरुषसूक्तम्॥ ५. मु. ३ २-९ ॥—६. छा. ४-१-४ ॥—७. छा. ४-२-२ ॥—८. बृ. ४-४-५॥—*वेदनशास्त्रार्थ आवृत्तिः असकृत्—असकृदावृत्तं वेदनं ध्यानशब्दवाच्यमित्यर्थः. पा॥—९. मु. २-२-६ ॥—१०. कठ. ३-१५ ॥—११ ॥—१२. गी. १२-३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सते" १"तद्रूपप्रत्यये चैका सन्ततिश्चान्यनिस्स्पृहा। तज्ज्ञानं प्रथमैरुद्गृहिरन्यैर्निष्पाद्यते तथा" इति ॥ २ ॥

इति वेदान्तदीपे आवृत्त्यधिकरणम् ॥ १ ॥

श्रीशारीरकमीमांसाभाष्ये आत्मत्वोपासनाधिकरणम् ॥

आत्मेति तूपगच्छन्ति ग्राहयन्ति च।४।१।३॥

इदमिदानीं चिन्त्यते—किमुपास्यं ब्रह्मोपासितुरन्यत्वेनोपास्यम्, उतोपासितुरात्मत्वेन—इति। किं युक्तम्?; अन्यत्वेनेति। कुतः? उपासितुः प्रत्यगात्मनोऽर्थान्तरत्वात् ब्रह्मणः। अर्थान्तरत्वं च २"अधिकं तु भेदनिर्देशात्" ३"अधिकोपदेशात्" ४"नेतरोऽनुपपत्तेः" इत्यादिषूपपादितम्। यथावस्थितं च ब्रह्मोपास्यम्; अयथोपासने हि ब्रह्मप्राप्तिरप्ययथाभूता स्यात्—५"यथाक्रतुरस्मिन् लोके पुरुषो भवति तथेतः प्रेत्य भवति" इति न्यायात्। अतोऽन्यत्वेनोपास्यमिति ॥

(सिद्धान्तः)

एवं प्राप्तेऽभिधीयते—आत्मेति तु—इति। तुशब्दोऽवधारणे; उपासितुरात्मेत्येवोपास्यम्, उपासिता प्रत्यगात्मा स्वशरीरस्य स्वयं यथा आत्मा; तथा स्वात्मनोऽपि परं ब्रह्मात्मेत्येवोपासीतेत्यर्थः। कुतः? एवं ह्युपगच्छन्ति पूर्वे उपासितारः ६"त्वं वा अहमस्मि भगवो देवते अहं वै त्वमसि" इति। उपासितुरर्थान्तरभूतं ब्रह्मोपासितारोऽहमिति कथमभ्युपगच्छन्तीत्यत्राह—ग्राहयन्ति च—इति। इममर्थमविरुद्धमुपासितॄन् ग्राहयन्ति शास्त्राणि—तान् प्रत्युपपादयन्तीत्यर्थः। ७"य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्याऽत्मा शरीरं य आत्मानमन्तरो यम-

---

१. विष्णु. ६-७-९१ ॥—२. शारी. २-१-२२ ॥—३. शारी. ३-४-८॥—४. शारी. १-१-१७ ॥—५. छा. ३-१४-१ ॥—६ ॥—७. बृ-५-७-२२. माध्यन्दिनशाखा ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यति स त आत्माऽन्तर्याम्यमृतः" इतिः तथा १"सन्मूलास्सोम्येमास्सर्वाः प्रजास्सदायतनास्सत्प्रतिष्ठाः ऐतदात्म्यमिदं सर्वम्" २"सर्वं खल्विदं ब्रह्म तज्जलानिति" इति च सर्वस्य चिदचिद्वस्तुनस्तज्जत्वात्तल्लत्वात्तदनत्वात्तन्नियाम्यत्वात्तच्छरीरत्वाच्च सर्वस्यायमात्माःअतस्स त आत्माःअतो यथा प्रत्यगात्मनस्स्वशरीरं प्रत्यात्मत्वात्'देवोऽहं मनुष्योऽहम्'इत्यनुसन्धानम्; तथा प्रत्यगात्मनोऽप्यात्मत्वात्परमात्मनस्तस्याप्यहमित्येवानुसन्धानं युक्तमिति। एवं शास्त्रैरुपपादितं सर्वबुद्धीनां ब्रह्मैकनिष्ठत्वेन सर्वशब्दानां ब्रह्मैकनिष्ठत्वमभ्युपगच्छन्तः ३"त्वं वा अहमस्मि भगवो देवते अहं वै त्वमसि भगवो देवते" इति व्यतिकरेणोक्तवन्तः। एवं च ४"अथ योऽन्यां देवतामुपास्ते अन्योऽसावन्योऽहमस्मीति न स वेद" ५"अकृत्स्नो ह्येष आत्मेत्येवोपासीत" ६"सर्वे तं परादाद्योऽन्यत्रात्मनस्सर्वं वेद" इत्यात्मत्वाननुसन्धाननिषेधः, ७"पृथगात्मानं प्रेरितारं च मत्वा" इति पृथक्त्वानुसन्धानविधानं चाविरुद्धम्; अहमिति स्वात्मतयाऽनुसन्धानादन्यत्वानुसन्धाननिषेधो रक्षितः; स्वशरीरात्स्वात्मनोऽधिकत्वानुसन्धानवत्स्वात्मनोऽपि परमात्मनोऽधिकत्वानुसन्धानात्पृथक्त्वानुसन्धानविधानं च रक्षितम्। अधिकस्य ब्रह्मणः प्रत्यगात्मन आत्मत्वात्तस्य च ब्रह्मशरीरत्वान्निषेधवाक्ये५"अकृत्स्नो ह्येषः" इत्युक्तम्। अत उपासितुरात्मत्वेन ब्रह्मोपास्यमिति स्थितम् ॥ ३ ॥

इति श्रीशारीरकमीमांसाभाष्ये आत्मत्वोपासनाधिकरणम् ॥ २ ॥

वेदान्तसारे—आत्मेति तूपगच्छन्ति ग्राहयन्ति च॥ यद्यपि ८" अधिकन्तु भेदनिर्देशात् " ९" अधिकोपदेशात्" इत्यादिषु प्रत्यगात्मनोऽर्थान्तरत्वं ब्रह्मणः प्रतिपादितम्; तथाप्युपासिता १०" अहं ब्रह्मास्मि " इत्येवोपासीत;

१. छा. ६-८-४ ॥—२. छा. ३-१४-१ ॥—३ ॥—४. बृ. ३-४-१० ॥—५॥—६. बृ. ६-५-७॥—७. श्वे. १-६ ॥—८. शारी. २-१-२२॥—९. शारी. ३-४-८ ॥—१०. बृ. ३-४-१० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यतः पूर्वे उपासितारः १"त्वं वा अहमस्मि भगवो देवते अहं वै त्वमसि भगवो देवते" इत्यात्मेत्येवोपगच्छन्ति। उपासितुरर्थान्तरमपि ब्रह्म तानुपासितॄन् स्वात्मभूतं ग्राहयन्ति शास्त्राणि२"य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्याऽत्मा शरीरं य आत्मानमन्तरो यमयति स त आत्मा"इत्यादीनि। यथा 'मनुष्योऽहम्'इति मनुष्यशरीरस्य स्वात्मप्राकारतैकस्वभावतया प्रकारिणि स्वात्मनि अहंशब्दस्य तद्बुद्धेश्च पर्यवसानम्; तथा स्वात्मनोऽपि परमात्मशरीरतया तत्प्रकारस्वभावत्वेन अहंशब्दतद्बुद्धोः परमात्मनि पर्यवसानमिति ३"अहं ब्रह्म" इत्येवोपास्यमिति ॥ ३ ॥

इति वेदान्तसारे आत्मत्वोपासनाधिकरणम् ॥ २ ॥

वेदान्तदीपे—आत्मेति तूपगच्छन्ति ग्राहयन्ति च ॥ किमुपास्यं ब्रह्मोपासितुरन्यत्वेनानुसन्धेयम्, उतात्मत्वेनेति संशयः। ४"अधिकं तु भेदनिर्देशात्"५"अधिकोपदेशात्" इत्यादिषूपासितुरुपास्यस्यार्थान्तरत्वेनैवोपपादनात् यथावस्थितस्यैवोपास्यत्वाच्चान्यत्वेनोपास्यमिति पूर्वः पक्षः। राद्धान्तस्तु—१" त्वं वा अहमस्मि भगवो देवते अहं वै त्वमसि भगवो देवते" इति पूर्वे उपासितारः उपास्यमात्मत्वेनोपगच्छन्ति। अत आत्मेत्येवोपास्यम्। तानुपासितॄन्प्रत्यर्थान्तरभूतस्यापि ब्रह्मणः उपासितुरात्मत्वं ग्राहयन्ति शास्त्राणि २"य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्याऽत्मा शरीरं य आत्मानमन्तरो यमयति स त आत्माऽन्तर्याम्यमृतः" इत्यारभ्योपासिता परमात्मनश्शरीरम्, परमात्मा चोपासितुरात्मेति प्रतिपादनेन ; तथा ६"सर्वं खल्विदं ब्रह्म तज्जलान्" इति ७" सन्मूलास्सोम्येमास्सर्वाः प्रजास्सदायतनास्सत्प्रतिष्ठाः...ऐतदात्म्यमिदं सर्वम्" इति च तदायत्तस्वरूपस्थितिप्रवृत्तिताप्रतिपादनेन च। एवमुपासितुस्स्वात्मनोऽप्यात्मत्वाद्ब्रह्मणः यथावस्थितस्वात्मशरीरकब्रह्मानुसन्धानेऽहमित्येवानुसन्धेयम्।यथा'मनुष्योऽहमस्मि'इति स्वशरीरस्य स्वप्रकारतैकस्वभावतया प्रकारिणि स्वात्मनि पर्यवसानम्, तथा स्वात्मनोऽहंप्रत्ययोऽहंशब्दश्च न केवलस्वात्मविषयौ, परमात्मशरीरतया तद्विशेषणत्वेनैव स्वात्मनोऽवस्थानात्। सूत्रमपि व्याख्यातम् ॥ ३ ॥

इति वेदान्तदीपे आत्मत्वोपासनाधिकरणम् ॥ २ ॥

१॥—२. बृ. ५-७-२२. मा. पा॥—३. बृ. ३-४-१०॥—४. शारी. २-१-२२॥—५. शारी. ३-४-८ ॥—६. छा. ३-१४-१ ॥—७. छा. ६-८-४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न प्रतीके न हि सः । ४ । १ । ४ ॥

१"मनो ब्रह्मेत्युपासीत" २"स यो नाम ब्रह्मेत्युपास्ते" इत्यादिप्रतीकोपासनेष्वप्यात्मत्वानुसन्धानं कार्यम्, उत न–इति चिन्तायां १"मनो ब्रह्मेत्युपासीत" इति ब्रह्मोपासनत्वसाम्याद्ब्रह्मणश्चोपासितुरात्मत्वादात्मेत्येवोपासीतेति ॥

(सिद्धान्तः)

एवं प्राप्तेऽभिधीयते–न प्रतीके–इति । प्रतीके नात्मत्वानुसन्धानं कार्यम् ; न हि सः—नह्युपासितुरात्मा प्रतीकः । प्रतीकोपासनेषु प्रतीक एवोपास्यः ; न ब्रह्म । ब्रह्म तु तत्र दृष्टिविशेषणमात्रम् । प्रतीकोपासनं हि नाम अब्रह्मणि ब्रह्मदृष्ट्याऽनुसन्धानम् ; तत्रोपास्यस्य प्रतीकस्योपासितुरात्मत्वाभावान्न तथाऽनुसन्धेयम् ॥ ४ ॥

नन्वत्रापि ब्रह्मैवोपास्यम् ; ब्रह्मण उपास्यत्वसम्भवे मनआदीनामचेतनानामल्पशक्तीनां चोपास्यत्वाश्रयणस्यान्याय्यत्वात् । अतो मनआदिदृष्ट्या ब्रह्मैवोपास्यमिति ; अत आह—

ब्रह्मदृष्टिरुत्कर्षात् । ४ । १ । ५ ॥

मनआदिषु ब्रह्मदृष्टिरेव युक्ता ; न ब्रह्मणि मनआदिदृष्टिः, ब्रह्मणो मनआदिभ्य उत्कर्षात् ; तेषां च विपर्ययात् । उत्कृष्टे हि राजनि भृत्यदृष्टिः प्रत्यवायकरी ; भृत्ये तु राजदृष्टिरभ्युदयाय ॥ ५ ॥

इति श्रीशारीरकमीमांसाभाष्ये प्रतीकाधिकरणम् ॥ ३ ॥

---

१. छा. ३-१८-१ ॥—२. छा. ७-१-५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वेदान्तसारे—न प्रतीके न हि सः ॥ १"मनो ब्रह्म" इत्यादिप्रतीके तु नात्मेति ग्रहणम् ; न हि तत्र सः-परमात्मोपास्यः ;परमात्मदृष्ट्या हि मनः-प्रभृतीति ॥ ४ ॥

ब्रह्मदृष्टिरुत्कर्षात् ॥ ब्रह्मण उत्कृष्टत्वात्तद्दृष्ट्या मनआद्युपासनं ह्यभ्युदयाय भवतीति ॥ ५ ॥

इति वेदान्तसारे प्रतीकाधिकरणम् ॥ ३ ॥

वेदान्तदीपे—न प्रतीके न हि सः ॥ ब्रह्मदृष्टिरुत्कर्षात् ॥ १"मनो ब्रह्मेत्युपासीत" इत्यादिषु प्रतीकोपासनेष्वप्यात्मत्वेनानुसन्धानं कर्तव्यम् , उत नेति संशयः । १"मनो ब्रह्मेत्युपासीत" इति ब्रह्मोपासनत्वाविशेषादात्मेत्येवानुसन्धानमिति पूर्वः पक्षः । राद्धान्तस्तु—न प्रतीके आत्मत्वानुसन्धानं कार्यम् ; कुतः? न हि मनआदिरुपासितुरात्मा, न च तत्र ब्रह्मोपास्यम् ; ब्रह्मदृष्ट्या मनआदिरुपास्यः; अपकृष्टे उत्कृष्टदृष्टिरभ्युदयाय भवति; यथा भृत्यादौ राजदृष्टिः । सूत्रद्वयं च व्याख्यातम् ॥ ४ ॥ ५ ॥

इति वेदान्तदीपे प्रतीकाधिकरणम् ॥ ३ ॥

(श्रीशारीरकमीमांसाभाष्ये आदित्यादिमत्यधिकरणम् ॥)

आदित्यादिमतयश्चाङ्ग उपपत्तेः । ४ । १ । ६ ॥

२"य एवासौ तपति तमुद्गीथमुपासीत" इत्यादिषु कर्माङ्गाश्रयेषूपासनेषु संशयः—किमुद्गीथादौ कर्माङ्गे आदित्यादिदृष्टिः कर्तव्या, उतादित्यादिषूद्गीथादिदृष्टिः"—इति।उत्कृष्टदृष्टिर्निकृष्टे कर्तव्येति न्यायात्, उद्गीथादीनां च फलसाधनभूतकर्माङ्गत्वेनाफलेभ्य आदित्यादिभ्यः उत्कृष्टत्वादादित्यादिषूद्गीथादिदृष्टिः—

(सिद्धान्तः)

इति प्राप्तेऽभिधीयते—आदित्यादिमतयश्चाङ्गे—इति। चशब्दोऽव-

---

१. छा. ३-१८-१ ॥—२. छा. १-३-१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

धारणे ; ऋत्वङ्गे उद्गीथादावादित्यादिदृष्टय एव कार्याः ; कुतः? उपपत्तेः-आदित्यादीनामेवोत्कृष्टत्वोपपत्तेः ; आदित्यादिदेवताराधनद्वारेण हि कर्मणामपि फलसाधनत्वम् ; अतस्तदृष्टिरुद्गीथाद्यङ्गे ॥ ६ ॥

इति श्रीशारीरकमीमांसाभाष्ये आदित्यादिमत्यधिकरणम् ॥ ४ ॥

वेदान्तसारे—आदित्यादिमतयश्चाङ्ग उपपत्तेः ॥ १"य एवासौ तपति तमुद्गीथमुपासीत" इत्यादावप्यादित्यादेरेवोत्कृष्टत्वात् उद्गीथादौ तदृष्टयः कार्याः ॥ ६ ॥

इति वेदान्तसारे आदित्यादिमत्यधिकरणम् ॥ ४ ॥

वेदान्तदीपे—आदित्यादिमतयश्चाङ्ग उपपत्तेः ॥ १"य एवासौ तपति तमुद्गीथमुपासीत" इत्यादिषु कर्माङ्गाश्रयोपासनेषु किमुद्गीथादावादित्यादिदृष्टिः कार्या, उतादित्यादावुद्गीथादिदृष्टिरिति संशयः । कर्मणः फलसाधनतयोत्कर्षात् आदित्यादेर्देवतात्वेन तदुणत्वाच्चादित्यादावुद्गीथादिदृष्टिः कार्येति पूर्वः पक्षः।राद्धान्तस्तु—कर्मणोऽपि फलसाधनत्वमादित्यादिदेवताराधनद्वारेणेति आदित्यादेरेवोत्कर्षोपपत्तेः आदित्यादिमतय एव कर्माङ्गोद्गीथादौ कार्याः । सूत्रं च व्याख्यातम् ॥ ६ ॥

इति वेदान्तदीपे आदित्यादिमत्यधिकरणम् ॥ ४ ॥

(श्रीशारीरकमीमांसाभाष्ये आसीनाधिकरणम् ॥ ५ ॥)

आसीनस्सम्भवात् । ४ । १ । ७ ॥

मोक्षसाधनतया वेदान्तशास्त्रैर्विहितं ज्ञानं ध्यानोपासनादिशब्दवाच्यमसकृदावृत्तं सन्ततस्मृतिरूपमित्युक्तम् । तदनुतिष्ठन्नासीनश्शयानस्तिष्ठन् गच्छंश्च विशेषाभावादनियमेनानुतिष्ठेत्—

---

१. छा. १-३-१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

(सिद्धान्तः)

इति प्राप्त उच्यते—आसीनः—इति। आसीन उपासनमनुतिष्ठेत्; कुतः? सम्भवात्—आसीनस्यैव ह्येकाग्रचित्ततासम्भवः; स्थितिगत्योः प्रयत्नसापेक्षत्वात्, शयने च निद्रासम्भवात्। पश्चार्धधारणप्रयत्ननिवृत्तये सापाश्रये आसीनः कुर्यात् ॥ ७ ॥

ध्यानाच्च । ४ । १ । ८ ॥

१"निदिध्यासितव्यः" इति ध्यानरूपत्वादुपासनस्य, एकाग्रचित्तताऽवश्यंभाविनी। ध्यानं हि विजातीयप्रत्ययान्तराव्यवहितमेकचिन्तनमित्युक्तम् ॥ ८ ॥

अचलत्वं चापेक्ष्य । ४ । १ । ९ ॥

२निश्चलत्वं चापेक्ष्य पृथिव्यन्तरिक्षादिषु ध्यानवाचोयुक्तिर्दृश्यते ३"ध्यायतीव पृथिवी, ध्यायतीवान्तरिक्षं, ध्यायतीव द्यौः, ध्यायन्तीवापो, ध्यायन्तीव पर्वताः" इति। अतः पृथिवीपर्वतादिवदेकाग्रचित्ततया निश्चलत्वमुपासकस्यासीनस्यैव सम्भवेत् ॥ ९ ॥

स्मरन्ति च । ४ । १ । १० ॥

स्मरन्ति चासीनस्यैव ध्यानं ४"शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः। नात्युच्छ्रितं नातिनीचं चेलाजिनकुशोत्तरम्। तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः। उपविश्याऽसने युञ्ज्याद्योगमात्मविशुद्धये" इति ॥ १० ॥

यत्रैकाग्रता तत्राविशेषात् । ४ । १ । ११ ॥

एकाग्रतातिरिक्तदेशकालविशेषाश्रवणादेकाग्रतानुकूलो यो देशः

१. बृ. ६-५-६ ॥—२. निश्चलत्वं ह्यपेक्ष्य. पा ॥—३. छा. ७-६-१ ॥—४. गी. ६-११-१२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कालश्च, स एवोपासनस्य देशः कालश्च । [१]"समे शुचौ शर्करावह्नि-वालुकाविवर्जिते" इति वचनमेकाग्रतैकान्तदेशमाह ; न तु देशं नियच्छति, [१]"मनोऽनुकूले" इति वाक्यशेषात् ॥ ११ ॥

इति श्रीशारीरकमीमांसाभाष्ये आसीनाधिकरणम् ॥ ५ ॥

वेदान्तसारे—आसीनस्सम्भवात् ॥ आसीन उपासनं कुर्यात्, तस्यैवैकाग्र्यसम्भवात् ॥ ७ ॥

ध्यानाच्च ॥ २"निदिध्यासितव्यः"इत्युपासनस्य ध्यानरूपत्वाच्चासीनः॥

अचलत्वं चापेक्ष्य ॥ पृथिव्यादेरचलत्वं चापेक्ष्य ३"ध्यायतीव पृथिवी" इति प्रयोगात् मनसो निश्चलत्वमासीनस्यैव ॥ ९ ॥

स्मरन्ति च ॥ ४" उपविश्याऽसने युञ्जयात्" इत्यादिना ॥ १० ॥

यत्रैकाग्रता तत्राविशेषात् ॥ यत्रैकाग्रता, तत्र देशे तत्र काले उपासीतेति देशकालविशेषाश्रवणात् ॥ ११ ॥

इति वेदान्तसारे आसीनाधिकरणम् ॥ ५ ॥

वेदान्तदीपे—आसीनस्सम्भवात्॥ किमिदं ब्रह्मोपासनमासीनः कुर्यात्, उतासीनश्शयानस्तिष्ठन्वाच्छन्वेत्यनियमः इति संशयः । विशेषाश्रवणादनियमः इति पूर्वः पक्षः । राद्धान्तस्तु—आसीनस्यैवैकाग्रतासम्भवात्, एकाग्रतामूलत्वाच्चोपासनस्य, आसीनः कुर्यात् । सूत्रमपि व्याख्यातम् ॥ ७ ॥

ध्यानाच्च ॥ २"निदिध्यासितव्यः" इत्युपासनस्य ध्यानरूपत्वाच्चैकाग्रचित्ततासवश्यम्भाविनी । ध्यानं हि विजातीयप्रत्ययान्तराव्यवहितं तैलधारावदविच्छिन्नस्मृतिसन्ततिरूपम् ॥ ८ ॥

अचलत्वं चापेक्ष्य ॥ निश्चलत्वं चापेक्ष्य ध्यानवाचोयुक्तिः पृथिव्यादिषु दृश्यते ३"ध्यायतीव पृथिवी, ध्यायतीवान्तरिक्षं ध्यायतीव द्यौः" इत्यादिका । अतो ध्यायतः पृथिव्यादिवदचलत्वमासीनस्यैव सम्भवति ॥ ९ ॥

स्मरन्ति च ॥ स्मरन्तिचासीनस्यैव ध्यानम् ४" उपविश्याऽसने युञ्जयाद्यो-

---

१ ॥—२. बृ. ६-५-६ ॥—३. छा. ७-६-१ ॥—४. गी. ६-१२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गमात्मविशुद्धये" इति ॥ १० ॥

यत्रैकाग्रता तत्राविशेषात् ॥ यस्मिन्देशे यस्मिंश्च काले मनस एकाग्रता; तत्र देशे काले चोपासनं कार्यम्; १"शर्करादिरहिते मनोनुकूले शुचौ देशे" इत्येतदतिरिक्तविशेषाग्रहणात्। यथा देशकालयोरेकाग्रतायामविशेषः, न तथा स्थितिगत्यादौ; आसीनस्य तु विशेषोऽस्तीत्यभिप्रायः ॥ ११ ॥

इति वेदान्तदीपे आसीनाधिकरणम् ॥ ५ ॥

(श्रीशारीरकमीमांसाभाष्ये आप्रयाणाधिकरणम् ॥ ६ ॥)

आप्रयाणात्तत्रापि हि दृष्टम् । ४ । १ । १२ ॥

तदिदमपवर्गसाधनमुक्तलक्षणमुपासनमेकाह एव संपाद्यम्, उताप्रयाणात्प्रत्यहमनुवर्तनीयमिति विशये-एकस्मिन्नेवाहनि शास्त्रार्थस्य कृतत्वात्तावतैव परिसमापनीयम्—

(सिद्धान्तः)

इति प्राप्ते उच्यते—आप्रयाणात्—इति। आमरणादनुवर्तनीयम्; कुतः? तत्रापि हि दृष्टम्-उपासनोद्योगप्रभृत्याप्रयाणान्मध्ये यः कालः, तत्र सर्वत्रापि दृष्टमुपासनं २"स खल्वेवं वर्तयन्यावदायुषं ब्रह्मलोकमभिसम्पद्यते" इति ॥ १२ ॥

इति श्रीशारीरकमीमांसाभाष्ये आप्रयाणाधिकरणम् ॥ ६ ॥

वेदान्तसारे— आप्रयाणात्तत्रापि हि दृष्टम्॥ आप्रयाणादहरहरुपासनं कार्यम्, २"स खल्वेवं वर्तयन्यावदायुषम्" इति दर्शनात् ॥ १२ ॥

इति वेदान्तसारे आप्रयाणाधिकरणम् ॥ ६ ॥

वेदान्तदीपे—आप्रयाणात्तत्रापि हि दृष्टम्॥ तदिदमपवर्गसाधनमु-

---

१ ॥—२. छा. ८-१५-१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पासनमेकस्मिन्नहनि कार्यम्, उत प्रत्यहमाप्रयाणादनुवर्तिनीयमिति संशयः। एकस्मिन्नेवाहनि शास्त्रार्थस्य कृतत्वात्तावतैव परिसमापनीयम्। १"यावदायुषम्" इति तु वचनं विधिशब्दस्याभावाद्विद्यायाः फलेनोपसंहारपरमिति पूर्वः पक्षः। राद्धान्तस्तु—आ प्रयाणात् अनुवर्तनीयम्; कुतः? तत्रापि हि दृष्टं १"स खल्वेवं वर्तयन्यावदायुषं ब्रह्मलोकमभिसम्पद्यते" इति। अप्राप्तत्वेनानुवादत्वासम्भवाद्विधिरेवायमिति ॥ १२ ॥

इति वेदान्तदीपे आप्रयाणाधिकरणम् ॥ ६ ॥

(श्रीशारीरकमीमांसाभाष्ये तदधिगमाधिकरणम् ॥ ७ ॥)

तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् ।४ । १ । १३ ॥

एवं विद्यास्वरूपं विशोध्य विद्याफलं चिन्तयितुमारभते; ब्रह्मविद्याप्राप्तौ पुरुषस्योत्तरपूर्वाघयोरश्लेषविनाशौ श्रूयेते २"तद्यथा पुष्करपलाश आपो न श्लिष्यन्ते एवमेवंविदि पापं कर्म न श्लिष्यते" ३"तस्यैवाऽत्मा पदवित्तं विदित्वा न कर्मणा लिप्यते पापकेन" इत्युत्तराघाश्लेषः, ४"तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयन्ते" ५"क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे" इति पूर्वाघविनाशः। एतावश्लेषविनाशौ विद्याफलभूतावुपपद्येते, नेति संशयः। किं युक्तम्? नोपपद्येते इति। कुतः? ६"नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि" इत्यादिशास्त्रविरोधात्। अश्लेषविनाशव्यपदेशस्तु मोक्षसाधनभूतविद्याविधायिवाक्यशेषगतः कथञ्चिद्विद्यास्तुतिप्रतिपादनेनाप्युपपद्यते। न च विद्या पूर्वोत्तराघयोः प्रायश्चित्ततया विधीयते; येन प्रायश्चि-

१. छा. ८-१५-१ ॥—२. छा. ४-१४-३ ॥—३. ॥—४. छा. ५-२४-३ ॥—५. मु. २-२-८ ॥—६. ब्रह्मवैवर्ते, प्रकृतिखण्डे. २६-अ. ७०-श्लो ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्तेनाघविनाश उच्यते। विद्या हि १"ब्रह्मविदाप्नोति परम्" २"ब्रह्म वेद ब्रह्मैव भवति" इति ब्रह्मप्राप्त्युपायतया विधीयते। अतो विद्यार्थवादोऽयमघविनाशाश्लेषव्यपदेश इति ॥

(सिद्धान्तः)

एवं प्राप्तेऽभिधीयते—तदधिगमे—इति। विद्याप्राप्तौ पुरुषस्य विद्यामाहात्म्यादुत्तरपूर्वाघयोरश्लेषविनाशावुपपद्येते; कुतः? एवंविधं हि विद्यामाहात्म्यमवगम्यते ३"एवंविदि पापं कर्म न श्लिष्यते" ४"एवं ह्यस्य सर्वे पाप्मानः प्रदूयन्ते" इत्यादिव्यपदेशात्। न च ५"नाभुक्तं क्षीयते कर्म" इत्यनेन शास्त्रेणास्य विरोधः, भिन्नविषयत्वात्। तद्धि कर्मणां फलजननसामर्थ्यदृढिमविषयम्; एतच्चूत्पन्नाया विद्यायाः प्राक्कृतानां पाप्मनां फलजननशक्तिविनाशसामर्थ्यमुत्पत्स्यमानानां च फलजननशक्त्युत्पत्तिप्रतिबन्धकरणसामर्थ्यं च प्रतिपादयतीति द्वयोर्विषयो भिद्यते। यथा अग्निजलयोरौष्ण्यतन्निवारणसामर्थ्यविषययोर्द्वयोः प्रमाणयोरपि विषयभेदात्प्रामाण्यम्; एवमत्रापीति न कश्चिद्विरोधः। अघस्याश्लेषकरणं - वैदिककर्मायोग्यतावासनाप्रत्यवायहेतुशक्त्युत्पत्तिप्रतिबन्धकरणम्। अघानि हि कृतानि पुरुषस्य वैदिककर्मायोग्यतां, सजातीयकर्मान्तरारम्भरुचिं, प्रत्यवायं च कुर्वन्ति। अघस्य विनाशकरणम्—उत्पन्नायास्तच्छक्तेर्विनाशकरणम्। शक्तिरपि परमपुरुषाप्रीतिरेव। तदेवं विद्या वेदितुर्वेद्यात्यर्थप्रियत्वेन स्वयमपि निरतिशयप्रिया सती वेद्यभूतपरमपुरुषाराधनस्वरूपा पूर्वकृताघसञ्चयजनितपरमपुरुषाप्रीतिंविनाशयतिः सैव विद्या स्वोत्पत्युत्तरकालभाव्यघनिमित्तपरमपुरुषाप्रीत्युत्पत्तिं च प्रतिबध्नाति। तदिदमश्लेषवचनं प्रामादिकविषयं मन्तव्यम्; ६"नाविरतो दुश्चरितात्" इत्यादिभिश्शास्त्रैराप्रयाणादहरहरुत्पद्यमानाया

१. तै. आन. १-१ ॥—२. मु. ३-२-९ ॥— ३. छा. ४-१४-३ ॥ —४. छा. ५-२४-३ ॥—५. ब्रह्मवैवर्ते. प्रकृतिखण्डे. २६-७० ॥—६. कठ. २-२४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उत्तरोत्तरातिशयभागिन्याः विद्यायाः दुश्चरितविरतिनिष्पाद्यत्वावगमात्॥

इति श्रीशारीरकमीमांसाभाष्ये तदधिगमाधिकरणम् ॥ ७ ॥

वेदान्तसारे—तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात्॥

उपासने प्रारब्धे तत्सामर्थ्यादेव पूर्वकृताघनाशः, उत्तराघाश्लेषश्च भवति, १ "एवं ह्यस्य सर्वे पाप्मानः प्रदूयन्ते" २ "एवमेवंविदि पापं कर्म न श्लिष्यते" इति श्रुतेः ॥ १३ ॥

इति वेदान्तसारे तदधिगमाधिकरणम् ॥ ७ ॥

वेदान्तदीपे—तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात्॥

विदुष उत्तरपूर्वाघयोरश्लेषविनाशौ किं सम्भवतः, उत नेति संशयः। ३ "नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि" इति भोगादेव कर्मक्षयश्रवणादश्लेषविनाशश्रुतिः कथञ्चिद्विद्यास्तुत्यर्थतया नेयेति पूर्वः पक्षः। राद्धान्तस्तु—द्वयोरप्येशास्त्रयोर्भिन्नविषयत्वेन विरोधाभावात्सम्भवत एव ; कर्मणां फलजननसामर्थ्यं द्रढयति ३ "नाभुक्तं क्षीयते" इति ; २ "एवमेवंविदि पापं कर्म न श्लिष्यते" १ "एवं ह्यस्य सर्वे पाप्मानः प्रदूयन्ते" इति च श्रुतिर्विद्यायास्तत्सामर्थ्यनिवारणशक्तिविषयेऽति ; यथा अग्नेर्जसोऽशीतजननतन्निवारणशक्तिविषये प्रमाणे विरुध्येते। इति सूत्रमपि व्याख्यातम् ॥ १३ ॥

इति वेदान्तदीपे तदधिगमाधिकरणम् ॥ ७ ॥

(श्रीशारीरकमीमांसाभाष्ये इतराधिकरणम् ॥ ८ ॥)

इतरस्याप्येवमसंश्लेषः पाते तु। ४। १। १४॥

उत्तरपूर्वाघयोर्विद्यया अश्लेषविनाशावुक्तौ ; इतरस्य-पुण्यस्यापि, एवम्—उक्तेन न्यायेनाश्लेषविनाशौ विद्यया स्याताम्, विद्याफलविरोधित्वसामान्याद्व्यपदेशाच्च। भवति च व्यपदेशः—उभे सुकृतदुष्कृते निर्दि-

१. छा. ५-२४-३ ॥—२. छा. ४-१४-३ ॥—३. ब्रह्मवैवर्ते. प्रकृतिखण्डे. २६-७० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्य [1]"सर्वे पाप्मानोऽतो निवर्तन्ते" इति, [2]"तत्सुकृतदुष्कृते धूनुते" इतिच । मुमुक्षोरनिष्टफलत्वात्सुकृतस्यापि पाप्मशब्देन व्यपदेशः । सुकृतस्यापि शास्त्रीयत्वात्तत्फलस्य केषांचिदिष्टत्वदर्शनाच्च विद्याया अविरोधशङ्कां निवर्तयितुमतिदेशः। ननु विदुषोऽपि सेतिकर्तव्यताकोपासननिर्वृत्तये वृष्ट्यन्नादिफलानीष्टान्येव; कथं तेषां विरोधाद्विनाश उच्यते; तत्राह —पाते तु-इति । शरीरपाते तु तेषां विनाशः; शरीरपातादूर्ध्वं तु विद्यानुगुणदृष्टफलानि सुकृतानि नश्यन्तीत्यर्थः ॥ १४ ॥

इति श्रीशारीरकमीमांसाभाष्ये इतराधिकरणम् ॥ ८ ॥

वेदान्तसारे—इतरस्याप्येवमसंश्लेषः पाते तु ॥ विदुषः पुण्यस्यापि मोक्षविरोधित्वेनानिष्टफलत्वसाम्यादेवमश्लेषविनाशौ । वृष्ट्यन्नायुरारोग्यादिविद्यानुगुणफलस्य कर्मणः शरीरपातादूर्ध्वमफलत्वम् ॥ १४ ॥

इति वेदान्तसारे इतराधिकरणम् ॥ ८ ॥

वेदान्तदीपे—इतरस्याप्येवमसंश्लेषः पाते तु ॥ किमसंश्लेषविनाशौ पुण्यकर्मणोऽपि समानौ? उत नेति संशयः । पुण्यकर्मफलस्य सुखरूपत्वेन विदुषोऽनिष्टत्वाभावान्न समानाविति पूर्वः पक्षः। राद्धान्तस्तु—मुमुक्षोर्मोक्षविरोधित्वेनानिष्टत्वसाम्यादश्लेषविनाशौ समानावेव । सूत्रार्थस्तु—इतरस्य पुण्यस्याप्यनिष्टफलत्वसाम्यादेवम् अश्लेषविनाशौ ; विद्यानुगुणस्य तु वृष्ट्यन्नारोग्यादिफलस्य शरीरपातादूर्ध्वमनिष्टत्वादश्लेषः ॥ १४ ॥

इति वेदान्तदीपे इतराधिकरणम् ॥ ८ ॥

(श्रीशारीरकमीमांसाभाष्ये अनारब्धकार्याधिकरणम्॥३॥)

अनारब्धकार्ये एव तु पूर्वे तदवधेः। ४। १।१५॥

ब्रह्मविद्योत्पत्तेः पूर्वोत्तरभाविनोस्सुकृतदुष्कृतयोरश्लेषविनाशावु-

---

१. छा. ८-४-१ ॥—२. कौषी. १-४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

क्तौ; ततः पूर्वभाविनोः सुकृतदुष्कृतयोः किमविशेषेण विनाशः, उतानारब्धकार्ययोरेवेति विशये [१]"सर्वे पाप्मानः प्रदूयन्ते" इति विद्याफलस्याविशेषश्रवणाद्विद्योत्पत्त्युत्तरकालभाविन्याश्च शरीरस्थितेः कुलालचक्रभ्रमणादिवत्संस्कारवशादप्युपपत्तेरविशेषेण—

(सिद्धान्तः)

इति प्राप्ते उच्यते—अनारब्धकार्ये एव तु पूर्वे—इति। विद्योत्पत्तेः पूर्वे सुकृतदुष्कृते अनारब्धकार्ये—अप्रवृत्तफले एव विद्यया विनश्यतः; कुतः? तदवधेः—[२]"तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ सम्पत्स्ये" इति शरीरपातविलम्बावधिश्रुतेः। न च पुण्यापुण्यकर्मजन्यभगवत्प्रीत्यप्रीतिव्यतिरेकेण शरीरस्थितिहेतुभूतसंस्कारसद्भावे प्रमाणमस्ति॥ १५॥

इति श्रीशारीरकमीमांसाभाष्ये अनारब्धकार्याधिकरणम्॥ ९॥

वेदान्तसारे—अनारब्धकार्ये एव तु पूर्वे तदवधेः॥ विद्याधिगतेः पूर्वकृते पुण्यपापे फलदानायाप्रवृत्ते एव विनश्यतः; [२]"तस्य तावदेवचिरम्" इति शरीरपातावधिश्रुतेः॥ १५॥

इति वेदान्तसारे अनारब्धकार्याधिकरणम्॥ ९॥

वेदान्तदीपे—अनारब्धकार्ये एव तु पूर्वे तदवधेः॥ विद्योत्पत्तेः पूर्वकृतयोः पुण्यपापयोरविशेषेण विनाशः, उतानारब्धकार्ययोरेवेति संशयः। [१]"सर्वे पाप्मानः प्रदूयन्ते" इति विशेषाभावादविशेषेणेति पूर्वः पक्षः। राद्धान्तस्तु—[२]"तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ सम्पत्स्ये"इत्युत्पन्नविद्यस्यापि शरीरमोक्षावधित्वश्रुतेः, सर्वविनाशे शरीरस्थित्यनुपपत्तेश्चानारब्धकार्ययोरेव विनाशः। सूत्रं च व्याख्यातम्॥ १५॥

इति वेदान्तदीपे अनारब्धकार्याधिकरणम्॥ ९॥

---

१. छा. ५-२४-३॥ २. छा. ६-१४-२॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् ।४।१।१६

'इतरस्याप्येवमसंश्लेषः'इति विद्याबलात्सुकृतस्याप्यसंश्लेष उक्तः, अग्निहोत्रादीनां नित्यनैमित्तिकानां स्वाश्रमधर्माणामपि सुकृतत्वसामान्येन तत्फलस्याश्लेषादनिच्छतोऽननुष्ठाने प्राप्त उच्यते—

(सिद्धान्तः)

अग्निहोत्रादि तु—इति । तुशब्दस्सुकृतान्तरेभ्यो विशेषणार्थः; अग्निहोत्राद्याश्रमधर्माः फलाश्लेषासम्भवादनुष्ठेया एव ; तदसम्भवश्च तत्कार्यार्थत्वात्तेषाम् ; विद्याख्यकार्यायैव हि विदुषोऽग्निहोत्राद्यनुष्ठानम् ; कथमिदमवगम्यते ? तद्दर्शनात् ; दृश्यते हि[1]"तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन" इत्यादिनाऽग्निहोत्रादीनां विद्यासाधनत्वम् । विद्यायाश्चाप्रयाणादभ्यासाधेयातिशयाया अहरहरुत्पाद्यत्वात्तदुत्पत्त्यर्थमाश्रमकर्माप्यहरहरनुष्ठेयमेव ; अन्यथाऽऽश्रमकर्मलोपे दूषितान्तःकरणस्य विद्योत्पत्तिरेव न स्यात् ॥ १६ ॥

यदि अग्निहोत्रादिसाधुकृत्या विद्योत्पत्त्यर्थाः, विद्योत्पत्तेः प्राचीनं च सुकृतं [2]"यावत्सम्पातमुषित्वा" [3]"प्राप्यान्तं कर्मणः" इत्यनुभवेन विनष्टम् ; भुक्तशिष्टं च प्रारब्धफलम् ; "सुहृदस्साधुकृत्याम्" इत्यस्य को विषयः ? तत्राह—

अतोऽन्यापि ह्येकेषामुभयोः । ४ । १ । १७ ॥

अतः—अग्निहोत्रादिसाधुकृत्यायाः विद्योत्पत्त्यर्थायाः अन्यापि-विद्याधिगमात्पूर्वोत्तरयोरुभयोरपि पुण्यकर्मणोः प्रबलकर्मप्रतिबद्धफलासाधुकृत्याऽनन्ता सम्भवत्येव ; तद्विषयमिदमेकेषां शाखिनां वचनं

१. बृ-६-४-२२ ॥—२. छा, ५-१०-५ ॥—३. बृ. ६-४-६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

[1]"तस्य पुत्रा दायमुपयन्ति सुहृदस्साधुकृत्याम्" इति । विद्ययाऽश्लेषविनाशश्रुतिश्च तद्विषया ॥ १७ ॥

अनुष्ठितस्यापि कर्मणः फलप्रतिबन्धसम्भवं पूर्वोक्तं स्मारयति—

यदेव विद्ययेति हि । ४ । १ । १८ ॥

[2]"यदेव विद्यया करोति तदेव वीर्यवत्तरम्" इत्युद्गीथविद्यायाः क्रतुफलाप्रतिबन्धफलत्ववचनेनानुष्ठितस्यापि कर्मणः फलप्रतिबन्धस्सूच्यते हि । अतो विदुषोऽनुष्ठितप्रतिबद्धफलविषयं [1]"सुहृदस्साधुकृत्याम्" इति शाट्यायनकम् ॥ १८ ॥

इति श्रीशारीरकमीमांसाभाष्ये अग्निहोत्राद्यधिकरणम् ॥ १० ॥

वेदान्तसारे—अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् ॥ अग्निहोत्राख्यामकर्म, विद्योत्पत्त्याख्यकार्यायैव आप्रयाणादनुष्ठेयं [3]"तमेतं वेदानुवचनेन" इत्यादिना विद्योत्पत्तिकार्यत्वं ह्याश्रमधर्मस्य दृष्टम् ॥ १६ ॥

अतोऽन्यापि ह्येकेषामुभयोः ॥ [1]"तस्य पुत्रा दायमुपयन्ति" [1]"द्विषन्तः पापकृत्यां सुहृदस्साधुकृत्याम्" इत्यादिवचनस्याग्निहोत्रादेरन्याप्यनादिकालप्रवृत्ता साधुकृत्या प्रबलकर्मप्रतिबद्धफला, उत्तरा वृष्ट्यन्नादिविद्यानुगुणफला प्रतिबद्धा चेति पूर्वोत्तरकृतयोरुभयोरप्यस्त्येव विषयः ॥ १७ ॥

यदेव विद्ययेति हि ॥ [2]"यदेव विद्यया" इत्यत्र फलप्रतिबन्धोऽस्तीति ह्युक्तम् ॥ १८ ॥

इति वेदान्तसारे अग्निहोत्राद्यधिकरणम् ॥ १० ॥

वेदान्तदीपे—अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात्॥ अग्निहोत्राद्याश्रमधर्मः किं विदुषोऽनुष्ठेयः, उत नेति संशयः । सुकृतदुष्कृतयोरश्लेषविनाशाभिधानादाश्रमधर्मस्यापि सुकृतत्वसाम्येन कार्याश्लेषादननुष्ठेय इति पूर्वः पक्षः।राद्धान्तस्तु—आश्रमधर्मस्य तु विद्योत्पत्तिरेव कार्यमिति तत्कार्यायैवा-

१ ॥—२. छा. १-१-१० ॥—३. बृ. ६-४-२२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नुष्ठेयः। दृश्यते हि—१"तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति" इत्यादिना विद्योत्पत्तिकार्यत्वम्। विद्या चाप्रयाणादहरहरभ्यासाधेयातिशयोत्पाद्यैव। सूत्रं च व्याख्यातम् ॥ १६ ॥

यद्यग्निहोत्रादिसाधुकृत्या विद्योत्पत्त्यर्था; पूर्वकृता च साधुकृत्या अनुभूतफला प्रारब्धफलाच;२"सुहृदस्साधुकृत्याम्" इत्यस्य विषयः क इत्याशङ्क्याह—

अतोऽन्यापि ह्येकेषामुभयोः ॥ अतः-अग्निहोत्रादिसाधुकृत्यायाः अन्याऽपि विद्याधिगमात् पूर्ववोत्तरयोः पुण्यकर्मणोरुभयोश्च कारीर्यादिका वृष्टयन्नाद्यर्थतया विदुषाऽनुष्ठिता, विद्योत्पत्तेः पूर्वं कृताऽनादिकालप्रवृत्ता च प्रबलकर्मान्तरप्रतिबद्धफला, साधुकृत्याऽस्तिहि; अत एकेषां शाखिनां २"सुहृदस्साधुकृत्याम्" इति वचनं तद्विषयम्; विद्ययाऽश्लेषविनाशश्रुतिश्च तद्विषया ॥ १७ ॥

अनुष्ठितस्य कर्मणः प्रबलकर्मप्रतिबन्धसम्भवं पूर्वोक्तं स्मारयति—

यदेव विद्ययेति हि ॥ उक्तं ह्यद्वीथविद्यायाः क्रतोः कर्मान्तरप्रतिबन्धाभावः फलमिति; अतः प्रतिबद्धफलसाधुकृत्यस्यैव सुहृत्सङ्क्रमणम् ॥ १८ ॥

इति वेदान्तदीपे अग्निहोत्राद्यधिकरणम् ॥ १० ॥

(श्रीशारीरकमीमांसाभाष्ये इतरक्षपणाधिकरणम् ॥)

भोगेन त्वितरे क्षपयित्वाऽथ संपद्यते। ४।१। १९॥

ययोः पुण्यपापयोरश्लेषविनाशावुक्तौ, ताभ्यामितरे आरब्धकार्ये पुण्यपापे किं विद्यायोनिशरीरावसाने, उत तच्छरीरावसाने शरीरान्तरावसाने वेत्यनियम इति संशये ३"तस्य तावदेव चिरं यावन्न विमोक्ष्ये" इति तच्छरीरविमोक्षावसानत्वश्रवणात्तदवसाने—

(सिद्धान्तः)

इति प्राप्त उच्यते—भोगेन तु-इति। तुशब्दः पक्षव्यावृत्त्यर्थः; इतरे

---

१. बृ. ६-४-२२ ॥—२. ॥—३. छा. ६-१४-२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आरब्धकार्ये पुण्यपापे स्वारब्धफलभोगेन क्षपयित्वा तत्फलभोगसमाप्त्यनन्तरं ब्रह्म सम्पद्यते ; ते च पुण्यपापे एकशरीरोपभोग्यफले चेत्—तच्छरीरावसाने सम्पद्यते; अनेकशरीरभोग्यफले चेत्—तदवसाने सम्पद्यते, भोगेनैव क्षपयितव्यत्वादारब्धफलयोः कर्मणोः । [१]"तस्य तावदेव चिरं यावन्न विमोक्ष्ये" इति च भोगेन तयोः कर्मणोः विमोक्ष उच्यते, देहावधिनियमाश्रवणात् । तदेवं ब्रह्मविद्यायाः प्रागनुष्ठितमभुक्तफलमनारब्धफलं पुण्यपापरूपं कर्मानादिकालसंचितमनन्तं विद्यामाहात्म्याद्विनश्यति; विद्यारम्भोत्तरकालमनुष्ठितं च न श्लिष्यति ; तत्र पुण्यरूपं सर्वे विदुषस्सुहृदो गृह्णन्ति, पापं च द्विषन्त इति निरवद्यम् ॥ १९ ॥

इति श्रीशारीरकमीमांसाभाष्ये इतरक्षपणाधिकरणम् ॥ ११ ॥

इति श्रीभगवद्रामानुजविरचिते शारीरकमीमांसाभाष्ये चतुर्थस्याध्यायस्य प्रथमः पादः ॥ १ ॥

वेदान्तसारे—भोगेन त्वितरे क्षपयित्वाऽथ सम्पद्यते ॥ आरब्धकार्ययोः पुण्यपापयोर्यत्फलम्, तत् एकशरीरावसानमनेकशरीरावसानं वा भुक्त्वैव तदनन्तरं ब्रह्म प्राप्नोति ॥ १९ ॥

इति वेदान्तसारे इतरक्षपणाधिकरणम् ॥ ११ ॥

इति श्रीभगवद्रामानुजविरविरचिते वेदान्तसारे चतुर्थस्याध्यायस्य प्रथमः पादः ॥ १ ॥

वेदान्तदीपे—भोगेन त्वितरे क्षपयित्वाऽथ सम्पद्यते ॥ इतरे आरब्धकार्ये पुण्यपापे, किं विद्यायोनिशरीरावसान एव विनश्येते, उत तच्छरीरावसाने शरीरान्तरावसाने वेत्यनियम इति संशयः । [१]"यावन्न विमोक्ष्ये

१. छा. ६-१४-२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ सम्पत्स्ये' इति सम्पत्तेश्शरीरविमोक्षविलम्बमात्रश्रुतेः तच्छरीरावसान इति पूर्वः पक्षः । राद्धान्तस्तु—प्रारब्धफलयोः कर्मणोः भोगेनैव क्षपयितव्यत्वाभिप्रायेण १"यावन्न विमोक्ष्ये अथ सम्पत्स्ये" इत्युच्यते, न शरीरमात्रम्-कर्मविषयौ हि बन्धमोक्षौ ; अतः प्रारब्धफले पुण्यपापे यावता शरीरेण समापनीये, तावता क्षपयित्वा अथ सम्पत्स्ये इत्यनियम एव । सूत्रं च व्याख्यातम् ॥ १९ ॥

इति वेदान्तदीपे इतरक्षपणाधिकरणम् ॥ ११ ॥

इति श्रीभगवद्रामानुजविरचिते श्रीवेदान्तदीपे चतुर्थस्याध्यायस्य प्रथमः पादः ॥ १ ॥

---

१. छा. ६-१४-२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीमते रामानुजाय नमः

श्रीभगवद्रामानुजविरचिते

श्रीशारीरकमीमांसाभाष्ये

चतुर्थाध्याये - द्वितीयः पादः - वागधिकरणम् ॥ १ ॥

वाङ्मनसि दर्शनाच्छब्दाच्च ।४।२।१॥

इदानीं विदुषो गतिप्रकारं चिन्तयितुमारभते । प्रथमं तावदुत्क्रान्तिश्चिन्त्यते । तत्रेदमाम्नायते [१]"अस्य सोम्य पुरुषस्य प्रयतो वाङ्मनसि सम्पद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायाम्" इति । अत्र [१]"वाङ्मनसि सम्पद्यते" इति वाचो मनसि सम्पत्तिश्रुतिः किं वाग्वृत्तिमात्रविषया, उत वाग्विषयेति विशयेः वृत्तिमात्रविषयेति युक्तम् । कुतः? मनसो वाक्प्रकृतित्वाभावात्तत्र वाक्स्वरूपसम्पत्त्यसम्भवात् । वागादिवृत्तीनां मनोधीनत्वेन वृत्तिसम्पत्तिश्रुतिः कथंचिदुपपद्यत इति ॥

एवं प्राप्तेऽभिधीयते– वाङ्मनसि–इति । वाक्स्वरूपमेव मनसि सम्पद्यते । कुतः? दर्शनात्–दृश्यते हि वागिन्द्रिय उपरतेऽपि मनःप्रवृत्तिः । वृत्तिमात्रसम्पत्त्यापि तदुपपद्यत इति चेत्–तत्राह—शब्दाच्चेति।[१]"वाङ्मनसि सम्पद्यते"इति वाक्स्वरूपसम्पत्तावेव हि शब्दः;न वृत्तिमात्रसम्पत्तौ। नहि तदानीं वृत्त्युपरमे वागिन्द्रियं प्रमाणान्तरेणोपलभ्यते; येन वृत्तिमात्रमेव सम्पद्यत इत्युच्येत । यदुक्तं मनसो वाक्प्रकृतित्वाभावाद्वाचो मन-

१. छा. ६-८-६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सि सम्पत्तिर्नोपपद्यत इति; तत् [१] "वाङ्मनसि सम्पद्यते" इति वचनान्मनसा वाक्संयुज्यते; नतु तत्र लीयत इति परिहर्तव्यम् ॥ १ ॥

अत एव सर्वाण्यनु । ४ । २ । २॥

यतो वाचो मनसा संयोगमात्रं सम्पत्तिः; न तु लयः; अत एव वाचमनु सर्वेषामिन्द्रियाणां मनसि सम्पत्तिश्रुतिरुपपद्यते, [२]"तस्मादुपशान्ततेजा अपुनर्भवमिन्द्रियैर्मनसि सम्पद्यमानैः" इति ॥ २ ॥

इति श्रीशारीरकमीमांसाभाष्ये वागधिकरणम् ॥ १ ॥

वेदान्तसारे—वाङ्मनसि दर्शनाच्छब्दाच्च॥ १"अस्य सोम्य पुरुषस्य प्रयतो वाङ्मनसि सम्पद्यते" इति शब्दात्; उत्क्रान्तौ मनसः प्रागेव वाच उपरतिदर्शनाच्च वाङ्मनसि [३]संपद्यते ॥ १ ॥

अत एव सर्वाण्यनु ॥ अतः[४]"इन्द्रियैर्मनसि सम्पद्यमानैः" इति शब्दात्, उपरतिदर्शनाच्च, वाचमनु सर्वाणीन्द्रियाणि मनसि च संयुज्यन्ते॥ २॥

इति वेदान्तसारे वागधिकरणम् ॥ १ ॥

वेदान्तदीपे—वाङ्मनसि दर्शनाच्छब्दाच्च ॥ १"अस्य सोम्य पुरुषस्य प्रयतो वाङ्मनसि सम्पद्यते मनः प्राणे" इत्यादिकोत्क्रान्तिविषयाऽऽम्नायते; तत्र किं वागिन्द्रियं मनसि सम्पद्यते, उत वाग्वृत्तिमात्रमिति संशयः। वाचो मनःप्रकृतित्वाभावात् स्वरूपलयस्तत्र न संभवतीति वाग्वृत्तिमात्राभिप्रायमिति पूर्वः पक्षः। राद्धान्तस्तु—अकारणे सम्पत्त्यभावस्य वाग्वृत्तावपि तुल्यत्वदर्शनात् १" वाङ्मनसि " इति वाक्स्वरूपस्यैव सम्पत्तिः। शब्दाच्च स्वरूपमेव सम्पद्यते १"वाङ्मनसि सम्पद्यते" इति वाक्स्वरूपसम्पत्तावेव हि शब्दः; न वृत्तिमात्रसम्पत्तौ। अकारणे लयाभावात्सम्पत्तिशब्दस्संयोगाभिप्रायः। सूत्रं च व्याख्यातम् ॥ १ ॥

अत एव सर्वाण्यनु ॥ यतो वाचो मनसि संयोगमात्रमुच्यते; न तु लयः; अत एव तदानीं "[५]सर्वाणीन्द्रियाणि वाचमनु मनसि सम्पद्यन्ते"

---

१. छा. ६-८-६ ॥—२ ॥—३. संपद्यते-युज्यते इति क्वचित्पाठः ॥—४ ॥— ५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति वचनं १"वाङ्मनसि सम्पद्यते" इति वचनवदुपपन्नम्, २"तस्मादुपशान्ततेजा अपुनर्भवमिन्द्रियैर्मनसि सम्पद्यमानैः" इति ॥ २ ॥

इति वेदान्तदीपे वागधिकरणम् ॥ १ ॥

(श्रीशारीरकमीमांसाभाष्ये मनोधिकरणम् ॥ २ ॥)

तन्मनः प्राण उत्तरात् । ४ । २ । ३ ॥

तत्—सर्वेन्द्रियसंयुक्तं मनः प्राणे सम्पद्यते—प्राणेन संयुज्यते; न मनोवृत्तिमात्रम् । कुतः? उत्तरात्—१"मनः प्राणे" इति वाक्यात् ।

अधिकाशङ्का तु—४"अन्नमयं हि सोम्य मनः" इति वचनान्मनसोऽन्नप्रकृतित्वमवगम्यते; अन्नस्य च ३"ता अन्नमसृजन्त" इत्यम्मयत्वं सिद्धम्, ३"आपोमयः प्राणः" इति चाप्प्रकृतित्वं प्राणस्यावगम्यते, अतो मनः प्राणे सम्पद्यत इत्यत्र प्राणशब्देन प्राणप्रकृतिभूता अपो निर्दिश्य तासु मनस्सम्पत्तिप्रतिपादने परम्परया स्वकारणे लय इति सम्पत्तिवचनमुपपन्नं भवति—इति ॥

परिहारस्तु ३"अन्नमयं हि सोम्य मनः, आपोमयः प्राणः" इति मनःप्राणयोरन्नेनाद्भिश्चाप्यायनमुच्यते; न तत्प्रकृतित्वम्, आहङ्कारिकत्वान्मनसः, आकाशविकारत्वाच्च प्राणस्य । प्राणशब्देनापां लक्षणा च स्यात्—इति ॥ ३ ॥

इति श्रीशारीरकमीमांसाभाष्ये मनोधिकरणम् ॥ २ ॥

वेदान्तसारे—तन्मनः प्राण उत्तरात् ॥ उत्तरात् १"मनः प्राणे" इति शब्दात् सर्वेन्द्रिययुक्तं मनः प्राणे संयुज्यते ॥ ३ ॥

इति वेदान्तसारे मनोधिकरणम् ॥ २ ॥

---

१. छा. ६-८-६ ॥—२ ॥—३. छा. ६-६-५ ॥—४. छा. ६-२-४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वेदान्तदीपे—तन्मनः प्राण उत्तरात् ॥ १"मनः प्राणे" इत्यत्र किं प्राणशब्देनाप उच्यन्ते, उत प्राण एवेति संशयः । प्राणस्य मनःप्रकृतित्वाभावात् २"अन्नमयं हि सोम्य मनः" इति मनसोऽन्नमयत्वश्रवणात्, अपां चान्नप्रकृतित्वेन, तत्संपत्तिरुपपद्यत इति प्राणशब्देनाप उच्यन्त इति पूर्वः पक्षः; २"आपोमयः प्राणः" इति ह्यम्मयत्वात्प्राणस्य प्राणशब्देनापो वक्तुं युज्यन्ते—इति । राद्धान्तस्तु—२"अन्नमयं हि सोम्य मनः आपोमयः प्राणः" इति मनःप्राणयोर्न तत्तत्प्रकृतित्वमुच्यते; अपि तु तदाप्यायनम्, आहङ्कारिकत्वान्मनसः, प्राणस्य चाकाशप्रकृतित्वात् । अतः वाङ्मनसीतिवत् तदुत्तरात् १"मनः प्राणे" इति शब्दात्, तत् सर्वेन्द्रियसंयुक्तं मनः प्राणे संयुज्यते ॥ ३ ॥

इति वेदान्तदीपे मनोधिकरणम् ॥ २ ॥

श्रीशारीरकमीमांसाभाष्ये अध्यक्षाधिकरणम् ॥ ३ ॥

सोऽध्यक्षे तदुपगमादिभ्यः । ४ । २ । ४ ॥

यथा १"वाङ्मनसि सम्पद्यते, मनःप्राणे" इतिवचनानुरोधेन मनःप्राणयोरेव वाङ्मनसयोस्सम्पत्तिः; तथा १"प्राणस्तेजसि" इति वचनात्तेजस्येव प्राणस्सम्पद्यते—

सिद्धान्तः

इति प्राप्ते उच्यते—सोऽध्यक्षे—इति। सः-प्राणः, अध्यक्षे करणाधिपे जीवे सम्पद्यते । कुतः? तदुपगमादिभ्यः-प्राणस्य जीवोपगमस्तावच्छ्रूयते ३"एवमेवमात्मानमन्तकाले सर्वे प्राणा अभिसमायन्ति" इतिः तथा जीवेन सह प्राणस्योत्क्रान्तिः श्रूयते ४"तमुत्क्रामन्तं प्राणोऽनूत्क्रामति" इतिः प्रतिष्ठा च जीवेन सह श्रूयते ५"कस्मिन्नुत्क्रान्त उत्क्रान्तो भविष्यामि कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामि" इति । एवं जीवेन संयुज्य तेन

१. छा. ६-८-६ ॥—२. छा. ६-६-५ ॥—३. बृ. ६-३-३८ ॥—४. बृ. ६-४-२ ॥—५. प्रश्नो. ६-३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सह तेजस्सम्पत्तिरिह १"प्राणस्तेजसि" इत्युच्यते; यथा यमुनायाः गङ्गया संयुज्य सागरगमनेऽपि 'यमुना सागरं गच्छति' इति वचो न विरुध्यते, तद्वत् ॥ ४ ॥

इति श्रीशारीरकमीमांसाभाष्ये अध्यक्षाधिकरणम् ॥ ३ ॥

वेदान्तसारे—सोऽध्यक्षे तदुपगमादिभ्यः॥ सः-प्राणः अनन्तरं जीवेन संयुज्यते, २"एवमेवममात्मानमन्तकाले सर्वे प्राणा अभिसमायन्ति" इति प्राणस्य जीवोपगमादिश्रुतेः ॥ ४ ॥

इति वेदान्तसारे अध्यक्षाधिकरणम् ॥ ३ ॥

वेदान्तदीपे—सोऽध्यक्षे तदुपगमादिभ्यः॥ सः-प्राणः किं तेजसि संयुज्यते, उत जीव इति संशयः। १ "प्राणस्तेजसि" इति वचनात्तेजस्येवेति पूर्वः पक्षः। राद्धान्तस्तु—उत्क्रान्तौ प्राणस्य जीवोपगमादिश्रुतेः प्राणः करणाध्यक्षे जीवे संयुज्यते। एतदविरोधाय जीवे संयुज्य पश्चात्तेजस्संयोगं १"प्राणस्तेजसि" इति वदति। श्रूयन्ते हि प्राणस्य जीवोपगमादयः २ "एवमेवममात्मानमन्तकाले सर्वे प्राणा अभिसमायन्ति" ३"तमुत्क्रामन्तं प्राणोऽनूत्क्रामति" ४"कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामि" इत्यादिषु ॥ ४ ॥

इति वेदान्तदीपे अध्यक्षाधिकरणम् ॥ ३ ॥

श्रीशारीरकमीमांसाभाष्ये भूताधिकरणम् ॥ ४ ॥

भूतेषु तच्छ्रुतेः । ४ । २ । ५ ॥

१"प्राणस्तेजसि" इति जीवसंयुक्तस्य प्राणस्य तेजसि सम्पत्तिरुक्ता; सा सम्पत्तिः किं तेजोमात्रे, उत संहतेषु सर्वेषु भूतेष्विति विशये तेजोमात्रश्रवणात्तेजसि—

---

१. छा. ६-८-६ ॥—२. बृ. ६-३-३८ ॥ —३. बृ. ६-४-२ ॥—४. प्रश्नो. ६-३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

(सिद्धान्तः)

इति प्राप्त उच्यते—भूतेषु-इति । भूतेषु-सम्पद्यते । कुतः ? तच्छ्रुतेः १ "पृथिवीमय आपोमयः···तेजोमयः" इति जीवस्य सञ्चरतस्सर्वभूतमयत्वश्रुतेः ॥ ५ ॥

ननु तेजःप्रभृतिष्वेकैकस्मिन् क्रमेण सम्पत्तावपि १"पृथिवीमयः" इत्यादिका श्रुतिरुपपद्यते, अत आह—

नैकस्मिन् दर्शयतो हि । ४ । २ । ६ ॥

नैकस्मिन्, एकैकस्य कार्याक्षमत्वात् । दर्शयतो ह्यक्षमत्वं श्रुतिस्मृती २"अनेन जीवेनाऽत्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि तासां त्रिवृतं त्रिवृतमेकैकां करवाणि" इति नामरूपव्याकरणयोग्यत्वाय त्रिवृत्करणमुपदिश्यते । ३"नानावीर्याः पृथग्भूताः ततस्ते संहतिं विना । नाशक्नुवन् प्रजास्स्रष्टुमसमागम्य कृत्स्नशः। समेत्यान्योन्यसंयोगं परस्परसमाश्रयाः। महदाद्या विशेषान्ता ह्यण्डमुत्पादयन्ति ते" इति । अतः ४"प्राणस्तेजसि" इति तेजश्शब्देन भूतान्तरसंसृष्टमेव तेजोऽभिधीयते । अतो भूतेष्वेव सम्पत्तिः ॥ ६ ॥

इति श्रीशारीरकमीमांसाभाष्ये भूताधिकरणम् ॥ ४ ॥

वेदान्तसारे—भूतेषु तच्छ्रुतेः ॥ ४" प्राणस्तेजसि " इति भूतान्तरसंसृष्टं तेजोऽभिधीयत इति प्राणा भूतेषु संयुज्यन्ते ॥ ५ ॥

नैकस्मिन् दर्शयतो हि ॥ "४ तेजसि" इति न तेजोमात्रे, त्रिवृत्करणश्रुतिस्मृतिभ्यां केवलस्य तेजसोऽनवस्थानात् ॥ ६ ॥

इति वेदान्तसारे भूताधिकरणम् ॥ ४ ॥

वेदान्तदीपे—भूतेषु तच्छ्रुतेः ॥ नैकस्मिन् दर्शयतो हि ॥ ४"प्रा-

---

१. बृ. ६-४-५ ॥— २. छां. ६-३-२, ३ ॥— ३. विष्णु. १-अं. २-अ. ५२-५३ ॥—४. छा. ६-८-६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

णस्तेजसि" इति किं तेजोमात्रे प्राणस्संयुज्यते, उत भूतान्तरसंसृष्ट इति संशयः। १"तेजसि" इति वचनात्तेजोमात्र इति पूर्वः पक्षः। २"पृथिवीमयः" इत्यादिना सञ्चरतो जीवस्य सर्वभूतमयत्वश्रुतेः, त्रिवृत्करणश्रुतिस्मृतिभ्याञ्च तेजस एकस्य कार्याक्षमत्वाद्भूतान्तरसंसृष्ट इति राद्धान्तः। सूत्रद्वयं व्याख्यातम् ॥ ५ ॥ ६ ॥

इति वेदान्तदीपे भूताधिकरणम् ॥ ४ ॥

(श्रीशारीरकमीमांसाभाष्ये आसृत्युपक्रमाधिकरणम् ॥)

समाना चासृत्युपक्रमादमृतत्वं चानुपोष्य॥४।२।७॥

इयमुत्क्रान्तिः किं विद्वदविदुषोस्समाना, उताविदुष एवेति चिन्तायाम्, अविदुष एवेति प्राप्तम्। कुतः? विदुषोऽत्रैवामृतत्ववचनादुत्क्रान्त्यभावात्। विदुषो ह्यत्रैवामृतत्वं श्राव्यते-३"यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः। अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते" इति ॥

(सिद्धान्तः)

एवं प्राप्तेऽभिधीयते-समानाचाऽसृत्युपक्रमात्—इति। विदुषोऽप्यासृत्युपक्रमादुत्क्रान्तिस्समाना। आसृत्युपक्रमात् - आगत्युपक्रमात्, नाडीप्रवेशात्प्रागित्यर्थः। विदुषोऽपि हि नाडीविशेषेणोत्क्रम्य गतिः श्रूयते—४"शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिस्सृतैका। तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ति" इति।एवं नाडीविशेषेण गतिश्रवणाद्विदुषोऽप्युत्क्रान्तिरवर्जनीया। सा च नाडीप्रवेशात्प्राग्विशेषाश्रवणात्समाना। तत्प्रवेशदशायां च विशेषः श्रूयते ५"तेन

---

१. छा. ६-८-६ ॥—२. बृ. ६-४-५॥—३. कठ. २-६-१४॥—४. कठ. २-६-१६ ॥ —५. बृ. ६-४-२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रद्योतेनैष आत्मा निष्क्रामति चक्षुषो वा मूर्ध्नो वा अन्येभ्यो वा शरीरदेशेभ्य इति। [१]"शतं चैका च हृदयस्य" इत्यनया श्रुत्यैकार्ध्यान्मूर्ध्नो निष्क्रमणं विद्वद्विषयम्; इतरदविद्वद्विषयम्। यदुक्तं—विदुषोऽत्रैवामृतत्वं श्राव्यते—इति;तत्रोच्यते—अमृतत्वं चानुपोष्य—इति। चशब्दोऽवधारणे। अनुपोष्य—शरीरेन्द्रियादिसम्बन्धमदग्ध्वैव, यदमृतत्वम्—उत्तरपूर्वाघयोरश्लेषविनाशरूपं प्राप्यते; तदुच्यते [२]"यदा सर्वे प्रमुच्यन्ते" इत्यादिकया श्रुत्येत्यर्थः। [३]"अत्र ब्रह्म समश्नुते" इति च उपासनवेलायां यो ब्रह्मानुभवः; तद्विषयमित्यभिप्रायः ॥ ७ ॥

तदापीतेस्संसारव्यपदेशात् । ४ । २ । ८ ॥

अवश्यं च तत्—अमृतत्वमदग्धदेहसम्बन्धस्यैवेति विज्ञेयम् । कुतः? आपीतेः संसारव्यपदेशात्—अपीतिः—अप्ययः, ब्रह्मप्राप्तिः । सा चार्चिरादिना मार्गेण देशविशेषं गत्वेति वक्ष्यते । आतदवस्थाप्राप्तेः संसारः—देहसम्बन्धलक्षणो हि व्यपदिश्यते—[३]"तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्ये" इति [४]"अश्व इव रोमाणि विधूय पापं चन्द्र इव राहोर्मुखात्प्रमुच्य। धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसम्भवामि" इति च ॥ ८ ॥

सूक्ष्मं प्रमाणतश्च तथोपलब्धेः । ४ । २ । ९ ॥

इतश्च विदुषोऽपि बन्धो नात्र दग्धः; यतस्सूक्ष्मं शरीरमनुवर्तते। कुत इदमवगम्यते; प्रमाणतस्तथोपलब्धेः—उपलभ्यते हि देवयानेन पथा गच्छतो विदुषः[५]"तं प्रतिब्रूयात्"[६]"सत्यं ब्रूयात्" इति चन्द्रमसा संवादवचनेन शरीरसद्भावः । अतस्सूक्ष्मशरीरमनुवर्तते । अतश्च बन्धो न दग्धः ॥ ९ ॥

---

१. कठ. २-६-१६ ॥ —२. कठ. २-६-१४ ॥ —३. छा. ६-१४-२ ॥ —४. छा. ८-१३-१ ॥—५. कौ. १-२ ॥—६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नोपमर्देनातः । ४ । २ । १० ॥

अतः [१] "यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः । अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते" इति वचनं न बन्धोपमर्देनामृतत्वं वदति ॥ १० ॥

अस्यैव चोपपत्तेरूष्मा । ४ । २ । ११ ॥

अस्य—सूक्ष्मशरीरस्य क्वचिद्विद्यमानत्वोपपत्तेर्विदुषः प्रक्रान्तमरणस्य मरणात्प्रागूष्मा स्थूले शरीरे क्वाचित्क उपलभ्यते । नच स्थूलस्यैव शरीरस्यायमूष्मा, अन्यत्रानुपलब्धेः । ततश्चोष्मणः क्वचिदुपलब्धिर्विदुषस्सूक्ष्मशरीरस्योत्क्रान्तिनिबन्धनेति गम्यते । तस्माद्विदुषोऽप्यासृत्युपक्रमात्समानोत्क्रान्तिरिति सुष्ठूक्तम् ॥ ११ ॥

पुनरपि विदुष उत्क्रान्तिर्न सम्भवतीत्याशङ्क्य परिहियते—

प्रतिषेधादिति चेन्न शारीरात्स्पष्टो ह्येकेषाम् । ४ । २ । १२ ॥

यदुक्तं विदुषोऽप्युत्क्रान्तिस्समानेति; तन्नोपपद्यते, विदुष उत्क्रान्तिप्रतिषेधात् । तथाहि-[२]"स एतास्तेजोमात्रास्समभ्याददानो हृदयमेवान्वपक्रामति" इत्युपक्रम्य [२]"तेन प्रद्योतेनैष आत्मा निष्क्रामति तमुत्क्रामन्तं प्राणोऽनूत्क्रामति" इत्यविदुष उत्क्रान्तिप्रकारमभिधाय [३] "अन्यमवतरं कल्याणतरं रूपं कुरुते" इति देहान्तरपरिग्रहं चाभिधाय [४]"प्राप्यान्तं कर्मणस्तस्य यत्किंचेह करोत्ययम्। तस्माल्लोकात्पुनरेत्यस्मै लोकाय कर्मणे इति तु कामयमानः" इत्यविद्वद्विषयं परिसमाप्य [४]"अथाकामयमानो योऽकामो निष्काम आप्तकाम आत्मकामः न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन् ब्रह्माप्येति" इति विदुष उत्क्रान्तिः प्रतिषिध्यते । तथा पू-

१. कठ. २-६-१४ ॥—२. बृ. ६-४-१, २॥ —३. बृ. ६-४-४ ॥—४. बृ. ६-४-६॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

र्वत्र आर्तभागप्रश्नेऽपि विदुष उत्क्रान्तिप्रतिषेधो दृश्यते १"अप पुनर्मृत्युं जयति" इति विद्वांसं प्रस्तुत्य १" याज्ञवल्क्येति होवाच यत्रायं पुरुषो म्रियते उदस्मात्प्राणाः क्रामन्त्याहो न"इति पृष्टः"१"नेति होवाच याज्ञवल्क्योऽत्रैव समवलीयन्ते स उच्छ्वयत्याध्मातो मृतः शेते" इति। अतो विद्वानिहैवामृतत्वं प्राप्नोतीति चेत्—तन्न,शारीरात्-प्रत्यगात्मनः प्राणानामुत्क्रान्तिर्ह्यत्र प्रतिषिध्यते; न शरीरात् २"न तस्य प्राणा उत्क्रामन्ति" इत्यत्र तच्छब्देन२"अथाकामयमानः" इति प्रकृतश्शारीर एव परामृश्यते; नाश्रुतं शरीरम्। २"तस्य" इति षष्ठ्या प्राणानां सम्बन्धित्वेन शारीरो निर्दिष्टः;नतूत्क्रान्त्यपादानत्वेन;उत्क्रान्त्यपादानं तु शरीरमेवेति चेत्—न,अपादानापेक्षायामश्रुताच्छरीरात्सम्बन्धितया श्रुतस्यात्मन एव सन्निहितत्वेनापादानतयापि ग्राह्यत्वात्। किञ्च प्राणानां जीवसम्बन्धितयैव प्रज्ञातानां तत्सम्बन्धकथने प्रयोजनाभावात्सम्बन्धमात्रवाचिन्या षष्ठ्या अपादानमेव विशेष इति निश्चीयते। यथा 'नटस्य शृणोति'इति। नचात्र विवदितव्यं—स्पष्टो ह्येकेषां—माध्यन्दिनानामाम्नाये शारीरो जीव एवापादानमिति २"योऽकामो निष्काम आप्तकाम आत्मकामो न तस्मात्प्राणा उत्क्रामन्ति" इति। शारीरात्प्राणानामुत्क्रान्तिप्रसङ्गाभावात्तन्निषेधो नोपपद्यत इति चेत्-न,३"तस्य तावदेव चिरम्"इति विदुषश्शरीरवियोगकाले ब्रह्मसम्पत्तिवचनेन प्राणानामपि तस्मिन् काले शारीराद्विदुषो वियोगः प्रसज्यते; ततश्च देवयानेन पथा ब्रह्मसम्पत्तिर्नोपपद्यत इति।२" न तस्य प्राणा उत्क्रामन्ति" देवयानेन पथा ब्रह्मप्राप्तेः प्राग्जीवाद्विदुषोऽपि प्राणा न विश्लिष्यन्तीत्युच्यते। आर्तभागप्रश्नोऽपि यदा विद्वद्विषयः; तदा अयमेव परिहारः; स त्वविद्वद्विषयः, तत्र प्रश्नप्रतिवचनयोः ब्रह्मविद्याप्रसङ्गादर्शनात्; तत्र हि ग्रहातिग्रहरूपेणेन्द्रियेन्द्रियार्थस्वभावः, अपामग्न्य-

१. बृ. ५-२-१०, ११ ॥—२. बृ. ६-४-६ ॥—३. छा. ६-१४-२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्वं, म्रियमाणस्य जीवस्य प्राणापरित्यागः, मृतस्य नामवाच्यकीर्त्यनुवृत्तिः, तस्य च पुण्यपापानुगुणगतिप्राप्तिरित्येतेऽर्थाः प्रश्नपूर्वकं प्रत्युक्ताः। तत्र च [१]"अप पुनर्मृत्युं जयति"इति अपामग्न्यन्नत्वज्ञानादग्निजय एव मृत्युजय उच्यते। अतो नात्र विदुषः प्रसङ्गः। अविदुषस्तु प्राणानुत्क्रान्तिवचनं—स्थूलदेहवत्प्राणा न मुञ्चन्ति, अपि तु भूतसूक्ष्मवज्जीवं परिष्वज्य गच्छन्ति—इति प्रतिपादयतीति निरवद्यम् ॥ १२ ॥

स्मर्यते च । ४ । २ । १३ ॥

स्मर्यते च विदुषोऽपि मूर्धन्यनाड्योत्क्रान्तिः [२]"ऊर्ध्वमेकः स्थितस्तेषां यो भित्त्वा सूर्यमण्डलम्। ब्रह्मलोकमतिक्रम्य तेन याति परां गतिम्" इति ॥ १३ ॥

इति श्रीशारीरकमीमांसाभाष्ये आसृत्युपक्रमाधिकरणम्॥ ५ ॥

वेदान्तसारे—समाना चासृत्युपक्रमादमृतत्वं चानुपोष्य ॥ अर्चिरादिगत्युपक्रमात्प्रागुत्क्रान्तिः विद्वदविदुषोस्समाना, विदुषोऽर्चिरादिगत्या ब्रह्मप्राप्तिश्रुतेः। "३ यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः। अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते" इति अत्रैव अमृतत्वब्रह्मप्राप्तिवचनं शरीरेन्द्रियादिसम्बन्धमदग्ध्वैवोपासनारम्भाभिप्रायमित्युपगन्तव्यमित्यर्थः ॥ ७ ॥

तदापीतेस्संसारव्यपदेशात् ॥ अर्चिरादिगमनेन ब्रह्मप्राप्तेः प्राक् शरीरसम्बन्धव्यपदेशात्तदमृतत्वादिवचनमुक्तप्रकारमेव ॥ ८ ॥

सूक्ष्मं प्रमाणतश्च तथोपलब्धेः ॥ शरीरादुत्क्रान्तस्यापि सूक्ष्मशरीरमनुवर्तते ; अन्यथा गत्यनुपपत्तेः। न केवलं गत्यनुपपत्तिमात्रं सूक्ष्मशरीरवत्त्वे प्रमाणम्, चन्द्रमसा संवादादिप्रमाणान्तरतश्च सूक्ष्मशरीरवत्त्वोपलब्धेः—४"तं प्रति ब्रूयात्"५"सत्यं ब्रूयात्" इति ॥ ९ ॥

नोपमर्दनातः ॥ अतः-उक्ताद्धेतोः, ३"अथ मर्त्योऽमृतो भवति"इत्यादममृतत्वचनं न देहसम्बन्धोपमर्दन ॥ १० ॥

---

१. बृ.५-२-१०॥—२. याज्ञवल्क्य, अध्यात्मप्र. १६७-श्लो॥—३. कठ. २-६-१४॥—४. कौषी. १-२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अस्यैव चोपपत्तेरूष्मा ॥ अस्य - सूक्ष्मशरीरस्य विद्यमानत्वोपपत्तेश्च न तदुपमर्देन । उपलभ्यते ह्युत्क्रामतो विदुषस्सूक्ष्मदेहगुण ऊष्मा ; अन्यत्रानुपलम्भान्न स्थूलगुणः ॥ ११ ॥

प्रतिषेधादिति चेन्न शारीरात्स्पष्टो ह्येकेषाम् ॥ १"अथाकामयमानो न तस्य प्राणा उत्क्रामन्ति" इति विदुष उत्क्रान्तिप्रतिषेधादत्रैव साक्षाद्ब्रह्मप्राप्तिरिति चेत्—नैतत्; विदुष उत्क्रममाणस्यार्चिरादिकया गमनाय प्राणा न विश्लिष्यन्ते इति ह्युच्यते १"न तस्य प्राणा उत्क्रामन्ति" इति । अयमर्थो माध्यन्दिनानां पाठे स्पष्टोऽभिधीयते १"योऽकामो निष्काम आप्तकाम आत्मकामः न तस्मात्प्राणा उत्क्रामन्ति" इति ॥ १२ ॥

स्मर्यते च ॥ विदुषोऽपि मूर्धन्यनाड्या गमनं स्मर्यते च २"ऊर्ध्वमेकः स्थितस्तेषां यो भित्त्वा सूर्यमण्डलम् । ब्रह्मलोकमतिक्रम्य तेन याति पराङ्गतिम्" इति ॥ १३ ॥

इति वेदान्तसारे आसृत्युपक्रमाधिकरणम् ॥ ५ ॥

वेदान्तदीपे—समाना चासृत्युपक्रमादमृतत्वं चानुपोष्य ॥ इयमुत्क्रान्तिः किं विद्वदविदुषोस्समाना, उताविदुष एवेति संशयः। विदुषोऽत्रैवामृतत्वप्राप्तिश्रुतेरविदुष एवेति पूर्वः पक्षः; श्रूयते हि विदुषोऽत्रैव ब्रह्मप्राप्तिः- ३"यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः । अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते" इति । राद्धान्तस्तु—विदुषोऽर्चिरादिकयैव ब्रह्मप्राप्तिः ; अर्चिरादिगत्युपक्रमात्प्रागियमुत्क्रान्तिस्समाना । गतिश्च मूर्धन्यनाड्या ४"शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिस्सृतैका । तयोर्ध्वमायन्नमृतत्वमेति" इति श्रुतेः । ३"यदा सर्वे प्रमुच्यन्ते" इत्यनेन गतिश्रुत्यविरोधायामृतत्वसाधनभूतोपासननिष्पत्तिरुच्यते, हृदि स्थिताः कामा यदा प्रमुच्यन्ते, तदैवोपासनारम्भान्मर्त्योऽमृतो भवतीति । अत्र - कामविमोकपूर्वकोपासने स्थितोऽर्चिरादिकया गत्या ब्रह्म समश्नुते इत्यर्थः । सूत्रार्थस्तु—सृतिः-गतिः, आगत्युपक्रमादुत्क्रान्तिर्विदुषोऽपि समाना, विदुषोऽर्चिरादिगतिश्रुतेः। ३"अथ मर्त्योऽमृतो भवति" इत्युच्यमानममृतत्वमनुपोष्य च-अदग्ध्वैव शरीरेन्द्रियादिसम्बन्धम् उपासनारम्भपरिकररूपमित्यर्थः ॥ ७ ॥

---

१. बृ. ६-४-६॥—२. याज्ञवल्क्य, अध्यात्मप्र. १६७-श्लो॥—३. कठ. २-६-१४॥—४. कठ. २-६-१६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तदापीतेस्संसारव्यपदेशात् ॥ तत्-अमृतत्वम् ,उक्तप्रकारमेव। कुतः? आपीतेस्संसारव्यपदेशात्—अपीतिः-ब्रह्मप्राप्तिः ; अर्चिरादिकया गत्या देशविशेषं गत्वा यावद्ब्रह्म प्राप्यते ; तावत्संसारः शरीरसम्बन्धो हि व्यपदिश्यते॥

गतिव्यपदेशादेव शरीरादुत्क्रान्तस्य कथं शरीरसम्बन्ध इत्यत्राह—

सूक्ष्मं प्रमाणतश्च तथोपलब्धेः ॥ सूक्ष्मशरीरमनुवर्तते, गतिव्यपदेशात्। न केवलं गतिव्यपदेशादेव, प्रमाणान्तरतश्च तथा सूक्ष्मशरीरवत्त्वस्योपलब्धेश्च। विदुषोऽर्चिरादिकया गत्या गच्छतश्चन्द्रमसा संवादोऽयमुपदिश्यते १"तं प्रीत ब्रूयात्"२"सत्यं ब्रूयात्" इत्यादिना ॥ ९ ॥

नोपमर्देनातः ॥ अतः उक्ताद्धेतुकलापात्, ३"अथ मर्त्योऽमृतो भवति" इतिवचनं न देहसम्बन्धोपमर्देनामृतत्वं वदति; अपितूक्तमेवोपासनारम्भरूपं वदतीत्यर्थः ॥ १० ॥

अस्यैव चोपपत्तेरूष्मा ॥ अस्य सूक्ष्मशरीरस्य विद्यमानत्वोपपत्तेश्च न देहसम्बन्धोपमर्देन। उपलभ्यते ह्युत्क्रममाणस्य विदुषः क्वचिदूष्मा सूक्ष्मदेहगुणः, नचायं स्थूलदेहगुणः, अन्यत्रानुपलब्धेः। अतो विद्वान् सूक्ष्मशरीरेणोत्क्रामति ॥ ११ ॥

प्रतिषेधादिति चेन्न शारीरात्स्पष्टो ह्येकेषाम् ॥ ४" स एतास्तेजोमात्राः " इत्यारभ्य ४"इति तु कामयमानः" इत्यन्तेनाविदुषः उत्क्रान्तिप्रकारं लोकान्तरगमनं पुनरावृत्तिं चाभिधाय, ५"अथाकामयमानः"इत्यादिना ५"न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन् ब्रह्माप्येति" इति विदुष उत्क्रान्तिप्रतिषेधादुक्तप्रकारो नोपपद्यत इति चेत्—तन्न शारीरात्प्राणानामविश्लेषोऽनेनोच्यते। तस्य अकामयमानस्य विदुषश्शारीरस्य, प्राणास्तस्मान्नोत्क्रामन्ति। देवयानेन गमनाय सहैव तिष्ठन्ति। अयमर्थः स्पष्टो ह्येकेषां - माध्यन्दिनशाखिनां पाठे ४"योऽकामो निष्काम आप्तकाम आत्मकामो न तस्मात्प्राणा उत्क्रामन्ति"इति ॥

स्मर्यते च ॥ स्मर्यते च विदुषोऽपि मूर्धन्यनाडयोत्क्रान्तिः ६"ऊर्ध्वमेकस्थितस्तेषां यो भित्त्वा सूर्यमण्डलम् । ब्रह्मलोकमतिक्रम्य तेन याति परां गतिम्" इति ॥ १३ ॥

इति वेदान्तदीपे आसृत्युपक्रमाधिकरणम् ॥ ५ ॥

---

१. कौषी. १-२ ॥—२ ॥—३. कठ. २-६-१४ ॥—४. बृ. ६-४-१॥—५. बृ ६-४-६ ॥—६. याज्ञवल्क्य. अध्यात्मप्र. १६७-श्लो ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तानि परे तथाह्याह । ४ । २ । १४ ॥

सकरणग्रामः सप्राणः करणाध्यक्षः प्रत्यगात्मा उत्क्रान्तिवेलायां तेजःप्रभृतिभूतसूक्ष्मेषु सम्पद्यत इत्युक्तम् ; सैषा सम्पत्तिर्विदुषो न विद्यत इत्याशङ्क्य परिहृतम् ; तानि पुनर्जीवपरिष्वक्तानि भूतसूक्ष्माणि किं यथाकर्म यथाविद्यं च स्वकार्याय गच्छन्ति, उत परमात्मनि सम्पद्यन्त इति विशये मध्ये परमात्मसम्पत्तौ सुखदुःखोपभोगरूपकार्यदर्शनात् , तदुपभोगानुगुण्येन यथाकर्म यथाविद्यं च गच्छन्ति—

(सिद्धान्तः)

इति प्राप्ते उच्यते—तानि परे—इति । तानि परस्मिन्नात्मनि सम्पद्यन्ते ; कुतः ? तथाह्याह श्रुतिः—[१]" तेजः परस्यां देवतायाम् " इति । यथाह श्रुतिस्तदनुगुणं कार्यं कल्प्यमित्यर्थः । सुषुप्तिप्रलययोर्यथा परमात्मसम्पत्त्या सुखदुःखोपभोगायासविश्रमः ; तद्वदिहापि ॥ १४ ॥

इति श्रीशारीरकमीमांसाभाष्ये परसम्पत्त्यधिकरणम् ॥ ६ ॥

वेदान्तसारे—तानि परे तथाह्याह॥ [१]"तेजः परस्यां देवतायाम्"इति श्रुतेः परदेवतासम्पत्तिरुत्क्रममाणस्य विश्रमस्थानमिति तानि भूतानि जीवसंयुक्तानि परदेवतायां संपद्यन्ते ॥ १४ ॥

इति वेदान्तसारे परसम्पत्त्यधिकरणम् ॥ ६ ॥

वेदान्तदीपे—तानि परे तथाह्याह॥ [१]" प्राणस्तेजसि " इति तेजश्शब्दनिर्दिष्टानि भूतानि जीवपरिष्वक्तानि किं परस्यां देवतायां सम्पद्यन्ते, उत यथाकर्म यथाविद्यं च गच्छन्तीति संशयः । तदानीं सुखदुःखोपभोगाद्यभा-

---

१. छा. ६-८-६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वेन परसम्पत्तौ प्रयोजनाभावात् यथाकर्म यथाविद्यमिति पूर्वः पक्षः । सर्वस्य परदेवताकार्यत्वेन तदात्मकत्वाद्गन्तव्यस्थानमिदं १"परस्यां देवतायाम्" इत्युच्यते । राद्धान्तस्तु—तानि परे परस्मिन्ब्रह्मणि सम्पद्यन्ते ; १"तेजः परस्यां देवतायाम्" इति ह्याह श्रुतिः।यथाश्रुति विश्रमस्थानत्वेन कार्यं परिकल्प्यमित्यर्थः। सूत्रं च व्याख्यातम् ॥ १४ ॥

इति वेदान्तदीपे परसम्पत्त्यधिकरणम् ॥ ६ ॥

श्रीशारीरकमीमांसाभाष्ये अविभागाधिकरणम् ॥ ७ ॥

अविभोगो वचनात् । ४ । २ । १५ ॥

सेयं परमात्मनि सम्पत्तिः किं प्राकृतलयवत्कारणापत्तिरूपा, उत १"वाङ्मनसि" इत्यादिवदविभागरूपेति चिन्तायां—परमात्मनस्सर्वेषां योनिभूतत्वात्कारणापत्तिरूपा—

सिद्धान्तः

इति प्राप्त उच्यते—अविभागः—इति।अपृथग्भावः-पृथग्व्यवहारानर्हसंसर्ग इत्यर्थः। कुतः ? वचनात् १"तेजः परस्यां देवतायाम्"इत्यत्रापि १"वाङ्मनसि सम्पद्यते" इत्यतस्सम्पद्यत इति वचनस्यानुषङ्गात्, तस्य च संसर्गविशेषवाचित्वात्, अनुषक्तस्याभिधानवैरूप्ये प्रमाणाभावात्, उत्क्रान्तिवेलयां कारणापत्तिप्रयोजनाभावात् पुनस्तत्राव्यक्तादिसृष्ट्यवचनाच्च ॥ १५ ॥

इति श्रीशारीरकमीमांसाभाष्ये अविभागाधिकरणम् ॥ ७ ॥

वेदान्तसारे—अविभोगो वचनात्॥परदेवतासम्पत्तिवचनमविभागमात्रपरम्, "१वाङ्मनसि सम्पद्यते" इति सम्पत्तिपदस्यैवात्रानुषक्तस्यार्थान्तरपरत्वे प्रमाणाभावात् ; मनःप्रभृतिषु हि प्रलयासम्भवादविभागमात्रपरम्॥

इति वेदान्तसारे अविभागाधिकरणम् ॥ ७ ॥

---

१. छा. ६-८-६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वेदान्तदीपे—अविभागो वचनात् ॥ सेयं परमात्मनि सम्पत्तिः किं प्राकृतप्रलयवत्कारणापत्तिरूपा, उत मनःप्रभृतिसम्पत्तिवदविश्लेषमात्रमिति संशयः। परमात्मनः कारणत्वात्, तत्सम्पत्तिवचनाच्च कारणापत्तिरेवेति पूर्वः पक्षः। राद्धान्तस्तु—१"वाङ्मनसि सम्पद्यते" इति श्रुतस्यैव सम्पत्तिवचनस्य सर्वत्रानुषङ्गादत्रानुषक्तस्य चाभिधानवैरूप्यासम्भवादत्राप्यविभागः—अविश्लेष एवोच्यते। सूत्रमपि व्याख्यातम् ॥ १५ ॥

इति वेदान्तदीपे अविभागाधिकरणम् ॥ ७ ॥

(श्रीशारीरकमीमांसाभाष्ये तदोकोधिकरणम् ॥ ८ ॥)

तदोकोऽग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतश्शताधिकया । ४ । २ । १६ ॥

एवं गत्युपक्रमावधि विद्वदविदुषोस्समानाकार उत्क्रान्तिप्रकार उक्तः; इदानीं विदुषो विशेष उच्यते। तत्रेदमाम्नायते—२"शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिस्सृतैका। तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ति" इति। अनया नाडीनां शताधिकया मूर्धन्यनाड्यैव विदुषो गमनम्, अन्याभिरेवचाविदुषो गमनमित्ययं नियम उपपद्यते, नेति संशयः। किं युक्तम्? नियमो नोपपद्यत इति। कुतः? नाडीनां भूयस्त्वादतिसूक्ष्मत्वाच्च दुर्विवेचतया पुरुषेणोपादातुमशक्यत्वात्। २"तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ति" इति यादृच्छिकीमुत्क्रान्तिमनुवदतीति युक्तमिति ॥

---

१. छा. ६-८-६ ॥—२. कठ. २-६-१६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

(सिद्धान्तः)

एवं प्राप्ते प्रचक्ष्महे—शताधिकया—इति । विद्वान् शताधिकया मूर्धन्ययैव नाड्योत्क्रामति।नचास्याः विदुषो दुर्विवेचत्वम्;विद्वान् हि परमपुरुषाराधनभूतात्यर्थप्रियविद्यासामर्थ्याद्विद्याशेषभूततयाऽऽत्मनोऽत्यर्थप्रियगत्यनुस्मरणयोगाच्च प्रसन्नेन हार्देन परमपुरुषेणानुगृहीतो भवति; ततश्च तदोकः-तस्य-जीवस्य स्थानं हृदयम्,अग्रज्वलनं भवति अग्रे ज्वलनं प्रकाशनं यस्य, तदिदमग्रज्वलनम्। परमपुरुषप्रसादात्प्रकाशितद्वारो विद्वान् तां नाडीं विजानातीति तया विदुषो गतिरुपपद्यते ॥ १६ ॥

इति श्रीशारीरकमीमांसाभाष्ये तदोकोधिकरणम् ॥ ८ ॥

वेदान्तसारे—तदोकोऽग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतश्शताधिकया॥हार्दपरमपुरुषाराधनरूपविद्यासामर्थ्यात्, तदङ्गगतिचिन्तनेन च प्रीतपरमपुरुषानुगृहीतः,तदनुग्रहतः प्रकाशिततद्द्वारो जीवः शताधिकया मूर्धन्यनाडया गच्छति;तदनुग्रहादेव जीवस्थानमग्रे प्रकाशवद्भवति । हार्दः-परमात्मा परमपुरुषः; १"तस्याश्शिखाया मध्ये परमात्मा व्यवस्थितः" २"सर्वस्य चाहं हृदि सन्निविष्टः" इति हि श्रुतिस्मृती ॥ १६ ॥

इति वेदान्तसारे तदोकोधिकरणम् ॥ ८ ॥

वेदान्तदीपे—तदोकोऽग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतश्शताधिकया ॥ ३ "शतं चैकाच्च हृदयस्य नाड्यस्तासांमूर्धानमभिनिस्सृतैका।तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ति" इति शताधिकया मूर्धन्यया नाड्या विदुषो गमनमिति नियमस्सम्भवति, नेति संशयः । नाडीनामतिसूक्ष्मत्वेन दुर्विवेचत्वान्नियमो न सम्भवतीति याट्टच्छिकीं तया गतिमनुवदतीदं वचनमिति पूर्वः पक्षः। राद्धान्तस्तु—परमपुरुषाराधनभूतया विद्यया तदङ्गभूतगतिचिन्तनेन च प्रीतेन

१. तै. ना. ११-अनु ॥—२. गी. १५-१५ ॥—३. कठ. २-६-१६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

परमपुरुषेणानुगृहीतो जीवस्तत्प्रसादप्रकाशितद्वारस्तयैव मूर्धन्यया नाड्या गच्छति—इति ॥

सूत्रार्थस्तु—हार्दपरमपुरुषाराधनरूपविद्यासामर्थ्यात्, तच्छेषगत्यनुस्मृतियोगाच्च प्रीतहार्दानुगृहीतो भवति जीवः ; ततः तदोकः-जीवस्य स्थानं हृदयम्, अग्रज्वलनम्-प्रकाशिताग्रं भवति; एवं परमपुरुषप्रकाशितद्वारः शताधिकया गच्छति; १"तस्याश्शिखाया मध्ये परमात्मा व्यवस्थितः" २"सर्वस्य चाहं हृदि सन्निविष्टः" इति हार्दः परमात्मा ॥ १६ ॥

इति वेदान्तदीपे तदोकोधिकरणम् ॥ ८ ॥

श्रीशारीरकमीमांसाभाष्ये रश्म्यनुसाराधिकरणम् ॥९॥

रश्म्यनुसारी । ४ । २ । १७ ॥

विदुषो हृदयाच्छताधिकया मूर्धन्यनाड्या निर्गतस्यादित्यरश्मीननुसृत्यादित्यमण्डलगतिः श्रूयते—३"अथ यत्रैतदस्माच्छरीरादुत्क्रामत्यथैतैरेव रश्मिभिरूर्ध्वमाक्रमते" इति । तत्र रश्म्यनुसारेणैवेत्ययं गतिनियमस्सम्भवति, नेति चिन्तायां—निशि मृतस्य विदुषो रश्म्यनुसारासम्भवादनियमः । वचनन्तु पक्षप्राप्तविषयम्—

सिद्धान्तः

इति प्राप्त उच्यते—रश्म्यनुसारी—इति । रश्म्यनुसार्येव विद्वानूर्ध्वं गच्छति; कुतः?३"अथैतैरेव रश्मिभिः"इत्यवधारणात्; पाक्षिकत्वे ह्येवकारोऽनर्थकस्स्यात् । यदुक्तं निशि मृतस्य रश्म्यसम्भवाद्रश्मीननुसृत्य गमनं नोपपद्यत इति ; तन्न, निश्यपि सूर्यरश्म्यनुसारस्सम्भवति; लक्ष्यते हि निश्यपि निदाघसमये ऊष्मोपलब्ध्या रश्मिसद्भावः; हेमन्तादौ तु हिमाभिभवादर्दिन इवोष्मानुपलम्भः; श्रूयते च नाडीरश्मीनां सर्वदाऽन्योन्यान्वयः—४"तद्यथा महापथ आतत उभौ ग्रामौ गच्छतीमं

१. तै. ना. ११-अनु ॥—२. गी. १५-१५ ॥—३. छा. ८-६-५॥—४. छा.८-६-२॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चामुं च एवमेवैत आदित्यस्य रश्मय उभौ लोकौ गच्छन्तीमं चामुं च अमुष्मादादित्यात्प्रतायन्ते त आसु नाडीषु सृप्ताः आभ्यो नाडीभ्यः प्रतायन्ते तेऽमुष्मिन्नादित्ये सृप्ताः"इति। तस्मान्निश्यपि रश्मिसम्भवान्निशि मृतानामपि विदुषां रश्म्यनुसारेणैव ब्रह्मप्राप्तिरस्त्येव॥ १७ ॥

इति श्रीशारीरकमीमांसाभाष्ये रश्म्यनुसाराधिकरणम् ॥ ९ ॥

वेदान्तसारे—रश्म्यनुसारी ॥ १ "अथैतैरेव रश्मिभिरूर्ध्वमाक्रमते" इति श्रुतेः विद्वान् रश्म्यनुसार्येव गच्छति; निश्यपि रश्मयस्सम्भवन्त्येव,निदाघादावुष्मोपलब्धेः; हेमन्तेऽनुपलब्धिस्तु हिमाभिभवकृता ॥ १७ ॥

इति वेदान्तसारे रश्म्यनुसाराधिकरणम् ॥ ९ ॥

वेदान्तदीपे—रश्म्यनुसारी ॥ १"अथ यत्रैतदस्माच्छरीरादुत्क्रामत्यथैतैरेव रश्मिभिरूर्ध्वमाक्रमते" इति विद्वान् रश्म्यनुसारी गच्छतीति नियमस्सम्भवति, नेति संशयः। निशि मृतस्य विदुषः आदित्यरश्म्यनुसारासम्भवादनियम इति पूर्वः पक्षः। वचनं तु पक्षप्राप्तमनुवदति।राद्धान्तस्तु—वचनस्य पक्षप्राप्त्यनुवादित्वे "अथैतैरेव" इत्यवधारणविरोधः। नच निशि रश्मयो न सन्तीति। निश्यपि निदाघसमये ऊष्मोपलब्धेः सूक्ष्मास्सन्त्येवेति रश्म्यनुसार्येव गच्छति। हेमन्तेऽनुपलब्धिः दुर्दिन इव हिमाभिभवात्॥ १७ ॥

इति वेदान्तदीपे रश्म्यनुसाराधिकरणम् ॥ ९ ॥

(श्रीशारीरकमीमांसाभाष्ये निशाधिकरणम् ॥ १० ॥)

निशि नेतिचेन्न सम्बन्धस्य यावद्देहभावित्वाद्दर्शयति च। ४। २। १८ ॥

इदमिदानीं चिन्त्यते—विदुषो निशि मृतस्य ब्रह्मप्राप्तिरस्ति, ने-

---

१. छा. ८-६-५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ति। यद्यपि निशायां सूर्यरश्मिसम्भवाद्दृश्यानुसारेण गतिर्निशायामपि सम्भवति; तथापि निशामरणस्य शास्त्रेषु गर्हितत्वात्परमपुरुषार्थलक्षण-ब्रह्मप्राप्तिर्निशामृतस्य न सम्भवति। शास्त्रेषु दिवामरणं प्रशस्तम्, विपरीतं निशामरणं—[१]"दिवा च शुक्लपक्षश्च उत्तरायणमेव च। मुमूर्षतां प्रशस्तानि विपरीतं तु गर्हितम्"इति। दिवामरणनिशामरणयोः प्रशस्तत्व-विपरीतत्वे चोत्तमाधमगतिहेतुत्वेन स्याताम्। अतो निशि मरणमधोगतिहेतुत्वान्न ब्रह्मप्राप्तिहेतुरिति चेत्—तन्न, विदुषः कर्मसम्बन्धस्य यावदेहभावित्वात्। एतदुक्तं भवति—अनारब्धकार्याणामधोगति हेतुभूतानां कर्मणां विद्यासम्बन्धेनैव विनाशादुत्तरेषां चाश्लेषात्प्रारब्धकार्यस्य च चरमदेहावधित्वाद्बन्धहेत्वभावाद्विदुषो निशामृतस्यापि ब्रह्मप्राप्तिरस्त्येव। दर्शयति च श्रुतिः [२]"तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ सम्पत्स्ये"इति। [१]"दिवा च शुक्लपक्षश्च" इत्यादिवचनमविद्वद्विषयम्॥

इति श्रीशारीरकमीमांसाभाष्ये निशाधिकरणम्॥ १०॥

वेदान्तसारे—निशि नेतिचेन्न सम्बन्धस्य यावद्देहभावित्वाद्दर्शयति च॥ [१]"दिवा च शुक्लपक्षश्च" इत्यारभ्य [१]"विपरीतन्तु गर्हितम्" इति निशामरणनिन्दनात्, निशि मृतस्य न ब्रह्मप्राप्तिरिति चेत्—न, कर्मसंबन्धस्य यावद्देहभावित्वात्, प्रारब्धस्य यावच्चरमदेहावसानभावित्वाच्च, ब्रह्मप्राप्तिविघ्नहेत्वभावात्। दर्शयति च [२]"तस्य तादेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्ये" इति। निशानिन्दा इतरपुरुषार्थविषया॥ १८॥

इति वेदान्तसारे निशाधिकरणम्॥ १०॥

वेदान्तदीपे—निशि नेतिचेन्न सम्बन्धस्य यावद्देहभावित्वाद्दर्शयति च॥ विदुषो निशि मृतस्य ब्रह्मप्राप्तिरस्ति, नेति संशयः। [१]"दिवा च शुक्लपक्षश्च उत्तरायणमेव च। मुमूर्षतां प्रशस्तानि विपरीतं तु गर्हितम्" इति

१॥—२. छा. ६-१४-२॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निशामरणस्य गर्हितत्वेन अधोगतिहेतुत्वान्न ब्रह्मप्राप्तिस्सम्भवतीति पूर्वः पक्षः। राद्धान्तस्तु—विद्यामाहात्म्यादुत्तरपूर्वाघयोरश्लेषविनाशश्रुतेरश्लिष्टविनष्टत्वात्, प्रारब्धस्यापि कर्मणः चरमदेहावधित्वाच्च, बन्धहेत्वभावान्निशि मृतस्यापि ब्रह्मप्राप्तिरस्त्येव—इति। अविद्वद्विषया निशामरणनिन्दा॥

सूत्रार्थस्तु—निशामरणनिन्दया निशि मृतस्य न ब्रह्मप्राप्तिरिति चेत्-तन्न-सम्बन्धस्य यावदेहभावित्वात् अनारब्धकार्यकर्मसम्बन्धस्य विद्यया विनष्टत्वात् प्रारब्धकार्यकर्मसम्बन्धस्यापि यावच्चरमदेहभावित्वाद्बन्धहेत्वभावेन ब्रह्मप्राप्तिरस्त्येवेत्यर्थः। तदेतच्छ्रुतिश्च दर्शयति [1]"तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ सम्पत्स्ये" इति॥ १८॥

इति वेदान्तदीपे निशाधिकरणम्॥ १०॥

(श्रीशारीरकमीमांसाभाष्ये दक्षिणायनाधिकरणम्॥११॥)

अतश्चायनेऽपि दक्षिणे। ४। २। १९॥

निशि मृतस्यापि विदुषो ब्रह्मप्राप्तौ यो हेतुरुक्तः, तत एव हेतोर्दक्षिणेऽप्ययने मृतस्य ब्रह्मप्राप्तिरस्सिद्धा॥

अधिका शङ्का तु [2]"अथ यो दक्षिणे प्रमीयते पितृणामेव महिमानं गत्वा चन्द्रमसस्सायुज्यं गच्छति" इति दक्षिणायने मृतस्य चन्द्रप्राप्तिश्रवणात् चन्द्रं प्राप्तानां च [3]"तेषां यदा तत्पर्यवैत्यथैतमेवाध्वानं पुनर्निवर्तन्ते" इति पुनरावृत्तिश्रवणात्, भीष्मादीनां च ब्रह्मविद्यानिष्ठानामुत्तरायणप्रतीक्षादर्शनाद्दक्षिणायने मृतस्य ब्रह्मप्राप्तिर्न सम्भवति—इति॥

परिहारस्तु—अविदुषां पितृयाणेन पथा चन्द्रं प्राप्तानामेव पुनरावृत्तिः, विदुषस्तु चन्द्रं प्राप्तस्यापि[2]"तस्माद्ब्रह्मणो महिमानमाप्नोति" इति वाक्यशेषात्तस्य दक्षिणायनमृतस्य चन्द्रप्राप्तिः ब्रह्म प्रपित्सतो विश्रमहेतुमात्रमिति गम्यते; वाक्यशेषाभावेऽपि पूर्वोक्तादेव बन्धहेत्वभावात् विदु-

---

१. छा. ६-१४-२॥—२. तै. ना. ५२-अनु॥—३. छा. ५-१०-५॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

षश्चन्द्रं प्राप्तस्यापि ब्रह्मप्राप्तिरनिवार्या। भीष्मादीनां योगप्रभावात् स्वच्छन्दमरणानां धर्मप्रवर्तनायोत्तरायणप्राशस्त्यप्रदर्शनार्थस्तथाविधाचारः ॥

ननु च विदुषो मुमूर्षून् प्रति पुनरावृत्तिहेतुत्वेन कालविशेषविधिर्दृश्यते [१]"यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः। प्रयाता यान्ति तं कालं वक्ष्यामि भरतर्षभ ॥ अग्निर्ज्योतिरुहश्शुक्लः षण्मासा उत्तरायणम्। तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः ॥ धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम्। तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्तते॥शुक्लकृष्णे गती ह्येते जगतश्शाश्वते मते। एकया यात्यनावृत्तिमन्ययाऽऽवर्तते पुनः" इतिः तत्राह—

योगिनः प्रति स्मर्येते स्मार्ते चैते।४।२।२०॥

नात्र मुमूर्षून् प्रति मरणकालविशेषोपादानं स्मर्यतेः अपितु योगिनः-योगनिष्ठान् प्रति स्मार्ते- स्मृतिविषयभूते-स्मर्तव्ये देवयानपितृयाणाख्ये गती स्मर्येते-योगाङ्गतयाऽनुदिनं स्मर्तुम्। तथा ह्युपसंहारः [१]"नैते सृती पार्थ जानन्योगी मुह्यति कश्चन। तस्मात्सर्वेषु कालेषु योगयुक्तो भवार्जुन" इति। [१]"अग्निर्ज्योतिः" [१]"धूमो रात्रिः" इति च देवयानपितृयाणे प्रत्यभिज्ञायेते। उपक्रमे च [१]"यत्र काले तु"इति कालशब्दः कालाभिमानिदेवतातिवाहिकपरः, अग्न्यादेः कालत्वासम्भवात्। अतः [२]"तेऽर्चिषमभिसम्भवन्ति" इति विहितदेवयानानुस्मृतिरत्र विद्यानिष्ठान् प्रति विधीयते, न मुमूर्षून् प्रति मरणकालविशेषः ॥ २० ॥

इति श्रीशारीरकमीमांसाभाष्ये दक्षिणायनाधिकरणम् ॥११ ॥

इति श्रीभगवद्रामानुजविरचिते श्रीशारीरकमीमांसाभाष्ये
चतुर्थस्याध्यायस्य द्वितीयः पादः ॥ २ ॥

---

१. गी. ८-२३,२४,२५,२६,२७ ॥—२. बृ. ८-२-१५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वेदान्तसारे—अतश्चायनेऽपि दक्षिणे ॥ अतः—बन्धहेत्वभावादेव दक्षिणायनमृतस्यापि विदुषो ब्रह्मप्राप्तिरस्त्येव ॥ १९ ॥

योगिनः प्रति स्मर्यते स्मार्ते चैते ॥ १ "यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः" इति न मरणकालस्स्मर्यते; अपितु योगिनो विद्यानिष्ठान्प्रति अर्चिरादिका तद्विपरीताचेति एते-स्मार्ते-स्मृतिविषयभूते, स्मर्येते-१"नैते सृती प्रार्थ जानन्योगी मुह्यति कश्चन" इतिवचनात् ॥ २० ॥

इति वेदान्तसारे दक्षिणायनाधिकरणम् ॥ ११ ॥

इति श्रीभगवद्रामानुजविरचिते वेदान्तसारे चतुर्थस्याध्यायस्य द्वितीयः पादः ॥ २ ॥

वेदान्तदीपे—अतश्चायनेऽपि दक्षिणे ॥ दक्षिणायने मृतस्य विदुषो ब्रह्मप्राप्तिरस्ति, नेति संशयः । २"अथ यो दक्षिणे प्रमीयते पितृणामेव महिमानं गत्वा चन्द्रमसस्सायुज्यं गच्छति" इति विदुषो दक्षिणायने मृतस्य चन्द्रसायुज्यश्रवणात्, चन्द्रं प्राप्तानाम् ३"अथैतमेवाध्वानं पुनर्निवर्तन्ते" इति वचनाच्च, दक्षिणायनमृतस्य ब्रह्मप्राप्तिर्न सम्भवतीति पूर्वः पक्षः। राद्धान्तस्तु-पूर्वोक्ताद्बन्धहेत्वभावाद्विदुषश्चन्द्रं प्राप्तस्यापि पुनरावृत्तिर्न सम्भवति । चन्द्रसायुज्यवचनं विदुषो ब्रह्म पेप्सोर्विश्रमस्थानमात्रविषयम्;आवृत्तिवचनंत्वविदुषामेव। सूत्रार्थस्तु—यतो हेतोर्निशि मृतस्यापि ब्रह्मप्राप्तिः, तत एव बन्धहेत्वभावाद्दक्षिणायने मृतस्यापि ब्रह्मप्राप्तिरस्त्येव ॥ १९ ॥

१"यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः" इति मरणकालविशेषः स्मर्यत इति चेत्, तत्राह—

योगिनः प्रति स्मर्येते स्मार्ते चैते ॥ योगिनः - ब्रह्मविद्यानिष्ठान्प्रति एते-देवयानपितृयाणगती, स्मार्ते स्मर्येते स्मार्ते—स्मृतिविषयभूते अहरहस्स्मर्तव्ये- स्मर्येते इत्यर्थः— १"यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः"

---

१. गी. ८-२३-२७ ॥—२. तै. ना. ५२-अनु ॥—३. छा. ५-१०-५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इत्यादिना १"नैते सृती पार्थ जानन्योगी मुह्यति कश्चन। तस्मात्सर्वेषु कालेषु योगयुक्तो भवार्जुन" इत्यन्तेन। न मुमूर्षून् प्रति कालविशेषोपादानं स्मर्यते। आतिवाहिकगणस्य कालाभिमानिदेवताविशेषभूयस्त्वेन १"यत्र काले" इत्युच्यते ॥ २० ॥

इति वेदान्तदीपे दक्षिणायनाधिकरणम् ॥ ११ ॥

इति श्रीभगवद्रामानुजविरचिते श्रीवेदान्तदीपे चतुर्थस्याध्यायस्य द्वितीयः पादः ॥ २ ॥

---

१. गी. ८-२७-२३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीमते रामानुजाय नमः

श्रीभगवद्रामानुजविरचिते

श्रीशारीरकमीमांसाभाष्ये

(चतुर्थाध्याये - तृतीयः पादः- अर्चिराद्यधिकरणम् ॥१॥)

अर्चिरादिना तत्प्रथितेः । ४ । ३ । १ ॥

विदुष उत्क्रान्तस्य नाडीविशेषेण हार्दानुग्रहाद्गत्युपक्रम उक्तः । तस्य गच्छतो मार्ग इदानीं निर्णीयते । तत्र श्रुतिषु मार्गप्रकाराः बहुधा आम्नायन्तेः छान्दोग्ये तावत् [१]"यथा पुष्करपलाश आपो न श्लिष्यन्ते एवमेवंविदि पापं कर्म न श्लिष्यते" इत्युपक्रम्य ब्रह्मविद्यामुपदिश्याम्नायते [२]"अथ यदु चैवास्मिन्च्छव्यं कुर्वन्ति यदुच न अर्चिषमेवाभिसम्भवन्ति अर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान् षडुदङ्डेति मासांस्तान् मासेभ्यः संवत्सरं संवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषोऽमानवः । स एनान् ब्रह्म गमयत्येष देवपथो ब्रह्म पथः एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्ते" इति । तथाऽत्रैवाष्टमे [३]"अथैतैरेव रश्मिभिरूर्ध्वमाक्रमते" इति । कौषीतकिनश्च देव-

१. छा. ४-१४-३ ॥—२. छा. ४-१५-५,६ ॥—३. छा. ८-६-५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यानमार्गमन्यथाऽधीयते [१]"स एतं देवयानं पन्थानमापद्याग्निलोकमागच्छति स वायुलोकं स वरुणलोकं स आदित्यलोकं स इन्द्रलोकं स प्रजापतिलोकं स ब्रह्मलोकम्"इति। तथा बृहदारण्यके [२]"य एवमेतद्विदुर्यचेमेऽरण्ये श्रद्धां सत्यमुपासते तेऽर्चिषमभिसम्भवन्ति अर्चिषोऽहरह्न अपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान् षण्मासानुदङ्ङादित्य एति मासेभ्यो देवलोकं देवलोकादादित्यमादित्याद्वैद्युतं वैद्युतात्पुरुषोऽमानवस्स एत्य ब्रह्मलोकान् गमयति" इति। तत्रैव पुनरन्यथा [३]"यदा वै पुरुषोऽस्माल्लोकात्प्रैति स वायुमागच्छति तस्मै स तत्र विजिहीते यथा रथचक्रस्य खं तेन स ऊर्ध्वमाक्रमते स आदित्यमागच्छति तस्मै स तत्र विजिहीते यथा आडम्बरस्य खं तेन स ऊर्ध्वमाक्रमते स चन्द्रमसमागच्छति तस्मै स तत्र विजिहीते यथा दुन्दुभेः खम्" इत्यादि। तत्र संशयः—किमर्चिरादिरेक एव मार्ग आभिश्श्रुतिभिः प्रतिपाद्यत इति,तेनैव ब्रह्म गच्छति विद्वान्, उत तस्मादन्येऽन्यत्र मार्गा इति,तैर्वाऽनेन वेत्यनियमः—इति। किं युक्तम्? अनियम इति। कुतः? अनेकरूपत्वान्नैरपेक्ष्याच्चेति॥

(सिद्धान्तः)

एवं प्राप्तेऽभिधीयते—अर्चिरादिना—इति। अर्चिरादिरेक एव मार्गस्सर्वत्र प्रतिपाद्यते। अतोऽर्चिरादिनैव गच्छति। कुतः? तत्प्रथितेः—तस्यैव सर्वत्र प्रथितेः। प्रथितिः—प्रसिद्धिः, तस्यैव सर्वत्र प्रत्यभिज्ञानादित्यर्थः। प्रत्यभिज्ञानात्स एव मार्गस्सर्वत्र न्यूनाधिकभावेन प्रतिपाद्यत इति विद्यागुणोपसंहारवदन्यत्रोक्तानामन्यत्रोपसंहारः क्रियते। छान्दोग्ये तावदुपकोसलविद्यायां पञ्चाग्निविद्यायां चैकरूप एवाम्नायते; वाजसनेयके च पञ्चाग्निविद्यायां तथैवार्चिरादिः अल्पान्तर आम्नायते; अतस्त-

---

१. कौ. १-अ. ३ ॥—२. बृ. ८-२-१५॥—३. बृ. ७-१०-१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्रापि स एवेति प्रतीयते । अन्यत्रापि सर्वत्राग्न्यादित्यादयः प्रत्यभिज्ञायन्ते ॥ १ ॥

इति श्रीशारीरकमीमांसाभाष्ये अर्चिराद्यधिकरणम् ॥ १ ॥

वेदान्तसारे—अर्चिरादिना तत्प्रथितेः ॥ अर्चिरादिनैकेन विद्वान् गच्छति, सर्वासु श्रुतिषु तच्चिह्नैस्तत्प्रत्यभिज्ञानात् ॥ १ ॥

इति वेदान्तसारे अर्चिराद्यधिकरणम् ॥ १ ॥

वेदान्तदीपे—अर्चिरादिना तत्प्रथितेः ॥ किं विद्वानर्चिरादिनैकेन मार्गेण गच्छति, उत तेन वाऽन्येन वेत्यनियम इति संशयः। तदर्थं परीक्ष्यते—किं सर्वासु श्रुतिष्वर्चिरादिरेक एव मार्ग आम्नायते, उत तत्रतत्रान्य इति । यदाऽर्चिरादिरेक एव सर्वत्रोक्तः ; तदा तेनैव गच्छति । यदा तत्रतत्राम्नाता अन्ये, तदाऽन्यैर्वाऽनेन वेत्यनियम इति। छान्दोग्यवाजसनेयकादिषु नानाविधाः गतिप्रकाराश्श्रूयन्ते। छान्दोग्ये१"यथा पुष्करपलाश आपो न श्लिष्यन्ते"इत्युपक्रम्य,२"सर्वाणि...नयति"२"सर्वेषु लोकेषु भाति य एवं वेद"२"अथ यदु चैवास्मिञ्छव्यं कुर्वन्ति यदु च नार्चिषमेवाभिसम्भवन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान् षडुदङ्एति मासांस्तान्मासेभ्यस्संवत्सरं संवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषोऽमानवस्स एनान्ब्रह्म गमयत्येष देवपथो ब्रह्मपथ एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्ते"इति।बृहदारण्यके ३"य एवमेतद्विदुर्ये चामी अरण्ये श्रद्धां सत्यमित्युपासते तेऽर्चिषमभिसम्भवन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान् षण्मासानुदङ्एति मासेभ्यो देवलोकं देवलोकादादित्यमादित्याद्वैद्युतं वैद्युतात्पुरुषोऽमानवस्स एत्य ब्रह्मलोकान्गमयति"इति। तत्रैवान्यथा ४"यदा वै पुरुषोऽस्माल्लोकात्प्रैति स वायुलोकमागच्छति तस्मै स तत्र विजिहीते यथा रथचक्रस्य खं तेन स ऊर्ध्वमाक्रमते स आदित्यमागच्छति तस्मै स तत्र विजिहीते यथाऽऽडम्बरस्य खं तेन स ऊर्ध्वमाक्रमते स चन्द्रमसमागच्छति तस्मै स तत्र विजिहीते यथा दुन्दुभेः खम्" इत्यादिषु। तेषां ब्रह्मप्राप्तौ नैरपेक्ष्यश्रवणात्तैर्वाऽर्चिरादिना वेति विकल्प इति पूर्वः पक्षः। राद्धान्तस्तु—सर्वत्रार्चिराद्यन्तर्भूतादित्यादीनां दर्शनात्स एवेति प्रत्यभिज्ञानात्, अन्यत्रोक्तानामन्यत्रोपसंहाराच्च, सर्वत्रार्चिरादिरेक एव मार्ग इति तेनैव गच्छति विद्वान्। सूत्रार्थस्तु—अर्चिरादिनैव ग-

१. छा. ४-१४-३॥-२. छा. ४-१५-३,४,५॥—३. बृ. ८-२-१५॥—४. बृ. ७-१०-१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

च्छति विद्वान्। कुतः? तत्प्रथितेः; प्रथितिः-प्रसिद्धिः; सर्वत्र तत्प्रत्यभिज्ञानादित्यर्थः ॥ १ ॥

इति वेदान्तदीपे अर्चिराद्यधिकरणम् ॥ १ ॥

(श्रीशारीरकमीमांसाभाष्ये वाय्वधिकरणम् ॥ २ ॥)

वायुमब्दादविशेषविशेषाभ्याम् । ४ । ३ । २ ॥

अर्चिरादिनैव गच्छन्ति विद्वांस इत्युक्तम्; तत्रार्चिरादिके मार्गे छन्दोगाः मासादित्ययोरन्तराले संवत्सरमधीयते–१"मासेभ्यः संवत्सरं संवत्सरादादित्यम्" इति। वाजसनेयिनस्तु तयोरेवान्तराले देवलोकं २ "मासेभ्यो देवलोकं देवलोकादादित्यम्" इति। उभयत्रापि मार्गस्यैकत्वादुभावुभयत्रोपसंहार्यौ। तत्र मासादूर्ध्वमभिहितयोस्संवत्सरदेवलोकयोः पञ्चम्याऽभिहितस्य श्रौतक्रमस्य तुल्यत्वेऽपि१"अर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान् षडुदङ्ङेतिमासांस्तान्"इत्यधिककालानां न्यूनकालेभ्य उत्तरोत्तरत्वेन निवेशदर्शनात्संवत्सरस्यैव मासादनन्तरं बुद्धौ विपरिवृत्तेः संवत्सर एव मासादूर्ध्वं निवेशयितव्य इति तत ऊर्ध्वं देवलोक इति निश्चीयते। अन्यत्र वाजसनेयिनः ३"यदा वै पुरुषोऽस्माल्लोकात्प्रैति स वायुमागच्छति तस्मै स तत्र विजिहीते" यथा रथचक्रस्य खं तेन स ऊर्ध्वमाक्रमते स आदित्यमागच्छति" इत्यादित्यात्पूर्वं वायुमधीयते। कौषीतकिनस्तु ४"स एतं देवयानं पन्थानमापद्याग्निलोकमागच्छति स वायुलोकम्" इत्यग्निलोकशब्दनिर्दिष्टादर्चिषः परं वायुमधीयते। तत्र कौषीतकिनां पाठक्रमेणार्चिषः परत्वेन प्राप्तस्य वायोर्वाजसनेयिनां ३"तेन स ऊर्ध्वमाक्रमते स आदित्यमागच्छति" इत्यूर्ध्वशब्दनिर्दिष्टश्रौतक्रमेण पाठक्रमाद्बलीयसा आदित्यात्पूर्वं प्रवेशो

---

१. छा. ४-१५-५॥—२. बृ. ८-२-१५॥—३. बृ. ७-१०-१॥—४. कौ. १-अ. ३॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निश्चीयते। अत आदित्यात्पूर्वं संवत्सरादूर्ध्वं देवलोको वायुश्च प्राप्तौ। तत्रेदं चिन्त्यते—किं देवलोको वायुश्चार्थान्तरभूतौ यथेष्टक्रमेण विद्वानभिगच्छेत्, उतानर्थान्तरत्वेन संवत्सरादूर्ध्वं देवलोकं सन्तं वायुमभिगच्छेत्—इति। किं युक्तम्? भिन्नार्थत्वम्, प्रसिद्धेः। भिन्नार्थत्वेचोर्ध्वशब्देन पञ्चम्या चोभयोस्संवत्सरादित्यान्तराले श्रुतिक्रमेण प्राप्तत्वात्, विशेषाभावाच्च यथेष्टम्—

(सिद्धान्तः)

इति प्राप्त उच्यते—वायुमब्दात्—इति। वायुं संवत्सरादूर्ध्वमभिगच्छेत्। कुतः? अविशेषविशेषाभ्यां वायोरेव निर्दिष्टत्वात्। देवलोकशब्दो हि अविशेषेण—सामान्येन देवानां लोक इत्यनेन रूपेण वायुमभिधत्ते। १"स वायुमागच्छति तस्मै स तत्र" इति वायुशब्दो विशेषेण वायुमभिधत्ते। अतो देवलोकवायुशब्दाभ्याम् अविशेषविशेषाभ्यां वायुरेवाभिधीयत इति संवत्सरादूर्ध्वं वायुमेवाभिगच्छेत्। कौषीतकिनां वायुलोकशब्दश्चाग्निलोकशब्दवत् वायुश्चासौ लोकश्चेति व्युत्पत्त्या वायुमेवाभिधत्ते। वायुश्च देवानामावासभूत इत्यन्यत्र श्रूयते २"योऽयं पवत एष देवानां गृहाः" इति ॥ २ ॥

इति श्रीशारीरकमीमांसाभाष्ये वाय्वधिकरणम् ॥ २ ॥

वेदान्तसारे—वायुमब्दादविशेषविशेषाभ्याम्॥ ३"मासेभ्यस्संवत्सरं संवत्सरादादित्यम्" इत्यब्दादित्ययोर्मध्ये द्वयोः प्रकरणान्तरयोः एकत्र देवलोकः श्रुतः, इतरत्र वायुशब्दः। तत्र देवलोकशब्दोऽपि देवानां लोक इति वायोरविशेषेण वाचकः। वायुशब्दश्च तस्यैव विशेषेण वाचक इति अविशेषविशेषाभ्यां देवलोकवायुशब्दाभ्यां वायुरेक एव विहित इत्यब्दादूर्ध्वमादित्यात्पूर्वं वायुमेव निवेशयेत् ॥ २॥

इति वेदान्तसारे वाय्वधिकरणम् ॥ २ ॥

---

१. बृ. ७-१०-१ ॥—२ ॥—३. छा. ४-१५-५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वेदान्तदीपे—वायुमब्दादविशेषविशेषाभ्याम् ॥ १"तेऽर्चिषमभिसम्भवन्त्यर्चिषोऽहरह्नः" इत्यारभ्य १"मासेभ्यस्संवत्सरं संवत्सरादादित्यम्" इति च्छान्दोग्ये श्रुतम्।तत्र संवत्सरादित्ययोर्मध्ये देवलोको वायुश्च श्रुतौ श्रुत्यन्तरे । द्वयोः प्रकरणयोः किं देवलोको वायुश्चान्तरभूतौ, उत वायुरेक एवेति संशयः । शब्दभेदादर्थान्तरभूताविति पूर्वः पक्षः। अर्थान्तरत्वे सति२"देवलोकादादित्यम्"इति देवलोकस्य३"तेन स ऊर्ध्वमाक्रमते स आदित्यम्"इति वायोश्चादित्यात्पूर्वत्वेन श्रौतक्रमनिर्दिष्टत्वाद्देवलोकवायू यथेष्टक्रमेण निवेशयितव्यौ । राद्धान्तस्तु—वायुरेव देवलोकशब्देन निर्दिष्ट इति तस्मादनन्यः। देवानां लोक इति हि देवलोकः, देवानां वासस्थानमित्यविशेषेण निर्दिष्टम्।४"योऽयं पवत एष एव देवानां गृहाः" इति वायोर्विशेषेण देवानां वासस्थानत्वेन श्रुततत्वादविशेषनिर्दिष्टो देवलोको वायुरेवेति निश्चीयत इति । संवत्सरादूर्ध्वं वायुर्वायोरादित्य इति क्रमश्च स्यात् ॥ २ ॥

सूत्रार्थस्तु-अब्दात्-संवत्सरादूर्ध्वम् आदित्यात्पूर्वं वायुमेकमेव निवेशयेत्, देवलोकवायुशब्दाभ्याम् अविशेषविशेषाभ्यां वायोरेकस्यैव निर्दिष्टत्वात् । देवानां वासस्थानमित्यविशेषेण हि देवलोकशब्दः वायुं देवानामावासस्थानभूतमभिदधाति ; वायुशब्दस्त्वमेव विशेषेणेति द्वयोः प्रकरणद्वयविहितयोरेकत्वादित्यर्थः ॥ २॥

इति वेदान्तदीपे वाय्वधिकरणम् ॥ २ ॥

श्रीशारीरकमीमांसाभाष्ये वरुणाधिकरणम् ॥ ३ ॥

तटितोऽधि वरुणस्सम्बन्धात् । ४ । ३ । ३ ॥

कौषीतकिनां५"स एतं देवयानं पन्थानमापद्याग्निलोकमागच्छति स वायुलोकं स वरुणलोकं स आदित्यलोकं स इन्द्रलोकं स प्रजापतिलोकं स ब्रह्मलोकम्" इत्यत्राग्निलोकशब्दस्यार्चिःपर्यायत्वेन प्राथम्यमविगीतम् । वायोश्च संवत्सरादूर्ध्वं निवेश उक्तः । आदित्यस्याप्यत्र प्राप्तपाठक्रमबा-

---

१. छा. ४-१५-५ ॥—२. बृ. ८-२-१५ ॥—३. बृ. ७-१०-१ ॥—४॥—५. कौ. १-अ. ३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

धेन १"देवलोकादादित्यमादित्याद्वैद्युतम्" इति वाजसनेयकोक्तश्रुतिक्रमादेवलोकशब्दाभिहिताद्वायोरुपरि निवेशस्सिद्धः । इदानीं वरुणेन्द्रादिषु चिन्ता । किमेते वरुणादयो यथापाठं वायोरूर्ध्वं निवेशयितव्याः, आहोस्विद्विद्युतोऽधीति विशये, अर्चिः प्रभृतिषु सर्वेषु २"अर्चिषोऽहः" इत्यादिश्रुतिक्रमोपरोधाद्विद्युतः परस्ताच्च ३"तत्पुरुषोऽमानवस्स एनान् ब्रह्म गमयति" इति विद्युत्पुरुषस्य ब्रह्मगमयितृत्वश्रवणाच्च सर्वत्रावकाशाभावेनाप्राप्तौ च उपदेशवैयर्थ्यायावश्यं कस्यचिद्वाध्यत्वे पाठक्रमानुरोधेन वायोरनन्तरं वरुणो निवेशयितव्यः। वाय्वादित्ययोः क्रमस्य बाधितत्वेनेन्द्रप्रजापती अपि ह्यतैव निवेशयितव्यौ—

—●●◆◆(सिद्धान्तः)◆◆●●—

इति प्राप्ते श्रूयते—तटितोऽधि वरुणः—इति। वरुणस्तावद्विद्युत उपरिष्टान्निवेशयितव्यः । कुतः ; सम्बन्धात्—मेघोदरवर्तित्वाद्विद्युतो वरुणेन सम्बन्धो लोकवेदयोः प्रसिद्धः । एतदुक्तं भवति—वरुणादीनामुपदेशवैयर्थ्याय क्वचिन्निवेशयितव्यत्वे सति पाठक्रमादर्थक्रमस्य बलीयस्त्वाद्विद्युतोऽधि वरुणो निवेशयितव्यः ; ततश्चामानवस्य गमयितृत्वं व्यवधानसहमित्यवगम्यते । तस्य च व्यवधानसहत्वादिन्द्रादेश्चोपदिष्टस्यावश्यनिवेशयितव्यस्य वरुणादुपर्युपदिष्टत्वादागन्तूनामन्ते निवेशयितव्यत्वाच्च वरुणादुपरीन्द्रादिर्निवेशयितव्य इति ॥ ३ ॥

इति श्रीशारीरकमीमांसाभाष्ये वरुणाधिकरणम् ॥ ३ ॥

वेदान्तसारे—तटितोऽधि वरुणस्सम्बन्धात्॥ तटितोऽनन्तरं वरुणो निवेश्यः, मेघोदरवृत्तित्वाद्विद्युतः,मेघस्थजलात्मकत्वेन लोकवेदयोर्वरुणस्य विद्युत्सम्बन्धावगमात्, तदनन्तरमिन्द्रप्रजापती पाठक्रमात् ,प्रबलविशेषाभावाच्च॥

इति वेदान्तसारे वरुणाधिकरणम् ॥ ३ ॥

---

१. बृ. ८-२-१५ ॥—२. छा. ४-१५-५ ॥—३. छा. ४-१५-५,६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वेदान्तदीपे—तटितोऽधि वरुणस्सम्बन्धात्॥ छान्दोग्यवाजसनेयककौषीतकीप्रभृतिष्वाम्नातस्यार्चिरादिमार्गस्यार्चिरहरापूर्यमाणपक्षोत्तरायणसंवत्सरवाय्वादित्यचन्द्रविद्युद्वरुणेन्द्रप्रजापतिरूपस्योपसंहारे वायुपर्यन्तस्य श्रुत्यादिभिः क्रमप्रकार उक्तः। वरुणेन्द्रप्रजापतीनां किं विद्युत उपरि निवेशः, उत वायोरुपरीति संशयः।१"स वायुलोकं स वरुणलोकम्" इति कौषीतकीपाठक्रमेण वायोरुपरि वरुणस्य निवेशः। इन्द्रादेरपि वरुणनिवेशाय वाय्वादित्ययोः क्रमस्य बाधितत्वात्तत्रैव वरुणोपरीति पूर्वः पक्षः। राद्धान्तस्तु—विद्युतो मेघोदरवर्तित्वेन विद्युद्वरुणयोर्लोके वेदे च 'सम्बन्धावगमात्पाठक्रमादर्थक्रमस्य बलीयस्त्वेन वरुणस्य विद्युत उपरि निवेशः कार्यः। इन्द्रादेरपि वरुणनिवेशाय विद्युतो व्यवधानसहत्वदर्शनाद्वरुणोपरि निवेशः। सूत्रं च व्याख्यातम्॥

इति वेदान्तदीपे वरुणाधिकरणम्॥ ३॥

(श्रीशारीरकमीमांसाभाष्ये आतिवाहिकाधिकरणम्॥)

आतिवाहिकास्तल्लिङ्गात्। ४। ३। ४॥

इदमिदानीं चिन्त्यते—किमर्चिरादयो मार्गचिह्नभूताः, उत भोगभूमयः, अथवा विदुषां ब्रह्म प्रेप्सतामतिवोढारः—इति। किं तावद्युक्तम्? मार्गचिह्नभूता इति। कुतः? उपदेशस्य तथाविधत्वात्; दृश्यते हि लोके ग्रामादीन् प्रति गन्तॄणामेवंविधो देशिकैरुपदेशः—'इतो निष्क्रम्यामुकं वृक्षममुकां नदीममुकं च पर्वतपार्श्वं गत्वाऽमुकं ग्रामं गच्छ' इति। अथवा, भोगभूमय एतास्स्युः, कालविशेषतया प्रसिद्धानामहरादीनां मार्गचिह्नत्वानुपपत्तेरन्यस्य च मार्गचिह्नभूतस्यैतेषामनभिधायकत्वात्। भोगभूमित्वं च २"एत एव लोका यदहोरात्राण्यर्धमासा मासा ऋतवस्संवत्सराः" इत्यहरादीनां लोकत्ववचनादुपपद्यते। अत एव च कौ-

---

१. कौ. १-अ. ३॥—२. तै. ना. ८०-अनु॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

षीतकिनः १"अग्निलोकमागच्छति" इत्यादिना लोकशब्दानुविधानेनार्चिरादीन् पठन्तीति ॥

(सिद्धान्तः)

एवं प्राप्ते ब्रूमः—आतिवाहिकाः—इति। विदुषामतिवाहे परमपुरुषेण नियुक्ताः आतिवाहिकाः देवताविशेषा एतेऽर्चिरादयः । कुतः ? तल्लिङ्गात्—अतिवहनलिङ्गात् । अतिवहनं हि गन्तॄणां गमयितृत्वम् । गमयितृत्वं च २"तत्पुरुषोऽमानवस्स एनान् ब्रह्म गमयति" इत्युपसंहारे श्रूयमाणं पूर्वेषामप्यविशेषश्रुतानां स एव सम्बन्ध इति गमयति । वदन्ति चार्चिरादयः शब्दाः अर्चिराद्यात्मभूतानभिमानिदेवताविशेषान् । ३"तं पृथिव्यब्रवीत्" इतिवत् ॥ ४ ॥

यद्येवं २"तत्पुरुषोऽमानवस्स एनान् ब्रह्म गमयति" इति वैद्युतस्यैव पुरुषस्य ब्रह्मगमयितृत्वश्रुतेर्विद्युतः परेषां वरुणादीनां कथमातिवाहिकत्वेनान्वय इत्यत्राह—

वैद्युतेनैव ततस्तच्छ्रुतेः । ४ । ३ । ५ ॥

ततः—विद्युत उपरि, वैद्युतेन—अमानवेनैवातिवाहिकेन विदुषामाब्रह्मप्राप्तेर्गमनम् । कुतः? तच्छ्रुतेः २"स एनान् ब्रह्म गमयति" इति तस्यैव गमयितृत्वश्रुतेः । वरुणादयस्त्वनुग्राहका इति तेषामप्यातिवाहिकत्वेनान्वयो विद्यत एव ॥ ५ ॥

इति श्रीशारीरकमीमांसाभाये आतिवाहिकाधिकरणम् ॥ ४ ॥

वेदान्तसारे—आतिवाहिकास्तल्लिङ्गात् ॥ अर्चिराद्यभिमानिदेवताविशेषाः विदुषामातिवाहिकत्वेन परमपुरुषनियुक्ताः— इति विज्ञायते, २"सएनान् ब्रह्म गमयति" इति तेष्वेकत्र गमयितृत्वदर्शनात् लिङ्गात् ॥ ४ ॥

वैद्युतेनैव ततस्तच्छ्रुतेः॥ २" चन्द्रमसो विद्युतं तत्पुरुषोऽमानवस्स

१. कौ. १-अ. ३ ॥—२. छा. ४-१५-५,६ ॥—३. यजु. ५-५-२॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एनान् ब्रह्म गमयति" इति श्रुतेः वैद्युतपुरुषात्परस्त्वात्स एव ब्रह्म गमयिता। वरुणेन्द्रप्रजापतीनां तदनुग्राहकत्वमेव॥ ५॥

इति वेदान्तसारे आतिवाहिकाधिकरणम् ॥ ४ ॥

वेदान्तदीपे—आतिवाहिकास्तल्लिङ्गात् ॥ किमर्चिरादयो विदुषो ब्रह्म प्रेप्सोर्मार्गचिह्नभूताः, उत गमयितार इति संशयः। 'अमुकं वृक्षममुकां नदीममुकं पर्वतपार्श्वे गत्वाऽमुकं ग्रामं गच्छ' इत्यादिदेशिकोपदेशप्रकारदर्शनान्मार्गचिह्नभूताः—इति पूर्वः पक्षः। राद्धान्तस्तु १"स एनान्ब्रह्म गमयति" इति वैद्युतपुरुषस्य गमयितृत्वदर्शनात् इतरेषां चाविशेषनिर्दिष्टानां स एव सम्बन्ध इति निश्चीयते। २"अग्निर्लोकम्" इत्यादिलोकशब्दोऽपि मध्ये भोगाभावाद्गमयितृत्व एवोपपद्यते। सूत्रार्थस्तु—आतिवाहिकाः—विदुषामतिवाहे परमपुरुषेण नियुक्ताः,अर्चिराद्यभिमानिदेवताविशेषाः गमयितार इत्यर्थः; १"स एनान्ब्रह्म गमयति" इति लिङ्गात् ॥ ४ ॥

वैद्युतेनैव ततस्तच्छ्रुतेः॥ ततः विद्युत उपरि वैद्युतेन विदुषो गमनम्, तच्छ्रुतेः—१"स एनान्ब्रह्म गमयति" इति तस्यैव श्रुतेः। वरुणादीनां तदनुग्राहकत्वेन गमयितृत्वमिति निश्चीयत इत्यर्थः॥ ५॥

इति वेदान्तदीपे आतिवाहिकाधिकरणम् ॥ ४ ॥

श्रीशारीरकमीमांसाभाष्ये कार्याधिकरणम् ॥ ५ ॥

कार्यं बादरिरस्य गत्युपपत्तेः । ४ । ३ । ६ ॥

अर्चिरादिनैव गच्छति विद्वान्; अर्चिरादिरमानवान्तश्च गण आतिवाहिको विद्वांसं ब्रह्म गमयतीत्युक्तम्। इदमिदानीं चिन्त्यते। किमयमर्चिरादिको गणः कार्यं हिरण्यगर्भमुपासीनान्नयति, उत परमेव ब्रह्मोपासीनान्, अथ परं ब्रह्मोपासीनान् प्रत्यगात्मानं ब्रह्मात्मकतयोपासीनांश्च—इति विशये—कार्यमुपासीनानेव गमयतीति बादरिराचार्यो

१. छा. ४-१५-६ ॥—२. कौषी. १-अ. ३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मन्यते। कुतः? अस्य–हिरण्यगर्भमुपासीनस्यैव गत्युपपत्तेः; न हि परिपूर्णं सर्वज्ञं सर्वगतं सर्वात्मभूतं परं ब्रह्मोपासीनस्य तत्प्राप्तये देशान्तरगतिरुपपद्यते, प्राप्तत्वादेव; नित्यप्राप्तपरब्रह्मविषयाविद्यानिवृत्तिमात्रमेव हि परविद्याकार्यम्। कार्यं तु हिरण्यगर्भरूपं ब्रह्मोपासीनस्य परिच्छिन्नदेशवर्तिप्राप्यप्राप्त्यर्थं गमनमुपपद्यते। अतोऽर्चिरादिरातिवाहिकगणस्तमेव नयति॥ ६॥

विशेषितत्वाच्च। ४। ३। ७॥

१"पुरुषोऽमानव एत्य ब्रह्मलोकान्गमयति" इति लोकशब्देन बहुवचनेन च लोकविशेषवर्तिनं हिरण्यगर्भमुपासीनमेवामानवो गमयतीति विशेष्यते। किञ्च २"प्रजापतेस्सभां वेश्म प्रपद्ये" इति कार्यस्य हिरण्यगर्भस्य समीपगमनमर्चिरादिना गतः प्रत्यभिसन्धत्ते॥ ७॥

नन्वेवं३"तत्पुरुषोऽमानवः"४"स एनान् ब्रह्म गमयति"इत्ययं निर्देशो नोपपद्यते; हिरण्यगर्भनयने हि 'स एनान् ब्रह्माणं गमयति' इति निर्देष्टव्यं स्यात्; अत आह—

सामीप्यात्तु तद्व्यपदेशः। ४। ३। ८॥

५"यो ब्रह्माणं विदधाति" इति हिरण्यगर्भस्य प्रथमजत्वेन ब्रह्मसामीप्यात्तस्य ब्रह्मशब्देन व्यपदेश इति गत्यनुपपत्तिविशेषणादिभिरुक्तैर्हेतुभिर्निश्चीयत इत्यर्थः॥ ८॥

अथ स्यात्–अर्चिरादिना हिरण्यगर्भप्राप्तौ ४"एष देवपथो ब्रह्मपथ एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्ते" ६"तयोर्ध्वमायन्नमृतत्वमेति" ७इत्यमृतत्वप्राप्त्यपुनरावृत्तिव्यपदेशो नोपपद्यते,हिरण्यगर्भ-

१. बृ. ८-२-१५॥—२. छा. ८-१४-१॥—३. छा. ४-१५-५॥—४. छा. ४-१५-६॥—५. श्वे. ६-१८॥—६. कठ. २-६-१६॥—७. इत्यमृतत्वाप्तुनरावृत्तिव्यपदेशः. पा॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्य कार्यभूतस्य द्विपरार्धकालावसाने विनाशशास्त्रात् १"आ ब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन" इतिवचनाद्धिरण्यगर्भं प्राप्तस्य पुनरावृत्तेरवर्जनीयत्वात्–इतिः अत्राह—

कार्यात्यये तदध्यक्षेण सहातः परमभिधानात् । ४ । ३ । ९ ॥

कार्यस्य-ब्रह्मलोकस्यात्यये तदध्यक्षेण - हिरण्यगर्भेणाधिकारिकेणावसिताधिकारेण विदुषा सह स्वयमपि तत्राधिगतविद्यः;अतः–कार्याद्ब्रह्मलोकात् परं ब्रह्म प्राप्नोतीत्यर्चिरादिना गतस्यामृतत्वप्राप्त्यपुनरावृत्त्यभिधानात्२"ते ब्रह्मलोके तु परान्तकाले परामृतात्परिमुच्यन्ति सर्वे" इति वचनाच्चावगम्यते ॥ ९ ॥

स्मृतेश्च । ४ । ३ । १० ॥

स्मृतेश्चायमर्थोऽवगम्यते–३"ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे। परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम्" इति। अतः कार्यमुपासीनमेवार्चिरादिको गणो नयतीति बादरेर्मतम् ॥ १० ॥

अत्र जैमिनिः पक्षान्तरपरिग्रहेण प्रत्यवतिष्ठते—

परं जैमिनिर्मुख्यत्वात् । ४ । ३ । ११ ॥

परं ब्रह्मोपासीनानर्चिरादिर्नयतीति जैमिनिराचार्यो मन्यते;कुतः? मुख्यत्वात्–४"तत्पुरुषोऽमानवस्स एनान् ब्रह्म गमयति" इति ब्रह्मशब्दस्य परस्मिन्नेव ब्रह्मणि मुख्यत्वात् । प्रमाणान्तरेण कार्यत्वनिश्चये सत्येव हि लाक्षणिकत्वं युक्तम् । न च गमनानुपपत्तिः प्रमाणम्, परस्य ब्रह्मणस्सर्वगतत्वेऽपि विदुषो विशिष्टदेशगतस्यैवाविद्यानिवृत्तिशा-

१. गी. ८-१६ ॥ —२. तै. ना. १०-अनु-२४ ॥ —३. कूर्मपुराणे. पूर्वख. १२-२६९ ॥—४. छा. ४-१५-५, ६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्रात्। यथा हि विद्योत्पत्तिर्वर्णाश्रमधर्मशौचाचारदेशकालाद्यपेक्षा [१]"तमेतं वेदानुवचनेन" इत्यादिशास्त्रादवगम्यते, तथा निश्शेषाविद्यानिवर्तनरूपविद्यानिष्पत्तिरपि विशिष्टदेशगतिसापेक्षेति गतिशास्त्रादवगम्यते। विदुष उत्क्रान्तिप्रतिषेधादि तु पूर्वमेव परिहृतम्। यत्तु [२]"ब्रह्मलोकान्" इति लोकशब्दबहुवचनाभ्यां विशेषणात्कार्यभूतहिरण्यगर्भप्रतीतिरिति; तदयुक्तम्, निषादस्थपतिन्यायेन ब्रह्मैव लोको ब्रह्मलोक इति कर्मधारयस्यैव युक्तत्वात्, अर्थस्य चैकत्वे निश्चिते बहुवचनस्य [३]"अदितिः पाशान्" इतिवदुपपत्तेः; परस्य ब्रह्मणः परिपूर्णस्य सर्वगतस्य सत्यसङ्कल्पस्य स्वेच्छापरिकल्पिताः स्वासाधारणा अप्राकृताश्च लोका नात्यन्ताय न सन्ति, श्रुतिस्मृतीतिहासपुराणप्रामाण्यात् ॥ ११ ॥

दर्शनाच्च। ४। ३। १२॥

दर्शयति श्रुतिः मूर्धन्यनाड्या निष्क्रम्य देवयानेन गतस्य परब्रह्मप्राप्तिम् [४]"एष सम्प्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते" इति ॥ १२ ॥

यदुक्तं [५]"प्रजापतेस्सभां वेश्म प्रपद्ये" इत्यर्चिरादिना गतस्य कार्ये प्रत्यभिसन्धिर्दृश्यत इति; तत्रोत्तरं–

नच कार्ये प्रत्यभिसन्धिः। ४। ३। १३॥

न चायं प्रत्यभिसन्धिः कार्ये हिरण्यगर्भे; अपि तु परस्मिन्नेव ब्रह्मणि, वाक्यशेषे [५]"यशोऽहं भवामि ब्राह्मणानाम्" इति तस्याभिसन्धातुस्सर्वाविद्याविमोकपूर्वकसर्वात्मभावाभिसन्धानात्, [६]" अश्व इव रोमाणि विधूय पापं चन्द्र इव राहोर्मुखात्प्रमुच्य धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसम्भवामि" इत्यभिसम्भाव्यस्य ब्रह्मलोकस्याकृतत्व-

१. बृ. ६-४-२२ ॥—२. बृ. ८-२-१५ ॥—३ ॥—४. छा. ८-३-४ ॥—५ छा. ८-१४-१ ॥—६. छा. ८-१३-१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रवणात्, सर्वबन्धविनिर्मोकस्य च साक्षाच्छ्रवणात् । अतः परमेव ब्रह्मोपासीनमर्चिरादिरातिवाहिको गणो नयतीति जैमिनेर्मतम् ॥ १३ ॥

इदानीं बादरायणस्तु भगवान् स्वमतेन सिद्धान्तमाह—

अप्रतीकालम्बनान्नयतीति बादरायण उभयथा च दोषात्तत्क्रतुश्च । ४ । ३ । १४ ॥

अप्रतीकालम्बनान् प्रतीकालम्बनव्यतिरिक्तान् नयत्यर्चिरादिरातिवाहिको गण इति भगवान् बादरायणो मन्यते; एतदुक्तं भवति—कार्यमुपासीनान्नयतीति नायं पक्षस्सम्भवति; परमेवोपासीनानित्ययमपि नियमो नास्ति; न च प्रतीकालम्बनानपि नयति; अपितु ये परं ब्रह्मोपासते, ये चात्मानं प्रकृतिवियुक्तं ब्रह्मात्मकमुपासते; तानुभयविधान्नयति; ये तु ब्रह्मकार्यान्तर्भूतनामादिकं वस्तु देवदत्तादिषु सिंहादिदृष्टिवत् ब्रह्मदृष्ट्या, केवलं वा तत्तद्वस्तूपासते, न तान्नयति। अतः परं ब्रह्मोपासीनानात्मानं च प्रकृतिवियुक्तं ब्रह्मात्मकमुपासीनान्नयति—इति।कुतः? उभयथा च दोषात्। कार्यमुपासीनान्नयतीति पक्षे [१]"अस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसम्पद्य"इत्यादिकाः श्रुतयः प्रकुप्येयुः; परमेवोपासीनानिति नियमे [२]"तद्य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धा तप इत्युपासते तेऽर्चिषमभिसम्भवन्ति" इति पञ्चाग्निविदोऽर्चिरादिर्गणो नयतीति श्रुतिः प्रकुप्येत् । अतः उभयस्मिन्नपि पक्षे दोषस्स्यात्। तस्मादुभयविधान्नयतीति। तदेतदाह—तत्क्रतुश्च—इति। तत्क्रतुः—तथोपासीनस्तथैव प्राप्नोतीत्यर्थः, [३]"यथाक्रतुरस्मिन् लोके पुरुषो भवति तथेतः प्रेत्य भवति" [४]"तं यथायथोपासते"इति न्यायात्।पञ्चाग्निविदोऽप्यर्चिरादिना गतिश्रवणात्, अर्चिरादिना गतस्य ब्रह्मप्राप्त्यपुनरावृत्तिश्रवणाच्च । अत एव

१. छा. ८-३-४ ॥—२. छा. ५-१०-१ ॥—३. छा. ३-१४-१ ॥—४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तत्क्रतुन्यायात्प्रकृतिविनिर्मुक्तब्रह्मात्मकात्मानुसन्धानं सिद्धम्। नामादिप्राणपर्यन्तप्रतीकालम्बनानां तूभयविधश्रुतिसिद्धोपासनाभावादचिन्म्यश्रोपासने तत्क्रतुन्यायाच्चार्चिरादिना गतिर्ब्रह्मप्राप्तिश्च न विद्यते॥ १४॥

तमिमं विशेषं श्रुतिरेव दर्शयतीत्याह—

विशेषञ्च दर्शयति। ४। ३। १५॥

१"यावन्नाम्नो गतं तत्रास्य यथाकामचारो भवति"इत्यादिका श्रुतिः२नामादिप्राणपर्यन्तप्रतीकमुपासीनानां गत्यनपेक्षं परिमितफलविशेषं च दर्शयति; तस्मादचिन्मिश्रं केवलं वाचिद्वस्तु ब्रह्मदृष्ट्या तद्वियोगेन च य उपासते, न तान् नयति, अपितु परं ब्रह्मोपासीनानात्मानं च प्रकृतिवियुक्तं ब्रह्मात्मकमुपासीनानातिवाहिको गणो नयतीति सिद्धम्॥

इति श्रीशारीरकमीमांसाभाष्ये कार्याधिकरणम् ॥ ५ ॥

इति श्रीभगवद्रामानुजविरचिते शारीरकमीमांसाभाष्ये
चतुर्थस्याध्यायस्य तृतीयः पादः॥ ३॥

वेदान्तसारे—कार्यं बादरिरस्य गत्युपपत्तेः॥ कार्यं-हिरण्यगर्भमुपासीनानर्चिरादिर्नयति, अस्यैव गत्युपपत्तेः। न हि सर्वगतं परं ब्रह्मोपासीनानां गतिरस्तीति बादरिः मेने॥ ६॥

विशेषितत्वाच्च॥ ३"पुरुषोऽमानव एत्य ब्रह्मलोकान् गमयति"४"प्रजापतेस्सभां वेश्म प्रपद्ये" इति च विशेषितत्वात् हिरण्यगर्भमेव॥ ७॥

सामीप्यात्तु तद्व्यपदेशः॥ ५" ब्रह्म गमयति " इति ब्रह्मव्यपदेशस्तत्सामीप्यात्; अस्य ६" यो ब्रह्माणं विदधाति पूर्वम्" इति सामीप्यमस्ति हि॥

कार्यात्यये तदध्यक्षेण सहातः परमभिधानात्॥ हिरण्यगर्भप्राप्तावप्यपुनरावृत्तिश्रुत्यविरोधः, हिरण्यगर्भलोकात्यये तदध्यक्षेण सहातः परं ग-

---

१. छा. ७-१-५॥—२. नामादिप्रतीकमुपा. पा॥—३. बृ. ८-२-१५॥—४. छा. ८-१४-१॥—५. छा. ५-१०-२॥—६. श्वे. ६-१८॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

च्छति, १"ते ब्रह्म लोके तु परान्तकाले परामृतात्परिमुच्यन्ति सर्वे" इति श्रुतेः ॥ ९ ॥

स्मृतेश्च ॥ २"ब्रह्मणा सह ते सर्वे" इत्यारभ्य "प्रविशन्ति परं पदम्" इति स्मृतेश्च ॥ १० ॥

परं जैमिनिर्मुख्यत्वात् ॥ परमुपासीनानिति जैमिनिः, ३"ब्रह्म गमयति" इति तत्रैव मुख्यत्वात् ॥ ११ ॥

दर्शनाच्च ॥ ४"अस्माच्छरीरात्समुत्थाय परञ्ज्योतिरुपसम्पद्य" इति श्रुतेश्च ॥ १२ ॥

नच कार्ये प्रत्यभिसन्धिः ॥ ५"प्रजापतेस्सभाम्" इति प्रत्यभिसन्धिश्च न कार्ये, प्रजापतिशब्दस्य ६"पतिं विश्वस्य" इत्यादिश्रुतेः परस्मिन्नेव मुख्यत्वात्; ब्रह्मलोकशब्दश्च कर्मधारयवृत्त्या तत्रैवेत्यभिप्रायः । ७"ते ब्रह्मलोके" इति तु श्रुतिः ब्रह्मैव लोक इति परब्रह्मविषयैव । २"ब्रह्मणा सह ते सर्वे" इति स्मृतिश्च ८"तदुपर्यपि" इति न्यायेन चतुर्मुखलोकस्योपासनविषया ॥ १३ ॥

अप्रतीकालम्बनान्नयतीति बादरायण उभयथा च दोषात्तत्क्रतुश्च ॥ प्रतीकालम्बना हि—नामादिप्राणशब्दनिर्दिष्टप्रत्यगात्मस्वरूपपर्यन्तं सर्वं चिदचिद्वस्तुजातं ब्रह्मदृष्ट्या स्वरूपेण वा ये उपासते, ते; अप्रतीकालम्बनाः—तद्व्यतिरिक्ताः, ये पञ्चाग्निविदः, ये च परं ब्रह्मोपासते; तान्नयत्यर्चिरादिरिति भगवान् बादरायणो मन्यते । कार्यमिति पक्षे, परमेवेति च पक्षे सकलोपनिषद्विरोधरूपदोषः प्रसज्यते । कार्यपक्षे ९"ब्रह्म गमयति"१०"परं ज्योतिरुपसम्पद्य" इत्याद्याः प्रकुप्येयुः । परमेवेति पक्षे११"य एवमेतद्विदुर्ये चेमेऽरण्ये श्रद्धां सत्यमुपासते, तेऽर्चिषमभिसम्भवन्ति" इति श्रुतिः प्रकुप्येत । कार्यपक्षे तत्क्रतुन्यायश्च विरुद्ध्यते । अर्चिरादिना गतानां हि ब्रह्मप्राप्तिरपुनरावृत्तिश्च श्रूयते।पञ्चाग्निविदस्तु प्रकृतिवियुक्तात्मस्वरूपं १२"य आत्मनि तिष्ठन्"

---

१. तै. ना. १०-अनु-२४ ॥—२. कूर्मपुराणे-पूर्वख. १२-२६९ ॥— ३. छा. ४-१५-६ ॥— ४. छा. ८-३-४ ॥— ५. छा. ८-१४-१ ॥— ६. तै. ना. ११-अनु ॥— ७. तै. ना. १०-अनु-२४ ॥—८. शारी. १-३-२५ ॥— ९. छा. ५-१०-२ ॥—१०. छा. ८-३-४ ॥—११. बृ. ८-२-१५ ॥—१२. बृ. ५-७-२२ मा. पा ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इत्यादिनाऽवगतब्रह्मात्मकत्वमुपासत इति ह्यप्रतीकालम्बनत्वम्। तत्क्रतुन्यायाविरोधश्च;उभयेऽपि हि परिपूर्णं ब्रह्मोपासते मुखभेदेन—स्वात्मशरीरकं ब्रह्म केचन, ब्रह्मात्मकस्वात्मानमितरे—इति ॥ १४ ॥

विशेषश्च दर्शयति॥ कार्यमुपासीनानां ब्रह्मप्राप्तिव्यतिरिक्तपरिमितदेशकालफलविशेषश्च दर्शयति श्रुतिः१ "यावन्नास्मो गतम्" इत्यादिका॥ १५॥

इति वेदान्तसारे कार्याधिकरणम् ॥ ५ ॥

इति श्रीभगवद्रामानुजविरचिते श्रीवेदान्तसारे चतुर्थस्याध्यायस्य तृतीयः पादः ॥ ३ ॥

वेदान्तदीपे—कार्यं बादरिरस्य गत्युपपत्तेः॥ किमर्चिरादिको गणः कार्यं हिरण्यगर्भमुपासीनान्नयति, उत परं ब्रह्मोपासीनान्, अथ परं ब्रह्मोपासीनान्, प्रत्यगात्मानं ब्रह्मात्मकतयोपासीनांश्चेति संशयः। कार्यं हिरण्यगर्भमुपासीनानिति पूर्वः पक्षः, तेषामेव गत्युपपत्तेः। न हि परिपूर्णं सर्वगतं परं ब्रह्मोपासीनानां तत्प्राप्तये गतिरुपपद्यते, नित्यप्राप्तत्वात्। अविद्यानिवृत्तिरेव हि कार्या। परमेवोपासीनानित्यपरः पक्षः, २"स एनान्ब्रह्म गमयति" इति ब्रह्मशब्दस्य तत्रैव मुख्यत्वात्। अविद्यानिवृत्तेः फलाभिसन्धिरहितयज्ञाद्यपेक्षावत् श्रवणाद्यपेक्षावच्च गतिश्रुत्या देशविशेषापेक्षा च विद्यत इति निश्चीयते। राद्धान्तस्तु—परमुपासीनानन्यानपि नयति, २"तद्य इत्थं विदुर्येचेमेऽरण्ये श्रद्धा तप इत्युपासते तेऽर्चिषमभिसम्भवन्ति" इति पञ्चाग्निविदां परं ब्रह्मोपासीनानां चार्चिरादिगतिश्रुतेः। पञ्चाग्निविदो हि प्रकृतिविमुक्तब्रह्मात्मकात्मस्वरूपविदः। ते च तत्प्राप्य पुनर्न निवर्तन्ते। परं ब्रह्मोपासीनास्तु यथावस्थितं परिपूर्णं परं ब्रह्मैव प्राप्य पुनर्न निवर्तन्ते। २"तद्य इत्थं विदुर्येचेमेऽरण्ये श्रद्धा तप इत्युपासते तेऽर्चिषमभिसम्भवन्ति" इत्युभयविधान्भेदेनोपादायार्चिरादिगतिश्रुतेरपुनरावृत्तिश्रुतेश्चैवमिति निश्चीयते ॥

सूत्रार्थस्तु—कार्यं - हिरण्यगर्भमुपासीनमातिवाहिको गणो नयतीति बादरिराचार्यो मन्यते, अस्यैव गत्युपपत्तेः; परमुपासीनस्य हि न तत्प्राप्तये गतिरुपपद्यते सर्वगतत्वात्परस्य ब्रह्मणः ॥ ६ ॥

विशेषितत्वाच्च ॥ ३ "पुरुषोऽमानव एत्य ब्रह्मलोकान्गमयति" इति

१. छा. ७-१-५ ॥—२. छा. ५-१०-२,१ ॥—३. बृ. ८-२-१५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

१"प्रजापतेस्सभां वेश्म प्रपद्ये" इति च प्राप्यस्थानस्य विशेषितत्वाच्च हिरण्यगर्भमुपासीनमेव नयति ॥ ७ ॥

सामीप्यात्तु तद्व्यपदेशः ॥ एवं निश्चिते सति २"स एनान्ब्रह्म गमयति" इति हिरण्यगर्भस्य ब्रह्मशब्दव्यपदेशो ब्रह्मसामीप्यात्; ३"यो ब्रह्माणं विदधाति पूर्वम्" इति प्रथमजत्वेन ब्रह्मसामीप्यं हि विद्यते ॥ ८ ॥

कार्यात्यये तदध्यक्षेण सहातः परमभिधानात् ॥ हिरण्यगर्भप्राप्तावप्यपुनरावृत्तिरुपपद्यते, कार्यस्य-हिरण्यगर्भलोकस्यात्यये, तदध्यक्षेण-हिरण्यगर्भेणाधिकारिकपुरुषेण विदुषा सह परप्राप्त्यभिधानात् ४"ते ब्रह्मलोके तु परान्तकाले परामृतात्परिमुच्यन्ति सर्वे" इति ॥ ९ ॥

स्मृतेश्च ॥ ५"ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसञ्चरे । परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम्" इति स्मृतेश्चावगम्यते ॥ १० ॥

परं जैमिनिर्मुख्यत्वात् ॥ परं ब्रह्मोपासीनमेव नयत्यातिवाहिको गण इति जैमिनिराचार्यो मन्यते ६"ब्रह्म गमयति" इति ब्रह्मशब्दस्य तत्रैव मुख्यत्वात् । ७"ब्रह्मलोकान्" इति शब्दश्च ब्रह्मैव लोको ब्रह्मलोक इति कर्मधारयपरिग्रहस्यैव न्याय्यत्वादुपपद्यते । एवं निश्चिते सति बहुवचनं च ८"अदितिः पाशान्" इतिवदुपपन्नम् ॥ ११ ॥

दर्शनाच्च ॥ ९"अस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते" इत्यर्चिरादिना गतस्य परब्रह्मप्राप्तिं दर्शयति च ॥ १२ ॥

न च कार्ये प्रत्यभिसन्धिः॥ १"प्रजापतेस्सभां वेश्म प्रपद्ये" इति प्रत्यभिसन्धिश्च न कार्ये १०"धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसम्भवामि"इत्यकृतं ब्रह्मलोकमिति तत्रैव विशेषितत्वात्, १"यशोऽहं भवामि ब्राह्मणानाम्" इति सर्वात्मभावाभिसन्धानाच्च ॥ १३ ॥

अप्रतीकालम्बनान्नयतीति बादरायण उभयथा च दोषात्तत्क्रतुश्च ॥ कार्यमुपासीनानेवेति नायं नियमः, परमेवोपासीनानित्ययमपि नियमो न सम्भवति ; कुतः ? उभयथाच्च दोषात्—कार्यमुपासीनानेवेति नियमे९"अ-

---

१ छा. ८-१४-१ ॥—२. छा. ५-१०-२ ॥—३. श्वे. ६-१८ ॥—४. तै. ना. १०-२४ ॥ — ५. कूर्मपुराणे. पूर्वख. १२-२६९ ॥ —६. छा. ४-१५-६ ॥ —७. बृ. ८-२-१५ ॥—८ ॥—९. छा. ८-३-४ ॥—१०. छा. ८-१३-१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्माच्छरीरात्समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते''इत्यादिकाश्श्रुतयः, १''ये चेमेऽरण्ये श्रद्धा तपः'' इति च प्रकुप्येयुः;परमेवेति नियमे १''तद्य इत्थं विदुः'' इति प्रकुप्येत्। तस्मादप्रतीकालम्बनान्नयतीति भगवान्बादरायणो मन्यते। प्रतीकालम्बनास्तु—अचिन्मिश्रम् ,१केवलमचिद्वस्तु च 'सिंहो देवदत्तः' इतिवत् ब्रह्मदृष्ट्या स्वरूपेण वा तद्वस्तु य उपासते, ते ; अप्रतीकालम्बनाः-तद्व्यतिरिक्ताः। सर्वज्ञं सर्वकारणं सत्यसङ्कल्पं निखिलहेयप्रत्यनीकानवधिकातिशयानन्दस्वरूपं ब्रह्मोपासते ये, ये च प्रत्यगात्मानं भूतसूक्ष्मैस्सम्परिष्वक्तं सर्वत्र वर्तमानं भूतसूक्ष्मव्यतिरिक्तं ज्ञानैकस्वरूपं नित्यं निर्विकारं २''य आत्मनि तिष्ठन्'' इत्यादिनावगतब्रह्मात्मभावं पञ्चाग्निविद्योदितमुपासते, तानुभयविधान्नयति १''तद्य इत्थं विदुर्येचेमेऽरण्ये'' इत्युभयविषयश्रुतेः। तत्क्रतुश्च ३''यथाक्रतुरस्मिल्लोके पुरुषो भवति तथेतः प्रेत्य भवति'' इत्युभयेषामेवापुनरावृत्तिस्सम्भवति। अचिन्मिश्रं केवलमचिद्वस्तु चोपासीनानां तत्क्रतुन्यायादेव पुनरावृत्तिरवर्जनीया ॥ १४ ॥

विशेषञ्च दर्शयति ॥ प्रतीकाद्युक्तलक्षणमचिन्मिश्रं केवलमचिद्वस्तु चोपासीनानां सर्वेषां गत्यनपेक्षं परिमितफलविशेषं च दर्शयति श्रुतिः—४''यावन्नाम्नो गतं तत्रास्य यथाकामचारो भवति '' इत्यादिका। अतः ५ '' ब्रह्मणा सह ते सर्वे'' इति वचनं नार्चिरादिना गतानां गतिप्रकारविषयम् ; अर्चिरादिना गतानां देहावसानसमय एव सुकृतदुष्कृतयोर्हानाद्धिरण्यगर्भलोकावाप्तितद्वासतत्रस्थभोगानुभवहेत्वभावात्, तत्क्रतुन्यायविरोधात्, तदानीमेव ब्रह्मप्राप्तिश्रुतिविरोधाच्च। ५''ब्रह्मणा सह ते सर्वे'' इति वचनं तु पुण्यकर्मविशेषेण हिरण्यगर्भलोकं प्राप्तानां ६''तदुपर्यपि बादरायणः'' इति न्यायेन तत्रैव निष्पन्नविद्यानां गतिप्रकारविषयम्।७''ते ब्रह्मलोके'' इति तु ब्रह्मलोकशब्दस्य कर्मधारयवृत्त्या ब्रह्मविषयत्वात्, ब्रह्मण्युपास्ये वर्तमानाः परान्तकाले- चरमदेहावसानसमये, परामृतात् - परस्माद्ब्रह्मण उपासनप्रीताद्धेतोः, परिमुच्यन्ति सर्वे सर्वस्माद्बन्धाद्विमुच्यन्त इति ७''वेदान्तविज्ञानसुनिश्चितार्थाः'' इति प्रकरणादवगम्यते। १''तद्य इत्थं विदुः'' इति पञ्चाग्निविदां ब्रह्मप्राप्त्यपुनरावृत्तिश्रवणात्तत्क्रतुन्यायेनाचिद्विशिष्टब्रह्मात्मकात्मस्वरूपोपासनं विवक्षितमिति नि-

---

१. छा. ५-१०-१ ॥—२. बृ. ५-७-२२ मा-पा ॥—३. छा. ३-१४-१ ॥—४. छा. ७-१-५ ॥—५ ॥—६. शारी. १-३-२५ ॥ — ७. तै. ना. ११-२२ अनु ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीयते । तथैव तत्र श्रुतिरपि १"इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति" इति २"रमणीयचरणाः" इति च । कर्महेतुकमनुष्यादिभावोऽपामेव भूतान्तरसंसृष्टानामिति चिदचिद्विवेकं प्रतिपाद्य३"तद्य इत्थं विदुः"इति भूतसूक्ष्मव्यतिरिक्तात्मस्वरूपोपासनमेव विदधाति॥ १५ ॥

इति वेदान्तदीपे कार्याधिकरणम् ॥ ५ ॥

इति श्रीभगवद्रामानुजविरचिते श्रीवेदान्तदीपे चतुर्थस्याध्यायस्य तृतीयः पादः ॥ ३ ॥

---

१. छा. ५-९-१ ॥—२. छा. ५-१०-७ ॥—३. छा. ५-१०-१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीमते रामानुजाय नमः

श्रीभगवद्रामानुजविरचिते

श्रीशारीरकमीमासाभाष्ये

(चतुर्थाध्याये-चतुर्थः पादः-सम्पद्याविर्भावाधिकरणम्॥ १)

सम्पद्याविर्भावस्स्वेनशब्दात् । ४ । ४ । १ ॥

परं ब्रह्मोपासीनानामात्मानं च प्रकृतिवियुक्तं ब्रह्मात्मकमुपासीनानामर्चिरादिना मार्गेणापुनरावृत्तिलक्षणा गतिरुक्ता; इदानीं मुक्तानामैश्वर्यप्रकारं चिन्तयितुमारभते । इदमाम्नायते– [१]"एवमेवैष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते" इति । किमस्माच्छरीरात्समुत्थाय परज्योतिरुपसम्पन्नस्य देवादिरूपवत्साध्येन रूपेण सम्बन्धोऽनेन वाक्येन प्रतिपाद्यते, उत स्वाभाविकस्य स्वरूपस्याविर्भाव इति संशये, साध्येन रूपेण सम्बन्ध इति युक्तम्। अन्यथा ह्यपुरुषार्थावबोधित्वं मोक्षशास्त्रस्य स्यात्, स्वरूपस्य स्वतोऽपुरुषार्थत्वदर्शनात् । न हि सुषुप्तौ देहेन्द्रियव्यापारेष्वुपरतेषु केवलस्यात्मस्वरूपस्य पुरुषार्थसम्बन्धो दृश्यते; न च दुःखनिवृत्तिमात्रं परं ज्योतिरु-

१. छा. ८-१२-३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पसम्पन्नस्य पुरुषार्थः, येन स्वरूपाविर्भाव एव मोक्षः इत्युच्येत; १"स एको ब्रह्मण आनन्दः। श्रोत्रियस्य चाकामहतस्य" २"रसं ह्येवायं लब्ध्वाऽनन्दी भवति" इत्यादिभ्यो मुक्तस्य सुखानन्त्यश्रवणात्।नचापरिच्छिन्नानन्दरूपचैतन्यमेवास्य स्वरूपम् ,तच्च संसारदशायामविद्यया तिरोहितं परं ज्योतिरुपसम्पन्नस्याविर्भवतीति शक्यं वक्तुम्, ज्ञानस्वरूपस्य तिरोधानासम्भवात्। प्रकाशपर्यायस्य ज्ञानस्य तिरोधानं तद्विनाश एवेति हि पूर्वमेवोक्तम्। नच प्रकाशमात्रस्याऽनन्दता सम्भवति; सुखस्वरूपता ह्यानन्दस्वरूपता ; सुखस्वरूपत्वं चात्मनोऽनुकूलत्वम् ; प्रकाशमात्रात्मवादिनः कस्य प्रकाशोऽनुकूलवेदनीयो भवेदिति प्रकाशमात्रात्मवादिनः कथंचिदप्यानन्दस्वरूपता दुरुपपादा। स्वरूपापत्तिमात्रे च साध्ये स्वरूपस्य नित्यनिष्पन्नत्वादुपसम्पन्नस्य ३"स्वेन रूपेणाभिनिष्पद्यते" इति वचनमनर्थकं स्यात्। अतोऽपूर्वेण साध्येन रूपेण सम्पद्यते। एवं च ३"अभिनिष्पद्यते" इति वचनं मुख्यार्थमेव भवति। ३"स्वेन रूपेण" इत्यप्यानन्दैकान्तेन स्वासाधारणेनाभिनिष्पद्यत इति सङ्गच्छत इति ॥

—●●◆◆(सिद्धान्तः)◆◆●●—

एवं प्राप्ते प्रचक्ष्महे—सम्पद्याविर्भावः—इति।अयं प्रत्यगात्माऽर्चिरादिना परं ज्योतिरुपसम्पद्य यं दशाविशेषमापद्यते, स स्वरूपाविर्भावरूपः; नापूर्वाकारोत्पत्तिरूपः। कुतः? स्वेन शब्दात् ३"स्वेन रूपेण"इति विशेषणोपादानादित्यर्थः। आगन्तुकविशेषपरिग्रहे हि ३"स्वेन रूपेण" इति विशेषणमनर्थकं स्यात्, अविशेषणेऽपि तस्य स्वकीयरूपत्वसिद्धेः॥

यत्तूक्तं स्वरूपस्य नित्यप्राप्तत्वात् ३"उपसम्पद्याभिनिष्पद्यते" इति वचनमनर्थकमिति—तत्रोत्तरं—

मुक्तः प्रतिज्ञानात् । ४ । ४ । २ ॥

---

१. तै. आन. ८-अनु. ४ ॥—२. तै. आन. ७-१ ॥—३. छा. ८-१२-२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कर्मसम्बन्धतत्कृतदेहादिविनिर्मुक्तः स्वाभाविकरूपेणावस्थितोऽत्र [१]"स्वेन रूपेणाभिनिष्पद्यते"इत्युच्यते। अतो नित्यप्राप्तस्यापि स्वरूपस्य कर्मरूपाविद्यातिरोहितस्य तिरोधाननिवृत्तिरत्राभिनिष्पत्तिरुच्यते। कुतः? प्रतिज्ञानात्—सा हि प्रतिपाद्यतया प्रतिज्ञाता। कुत इदमवगम्यते? [२]"य आत्मा" इति प्रकृतं प्रत्यगात्मानं जागरिताद्यवस्थात्रितयविनिर्मुक्तं, प्रियाप्रियहेतुभूतकर्मारब्धशरीरविनिर्मुक्तं च प्रतिपादयितुम् [३]"एतं त्वेव ते भूयोऽनुव्याख्यास्यामि" इति पुनःपुनरुक्त्वा [४]"एवमेवैष सम्प्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते" इत्यभिधानात्। अतः कर्मणा सम्बद्धस्य परं ज्योतिरुपसम्पद्य बन्धनिवृत्तिरूपा मुक्तिः स्वेन रूपेणाभिनिष्पत्तिरुच्यते। स्वरूपाविर्भावेऽप्यभिनिष्पत्तिशब्दो दृश्यते, 'युक्त्याऽयमर्थो निष्पद्यते' इत्यादिषु ॥ २ ॥

यच्चोक्तम्—आत्मस्वरूपस्य सुषुप्तावपुरुषार्थत्वदर्शनात्स्वरूपाविर्भावे मोक्षशास्त्रस्यापुरुषार्थावबोधित्वं स्यादिति कृत्वा देवाद्यवस्थावत्सुखसम्बन्ध्यवस्थान्तरप्राप्तिरभिनिष्पत्तिः—इति; तन्नोत्तरम्—

आत्मा प्रकरणात्। ४। ४। ३॥

स्वरूपेणैवायमात्मा अपहतपाप्मत्वादिसत्यसङ्कल्पत्वपर्यन्तगुणकः प्रकरणादवगम्यते; [२]"य आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपाससस्सत्यकामस्सत्यसङ्कल्पः" इति हि प्रजापतिवाक्यप्रक्रमः; इदं च प्रकरणं प्रत्यगात्मविषयमिति [४]"उत्तराच्चेदाविर्भूतस्वरूपस्तु" इत्यत्र प्रतिपादितम्। अतोऽपहतपाप्मत्वादिस्वरूप एवायमात्मा संसारदशायां कर्माख्याविद्यया तिरोहितस्वरूपः परं ज्योतिरुपसम्पद्याविर्भूतस्वरूपो भवति। अतः प्रत्यगात्मनोऽपहतपाप्मत्वादयस्स्वाभाविका

१. छा. ८ १२ २ ॥—२. छा. ८-७-१ ॥—३. छा. ८-९- ३ ॥—४. शारी. १-३-१८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गुणाः परं ज्योतिरुपसम्पन्नस्याविर्भवन्ति ; नोत्पद्यन्ते ; यथोक्तं भगवता शौनकेनापि [१]"यथा न क्रियते ज्योत्स्ना मलप्रक्षालनान्मणेः । दोषप्रहाणान्न ज्ञानमात्मनः क्रियते तथा । यथोदपानकरणात्क्रियते न जलाम्बरम् । सदेव नीयते व्यक्तिमसतस्सम्भवः कुतः । तथा हेयगुणध्वंसादवबोधादयो गुणाः । प्रकाश्यन्ते न जन्यन्ते नित्या एवात्मनो हि ते" इति । अतो ज्ञानानन्दादिगुणानां कर्मणा आत्मनि सङ्कुचितानां परं ज्योतिरुपसम्पद्य कर्मरूपबन्धक्षये विकासरूपाविर्भावो नानुपपन्न इति सुष्ठूक्तं—सम्पद्याविर्भावः—इति ॥ ३ ॥

इति श्रीशारीरकमीमांसाभाष्ये सम्पद्याविर्भावाधिकरणम् ॥ १ ॥

वेदान्तसारे—सम्पद्याविर्भावस्स्वेनशब्दात् ॥ २"एवमेवैष सम्प्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते" इति सिद्धस्यैव प्रत्यगात्मस्वरूपस्य अनादिकर्मणा तिरोहितस्य परं ज्योतिरुपसम्पद्याविर्भाव उच्यते ; २"स्वेन रूपेण" इति विशिष्याभिधानात् ॥ १ ॥

मुक्तः प्रतिज्ञानात् ॥ आत्मस्वरूपमात्रस्य प्रागेव सिद्धत्वेऽपि कर्मबन्धविनिर्मुक्तापरिच्छिन्नज्ञानादिस्वरूपस्य ह्यत्राविर्भाव उच्यते । ३"एतस्त्वेव ते भूयोऽनुव्याख्यास्यामि" इति जागरिताद्यवस्थातिरोधानविनिर्मुक्तस्यैव वक्तव्यतया प्रतिज्ञानात् ॥ २ ॥

आत्मा प्रकरणात् ॥ ३"भूयोऽनुव्याख्यास्यामि" इति प्रकृतापहतपाप्मत्वादिगुणक आत्मेति प्रकरणादवगम्यते ; ४"य आत्माऽपहतपाप्मा" इत्यारभ्य ४"सत्यकामस्सत्यसङ्कल्पस्सोऽन्वेष्टव्यः" इति प्रकृत्य ३"एतस्त्वेव ते भूयोऽनुव्याख्यास्यामि" इत्युक्तम् ॥ ३ ॥

इति वेदान्तसारे सम्पद्याविर्भावाधिकरणम् ॥ १ ॥

वेदान्तदीपे—सम्पद्याविर्भावस्स्वेनशब्दात् ॥ २ "एवमेवैष सम्प्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते"

१. विष्णुधर्मे. १०४. ५५, ५६, ५७ ॥—२. छा. ८-१२-२ ॥—३. छा. ८-९-३॥—४. छा. ८-७ १ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति किं परं ज्योतिरुपसम्पन्नस्य प्रत्यगात्मनस्स्वरूपाविर्भावः प्रतिपाद्यते, उ, तान्येन साध्येन रूपेण सम्बन्ध इति संशयः। स्वस्वरूपस्य सुषुप्त्यादौ निरानन्दत्वदर्शनात्, स्वरूपमात्रस्य नित्याविर्भूतत्वाच्च, साध्येन सुखैकान्तेन रूपेण सम्बध्यते। एवंच १"अभिनिष्पद्यते" इतिवचनं सङ्कुच्छते। परं ज्योतिरुपसम्पन्नस्य ह्यानन्दित्वं श्रूयते २"रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति"३"स एको ब्रह्मण आनन्दः श्रोत्रियस्य चाकामहतस्य" इत्यादिषु। अतस्साध्येन रूपेणेति पूर्वः पक्षः। राद्धान्तस्तु—१"स्वेन रूपेणाभिनिष्पद्यते" इति विशेषणात्स्वरूपाविर्भाव एव। स्वरूपस्य चापहतपाप्मत्वादिगुणकतया प्रजापतिवाक्योदितस्य कर्मकृतदेहसम्बन्धतत्कृततिरोधानस्य परज्योतिरुपसम्पत्त्या सूक्ष्मदेहविनिर्मुक्तस्यासङ्कुचितज्ञानादिगुणकस्वरूपाविर्भावात् स्वयाथात्म्यानुभवपूर्वकानवधिकातिशयानन्दब्रह्मानुभवस्सम्पत्स्यत इति'अभिनिष्पद्यते' इतिचोपपन्नतरम्। सूत्रार्थस्तु—परं ज्योतिरुपसम्पद्य स्वस्वरूपाविर्भावः प्रतिपाद्यते। कुतः? स्वेनशब्दात्—साध्यस्यापि रूपस्य स्वासाधारणत्वेन स्वेनेति विशेषणं ह्यनर्थकम्॥१॥

स्वस्वरूपमात्रस्य 'अहं जानामि' इति नित्याविर्भूतत्वेन १"परं ज्योतिरुपसम्पद्य" इत्यनर्थकमित्याशङ्क्याह—

मुक्तः प्रतिज्ञानात्॥ कर्मसंबन्धतत्कृतदेहादेर्मुक्तस्वरूपमत्र १"स्वेन रूपेणाभिनिष्पद्यते" इत्युच्यते। कथमिदमवगम्यते? ४"एतं त्वेव ते भूयोऽनुव्याख्यास्यामि" इति कर्महेतुकदेहसम्बन्धतत्कृतजागरिताद्यवस्थाविनिर्मुक्तस्वरूपस्यात्र वक्तव्यतया प्रतिज्ञानात्॥ २॥

एवमपि स्वरूपमात्राविर्भावस्य पुरुषार्थत्वं न सिद्ध्यतीत्याशङ्क्याह—

आत्मा प्रकरणात्॥ देहादिविनिर्मुक्तः स्वरूपेणावस्थित आत्मा अपहतपाप्मत्वादिसत्यसङ्कल्पत्वपर्यन्तगुणकः;तस्य ह्याविर्भाव उच्यते; कुतः? प्रकरणात्; ५"य आत्मा अपहतपाप्मा" इति प्रकृत्य हि ४"एतं त्वेव ते भूयोऽनुव्याख्यास्यामि" इत्यादिनोच्यते। अतोऽपहतपाप्मत्वादिगुणकस्वरूपस्य कर्माख्याविद्यातिरोहितस्य परंज्योतिरुपसम्पद्य निवृत्ततिरोधानस्याऽविर्भावः प्रतिपाद्यते॥३॥

इति वेदान्तदीपे सम्पद्याविर्भावाधिकरणम्॥ १॥

---

१. छा. ८-१२-३॥—२. तै. आन. ७-अनु. १॥—३. तै. आन. ८ अनु. ४॥—४. छा. ८-९-३॥—५. छा. ८-७-१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अविभागेन दृष्टत्वात् । ४ । ४ । ४ ॥

किमयं परं ज्योतिरुपसम्पन्नः सर्वबन्धविनिर्मुक्तः प्रत्यगात्मा स्वात्मानं परमात्मनः पृथग्भूतमनुभवति, उत तत्प्रकारतया तदविभक्तम्–इति विशये १ "सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता" २"यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम् । तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति" ३"इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः । सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च" इत्यादिश्रुतिस्मृतिभ्यां मुक्तस्य परेण साहित्यसाम्यसाधर्म्यावगमात् पृथग्भूतमनुभवति—

(सिद्धान्तः)

इति प्राप्त उच्यते–अविभागेन–इति। परस्माद्ब्रह्मणः स्वात्मानमविभागेनानुभवति मुक्तः । कुतः? दृष्टत्वात्–परब्रह्मोपसम्पत्त्या निवृत्ताविद्यातिरोधानस्य याथातथ्येन स्वात्मनो दृष्टत्वात् । स्वात्मनः स्वरूपं हि ४"तत्त्वमसि" ५"अयमात्मा ब्रह्म" ४"ऐतदात्म्यमिदं सर्वं" ६"सर्वं खल्विदं ब्रह्म" इत्यादिसामानाधिकरण्यनिर्देशैः ७"य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्याऽत्मा शरीरं य आत्मानमन्तरो यमयति स त आत्माऽन्तर्याम्यमृतः" ८"अन्तः प्रविष्टश्शास्ता जनानां सर्वात्मा" इत्यादिभिश्च परमात्मात्मकं तच्छरीरतया तत्प्रकारभूतमिति प्रतिपादितम् ९"अवस्थितेरिति काशकृत्स्नः" इत्यत्र । अतोऽविभागेन 'अहं ब्रह्मास्मि'इत्येवानुभवति।साम्यसाधर्म्यव्यपदेशो ब्रह्मप्रकारभूतस्यैव प्रत्य-

१. तै. आन. १-२ ॥—२. मु-३. १-३ ॥ —३. गी. १४-२॥—छा. ६-८-७॥ —५ ॥—६. छा. ३-१४-१॥—७. बृ. ५-७-२२. मा-पा ॥—८. आरण. १-३-२१॥ —९. शारी. १-४-२२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गात्मनः स्वरूपं तत्सममिति देवादिप्राकृतरूपप्रहाणेन ब्रह्मसमानशुद्धिं प्रतिपादयति । सहश्रुतिस्त्वेवंभूतस्य प्रत्यगात्मनः प्रकारिणा ब्रह्मणा सह तद्गुणानुभवं प्रतिपादयतीति न कश्चिद्विरोधः । ब्रह्मप्रकारतया तदविभागोक्तेर्हि [1]"सङ्कल्पादेव तच्छ्रुतेः" इत्यादि न विरुध्यते, [2]"अधिकन्तु भेदनिर्देशात्" [3]"अधिकोपदेशात्" इत्यादि च ॥ ४ ॥

इति श्रीशारीरकमीमांसाभाष्ये अविभागेनदृष्टत्वाधिकरणम् ॥ २ ॥

वेदान्तसारे—अविभागेन दृष्टत्वात् ॥ आविर्भूतस्वरूपोऽयम्मुक्तात्मा स्वात्मशरीरकं परं ब्रह्म स्वात्मनोऽप्यात्मतया 'अहं ब्रह्मास्मि'इत्यविभागेनैवानुभवति, [4]"आत्मेति तूपगच्छन्ति ग्राहयन्ति च" इति तथारूपोपासनेन तथाविधस्वरूपस्य दृष्टत्वात् । [5]"य आत्मनि तिष्ठन्...यस्याऽऽत्मा शरीरं स त आत्मा" [6]"तत्त्वमसि" इत्यादिशास्त्रसिद्धमेव ह्युपासितम् ॥ ४ ॥

इति वेदान्तसारे अविभागेनदृष्टत्वाधिकरणम् ॥ २ ॥

वेदान्तदीपे—अविभागेन दृष्टत्वात् ॥ किमयं मुक्त आविर्भूतस्वरूपः प्रत्यगात्मा परं ब्रह्म स्वात्मनो विभक्तमनुभवति,उत स्वात्मनोऽप्यात्मतयाऽविभागेन 'अहं ब्रह्मास्मि'इति संशयः।[7]"निरञ्जनः परमं साम्यमुपैति"[8]"सोऽश्नुते सर्वान्कामान् सह ब्रह्मणा विपश्चितेति"[9]"इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः" इति श्रुतिस्मृतिभ्यः विभक्तमनुभवतीति पूर्वः पक्षः । राद्धान्तस्तु—[10]"सर्वं खल्विदं ब्रह्म"[6]"ऐतदात्म्यमिदं सर्वम्.. तत्त्वमसि" इत्यादिना सामानाधिकरण्येन [11]"यः पृथिव्यां तिष्ठन्...यस्य पृथिवी शरीरं" [3]"य आत्मनि तिष्ठन्...यस्याऽऽत्मा शरीरम्" इत्यादिषु सर्वस्य चिदचिद्वस्तुनो ब्रह्मशरीरतया ब्रह्मप्रकारत्वात् तत्तद्वस्तुबुद्धिशब्दास्तत्पर्यन्तविषया इत्यवगम्य [4]"आत्मेति तूपगच्छन्ति" इतिन्यायेन स्वात्मनोऽप्यात्मतया 'अहं ब्रह्मास्मि' इत्युपासनेन यथावस्थितपरमात्मात्मकस्वात्मनो दृष्टत्वात् मुक्तः स्वात्मनोऽप्यात्मभूतं ब्रह्म 'अहं ब्रह्मास्मि' इत्यविभागेनैवानुभवति ॥

---

१. शारी. ४-४-८ ॥—२. शारी. २-१-२२ ॥—३. शारी. ३-४-८ ॥—४. शारी. ४-१-३ ॥—५. बृ. ५.७-२२. मा ॥—६. छा. ६-८-७ ॥—७. मु. ३-१-३ ॥—८. नै. आन. १-२ ॥—९. गी. १४-२ ॥—१०. छा. ३-१४-१ ॥—११. बृ. ५-७-३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सूत्रार्थस्तु—'अहं ब्रह्मास्मि'इत्यविभागेनैव ब्रह्मानुभवति मुक्तः,स्वात्मनोऽप्यात्मतयोपासनेन यथावस्थितपरमात्मात्मकस्वरूपस्य दृष्टत्वात्।साधर्म्यश्रुतिस्तु परमात्मशरीरभूतस्य प्रत्यगात्मनोऽपहतपाप्मत्वादिगुणैस्तत्साधर्म्ये प्रतिपादयति।१"सोऽश्नुते सर्वान्कामान् सह ब्रह्मणा विपश्चिता"इति ब्रह्मशरीरतया ब्रह्मप्रकारभूतत्वात्स्वात्मभूतेन ब्रह्मणा सह तद्गुणाननुभवतीति वदति। काम्यन्ते इति कामाः-कल्याणगुणाः, कल्याणगुणविशिष्टं ब्रह्मानुभवतीत्यर्थः॥ ४॥

इति वेदान्तदीपे अविभागेनदृष्टत्वाधिकरणम् ॥ २ ॥

(श्रीशारीरकमीमांसाभाष्ये ब्राह्माधिकरणम् ॥ ३ ॥)

ब्राह्मेण जैमिनिरुपन्यासादिभ्यः । ४ । ४ । ५ ॥

प्रत्यगात्मनः परं ज्योतिरुपसम्पद्य निवृत्ततिरोधानस्य स्वरूपाविर्भाव एवेत्युक्तम् । तत्र येन स्वरूपेणायमाविर्भवति ; तत्स्वरूपं श्रुतिवैविध्याद्विचार्यते । किमपहतपाप्मत्वादिकमेवास्य स्वरूपमिति तेन रूपेणायमाविर्भवति, उत विज्ञानमात्रमेवेति तेन रूपेण, अथोभयोरविरोध इत्युभयरूपेणेति । किं तावत्प्राप्तम्? ब्राह्मेणेति जैमिनिराचार्यो मन्यते। ब्राह्मेण–अपहतपाप्मत्वादिनेत्यर्थः । अपहतपाप्मत्वादयो हि दहरवाक्ये ब्रह्मसम्बन्धितया श्रुताः । ब्राह्मेणेति कुतोऽवगम्यते? उपन्यासादिभ्यः; उपन्यस्यन्ते हि ब्रह्मगुणाः अपहतपाप्मत्वादयः प्रत्यगात्मनोऽपि प्रजापतिवाक्ये २"य आत्माऽपहतपाप्मा" इत्यादिना २"सत्यसङ्कल्पः" इत्यन्तेन । आदिशब्देन सत्यसङ्कल्पत्वादिगुणायत्ता जक्षणादयः ३"जक्षत्क्रीडन्रममाणः" इत्यादिवाक्यावगता व्यवहारा गृह्यन्ते । अत एभ्य उपन्यासादिभ्यः प्रत्यगात्मनो विज्ञानमात्रस्वरूपत्वं न सम्भवतीति जैमिनेर्मतम् ॥ ५ ॥

---

१. तै. आन. १-२ ॥—२. छा. ८-७-१ ॥—३. छा. ८-१२-३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चिति तन्मात्रेण तदात्मकत्वादित्यौडुलोमिः । ४ । ४ । ६ ॥

[1]चैतन्यमात्रमेवास्य स्वरूपमिति तेन रूपेणाविर्भवतीत्यौडुलोमिराचार्यो मन्यते । कुतः ? तदात्मकत्वात्—तावन्मात्रात्मकत्वादस्य प्रत्यगात्मनः । [2]"स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एव एवं वा अरेऽयमात्माऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एव" [3]"विज्ञानघन एव" इत्यवधारणात् विज्ञानमात्रमेवास्य स्वरूपमित्यवगम्यते । अतोऽस्य गुणान्तराभावात् [4]"अपहतपाप्मा" इत्यादयः शब्दाः विकारसुखदुःखाद्यविद्यात्मकधर्मव्यावृत्तिपरा इति चिति तन्मात्ररूपेणाविर्भाव इत्यौडुलोमेर्मतम् ॥ ६ ॥

सम्प्रति भगवान् बादरायणः स्वमतेन सिद्धान्तमाह—

एवमप्युपन्यासात्पूर्वभावादविरोधं बादरायणः । ४ । ४ । ७ ॥

एवमपि—विज्ञानमात्रस्वरूपत्वप्रतिपादने सत्यपि, सत्यकामत्वादीनां पूर्वोक्तानां गुणानामविरोधं बादरायण आचार्यो मन्यते । कुतः ? उपन्यासात्पूर्वभावात्—औपनिषदात् [4]"य आत्माऽपहतपाप्मा" इत्याद्युपन्यासात्प्रमाणात् पूर्वेषाम्-अपहतपाप्मत्वसत्यकामत्वादीनामपि भावात्—विद्यमानत्वात् । तुल्यप्रमाणकानामितरेतरबाधो न युज्यत इत्यर्थः । नच वस्तुविरोधादपहतपाप्मत्वादीनामविद्यापरिकल्पितत्वं न्याय्यम्, विशेषाभावात् 'विपरीतं कस्मान्न भवति'इति न्यायात्।तुल्यबलत्वे ह्यशक्यस्यावधारणस्यान्यपरत्वमेव न्याय्यम् । एवमप्यविरोध इत्यभ्युपगम्य वदन् ज्ञानमात्रमेवास्य स्वरूपं नान्यत्किञ्चिदस्तीत्ययमर्थः[3]"वि-

१. चैतन्यमात्रमेवात्मनः. पा॥—२. बृ. ६-५-१३॥—३. बृ ४-४-१२॥—४.छा.८-७-१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ज्ञानघन एव" इत्यादिभिर्न प्रतिपाद्यत इति मन्यते। कस्तर्हि १"विज्ञानघन एव" इत्यवधारणस्यार्थः? कृत्स्नोऽप्यात्मा जडव्यावृत्तस्वप्रकाशः; नान्यायत्तप्रकाशः स्वल्पोऽपि प्रदेशोऽस्तीत्ययमर्थो वाक्यादेव सुव्यक्तः २"स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एव एवं वा अरेऽयमात्माऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एव" इति। नचैवं प्रत्यगात्मनो धर्मिस्वरूपस्य कृत्स्नस्य विज्ञानघनत्वेऽप्यपहतपाप्मत्वसत्यसङ्कल्पत्वादिधर्मसम्बन्धो वाक्यान्तरावगतो विरुध्यते; यथा सैन्धवघनस्य कृत्स्नस्य रसघनत्वे रसनेन्द्रियावगते चक्षुराद्यवगताः रूपकाठिन्यादयो न विरुध्यन्ते। इदमत्र वाक्यतात्पर्यं—यथा रसवत्स्वाम्रफलादिषु त्वगादिप्रदेशभेदेन रसभेदे सत्यपि सैन्धवघनस्य सर्वत्रैकरसत्वम्; तथाऽऽत्मनोऽपि सर्वत्र विज्ञानस्वरूपत्वम्; स्वप्रकाशस्वरूपत्वमित्यर्थः ॥ ७ ॥

इति श्रीशारीरकमीमांसाभाष्ये ब्राह्माधिकरणम् ॥ ३ ॥

वेदान्तसारे—ब्राह्मेण जैमिनिरुपन्यासादिभ्यः ॥ अस्य स्वरूपाविर्भावः ब्राह्मेण-अपहतपाप्मत्वादिगुणकस्वरूपेण ; ते हि ब्रह्मगुणाः प्रत्यगात्मनोऽपि स्वाभाविका गुणा इति ३"य आत्माऽपहतपाप्मा" इत्यारभ्य उपन्यासादिभ्यः अवगम्यते ; त एव ४" जक्षत्क्रीडन् रममाणः" इत्यादिनोच्यन्ते। इति जैमिनेर्मतम् ॥ ५ ॥

चिति तन्मात्रेण तदात्मकत्वादित्यौडुलोमिः ॥ १"विज्ञानघन एव" इत्यवधारणात् विज्ञानमात्र *स्वरूप इत्यौडुलोमिः ॥ ६ ॥

एवमप्युपन्यासात्पूर्वभावादविरोधं बादरायणः ॥ १"विज्ञानघन एव" इति स्वप्रकाशस्वात्मस्वरूप इत्यवगतेऽपि ३"य आत्माऽपहतपाप्मा" इत्युपन्यासादिना पूर्वेषामपहतपाप्मत्वादीनामपि सद्भावावगमादुभयश्रुत्यवगतोभयस्वरूपस्य परस्परविरोधाभावाद्रूपद्वयं नान्योन्यपरिहारीत्युभयरूपसमुच्चयं भगवान् बादरायणो मेने ॥ ७ ॥

इति वेदान्तसारे ब्राह्माधिकरणम् ॥ ३ ॥

१.बृ. ४-४-१२॥ २.बृ ६-५-१३॥ ३.छा. ८-७-१॥ ४.छा. ८-१२-३॥ *स्वरूपेण-पा॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वेदान्तदीपे—ब्राह्मेण जैमिनिरुपन्यासादिभ्यः ॥ किं जीवस्य स्वाभाविकं रूपमपहतपाप्मत्वादिगुणकम्, उत चैतन्यमात्रम्, उतोभयमिति संशयः । अपहतपाप्मत्वादिगुणकमिति प्रथमः पक्षः, १ "य आत्माऽपहतपाप्मा" इति प्रतिपादनात् । चैतन्यमात्रमिति द्वितीयः पक्षः, २ "एवं वा अरेऽयमात्माऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एव" ३ "विज्ञानघन एव" इत्यवधारणात् । राद्धान्तस्तु—ज्ञानस्वरूपस्यैवापहतपाप्मत्वादिगुणकत्वप्रतिपादनादविरोधाच्चोभयं स्वरूपम् । नच "विज्ञानघन एव" इत्यवधारणं गुणान्तरासहम्, यथा सैन्धवघनस्य "रसघन एव" इत्यवधारणेऽपि रसाश्रयद्रव्यं रूपस्पर्शादिगुणान्तरं च सहते; "रसघन एव" इत्यवधारणं तु रसवद्द्रव्यान्तरस्वभावव्यावृत्तिपरम्; द्रव्यान्तराणां हि स्वैकदेशे ४ रसवत्त्वम्, सैन्धवघनस्य तु ५ सर्वत्र; एवमत्रापि जडवस्तुव्यावृत्तस्वस्वभावस्य सगुणस्यात्मनः स्वप्रकाशतावधारणं "विज्ञानघन एव" इति क्रियते ॥

सूत्रार्थस्तु—ब्राह्मेण-अपहतपाप्मत्वादिना स्वरूपाविर्भावः । अपहतपाप्मत्वादयो दहरवाक्ये ब्रह्मगुणाश्श्रुताः । उपन्यासादिभ्यः-तेषां ब्रह्मगुणानां प्रत्यगात्मन्यपि १ "य आत्माऽपहतपाप्मा" इत्यादिनोपन्यासात् । आदिशब्दात् ६ "जक्षत्क्रीडन्रममाणः" इत्यादिभ्योऽपि सत्यसङ्कल्पत्वादयोऽवगम्यन्त इति जैमिनिराचार्यो मन्यते ॥ ५ ॥

चिति तन्मात्रेण तदात्मकत्वादित्यौडुलोमिः ॥ चैतन्यमात्रेण स्वरूपाविर्भावः, ३ "विज्ञानघन एव" इति तदात्मकत्वावधारणादित्यौडुलोमिराचार्यो मन्यते ॥ ६ ॥

एवमप्युपन्यासात्पूर्वभावादविरोधं बादरायणः ॥ एवं—विज्ञानस्वरूपस्यैव, स्वप्रकाशस्वरूपस्यैव पूर्वेषाम्—अपहतपाप्मत्वादिसत्यसङ्कल्पत्वपर्यन्तानामपि १ "य आत्माऽपहतपाप्मा" इत्युपन्यासात्सद्भावावगमादुभयोस्वरूपयोरविरोधं भगवान्बादरायणो मन्यते । उभयश्रुत्यवगतस्येतरेतरविरोधाभावान्नान्यतरबाधे प्रमाणमस्तीत्यभिप्रायः ॥ ७ ॥

इति वेदान्तदीपे ब्राह्माधिकरणम् ॥ ३ ॥

---

१. छा. ८-७-१ ॥—२. बृ. ६-५-१३ ॥—३. बृ. ४-४-१२ ॥— ४. भिन्नरसवत्त्वम्. पा ॥—५. सर्वत्रैकरसवत्त्वम्. पा ॥—६. छा. ८-१२-३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

संकल्पादेव तच्छ्रुतेः । ४ । ४ । ८ ॥

मुक्तः परं ब्रह्मोपसम्पद्य ज्ञानस्वरूपोऽपहतपाप्मत्वादिसत्यसङ्कल्पत्वपर्यन्तगुणक आविर्भवतीत्युक्तम् ; तमधिकृत्य सत्यसङ्कल्पत्वप्रयुक्ता व्यवहाराः श्रूयन्ते [१]"स तत्र पर्येति जक्षत्क्रीडन्रममाणः स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वा" इति । किमस्य ज्ञात्यादिप्राप्तिः प्रयत्नान्तरसापेक्षा, उत परमपुरुषस्येव सङ्कल्पमात्रादेव भवतीति विशये; लोके राजादीनां सत्यसङ्कल्पत्वेन व्यवहियमाणानां कार्यनिष्पादने प्रयत्नान्तरसापेक्षत्वदर्शनादस्यापि तत्सापेक्षा—

(सिद्धान्तः)

इति प्राप्त उच्यते—सङ्कल्पादेव—इति । कुतः? तच्छ्रुतेः [२]"स यदि पितृलोककामो भवति सङ्कल्पादेवास्य पितरस्समुत्तिष्ठन्ति" इति हि सङ्कल्पादेव पित्रादीनां समुत्थानं श्रूयते । नच प्रयत्नान्तरसापेक्षत्वाभिधायि श्रुत्यन्तरं दृश्यते; येनास्य "सङ्कल्पादेव" इत्यवधारणस्य [३]"विज्ञानघन एव" इतिवद्व्यवस्थापनं क्रियते ॥ ८ ॥

अत एव चानन्याधिपतिः । ४ । ४ । ९ ॥

यतो मुक्तस्सत्यसङ्कल्पः; अत एवानन्याधिपतिश्च । अन्याधिपतित्वं हि विधिनिषेधयोग्यत्वम् । विधिनिषेधयोग्यत्वे हि प्रतिहतसङ्कल्पत्वं भवेत् । अतस्सत्यसङ्कल्पत्वश्रुत्यैवानन्याधिपतित्वं च सिद्धम् । अत एव [४]"स स्वराडभवति" इत्युच्यते ॥ ९ ॥

इति श्रीशारीरकमीमांसाभाष्ये सङ्कल्पाधिकरणम् ॥ ४ ॥

---

१. छा. ८-१२-३ ॥—२. छा. ८-२-१ ॥—३. बृ. ४-४-१२ ॥—४. छा. ७-२५-२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वेदान्तसारे—सङ्कल्पादेव तच्छ्रुतेः ॥ १"स यदि पितृलोककामः" इत्यादिनाऽवगताः पित्राद्यः १"सङ्कल्पादेवास्य" इति श्रुतेः सङ्कल्पादेव भवन्ति । यथा परमपुरुषस्य लीलाप्रवृत्तस्य दशरथवसुदेवाद्यस्सङ्कल्पादेव भवन्ति; एवमेव परमपुरुषलीलान्तर्गतस्य मुक्तस्यापि तदुपकरणभूताः पित्राद्यस्सङ्कल्पादेव भवन्तीत्यर्थः ॥ ८ ॥

अत एव चानन्याधिपतिः॥अत एव २ "अपहतपाप्मा...सत्यसङ्कल्पः" इत्यादिश्रुतेः न कदाचिदपि कर्माधीनोऽयम् ॥ ९ ॥

इति वेदान्तसारे सङ्कल्पाधिकरणम् ॥ ४ ॥

वेदान्तदीपे—सङ्कल्पादेव तच्छ्रुतेः ॥ ३"परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुषः स तत्र पर्येति जक्षत्क्रीडन्रममाणस्स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वा" इत्यादिराम्नायते । किमेते ज्ञात्यादयो मुक्तस्य सङ्कल्पादेव भवन्ति, उत प्रयत्नान्तरसव्यपेक्षात्सङ्कल्पादिति संशयः । लोके राजादीनां सत्यसङ्कल्पत्वेन व्यवह्रियमाणानामपि कार्ये प्रयत्नान्तरसापेक्षत्वदर्शनान्मुक्तस्यापि तथैव सापेक्षादिति पूर्वः पक्षः "सङ्कल्पादेव" इत्यवधारणं ४ "विज्ञानघन एव" इतिवद्भविष्यति । राद्धान्तस्तु २"सङ्कल्पादेवास्य पितरस्समुत्तिष्ठन्ति" इत्यवधारणाज्ज्ञान्यापेक्षत्वम् । नचेह सत्यकामत्वाद्युपन्यासवत् मुक्तस्यान्यापेक्षत्वे प्रमाणमस्ति । लोके सत्यसङ्कल्पत्वाभावादेव प्रयत्नान्तरापेक्षत्वम् ; नहि परमपुरुषव्यतिरिक्तः कश्चित्सत्यसङ्कल्पोऽस्ति । मुक्तश्च तत्प्रसादात्तत्साम्यमुपगतस्तथैव । सूत्रमपि व्याख्यातम् ॥ ८ ॥

अत एव चानन्याधिपतिः ॥ अतः-श्रुतेरेव मुक्तोऽनन्याधिपतिश्च। अन्याधिपतित्वं-कर्माधीनत्वम् । २ "अपहतपाप्मा सत्यसङ्कल्पः" इति श्रूयते ; अतोऽनन्याधिपतिः ॥ ९ ॥

इति वेदान्तदीपे सङ्कल्पाधिकरणम् ॥ ४ ॥

---

१. छा. ८-२-१ ॥—२. छा. ८-७-१ ॥ —३.छा. ८-१२-२,३ ॥ —४. बृ. ४-४-११ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अभावं बादरिराह ह्येवम् । ४ । ४ । १० ॥

किं मुक्तस्य देहेन्द्रियाणि न सन्ति, उत सन्ति, अथवा यथासङ्कल्पं सन्ति न सन्तिचेति विशये—शरीरेन्द्रियाणामभावं बादरिराचार्यो मन्यते; कुतः? आह ह्येवं—[१]"नह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति। अशरीरं वा व सन्तं न प्रियाप्रिये स्पृशतः" इति शरीरसम्बन्धे दुःखस्यावर्जनीयत्वमभिधाय [१]"अस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते" इति मुक्तस्याशरीरत्वं ह्याह श्रुतिः ॥ १० ॥

भावं जैमिनिर्विकल्पामननात् । ४ । ४ । ११ ॥

मुक्तस्य शरीरेन्द्रियभावं जैमिनिराचार्यो मन्यते, कुतः? विकल्पामननात्—विविधः कल्पो विकल्पः, वैविध्यमित्यर्थः, [२]"स एकधा भवति त्रिधा भवति, पञ्चधा सप्तधा" इत्यादिश्रुतेः। आत्मन एकस्यानेकधाभावासम्भवात् त्रिधाभावादयः शरीरनिबन्धना इत्यवगम्यते। अशरीरत्ववचनं तु कर्मनिमित्तशरीराभावपरम्; तदेव हि शरीरं प्रियाप्रियहेतुः ॥ ११ ॥

भगवांस्तु बादरायणः स्वमतेन सिद्धान्तमाह—

द्वादशाहवदुभयविधं बादरायणोऽतः ।४।४। १२॥

'सङ्कल्पादेव' इत्येतदतश्शब्देन परामृश्यते; अत एव सङ्कल्पात्, उभयविधं सशरीरमशरीरं च मुक्तं भगवान् बादरायणो मन्यते; एवञ्चो-

१. छा. ८-१२-१,२॥—२. छा. ७-२६-२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भयी श्रुतिरुपपद्यते ; द्वादशाहवत्—यथा [1]"द्वादशाहमृद्धिकामा उपेयुः" [2]"द्वादशाहेन प्रजाकामं याजयेत्" इत्युपैतियजतिचोदनाभ्यां सङ्कल्पभेदेन सत्रमहीनं च भवति ॥ १२ ॥

यदा शरीराद्युपकरणवत्त्वम् ; तदा तानि शरीराद्युपकरणानि स्वेनैव सृष्टानीति नास्ति नियम इत्याह—

तन्वभावे सन्ध्यवदुपपत्तेः । ४ । ४ । १३ ॥

स्वेनैव सृष्टतनुप्रभृत्युपकरणाभावे परमपुरुषसृष्टैरुपकरणैर्भोगोपपत्तेः सत्यसङ्कल्पोऽपि स्वयं न सृजति । यथा स्वप्ने [3]" अथ रथान् रथयोगान् पथस्सृजते " इत्यारभ्य [3]" अथ वेशन्तान् पुष्करिण्यः स्रवन्त्यः सृजते स हि कर्ता" इति [4]"य एषु सुप्तेषु जागर्ति कामंकामं पुरुषो निर्मिमाणः तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते तस्मिन् लोकाश्श्रितास्सर्वे तदु नात्येति कश्चन" इति ईश्वरसृष्टैः रथाद्युपकरणैर्जीवो भुङ्क्ते; तथा मुक्तोऽपि लीलाप्रवृत्तेनेश्वरेण सृष्टैः पितृलोकादिभिर्लीलारसं भुङ्क्ते ॥१३॥

भावे जाग्रद्वत् । ४ । ४ । १४ ॥

स्वसङ्कल्पादेव सृष्टतनुप्रभृतिपितृलोकाद्युपकरणभावे जाग्रत्पुरुषभोगवन्मुक्तोऽपि लीलारसं भुङ्क्ते ; परमपुरुषोऽपि लीलार्थं दशरथवसुदेवादिपितृलोकादिकमात्मनः सृष्ट्वा तैर्मनुष्यधर्मलीलारसं यथा भुङ्क्ते ; तथा मुक्तानामपि स्वलीलायै पितृलोकादिकं स्वयमेव सृजति कदाचित् ; कदाचिच्च मुक्ताः सत्यसङ्कल्पत्वात्परमपुरुषलीलान्तर्गतस्वपितृलोकादिकं स्वयमेव सृजन्तीति सर्वमुपपन्नम् ॥ १४ ॥

नन्वात्माऽणुपरिमाण इत्युक्तम् ; कथमनेकशरीरेष्वेकस्याणोरात्माभिमानसम्भव इत्यत्राह—

---

१ ॥—२ ॥—३. बृ. ६-३-१० ॥—४. कठ. २-५-८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रदीपवदावेशस्तथाहि दर्शयति । ४। ४ । १५ ॥

यथा प्रदीपस्यैकस्यैकस्मिन्देशे वर्तमानस्य स्वप्रभया देशान्तरावेशः; तथाऽऽत्मनोऽप्येकदेहस्थितस्यैव स्वप्रभारूपेण चैतन्येन सर्वशरीरावेशो नानुपपन्नः; यथा चैकस्मिन्नपि देहे हृदयाद्येकप्रदेशवर्तिनोऽपि चैतन्यव्याप्त्या सर्वस्मिन् देह आत्माभिमानः, तद्वत्। इयान्विशेषः—अमुक्तस्य कर्मणा सङ्कुचितज्ञानस्य देहान्तरेषु आत्माभिनानुगुणा व्याप्तिर्न सम्भवति; मुक्तस्य त्वसङ्कुचितज्ञानस्य यथासङ्कल्पमात्माभिमानानुगुणा व्याप्तिः 'इदम्'इति ग्रहणानुगुणा च नानुपपन्ना। तथाहि दर्शयति [१]"वालाग्रशत भागस्य शतधा कल्पितस्य च। भागो जीवस्स विज्ञेयस्स चानन्त्याय कल्पते" इति। अमुक्तस्य कर्म नियामकम्; मुक्तस्य तु स्वेच्छेति विशेषः॥

ननु परं ब्रह्म प्राप्तस्यान्तरबाह्यज्ञानलोपं दर्शयति श्रुतिः [२]"प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यं किंचन वेद नान्तरम्" इतिः तत्कथं मुक्तस्य सार्वज्ञ्यमुच्यते? तत्रोत्तरं—

स्वाप्ययसम्पत्त्योरन्यतरापेक्षमाविष्कृतं हि । ४ । ४ । १६ ॥

नेदं वचनं मुक्तविषयम्; अपितु स्वाप्ययसम्पत्त्योरन्यतरापेक्षम्। स्वाप्ययः—सुषुप्तिः; सम्पत्तिश्च—मरणम्, [३]"वाङ्मनसि सम्पद्यते" इत्यारभ्य [३]"तेजः परस्यां देवतायाम्" इति वचनात्। तयोश्चावस्थयोः प्राज्ञप्राप्तिर्निस्सम्बोधत्वं च विद्येते। अतस्तयोरन्यतरापेक्षमिदं वचनम्। सुषुप्तिमरणयोर्निस्सम्बोधत्वं, मुक्तस्य च सर्वज्ञत्वमाविष्कृतं हि श्रुत्या [४]"नाह खल्वयमेवं सम्प्रत्यात्मानं जानात्ययमहमस्मीति नो एवेमानि भूतानि विनाशमेवापीतो भवति नाहमत्र भोग्यं पश्यामि" इति सुषुप्तिवेलायां

१. श्वे. ५-अ. ९ ॥—२. बृ. ४-३-२१ ॥—३. छा. ६-८-६॥—४. छा. ८-११-२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निस्सम्बोधत्वमुक्त्वा तस्मिन्नेव वाक्ये मुक्तमधिकृत्य [१]"स वा एष दिव्येन चक्षुषा मनसैतान् कामान् पश्यन् रमते य एते ब्रह्मलोके" इति सर्वज्ञत्वमुच्यते। तथा [२]"सर्वं ह पश्यः पश्यति सर्वमाप्नोति सर्वशः" इति च स्पष्टमेव सर्वज्ञत्वमुच्यते।तथा मरणे च निस्सम्बोधत्वम् [३]"एतेभ्यो भूतेभ्यस्समुत्थाय तान्येवानु विनश्यति" इत्युक्तम्। विनश्यति—नपश्यतीत्यर्थः। अतः [४]"प्राज्ञेनाऽत्मना" इति वचनं स्वाप्ययसम्पत्त्योरन्यतरापेक्षम् ॥ १६ ॥

इति श्रीशारीरकमीमांसाभाष्ये अभावाधिकरणम् ॥ १० ॥

वेदान्तसारे—अभावं बादरिराह ह्येवम् ॥ तस्य देहेन्द्रियाद्युपकरणाभावं बादरिर्मेने [५]"नह वै सशरीरस्य" इत्यादिर्हि तदभावमाह ॥ १० ॥

भावं जैमिनिर्विकल्पामननात् ॥ [२]"एकधा भवति" इत्यादिना देहेन्द्रियादिभिर्विविधताश्रुतेः देहाद्युपकरणसद्भावं जैमिनिर्मेने ॥ ११ ॥

द्वादशाहवदुभयविधं बादरायणोऽतः ॥ उभयश्रुतेस्सशरीरत्वमशरीरत्वञ्चेच्छातः; यथा द्वादशाहे उभयश्रुतेस्सत्रमहीनञ्च भवति ॥ १२ ॥

तन्वभावे सन्ध्यवदुपपत्तेः ॥ स्वेनैव सृष्टतन्वाद्यभावे स्वप्ने [६]"अथ रथान् रथयोगान् पथस्सृजते" इति परमपुरुषसृष्टैर्भोगवत् मुक्तोऽपि परमपुरुषसृष्टैरेव लीलारसं भुङ्क्ते ॥ १३ ॥

भावे जाग्रद्वत् ॥ स्वेनैव सृष्टोपकरणभावे जाग्रत्पुरुषवत् भुङ्क्ते ॥ १४ ॥

प्रदीपवदावेशस्तथाहि दर्शयति ॥ एकदेशस्थितस्यापि स्वप्रभारूपज्ञानव्याप्त्या सर्वानुभवस्सिद्ध्यति। [७]"बालाग्रशतभागस्य" इत्यारभ्य [७]"स चानन्त्याय कल्पते" इति हि दर्शयति ॥ १५ ॥

स्वाप्ययसम्पत्त्योरन्यतरापेक्षमाविष्कृतं हि ॥ [४]"प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किञ्चन वेद नान्तरम्" इति वेदनाभाववचनं सुषुप्तिमरणयोरन्यतरापेक्षमित्युक्तम्। [८]"ना ह खल्वयमेवं संप्रत्यात्मानं जानात्ययमहम

---

१. छा. ८-१२-५ ॥—२. छा. ७-२६-२ ॥ — ३. बृ. ४-४-१२ ॥ —४. बृ. ६-३-२१ ॥— ५. छा. ८-१२, १ ॥— ६. बृ. ६-३-१० ॥—७. श्वे. ५-अ. ९ ॥— ८. छा. ८-११-२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्मीति" इत्यादिना सुषुप्तधादावकिञ्चिज्ज्ञत्वमाविष्कृतं हि ॥ १६ ॥
इति वेदान्तसारे अभावाधिकरणम् ॥ ५ ॥

वेदान्तदीपे—अभावं बादरिराह ह्येवम् ॥ किं मुक्तस्य शरीरेन्द्रियाद्यस्ति? उत न? अथ यथासङ्कल्पमस्तिच नेति च संशयः । १"नह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः" इति मुक्तस्याशरीरत्वश्रवणान्नास्त्येवेत्येकः पक्षः । २"स एकधा भवति त्रिधा भवति"इति सशरीरत्वश्रुतेः अशरीरत्वश्रुतिः कर्मगृहीतशरीरविषयेति शरीरेन्द्रियाद्यस्त्येवेति द्वितीयः पक्षः । राद्धान्तस्तु—३"मनसैतान्कामान्पश्यन्रमते य एते ब्रह्मलोके" इत्यशरीरस्यैव भोगश्रुतेः २"स एकधा भवति त्रिधा भवति" इतिश्रुतेश्च यथासङ्कल्पमस्ति च न चेति । सूत्रार्थस्तु-शरीराभावं बादरिर्मेने; एवमाहहि श्रुतिः १"अशरीरं वाव सन्तम्"इति ॥ १० ॥

भावं जैमिनिर्विकल्पामननात् ॥ शरीरादिभावं जैमिनिर्मेने; कुतः? विकल्पामननात्-विविधः कल्पः-विकल्पः;२"स एकधा भवति त्रिधा भवति" इत्यादिना मुक्तस्य हि विविधकल्पनमाम्नायते; आत्मन एकरूपस्याच्छेद्यस्य वैविध्यासम्भवाच्छरीरद्वारेणैव हि विज्ञायते वैविध्यम् ॥ ११ ॥

द्वादशाहवदुभयविधं बादरायणोऽतः ॥ अतः उभयश्रुतेरिच्छातः, उभयविधम् , शरीरवत्त्वमशरीरत्वं च भगवान्बादरायणो मेने ; द्वादशाहवत्—यथा द्वादशाह उभयश्रुतेस्सत्रमहीनंच;४"द्वादशाहमृद्धिकामा उपेयुः"इति सत्रं भवति, ५"द्वादशाहेन प्रजाकामं याजयेत्" इत्यहीनम् ॥ १२ ॥

तन्वभावे सन्ध्यवदुपपत्तेः ॥ स्वेनैव सृष्टतनुप्रभृत्युपकरणाभावे परमपुरुषसृष्टैरुपकरणैर्भोगोपपत्तेस्सत्यसङ्कल्पोऽपि स्वयं न सृजति; सन्ध्यवत्-यथा स्वप्ने ६"अथ रथान्" इत्यारभ्य६"स हि कर्ता" इति ७"य एष सुप्तेषु" इत्यारभ्य ७" तदु नास्येति कश्चन" इतिचेश्वरसृष्टैरुपकरणैर्जीवो भुङ्क्ते; तथा मुक्तोऽपि लीलाप्रवृत्तेश्वरसृष्टैः पितृलोकादिभिर्लीलारसं भुङ्क्ते ॥ १३ ॥

भावे जाग्रद्वत् ॥ स्वसङ्कल्पसृष्टतनुप्रभृत्युपकरणसद्भावे जाग्रत्पुरुषभोगवन्मुक्तो लीलारसं भुङ्क्ते; परमपुरुषोऽपि दशरथवसुदेवादिपितृलोकादि-

---

१. छा. ८-१२-१ ॥—२. छा. ७-२६-२ ॥—३. छा. ८-१२-५ ॥—४ ॥—५ ॥—६. छा. ६-३-१० ॥—७. कठ. २-५-८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कमात्मनस्सृष्ट्वा तैर्मनुष्यधर्मलीलारसं भुङ्क्ते; तथा मुक्तश्च सत्यसङ्कल्पत्वात् परमपुरुषलीलान्तर्गतस्वपितृलोकादिकं स्वयमेव सृष्ट्वा तैर्लीलारसमनुभवति ॥

नन्वात्माऽणुपरिमाण इत्युक्तम्; कथमनेकशरीरेष्वेकस्याणोरात्माभिमानसम्भव इत्यत्राह—

प्रदीपवदावेशस्तथाहि दर्शयति ॥ यथा प्रदीपस्यैकस्यैकदेशवर्तिन्यया प्रभयाऽनेकदेशप्रवेशः; तद्वदात्मनोऽप्येकदेशस्थस्य स्वप्रभारूपेण ज्ञानेन सर्वदेहेषु यथासङ्कल्पमात्माभिमानानुगुणा व्याप्तिस्सम्भवति; यथैकस्मिन्देहे हृदयादिदेशे वर्तमानस्याणोरपि सर्वस्मिन्देहे अहम्' इत्यभिमानानुगुणव्याप्तिस्स्वप्रभारूपचैतन्येन, तद्वत्। तथा दर्शयति हि श्रुतिः१"वालाग्रशतभागस्य शतधा कल्पितस्य च। भागो जीवस्स विज्ञेयस्स चानन्त्याय कल्पते" इति।प्रत्यगात्मनोऽणुत्वमेव स्वरूपमिति सूत्रकारमतम्, २"नाणुरतच्छ्रुतेरितिचेन्नेतराधिकारात्" इति परस्यैव महत्त्ववचनात् ॥ १५ ॥

ननु परं ब्रह्म प्राप्तस्यान्तरबाह्यज्ञानलोपं दर्शयति श्रुतिः३"प्राज्ञेनाऽत्मना सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरम्" इति; तत्कथं मुक्तस्य ज्ञानानन्त्यमुच्यत इत्यत्राह—

स्याप्ययसम्पत्त्योरन्यतरापेक्षमाविष्कृतं हि ॥ नेदं मुक्तविषयम्; सुषुप्तिमरणयोरन्यतरापेक्षम्। आविष्कृतं हि श्रुत्या सुषुप्तिमरणयोर्निस्सम्बोधत्वम्, मोक्षदशायां सर्वज्ञत्वं च। सुषुप्तौ तावत् ४"ना ह वै खल्वयमेवं सम्प्रत्यात्मानं जानात्ययमहमस्मीति नो एवेमानि भूतानि विनाशमेवापीतो भवति" इति। विनाशम्-अदर्शनमित्यर्थः। मरणे च ५"एतेभ्यो भूतेभ्यस्समुत्थाय तान्येवानु विनश्यति" इति। विनश्यति—न पश्यतीत्यर्थः। मोक्षे तु ६"स वा एष दिव्येन चक्षुषा मनसैतान्कामान्पश्यन्रमते य एते ब्रह्मलोके" इति; ७"सर्वं ह पश्यः पश्यति सर्वमाप्नोति सर्वशः" इति च ॥ १६ ॥

इति वेदान्तदीपे अभावाधिकरणम् ॥ ५ ॥

---

१. श्वे. ५-अ. ९ ॥—२. शारी. २-३-२२ ॥— ३. बृ. ६-३-२१ ॥— ४. छा. ८-११-२ ॥—५. बृ. ४-४-१२ ॥—६. छा. ८-१२-५ ॥—७. छा. ७-२६-२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जगद्व्यापारवर्जं प्रकरणादसन्निहित-त्वाच्च । ४ । ४ । १७ ॥

किं मुक्तस्यैश्वर्यं जगत्सृष्ट्यादि परमपुरुषासाधारणं सर्वेश्वरत्वमपि, उत तद्रहितं केवलपरमपुरुषानुभवविषयमिति संशयः।किं युक्तम्? जगदीश्वरत्वमपीति । कुतः? [१]"निरञ्जनः परमं साम्यमुपैति" इति परमपुरुषेण परमसाम्यापत्तिश्रुतेः, सत्यसङ्कल्पत्वश्रुतेश्च । नहि परमसाम्यसत्यसङ्कल्पत्वे सर्वेश्वरासाधारणजगन्नियमनेन विनोपपद्येते । अतस्सत्यसङ्कल्पत्वपरमसाम्योपपत्तये समस्तजगन्नियमनरूपमपि मुक्तस्यैश्वर्यमिति ॥

(सिद्धान्तः)

एवं प्राप्ते प्रचक्ष्महे—जगद्व्यापारवर्जम्-इति। जगद्व्यापारः—निखिलचेतनाचेतनस्वरूपस्थितिप्रवृत्तिभेदनियमनम् । तद्वर्जे निरस्तनिखिलतिरोधानस्य निर्व्याजब्रह्मानुभवरूपं मुक्तस्यैश्वर्यम्। कुतः? प्रकरणात्—निखिलजगन्नियमनं हि परं ब्रह्म प्रकृत्याऽम्नायते [२]"यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद्ब्रह्म" इति। यद्येतन्निखिलजगन्नियमनं मुक्तानामपि साधारणं स्यात्, ततश्चेदं जगदीश्वरत्वरूपं ब्रह्मलक्षणं न सङ्गच्छते; असाधारणस्य हि लक्षणत्वम् । तथा [३]"सदेव सोम्येदग्र आसीदेकमेवाद्वितीयं तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजत" [४]"ब्रह्म वा इदमेकमेवाग्र आसीत् तदेकं सन्न व्यभवत् तच्छेयोरूपमत्यसृजत क्षत्रं यान्येतानि देवक्षत्राणि इन्द्रो वरुणस्सोमो रुद्रः पर्जन्यो यमो मृत्युरीशान इति"

१. मु. ३-१-३ ॥—२. तै. भृगु. १-अनु ॥—३. छा. ६-२-१ ॥—४. बृ. ३-४-११ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

१"आत्मा वा इदमेकएवाग्र आसीत् नान्यत्किंचन मिषत् स ईक्षत लोकान्नु सृजा इति स इमान् लोकानसृजत" २"एको ह वै नारायण आसीन्न ब्रह्मा नेशानो नेमे द्यावापृथिवी न नक्षत्राणि नापो नाग्निर्न सोमो न सूर्यः स एकाकी न रमेत तस्य ध्यानान्तस्थस्यैका कन्या दशेन्द्रियाणि" इत्यादिषु। ३"यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरः" इत्यारभ्य ४"य आत्मनि तिष्ठन्" इत्यादिषु च निखिलजगन्नियमनं परमपुरुषं प्रकृत्यैव श्रूयते।असन्निहितत्वाच्च–नचैतेषु निखिलजगन्नियमनप्रसङ्गेषु मुक्तस्य सन्निधानमस्ति; येन जगद्व्यापारस्तस्यापि स्यात्॥

प्रत्यक्षोपदेशादिति चेन्नाधिकारिकमण्डलस्थोक्तेः। ४। ४। १८॥

५"स स्वराड्भवति तस्य सर्वेषु लोकेषु कामचारो भवति" ६"इमान् लोकान् कामान्नी कामरूप्यनुसंचरन्" इति प्रत्यक्षेण–श्रुत्या मुक्तस्य जगद्व्यापार उपदिश्यते; अतो न जगद्व्यापारवर्जमिति चेत्–तन्न, आधिकारिकमण्डलस्थोक्तेः; आधिकारिकाः-अधिकारेषु नियुक्ता हिरण्यगर्भादयः; मण्डलानि-तेषां लोकाः;तत्स्थाः-भोगाः मुक्तस्याकर्मवश्यस्य भवन्तीत्ययमर्थः ५"तस्य सर्वेषु लोकेषु कामचारो भवति" इत्यादिनोच्यते। अकर्मप्रतिहतज्ञानो मुक्तो विकारलोकान् ब्रह्मविभूतिभूताननुभूय यथाकामं तृप्यतीत्यर्थः। तदेवं विकारान्तर्वर्तिनः आधिकारिकमण्डलस्थान् सर्वान् भोगान ब्रह्मविभूतिभूताननुभवतीत्यनेन वाक्येनोच्यते; न जगद्व्यापारः॥ १८॥

यदि संसारिवन्मुक्तोऽपि विकारान्तर्वर्तिनो भोगान् भुङ्क्ते, तर्हि बद्धस्येव मुक्तस्याप्यन्तवदेव भोग्यजातमल्पं च स्यात्; तत्राह—

---

१. ऐत. १-१॥— २. महो. १-अ. १॥— ३. बृ. ५-७-३॥ —४. शतपथ. १४-५-३०॥—५. छा. ७-२५-२॥—६. तै. भृगु. १०-५॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विकारावर्ति च तथाहि स्थितमाह । ४ । ४ । १९ ॥

विकारे—जन्मादिके न वर्तत इति विकारावर्ति; निर्धूतनिखिलविकारं निखिलहेयप्रत्यनीककल्याणैकतानं, निरतिशयानन्दं, परं ब्रह्म, सविभूतिकं, सकलकल्याणगुणमनुभवति मुक्तः। तद्विभूत्यन्तर्गतत्वेन विकारवर्तिनां लोकानामपि मुक्तभोग्यत्वम्। तथाहि परस्मिन् ब्रह्मणि निर्विकारेऽनवधिकातिशयानन्दे मुक्तस्यानुभवितृत्वेन स्थितिमाह श्रुतिः—[१]"यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते अथ सोऽभयं गतो भवति" [१]"रसो वै सः रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति" इत्यादिका। तद्विभूतिभूतं च जगत्तत्रैव वर्तते [२]"तस्मिन् लोकाश्श्रितास्सर्वे तदु नात्येति कश्चन" इति श्रुतेः। अतस्सविभूतिकं ब्रह्मानुभवन्विकारान्तर्वर्तिनः आधिकारिकण्डलस्थानपि भोगान् भुङ्क्ष इति [३]"सर्वेषु लोकेषु कामचारः" इत्यादिनोच्यते; न मुक्तस्य जगद्व्यापारः ॥ १९ ॥

दर्शयतश्चैवं प्रत्यक्षानुमाने । ४ । ४ । २० ॥

अस्य प्रत्यगात्मनो मुक्तस्य नियाम्यभूतस्य नियन्तृभूतपरमपुरुषासाधारणं जगद्व्यापाररूपं नियमनं न सम्भवतीत्युक्तम्; निखिलजगन्नियमनरूपो व्यापारः परमपुरुषासाधारण इति दर्शयतः श्रुतिस्मृती—[४]"भीषाऽस्माद्वातः पवते भीषोदेति सूर्यः भीषाऽस्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चमः" इति [५]"एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः" इत्यादिः; तथा [६]"एष सर्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरण एषां लोकानामसंभेदाय" इति

१. तै. आन. ७-२,१ ॥—२. कठ. २-५-८ ॥ —३. छा. ७-२५-२ ॥ —४. तै. आन. ८-१ ॥—५. बृ. ५-८-९ ॥ —६. बृ. ६-४.२२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

च श्रुतिः। स्मृतिरपि १"मयाऽध्यक्षेण प्रकृतिस्सूयते सचराचरम्। हेतुनाऽनेन कौन्तेय जगद्धि परिवर्तते"इति,२"विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्" इति च। तथा मुक्तस्य सत्यसङ्कल्पत्वादिपूर्वकस्याप्यानन्दस्य परमपुरुष एव हेतुरिति श्रुतिस्मृती दर्शयतः ३" एष ह्येवानन्दयाति" ४"मां च योऽव्यभिचारेण भक्तियोगेन सेवते। स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते। ब्रह्मणो हि प्रतिष्ठाऽहममृतस्याव्ययस्य च। शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्यच" इति। यद्यप्यपहतपाप्मत्वादिस्सत्यसङ्कल्पत्वपर्यन्तो गुणगणः प्रत्यगात्मनः स्वाभाविक एवाविर्भूतः, तथाऽपि तस्य तथाविधत्वमेव परमपुरुषायत्तम्;तस्य नित्यस्थितिश्च तदायत्ता; परमपुरुषस्यैतन्नित्यतायाः नित्येष्टत्वान्नित्यतया वर्तत इति न कश्चिद्विरोधः। एवमेव परमपुरुषभोगोपकरणस्य लीलोपकरणस्य च नित्यतया शास्त्रावगतस्य परमपुरुषस्य नित्येष्टत्वादेव तथाऽवस्थानमस्तीति शास्त्रादवगम्यते। अतो मुक्तस्य सत्यसङ्कल्पत्वं परमपुरुषसाम्यं च जगद्व्यापारवर्जम् ॥ २० ॥

भोगमात्रसाम्यलिङ्गाच्च। ४। ४। २१ ॥

ब्रह्मयाथात्म्यानुभवरूपभोगमात्रे मुक्तस्य ब्रह्मसाम्यप्रतिपादनाच्च लिङ्गाज्जगद्व्यापारवर्जमित्यवगम्यते ५" सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता" इति। अतो मुक्तस्य परमपुरुषसाम्यं सत्यसङ्कल्पत्वं च परमपुरुषासाधारणनिखिलजगन्नियमनश्रुत्यानुगुण्येन वर्णनीयमिति जगद्व्यापारवर्जमेव मुक्तैश्वर्यम् ॥ २१ ॥

यदि परमपुरुषायत्तं मुक्तैश्वर्यम्, तर्हि तस्य स्वतन्त्रत्वेन तत्सङ्कल्पान्मुक्तस्य पुनरावृत्तिः६सम्भावशङ्केत्यत्राह—

---

१. गी. ९ १० ॥—२. गी. १०-४२ ॥—३. तै. आन. ७-२१ ॥ —४. गी. १४-२६,२७ ॥—५ तै. आन. १-२ ॥—६. सम्भावनाशङ्के. पा ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अनावृत्तिश्शब्दादनावृत्तिश्शब्दात्। ४। ४। २२॥

यथा निखिलहेयप्रत्यनीककल्याणैकतानो जगज्जन्मादिकारणं समस्तवस्तुविलक्षणस्सर्वज्ञस्सत्यसङ्कल्पः आश्रितवात्सल्यैकजलधिः परमकारुणिको निरस्तसमाभ्यधिकसम्भावनः परब्रह्माभिधानः परमपुरुषोऽस्तीति शब्दादवगम्यते; एवमहरहरनुष्ठीयमानवर्णाश्रमधर्मानुगृहीततदुपासनरूपतत्समाराधनप्रीतः उपासीननादिकालप्रवृत्तानन्तदुस्तरकर्मसञ्चयरूपाविद्यां विनिवर्त्य स्वयाथात्म्यानुभवरूपानवधिकातिशयानन्दं प्रापय्य पुनर्नावर्तयतीत्यपि शब्दादेवावगम्यते। शब्दश्च [१]"स खल्वेवं वर्तयन्यावदायुषं ब्रह्मलोकमभिसम्पद्यते न च पुनरावर्तते न च पुनरावर्तते" इत्यादिकः। तथा च भगवता स्वयमेवोक्तं [२]"मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम्। नाप्नुवन्ति महात्मानस्संसिद्धिं परमां गताः॥ आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन। मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते" इति। नचोच्छिन्नकर्मबन्धस्यासङ्कुचितज्ञानस्य परब्रह्मानुभवैकस्वभावस्य तदेकप्रियस्यानवधिकातिशयानन्दं ब्रह्मानुभवतोऽन्यापेक्षातदर्थारम्भाद्यसम्भवात्पुनरावृत्तिशङ्का। न च परमपुरुषस्सत्यसङ्कल्पोऽत्यर्थप्रियं ज्ञानिनं लब्ध्वा कदाचिदावर्तयिष्यति; य एवमाह– [३]"प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः। उदारास्सर्व एवैते ज्ञानी त्वात्मैव मे मतम्॥आस्थितस्सहि युक्तात्मा मामेवानुत्तमां गतिम्। बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते॥ वासुदेवस्सर्वमिति स महात्मा सुदुर्लभः" इति। सूत्राभ्यासश्शास्त्रपरिसमाप्तिं द्योतयति। इति सर्वं समञ्जसम्॥ २२॥

इति श्रीशारीरकमीमांसाभाष्ये जगद्व्यापारवर्जाधिकरणम्॥ ६॥

---

१. छा. ८-१५-१॥— २. गी. ८-१५,१६॥—३. गी. ७-१७,१८,१९॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति श्रीभगवद्रामानुजविरचिते शारीरकमीमांसाभाष्ये
चतुर्थस्याध्यायस्य चतुर्थः पादः ॥ ४ ॥
समाप्तश्चाध्यायः ॥ ४ ॥
शास्त्रं च परिसमाप्तम् ॥

अविस्तृतास्सुगम्भीरा रामानुजमुनेर्गिरः ।
दर्शयन्तु प्रसादेन स्वं भावमखिलं दृढम् ॥

श्रीमते रामानुजाय नमः.

वेदान्तसारे—जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च ॥ अपहतपाप्मत्वादिसत्यसङ्कल्पत्वपर्यन्तं मुक्तस्य जगज्जन्मादिकारणत्ववर्जम्; १"यतो वा इमानि भूतानि जायन्ते" इत्यारभ्य १"तद्ब्रह्म" इत्यादि जगत्सृष्ट्यादि परस्यैवेति प्रकरणादवगम्यते; सृष्ट्यादिप्रकरणेषु मुक्तस्यासन्निहितत्वाच्च। मुक्तस्यातिरोहितस्वमाहात्म्यस्यानवधिकातिशयानन्दपरिपूर्णब्रह्मानुभव एव । ब्रह्मणोऽपि जगद्व्यापारो लीलामात्रमिति २"लोकवत्तु लीलाकैवल्यम्" इत्युक्तम् ॥

प्रत्यक्षोपदेशादिति चेन्नाधिकारिकमण्डलस्थोक्तेः ॥ ३"इमाल्लोकान् कामान्नी कामरूप्यनुसञ्चरन्" इत्युपदेशाज्जगद्व्यापारोऽस्तीति चेत्—न, हिरण्यगर्भाद्याधिकारिकमण्डलस्थभोगोक्तेः । नहि तत्र नियमनं श्रुतम् ॥ १८ ॥

विकारावर्ति च तथाहि स्थितिमाह ॥ विकारासंसृष्टपरिपूर्णपरब्रह्मानुभव एव तस्य सुखम्; तथाऽस्य स्थितिं ४"रसो वै सः । रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति" इत्याह ॥ १९ ॥

---

१. त. भृगु. १-अनु॥— २. शारी. २-१-३३॥ —३. भृगु. १०-५॥— ४. तै. आन. ७-१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दर्शयतश्चैवं प्रत्यक्षानुमाने ॥ उक्तमर्थं श्रुतिस्मृती च दर्शयतः १"तस्माद्वा एतस्मादात्मन आकाशस्संभूतः" २"एतस्य वा अक्षरस्य प्रशासने" इत्यादिका श्रुतिः; स्मृतिरपि ३"अहं सर्वस्य प्रभवः मत्तस्सर्वं प्रवर्तते" इति॥

भोगमात्रसाम्यलिङ्गाच्च ॥ १"सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता" इति ब्रह्मानुभवरूपभोगमात्रसाम्यलिङ्गाच्च ॥ २१ ॥

अनावृत्तिश्शब्दादनावृत्तिश्शब्दात् ॥ ४"स खल्वेवं वर्तयन् यावदायुषं ब्रह्मलोकमभिसंपद्यते न च पुनरावर्तते" इतिशब्दात् निवृत्तसमस्ततिरोधानः आविर्भूतापहतपाप्मत्वादिगुणगणः अनवधिकातिशयानन्दं परं ब्रह्मानुभवति, न च पुनरावर्तते इति निश्चीयते इति । सर्वं समञ्जसम् ॥२२ ॥

इति वेदान्तसारे जगद्व्यापारवर्जाधिकरणम् ॥ ९ ॥

इति श्रीभगवद्रामानुजविरचिते श्रीवेदान्तसारे चतुर्थस्याध्यायस्य चतुर्थः पादः ॥ ४ ॥

समाप्तश्चाध्यायः ॥ ४ ॥

श्रीमते रामानुजाय नमः.

वेदान्तदीपे—जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च ॥ किं मुक्तस्य भोगः निखिलहेयप्रत्यनीककल्याणैकतानसकलेतरविलक्षणानवधिकातिशयानन्दमहाविभूतिरूपपरब्रह्मानुभव एव ? उत जगत्सृष्ट्यादिजगन्नियमनरूपलीलाऽपीति संशयः । ५" निरञ्जनः परमं साम्यमुपैति" इत्यादिश्रुतेर्जगन्नियमनरूपलीलापीति पूर्वः पक्षः । सिद्धान्तस्तु—६"यतो वा इमानि भूतानि जायन्ते" ७"सदेव सोम्येदमग्र आसीत्" ८"ब्रह्म वा इदमेक एवाग्र आसीत्" ९"आत्मा वा इदमेक एवाग्र आसीत्" १०"एको ह वै नारायण आसीत्" इत्यादिषु परं ब्रह्म प्रकृत्यैव जगद्व्यापारश्श्रूयते । तत्रतत्र प्रकरणे न मुक्तस्य

१ तै. आन. १-२ ॥—२. बृ. ५-८ ९॥—३. गी. १०-८॥—४. छा. ८-१५-१ ॥—५. मु. ३-१-३ ॥—६. तै. भृगु. १ ॥—७. छा. ६-२-१ ॥ —८. बृ. ३-४-१० ॥—९. ऐत्र. १-१ ॥—१०. महो. १-९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सन्निधिरप्यस्ति । अतो जगन्नियमनरूपधुरावर्जं १"सोऽश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चिता" २"स एको ब्रह्मण आनन्दः श्रोत्रियस्य चाकामहतस्य" इत्यनवधिकातिशयानन्दब्रह्मानुभवे मुक्तस्य साम्यम् । ब्रह्म हि स्वस्य परस्य चानुभूयमानमविशेषेणानवधिकातिशयानन्दं भवति, आनन्दस्वरूपत्वाविशेषात्। सूत्रमपि व्याख्यातम् ॥ १७ ॥

प्रत्यक्षोपदेशादिति चेन्नाधिकारिकमण्डलस्थोक्तेः ॥ प्रत्यक्षं-श्रुतिः; ३"तस्य सर्वेषु लोकेषु कामचारो भवति" ४"इमाल्लोकान्कामान्नी कामरूप्यनुसञ्चरन्" इत्यादिश्रुत्या मुक्तस्य जगद्व्यापारोपदेशात्सोऽपीति चेत्-तन्न, आधिकारिकमण्डलस्थोक्तेः; आधिकारिकाः-परमपुरुषेण लोकनियमनाधिकारे नियुक्ताः हिरण्यगर्भादयः; मण्डलानि-तेषां लोकाः; तत्स्थभोगेषु मुक्तस्य यदीच्छा वर्तते, तत्रतत्र यथाकामं परमपुरुषानुग्रहेण वर्तमानस्तत्रस्थान्भोगान्भुङ्क्ते इति तया श्रुत्योक्तेः । 'कामान्नी' 'कामचारो भवति' इति हि श्रूयते; न नियुङ्क्ते इति ॥ १८ ॥

उत्पत्त्यादिविकारवर्ती हेयमिश्रोऽत्यल्पश्च कथं मुक्तस्य भोगो भवति, यदिच्छातस्सर्वेषु लोकेषु कामचार उच्यत इत्यत्राह—

विकारावर्ति च तथाहि स्थितिमाह॥ चशब्दोऽवधारणे; उत्पत्त्यादिविकारेषु न वर्तत इति विकारावर्ति परं ब्रह्मैव । निर्धूतनिखिलविकारं निखिलहेयप्रत्यनीककल्याणैकतानं निरतिशयानन्दं परब्रह्म सविभूति सकलकल्याणगुणं मुक्तस्य भोग्यम्; तद्विभूत्यन्तर्गतत्वेन विकारवर्तिनां लोकानामपि मुक्तभोग्यत्वम्; तथाहि परस्मिन्ब्रह्मणि मुक्तस्यानुभवितृत्वेन स्थितिमाह श्रुतिः—५"यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते अथ सोऽभयं गतो भवति" ५"रसो वै सः; रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति" ब्रह्मनिष्ठो ब्रह्मैव लब्ध्वाऽनन्दी भवतीत्यर्थः । ब्रह्म हि निरतिशयकल्याणानन्तगुणकमनन्तमहाविभूति च । तत्र सविभूतिकब्रह्मानुभवाय विभूत्येकदेशभूतलोकेषु सञ्चरतस्तत्रतत्र कामचारो भवतीत्युच्यते ॥ १९ ॥

दर्शयतश्चैवं प्रत्यक्षानुमाने ॥ उत्पत्त्यादिजगन्नियमनं परस्यैव; मुक्तस्य तु परब्रह्मानुभव एव भोग इत्युक्तमेवार्थं प्रत्यक्षानुमाने श्रुतिस्मृती दर्शयत,

१. तै. आन. १-२ ॥—२. तै. आन. ८-४ ॥ — ३. छा. ७-२५-२ ॥—४. तै भृगु. १०-५ ॥—५. तै. आन. ७-२-१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

१"तस्माद्वा एतस्मादात्मन आकाशस्सम्भूतः" २ "भीषाऽस्माद्वातः पवते" ३"एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः" इत्यादिका श्रुतिः; स्मृतिरपि ३"अहं सर्वस्य प्रभवः" ४"अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा" ५"विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्" ३"मत्तस्सर्वं प्रवर्तते" ६"सोऽभिध्याय शरीरात्स्वात्सिसृक्षुर्विविधाः प्रजाः" ७"प्रशासितारं सर्वेषाम्" इत्यादिका परविषया। ८"अथाकामयमानो योऽकामो निष्काम आप्तकाम आत्मकामः" इत्यादिका श्रुतिः। स्मृतिरपि ९"प्रियो हि ज्ञानिनोऽत्यर्थमहम्...।आस्थितस्स हि युक्तात्मा मामेवानुत्तमांगतिम्।वासुदेवस्सर्वमिति स महात्मा सुदुर्लभः" १०"मां च योऽव्यभिचारेण भक्तियोगेन सेवते।स गुणान्समतीत्यैतान्ब्रह्मभूयाय कल्पते ॥ ब्रह्मणो हि प्रतिष्ठाऽहममृतस्याव्ययस्य च । शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य च" इत्यादिका मुक्तविषया ॥ २० ॥

भोगमात्रसाम्यलिङ्गाच्च ॥ १"सोऽश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चिता" इति मुक्तस्य ब्रह्मानुभवभोगमात्रब्रह्मसाम्यवचनालिङ्गाच्च जगद्व्यापारवर्जमिति निश्चीयते ॥ २१ ॥

यदि नियन्तृत्वं परस्यैव, एवं तर्हि स्वतन्त्रत्वेन मुक्तं परः कदाचित्पुनरावर्तयिष्यतीत्याशङ्क्याह—

अनावृत्तिश्शब्दादनावृत्तिश्शब्दात्॥अस्य मुक्तस्यानावृत्तिश्शब्दादवगम्यते ; यथा ११"यतो वा इमानि भूतानि जायन्ते" १२"सोऽकामयत बहु स्यां प्रजायेयेति"१३"यः पृथिवीमन्तरो यमयति"१४"य आत्मानमन्तरो यमयति" इति शब्दात्परमपुरुषस्य स्रष्टृत्वं नियन्तृत्वं चावगम्यते ; तथा १५"एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्ते"१६"स खल्वेवं वर्तयन्यावदायुषं ब्रह्मलोकमभिसम्पद्यते न च पुनरावर्तते" १७"मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम् । नाप्नुवन्ति महात्मानस्संसिद्धिं परमां गताः ॥ आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन । मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते" १८"इदं ज्ञानम-

---

१. तै. आन. १-२ ॥—२. तै. आन. ८-१ ॥—३. गी. १०-८ ॥—४. गी. ७-६ ॥—५. गी. १०-४२ ॥—६. मनु. १-अ. ८ ॥—७. मनु. १२-अ. १२२ ॥—८. बृ. ६-४-६ ॥—९. गी. ७-१७ ॥—१०. गी. १४-२६ ॥—११. तै. भृगु. १ ॥—१२. तै. आन. ६-२ ॥—१३. बृ. ५-७-३ ॥—१४. बृ. ५-७-२२. मा ॥—१५. छा. ४-१५-६ ॥—१६. छा. ८-१५-१ ॥—१७. गी. ८-१५,१६ ॥—१८. गी. १४-२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पाश्रित्य मम साधर्म्यमागताः । सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च" इतिशब्दादेवैनं कदाचिदपि नावर्तयतीत्यवगम्यते । सूत्रावृत्तिस्तु शास्त्रपरिसमाप्तिं द्योतयति । इति सर्वं समञ्जसम् ॥ २२ ॥

इति वेदान्तदीपे जगद्व्यापारवर्जाधिकरणम् ॥ ८ ॥

इति श्रीभगवद्रामानुजविरचिते वेदान्तदीपे चतुर्थस्याध्यायस्य

चतुर्थः पादः ॥ ४

॥ समाप्तश्चाध्यायः ॥ ४ ॥

शास्त्रं च परिसमाप्तम् ॥

श्रीमते रामानुजाय नमः ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीमते रामानुजाय नमः.

अधिकरणसारावली.

अथ द्वितीयस्याध्यायस्य प्रथमः पादः-

स्मृत्यधिकरणम् ॥

तत्तादृक्तर्कतन्त्रक्रमनिपुणमहाबुद्धिसन्तोषसिद्धि-
र्यद्यप्युक्तेन लभ्या तदपि मृदुधियां हैतुकास्कन्दशङ्की ।
स्थूणाखातक्रमेण स्थिरयति कथितं ब्रह्मणः कारणत्वं
कार्यत्वं यस्य यादृक्छ्रुतिभिरवगतं तस्य तत्तादृशश्च ॥ १

पादद्वन्द्वं द्वितीये परिहरति परे कारणे बाह्यपीडां
कार्यद्वारेण पादान्तरयुगमुदयत्यान्तरक्षोभशान्त्यै ।
हेतुत्वायोगभङ्गः प्रथममिह विभोस्तस्य सार्वत्रिकत्वा-
योगक्षेपः परस्तात् फलति स च भवेच्छ्रौतनित्यं विहाय ॥ २

तन्त्रच्छायानिदाने स्वयमुपनिषदामान्यपर्ये निरुद्धे
तन्त्रेभ्यो दुर्बलत्वात्तदनुसरणमित्युज्जिहीते परोऽद्य ।
इत्थं सत्यत्र तत्तत्स्मृतिनय[1]पृतनातिक्रमन्तत्तदर्हैः
प्रत्यस्त्रैर्वारयित्वा द्रढयति चलितं पादतः प्राच्यमर्थम् ॥ ३

निर्णीतं कर्मकाण्डे स्मृतिनयविहतौ निश्चलत्वं श्रुतीनां
चर्चा तत्सिद्धयेऽसौ पुनरिति विफलः स्याद्द्वितीयाद्यपादः ।
मैवं गम्भीरनानाश्रुतिशिखरपरिच्छेद्यदुर्बोधताया-
मास्तोक्त्या तर्कतश्च क्षममनुसरणं पश्यतो ह्यत्र भङ्गः ॥ ४

द्वाभ्यां स्मृत्या विरोधं परिहरति ततस्त्वष्टभिस्तर्कबाधं
तेनोपादानभावं द्रढयति तु विभोः कर्तृतान्तद्द्वयं च ।

१. कलिता इति चिन्तामणौ व्याख्यातं ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तत्तत्क्षेपात्तुलाग्र[1]द्वयनमनसमुन्नामनीत्या प्रवृत्ते
शङ्कावर्गे परीक्षा समनिहितमतिः पक्षपातं रुणद्धि ॥ ५

स्मर्ता श्रुत्यैव गीतः कपिलऋषिरसौ वासुदेवांशभूतः
ख्यातो रामायणादौ प्रणिधिनिपुणधीर्वक्ति वेदान्ततत्त्वम् ।
तस्मादस्माद्विदूरे श्रुतिशिरसि तदुक्त्यैव निष्कर्षणं स्या-
न्न स्यादेकार्थमन्वाद्यनघबहुगिरा तत्र तत्त्वार्थसिद्धेः॥ ६

(अथ योगप्रत्युक्त्यधिकरणम् ॥ २ ॥)

वेदान् पूर्वं विधाताऽलभत भगवतस्सर्वविद्यानियुक्तो
वागीशश्चैष तस्माच्चदुदितविहतौ कम्पनं वेदमूर्ध्नः ।
मैवन्तस्यापि वेदापहृतिमुखविपदर्शनात् क्षेत्रिभावात्
भ्रान्त्यादिस्सम्भवेदित्यगतिकविषये पूर्ववन्निर्वहामः ॥ ७

(अथ विलक्षणत्वाधिकरणम् ॥ ३ ॥)

विश्वं त्रैगुण्यवत् स्यात् त्रिगुणत उदितब्रासमादित्ययुक्तं
सर्वाकारेण साम्यं क्वचिदपि न भवेत् केनचित् साम्यमिष्टम् ।
भग्ना हेतुव्यवस्थोचितगुणसमता गोमयाद्वृश्चिकादौ
स्थूलत्वं याति चेशः प्रकृतितनुरतस्सर्वचोद्योपमर्दः ॥ ८

ईक्षा तादृग्बहु स्यामिति सति पठिता तेजसोऽपाञ्च दृष्टा
सालक्षण्यं ततस्स्याज्जगत इति मृदुप्रज्ञपार्श्वस्थचोद्ये ।
तत्तन्मूर्तेः परस्येक्षणमिदमिति तद्वाक्यभावापलापी
सामान्येनाभिमानिव्यवहरणमिह व्याहरत् पूर्वपक्षी ॥ ९

(अथ शिष्टापरिग्रहाधिकरणम् ॥ ४ ॥)

संवादादक्षपादक्षपणककणभुग्भिक्षुपक्षेष्वणूनां
विश्वन्तद्धेतुकं स्यादिति मृदुमतिभिश्चावराहक्रमोक्तौ ।

---

१. द्वितयनति-पा ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अन्योन्यव्याहतार्थस्थपुटितकुहनायुक्तिदोषापनुत्त्यै
भाति त्वैय्यन्तसूर्यः प्रतिमततिमिरस्तोमकुक्षिंभरिर्नः ॥ १०

(अथ भोक्त्रापत्त्यधिकरणम् ॥ ५ ॥)

एको यस्यास्ति देहस्स भवति विविधानन्तदुःखैकभोक्ता
विश्वं देहः प्रभोश्चेत् स कथमतिपतेद्विश्वदुःखानुभूतिम् ।
इत्थं जीवेशसीमामपलपितुमनाः कोशभाजा श्रुतीनां
सम्राड्भृत्यादिनीत्या शममिह लभतां साम्यवैषम्यदर्शी ॥ ११

(अथारम्भणाधिकरणम् ॥ ६ ॥)

कार्यं धर्मैर्विरुद्धैः कट इव शकटात् कारणद्रव्यतोऽन्य-
द्व्यापारः कारकाणां विफल इतरथेत्यर्द्धवैनाशिकोक्तौ ।
द्रव्यैक्येऽप्यस्तु सर्वं तदभिमतदशाभेदतोऽसच्छ्रुतिभ्ये-
त्यक्षाल्लाघवाच्च श्रुतिकथितजगद्ब्रह्मतादात्म्यमुक्तम् ॥ १२
मायोपाधिस्वशक्तिव्यतिकरितपरब्रह्ममूलः प्रपञ्चो
येषान्तेऽप्यद्वितीयश्रुतिमवितथयन्त्यत्र तत्तद्विशिष्टे ।
अप्राधान्यात्तथा नः प्रकृतिपुरुषयोरन्तरात्मप्रधाने
वाक्येऽस्मिन् स्थूलसूक्ष्मान्वय इति जगतोऽनन्यभावोपपत्तिः॥
विश्वारम्भे विवर्ते शकलपरिणतिं शक्तिशेषस्य सूतिं
व्यक्त्युल्लासौ विसृष्टिं विकृतिमनियतां तत्त्वपङ्क्तौ च सृष्टिम् ।
तत्तद्वाक्यैकदेशे स्वरस इति मुधा कल्पयन्तस्तु मुग्धा-
स्सर्वश्रुत्यैकरस्यप्रणयिभिरधरीचक्रिरे तत्त्वविद्भिः ॥ १४

(अथेतरव्यपदेशाधिकरणम् ॥ ७ ॥)

उक्तेऽनन्यत्वपक्षे चिदपि परिणतिर्ब्रह्मणस्स्यात्ततस्त-
ज्जीवैक्यं तत्त्वमस्याद्यवगतमहतन्दुःखसिन्धुश्च जीवः ।
अभ्रान्तस्तु स्वदुःखं न सृजति न च तत्क्रीडयाप्यस्य मैवं
तात्स्थ्येनानन्यतोक्तेस्तदपि चिदचितोस्तच्छरीरत्वसिद्धेः॥ १५

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

(अथोपसंहारदर्शनाधिकरणम् ॥ ८ ॥)

शक्तौ कर्तृप्रकृत्योरुपकरणगणोपस्थितौ कार्यकृत्त्व-
न्तस्मादग्रे सदेकं किमुपकरणयेदित्यसच्छक्तिभेदात् ।
क्षीरायस्कान्तलूतात्रिदशमुनिमुखान्वीक्ष्य तोष्टव्यमस्मिन्
संकल्पादेव जीवो नुदति निजवपुर्विश्वरूपस्तथेशः ॥ १६

(अथ कृत्स्नप्रसक्त्यधिकरणम् ॥ ९ ॥)

कृत्स्नं कार्यात्मना चेत् परिणमति परं नावशिष्येत किञ्चि-
द्यद्यंशान्निष्कलत्वश्रुतिविहतिरिदं स्याद्विशिष्टेऽपि तस्मिन् ।
ब्रह्मोपादानतैवं न घटत इति चेन्न स्वपक्षेषु साम्या-
त्तन्मानात्तद्गृहीतौ श्रुतिमितमिति तल्लोकवत् स्वीकुरुष्व ॥ १७

संयोगाख्यं हि कार्यं विभुतदिरयोस्स्यादणूनाम्मिथो वा
कात्स्न्र्येनांशेन वा तद्विहतमिति वदन् शून्यवादे निमज्जेत् ।
सांख्योऽपि प्राह विभ्वीं प्रकृतिमिति कथन्न्यूनसृष्टिस्ततस्स्या-
न्मायादिष्वेवमूह्यं निगमनिगदिता त्वक्षता पद्धतिर्नः ॥ १८

(अथ प्रयोजनवत्त्वाधिकरणम् ॥ १० ॥)

आत्मार्थं विश्वसृष्टिः कथमपि सततावाप्तकामस्य न स्यात्
कारुण्याद्दुःखसृष्टिर्न भवति न च सा सर्वशक्तेश्चिकित्सा ।
सर्वज्ञस्स्वात्मतृप्तस्तदिह न जगतो हेतुरित्यन्धचोद्यं
लीलासौ लोकवत्स्यादभिमतिसमये सिद्धितस्त्वाप्तकामः ॥ १९

विश्वन्दुःखैकतानं विषममपि सदा निर्मिमाणस्य लीला
संजायेतासमञ्जक्रमत इति भवेन्निर्दयत्वादिदोषः ।
मैवं बीजाङ्कुरादिक्रमविषमभवानादिकर्मौघभाजां
जीवानां सौति तत्तत्फलमिति करुणासाम्ययोरप्रहाणात् ॥ २०

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दृष्टन्यायेन विश्वप्रजनकचिदचित्तत्त्वभेदप्रकृप्तौ
स्वेष्टप्रत्यर्थिधर्मोपनयननियतव्याप्तिवैयाकुली स्यात् ।
अत्यन्तादृष्टमर्थं भणितुमधिकृताच्छास्त्रतस्सर्वकर्तु-
स्सिद्धौ बाधाद्यनर्हप्रमितिपरवती सर्वधर्मोपपत्तिः ॥ २१

सांख्यस्मृत्या विरोधाद्विधिमतविहतेः कार्यवैरूप्यतोऽस्मि-
न्नेकार्थानेकतन्त्रोदितविहततया देहभोगावियुक्त्या ।
कार्योपादानभेदात् स्वहितविहतितः कारकस्तोमहानेः
कृत्स्नांशाद्यहबाधात् कृतिविफलतयाप्युत्थितं प्रत्यविद्ध्यत्॥ २२

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य
वेदान्ताचार्यस्य कृतिषु अधिकरणसारावल्यां
द्वितीयस्याध्यायस्य प्रथमः पादः ॥ १ ॥

(अथ द्वितीयस्याध्यायस्य द्वितीयः पादः ॥)

रचनानुपपत्त्यधिकरणम् ॥ १ ॥

बाधाभावादकम्पे स्थितवति निगमैर्ब्रह्महेतुत्ववादे
भूयः किं वीतरागो वदति परपरीवादमत्रेत्ययुक्तम् ।
प्रख्यातप्राच्यनैकप्रतिसमयभवन्मन्दसन्देहशान्त्यै
तुल्यत्वभ्रान्तिसिद्धा प्रकरणसमता तर्कपादे हि वार्या ॥ १

षड्विंशालम्बिसांख्यं स्फुटतरपठितं भारते योगतुल्यं
तत्स्थत्वात् पञ्चविंशस्त्विति च निगदितस्सर्वतत्त्वान्तरात्मा ।
तस्मात् सेशानतन्त्रं श्रुतिसमधिगतं स्थापयित्वाथ सूत्रैः
पक्षं त्वीशानपेक्षं प्रतिवदति नयैरुत्कटप्रत्यवायम् ॥ २

अव्यक्तादीन्पदार्थाननुमितिमुखतस्स्थापयन्तस्स्वबुद्ध्या
षट्त्रिंशत्तत्त्ववादप्रभृतिषु न कथं सङ्गमिच्छन्ति सांख्याः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तुल्याक्षेपोपपत्तीश्श्रुतिनियतिमुचां कल्पनास्सम्मृशन्तो
दृष्ट्वापह्नुवीरन् लघुमनुमिनुयुश्शेषमिच्छन्ति शास्त्रात् ॥ ३

कार्यं किंचित् कुविन्दप्रभृतिविरचितन्दृश्यतेऽन्यच्च सर्वं
कर्त्रायत्तं श्रुतन्तत् क्वचिदपि न पराधीनताभङ्गदृष्टिः ।
पङ्ग्वन्धक्षीरपाथस्तृणजलदतटिद्वाय्वयस्कान्तपूर्वैः
दृष्टान्तैर्न त्वदिष्टं फलति तदखिलं चेतनाधिष्ठितं नः ॥ ४

नन्वत्राचेतनानां स्वसमुचितविधौ कर्तृधीनत्वमुक्तं
शास्त्रारम्भे विधातुर्व्यनुददनुमितिं किं परस्सूत्रकारः ।
पृच्छेयं नातितुच्छा शृणु तदवहितस्सर्वकृन्नानुमातुं
नापह्नोतुं च शक्यस्तदुभयनियमादर्शनादित्यमंस्त ॥ ५

सत्त्वाद्यान् द्रव्यभेदांस्त्रिगुणमितिसमाहारतः कल्पयन्त-
स्तेषां नित्यं विभुत्वे समविषमदशाद्यत्र कीदृग्वदेयुः ।
अन्योन्याध्यासकृप्तिः प्रकृतिपुरुषयोर्भोगमोक्षोपपत्त्यै
च्छायापत्त्यादिनीत्या कथमियमुभयाचेतनत्वे घटेत ॥ ६

पुंसां भोगापवर्गप्रभृति फलमिदन्तच्च सर्वं प्रधाने
दृष्टत्वादेश्च कृप्तिः पुरुष इह पृथग्द्रष्टृतादिश्च बुद्धौ ।
मुक्त्यै बद्धस्य शास्त्रं मुनिरकृत ततो नित्यमुक्तोऽस्मि चेत्या-
द्यन्योन्यव्याहतोक्तिं वृषलपरिणये जैनभक्ता जपन्तु ॥ ७

(अथ महद्दीर्घाधिकरणम् ॥ २ ॥)

कल्प्योपादानमेकं परममहदधिक्षिप्य नानाविधाणू-
पादानौघस्य दृष्टात् समधिकवपुषः कल्पनेऽनिष्टमाह ।
प्राज्ञाधिष्ठानशून्यप्रकृतिपरिणतिः प्राङ्निरस्ताथ सेशं
सूक्ष्माणुद्रव्यमूलद्व्यणुकमुखजगत्सृष्टिपक्षं पिनष्टि ॥ ८

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रागेवारम्भणोक्तावपहृतविषया प्रागसद्द्रव्यकृप्तिः
काणादानामिदानीं क्षिपति बहुमुखं कारणप्रक्रियांशम् ।
त्रेधा हेतौ विभक्ते त्वनुमितिशरणैस्तत्तदंशैर्यथार्हं
व्याघातादीन्विकल्पक्रमविविधगतीन् व्याहरत्यत्र सूत्रैः ॥ ९

दृष्टस्याणोः प्रसूतिं द्व्यणुकमणुमपि स्थापयन्तोऽनुमित्या
दृष्टाकारानुसारान्न निरवयवताद्यत्र वक्तुं क्षमेरन् ।
सर्वं सद्योत सूक्ष्मे प्रमितिपरवतां जालकालोकलक्ष्ये
तद्भागान् ख्यापयेद्वा स्मृतिरफलतया त्वान्यपर्येण नेया ॥ १०

विश्रान्तिर्न क्वचिच्चेदवयवनिवहानन्त्यतो मानसाम्यं
मा षक्षोणीभृतोस्त्यादिति यदि तदसत्तारतम्यादनन्ते ।
वैषम्यं पक्षमासप्रभृतिषु नियतं नह्यनन्तेष्वनिष्टं
पारावर्यश्च जात्योर्न किमनुकथितं व्यक्त्यनन्तत्वसाम्ये ॥ ११

नादृष्टं किञ्चिदन्यच्छ्रुतिसरणिजुषान्देवतानुग्रहादे-
रन्यत्वे तस्य तज्ज्ञैरधिकयतनवत् कृप्तिरादौ व्युदस्ता ।
यत्रे यत्रानपेक्षां न किमनुमनुते स्यादृष्टेऽपि तद्वत्
भूतस्थादृष्टवादे द्व्यणुकृदणुगतादृष्टकल्पोऽत्र लूनः ॥ १२

नित्यं सम्बन्धमेके निजगदुरपृथक्सिद्धसर्वानुवृत्तं
नित्यं नित्येष्वनित्येष्वपि कतिचिदिमन्तावदायुष्कमाहुः ।
तत्तद्द्वन्द्वस्वभावप्रतिनियतिमुचां स्यान्न तेन व्यवस्था
गुर्वी त्वन्यस्य कृप्तिः कथमधिकजुषां नानवस्था न दोषः ॥

निर्धूते सूत्रकारैरवयविपरमाण्वात्मके द्रव्यवर्गे
विश्वं व्याप्त्येकलक्ष्यं परममहदसत् स्यादथाद्रव्यमेव ।
मैवन्दृष्टाणुतत्संहति तदुभयसम्बन्धसिद्धेरबाधा-
दागन्तुक्षोणिताद्यैः श्रुतिरपि जगदारम्भणं वम्भणीति ॥ १४

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

(अथ समुदायाधिकरणम् ॥ ३ ॥)

बाह्योक्ताचारभागश्रुतिविहतिवशाज्जैमिनीये निरस्त-
स्तत्त्वांशन्तर्किंतन्तैः प्रतिवदति गुरुर्जैमिनेरत्र पादे ।
निर्धूते तत्र पूर्वं निरुपधिकनयैरर्धवैनाशिकोक्ते
पक्षान्वैनाशिकानां जिनगिरिशमतक्षेपतः प्राक् क्षिणोति ॥ १५

बुद्धोऽसौ स्वावतारैस्सह परिगणितः श्रीधरेण स्वशास्त्रे
सर्वज्ञो नैव मुह्येन्न च निखिलसुहृद्विप्रलिप्सेत कश्चित् ।
तस्मात् बुद्धोक्तभङ्गे भजति भिदुरतां सात्वतादीति चेन्न
स्वाभीष्टप्रत्यनीकप्रमथनमनसा मोहनादिप्रवृत्तेः ॥ १६

दुर्वारा मोहनेच्छा निखिलजनयितुः केन मोहोऽन्यथा न-
स्तस्मात्कर्मानुरूपन्दिशति फलमसौ तत्त्वबोधं भ्रमं वा ।
स्वोक्त्यादेस्सिद्धमेतन्निरुपधि विषमो नैव तस्मात् समोक्तिः
कारुण्याद्विप्रलिप्सा न यदि वृजिनजं नेशनिघ्नं फलं स्यात् ॥

कल्प्यो बोद्धेति सर्वे सुगतमतविदो बोध्यमध्यक्षमेके
बुध्याकारानुमेयं कतिचन कतिचित् बोध्यमिथ्यात्वमाहुः ।
तत्तुल्यन्यायतोऽन्ये धियमपि जगदुः संवृतेरेव सिद्धां-
तान्सर्वांस्तर्कमानैर्धयति दितिजगुरूनद्य वैभाषिकादीन् ॥ १८

एकद्व्यादिस्वभावैर्यदणुभिरथवा तत्तदेकस्वभावैः
क्षोणीदेहादिपुञ्जप्रसृतिरिति समाभाषि वैभाषिकेण ।
ज्ञानादानादि तत्र क्षणभिदुरतया बोध्यबुद्ध्योर्न सिद्ध्ये-
न्निर्बाधा प्रत्यभिज्ञाप्यनुमितिमथनी शेषमन्यत्र सूक्तम् ॥ १९

बोधेष्वाकारभेदं निजमुपरितनेष्वर्पयन् प्राक्तनोऽर्थ-
स्तद्वैचित्र्यानुमेयः क्वचिदपि न तदाध्यक्षतेति प्रजल्पन् ।
प्राक् पश्चाच्च प्रवृत्तैर्विहतिबहुलतां गौरवञ्च ब्रुवाणैः
शिक्षादक्षैस्सयूथ्यैर्दमित उपशमं यातु सौत्रान्तिकाख्यः ॥ २०

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

(अथोपलब्ध्यधिकरणम् ॥ ४ ॥)

न ग्राह्यग्राहकौ स्तः क्वचिदपि विविधानादिसन्तानचित्तो
बुद्ध्यात्मा तथात्मकोऽद्य स्फुरति भवदशातिक्रमे स्वात्मनैव ।
योगाचारोक्तिरित्थं विषयविषयिणोर्बोधबाधौ समानौ
मन्वानैर्वारणीया स्वपरविभजनाद्यत्र न क्वापि सिद्ध्येत् ॥ २१

बुद्ध्यैक्यं बोध्यबोद्धोर्न घटत इह ते सत्ययोरन्ययोर्वा
भिन्नत्वे ग्राह्यलक्ष्मक्षतिमभिमनुषे नात्र चित्तैक्यमर्थ्यम् ।
चित्तद्वन्द्वं गुणं वा किमपि न च विदुः केऽपि भिन्नैकरूपं
तेनात्मख्यातिवादे स्थितिमिह भजतु स्वप्रकाशत्वमात्रे ॥ २२

(अथ सर्वथानुपपत्त्यधिकरणम् ॥ ५ ॥)

सत्त्वेऽसत्त्वे द्वये च द्वितयपरिहृतावप्यनिष्टप्रसङ्गै-
स्सर्वं शून्यञ्चतुष्कोट्यतिगतमिति नामानतस्स्वेष्टवादात् ।
अक्षोभ्यन्तत् प्रहाणे परमतमसती संवृतिर्नार्थसिद्ध्यै
तस्मादित्थं निषेधो निरुपधिक इह क्वाप्यदृष्टो न कल्प्यः ॥ २३

प्राक्पश्चात् सत्त्वहानेर्गगनकुसुमवत् स्यान्न मध्येऽपि कार्य-
म्मैवन्तत्तैव दृष्टेर्न यदि कथमसौ मध्यकार्यादिशब्दः ।
कार्यारम्भे निदानं विकृतिमदुत नेत्यादिचिन्तापि वन्ध्या
सामग्र्या कार्यसिद्धेर्भजति च गुणतां [1]कारणस्यानवस्था ॥ २४

साध्यं हेतुस्तदङ्गप्रभृति च यदि वस्संवृतेरेव सिध्ये-
दस्मद्वाक्यानुरोधादिह न कथमसिद्ध्यादिदोषा भवेयुः ।
तत्र प्रामाण्यबुद्धिर्न यदि पठत तन्मानमित्यस्मदुक्तिं
वस्तुस्थित्या न मानन्तदिति यदि समं त्वन्मतस्थापकेऽपि ॥ २५

अख्यातिस्त्वन्यथाधीर्विषयरहितधीस्सानधिष्ठानबुद्धि-
र्बोद्धार्थाकारयोगस्सदसदितरधीश्शून्यधीरात्मधीश्च ।

---

१. कारणस्थानवस्था. पा ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भ्रान्तौ सर्वत्र तत्तत्परमतकथकैरादृताः पक्षभेदाः
प्रायो बुद्धिर्यथार्था श्रुतिविदभिमता क्वापि भेदाग्रहादि ॥ २६

(एकस्मिन्नसम्भवाधिकरणम् ॥ ६ ॥)

संवादात् क्वापि भागे जिनमुनिवचसश्शेषमप्यस्तु मान-
न्तस्मात्तेनोपरोध्योपनिषदिति कचोल्लुञ्छनानान्दुराशा ।
वैषम्यस्यापि दृष्टेर्न यदि सुगतवागेवमेवास्तु सत्या
तेनान्योन्यं निरोधात् पुरुषवचनयोरप्रकम्प्या श्रुतिर्नः ॥ २७
सच्चासच्च द्वयञ्च द्वितयसमधिकन्तच्च पूर्वैस्सहेति
स्यादस्तीत्यादिवाचा परिहितगगनैर्गीयते सप्तभङ्गी ।
व्याघातस्तैर्यदीष्टस्स्वसमयविहतिर्यद्यनिष्टः परोक्ते-
स्तद्वाक्यैर्न क्षतिस्स्यान्न च निरुपधिकः क्वाप्यसच्चादियोगः ॥
वृद्धिह्रासौ यथार्हं प्रतितनु भविनान्देहभङ्गे विमान-
म्मुक्तौ नित्योर्ध्वयानप्रभृति गुरुतया नित्यपातं क्षमादेः ।
धर्मादेर्व्यापकत्वं गगनवदथवा तादृशं पुद्गलत्व-
न्दुस्तर्कैः कल्पयन्तश्श्रुतिनयकुशलैर्दूरमुत्सारणीयाः ॥ २९

(अथ पशुपत्यधिकरणम् ॥ ७ ॥)

सर्वं जानाति रुद्रश्श्रुतिषु च महितस्सत्यवादी च दृष्टः
प्रख्यातन्तद्व्रतञ्च क्वचिदुपनिषदीत्यस्तु मानन्तदुक्तिः ।
मैवन्देवेन दैत्यप्रमथनरुचिना मोहशास्त्राणि कुर्वि-
त्यादिष्टो ह्येष तन्त्रं निजमकृत ततस्तन्न शिष्टोपजीव्यम् ॥ ३०
प्राजापत्ये हि वाक्ये प्रकटमुपनिषत् प्राह देहात्मवादं
चक्रे लोकायतन्तत् सुरगुरुरभजन्मोहनत्वं मुकुन्दः ।
कण्वस्थाने च लौकायतिकपरिबृढा भारतेऽपि प्रगीताः
कार्यार्थं विप्रलम्भस्तदिह पशुपतेस्तद्वदेवोपपन्नः ॥ ३१
शैवाद्याख्याविशेषैः पशुपतिसमयस्स्याच्चतुर्धान्यथा वा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रुत्यान्योन्यं च बाधस्स्फुट इह तदसौ शापदुष्टार्ह उक्तः ।
अग्राह्यान्[1] भैतिकानामनुसृतनिगमास्सस्मरुस्तत्मविष्टान्
तत्त्वेऽप्यत्रान्यथात्वं सुगतजिनमतानन्तरोक्तिः क्रमात्ता ॥ ३२
निष्ठा सर्वेषु नारायण इति वचनाद्धेत्वहन्तव्यतोक्ते-
र्मानत्वोक्त्या च तन्त्रान्तरमपि महितं वेदवद्धारतादौ ।
नातो बौद्धादिवत्तन्निरसनमिति चेत् सत्यमंशे तु बाध-
स्स्यान्नासौ पञ्चरात्रे क्वचिदपि तदिह स्वीकृतिर्वेदतुल्या ॥ ३३
दृश्यन्ते संगृहीता जगति हि समयास्ते च राज्ञानुपाल्या-
स्तस्मान्नः पक्षपातः क्वचिदनुचित इत्यभ्रकप्रायचोद्यम् ।
मुग्धैरन्ये गृहीता भवतु समयसंरक्षणोक्तिश्च धर्म्ये
निष्ठैक्योक्तिस्तदन्यग्रहविहतिपरा तद्विरुद्धोक्तिदृष्टे ॥ ३४

(अथोत्पत्त्यसम्भवाधिकरणम् ॥ ८ ॥)

प्रामाण्यं कर्मकाण्डस्मृतिनयवशतस्सात्त्वतस्यापि सिद्धं
पादेऽस्मिन् संगतिश्च प्रतिमतदमने नास्त्यमुष्येति चेन्न ।
प्रत्यर्थित्वं विरोधभ्रममपनयता पञ्चरात्रस्य वार्यं
दुस्तर्काद्यत्थितोक्त्या तंदितरसमयेष्वित्यनुस्यूतसिद्धिः ॥ ३५
दृष्टाऽस्मिन्वेदनिन्देत्यनभिमतमृषेस्साच्वते वैदिकत्वं
मैवं वैशद्यमूलस्तुतिपरवचने वेदवैरस्यहानेः ।
संगृह्यान्नायसारं प्रणयति भगवांस्तद्धि भक्तानुकम्पी
श्रौतस्मार्तादिवच्च व्यभजदिह विभुर्वैदिकन्तान्त्रिकं च ॥ ३६
वेदानां मानतोक्तेस्तदनुसरणतस्स्वस्य तन्मूलतोक्त्या
व्यावृत्तिर्भाति बाह्यागमत इति न तत्तुल्यभावोक्तिरार्षी ।
का हानिः क्षुद्रविद्याशबलमिति यथा तादृशे वेदभागे
मोक्षस्य प्रत्ययार्थं त्वगणिषत परं सात्वते सिद्धिभेदाः ॥ ३७

---

१. वैदिकाना. पा ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जीवस्योत्पत्तिमाह प्रथयति च मनो जीवतत्त्वप्रसूत-
न्तच्चाहंकारहेतुं व्यपदिशति ततः पञ्चरात्रन्न मानम् ।
मैवं जीवादिवाचो ह्यभिदधति विभोर्व्यूहभेदानिहात-
स्तत्तत्तत्त्वाभिमानान्नियतिमधिगता तेषु तत्तत्समाख्या ॥ ३८

जीवोऽत्रानाद्यनन्तः कथित इति तदुत्पत्तिपक्षो न हीष्ट-
श्शब्दस्संकर्षणादिर्न कथमपि समन्वेति जीवादिमात्रे ।
श्रौतस्सृष्टिक्रमश्च स्वयमनुपठितस्तद्विरुद्धन्न कल्प्य-
न्तस्माच्छ्रुत्या मिथो वा न विहतिरिह तत्तन्त्रतात्पर्यदृष्टेः ॥ ३९

सांख्या वैशेषिकाश्च श्रुतिपरिपठितन्धर्ममैच्छन्न तत्त्वं
तत्त्वाचारौ तु बुद्धक्षपणकपशुपत्युक्तिषु श्रुत्यपेतौ ।
वेदोपस्कारिविष्णुस्मृतिवदवितथे पञ्चरात्राख्यतन्त्रे
तत्त्वं त्रय्यन्तसिद्धं चरणमपि समं गृह्यभेदादिनीत्या ॥ ४०

स्मर्यन्ते पञ्चयज्ञा मुनिभिरपि नमस्कारमन्त्रेण शूद्रे
तत्राधीतं हविष्कृत्प्रभृतिपदमिहाप्यंशतोऽस्याधिकारः ।
योज्या दक्षोक्तकालक्रमगतिरभिगत्यादिभेदे तदुक्ते
ग्राह्यं पश्चिष्टिसोमप्रभृतिवदखिलं युक्तितस्सङ्कलय्य ॥ ४१

जातावाचार्यशब्दः क्वचिदिति न तथाचार्यदेवो भवेत्या-
द्यान्नाते तत्प्रतीतिस्स्मृतिषु नियमिताल्लक्षणात्तत्प्रवृत्तेः ।
तद्वत् स्यात् सात्त्वतादावगतिकविषये रूढिभङ्गो न दोषः
विप्रादेरत्र शास्त्रे स्थितिरपि बहुधा भारतादौ प्रसिद्धा ॥ ४२

योगास्साङ्ख्यव्युदासात् कणचरदमनादक्षपादानुयाता
बौद्धोन्माथेन लोकायतमुषितधियो जैनभङ्गात्तदुत्थाः ।
पत्युस्तन्त्रे पशूनां प्रकटितविहतौ तादृशापष्ठुनिष्ठा
ध्वस्तास्तत्तल्यतर्कागमशरणतया साकमस्मिन् कुदृग्भिः ॥ ४३

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पादेऽस्मिन् कापिलस्थैः कणभुगनुगतैर्बुद्धवैभाषिकाद्यै-
र्योगाचाराभिधानैस्सुगतमतरहश्शून्यवादप्रसक्तैः ।
अर्हत्सिद्धान्तभक्तैः पशुपतिसमयस्थायिभिश्चोपरोधं
क्षिप्त्वाथो पञ्चरात्रे श्रुतिपथमवदत् पञ्चमाम्नायदर्शी ॥ ४४

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य
वेदान्ताचार्यस्य कृतिषु अधिकरणसारावल्यां
द्वितीयस्याध्यायस्य द्वितीयः पादः ॥ २ ॥

(अथ द्वितीयस्याध्यायस्य तृतीयः पादः)

उपोद्घातः ॥

सर्वे साङ्ख्यास्तु नित्यं क्षणिकमखिलमप्यत्र वैभाषिकाद्या
नित्यानित्यं समस्तं जिनपरिपठितां सप्तभङ्गीं पठन्तः ।
नित्यानित्ये विभज्याप्यभिदधति विपर्यस्य वैशेषिकाद्या-
श्श्रुत्युत्थांस्तान् निरुन्धन् श्रुतिभिरथ वियत्प्राणपादौ युनक्ति ॥

वियदधिकरणम् ॥ १ ॥

पूर्वत्राधिक्रियायां पुरुषजनिवचो नित्यतोक्त्या निरूढं
व्योमोत्पत्तौ तथैव स्थितिरिति वचसोर्व्याहतौ वक्ति काश्चित् ।
सिद्धान्ती व्योमसृष्टिर्निगमशतमिता नान्यथा सिद्धिरस्यां
वायुव्योमामृतोक्तिर्जनिविधिविहतेत्युक्तिवैषम्यमाह ॥ २

तेजःप्राथम्यदृष्टेरमृतवचनतोऽनंशकद्रव्यभावा-
द्व्योमन्युत्पत्तिवाक्स्यादुपहितविषयैवात्मनीवेति चेन्न ।
प्राथम्यस्याश्रुतत्वात् प्रथमपठनतः कल्पनेऽन्येन बाधात्
किंचामर्त्योक्तितुल्यं त्वमृतपदमिहानेकवाक्यैककण्ठ्यात् ॥ ३

यौक्तस्सत्कार्यवादश्श्रुतिभिरनुमतो नावयव्यस्ति सृज्य-
स्तत्तद्द्रव्येषु नामान्तरभजनसहावस्थया सृष्टिवादः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इष्टाश्शब्दाद्यवस्थास्तव निरवयवद्रव्यवर्गेऽपि तस्मात्
व्योमन्युत्पत्तिरुक्ता श्रुतिषु तदितरोत्पत्तितुल्या न बाध्या ॥ ४

(अथ तेजोधिकरणम् ॥ २ ॥)

कूटस्थाद्ब्रह्मणस्स्याज्जगदखिलमिदं पुत्रपौत्रादिनीते-
रेतस्मात् प्राण इत्याद्यपि सुगममिहेत्यादिरूहोऽत्र मोहः ।
प्राणस्यान्तादिपाठक्रमत इतरसंक्षोभणेऽतिप्रसङ्गा-
दीक्षानुस्यूतिदृष्टेः प्रथममिव परं सौति तत्तच्छरीरम् ॥ ५

(अथात्माधिकरणम् ॥ ३ ॥)

द्रव्यं सर्वं हि नित्यं कथितमवयविद्रव्यभङ्गेन पूर्वं
नित्यत्वं सूत्रकारः पुनरपि पुरुषे किं विशिष्याभिधत्ते ।
सत्यन्नामान्तरार्हामिह नुदति दशां चेतनस्यानुपाधेः
प्रत्यक्त्वज्ञत्वधर्मौ तदिह नियमितौ शाश्वतौ क्षेत्रिणोऽपि ॥ ६
सच्छब्दार्थातिरिक्तं जनिमदखिलमित्यैतदात्म्यादिसिद्धं
प्रोक्ता सृष्टिश्च जीवे निरवयवनयस्त्वम्बरादौ निरस्तः ।
जीवोत्पत्तिस्ततस्स्यादिति न सदकृताभ्यागमादिप्रसङ्गा-
न्नित्यत्वाजत्वकण्ठोक्तिभिरपि जननं त्वस्य देहादियोगः ॥ ७
देहात्मत्वे जनिस्स्यान्न तदिह घटते जातमात्रस्य रागात्
ज्ञाने किण्वादिमेधोपलशबलपटप्रक्रियाप्यत्र दुस्था ।
देहे गेहादितुल्या ममकृतिरनघा दोषतस्त्वैक्यमोहः
क्षिप्तं चैक्यानुमानं बलवदनुमितेश्शास्त्रतस्तर्कतश्च ॥ ८
देहं देहातिरेके तदवधिनियतप्राणबुद्ध्यक्षरूपं
धीसन्तानं च नित्यं प्रलयविलयिनं स्थास्नुमप्यापवर्गात् ।
डिण्डीराभं सदब्धावितथविकृतौ जीवमिच्छन्त इत्थं
निर्धूता दूरमत्र श्रुतिभिरितरवद्बाधदोषोज्झिताभिः ॥ ९

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

(अथ शाधिकरणम् ॥ ४ ॥)

कैश्चिज्ज्ञानत्वमात्रं कथितमुपधिजा ज्ञातृतैवात्मनोऽन्यै-
स्तत्राम्नायादिबाधं प्रथयति विविधं ज्ञोऽत इत्यादिसूत्रैः ।
पूर्वन्यायादमुष्मिञ्ज जनिलयरहिते नित्यबोधेऽत्र चोक्ते
संकोचार्यर्हबुद्धेर्विकृतिवचनमप्यस्य सद्वारकं स्यात् ॥ १०

ज्ञातृत्वं ज्ञानता च श्रुतिभिरभिदधे नात्र पक्षे पताम-
स्सर्वत्रात्मा न भायात् किमिति न निगमैर्देहिनोऽणुत्वसिद्धेः ।
स्वाभासैकस्वमूर्तेरविशदमहसस्सर्वदा भानमिष्टं
धीसंकोचात् सुषुप्तिप्रभृतिषु विशदोल्लेखमात्रोपरोधः ॥ ११

धर्मस्थे त्वेवकारे त्रिविधमपि भवेत्तद्व्यवच्छेदकत्वं
धर्मिण्यस्यान्वये स्यात्तदितरविषये तस्य धर्मस्य हानिः ।
जानात्येवेत्यबोद्धा न भवति जडता ज्ञानमात्रोक्तिवार्या
ज्ञानालोपादिवाक्यानुगुणविषयतां यात्यसावेवकारः ॥ १२

उत्क्रान्तिस्पन्दनाणूपमितिवचनतोऽणीयसश्शक्तिलाभे
धीभूम्ना यौगपद्यं त्ववयवनयतोऽनेकमूर्तिग्रहेऽपि ।
यत्राम्नातं विभुत्वं परविषयमिदं भाति तात्पर्यलिङ्गै-
र्जीवे व्यापित्ववादो मतिमहिमपरस्स्वच्छताद्याशयो वा ॥ १३

(अथ कर्त्रधिकरणम् ॥ ५ ॥)

ज्ञातृत्वं पुंस इत्थं भवतु तदपि नामुष्य कर्तृत्वसिद्धि-
श्श्रुत्याद्यैस्तन्निषेधाद्विकृतिविरहितश्चेत्यसद्दृष्टबाधात् ।
कर्तृत्वापह्नवोक्तेरविकृतिवचसोऽप्यान्यपर्यं हि गीतं
कर्ता शास्त्रार्थवत्त्वात्तदयमिह न च स्यादबोद्धुर्नियोगः ॥ १४

किञ्च स्वोक्त्यादिभग्नो निगदितुरहमः कर्तृताया निषेधो
यद्यन्यस्याहमर्थात्तदिदमुपनिषद्वेदिनस्सिद्धसाध्यम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भोक्तृत्वस्याप्यभावे प्रसजति वितथं बन्धमोक्षादिशास्त्रं
प्राणादानाद्विहारात् प्रकृतिसमधिकोऽस्मीति योगाच्च कर्ता ॥ १५

व्यापारज्ञानवाञ्छाप्रशकनयतनायोगयुक्तिस्तु मन्दा
कार्ये सामग्र्यपेक्षे विधितदितरयोर्लोकसिद्धा प्रवृत्तिः ।
सार्थं शास्त्रं हितोक्त्या नियतिनियमिता शास्त्रयोग्या दशा सा
ज्ञाता कर्ता च भोक्ता तदयमिह पुमान् भाति सर्वैः प्रमाणैः॥ १६

(अथ परायत्ताधिकरणम् ॥ ६ ॥)

कर्ता नह्यन्यतन्त्रस्स्मरति खलु तथा पाणिनिश्चान्यथा चेत्
आज्ञा कुर्यान्न कुर्यादिति तु निगलिते धावनादेशवत् स्यात् ।
मैवं कर्माक्षकालप्रकृतिपरवशे कर्तृतां तत्फलं च
स्वीकृत्यात्मेशमात्रे श्रुतिशतविदिते द्वेष इत्थं दुरन्तः ॥ १७

साधारण्येन हेतुस्सलिलमिव विभुस्सर्वकार्याङ्कुराणां
वैषम्यं त्वाविरिञ्चात् प्रतिनियतफलैः प्राणिनां कर्मबीजैः ।
साम्यं स्वस्य स्वगीतं श्रुतमपि तदिहाधोनिनीषादिभेद-
स्तादृक्कर्मानुरूपं फलमिति नियतोऽनादिरेष प्रवाहः ॥ १८

काले दुःखोपशान्तिञ्जनयति भगवान् व्याजमात्रावलम्बी
या दुःखापाचिकीर्षा परहितमनसस्सैव तस्यानुकम्पा ।
दत्ते देहादियोगं दिशति च निगमं वक्ति वेदान्तसारं
निस्सीमानन्दयोगं निरुपधि समये सौति पुंसान्तयैव ॥ १९

दोषस्स्यान्निग्रहांशो यमयितुरिति चेन्नोपमर्दासहत्वात्
स्वानिष्टघ्नेश्वरे हि प्रसजति न परानिष्टमस्य प्रतीपम् ।
कारुण्यं सावकाशं क्वचिदिति कथितं साक्षिताद्यश्च सुस्थं
दृष्टे चैतत्स्वाभावे फलद इति धिया युज्यते तत्प्रपत्तिः ॥ २०

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रत्यङ्नात्माहमर्थः प्रमितिपरवतां कर्तृतादिश्च तस्मिन्
स्वेच्छापूर्वप्रवृत्तेरयमचिदधिकस्तावदीशानतुल्यः ।
ईशस्तु स्वेच्छयैव प्रयतत इति तन्निघ्नमन्यत्समस्तं
सारथ्यादिक्रमेण प्रतिनियतगतिस्स्यात् त्रयाणां प्रवृत्तिः ॥ २१

कर्तृत्वं स्यात् कदाचित् करणवति परप्रेरणानिर्व्यपेक्ष-
मोचेत् तन्निग्रहार्हं कथमिति यदि न स्वेष्टपक्षेऽपि साम्यात् ।
स्वेनापथ्यप्रवृत्तन्नहि पुनरपि तत् कारयेयुर्दयार्द्रा-
स्तच्चेत्तस्य स्वाभावादितरदपि न किं निष्फलोऽधीतभङ्गः ॥ २२

क्षेत्रज्ञानां समानां विषमयतनता तादृशादृष्टभेदा-
न्नादृष्टं त्वन्यदिष्टं नियमनभिदया शासितुस्तत्र भाव्यः ।
साक्षित्वाद्यश्च नेतुस्समनिगममितं प्रेरकत्वन्न रुन्धे
भाष्यादिग्रन्थलेशोऽप्यवहितमनसामैदमर्थ्यं भजेत ॥ २३

कर्ता देवः फलानां न तु करणभृतः प्रेरकश्चेत्ययुक्तं
सर्वश्रुत्यादिकोपान्न भवति न फलं कर्मणः पापचर्या ।
कर्माधीनं तु चिन्ताद्यपि हि भवभृतो भाषितं भाष्यकारै-
र्जन्तूनान्देवतानामपि करणगणाधिष्ठितं वक्ष्यतीत्थम् ॥ २४

(अथांशाधिकरणम् ॥ ७ ॥)

जीवादत्यन्तभिन्नः पर इति बहुधा व्याहरत् सूत्रकारो
भेदाभेदश्रुतीनां घटकनिगमतश्शास्त्रवं च व्यपोढम् ।
उक्ताक्षेपे समाधावपि न समधिको हेतुरत्रास्ति सत्यं
पादांशाद्युक्तिमुह्यद्बहुकुमतिमतक्षिप्तये त्वंशचिन्ता ॥ २५

अंशत्वं रामकृष्णप्रभृतिषु घटतां विग्रहांशाधिकारा-
ज्जीवे ब्रह्मांशतोक्तिर्न हि निरवयवं ब्रह्म वक्तुर्घटेत ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ब्रह्मादिश्चित्समष्टिः प्रतिपुरुषमिह त्वंशता चेत्ययुक्तं
विश्वस्रष्टुर्बहु स्यामिति बहुभवनध्यातुरेकत्वसिद्धेः ॥ २६

व्योमैकं स्याद्घटाद्यैः पृथगुपधिगणैर्ब्रह्म बह्वंशमेव-
न्तत्तोपाधिव्यपाये भवभृदयमियाद्ब्रह्मतामित्ययुक्तम् ।
स्वानर्थारम्भदौस्थ्यात् प्रतिनियतगुणप्रत्यभिज्ञाद्यदृष्टे-
श्छिन्नाच्छिन्नांशचिन्तोदितबहुविहतेस्साम्यशब्दाच्च मुक्तौ ॥ २७

मायोदन्वत्यपारे प्रतिफलति मृषावीचिषु ब्रह्मचन्द्र-
श्छायांशास्तस्य जीवा इति कतिचिदुशन्त्येतदुन्मत्तगीतम् ।
न ब्रह्मद्रष्टृतैषामचिदपि हि तथा स्वेन कल्प्यो न जीवः
कृत्तेःप्राक् स्वात्महानेस्त्रितयसमधिकः कल्पकस्त्वत्र मृग्यः ॥ २८

सन्मात्रं ब्रह्म सर्वानुगतमिह पुनर्नित्यसिद्धास्तयोंशाः
जीवेशाचित्प्रभेदादिति च कतिचनेदं च नोदञ्चनीयम् ।
सत्तामात्रानुवृत्तेस्तदधिकवपुषश्शासितुर्ब्रह्मतोक्ते-
र्ब्रह्मत्रैविध्यवाक्यं निरवयवतया निश्चितेऽन्याशयं स्यात् ॥ २९

मेरोरंशः किरीटप्रभृतिरिति नयान्नित्यभिन्नेऽशंतोक्ति-
स्साजात्याल्पत्वमूला गमयितुमुचितेत्यागमासन्नपक्षे ।
अंशोक्तिस्स्यादमुख्या स हि निपुणधियामेकवस्त्वेकदेश-
स्तस्माज्जीवो विशिष्टे भगवति गुणवत्तत्प्रकारोंश उक्तः ॥ ३०

उक्तं नित्योपलब्धिप्रभृति परमते पूर्वमेव ह्यनिष्टं
भूयस्तादृक्प्रसङ्गः प्रकथित इह किं भोगसङ्कीर्णतादेः ।
मैवं पूर्वंहि बाह्यप्रसृतिमशमयत्साम्प्रतं ब्रह्मवाद-
व्याजोत्सिक्तान् कुदृष्टीन् परिहृतिरिति च स्याद्भविष्यन्मतेषु ॥
मिथ्याज्ञानादिचक्रे मरुति भगणवद्भ्रूर्णमानस्य जन्तोः
प्रत्यक्तत्त्वप्रबोधाद्भवपरिहरणे सर्वतन्त्राविगीते ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शुद्धात्मज्ञानगर्भो परभजनभिदामङ्गभेदांश्च वक्ष्य-
न्मीमांसारम्भसिध्यद्वपुषमपि पुनश्शोधयामास जीवम् ॥ ३२
कृत्स्निर्व्योमादिकेऽपि क्रमभुवि च विभोः प्राच्यतत्त्वैर्विशिष्टा-
ज्जीवस्यौपाधिकौ तु प्रजननविलयौ चिद्घनज्ञातृतास्य ।
कर्तृत्वं पारतन्त्र्यं गुणतनुनयतो विश्वरूपांशताचे-
त्याम्नायान्योन्यबाधव्यपनयनवियत्पादसाध्यानि सप्त ॥ ३३

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य
वेदान्ताचार्यस्य कृतिषु अधिकरणसारावल्यां
द्वितीयस्याध्यायस्य तृतीयः पादः ॥ ३ ॥

(अथ द्वितीयस्याध्यायस्य चतुर्थः पादः ॥)

उपोद्घातः ॥

अक्षाद्युत्पत्त्यनूक्तौ नहि फलमधिकाशङ्कनं त्वत्र मन्द-
न्तत्संख्यादेः परीक्षाप्यनुकृतबलिभुग्दन्तचिन्तेति चेन्न ।
एतेष्वब्रह्मकार्यं किमपि कथयतां बाधनेनार्थवत्त्वा-
त्तत्साक्षात्संगतिस्स्यात् प्रथमचरमयोर्मध्यमानां प्रसङ्गात् ॥ १
अष्टावत्राधिकाराः प्रथममिह वियन्नीतिरुक्तेन्द्रियाणा-
न्तेजोबन्नोक्तनीतिन्द्रढयति चरमे व्यष्टिभेदस्य सृष्टौ ।
संख्यामानादिचिन्ताख्यपि तदुपहितोपासनाद्यैः फलं स्यात्
प्राणादिभ्यः प्रमाता पृथगिति विशदीकर्तुमप्येष पादः ॥ १

प्राणोत्पत्त्यधिकरणम् ॥ १ ॥

अग्रे सत्तामृषीणां श्रुतिरभिदधती प्राणतां वक्ति तेषा-
न्नात्र ब्रह्मैव वाच्यं बहुवचनहतेस्तेन नित्याक्षसिद्धिः ।
मैवन्तत्सृष्टिदार्ढ्याद्बहुवचनमिदं पाशनीत्यैव नेयं
प्राणर्षित्वे परात्मन्यपि हि सुघटिते तन्निरुक्त्यादिसाम्यात् ॥ २

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

(अथ सप्तगत्यधिकरणम् ॥ २ ॥)

सप्त प्राणाश्चरन्तीत्युदितमभिहितास्ते विशिष्यापि योगे
तस्मात् सप्तेन्द्रियाणीत्यसदधिकवचोदृष्टितोऽत्रान्यपर्यात् ।
लक्ष्मैषां सात्त्विकाहंकरणपरिणतद्रव्यता चाविशिष्टा
भेदेनोक्तिः प्रधाने मनसि फलवती कर्मबोधेन्द्रियेभ्यः ॥ ४
देहव्याप्येकमक्षं कतिचिदकथयन् भागतो भिन्नकृत्यं
केचित् कर्मेन्द्रियाणि श्रुतिपथविमुखास्तत्यजुः क्षुद्रतर्कैः ।
क्षेत्रज्ञस्याहुरेके सह करणगणं बुद्ध्यहङ्कारचित्तै-
रन्ये तं चित्तवर्जं निजगदुरिति तानर्थतोऽत्र व्युदास ॥ ५

(अथ प्राणाणुत्वाधिकरणम् ॥ ३ ॥)

सर्वेष्वानन्त्यवादात् परिमितिनियमानुक्तितश्चेन्द्रियाणां
व्याप्तिस्सिद्धेतिचेन्न प्रयदखिलतनूत्क्रान्तिगत्यागतिभ्यः ।
वृत्त्या दूरस्थधीस्स्याद्भजनविधिपरेऽनन्ततोक्तिस्स्वकार्यैः
कन्दस्थानां च तत्तत्तनुषु विकृतिमद्द्रव्यभावात् पृथुत्वम् ॥ ६

(अथ वायुक्रियाधिकरणम् ॥ ४ ॥)

प्राणः प्रागुक्तनीत्या परजनित इति स्थापितो वायुमात्र-
न्देहान्तस्तत्क्रिया वा स इति न पृथगुत्पत्तिवादात् सहास्य ।
द्रव्यत्वन्द्रव्यवर्गे पठनत उचितन्नैष तत्त्वान्तरं स्या-
त्तेजस्त्वे वाय्ववस्थात्यजनवदिह तत्त्यागहानेः कदापि ॥ ७

(अथ श्रेष्ठाणुत्वाधिकरणम् ॥ ५ ॥)

उक्तः प्राणस्त्रिलोक्या सम इति स जगद्व्यापकोऽस्त्वित्ययुक्तं
जीवाक्षन्यायतस्तत्सहपठिततदुत्क्रान्तिगत्याद्यबाधात् ।
स्तुत्यर्था सर्वसाम्यश्रुतिरिह करणक्षेत्रधृत्यादिहेतौ
देहेऽनल्पोपकारस्स्फुरति च दशधा वृत्तिभेदैर्विभक्तः ॥ ८

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

(अथ ज्योतिराद्यधिष्ठानाधिकरणम् ॥ ६ ॥)

भोक्तृणान्देवतानामपि तनुकरणाधिष्ठितिर्नेशतन्त्रा
तत्स्वातन्त्र्यप्रदानादिति न तनुभृतस्तच्छरीरं हि सर्वे ।
नित्ये तत्पारतन्त्र्ये क्वचिदपि न भवेद्राजसामन्तनीतिः
प्राणन्यायात् प्रभुत्वन्तदिह परवशं चेतनानां स्वशक्ये ॥ ९

(अथेन्द्रियाधिकरणम् ॥ ७ ॥)

प्राणोऽपि स्याद्वृषीकं भृशमुपकरणात्तेषु मुख्यत्ववादा-
दुत्क्रान्त्यादौ च साद्यादिति यदि न [1]पृथक्छब्दतस्तस्य भेदात्।
कण्ठोक्तादिन्द्रियत्वान्मनसि तु घटते गोबलीवर्दनीति-
र्न प्राणे सात्त्विकाहंकरणविकृतिता शब्दसाम्यादि मन्दम् ॥ १०

(अथ संज्ञामूर्तिकृप्त्यधिकरणम् ॥ ८ ॥)

मन्वाद्यैस्स्मर्यतेऽसौ सरसिजवसतिर्व्यष्टिनामादिकर्ता
जीवेनानुप्रविश्येत्यपि कथितमतः प्रेष्यकृत्यक्रमोऽत्र ।
तन्नैकोऽहि प्रवेष्टा त्रिवृतमकृत च व्याकरोदित्यधीत-
स्तत्तज्जीवान्तरात्मा सृजति स भगवांस्तादृशं कार्यजातम् ॥ ११
या जीवेनात्मनेति श्रुतिरियमपि न ब्रह्मजीवैक्यमाह
प्रागेवैकोऽन्तरात्मा वपुरितरदिति स्थायिभेदाभिधानात् ।
तेनेशस्तद्विशिष्टस्स्वकरणकतयानुप्रवेशेऽपि कर्ता
जीवे तत्कर्तृतायामिह न हि घटते त्वाश्रुतिः कर्तृभेदात् ॥ १२
अग्न्यादावण्डमध्यस्थितिमति कथितं रूपभेदैस्त्रिवृत्त्वं
तेजोबन्नाशितोक्तावपि विशदमिदन्तेन वेधास्त्रिवृत्कृत् ।
मैवं ब्रह्माण्डसृष्टिर्भवतु कथमसावत्रिवृत्कारपूर्वा
भुक्तेऽन्नादौ त्रिधोक्ता परिणतिरितरत् सन्निकृष्टैः प्रदृष्टिः ॥ १३

---

१. पृथक्छब्दनैस्तस्य. पा ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निगमनम् ॥

अक्षाणां जन्मसंख्यापरिमितय इह प्राणवायोस्स्वरूप-
न्तत्सौक्ष्म्यन्देवतादेस्तदुभयविषयाधिष्ठितौ पारतन्त्र्यम् ।
प्राणस्यानिन्द्रियत्वं बहुविधचिदचिद्यष्टिनामादिचाद्या-
त्पञ्चीकर्तुः स्वनाभिप्रभवकवचितादूचिरे प्राणपादे ॥ १४

नित्यत्वं व्योम्नि वाताद्यणुषु च पुरुषेऽप्यज्ञतादीनपार्थाश्
श्रोत्रादौ भूतताद्यं मनसि च विभुतां नित्यतत्त्वान्तरत्वम् ।
प्राणेष्वात्मादिभावं स्वपदनियमनस्वैरितां स्वर्गिबृन्दे
वेधस्युन्मुक्तयन्त्रक्रममपि वदतां पादयुग्मेऽत्र भङ्गः ॥ १५

तर्कैरापातसत्यैरविहतिकथने व्याहतिः स्थापिता स्यात्
सम्यग्भिर्वस्तु[1]गत्या तदिति यदि तदा स्वाभिमानोपरोधः ।
तेनाद्ध्यायो विरोधप्रशमनकृदसौ बौद्धबन्धोर्विरुद्ध-
स्सौत्री तर्काप्रतिष्ठा श्रुतिपथविमुखस्वैरवादेषु योज्या ॥ १६

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रसतन्त्रस्य श्रीमद्वेङ्कटनाथस्य
वेदान्ताचार्यस्य कृतिषु अधिकरणसारावल्यां
द्वितीयस्याध्यायस्य चतुर्थः पादः ॥ ४ ॥

॥ समाप्तश्चाध्यायः ॥ २ ॥

---

१. वृत्त्या. पा ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीमते रामानुजायनमः.

अधिकरणसारावली.

(अथ तृतीयास्याध्यायस्य प्रथमः पादः)

उपोद्घातः ॥

साद्ध्या मुक्तिर्नचेत्स्यात्प्रसजति विफला साधनाद्ध्यायकृप्ति-
स्साद्ध्या चेन्नश्वरी स्यात् कथमिह पुनरावृत्तिशून्योऽपवर्गः।
मैवं ब्रह्मानुभूतिः परभजनवता प्रागसिद्धैव साद्ध्या
धीसंकोचप्रणाशस्त्वियमिति च भवत्युत्तरावध्यतीता ॥ १

पादाभ्यामत्र पूर्वे जनयति भविनां ब्रह्मविद्याधिकारं
पश्चात्तेषामुभाभ्यां वदति बहुविधान्तामशेषैस्सहाङ्गैः।
ऐश्वर्यादौ विरक्तिं निरवधिविभवे पूरुषेचाभिलाषं
विद्याभेदावलम्बन्तदुपकरणमप्याह पादैः क्रमेण ॥ २

संसारोद्विग्नचेतास्तनुभृदधिकरोत्यत्र शारीरकांशे
वैराग्यार्थस्तु पादः किमिति पुनरसौ सूत्रकारैर्निबद्धः।
सत्यं प्राप्यान्तराणां निरयगणतुलारोपणम्मुक्त्युपाय-
प्रारम्भेऽभ्यर्हितं स्यात्त्वरत इह खलु स्पष्टदृष्टस्वबोधः ॥ ३

तदन्तरप्रतिपत्त्यधिकरणम् ॥ १ ॥

देहाद्यं भोग्यनीत्या दिवि भुवि च गतौ तत्रतत्रैव लभ्यं
प्राणाद्यैर्भूतसूक्ष्मैरपि किमिह मुधा पूर्वदेहाद्गृहीतैः।
जीवस्याणोर्गतिं च स्वयमुपजनयेदीश्वरः प्राणनीत्या
मैवं स्वच्छन्दकृत्ये श्रुतिमितनियतौ गौरवोक्तेरयुक्तेः ॥ ४

नानाजातीयराशिं व्यपदिशति जनो भूयसोंशस्य नाम्ना
प्राचुर्यादेवमापः पुरुषवचस इत्युच्यते भूतवर्गः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

व्यष्टिं पञ्चीकृतैस्तैस्सृजति हि स विभुस्तारतम्यं पुनश्च
श्रद्धाशब्दस्त्विहापः कथयति निगमे तत्समाख्यावदुक्तेः ॥ ५
द्यौः पर्जन्योऽथ पृथ्वी तदनु च पुरुषो योषिदित्येवमेतान्
पञ्चाग्नीन् कल्पयित्वा परिकरसहितांस्तेषु पञ्चाग्निविद्या ।
श्रद्धाख्यं भूतसूक्ष्मं क्रमपरिणतितस्सोमवर्षान्नरेतो-
रूपं हव्यं सजीवन्तनुधरमरुतो जुह्वतीति ब्रवीति ॥ ६

अथ कृतात्ययाधिकरणम् ॥ २ ॥

इष्टापूर्तादिरूपन्तनुभृदिह शुभं कर्म यत्किंच कुर्यात्
भुक्त्वा कृत्स्नन्तदन्ते पुनरवनिमियादित्यसदृष्टबाधात् ।
कात्स्न्र्येनेत्यश्रुतत्वात् सुकृतफलतया जातिभेदाद्यधीते-
स्तस्मात् प्रारब्धशेषैस्तदितरसहितैरापतेत् स्वर्गपान्थः ॥ ७
धूमं रात्रिं च पक्षं तिमिरकलुषितन्दक्षिणावृत्तिमासान्
पश्चाल्लोकं पितॄणां गगनमपि मृतश्चन्द्रमभ्येति कर्मी ।
प्रत्यावृत्तौ तु चन्द्राद्गगनसततगौ धूममभ्रं च मेघं
व्रीह्यादीन्याति रेतस्सिचमथ जननीं यात नाचक्रवर्ती ॥ ८
आचारांशस्य साद्ध्यं चरणवचनतो जातिभोगादिकं स्यात्
कर्माचारौ विभक्तौ श्रुतित इति न सद्वत्यभावात्तथोक्तेः ।
मुख्यं वृत्त्या हि कर्मण्यपि चरणवचो नैकदेशे निरोद्धुं
जात्यादिः कर्मभेदप्रभव इति मिते चिन्त्यमाचारसाद्ध्यम् ॥ ९
प्राप्ताचारातिवृत्तौ प्रतिपदमृषयस्सस्मरुः प्रत्यवायान्
प्राचीनांहःप्रणाशन्तदनुसरणतः पुण्यकर्माहितां च ।
नातस्सत्कर्ममात्रात् त्रिदिव इति धिया तत्परित्यागशङ्का
नह्याचारप्रहीणे श्वदृतिजलसमश्शोधको वेदवर्गः ॥ १०

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

(अथानिष्टादिकार्यधिकरणम् ॥ ३ ॥)

सर्वेषान्देहपाते सति नियमवती चन्द्रमःप्राप्तिरुक्ता
तस्मात् पापोत्तराणां निरयगतिपुरस्कारिणी सेति चेन्न ।
लोकस्संपूर्यते तैर्न पर इति गिरा संकुचेत् सर्वशब्द-
स्ते तत्तद्यातनान्ते तत इह सहसा कुत्सितां यान्ति योनिम् ॥११
जन्मप्राप्तिर्जरायुप्रभृतिषु भविनां कर्मपाकैर्विचित्रा
भूयिष्ठैः पुण्यपापैस्त्वपवदनवती पञ्चमाहुत्यपेक्षा ।
तद्धूमादिमार्गाः कति कति च शुभैरुत्कटैर्देहपाते
दिव्यं रूपं विमानादिकमपि सपदि प्राप्य याताः प्रसिद्धाः॥१२

(अथ तत्स्वाभाव्यापत्त्यधिकरणम् ॥ ४ ॥)

आहुत्योर्देहवत्त्वं प्रथमचरमयोर्निर्विवादं तथा स्या-
ज्जन्मैवाकाशवायुप्रभृतिषु भवतेरन्वयादित्यसारम् ।
रेतस्सिग्भावनीत्या पृथगभिलपनानर्हतामात्रमत्र
द्युभ्वोः पुण्यप्रसाद्ध्यं फलमिह पठितं नास्ति भोगश्च मध्ये ॥ १३

(अथ नातिचिराधिकरणम् ॥ ५ ॥)

व्योमादिस्थित्यवस्था चिरमचिरमिति व्यक्तनिर्देशहाने-
श्शुक्लावस्थानयात्स्यादनियतिरिति न स्वारसिक्याः प्रवृत्तेः ।
व्रीह्यादिभ्यो हि दुर्निष्पपतरमिति तु श्रूयते तेन पूर्वं
शीघ्रं तत्तदशायास्त्यजनमिति परिज्ञायते वाक्यशक्त्या ॥ १४

(अथान्याधिष्ठिताधिकरणम्)

जन्म व्रीह्यादिनाम्ना श्रुतमिह तदिदं देवमर्त्यत्ववत्स्या-
न्नैरात्म्यं स्थावराणान्नच निगमविदस्स्थापयन्तीति चेन्न ।
पुण्यस्यैव प्रवृत्ते फलपरिगणने स्थावरत्वोक्त्ययोगा
द्रेतस्सिग्वर्ष्मणीव द्युपचरति जनिं स्थावरेऽप्यन्यदेहे ॥ १५

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हिंसायोगादशुद्धं श्रुतिविहितमपि न्याय्यमिष्टादिकन्तत्
पापांशं व्रीहिभावप्रभृतिषु सुकृती भुङ्क्त इत्यप्ययुक्तम् ।
उक्ता मन्त्रार्थवादैः पशुहितमिति सा तच्चिकित्सावदेषा
ब्रूते यज्ञे वधोऽसाववध इति मनुस्स्तौति निन्दा त्विहान्यत् ॥
कर्तुर्दोषन्दिशेत्संज्ञपनमिह पशोस्तत्कृतोश्चोपकुर्यात्
तस्मादस्मिन्निषेधं क्षिपति न विधिरित्यब्रुवन् सांख्यभक्ताः ।
निर्धूते पश्वनर्थे न खलु तदुचितं पिष्टपश्वादिकल्प-
स्तत्तत्कालाधिकारिप्रतिनियत इति क्वापि न स्याद्विरोधः ॥१७
किञ्चोत्सर्गापवादक्रममिह जहतः कीदृशी नित्यहिंसा
शुद्धं न क्वापि सिद्ध्येत्तव हि विधिपदं स्पष्टतत्तन्निषेधम् ।
यत्नासत्यादि वैधं तदनु च विहिता निष्कृतिस्तन्निमित्ता
तत्नागत्या तथा स्यादितरवदथवा केवलन्तन्निमित्तम् ॥ १८
अश्लिष्टं विग्रहाद्यैर्नभ इव मुसलैः क्षेत्रिणं [१]केचिदूचुः
कर्माकर्तारमेवं फलमपि विविधोपाधिभेदैकनिष्ठम् ।
अव्यक्तस्यापवर्गे भवभुजमपि चानादिमुक्तस्वभावं
तेषामित्थं मनीषां बहिरकृत नयैरेष वैराग्यपादः
पादे त्वर्थाष्षडस्मिन्वपुरिह विजहद्भूतसूक्ष्मैस्सहेयात्
भुक्तस्वर्गोऽवरोहेदनुशयसहितो मात्रया भिन्नमार्गः ।
चन्द्रप्राप्त्यादि न स्यान्निरयपथजुषामम्बरादौ सदृत्तवं
तस्माच्छीघ्रोऽवरोहः परवपुषि परं व्रीहिपूर्वेऽपि योगः ॥ २०

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य
वेदान्ताचार्यस्य कृतिषु अधिकरणसारावल्यां
तृतीयस्याध्यायस्य प्रथमः पादः ॥ १ ॥

---

१. केचिदाहुः. पा ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

(अथ तृतीयस्याध्यायस्य द्वितीयः पादः ॥)

उपोद्घातः ॥

ब्रह्मैव स्वैस्स्वभावैर्बहुसुखमवदत् प्राक्तनाध्याययुग्मे
तस्येहाकृष्य चिन्ता किमिति पुनरसौ साधनाध्यायमध्ये ।
मैवं विद्याः प्रभेत्तुं विशदयति परं तद्धि तद्रूपभेदा-
त्सिद्धोपायादिभावं प्रथयति च विभोः प्राप्यतृष्णाप्रथिम्ने ॥ १

नैर्गुण्यं ब्रह्मणश्चेद्वितथ इह गुणैर्ब्रह्मविद्याविभागः
सोऽस्त्वेतैः कल्पितैश्चेच्छ्रुतिमतविहतिर्नात्र दृष्टिक्रमोऽपि ।
निर्दोषत्वं च नित्यं यदि वदसि मुधा दोषशान्त्यर्थयत्नः
कल्प्यं चेद्दुष्टता स्यात् प्रकृतिरिति परक्षिप्तये चैष पादः ॥ २

किंचादौ चिन्त्यभावः प्रमितिविषयता स्वप्रभत्वं सुखत्वं
विश्वाधिष्ठानता च स्वबहुभवनधीर्निर्विशेषे कथं स्यात् ।
सर्वश्रुत्यर्थहानिः स्ववचनविहतिस्सर्वमानैश्च बाधो
मायावैयात्यभाजामिति सगुणदशोपास्तिवादश्च दुस्थः ॥ ३

त्यक्तं दोषैर्गुणाढ्यं यदि पुनरिह तद्ब्रह्म चिन्त्येत पादे
जीवस्वप्राप्यवस्थामननमथकथं जाघटीतीति चेन्न ।
स्वाप्नार्थस्रष्टृभावप्रभृतिबहुविधब्रह्ममाहात्म्यसिद्ध्यै
जन्तोरस्य स्वमुक्तावतिपरवशताज्ञप्तये चैतदत्र ॥ ४

पादस्यास्याद्यमर्धं कतिचिदधिजगुः पूर्वपादस्य शेषं
पश्चादर्धन्तु साक्षादनुघटितमुपास्त्यर्थतत्तद्गुणोक्तेः ।
एतन्नातीव हृद्यं शबलितकथने चातुरीवैपरीत्या-
द्ब्रह्मोक्तौ जीवदोषग्रह इह तु सुखं तत्प्रतिद्वन्द्वसिद्धेः ॥ ५

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्वप्नेऽर्थास्सन्तु सृष्टास्तदपि बहुविधा दुस्त्यजा भ्रान्तिरत्र
प्रध्वस्तानामिदानींतनवदनुभवात्स्थायितादिभ्रमाच्च ।
सत्यं श्रुत्यादिसिद्धे श्रुतपरिहरणायोगतस्सृष्टिमात्रं
स्वीकृत्यांशे तु बाधाक्षममपि हि यथाजागरं न क्षिपामः ॥ ६
कश्चिद्योगप्रभावान्निजपरभवनस्वैरसंचारनीत्या
निष्क्रान्तः पूर्वदेहाद्विशति परवपुः पूर्वमाप्नोति भूयः ।
इत्थं स्वप्नेऽप्युदन्तस्थितिरिति कतिचिच्छ्वासवृत्त्यान्यथाऽन्ये
चित्तोद्यद्धीप्रसृत्येतरतनुभजने सौभरिन्यायसिद्धेः ॥ ७

सन्ध्याधिकरणम् ॥ १ ॥

उक्तं पत्या प्रजानां भविनि दहरवत् सत्यसङ्कल्पताद्यं
पुत्रादेश्चैष कर्ता प्रकृत इह सृजेत् स्वाप्नमर्थं च मैवम् ।
मुक्तौ तादृग्गुणोक्तेरनभिमतसमुत्पादनादेरयोगात्
स्वप्नानां सूचकत्वादपि निखिलजगत्कर्तुरेषापि सृष्टिः ॥ ८
कामंकामं विधातेत्यपि णमुलुचितोऽनूद्यते चेश इत्थं
सोऽयं सुप्तेषु जागर्त्यपि विशदमिदं संपरिष्वङ्गवाक्यात् ।
तत्तत्कालावसानाः कतिकति नियता जागरेऽप्यर्थभेदा-
स्तत्तत्कर्मानुरूपं फलवितरणमित्येतदप्युक्तमाप्तैः ॥ ९
मायामात्रोक्तिलाभाच्छ्रुतिमुखसुगता विश्वमिथ्यात्वमाहु-
श्शास्त्रारम्भे तदेभिः कथितमिह ततोऽसङ्गतत्वादिदुस्स्थम् ।
मायाशब्दो न मिथ्यावचन उपचरत्वत्र तत् किन्ततस्स्यात्
सत्येऽस्त्रादौ प्रयोगादुचितनियमने सोऽयमाश्चर्यतार्थः ॥ १०

(अथ तदभावाधिकरणम् ॥ २ ॥)

स्थानं जन्तोस्सुषुप्तौ श्रुतिरनियमतो वक्ति नाड्यः पुरीत-
द्धार्दं ब्रह्मेति तस्मादिह भवतु मिथो नैरपेक्ष्याद्विकल्पः ।
तन्न प्रासादखद्वाशयनवदुपकृत्यन्तरैर्योजितानां

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पक्षेपक्षे विकल्पः क्रमघटितचतुर्दोषयुक्तो न युक्तः ॥ ११

(अथ कर्मानुस्मृतिशब्दविध्यधिकरणम् ॥ ३ ॥)

मुक्तिब्रह्मण्यपीतिर्जहदसुखगणा तादृशीयं सुषुप्ति-
श्रुत्यैव ख्याप्यतेऽतस्तदनु तनुभृदुद्बुद्धयमानस्ततोऽन्यः ।
मैवं कर्मानुवृत्तेस्स्मरणनियमतः पूर्व एवेति शब्दा-
न्मोक्षोपायादिशिष्टेस्स्वपदनुवदनात् प्राच्य एव प्रबुद्धः ॥ १२
जीवानादित्वमूचे दृषदनुकरणं क्षेप्स्यते चापवर्गे
स्वर्गाद्यर्थप्रवृत्तिः श्रुतिनयविदिता सौगताद्याश्च भग्नाः ।
कल्पान्तेऽप्येकतोक्तिर्नियमितविषया नामरूपप्रहाणात्
भूयश्चिन्ता सुषुप्ते प्रलयसमदशासंजिहासादिसिद्ध्यै ॥ १३

(अथ मुग्धाधिकरणम् ॥ ४ ॥)

जाग्रत्स्वप्नौ न बाह्यावगमविरहितौ श्वासपूर्णासुषुप्ति-
स्तस्मान्मुग्धिर्मृतिस्स्यात् प्रशमितकरणप्राणवर्गेति चेन्न ।
मृत्यादेर्हेतुभेदात् स्थितिमृतिविशयादुत्थितेश्चानियत्या
मर्तुं प्रक्रम्य मध्ये विरमति विधिनेत्यत्र तुर्यार्द्धभावः ॥ १४

पेटिकोपोद्घातः ॥

जन्तूनां जागरादिस्थितिषु भवति यद्वैशसं दर्शितं तत्
तत्तत्स्थानादियोगेऽप्यनघशुभगुणं ब्रह्म संशोद्ध्यतेऽद्य ।
संसर्गैक्यादिमूलान् परिहरति ततो दोषवर्गानुभाभ्यां
हीनत्वौदार्यहानी परमपनयते नीतियुग्मेन नेतुः ॥ १५
नैर्गुण्यं निर्गुणोक्तेर्गुणवचनमिहाऽऽविद्यधर्मार्थवादो
नैर्दोष्यं वस्तुवृत्त्या तदितरदखिलं स्वाप्नभोगादितुल्यम् ।
इत्थं जीवेशभूमापहरणकुहनावादमोमुह्यमानान्
क्षेप्तुं न स्थानतोऽपीत्यधिकरणमथारभ्यतेऽनेकशङ्गम् ॥ १६

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

(अथोभयलिङ्गाधिकरणम् ॥ ५ ॥)

हेयं वस्तु स्वतो यत् स्थितिरिह हि भवेद्दुःखकृत् स्वेच्छयापि
त्याज्यत्वं नान्यथा स्यादिति न निरुपधेर्हेयभावस्य हानेः ।
नित्यस्वातन्त्र्यभाजो भविन इव दशाभेदतो नाप्यवद्यं
श्रुत्यैवैकत्र देहे परतदितरयोश्शुद्ध्यशुद्धी ह्यधीते ॥ १७
ब्रह्मक्षत्रादिदेहेष्वणुरिव विभुरप्यात्मभावेन तिष्ठं-
स्तत्तच्छब्दाभिलप्यस्तदिह स न कथं तत्तदादेशवश्यः ।
मैवं न ज्ञाप्यतेऽसाविदितविरहाच्छासितृत्वान्न शास्यः
किंचिज्ज्ञो ह्यन्यतन्त्रो जगति हितविदा बोद्ध्यते प्रेर्यते च ॥ १८
उत्सर्गेणापवादं न खलु नयविदः क्षोभणीयं क्षमन्ते
तस्माद्ब्राह्मे गुणादौ विधिविषयमतिक्रम्य तिष्ठन्निषेधः ।
एवं शान्ते विरोधे नहि समविषयापच्छिदान्यायसिद्धि-
र्दृष्टो नित्यं निषेधः पर इह च ततस्स्यादुपक्रान्तिनीतिः ॥ १९
सत्त्वं कार्यस्य गोपायति कथमसतस्सद्भवेदित्यधीति-
र्द्रव्यान्यत्वं हि कार्ये व्यपनयति परम्मृत्तिकेत्येवशब्दः ।
अन्तर्भावाद्विशिष्टे भगवति जगतां नेह नानेति युक्तं
निर्दिष्टेयत्त्वशङ्कां प्रशमयति परे नेतिनेतीतिचोक्तिः ॥ २०
तत्तद्वस्तुप्रदेशे सकलगुणतया पूर्णदृश्यः परात्मा
वृद्धिह्रासादिभेदोज्झित इति हि जलाधारसूर्योपमोक्तिः ।
अस्पर्शोदाहृतिश्चेन्नहि घटकरकाकाशदृष्टान्तयुक्ति-
स्तस्माद्ब्रह्म द्विलिङ्गं द्विविधविभवमित्येव वेदान्तपक्षः ॥ २१

(अथाहिकुण्डलाधिकरणम् ॥ ६ ॥)

विश्वस्रष्टुस्स्वदुःखप्रजननमिह न स्वांशतोऽचित्त्वकृत्स्नौ
मृत्तत्कार्यादिकं च स्वरसमिह बहूदाहृतं सम्प्रतिज्ञम् ।
तस्मादव्याकृतादिर्विहरणनियता विक्रियैवेति चेन्न

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्वांशे मौढ्यं वितन्वन्विहरति भगवानित्यनर्थानपोहात् ॥ २२
कश्चिन्नित्याचिदंशो विविधविकृतिमान्ब्रह्मणीत्याहुरेके
फेनादिन्यायतोऽन्ये सति विकृतिवशाज्ज्ञाज्ञसर्वज्ञभागान् ।
चन्द्रज्योत्स्नादिनीत्या कतिचिदिह जगद्ब्रह्मणोरैकजात्यं
सर्वे ते सर्ववेदस्वरसगतिहतेरत्र वित्रासनीयाः ॥ २३

(अथ पराधिकरणम् ॥ ७ ॥)

सेतुं तीर्त्वेत्यधीतेर्मितमिति वचनात् प्राप्यसंबन्धितोक्ते-
रन्याधिक्यश्रुतेरप्यतिवहननयात् कारणं प्रापकं स्यात् ।
प्राप्यं त्वन्यद्भवेदित्यसदनवधिके कारणे प्राप्यतोक्ते-
स्सेतुत्वाद्युक्तिरस्मिन् बहुभिरविहतां वृत्तिमङ्गीकरोतु ॥ २४
सेतुत्वं सेतुतुल्याद्विधरणनियमाद्बन्धनाद्वात्र युक्तं
व्याप्तेऽप्यस्मिन्नुपाधेः परिमितिवचनं सार्थकं सूत्रितं प्राक् ।
चातुष्पद्यं च तत्तच्छ्रुतिभिरनुगुणं कल्प्यतेऽनन्तभूम्न-
स्स्वस्येत्येवामृतस्येत्यभिहितमथवा मुक्तिरेवामृतं स्यात् ॥ २५
अन्यस्याधिक्यवादे परमवधितया कारणं यत्र दृष्टं
तत्र ह्यव्याकृतादिस्तदवधिरितरापेक्षयाऽसौ परश्च ।
यस्मादन्यत्परं नेत्यभिहितविषये तत्परोक्तेरयुक्ते-
रेवंत्वादित्यनूक्तिस्तत इति यदि वा व्याप्यमुक्तं तदस्तु ॥ २६

(अथ फलाधिकरणम् ॥ ८ ॥)

आराद्ध्यः कर्मकाण्डस्थितनयनिवहस्थापितानां क्रियाणा-
मध्यक्षो देवतानामनुपधिमहिमा मध्यकाण्डोदितानाम् ।
अत्राप्येतावतोक्तो भवभयचकितप्राप्त्युपास्त्येकलक्ष्य-
स्तत्तच्छास्त्रार्थयोग्यं दिशति फलमिति स्थाप्यतेऽथात्युदारः ॥
कृष्यादेर्मर्दनादेरपि भवति फलं द्वारतो वाऽन्यथावा
धर्माणां साधनत्वं श्रुतिभिरवगतं दोषबाधोज्झितताभिः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तस्मादीशप्रसादात् फलमिति तु वचस्तत्प्रशंसेति चेन्न
श्रौताराध्यप्रसादत्यजनकदनतोऽपूर्वकृत्प्रेरयोगात् ॥ २८

यद्यप्याराध्यमूलं फलमिति फलितं देवताधिक्रियायां
कर्मापेक्षा तथोक्ता फलजननपरप्रेरणादौ तथापि ।
साक्षित्वानादरत्वप्रभृतिपरगुणं प्रेक्ष्य तत्प्रीणनादौ
शङ्कातङ्कैर्निरुद्धांस्त्वरयितुमधुना तादृशोदारतोक्तिः ॥ २९

सम्राजस्सानुकम्पात् पितुरुचितविदस्साम्यभाजो वदान्यात्
स्थाने विन्दन्ति पुत्रा नियतरुचिभिदायन्त्रितास्तन्तमर्थम् ।
तत्र प्राप्यं स्वतो यद्विहतिरिह यतस्तत्प्रशान्तिश्च यस्मा-
देयं यद्वा विशेषादमनमपि यथालोकमत्रापि तत् स्यात् ॥ ३०

शुद्धानन्दे तदित्थं शुभगुणजलधौ सत्यनित्यस्वदेहे
देवीभूषायुधाद्यैरतिशयिनि कनद्भोगलीलाविभूतौ ।
शेषित्वाधारभावप्रभृतिबहुविधस्थास्नुसंबन्धदीप्ते
दृष्टिस्स्वर्गापवर्गप्रसवितरि हरौ निर्निमेषा श्रुतिर्नः ॥ ३१

पादे स्वप्नार्थहेतुस्तदयमिह सुषुप्त्याधृतिस्सुप्तगोप्ता
मुग्धोद्बोधादिकर्ता त्वनघशुभगुणोऽचिद्विरंशी स्वदेहैः ।
पारम्यस्यैकसीमा सकलफलद इत्युच्यते भक्तिभूम्ने
सत्ये त्वेवं गुणादावथ परभजने रूपभेदादि चिन्त्यम् ॥ ३२

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य
वेदान्ताचार्यस्य कृतिषु अधिकरणसारावल्यां
तृतीयस्याध्यायस्य द्वितीयः पादः ॥ २ ॥

(अथ तृतीयस्याध्यायस्य तृतीयः पादः॥)

उपोद्घातः ॥

तत्त्वज्ञानानुविद्धं हिततममनघं मोक्ष्यमाणस्य वक्तुं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तत्त्वे निर्णीय तर्कज्वरजनितमहासन्निपातप्रलापान् ।
निष्पन्ने तत्त्वबोधे न किमपि विदुषा साध्यमित्युद्गृणद्भ्यो
यावज्जीवानुवर्त्यं मुररिपुभजनं मुक्तिलाभाय वक्ति ॥ १

भीमाभ्यो यातनाभ्यः पितृपथगमनावर्तनादेश्च बिभ्य-
त्तृष्णां कृष्णामृताब्धौ परिणयति परां यावता तावदुक्तम् ।
इत्थं लब्धाधिकारः परमधिकुरुते साधने यत्र साङ्गे
पादद्वन्द्वे परस्मिंस्तदिह बहुभिदाबर्बरं निर्ब्रवीति ॥ २

एकस्मिन्नेव पादे निपुणनयकृता न द्वयोस्तर्कणं स्यात्
भेदाभेदश्च नैको विषय इह भवेदन्यहानप्रसङ्गात् ।
तस्मादस्मिन्प्रकीर्णा नयवितितिरिति प्रेक्षितग्रन्थचोद्ये
वेद्यावच्छिन्नविद्यानियमकृदयमित्यैदमर्थ्यं समर्थ्यम् ॥ ३

आख्यावन्तं गुणानां निजगदुरुपसंहारतः पादमेतं
विद्यैक्यार्थे तदस्मिन्नपवदनतया भेदचिन्ता प्रसक्ता ।
इत्थं शुश्रूषुशङ्कामिह शिथिलयितुं भाषितं भाष्यकारैः-
स्तद्भेदाभेदमीमांसनमिति विषयस्तत्र चोक्तोऽनुवृत्तः ॥ ४

निस्सीमानन्दनाडिन्धमनिरुपधिकानन्तसंपद्गुणौघे
विद्याभेदैर्विभज्य प्रणिधिरिह यदि प्राप्तिरप्यंशतस्स्यात् ।
मैवं तैरेव धर्मैस्तदितरसहितैः पूर्णकामस्य पूर्णं
प्राप्यं ब्रह्मैव नान्यत् किमपि फलमतस्तत्क्रतुन्यायसिद्धिः ॥ ५

सर्ववेदान्तप्रत्ययाधिकरणम् ॥ १ ॥

भेदश्शब्दान्तराद्यैर्विधिषु नियमितः कर्मकाण्डे द्वितीये
संयोगाद्यैक्यतोऽन्यस्समुदयनियतात् सैव विद्यासु नीतिः ।
आदौ तेनैव शाखान्तरनयमुदितं चोदनादेरभेदा-
च्छ्रुत्यैवाक्षिप्य भूयः प्रतिसमधिगतं भेदकान्यार्थतोक्त्या ॥ ६

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शाखासु प्रक्रियान्या श्रवणमपि पुनर्दृष्टमत्राविशेषं
विद्याभेदस्ततस्स्यादिति न तदुभयं युक्तमध्येतृभेदात् ।
तेषामेवेति वाक्यात् क्वचिदुपजनिता भेदशङ्का त्वयुक्ता
स्वाध्याये ब्रह्मविद्यापदमिह हि भवेत्तद्व्रतेनान्वयोक्तेः ॥ ७

रूपैक्यादैक्यसिद्धौ किमितरदुपसंहार्यमन्यो गुणश्चे-
द्भेदो न स्याद्विकल्प्यं तदिह किमफला तेन चिन्तेति चेन्न ।
वेद्याकारैक्यमैक्यं दिशति तदधिकं किंचिदाकृष्यतेऽङ्गं
कर्मण्यप्येवमेव श्रुपहृतिविषयो भेदकांशातिरिक्तः ॥ ८

(अन्यथात्वाधिकरणम् ॥ २ ॥)

प्राग्वच्छाखाविभेदेऽप्युपशमितभिदा तादृगुद्गीथविद्या
स्यादेका चोदनाद्यैस्तदसदुभयथा रूपभेदोपलब्धेः ।
गाता गेयं च गेये सकलमसकलं चेति वैषम्यसिद्धौ
शेषाभेदोऽप्यभेदं न गमयति भिदा त्वेकभेदेऽपि सिद्धयेत् ॥ ९

छन्दोगोद्गीथशब्दस्तदवयवपरः प्रक्रमादिप्रसिद्धेः
कृत्स्नोद्गीथाभिधायी प्रकरणनियमाभावतो वाजिनां स्यात् ।
उद्गीथोक्तिश्च नैषामुपचरणवती गातरि प्रक्रमस्था
तत्कर्त्रा साधनीये द्विषदुपशमने तत्फलत्वोक्त्यबाधात् ॥ १०

यद्यप्यब्रह्मविद्या परपरिभवनाद्यैहिकार्थप्रयुक्ता
न ग्राह्या मोक्षशास्त्रे तदपि समतया तत्परीक्षेति केचित् ।
काम्या विद्याप्यनिष्टव्यपनयनमुखैर्ब्रह्मविद्योपयुक्तै-
स्तत्तत्साद्ध्यप्रभेदैर्भवति समुचितालोचनेत्याहुरन्ये ॥ ११

अज्ञातब्रह्मतत्त्वः कथमिव विमृशेत् कुत्रचिद्ब्रह्मदृष्टिं
तस्मात्तत्तादृशीनां समुचितमगतेरत्र मीमांसनं स्यात् ।
आदद्युः कर्मणां च स्वफलवितरणे वीर्यवत्त्वातिरेकं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ब्रह्मध्यानार्थकर्मातिशयजननतः प्रस्तुतापेक्षितं तत् ॥ १२

(अथ सर्वाभेदाधिकरणम् ॥ ३ ॥)

ज्यैष्ठ्यश्रैष्ठ्यादिसाम्ये क्वचन समधिकं भाति वासिष्ठ्यपूर्वे
तेनेत्थं रूपभेदाद्बहुनिगमगता भिद्यतां प्राणविद्या ।
मैवं वागादितत्तद्गुणपरवशतावर्णनस्याविशेषा-
द्वागाद्यैस्स्वस्वधर्मोपचरणमकृतं तावता स्यान्न भेदः ॥ १३

(अथानन्दाद्यधिकरणम् ॥ ४ ॥)

नानाशब्दादिभेदादिति खलु भिदुरां वक्ष्यति ब्रह्मविद्यां
रूपं विद्यान्तरस्य प्रकरणपठितान्नान्यदन्यत्र योज्यम् ।
तस्मात् सत्यत्वपूर्वास्तदितरगुणवत् स्युर्व्यवस्थापनीया
मैवं ब्रह्मस्वरूपावगतिरिह यतस्तद्धि सर्वास्वपेक्ष्यम् ॥ १४

सत्यत्वं विश्वहेतौ बहुविधचिदचिद्विक्रियाजालहानेः
ज्ञानत्वं ज्ञातृभावात् स्वरबहुलतया स्वप्रकाशत्वतश्च ।
विद्वद्येकाभिरुक्तं सकलमिह परिच्छित्तिभिर्ब्रह्मणोऽन्य-
त्तस्यानन्त्यं वियोगात्तिसृभिरपि सदा निर्मलानन्दधाम्नः ॥ १५

उक्तं जन्मादिसूत्रे ननु निखिलजगद्धेतुता ब्रह्मलक्ष्म
स्यात्तेनैव स्वरूपावगतिरिह मुधा सत्यतादीति चेन्न ।
हेतोरीशस्य हेत्वन्तरगतविविधावद्यवर्गप्रसङ्गे
शङ्कारूढे क्रमेणेतरविभजनतस्तस्य साफल्यसिद्धेः ॥ १६

नन्वाख्यानं प्रियाद्यैरपि भवति शिरःपक्षपुच्छादिरूपै-
र्बाढं तत्र प्रियाद्यैस्तदवगतिरतस्ते तु सर्वानुवृत्ताः ।
पुच्छाद्यंशो निरंशे न भवति न च तद्दृष्टिरुत्कृष्टतत्त्वे
तस्माच्चित्याग्निरूपक्रमवदिह कृतं रूपणं ब्रह्मणि स्यात् ॥ १७

आनन्दत्वप्रधानं कतिचिदिह विदुस्सौत्रमानन्दशब्दं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

धर्मानन्दाभिधानं तदुभयवचनं वेति पश्यन्ति केचित् ।
ज्ञानोक्तौ चैवमेतत्तदितरसमता यावतास्यान्न शङ्क्या
तावद्धर्मानुवृत्तिर्बहुभजनपदे ब्रह्मणि स्थाप्यतेऽत्र ॥ १८

(अथ कार्याख्यानाधिकरणम् ॥ ५ ॥)

आचामेदित्यपूर्वाचमनमिह विधेः प्राणविद्यावतस्या-
न्नैवं स्मृत्यादिसिद्धे परमनुविहिता प्राणवासस्त्वदृष्टिः ।
भुञ्जीतेत्यादिनीत्या विधिरपि घटते प्राप्तधात्वर्थनिष्ठः
प्रागुक्ता प्राणविद्या तदिदमवसरे चिन्तितं त्वङ्गमस्याः ॥ १९
आदावन्ते च वासः परिधिरभिहितो मन्यतिश्चात्र दृष्ट्यै
सा चाराध्यप्रियार्था स्तुतिरिह न भवेद्गत्यभावाभिनन्द्या ।
युक्तश्चापूर्वभावात् परिदधतिगिरा तद्विधानाभिसन्धिः
प्राणश्चाराधनीयः परिहितवसनो युज्यते सद्भिरद्धिः ॥ २०

(अथ समानाधिकरणम् ॥ ६ ॥)

शाखैक्येऽध्येतृभेदो न भवति न गुणः कश्चिदन्यो विधेय-
स्तस्मादुक्ताविशेषश्रवणमिह पुनः किं न विद्यां विभिन्द्यात् ।
नैवं यद्यप्यनूक्तिर्नतु गुणविधये कल्पते स्यात्तथापि
व्यक्त्यै सौकर्यतश्च व्यसनसमसनन्यायतस्त्वैक्यसिद्धेः ॥ २१
छन्दोगैर्वाजिभिश्च स्फुटमनुपठिता भाति शाण्डिल्यविद्या
भेदाभेदावमर्शस्त्विह किमिति न सन्दर्शितो भाष्यकारैः ।
तद्मो यत्रयत्राधिकपरिपठनं तत्रतत्राधिकाना-
मन्तर्भावादियुक्तावनधिकमधिकं वेति साधारणोक्तेः ॥ २२
स्थानद्वन्द्वे वशित्वप्रभृतिविरहितावाजिभिस्तद्युताचा-
धीता शाण्डिल्यविद्या तदिह भिदुरता कल्पनीयेति चेन्न ।
आरण्योक्तं वशित्वाद्यपि खलु वितथिस्सत्यसङ्कल्पतायाः
साधीताग्नेरहस्येऽप्यधिकविरहतो नात्र विद्यैक्यबाधः ॥ २३

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

(अथ सम्बन्धाधिकरणम् ॥ ७ ॥)

अक्ष्यादित्योपलक्ष्ये भगवति भजनं चोदनादेरभेदा-
देकं स्यात्तेन नान्नोरनियतिरिति न स्थानतो रूपभेदात् ।
स्थानं तत्स्थत्वबुद्ध्यै ह्युपदिशति न चेत् स्यान्नरूपातिदेश-
स्तस्मादर्काक्षियोगादहरहमिति तन्नामनी स्थापनीये ॥ २४

(अथ सम्भृत्यधिकरणम् ॥ ८ ॥)

सम्भृत्यादिर्गुणौघः प्रकरणपठनाभावतस्सर्वविद्या-
स्वन्वीयेतेति चेन्न क्वचिदगतिकतो लिङ्गतस्स्थापितत्वात् ।
अल्पस्थानासु विद्यास्वघटितवपुषस्स्वोचितस्थानवृत्ते-
र्ध्रुव्याप्तेरेकमन्त्रे सहपठनवशात् तत्समस्थानिनोऽन्ये । २५

(अथ पुरुषविद्याधिकरणम् ॥ ९ ॥)

आख्याद्यैक्यादभेदः पुरुषविषययोर्विद्ययोरित्ययुक्तं
यज्ञाद्याकारकृप्तेरिह विषमतया रूपभेदप्रसिद्धेः ।
तादर्थ्यात्तैत्तिरीये परभजनफलम्मुक्तिरत्राप्यनुक्ता
छान्दोग्ये पूर्णमायुः फलमिति तु तयोर्भाति संयोगभेदः ॥ २६
स्पष्टे रूपादिभेदे हठसमुपनतो नामसाम्यादिमात्रात्
पुंविद्यापूर्वपक्षो मृदुरिति विफलाऽधिक्रियैषेति चेन्न ।
अन्यैव न्यासविद्या प्रकरणपठिता तद्विधानप्रधाने-
त्यस्यातन्त्र्यादिसिद्ध्यै विभजनमनयोरित्यतीवार्थवत्त्वात् ॥ २७
यद्येवं यज्ञदृष्टिः परविदि पुरुषे चोद्यते सानुबन्धे
यज्ञस्यानङ्गभूतं कथमिह विविधं कल्प्यते तत्तत्र ।
तस्मात् प्रक्रान्तविद्यास्तुतिरियमुचितेत्याहुरेकेऽन्यथाऽन्ये
तिष्ठत्वेतद्विधापि प्रकृतमुघटिता सम्प्रदायस्तु चिन्त्यः ॥ २८

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

(अथ वेधाद्यधिकरणम् ॥ १० ॥)

युज्येरन् ब्रह्मविद्यापरिसरपठिताश्शं न इत्यादिमन्त्राः
तादर्थ्यात् सर्वविद्यास्विति न तदुदिताधीतिशेषत्वलिङ्गात् ।
नो चेदन्येऽपि तद्वत् सविधपठनतस्सन्तु शुक्रं प्रविध्ये-
त्येवंप्रायास्तदर्था न च घटत इदं लिङ्गतो दुर्बलत्वात् ॥ २९

(अथ हान्यधिकरणम् ॥ ११ ॥)

शाखे द्वे मुक्तिभाजः क्वचन कथयतः पुण्यपापप्रहाणं
ब्रूतेऽन्या तत्प्रवेशं प्रियतदितरयोर्दायसंक्रान्तिकाले ।
हानं चोपायनं च क्वचिदिति पृथगाम्नातसंपर्कसिद्धि-
र्वाक्यं शाखान्तरस्थम्भवति हि विविधाकाङ्क्षया वाक्यशेषः॥ ३०
इत्थं ब्रह्मज्ञकर्मत्यजनमितरसङ्क्रान्तिसम्पृक्तमस्तु
स्याच्चिन्तायां व्यवस्था पृथगनुपठनादित्यसत् कृत्स्नदौस्थ्यात् ।
सर्वेषाम्मुक्तिभाजां द्वितयमपि यथोपास्ति साङ्ग्यं समानं
तच्चिन्तासौ तथा तन्महिमिवद इति स्थापनीयोभयत्र ॥ ३१
कर्त्रा तेनैव भोग्यं शुभमितरदिति स्थापितं कर्मकाण्डे
तस्माद्ब्रह्मज्ञकर्म द्विषति सुहृदि वा नापतेदित्ययुक्तम् ।
विद्यामाहात्म्यतो यद्विगलति विदुषः कर्म तत्साङ्ग्यतुल्यं
विद्वत्प्रद्वेषभक्त्योः फलमिति कथने वाक्यतात्पर्यसिद्धेः ॥ ३२

(अथ साम्परायाधिकरणम् ॥१२॥)

कर्मोद्भूतिर्मुमुक्षोः क्वचिदुपनिषदि श्रूयते साम्पराये
मार्गेऽन्यस्यां द्विधैवं शकलश इह तच्चिन्तनं चास्तु मा भूत् ।
नश्युक्तं कर्मसाङ्ग्यं पथि फलमथ गत्यर्थदेहानुवृत्तिं
मुक्त्यै विद्येव कुर्यादघहतिवचने पाठतोऽर्थो बली च ॥ ३३
निश्शेषं कर्म नश्येदिह यदि विदुषस्स्थूलदेहान्तमात्रे
विश्राम्येत्तस्य तावच्चिरमिति हि वचो नार्थवत्त्वं गतेस्स्यात् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गत्वा सम्पद्य चाविर्भवनमिति न सम्बोभवीतीत्ययुक्तं
स्याद्धीसङ्कोचमात्रस्थितिकृदनुगतस्सूक्ष्मसंस्कारयोगः ॥ ३४

(अथानियमाधिकरणम् ॥ १३ ॥)

पन्थास्स्यादर्चिरादिः फलमिह निखिलब्रह्मविद्यासु मा वा
प्रारभ्याधीतियोगात् प्रकरणनियता तस्य चिन्तेति चेन्न ।
सर्वासां तद्य इत्थं विदुरिति वचसाऽथात्र येचेति चोक्त्या
मार्गे साधारणेऽस्मिंस्तदनुसरणतस्तद्वदेवास्य चिन्ता ॥ ३५
हेयोपादेयमार्गद्वितयमुपदिशन्मुक्तिदाता मुमुक्षो-
र्योगी यःकश्चनैतत्सरणियुगलविन्मुह्यते नेत्यगायत् ।
तस्मादस्मादृशाधीत्यविशदविशदीकर्तृवाक्यावमर्शात्
ब्रह्मप्राप्त्यर्हकृत्स्नप्रणिहितघटितं मार्गचिन्ताविधानम् ॥ ३६
हानादेरर्चिरादेरपि किमभिहितं चिन्तनं सूत्रकारै-
र्विद्याङ्गत्वादिसिद्ध्यै यदि भवतु तदाऽनन्तरे पाद एतत् ।
मैवं विद्याङ्गतायामपि भजनमिवेदं च धीत्वाविशेषात्
कर्मादिभ्यो विभक्तं कथयितुमिह तत्सूत्रणं स्थानपाति ॥ ३७

(अथाक्षरध्यधिकरणम् ॥ १४ ॥)

यस्यामस्थूलतादिः प्रपठित उचितं चिन्तनं तस्य तस्यां
नान्यस्याम्मानहानेर्न यदि नियमनं कस्य कुत्रेतिचेन्न ।
हेतुत्वोन्नेयदोषव्यपनयनमिह ब्रह्मविद्यासु सर्वा-
स्वानन्दाधिक्रियोक्तक्रमनियमितमित्यस्य सार्वत्रिकत्वात् ॥ ३८
सत्यत्वाद्यैस्स्वरूपावगतिरभिहिता सर्वविद्यानुवृत्त्या
भूयस्तत्तुल्यधर्मेष्वधिकरणमिदं स्याद्वृथैवेति चेन्न ।
कैश्चिज्ज्ञातस्वरूपे क्वचिदितरगतं किंचिदन्यन्निषेध्यं
व्यावृत्त्या न स्वरूपावगतिरत इति प्रेक्षणस्यात्र रोधात् ॥ ३९

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

व्यावर्त्यानन्त्यतस्तद्व्युदसनमपि हि स्यादनन्तन्ततस्त-
च्चिन्ता किंचिज्ज्ञसाद्ध्या जलधितरणवन्नोपदिश्येत मैवम् ।
तत्तत्सामान्यधर्मानुगमकबलिताशेषभेदोपदेशे
तादृक्चिन्तोपपत्तेरनवमिमिति वा गृह्यतां संगृहीतिः ॥ ४०

(अथान्तरत्वाधिकरणम् ॥ १५ ॥)

सूत्रस्वारस्यलाभात् प्रथममसुभृतः पूर्वपक्षे निवेशः
सिद्धान्ते ब्रह्मणश्चेत्यधिकरणगतिस्तोकशङ्कापनुत्त्यै ।
साक्षाद्ब्रह्मेति वाक्यद्वयमवमृशतामन्यशङ्कैव न स्या-
दित्यालोच्याथ भाष्ये परविषयतया पूर्वपक्षोऽप्युपात्तः ॥ ४१
यत् साक्षादित्यमुष्मिन्न श्रुतिशिरसि परं ब्रह्म वेद्यं यदेवे-
त्येतस्मिंश्चास्त्वथापि प्रतिवचनभिदा तत्र रूपं भिनत्ति ।
विद्याभित्यष्टभेदोऽप्ययमिति यदि नानूद्य भूयोऽनुयोगात्
पश्चादुक्तश्च दोषात्यय इह न भिदां सौति साधारणत्वात् ॥ ४२
सद्विद्यायां यथा हि प्रतिवचनभिदा प्रश्नभेदानुसारा-
द्विद्यैकत्वे विशेष्यं प्रकटयति परान्देवतामेव तत्र ।
तेनोषस्त्यः कहोलश्रुतमपि स च तत्संश्रुतं संकलय्य
ध्यायेतां ब्रह्म सर्वान्तरमिति फलवत्तत्र सब्रह्मचर्यम् ॥ ४३

(अथ कामाद्यधिकरणम् ॥ १६ ॥)

आकाशं ताण्डिनस्तच्छयितमधिजगुर्वाजिनस्तेन विद्या
भिद्येतात्रेति चेन्न द्विविध इह यतो ब्रह्मनिर्देश एषः ।
सर्वाधारत्वपूर्वैः परतरविषयस्सामगाकाशशब्दो
विश्वेशाधारतोक्त्या सुषिरविषयताऽन्यत्र रूपन्तु नान्यत् ॥ ४४
छन्दोगानामुपास्यं प्रथितमिह गुणैरष्टभिर्ब्रह्म जुष्टं
तच्चान्येषां वशित्वप्रभृतिघटितमित्यस्तु रूपस्य भेदः ।
मैवं यत्तद्वशित्वाद्यपि तदिह भिदा सत्यसङ्कल्पतायाः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इत्यैकार्थ्यं निरूढं परमपि दहरोपासनन्तद्वदूह्यम् ॥ ४५
नन्वाकाशो गुणाद्यैः परइतिदहराधिक्रियायां पुरोक्तं
तस्मान्मान्यार्थशङ्केत्यधिकरणमिदं नोज्झितीतेति चेन्न ।
व्योमातीतं निमित्तं दहरमिदमुपादानमित्युद्गृणन्तः
पूर्वं क्षिप्ताः प्रसङ्गात् पुनरपि गमिताश्छिन्नमूलत्वमत्र ॥ ४६

(अथ तन्निर्धारणानियमाधिकरणम् ॥ १७ ॥)

उद्गीथादौ क्रियाङ्गे भजनमपि भवेत् पर्णताद्युक्तनीत्या
कर्माङ्गत्वात्फलोक्तिस्त्विह नुतिरिति गोदोहनन्यायभङ्गम् ।
स्वर्गादीनां फलत्वं क्रतुषु तदधिको ह्यत्र वीर्यातिरेकः
पर्णत्वादौ न वाक्यं वदति करणतां कर्म चाहानुपास्तौ ॥ ४७
उद्गीथे प्राणदृष्टौ क्रतुघटितफलादन्यदुक्तं फलन्तत्
स्वीकृत्य प्राग्विचारः स्थित इति विहतः पूर्वपक्षोऽत्र मैवम् ।
अत्रत्येऽनङ्गभावे स्थिरनिहितधियस्तत्र विद्यैक्यशङ्का
त्यक्त्वाङ्गानङ्गभावौ पृथगपृथगिति स्याच्च पूर्वत्र चिन्ता ॥ ४८

(अथ प्रदानाधिकरणम् ॥ १८ ॥)

कामानेतांश्च सत्यानिति वचनबलाद्धर्म्युपास्तेर्विभक्ता
धर्मोपास्तिस्तदर्थं गुणिपरिगणनं तन्नतोऽस्त्वित्ययुक्तम् ।
तत्तद्वैशिष्ट्यभेदात् प्रतिविधिगुणिनश्चिन्तनाद्वृत्तिरर्थ्या
राजत्वाद्यैः पृथक्त्वाद्भवति हि हविषो दानमाद्वृत्तमिन्द्रे ॥ ४९
तत्तद्भोगप्रतीतेर्गुणघटितपरोपासना भोगहेतु-
र्मुक्तिश्च स्यात् क्रमादित्यसदगुणवचस्यान्यपर्याभिधानात् ।
शास्त्रेऽस्मिन्नासमाप्तेः क फलमभिहितं निर्गुणोपास्तिसाध्यं
नोच्छास्त्रं च प्रकल्प्यं गुणनियमनतः ख्यातिमांश्चैष पादः ॥ ५०
प्रत्येकम्मेलनाद्वा दहरगुणगणेऽप्यत्र संचिन्त्यमाने
गुण्याद्वृत्त्यर्थलब्धेः कथमिह तदनाद्वृत्तिशङ्केति चेन्न ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

बुद्ध्यारोहे गुणानां यदवधि गुणिनो रूपमर्थ्यं ततोऽन्यत्
विद्यैकान्तन्तदाद्यन्युघटिततदाद्यत्तिचिन्ताप्रवृत्तेः ॥ ५१

(अथ लिङ्गभूयस्त्वाधिकरणम् ॥ १९ ॥)

प्रक्रान्ता दहविद्या प्रकटमुपरि च ज्ञायते तैत्तिरीये
तस्मादूर्ध्वानुवाकः प्रकृतविषयनिर्द्धारणार्थोऽस्तु मैवम् ।
तत्तद्विद्योदितैस्तैः परमिह पुरुषं प्रत्यभिज्ञाप्यशब्दै-
स्तस्मिन्नारायणत्वं वददधिकबलं प्रक्रियातो हि वाक्यम् ॥ ५२
वाक्यैस्सर्वार्थतायां दहरभजनमप्यत्र भागीति सार्थ-
स्तल्लिङ्गोपेतभागो न च बहुभिरलं योद्धुमेकं कृतार्थम् ।
नैकस्यास्योपकुर्यात् प्रकरणमलसं किंच सर्वोपजीव्ये
तत्त्वे तात्पर्यमत्र स्फुटमिति वितथा तत्परित्यागकृप्तिः ॥ ५३
आत्मैक्यं देवतैक्यं त्रिकसमधिकता तुल्यतैक्यं त्रयाणा-
मन्यत्रैश्वर्यमित्याद्यनिपुणफणितीराद्रियन्ते न सन्तः ।
त्रय्यन्तैरेककण्ठैस्तदनुगुणमनुव्यासमुख्योक्तिभिश्च
श्रीमान्नारायणो नः पतिरखिलतनुर्मुक्तिदो मुक्तभोग्यः ॥ ५४

(अथ पूर्वविकल्पाधिकरणम् ॥ २० ॥)

अङ्गं पूर्वप्रसक्तेष्टकचितसमुपस्थापितस्य क्रतोस्स्यात्
बुद्ध्यात्माऽग्निर्मनश्चित्प्रभृतिरपि यथा मानसं द्वादशाहे ।
तत्कार्यस्यातिदेशादिति न सदुदितो ह्यत्र विद्यात्मकोऽङ्गी
श्रुत्याद्यैरेव तस्मिन्नुपकृतिसमताबोधनार्थोऽतिदेशः ॥ ५५
कल्प्या ह्यत्र क्रियात्मा क्रतुरपि तदपि प्रागुपात्ताङ्गशक्त्या
वाक्यस्थैश्चानुबन्धैरिह समुपनतो भाति विद्यामयस्तु ।
दूरस्थाकृष्टियोगात् स्ववचनपठिताकृष्टियोगो [1]बलीया-

१. लघीयान् . पा ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नप्राप्तेऽर्थे विधित्वं ह्यनुवदनसमेऽप्याश्रितं तद्वदत्र ॥ ५६

(अथ शरीरेभावाधिकरणम् ॥ २१ ॥)

तत्कालाकारिणस्स्यादहमिति भजने कञ्चुकस्यात्मनोधी-
रासक्तेर्मामुपास्स्वेत्युदितवदिति चेन्नान्यथा संनिकर्षात् ।
शुद्धो ह्यात्माऽत्र साध्यः फलमतिरविनाभाविनी बोद्धृकृत्ये
बुद्ध्यासन्नेऽन्तरङ्गे सति विधिनियता तत्कृतुन्यायसिद्धिः ॥ ५७
कर्तुर्भोक्तृत्वमात्रं गणयितुमुचितं दृष्टभोगार्थयत्ने
स्वर्गाद्यर्थेऽन्यदेहानुगतिरपि परं स्वाधिकारानुविद्धा ।
मुक्त्यर्थे प्राप्त्यवस्थाप्रणिधिकथनतस्तत्कृतुन्यायवाचा
चिन्त्यस्य प्राप्यतार्थो गमित इति कुतोऽतिप्रसङ्गादिशङ्का ॥ ५८
विद्याभेदेषु वेद्याकृतिविषमतया यावदुक्ते विचिन्त्ये
प्राप्यं सर्वोपपन्नं तत इह कथमप्राप्यचिन्तानिषेधः ।
तस्माद्धद्धस्य चिन्तास्त्विति न कलुषितो नह्यहंशब्दमुख्यः
प्राजापत्यात्तु वाक्यादकलुषदशया भावनीयत्वसिद्धिः ॥ ५९

(अथाङ्गावबद्धाधिकरणम् ॥ २२ ॥)

उद्गीथादेर्विशेषे भजनविधिरसौ स्यात् स्वसांनिध्यगीते-
र्मैवं सर्वाङ्गिभूतक्रतुमुखत इहाशेषसांनिध्यसिद्धेः ।
सामान्यं व्यक्त्यपेक्षक्रियमपि नियमादर्शने व्रीहितावच्-
छब्दश्चोद्गीथमात्रं वदति न तु भिदां छागनीतिस्तु नात्र ॥ ६०

(अथ भूमज्यायस्त्वाधिकरणम् ॥ २३ ॥)

व्यस्तो वैश्वानरात्मा प्रतिनियतफलोदाहृतेश्चिन्तनीयः
कृत्स्नोपास्तौ फलोक्तिस्स्तुतिरिह यदि वा कृत्स्नरूपोऽप्युपास्यः ।
मैवं व्यस्तेषु दोषः पृथगनुकथितस्तत्फलोक्तिस्स्तुतिस्स्या-
दृष्टं ह्यष्टाकपालप्रभृतिषु च तथा तेन चिन्त्यस्समस्तः ॥ ६१
सामस्त्यस्यैव योगे द्रढिमवति महावाक्यतात्पर्यवृत्त्या

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

व्यस्तेष्वंशननूद्य स्तुतिनियतनयादान्यपर्य फलोक्तेः ।
नामादीनामुपास्तौ फलमवधितयाऽपेक्षितं भूमवाक्ये
नाप्येवं प्रत्यवायश्रुत इति विषमोदाहृतिर्नार्थसिद्धयै ॥ ६२

(अथ शब्दादिभेदाधिकरणम् ॥ २४ ॥)

सर्वासु ब्रह्म वेद्यं फलमपि खलु तद्ब्रह्मविद्येति चारूया
ध्यानाद्युक्त्येकलक्ष्ये विधिरपि भजने सर्वविद्यैक्यमित्थम् ।
तन्नारूयारूपभेदात्तदुपहितविधौ तेन वैशिष्ट्यसिद्धे-
र्मिश्रम्मध्वादिविद्याफलमिह च पृथक्काम्यविद्यासु चैवम् ॥ ६३
नानाशब्दादिभेदादिति कथमवदत् सूत्रकृच्छब्दसाम्ये
नह्येते यागदानादय इव भिदुरा भक्तिविश्रान्तिसिद्धेः ।
सत्यं शब्दस्य भेदस्त्वयमुपचरितो रूपभेदद्रढिम्ना
ज्ञानं यच्चाविधेयं करणमिह जगुस्तन्निरासेऽभिसन्धिः ॥ ६४
यद्वा शब्दादिभेदादिति तु कथयता सूत्रकारेण सम्य-
न्यासोपासे विभक्ते यजनहवनच्छब्दभेदादभाक्तात् ।
आरूयारूपादिभेदश्रुत इतरसमः किञ्च भिन्नोऽधिकार-
श्शीघ्रप्राप्त्यादिभिस्स्यात् जगुरिति च मधूपासनादौ व्यवस्थाम्॥

(अथ विकल्पाधिकरणम् ॥ २५ ॥)

ज्योतिष्टोमाग्निहोत्रप्रभृतिवदधिकानन्दसिद्धयै समुच्चि-
त्यैतास्स्युर्ब्रह्मविद्या न च भजनविधिः कश्चिदेकं प्रति स्यात् ।
कर्तुन्ताः कालभेदे क्षममिति न मिथोवासनास्थैर्यबाधात्
सम्पूर्णब्रह्मलब्ध्यै पृथगिह च विधिः प्रायणान्ते समाधौ ॥ ६६
रूपादीनां विशेषैर्ननु परभजनन्नैकरूपं विभक्तं
सामग्रीभेदतस्तत्फलमपि विषमं सम्मतन्यायतस्स्यात् ।
न स्यात् सर्वासु विद्यास्वपि हि फलतया वक्ष्यते भोगसाम्यं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्राप्यैक्यं च प्रसिद्धं बहुसरणिजुषां लोकतो वेदतश्च ॥ ६७

(अथ यथाश्रयभावाधिकरणम् ॥ २६ ॥)

तत्तद्विद्यासु तादृक्फलतरतमतां वारयित्वा प्रसङ्गात्
प्रागुक्तोद्गीथविद्याफलमथ पुनराक्षिप्य गाढीकरोति ।
माभूदुक्तं स्ववाक्ये फलमिह तु न सा पर्णमय्यादिनीतिः
स्पष्टा खल्वत्र विद्याफलकरणतया वर्तमानोक्तितोऽपि ॥ ६८

तादर्थ्यं नात्र कर्मश्रुतिरवगमयेदाश्रयालम्बमात्रा-
द्विद्याहानौ च युक्तं प्रतिविधिवचनं तत्फलार्थप्रसङ्गे ।
तारे सोपासनेऽस्तु स्तवनमनुगमात्तावता सातु नाङ्गं
प्राग्वक्तव्यस्य हित्वा वच इदमुपरि स्थापनीयप्रसक्त्यै ॥ ६९

विद्यैक्योद्गीथविद्याद्वितयविभजनप्राणविद्यैकभावा-
स्सर्वास्वानन्दतादेर्गुणिवदनुगतिः प्राणवासस्त्वदृष्टिः ।
शाण्डिल्यैक्यं विभज्य स्थितिरहरहमोस्सम्भृतेस्स्थानसीमा
पुंविद्याया विभेदोऽध्ययननियतता शब्द इत्यादिकानाम् ॥ ७०

हानाद्यन्योन्ययोगस्तदुचितसमयो देवयानादिसाम्यं
सर्वत्रास्थूलतादिव्यतिहरणमथानेकशिष्यश्रुतानाम् ।
दहोपास्त्येकभावो गुणफलविधिरुद्गीथमाश्रित्य दृष्टौ
गुण्यावृत्तिर्गुणार्था निखिलपरतरोपास्तिवेद्यावसायः ॥ ७१

विद्यारूपा मनश्चित्प्रभृतय उचितज्ञानरूपक्रतुस्थाः
क्षेत्री शुद्धोऽनुचिन्त्यः क्रतुगुणसकलोद्गीथपूर्वेषु दृष्टिः ।
सामस्त्येनैव वैश्वानरभजनमथानेकविद्योपपत्ति-
र्मोक्षार्थानां विकल्पः पुनरनियतिरुद्गीथदृष्टेरिहोचे ॥ ७२

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य
वेदान्ताचार्यस्य कृतिषु अधिकरणसारावल्यां
तृतीयस्याध्यायस्य तृतीयः पादः ॥ ३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

(अथ तृतीयस्याध्यायस्य चतुर्थः पादः ॥)

उपोद्घातः ॥

कर्म प्राक्चिन्तयित्वा ननु परममथ ब्रह्म जिज्ञास्यमुक्तं
पादे विद्याङ्गतोक्तिः पुनरिह वितथाऽनेकधा त्याज्यतोक्तेः ।
मैवं कर्मैव तत्तद्गुणयुतविनियुक्तयन्यभावेन भिन्नं
विद्यानिष्पत्तिहेतुः किमपि च सुकृतं स्यान्निवृत्तैकसंज्ञम् ॥ १
त्यागः काम्यक्रियाणां क्वचन परविदः काप्यनर्हक्रियाणां
स्वैकाधीनत्वबुद्धेः क्वचिदनुपधिकस्वार्थबुद्धेश्च गीतः ।
अत्राहिंसादिकानामघविहतिकृतां सर्वसाधारणानां
व्रते वर्णाश्रमादिप्रतिनियतिमतामप्युपास्त्यङ्गभावम् ॥ २

(अथ पुरुषार्थाधिकरणम् ॥ १ ॥)

कर्तात्मा कर्मणां यस्तदधिकमिह न ब्रह्म तस्मान्मखादौ
तद्बुद्ध्यैवोपयुक्तास्युरुपनिषद इत्यर्थमीमांसकोक्तौ ।
जीवान्यब्रह्मचिन्तात्मकभजनविधौ कर्मणामङ्गभावं
प्राह क्षिप्तान्यलिङ्गः कलुषशमनतस्सत्त्वसंवर्द्धकानाम् ॥ ३
पादैरत्रैवमेकादशभिरपि परं ब्रह्म वेद्यं निरूढं
भूयः किं क्षुद्रलिङ्गैर्गगनलिपिनिभैः क्षोभ्यते ब्रह्मविद्या ।
सत्यं तत्तादृगल्पश्रुतमतिकलहत्रासितच्छात्रडिम्भ-
स्तोमक्षेमाय जैमिन्यहृदयकथितं पक्षमुत्क्षिप्य हन्ति ॥ ४
कुर्वन्नेवेति वाक्यं परविदि नियताचारतोक्तिस्सहत्वेऽ-
न्वारम्भो धीक्रियाभ्यामपि न नियमयेदङ्गतामङ्गितां वा ।
विद्यापूर्वं क्रियाणां करणमनुवदद्वाक्यमन्यार्थमुक्तं
नह्येतद्ब्रह्मविद्यामनुवदति नचोद्गीथविद्याक्रियाङ्गम् ॥ ५
स्वाध्यायप्राप्तये ह्यध्ययनमुदितमाधानवन्नोत्तराङ्गं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विद्याङ्गं चार्थबोधो भवतु यदधिका सा स्वरूपैः फलैश्च ।
नित्यात्मज्ञानमात्रं क्रतुषु नियमतोऽपेक्षितं नान्यविद्या
काम्यत्यागस्सविद्ये कथमिह भविता सापि यद्यङ्गमेषाम् ॥ ६
नाङ्गं विद्या मखादेर्नहि तदधिकृतेष्वेव तामामनाम-
स्यात्तत्तत्कर्मणां सेत्यपि न बहुविधाद्वैपरीत्योपदेशात् ।
जाबालैरूर्ध्वरेतोविधिरपि पठितोऽनूद्यतेऽन्यैश्च तस्मात्
प्राप्तिर्वाऽन्यथापि स्वयमिह तु विधिस्तन्निषेधस्सरागे ॥ ७

(अथ स्तुतिमात्राधिकरणम् ॥ २ ॥)

ह्रहादिस्तोत्रनीत्या भजतु रसतमाद्युक्तिरङ्गस्तुतित्वं
मैवं तत्तद्विधानप्रकरणरहितापूर्वनिर्देशयुक्तेः ।
तत्तद्दृष्टेर्विधानं विविधमिह समालक्षिचैतत्समीपे
तेनानन्यार्थशिष्टे फलवति च विधिर्युज्यते कल्प्यमानः ॥ ८
किञ्च प्राप्तेरभावान्न तदनुवदनं नाधिरोप्य स्तुतिर्वा
युक्ता विध्येकवाक्ये गतिरियमगतेस्सात्र नासक्तिहानेः ।
उत्कर्षः कल्प्यते चेदगतिकविषये तत् प्रसह्य प्रसह्य
मध्ये विद्याविधीनां वचनमिदमिति स्यात्तु विध्यर्थमेतत् ॥ ९
विध्यर्थत्वेऽपि युक्ता स्तुतिरियमसतः कीर्तनादित्ययुक्तं
दृष्टयुद्देशेऽतिचारादथ च विशयनं स्यादिति त्वर्भकोक्तिः ।
नित्येऽस्मिन्नप्रमाणं प्रसजति निगमो युक्तिवार्यत्वपक्षे
त्वित्थंभावे बुभुत्स्ये वच इह फलवद्दृष्टिविध्यर्थमेव ॥ १०

(अथ पारिप्लवाधिकरणम् ॥ ३ ॥)

विद्यास्वाख्यानभेदा विधिमहिमभृतास्सन्तु पारिप्लवार्था
न स्युर्विद्याविधानैः प्रकरणपठितैरेकवाक्यत्वदृष्टेः ।
मन्वाद्याख्यानमात्रं भवति च कथितं तत्र पारिप्लवार्थं
तेनाकाङ्क्षानिवृत्तौ न तदधिकपराख्यानतादर्थ्यकॢप्तिः । ११

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

(अथाग्नीन्धानाधिकरणम् ॥ ४॥)

यज्ञादेरङ्गभावान्न तदनधिकृतेष्वग्निनोऽधिक्रिया स्या-
द्विद्यैवंनोर्ध्वरेतस्स्विति न बहुविधस्त्राश्रमाङ्गार्हतोक्तेः ।
विद्यायोगश्चतुर्णां विधिरपि च समश्श्रूयते स्मर्यते च
प्रायेणौचित्यभूम्ना मुनिभिरभिहितं कापि मोक्षाश्रमत्वम् ॥ १२

(अथ सर्वापेक्षाधिकरणम् ॥ ५ ॥)

त्यक्ते यज्ञादिधर्मे परभजनविधेरूर्ध्वरेतस्सु दृष्टा
विद्या तेनानपेक्षा गृहवति च भवेदित्यनालोचितोक्तिः ।
यज्ञेनेत्यादिकाभिश्श्रुतिभिरवगता ह्यस्य सातत्यसाध्या
जिज्ञासार्थत्ववादो जिगमिषति पदेत्यादिनीत्या निवर्त्यः ॥ १३
नन्विच्छार्थत्वहानिर्जिगमिषति पदेत्यादिके गत्यभावा-
च्छ्रुत्युक्तेऽस्मिंस्तथा नेत्यसदिह च यतो गत्यभावस्समानः ।
इच्छा स्याद्धीविशेषात्तदनुपजनने कर्मभिस्सा न साद्ध्या
जिज्ञासां प्राप्तुमिच्छोर्न च न भवति तज्ज्ञानमिष्टं पुरैव ॥ १४
नन्वत्रेच्छानुवृत्तिं प्रति विहितमिदं कर्म योज्यं ततः किं
नेच्छार्थं धीविशेषप्रजननमुदितन्तावता वारितं स्यात् ।
ज्ञानार्थं कर्मविध्यन्तरमपि विविधं नापलापक्षमं ते
निद्ध्यानन्यायतोऽतस्त्वनुवदति विदेरिष्टतां सन्मयोगः ॥ १५

(अथ शमदमाद्यधिकरणम् ॥ ६ ॥)

यज्ञादिव्यापृतत्वादनिभृतकरणे सर्वकालं गृहस्थे
शान्त्यादीनामयोगात्तदितरनियतास्ते गुणा इत्ययुक्तम् ।
प्रव्रज्यादिस्थितानामपि तदुपधिकानेकधर्मप्रवृत्ते-
स्तत्सर्वं सह्यते चेत् सह तदपि फलाद्युज्झनं चात्र तुल्यम् ॥ १६
प्रज्ञातस्वापराधाः प्रभुमनुतपने लोकसिद्धैरुपायै-
रात्मार्हैरर्चयन्तः क्रमशमितरुषस्तस्य सेवां लभन्ते ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इत्थं नः शास्त्रसिद्धैरिदमनिदमिति स्वाधिकारे विभक्तै-
र्निष्पत्यूहः प्रसादो निरुपधिसुहृदः श्रीधरस्याधिगम्यः ॥ १७

(अथ सर्वान्नानुमत्यधिकरणम् ॥ ७)

आहारस्य व्यवस्था न भवति वचनात् प्राणविद्याधिकर्तुः
सामान्यस्थो निषेधो बलवति हि विधौ संकुचेदित्ययुक्तम् ।
अङ्गत्वेनाविधेस्स्यादनुमतिवचनं प्राणभङ्गप्रसङ्गे
पश्यैतत्प्राणनिष्ठादधिकमहिमनि ब्रह्मनिष्ठेऽप्युषस्तौ ॥ १८

(अथ विहितत्वाधिकरणम् ॥ ॥ ८)

यज्ञादेः कर्मणोहि श्रुतिभिरभिदधे ब्रह्मविद्याङ्गभाव-
स्तस्माद्ब्रह्मनिष्ठे तदननुसरणात् स्वैरितैवास्तु मैवम् ।
नित्यत्वस्यापि सिद्धेस्तदुचितविनियुक्त्यन्यभावानुसारा-
त्तन्त्रं काम्याग्निहोत्रादिवदिह परविन्नित्यवर्गेऽपि योज्यम् ॥ १९

(अथ विधुराधिकरणम् ॥ ९ ॥)

दारालाभे विरक्तेर्ग्रहिमनि च भवेदन्तरेणाश्रमान्य-
स्तस्मिन्निश्शेषधर्मत्यजि भवतु कथं ब्रह्मविद्येति चेन्न ।
सामान्यैर्वर्णधर्मैर्गुणनियतियुतैस्साहि तत्रापि साङ्गा
भीष्मादौ दृष्टमेतद्भवति तु वृषले गत्यभावादभावः ॥ २०

(अथ तद्भूताधिकरणम् ॥ १० ॥)

आरूढो नैष्ठिकादित्रयमथ पतितस्तत्परावर्तनाद्य-
स्तत्रापि ब्रह्मविद्या भवतु सहकृता [1]तत्तदर्हैस्स्वधर्मैः ।
मैवं यद्यप्यभीच्छन्त्युपपतनमिदं शोधनं चास्त्यनेकं
सर्वार्हं कीर्तनाद्यं तदपि तदुचितो नैष तादृङ्निषेधात् ॥ २१

प्रायश्चित्तं वदन्ति ह्युपपतनमहापातयोर्ब्रह्मयोगं
प्राप्ते पाते प्रमादाद्विदधति मुनयो योगिनां योगमेव ।

---

१. तद्दशार्हैं. चि. पा ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तस्मादारूढपातेऽप्यधिकृतिरिति नाचोदनीयं हि शास्त्रं
यावज्जीवन्तु तन्निष्कृतिरिति नियमस्सूत्रकाराद्यभीष्टः ॥ २२
यो बालं हन्ति यः स्त्रीं शरणमुपगतं यश्च यो वा कृतघ्नः
प्रायश्चित्तैर्विशुद्धानपि जगदुरिमान् साधुसंस्पृष्टचनर्हान् ।
स्मृत्याचारानुसारादिह च गतिरियं दर्शिता सूत्रकारैः
शास्त्रं नश्शासनीयं यदि भवति तदा संप्लुतो धर्मसेतुः ॥ २३
ब्रह्मांशत्वे समाने गुणविषमतया शुद्ध्यशुद्धिस्वभावै-
र्देहैर्योगादनुज्ञापरिहरणमपि प्रेक्षणस्पर्शनादेः ।
इत्येवं सूत्रितं प्राक् पुनरिह विविधालेपकक्षोभशान्त्यै
सम्यग्ज्ञातात्मनोऽपि स्वतनुसमुचिताचारतः प्रत्यबोधि ॥ २४

(अथ स्वाम्यधिकरणम् ॥ ११ ॥)

उद्गीथादावुपास्तिर्भवति हि फलिना यज्वनैवात्र शक्या
तस्मात्तत्कर्तृकासाविति यदि न परिक्रीतकर्माश्रयत्वात् ।
ऋत्विक्साद्ध्या यथान्ये गुणफलविधयोऽनूद्यते चैवमेषा
शक्यत्वं नाप्युपाधिर्विधिबलनियतेः स्वामिभृत्यक्रमोऽत्र ॥ २५

(अथ सहकार्यन्तरविध्यधिकरणम् ॥ १२ ॥)

मन्तव्यत्वे श्रुते सत्यथ मुनिरिति वागस्तु तस्यानुवादः
कश्चिन्नात्र दृष्टो विधिरिति न पुरा पण्डितत्वस्य लब्धेः ।
ऊहापोहार्हता हि श्रवणमननतोऽनन्तरं पण्डितत्वं
मौनख्यातिः प्रकृष्टे मनन इति विभौ धारणाद्यक्तिरेषा ॥ २६

(अथानविष्काराधिकरणम् ॥ १३ ॥)

शिष्टं बाल्येन तिष्ठासनमपि विदुषो बालकृत्यन्तदस्तु
प्राप्तुं बालस्य भावो न तु सुशक इति स्वैरितास्येति चेन्न ।
दुश्चारित्रादमुं नाविरत इति वचस्सन्निरुन्धे ह्यतोऽस्मि-
न्माहात्म्यं स्वंनिगूहेदिति मुनिविहिते बाल्यविध्याशयस्स्यात् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

(अथ पैहिकाधिष्ठिताधिकरणम् ॥ १४)

भोगार्थोपासनानां स्वजनकसुकृतैस्तत्क्षणादुद्भवस्स्यात्
स्वर्गादिस्तत्र देहे न घटत इह तु स्वान्तशुद्ध्योपपत्तिः ।
स्नानभायत्यनीतिस्तत इति न पुरा विघ्नसम्भावनोक्तेः
कारीर्यादौ तदर्हैस्सगुणविरचितेऽप्यस्ति विघ्नः कदाचित् ॥२८

(अथ मुक्तिफलाधिकरणम् ॥ १५ ॥)

अस्त्वन्यत्रान्तरायः प्रबलतममिदं सात्त्विकत्यागयुक्तं
कर्म प्रोक्तं निवृत्त्याह्वयमिति सपदि ब्रह्मविद्यां विदध्यात् ।
मैवं तस्माद्बलीयान्यदि भवति परब्रह्मभक्तापराध-
स्तच्छान्तौ तत्प्रसूतिस्स यदि न झटिति स्यात् परोपास्तिलाभः॥
विद्यार्थत्वं क्रियाणां व्यभिचरणवशान्नेति शङ्कापनुत्त्यै
प्रत्यूहानां च तूर्णं प्रशमनमुचितं सर्वदेति प्रसिद्ध्यै ।
निष्प्रत्यूहस्य सद्यः फलमिति च सतां तोषहेतोरमुष्मि-
न्पादान्ते न्यासिषातामनियमविषयौ शास्त्रकर्त्राधिकारौ ॥ ३०
प्रत्यूहस्य प्रसङ्गः क्षम इति परवित्कर्मणां तद्विधूत्यै
भोगार्थोपास्तिहेतुष्वयमनुकथितः किं मुधात्रेति चेन्न।
काम्ये निर्विघ्नबुद्ध्या पतति मतिरतस्तत्र वैराग्यभूम्ने
तत्प्रत्यूहप्रसक्तिर्भवति फलवती स्याच्च विद्यार्थकाम्यम् ॥ ३१
विद्या कर्माङ्गिका स्याद्रसतममुखधीश्चोदिता प्राप्त्यभावा-
दाख्यानानां च विद्याविधिसविधजुषां तद्विधानार्थतैव ।
विद्या साङ्गोर्ध्वरेतस्स्वपि गृहवति सा यज्ञदानाद्यपेक्षा
शान्त्याद्यर्हो गृहस्थोऽप्यविपदि विदुषोऽप्यन्नशुद्धयैव सिद्धिः ॥
एकं विद्याश्रमार्थं [1]विधुरमवियुतं विद्ययाहुश्च्युतं न
कृत्वङ्गे दृष्टिकृत्त्विक्कृतिरथ मुनिता चोदिता ध्यानसिद्ध्यै ।

---

१. विधुरमपियुतं. पा ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

बाल्यं शक्त्यादिगुप्तिर्बलवदभिहतैः कर्मभिर्नान्यविद्या
तद्वन्मुक्त्यर्थविद्या स्वजनकमुकुतैरित्युवाचात्र पादे ॥ ३३

वाक्यार्थज्ञानमात्रं कतिचन कुदृशो मुक्त्युपायं गृणन्ति
ज्ञानं कर्मेति युग्मं करणमिति समुच्चित्य मन्यन्त एके ।
कर्मप्राधान्यमन्ये निजगदुरपरे मुक्तिमिच्छन्त्यसाध्यां
सर्वे तेऽप्यत्र कर्माङ्गकभजनविधिस्थापनोक्त्या निरस्ताः ॥ ३४

यद्दुःखं वर्तते तत्क्षणभिदुरतया न स्वयत्नोपरोध्यं
नातीतार्थं च यत्नो न च सुपरिहरं भाविहेतौ समग्रे ।
दुःखात्यन्तोपरोधे करणविधिरतो व्यर्थ इत्यर्धरम्यं
प्रायश्चित्त्या कृतानां परमकरणतो दुःखसामग्र्यपोहात् ॥ ३५

राजद्विष्टादि सर्पाद्यपि परिहरसि च्छत्रपूर्वं बिभर्षि
प्रायश्चित्ताप्रवृत्तौ फलति दुरितमित्येवमीहामिहेच्छ ।
उत्प्रेक्षारूढभाव्यापजयशमनतः स्वोक्तिसाफल्यमिच्छन्
पश्यंश्चाबालतिर्यग्भयचकितगतिं जोषमित्थं जुषस्व ॥ ३६

साध्यं वा साधनं वा स्वविहतविपथैर्दुर्निरूपं वदन्त-
स्तद्वादे किं प्रवृत्ताः किमिति च विदधत्यन्वहं भोजनादीन् ।
मुक्तेर्नित्यत्वसिद्ध्या भजनमफलमित्यप्यसत् प्रागसिद्धेः
साङ्ख्यास्त्वत्रानुयोज्यास्सकरणदशया नित्यमुक्तिं गृणन्तः॥ ३७

मोक्षाभावे मुधा स्यात् सपरिकरमिदं साधनं चिन्त्यमानं
मुक्तिश्चेन्भ्रान्तिसिद्धा भ्रम इह भविता यावदात्मस्वरूपम् ।
क्षेत्रज्ञं नित्यमुक्तं कथयितुरफलः साधनाध्याय इत्थं
प्रध्वंसात्मा हि मुक्तिर्नयविदभिमता सा तु भावात्मिका नः॥
सन्तत्यात्मा कपालप्रभृतिबहुविधावस्थयान्यत्र नाशो
धीसङ्कोचप्रणाशो विकसनमतथाभूतमात्रागमात् स्यात् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मन्यन्तेऽन्ये तु धारावहनमतिनयात् सन्ततिर्मुक्तबुद्धे-
स्सामग्री चेश्वरेच्छा प्रभृतिसमुदयस्स्यादनावृत्तिरेवम् ॥ ३९

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य
वेदान्ताचार्यस्य कृतिषु अधिकरणसारावल्यां
तृतीयस्याध्यायस्य चतुर्थः पादः॥ ४ ॥

॥ समाप्तश्चाध्यायः ॥ ३ ॥

श्रीमते निगमान्तगुरवे नमः.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

(अथ चतुर्थस्याध्यायस्य प्रथमः पादः)

उपोद्घातः ॥

इत्युत्पत्तिक्रमेण प्रथममभिहितो मुक्त्युपायस्सहाङ्गै-
स्तत्साध्यं सूत्रकारः फलमथ विदुषः पर्वभेदैर्व्यनक्ति ।
स्थूले देहेऽस्य सिद्धयेद्येदिह वदति तत् पादयुग्मेन पूर्वं
निष्क्रान्तस्याथ यत्स्यात् परिगणयति तत् पादयुग्मान्तरेण ॥ १
सूक्ता प्रागेव विद्या किमिति पुनरिमां वक्ति यद्यस्ति शेषं
ब्रूतामेतच्च पूर्वं नहि तदिह फले संघटेतेतिचेन्न ।
मुक्तैरन्यैरसिद्धिं प्रकृततदविनाभावमासन्नसिद्धिं
मुक्तावस्थासमं च स्थिरभजनरसं व्यङ्क्तुमत्रानुबन्धः ॥ २

आवृत्त्यधिकरणम् ॥ १ ॥

शुद्धैरुत्कृष्टधर्मैस्सदनपचरणे ब्रह्मविद्या भवित्री-
त्युक्तं पूर्वाधिकारे विमृशति तु परं तत्स्वरूपं यथावत् ।
प्रत्यक्षं वा स्मृतिर्वा सकृदिदमसकृद्वेति नोक्तं पुरस्ता-
द्यावज्जीवानुवृत्तिप्रभृति च तदिहापौनरुक्त्यं सुबोधम् ॥ ३
ज्ञानं मुक्तेरुपायः श्रुतिभिरभिहितं तस्य सङ्ख्या त्वनुक्ता
सौकर्यं स्यात् सकृत्त्वे खत इह च भवेच्चारितार्थ्यं विधीनाम् ।
सम्यक्त्वात्तद्भवत्वं न पुनरनुगमात् प्रोक्तमित्यप्यसारं
सामान्योक्तेर्विशेषे सति पशुनयतस्तत्र विश्रान्तिसिद्धेः ॥ ४
किंचाग्नेय्यादिनीत्या विदिरिह वदति ध्यानशब्दार्थमेव
ध्याने चोपासनोक्तिः परभजनतया वक्ति सेवात्मकत्वम् ।
ऐकार्थ्ये विद्युपास्योर्व्यतिकरिततया श्रूयते च प्रयोगः
कार्ये हेतौ च भक्तेः क्वचिदुपचरितो भक्तिभेदत्ववादः ॥ ५

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

योगोद्युक्तेषु यस्स्यात् स्ववरणविषयस्तेन लभ्यः परात्मा
ग्राह्यत्वं च प्रियत्वात्तदपि हि गुणतो भक्तिरेवं श्रुतैव ।
सा च प्रीत्यात्मिका धीः क्वचिदतिशयिते स्मृत्यबाधोऽप्यतस्स्यात्
प्रोक्ता चैषा ध्रुवानुस्मृतिरनुवहनात्तैलधाराक्रमेण ॥ ६

रागादादौ प्रवृत्तिश्श्रवणमननयोर्ध्यानमेकं विधेयं
तत्र द्रष्टव्यशब्दो विशदतमतया वक्ति वैशिष्ट्यमात्रम् ।
शब्दोत्थं दर्शनं ये विषयमकथयन् वेदनोक्तेरमीषां
व्याघातादिप्रपञ्चस्स्वयमिह निपुणस्सूक्ष्ममन्वीक्षणीयः ॥ ७

ध्याने वैशद्यमात्रादुपचरणमिदं दृष्टिशब्दप्रवृत्ति-
स्तुल्यं तत्त्वन्मतेऽपि ह्यभिलपति धियं चाक्षुषीं दृष्टिशब्दः ।
घ्रातृस्पष्टादिवद्दृष्ट्यभिवदनमिदं चक्षुषा भानशून्ये
गौणन्तत्तुल्यभावे सति बहुनयवानस्मदीयस्तु पक्षः ॥ ८

न द्वारद्वारिकृप्तिः कथमपि घटते विश्रमश्चेद्विशेषे
सामान्यात्मा विशेषैर्लघु च न गुरुभिः कर्तुरैक्ये विकल्प्यम् ।
अर्थैक्ये दर्शनोक्त्या स्मृतिरुपचरिता युज्यते स्पष्टृयसिद्ध्यै
स्मृत्युक्तादर्शनस्योपचरणमसदित्यन्यदेतत्फलान्नः ॥ ९

कृच्छ्रादौ शक्तिहीनो दृढपरितपनस्संयमार्हश्च कुर्यात्
सर्वार्थी केशवानुस्मृतिमिति घटते तद्विकल्पो यथार्हम् ।
सामान्यात् सर्वदोषेष्वियमुपकुरुते सर्वनैमित्तिकानां
मुक्तेरप्यत्र मूलम्मुनिरमनुत तां तादृशध्यानरूपाम् ॥ १०

नन्वेवं ये मुकुन्दं शरणमुपगता वर्जिता ध्यानयोगै-
स्ते चातिक्रम्य मृत्युं यमिन इव परं धाम यान्तीत्युशन्ति ।
सत्यन्तेऽपीतिशब्दान्नियतविषययोर्गौरवे लाघवे च
प्राप्तार्थं ध्यानशास्त्रं प्रणिधिसहृदशायोगिभिर्योगविद्भिः ॥ ११

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

धर्मो वर्णादियोग्यः कलुषशमनतस्सत्त्वशुद्ध्योपकारी
भक्तेस्तद्वत् प्रपत्तिस्त्वगतिकसमयेष्वन्तरायापहन्त्री ।
सानुक्रोशे हि शक्ते शरणवरणतस्सर्वसाद्ध्यं सुसाध-
म्मोक्षाकाङ्क्षी प्रपद्ये शरणमहमिति क्वापि मन्त्रे श्रुतं च ॥ १२

(अथात्मत्वोपासनाधिकरणम् ॥ ४ ॥)

जीवादत्यन्तभिन्नस्स विभुरभिदधे लक्षणैस्साधनान्तै-
र्मुक्त्यर्थोपासनेऽस्मिन्मुषिततमसि न ब्रह्मदृष्ट्यादियुक्तिः ।
तत्त्वज्ञे वीतरागे तदिह न घटते सोऽहमस्मीत्युपास्ति-
स्तन्न स्वात्मान्तरात्मन्यहमिति वचसोऽप्यत्र मुख्यप्रवृत्तेः ॥ १३
वस्विन्द्रादेरुपास्तौ प्रकृतिशबलितस्वान्वितेक्षा पुरोक्ता
शुद्धस्स्वात्मा च चिन्त्यः क्वचिदिह तु विभुस्तादृशा स्वेन युक्तः।
व्यक्तिर्जीवेशभेदे व्यधिकरणपदैर्भावने स्यात्तथापि
ब्रह्मायत्तस्वरूपप्रमितिसुदृढतासिद्धयेऽहंग्रहोक्तिः ॥ १४
ऐक्योपास्तावहं त्वं त्वमहमिति मतिर्निर्विशेषे कथं स्यात्
भेदाभेदाभिलापः करकमणिकतद्द्योमनीत्या न मुख्यः ।
मत्तुल्यस्त्वं त्वयाऽहं सम इति वदतां नोपचारोऽपि युक्त-
स्तस्मात् सर्वान्तरात्मन्ययमहमिति धीराकृतिन्यायसिद्धा ॥ १५
अद्वैतं द्वैतहानौ न भवति सुवचं तत्प्रतिद्वन्द्विकत्वाद्
द्वैतं चाद्वैतगर्भं द्वितयमपि हि तत्स्वस्वरूपादभिन्नम् ।
द्वैताद्वैतं च तादृक्तदुभयनियमानुज्झनादेव सिद्ध्येत्
सर्वं स्थाने स्थितं स्यात् प्रमितिपरवताऽन्येतरेषान्तु किंचित्॥ १६
नन्वद्वैते निषेध्यो गगनकुसुमवद्भ्रान्तिसिद्धोऽस्तु भेदो
मैवं सत्यादभिन्नः स खलु न यदि तद्भ्रान्तिसिद्धत्वसिद्धिः ।
भिन्नत्वं चास्य तस्माद्यदि भवति मृषा विद्धि दत्तोत्तरन्तत्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सत्यं चेत् सत्यभेदोपगतिरिति मुधा दूरतो धावनं वः ॥ १७

(अथ प्रतीकाधिकरणम् ॥ ३ ॥)

नामादिब्रह्मदृष्टावपि तदहमिति प्रत्ययः पूर्ववत् स्यात्
ब्रह्मध्यानत्वसाम्यादिति यदि न न खल्वन्तरात्मा प्रतीकः ।
न ब्रह्मण्यन्यदृष्टिः कथमपि घटते तस्य सर्वाधिकत्वा-
दन्यस्मिन् ब्रह्मदृष्टौ परमिह नियतैर्लक्षणैस्तद्ग्रहोऽर्थ्यः ॥ १८

आत्मन्यब्रह्मभूते भवतु फलवती कुत्रचिद्ब्रह्मदृष्टि-
र्नैषा वस्तुव्यवस्थां शिथिलयति नरे वैनतेयत्वधीवत् ।
एतावन्मात्रमोहादिदमहमिति तु स्थापयन् क्षिप्रमृच्छे-
दिन्द्रत्वारोपदर्पोद्धतनहुषमहाभोगिसंस्थामवस्थाम् ॥ १९

(अथादित्यादिमत्यधिकरणम् ॥ ४ ॥)

तादर्थ्यादेवतानां फलकरणतया कर्मणश्चोदितत्वा-
दादित्यादौ निकृष्टात्मनि भवतु समुत्कृष्टकर्माङ्गदृष्टिः ।
मैवं कर्म प्रधानं विहितमपि यतस्तत्समाराधनन्तत्
तत्प्रीता देवतैव प्रदिशति फलमित्यर्थतस्सा प्रधानम् ॥ २०

अन्यस्मिन्नन्यदृष्टेर्विधिरिह घटतामन्यथाख्यातिपक्षे
याथात्म्यं सर्वबोधानुगतमिति मते युज्यते नान्यदृष्टिः ।
तन्नाद्ये हि न स्याद्विमतिरविमता भ्रान्तिनीतिः परस्मिन्
तादृग्भेदाग्रहोपप्लुतमतियुगलस्थापनायां नियोगात् ॥ २१

दृष्टव्यापह्नवे न भ्रमदनुघटिता दृष्टिरद्वैतमोह-
स्यादुत्कृष्टापराधस्तत इह घटिता तादृशत्वस्य दृष्टिः ।
तादृग्दृष्टौ न दोषस्तत इह कतिचित्तार्क्ष्यदृष्ट्यादिनीत्या
द्वैधान्यत्रान्यदृष्टिर्न किमनधिगता व्यक्तितो जातितश्च ॥ २२

मुख्यं ब्रह्मैकमेवेत्यवहितमनसां ब्रह्मदृष्टिः कथं स्या-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

देकत्वेनेति केचिन्न हि बलिनि विधौ शङ्कनीयो विरोधः ।
स्वेच्छापूर्वं द्विचन्द्रभ्रमवदिह भिदा कल्पनामाहुरन्ये
बंभ्रम्यन्ते यथा च श्रुतिषु बहुविधं ब्रह्म भातीति बालाः ॥ २३

(अथासीनाधिकरणम् ॥ ५ ॥)

आसीनस्यैव योगश्श्रुतिषु न ददृशे ध्यानमाहुस्सदेति
न्यासश्चेलाजिनादेर्नियमविधिकृतः पाक्षिकासीनतायाम् ।
तस्मादेतद्घटेत स्थितिगतिशयनेष्वप्रकम्प्येन्द्रियस्ये-
त्यप्राप्तं यन्निदान्वयिनि कथमविच्छिन्नधीसन्ततिस्स्यात् ॥ २४
चित्तैकाग्र्योपपत्त्यै विदधति नियतिं देशकालासनादे-
स्सच्छिद्रं त्वन्यदाऽपि क्षममिति सततं चिन्तनं संस्मरन्ति ।
प्रत्यक्संस्कारभूम्ना परनिहितधियस्तादधीन्यादिबुद्ध्या
जुष्टं व्यासक्तनीत्या भवति हि समये योगिनः कर्म सर्वम् ॥२५
कर्मोपास्त्यङ्गभूतं यदिह नियमितं तत्परे पूर्वपादे
योगेन ब्रह्मदृष्टिर्यदपि च परमो धर्म इत्युक्तमाप्तैः ।
तेन प्राधान्यसिद्धावितरदनुगुणन्तस्य योज्यन्तथाच
प्रायः प्रक्रान्तयोगे पटिमलघुतया कल्पितः कालयोगः ॥ २६
विद्याङ्गं पूर्वमुक्तं किमिह पुनरसावासनाद्यङ्गचिन्ता
दृष्टार्थांश विभज्य प्रथयितुमपि न प्राक्शमाद्यङ्गवादात् ।
सत्यं ध्यानाख्यधारावहनमतिदशा त्वन्वहं साधनीया
चित्तैकाग्र्येण सर्वप्रयतनविरहे स्यादितीदं प्रकाश्यम् ॥ २७

(अथाप्रयाणाधिकरणम् ॥ ६ ॥)

एकस्मिन्नेव घस्रे यदि भवति परध्यानरूपा तु भक्ति-
स्तद्विश्रान्तो विधिस्स्यादुपरि तु विफला ब्रह्मचिन्तेत्ययुक्तम् ।
छान्दोग्ये यावदायुस्सुचरितमुदितं ब्रह्मलोकाप्तिहेतो-
स्तद्धि ध्यानस्य वृद्ध्यै तदपि च विहितं कुत्रचित् प्रायणान्तम् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

(अथ तदधिगमाधिकरणम् ॥ ७ ॥)

नाश्रुक्तं कल्पवृन्दरैपि सुपरिहरं कर्म गीतम्मुनीन्द्रैः
पापाश्लेषप्रणाशश्रुतिरपि परविद्वैभवोक्तिस्ततस्स्यात् ।
मैवं नाश्रुक्तमित्याद्यपि फलजनने कर्मणो दार्ढ्यमाह
प्रायश्चित्तक्रमेण त्विह परभजनं चोदितं कर्मशान्त्यै ॥ २९

निष्कृत्यात्मत्वमस्योदितदुरितसमुन्मूलनस्योपपन्नं
नात्र स्वर्गादिनीतिः प्रतिहतिविगमे धीविकासस्स्वतो हि ।
पापालेपः प्रमादोदितसहनमिति स्थाप्यमाज्ञानुवृत्त्यै
नो चेन्न स्याद् गतिर्नाविरत इति गिरो योगिनां च प्रवृत्तेः ॥

अश्लेषः कर्मशक्तेरनुदय उदये तन्निवृत्तिर्विनाश-
श्शक्तिस्सा च प्रणेतुस्तदुचितफलकृन्निग्रहानुग्रहात्मा ।
प्रायश्चित्तं निमित्ते कथमनुदित इत्यत्र नैवानुयोज्य-
न्नाधर्मस्तस्य तत् स्यादिति खलु हृदयं ग्राह्यमश्लेषवाचः ॥ ३१

धीपूर्वन्तूत्तरार्घं न सृजति परवित् सर्वदा सावधानो
जातं नैमित्तिकैश्च क्षिपति समुचितैराशु भुञ्जीत वा तत् ।
वृत्तादौ दृष्टमेतन्नियतिविभवतश्चेदिराजादिसिद्धि-
र्युक्ताऽद्यैवान्यदा वा मुनिरिह मनुते ब्रह्मनिष्ठस्य मुक्तिम् ॥ ३२

(अथेतराधिकरणम् ॥ ८ ॥)

धर्मस्याश्लेषनाशौ नहि परभजनानुग्रहेणोपपन्नौ
तस्याघत्वप्रसङ्गाच्छ्रुतिरिह च परं पापनिर्मुक्तिमाह ।
भोगैस्स्यात् पुण्यनाशोऽस्त्विति यदि न यतः काम्यमप्यस्य पापं
तीर्त्वास्तल्लक्ष्मसिद्धेर्न सुकृतमिति च श्रूयते पापताऽस्य ॥ ३३

पुण्यं विद्यानुकूलं यदिह सफलता तस्य विद्याप्रदत्वात्
तस्यां यन्नोपयुक्तं तदपि दुरितवद्बन्धकत्वेन वार्यम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कारागारोपरुद्धे निगलयुगलतस्सार्वभौमस्य भृत्ये
हैमं काष्णायसं च प्रसदनसमये भञ्जनीयं सहैव ॥ ३४
काम्यन्नेच्छेद्विरक्तो यदि किल कुरुते रागयोगात् फलेत्तत्
नाधीपूर्वं च काम्यं किमपि न च दिशेद्बन्धमज्ञातधर्मः ।
विद्यार्थैर्लिप्यतेऽतः किमितरदिति चेन्नाधिकैस्सान्तरायै-
रन्यार्थैर्मोहजैः क्वाप्यनुतपनवतो बन्धुजैश्चास्त्वलेपः ॥ ३५

(अथानारब्धकार्याधिकरणम् ॥ ९ ॥)

नश्यत्वारब्धकार्यं परविदि दुरितं नह्यधीतो विशेष-
स्सर्वं पाप्मान इत्यप्यभिहितमिति चेन्नोपलम्भादिबाधात् ।
सद्विद्या तस्य तावच्चिरमिति च वदत्यस्मरंश्चागमज्ञा
जीवन्मुक्त्यादिशब्दोऽप्युपचरणपरो मोहितास्तेन मन्दाः ॥ ३६
रोगाद्यारम्भकाणां प्रशमनविधयस्सन्ति दानार्चनाद्याः
प्रत्येतुस्स्वावताराद्यपि विभुरपुनर्जन्मतामप्यगायत् ।
तस्मादारब्धकार्ये फलनियतिवचो दुर्घटं भाति मैवं
प्रायश्चित्तोज्झितानां ननु फलनियतिस्सूत्रकाराद्यभीष्टा ॥ ३७

(अथाग्निहोत्राद्यधिकरणम् ॥ १० ॥)

श्लेषश्चेदस्य पुण्यैस्स तु भवति तदा बन्ध इत्यभ्युपेत्यं
यद्यश्लेषो भवेत्तैः परविदि विफला पुण्यनिष्ठा परस्तात् ।
तस्माद्धर्मोऽप्यधर्मक्रमत इह परित्याज्य एवेत्ययुक्तं
न स्याद्बन्धाय विद्याङ्कुरमुपचिनुते ह्यग्निहोत्रादिधर्मः ॥ ३८
सर्वापेक्षेत्यवोचन्ननु परभजने कर्मणामङ्गभावं
भूयो वक्त्यग्निहोत्रेत्यपि तदिति मुधा ह्येकमत्रेतिचेन्न ।
विद्याया नैरपेक्ष्यात्तदपरिकरता शङ्किता प्रागपास्ता
श्लेषाभावप्रसक्ता त्विह पुनरिति तन्नीतिवैषम्यसिद्धेः ॥ ३९

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

(अथेतरक्षपणाधिकरणम् ॥ ११ ॥)

निर्दिष्टास्माच्छरीरादिति नियतिरतो यावदित्यादिशब्दः
कर्मप्रारब्धकार्यं कथयतु विदुषस्तच्छरीरान्तमेव ।
मैवं प्रारब्धचैत्यान्न तदवधिविधौ व्याप्रियेतान्यपर्यात्
भूयो देहस्मृतेश्चान्तिमवपुषि दृढोद्यत्समाधेस्तु मोक्षः ॥ ४०
नन्वत्रास्मादितीदं वितथमिह पदं स्याच्छरीरे न तु स्यात्
कारागारोपमत्वप्रथनपरतया तस्य साफल्यसिद्धेः ।
त्याज्यत्वव्यक्तये हि प्रभुरसुखमिमं लोकमित्यप्यगायत्
भूतावासं विशिंषन्निममिति च मनुर्हेयभावं व्यनक्ति ॥ ४१
सर्वे जीवास्समानास्स्वत इह विविधं कर्म चानादि तुल्यं
वैषम्यादिश्च दोषो न भवति भगवत्यन्यथा शास्त्रभङ्गः ।
मुक्तौ नातो विलम्बप्रभृति घटत इत्यल्पसारोऽनुयोग-
श्चित्रे कर्मप्रवाहे फलसमयभिदा ह्याश्रिता सर्वतन्त्रैः ॥ ४२
आवर्त्या ब्रह्मविद्या त्वसकृदहमिति स्याच्च न स्यात् प्रतीके
कर्माङ्गेऽर्कादिदृष्टिः प्रणिधिरपि भवेत् सासनः प्रत्यहं च ।
पापे पुण्ये च नाशादिकमथ तु तयोर्भोग्यतारब्धकार्ये
कार्यत्वं स्वार्हवृत्तेरिति कथितमिहारब्धशान्तौ च मोक्षः ॥ ४३

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य
वेदान्ताचार्यस्य कृतिषु अधिकरणसारावल्यां
चतुर्थस्याध्यायस्य प्रथमः पादः ॥ १ ॥

(अथ चतुर्थस्याध्यायस्य द्वितीयः पादः ॥)

उपोद्घातः ॥

नित्यत्वज्ञत्वपूर्वैर्निपुणमभिहितं जीवतत्त्वं द्वितीये
जागर्यादौ च खेदो जगदटविमहाजाङ्गिकस्याथ गीतः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विद्यारम्भावसानावधि यदपि परध्यातुरर्थ्यं तदुक्तं
प्रारब्धस्यावसाने वपुरिह जहतो गत्युपक्रान्तिमाह ॥ १
वर्ण्यो वैराग्यपादे तनुकरणगणक्षोभ ईदृक्तथापि
ब्रह्मज्ञस्यापि काले भवति मृतिरिति ज्ञप्तयेऽत्रानुबन्धः ।
तस्योत्क्रान्तौ विशेषं कथयितुमुचिता चात्र साधारणोक्ति-
र्मध्ये विद्याफलानाम्मरणमपि वदंस्तत्प्रियं चिन्त्यमाह ॥ २
वृत्तिर्वागादिकं वा क्वचन भजतु सम्पत्तिमन्यक्रमां वा
श्रुत्यैवोक्तक्रमां वा नहि फलमिह तच्चिन्तनस्येति चेन्न ।
सम्पत्त्याम्नानमीदृक्क्रमनियतियुतं युज्यते नह्यपार्थं
तस्मात्तच्चिन्तनं काप्युपकुरुत इति स्थाप्यते तद्यथार्हम् ॥ ३
जीवं ये नित्यमुक्तं निजगदुरथवा जीवतो मुक्तिमाहु-
स्तत्तज्जल्पोपजापप्रचलितनिगमग्रामसंक्षोभशान्त्यै ।
उक्त्वा प्रारब्धकार्यं विदुषि च फलवत् प्रायणं चात्र तुल्यं
नाडीभेदप्रवेशप्रभृति समधिकं वक्ष्यति ब्रह्मगत्यै ॥ ४
आयुस्सीमामनिष्टैरिह बहुभिरसावात्मनः प्रेक्ष्य योगी
यत्कुर्याद्यच्च पुत्रप्रभृतिषु न हि तत् तर्क्यमत्रेत्यनुक्तिः ।
गीतादिष्वन्त्यकाले यदगणि तदपि प्राच्ययोगप्रकारे
तत्तत्प्राप्यानुरूपे नियतमिति यथापूर्वधीरत्र भाव्या ॥ ५

(अथ वागधिकरणम् ॥ १ ॥)

कर्मज्ञानाक्षवर्गो मनसि न विलयं यात्यतत्सम्भवत्वा-
त्तद्वृत्तेस्तादधीन्यात्तदुपरतिमिह प्राह सम्पत्तिशब्दः ।
इत्येतन्नोपपन्नं तदुभयविलये चोद्यनिस्तारसाम्या-
त्सम्पत्तिः श्लेषमात्रं करणविषयवाक्छब्दमुख्यत्वसिद्ध्यै ॥ ६

(अथ मनोधिकरणम् ॥ २ ॥)

अन्नस्योक्तं विकारो मन इति मनसः प्राणसम्पत्तिवाक्ये

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्राणस्याम्भोमयत्वात् प्रकृतिविकृतितासम्भवात्तल्लयोऽस्तु ।
मैवं तत्तन्मयत्वश्रुतिरभिमनुते तत्तदाप्यायनं तैः
प्राग्वत् संश्लेषमात्रं तत इह हि मनः प्राण इत्यामनन्ति ॥ ७

(अथाध्यक्षाधिकरणम् ॥ ३ ॥)

प्राणस्सैकादशाक्षस्तदनु निविशते तेजसीत्थं श्रुतत्वा-
न्मध्येऽन्यप्राप्तिकृप्तौ श्रुतिहतिरिति चेन्नात्मयोगस्य चोक्तः ।
प्राणस्य स्वाप्तजीवे मिलति निजतनोरुद्धृतैर्भूतसूक्ष्मै-
स्तेजःप्राप्तिश्च गङ्गानिपतितयमुनासागरप्राप्तिवत् स्यात् ॥ ८

(अथ भूताधिकरणम् ॥ ४ ॥)

तेजस्येवास्तु युक्तः श्रिततनुभृदनस्तेजसीत्याद्यबाधा-
च्छलिन्यायोऽपि नास्मिन्निति यदि न तथान्यत्र भूतान्तरोक्तेः ।
विश्वारम्भाय देवस्त्रिवृतमकृत च प्रागिमं भूतवर्गं
प्राचुर्यात्तत्तदेकव्यवहृतिरिति चासूत्रयत्पूर्वमेव ॥ ९

(अथासृत्युपक्रमाधिकरणम् ॥ ५ ॥)

अत्रैव ब्रह्म विन्दत्यमृत इह भवत्यागमाद्ब्रह्मनिष्ठो
नोत्क्रान्तिस्तस्य युक्तेत्यसदुपनिषदो ह्यस्य गत्याद्युशन्ति ।
नान्यप्राप्त्यर्थमेतत् सगुणसमधिके कुत्रचिन्मानहाने-
स्तस्मादत्रामृतत्वप्रभृतिवचनतस्तादृशी तद्दशोक्ता ॥ १०
निश्शेषं भोगहेतौ गलति परविदः कर्मणि प्रायणेऽथो
गत्यर्थं सूक्ष्मदेहानुगतिरणुतया निश्चितस्याफला स्यात् ।
मार्गे संवादवादस्तदुचितवपुषा त्वस्त्वितीवानुयोगे
कृत्स्नाविद्यानिवृत्तिः परपदगमनापेक्षिणीत्यादि वाच्यम् ॥ ११
कल्पादौ भूतसूक्ष्मप्रभृतिभिरुदितं वर्ष्म कल्पान्तनाश्यं
प्रत्येकं प्राणिभेदे नियतमनियतस्थूलदेहानुयायि ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लिङ्गाख्यं भस्त्रिकान्तःपरुवकवदवस्थायि साङ्गैश्चैः प्रगीतं
सूक्ष्मांशः पूर्वमूर्तेरुपरितननतनोर्बीजमत्रेष्यते तत् ॥ १२

तत्त्वज्ञानेन बन्धः किल गलति पुरा नोत्क्रमेणेत्यसार-
म्माता वन्ध्येतिवद्धि स्ववचनविहतिर्जीवतो मुक्तिवादे ।
मुक्तश्चेत्तत्त्वबोधात्तनुभृदिह तदा तत्परं नैष दुःख्येत्
मिथ्या दुःखं तदा चेत् कथय तव कदा तस्य सत्यत्वमिष्टम् ॥
यंयं भावं स्मरन्तो जहति वपुरिदं देहिनो यान्ति तन्तं
तस्मादुत्क्रान्तिसाम्यं न घटत इति चेत्तन्न तन्मात्रसाम्यात् ।
विद्याभेदादिनीत्या भवति विषमता ह्यन्तिमप्रत्ययादौ
किञ्चित् साधर्म्यवादे न च नियतिमती सर्वथा साम्यसिद्धिः ॥

(अथ परसम्पत्त्यधिकरणम् ॥ ६ ॥)

जीवोत्क्रान्त्युक्तिकाले विदुषि तु घटते तत्प्रतिक्षेपभक्तो
भूतोत्क्रान्तेस्तु पश्चात्तदुपनिपतने सडतिस्स्यात् कथञ्चित् ।
तस्मात् साधारणोऽपि ह्ययमुपरि ततस्स्थाप्यते हार्दयोग
स्तुल्येऽप्यस्मिन्न तुल्यास्सरणिमुखतया प्राप्यभेदेन नाड्यः॥ १५
प्राप्तुं भोगापवर्गौ प्रयति तनुभृति प्राप्तसूक्ष्मस्वदेहे
सम्पत्त्या किं परस्यां श्रितहृदयसुषौ लभ्यते देवतायाम् ।
आतस्तेजः परस्यामिति चिरघटितेऽप्यस्तु सिद्धानुवादो
मैवं मानानुसारात् फलमिति परमे सङ्क्रमश्चान्तिशान्त्यै ॥ १६

(अथाविभागाधिकरणम्॥ ७ ॥)

सम्पत्तिर्देवतायां भवतु लय इयं सा हि सर्वस्य योनि-
र्भूयस्स्रष्टुं क्षमा चेत्यसदनुषजतो वाच्यवैरूप्यदोषात् ।
विश्लेषो भूतसूक्ष्मैरिह न च घटते सृष्टिकृत्तिस्तु गुर्वी-
प्रोक्ता धूमादिमार्गे गतिरपि भविनस्तत्परिष्वङ्गनेन ॥ १७

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

(अथ तदोकोधिकरणम् ॥ ८ ॥)

नाडीजालेऽतिसूक्ष्मे न भवति सुशका मुक्तिनाडी विवेक्तुं
तस्मान्मूर्धन्यनाडीगतिरनियमतो मुच्यमानस्य पुंसः ।
वाक्यं गन्तुस्तयोर्ध्वं प्रवददमृततां सम्भवादस्तु मैवं
विद्यासम्प्रीतहार्दप्रसदनमहसा स्वार्हनाडीप्रवेशात् ॥ १८
स्वाधीनो हार्दसंज्ञस्स्वयमविकलया सम्पदा साकमेकः
स्थित्वा हृत्पद्ममध्ये स्थगितनिजतनुस्सप्तलोकीगृहस्थः ।
नाडीचक्रे सुषुम्नां निखिलधृतिकरीं नाभिमूर्धान्तरूपां
भित्त्वा तन्मध्यरन्ध्रप्रहितमिषुमिवोत्क्षिप्य नेता मुमुक्षुम् ॥ १९

(अथ रश्म्यनुसाराधिकरणम् ॥ ९ ॥)

एतैरेवेति वाक्ये दिनकरकिरणालम्बनेनोर्ध्वयानं
यत्प्रोक्तं योगिनस्तद्दिनमृतिनियतं निश्ययुक्तयेति चेन्न ।
अह्नि च्छायासु रात्रिष्वपि च लघुतरा रश्मयस्सन्ति लिङ्गै
स्तापो वर्षादिरात्रौ न यदि हिमदिनन्यायतो नेयमेतत् ॥ २०

(अथ निशाधिकरणम् ॥ १० ॥)

सर्वेषामप्रशस्तं रजनिमरणमित्यह्नि योगी म्रियेत
प्रेयाद्यद्येष रात्रौ न चरममरणं तद्भवेदित्ययुक्तम् ।
कर्म प्रारब्धकार्यं ह्यनियतसमयं क्षीयते तावदेवे-
त्युक्तश्चास्मिन्विलम्बोऽहनि निशि च परं विद्यया सोऽश्नुतेऽतः॥
यत्रैकस्यापवर्गः प्रतिनियततया गण्यते जातकज्ञैः
तत्स्यादन्त्यं शरीरं नतु भवति ततोऽप्यन्ययोगव्युदासः ।
नह्यत्राप्यन्तकाले दिनरजनिभिदा देशभेदादि चैवं
शब्यं कुर्वन्ति तस्मिन् यदुच यदुच नेत्यादि चैवं विभाव्यम् ॥

(अथ दक्षिणायनाधिकरणम् ॥ ११ ॥)

देहं योगीश्वरोऽपि त्यजति यदि रवेर्दक्षिणावृत्तिकाले

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विन्देत्सायुज्यमिन्दोरिह भवति पुनस्तच्छ्रुतेस्तत्स्मृतेश्च ।
मैवं पूर्वोक्तनीतिस्त्विह नहि विहता तस्य सायुज्यमिन्दौ
विश्रान्त्यै सूर्यनीत्या जगदुपकृतये भीष्मकालप्रतीक्षा ॥ २३
किञ्च प्रारब्धकर्मप्रतिनियतमिदं जाह्नवीसम्भवस्य
स्वेच्छायेनैवमासीत् स च वसुरभवन्नैष साक्षाद्विमुक्तः ।
तस्माद्विन्देत मुक्तिं नरपितृदिविषद्रात्रिकालेऽपि योगी
स्यातां प्राशस्त्यनिन्दे तदितरविषये गीतयोक्तौ तु मार्गौ ॥ २४
सम्पद्येतान्यदक्षं मनसि तदपि तत्संयुतं प्राणवायौ
सोऽध्यक्षे तैस्समेतस्स च तदखिलवान् भूतवर्गे तु सूक्ष्मे ।
उत्क्रान्तिस्स्यात् समाना युतिरथ च परे सा च संश्लेषमात्रं
निर्गच्छेद्ब्रह्मनाड्या घृणिभिरथ निशादेवराज्योश्च मोक्षी ॥२५

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य
वेदान्ताचार्यस्य कृतिषु अधिकरणसारावल्यां
चतुर्थस्याध्यायस्य द्वितीयः पादः ॥ २ ॥

(अथ चतुर्थस्याध्यायस्य तृतीयः पादः ॥)

उपोद्घातः ॥

निर्गत्य ब्रह्मरन्ध्रात् तपनकरमथालम्ब्य नाडीनिबद्धं
प्रत्युद्यद्देवबृन्दप्रहितबलिरसौ येन योगी प्रयाति ।
मौकुन्दस्थाप्यतेऽसौ परमिह मुनिना पञ्चभिर्नीतिभेदै-
र्मोहाकूपारपारं पुरमभिगमयन्मुक्तिघण्टापथो नः ॥ १

अर्चिराद्यधिकरणम् ॥ १ ॥

शाखाभेदेषु भिन्नां गतिमुपनिषदोऽधीयते तन्मुमुक्षो-
र्विद्यावैषम्यनीत्या स्मृतिरपि विषमा न व्यवस्थाऽर्चिरादेः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नैतत् सर्वत्र तैस्तौरिह तदिदमिति प्रत्यभिज्ञानसिद्धौ
भाव्यं न्यूनाधिकत्वप्रभृति निखिलमप्यत्र सिद्धाविरुद्धम् ॥ २
चैद्यादीनामयोध्यास्थिरचरजनुषां पुण्डरीकादिकानां
भीष्मादीनामुपास्तिक्रमभवविभवव्यूहलोकस्थितानाम् ।
धातॄणां तत्सुतानामधिकृतिविगमे ब्रह्म सम्प्राप्स्यताम-
प्यन्येषां प्रस्थितिस्सा शितपृथुमतिभिश्चिन्तनीया यथार्हम् ॥ ३

(अथ वाय्वधिकरणम् ॥ २ ॥)

संप्राप्तौ देवलोको मरुदपि च समं वत्सरादित्यमध्ये
नैकत्वं रूढिभेदात्तत इह तु तयोस्तुल्यभावाद्विकल्पः ।
मैवं योऽयं प्रसिद्धः पवत इति मरुद्देवतानां गृहत्वं
तस्योक्तं धारकत्वादत उचितमिदं निर्विकल्पं तदैक्यम् ॥ ४

(अथ वरुणाधिकरणम् ॥ ३ ॥)

कौषीतक्यागमोक्ता वरुणशतमखौ सोऽपि नाथः प्रजानां
क्वापि स्थाप्या निपीडच श्रुतिमपि विफला ह्यन्यथा तच्छ्रुतिस्स्यात्।
तस्मात्ते वायुलोकात् परमनुपठनात् तत्र सन्त्वित्ययुक्तं
स्यादर्थाद्विद्युतोऽन्वग्वरुण इति परौ पाठतस्तत्परौ स्तः ॥ ५
यत्त्वस्यामानवस्य श्रुतमिह परसंप्रापकत्वं भवेत्तत्
सद्वारत्वेऽप्यबाधन्तदपि सहकृतौ तैश्श्रुतौचित्यभूमा ।
यश्चोक्तो मानसाख्यस्तटित उपरि तु ब्रह्मलोकाप्तिहेतु-
स्तस्मान्नेता स नान्यो विदुरतिवहनं वैद्युतेनैव तस्मात् ॥ ६

(अथातिवाहिकाधिकरणम् ॥ ४ ॥)

भोगस्थानान्यमूनि ज्वलनदिनमुखान्यध्वचिह्नानि वा स्यु-
र्लोकोक्तिच्छायया वैवं स्थितमिदमिति नासंभवात् कालशब्दे ।
स्पष्टे नेतृत्वपुंस्त्वे क्वचिदतिवहनं तद्वदन्यैश्च कार्यं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सन्दिग्धे वाक्यशेषाद्गतिरिति जगुरग्न्यादिवाचाभिमन्तॄन् ॥ ७
यां श्रुत्वा धर्ममूनुर्न्यपतदभिपतेत्तामसौ तामसौघो
वर्गस्तैवर्गिकाणां पितृसरणिघटीयन्त्रचक्रे विवूर्णेत् ।
वर्तन्येषार्चिरादिश्रुतिभिरपुनरावर्तिनां संविभक्ता
तत्र ब्रूतेऽतिवोढृंस्तदितठवदहःपक्षमासादिशब्दः ॥ ८
पूर्वे धूमादिमार्गे सुकृतिषु कथिता चन्द्रमःप्राप्तिरन्या
सायुज्यं न्यासविद्याप्रकरणपठितं चान्द्रमन्यादृगुक्तम् ।
अत्रान्यार्चिर्मुखानामतिवहनकृतावष्टमस्याप्तिरिन्दो-
रित्थं सुस्था व्यवस्था प्रणिहितहृदयैरेवमन्यच्च सूह्यम् ॥ ९
भूलोकेशाग्निपूर्वान् कतिचन भविनः केऽपि मन्यन्त एता-
ञ्छब्दैक्येऽप्यत्र गुर्वी भवति तदभिमन्त्रन्तराणां प्रकृप्तिः ।
अन्ये चामानवस्य स्वपदगतपरब्रह्मनेतृत्वदृष्ट्या
नित्यत्वं तद्वदन्यान्निजगदुरखिलान्नित्यवैकुण्ठभृत्यान् ॥ १०

(अथ कार्याधिकरणम् ॥ ५ ॥)

वैधात्रस्याननेतॄन् समकथयदिमान् बादरिस्तादृशानां
गत्यौचित्यं तदा स्यान्नखलु विभुजुषामत्र वेद्यं न लभ्यम् ।
सामीप्याद्ब्रह्म चोक्तस्सरसिजवसतिस्तेन सार्द्धं च मुक्ति-
र्युक्तेत्येतन्न नानाश्रुतिपठितपरस्थानगत्याद्यबाधात् ॥ ११
मार्गोऽसावर्चिरादिर्गमयति परमं धाम गत्यादियोगा-
द्ब्रह्मोक्तेर्मुख्यभावादिति तु निरणयज्जैमिनिस्सत्यमेतत् ।
वक्तव्यं त्वत्र किंचिन्नयतिपरविदिस्स्वान्वितब्रह्मनिष्ठां-
स्तद्देहस्वात्मनिष्ठानपि मुखभिदयामी च संपूर्णनिष्ठाः ॥ १२
ध्यायेयुर्ये च जीवान् प्रकृतिशबलितान् केवलान्वा यथेष्टं
द्वेधापि ब्रह्मदृष्ट्या जडनिवहमपि स्वेन यद्वान्यदृष्ट्या ।
ते सर्वेऽपि प्रतीकप्रणिहितमनसो नार्चिराद्यध्वयोग्या

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ब्रह्मोपास्तेश्च लिङ्गं गतिरियमनघा सूत्रिता पूर्वमेव ॥ १३
प्रत्यापत्तिप्रकारः प्रतिनियतिमती कर्मयोगादिनिष्ठा
विद्याभेदाधिकारः परभजनबलान्मुक्तिविघ्नोपशान्तिः ।
अन्त्यावस्थाव्यवस्था पृथगयनगतौ विश्रमाप्तिर्विभक्ता
साक्षान्मुक्तिः क्रमाद्वेत्यखिलमगतिकैरप्रणोद्यं परैश्च ॥ १४
पन्थानं देवयानं तमिममधिगतः पश्चिमे देहपाते
तत्त्वस्तोमांस्तमोन्तानतिपतति तरत्यापगान्तत्र दिव्याम् ।
दिव्यन्देहादि लब्ध्वा जनिलयरहितं याति विष्णोः पदन्तत्
पर्यङ्कारोहणान्तां भजति बहुमतिं ब्रह्मसंवादधन्यः ॥ १५
संघाते नित्यता न क्वचिदपि न पृथिव्यादिभावस्तथात्वे
पर्यङ्काद्यैर्न साङ्ख्यं किमपि भगवतः पूर्णनिस्सीमशक्तेः ।
व्याप्तप्राप्त्यर्थमूर्ध्वं गतिरपि विफलेत्यादिकान् हैतुकानां
क्षोदिष्ठक्षीबजल्पान् श्रुतिरुपशमये[1]दद्भुतार्था स्वतन्त्रा ॥ १६
भावोऽभावश्च यत्रानुपधि समुदितौ तत्र भावी विरोधः
प्रज्ञातव्याप्तिरोधेऽप्यधिकनिजबलान्मानतस्स्वार्थसिद्धिः ।
दृष्टं सर्वेष्टमेतन्न यदि नहि भवेन्मानमद्ध्यक्षतोऽन्यत्
बाधोऽद्ध्यक्षे मिथो वा वटदलशयनाद्यद्भुतं चैवमूह्यम् ॥ १७
एकत्वं ब्रह्मविद्यापरिषदि सुपथोऽधीयमानस्य तस्मि-
न्वायौ स्यादेवलोकश्रुतिरपि वरुणाद्यन्वयो विद्युतोऽधि ।
नेतारोऽमानवान्ताः परपदगमने तद्विदां सोऽयमध्वा
तुर्याद्ध्यायस्य पादे सृतिरधिकरणैरित्थमुक्ता तृतीये ॥ १८

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य
वेदान्ताचार्यस्य कृतिषु अधिकरणसारावल्यां
चतुर्थस्याध्यायस्य तृतीयः पादः ॥ ३ ॥

---

१. अद्भुतार्थस्वतन्त्रा. पा ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

(अथ चतुर्थस्याध्यायस्य चतुर्थः पादः ॥)

उपोद्घातः ॥

उक्तं पादैरघानामिति पृथुवपुषस्सूक्ष्ममूर्तेश्च हानं
निर्द्धूतोपाधिराशेर्निरुधिकमहानन्दमन्त्येन वक्ति ।
स्वाविर्भावोऽत्र चिन्त्यस्त्रिभिरधिकरणैश्छन्दवृत्तिस्त्रिभिश्चे-
त्येवं द्वे पेटिके स्तस्स्वत उभयमिदं नोपधेरीशनिघ्नम् ॥ १

सम्पद्याविर्भावाधिकरणम् ॥ १ ॥

अश्रान्तस्वप्रकाशं यदिदमहमिति प्रत्यगात्मस्वरूपं
तस्याविर्भावसिद्धौ न तु किमपि फलं स्यात् सुषुप्ताविशेषात् ।
तस्मान्मुक्तस्स्वमन्यद्भजति वपुरसौ देववद्रूपशब्दा-
न्नैवं स्वेनेति शब्दो ह्यफल इह भवेद्रूपवाचार्थसिद्धेः ॥ २
नित्यस्वात्मस्वरूपस्थितिरियमभिनिष्पत्तिरित्यूचिवांस-
स्तन्मात्रं स्यान्न विद्याफलमिति न विदुर्नित्यसिद्धं त्वसाध्यम् ।
सिद्धं साध्यानुवेधाद्भवति फलमतस्सात्वविद्याविभङ्गो
यद्वा सिद्धस्य वित्तिस्तदिह न वितथं मुक्त इत्यादि सूत्रम् ॥ ३
स्वाकारान्नित्यभातादधिकसुखतया भाति जीवस्तदानीं
सिद्धाविर्भावमात्रेऽप्यनुविदुरभिनिष्पत्तिवाचः प्रयोगम् ।
संकोचात्यन्तहानिर्धिय इयमभिनिष्पत्तिरागन्तुरुक्ता
निष्पत्त्यूहंस्वरूपोपधिकमपि तदा स्वेनशब्दः प्रवक्ति ॥ ४
प्रायस्स्वस्मिन् स्वदेहिन्यनघगुणनिधौ तद्विभूतिद्वये वा
दृष्टं यत्स्यात् समाधौ भवति पृषतवत्तद्धि मुक्तानुभूतेः ।
कृत्स्नं तच्छर्करौघव्यतिकरितसुधासिंधुवत् स्वादुभूतं
तस्मात् स्वात्मप्रकाशे न फलमिति वदन् कूपकूर्मो घृणार्हः ॥ ५
मल्ली शुद्धं प्रसूनं जनयति समये रञ्जकोपाधिमुक्ते
तद्वन्नाथानुकम्पा फलमुपशमितावग्रहं सूरितुल्यम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तस्मादागन्तुकेऽपि प्रतिहतिविरहात् तादृशे धीविकासे
प्रत्यापन्नस्वदायक्रम इह कथितः प्राप्तसिद्धेः प्रतीचः ॥ ६
अर्वाञ्चो मुक्तिभेदं कतिचिदगणयन् स्वात्ममात्रानुभूतिं
तत्र ब्रह्मानुभूतेर्विहतिरुपधितस्स्यात् स्वतो वेति चिन्त्यम् ।
सन्ति द्वेधापि दोषास्तत उपचरणान्मुक्तिशब्दोऽत्र युक्तः
सालोक्यादिप्रभेदेष्वपि सरणिरियं सावधानैर्विभाव्या ॥ ७

(अथाविभागेनदृष्टत्वाधिकरणम् ॥ २ ॥)

जीवेशौ नित्यभिन्नौ श्रुतिरिह च सहेत्याह मुक्तस्य भोगं
साम्ये पारम्यमुक्तं स्मृतमपि स पृथग्भातु तस्मात् परस्मात् ।
मैवं तत्त्वं हि मुक्तौ स्फुरति तदनघो भेदभानांश इष्ट-
स्सिद्धे देहात्मभावे त्विह न हि घटते तत्स्वनिष्ठत्वबुद्धिः ॥ ८
मन्त्रोक्तं भोक्तृभावे यदि सहभवनं ब्रह्म न स्यात् प्रधानं
तस्मात्तद्भोग्यभावे भवतु तदुचितं ब्राह्मणव्याकृतेश्च ।
द्वेधापि ब्रह्म तत्त्वात् पृथगितर इह स्यादितीदं च वार्ते
सिद्धे भेदे स्वनिष्ठस्थितिपरिहरणं ह्यत्र सूत्रोपपाद्यम् ॥ ९
पारम्यं यच्च साम्ये श्रुतमिह न हि तत् सर्वथेत्यप्यधीतं
ग्राव्णो हेम्नश्च यद्वत् समधरणधृतौ स्यात्तदुक्तिस्तथात्र ।
एवं तद्देहभावे स्थितवति विविधाबाधिताम्नायभूम्ना
ब्रह्मैवेत्यादिवाक्यं प्रथयति समतां तादृगित्यप्यधीतेः ॥ १०

(अथ ब्राह्माधिकरणम् ॥ ३ ॥)

ज्ञानत्वे किं फलं स्यादिति मिषतु गुणैस्तादृशं ब्रह्मसाम्यं
[1]किन्तैरन्यैस्स्वरूपात्तदिह भवतु चिन्मात्ररूपप्रकाशः ।
इत्थं चात्रोक्तपक्षद्वयमुभयविधश्रुत्युपात्ताविरोधा-
न्निर्धूयाथ द्विधाविर्भवनमघटयत् सिद्धतत्त्वप्रकाशात् ॥ ११

१. किन्थमैरस्वरूपैस्त. पा ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पर्यायौ नामपाठेष्वनुपरिपठितौ मुक्तिकैवल्यशब्दौ
कैवल्यं चान्ययोगत्यजनमिति कथं धर्मिधर्मान्वयोऽस्य ।
मैवं ब्रह्मस्वरूपादपरमिह न खल्वस्ति किंचित् स्वनिष्ठं
न द्रव्यं चागुणं स्यादधिकरणयुगं तन्निरातङ्कमेतत् ॥ १२

अथ सङ्कल्पाधिकरणम् ॥ ४ ॥

धात्रादेरप्यपेक्ष्यो ह्युपकरणगणस्सत्यसंकल्पवृत्ते-
र्मुक्तस्याप्येवमेवास्त्विति यदि वितथं तद्विकल्पासहत्वात् ।
इष्टा द्रव्याद्यपेक्षा सुकृततदितरापेक्षणं तत्र दुस्स्थं
न स्यादिच्छाविघातस्त्वनुपधिकतया देववाञ्छैकरस्यात् ॥ १३
विश्वस्यैतस्य जन्मस्थितिलयरचना विश्वकर्तुर्यथा स्या-
दिच्छासन्तानभेदान्नियतिरिह तथा नित्यमुक्तक्रियाणाम् ।
तस्यानुच्छेददृष्ट्या प्रतिकलमिदुरास्ताश्च तादृक्प्रवाहा-
स्तद्भुद्धेरापरोक्ष्यं त्वनिशमभिदुरं वर्तते ब्रह्मधीवत् ॥ १४

प्रत्यूहार्हाः प्रदेशप्रभृतिसुकृतिनस्सत्यसंकल्पभावे
मर्त्यारम्भस्पृहादौ तदितरविविधप्राणिसृष्ट्यादिदृष्टेः ।
तेनेच्छासन्ततीनां सफलविफलते पुण्यपापैरमीषां
मुक्तस्योक्ता चिकीर्षा त्वविहतविषया तारतम्यं त्वदोषः ॥ १५
सूत्रे मुक्तोप्यनन्याधिपतिरभिहितस्तेन कस्तस्य शेषी
श्रुत्यैवोक्तस्स्वराडित्यपि विहतिरतः प्राक्प्रतिष्ठापितानाम् ।
मैवं नाथेतरान्प्रत्यविहित इह क्षिप्यते शेषभावो
विश्वस्यात्मेश्वरो यः पतिरिति पठितस्तत्पतित्वं त्वबाध्यम् ॥ १६

अथाभावाधिकरणम् ॥ ५ ॥

मुक्तः प्रोक्तोऽशरीरः क्वचिदथ बहुधा संभवः क्वाप्यधीतो
गानक्रीडादि चोक्तन्तदनुगुणमतद्वन्द्वमार्षं निरस्यन् ।
स्वच्छन्दस्योभयन्तत् क्षममिति वदति स्वम्मतं सूत्रकार-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्याच्चाकर्मोद्भवन्तन्निरवलमपि परब्रह्मवत्तत्समस्य ॥ १७
मोक्षे पुण्याद्यभावात्तदुपधिकवपुर्वर्जितत्वं न दूष्यं
तस्मिन्दुःखार्हदेहत्यजि च शुभवपुस्सत्त्वपक्षोऽप्यबाध्यः ।
इत्थं सत्यत्र मुक्तस्थितिरिह मुनिना कीदृशी सूत्रिता स्या-
न्नैवं स्वच्छन्ददेहग्रहतदनियमस्थापनेऽत्राभिसन्धेः ॥ १८
नानादेहा यदि स्युर्युगपदधिगतब्रह्मसाम्यस्य पुंस-
स्तेषां व्याप्तस्वरूपान्वय उचित इति प्रक्तनाणुत्वहानम् ।
नैतद्धीव्याप्तिसिद्धेर्भवति च जगदावेशवाक्तन्निदाना
सौभर्यादौ प्रकृष्टां गतिमपवदितुं न क्षमं ब्रह्मसाम्यम् ॥ १९
देहानां यौगपद्ये बहुषु कथमणुर्धारकोऽस्त्वेष मुक्त-
श्चैतन्यद्वारतश्चेत् सकलमपि तदा धारयेद्व्याप्तबोधः ।
नैवम्मुक्तस्य शक्तिर्नियमितविषया त्विच्छया सर्वशक्तेः
प्राक्तादृग्योगशक्त्या बहुतनुभजने कर्मबन्धोऽप्यपेक्ष्यः ॥ २०
शक्तिः क्षेत्रज्ञसंज्ञा मुनिभिरभिदधे वेष्टिता कर्मभिस्वैः
पुंसोऽनंशापि बुद्धिर्बहुविधविकृतिस्स्वीकृतैवं स चास्तु ।
वालाग्रेत्यादिवाक्यात्तदयमणुरपि स्यादनन्तोऽपि मुक्तौ
न स्याज्जैनादिभङ्गे परिहृतविकृतेरैकरूप्यानपायात् ॥ २१
जीवस्यैकैकशो हि त्यजनत उदितो वृक्षशाखासु शोष-
स्तस्माद्द्वारकं स्यादपगतवरणे मुख्यमानन्त्यमस्मिन् ।
नैवं शाखासु भोगाश्रयनियतिकरोपाधिनाशः प्रहाणं
क्षेत्रादिन्यायतोऽसावभिमतिविरहात् स्यादधीतो जहातिः ॥ २२
एकोऽनेकः परस्मात् पृथगपृथगपि स्वस्वरूपेण मुक्त-
स्वाभीष्टाशेषभोक्ता स्वयमिति पृथुकक्षीबवद्ये भ्रमन्ति ।
तेऽन्वीक्ष्य स्वोक्तिबाधं श्रुतिशतविहतिं तत्तदुक्त्यान्यपर्ये

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जैनावष्टम्भदृप्यन्मतिकलहमुचस्सत्पथं संश्रयन्तु ॥ २३
सर्वं संकल्पमात्रात्प्रभत इति समाम्नायते श्रुतिर्तं च
स्वेच्छातो देहयोगाद्यनियतिकथनं स्यात्ततः पिष्टपेषः ।
तन्नान्योन्योपरुद्धश्रुतिगतिनियतिः कामतोऽनेकदेह-
स्वीकारप्रक्रियेत्याद्यनियतिकथने सूत्रकाराभिसन्धेः ॥ २४

(अथ जगद्व्यापारवर्जाधिकरणम् ॥ ६ ॥)

यद्यप्युक्तो विमुक्तः परतनुरपृथक्सिद्ध इत्यत्र पूर्वं
व्यापारांशे तथापि श्रुतमिह परमं साम्यमक्षोभणीयम् ।
संकल्पादेव सर्वोत्थितिरिति हि ततस्स्यादिति प्रत्यवस्थां
कृन्तत्यन्त्येऽधिकारे कृतिमदितरयोस्स्थापयन् भोगसाम्यम् ॥२५
सायुज्यं भोगसाम्यं समगणि निपुणैश्शब्दशक्त्याद्यबाधा-
त्तच्च व्यापारसाम्ये त्वसति न घटते स्वक्रियास्वादहानेः ।
तस्मान्मुक्तस्य सृष्टिप्रभृतिरपि जगद्व्यापृतिर्ब्रह्मतुल्या
मैवं तल्लक्षणं सा कथमनुगमतस्तस्य चान्यस्य च स्यात् ॥ २६
कथ्यन्ते सृष्टिवाक्यैः क्वचिदपि न जगत्कारणत्वेन मुक्ताः
प्राधीतः कामचारो भवतु न जगदारम्भकत्वं ततस्स्यात् ।
सर्वाकारोपभोग्येश्वरविषयधियः साम्यतो भोगसाम्यं
युज्येतानन्दवल्ल्यामगणि च विभुनानन्दमात्रे समत्वम् ॥ २७
निष्कामश्रोत्रियस्याप्यतिदिशति सुखं मानुषानन्दतुल्यं
साऽऽनन्दान्वक्तुकामा शतगुणमधिकानाविरिञ्चं क्रमेण ।
तत्तद्भोगात्त्वदिष्टं कथमिदमवरं कष्टमिष्टं हि मुक्ते
सत्यं तत् स्यान्मुकुन्दप्रियजनसदृशे ह्येकदेशानुवादः ॥ २८
आनन्दानन्त्यमाह श्रुतिरिह हि यतो वाच इत्यादिका स्या-
द्विश्रान्तिः श्रान्तिमात्रादिति च निगदितं यामुनाचार्यवर्यैः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नह्यानन्दो मितस्स्याद्विधिशतवचनेऽप्यस्य यष्ट्या नभोव-
च्चोक्तं भूभृदण्वोरुदधिपतितयोर्मज्जने को विशेषः ॥ २९

विश्वम्मुक्तस्य देहो न खलु तदपृथक्सिद्ध्यभावोपलम्भा-
न्नोपादानं ततोऽसौ कथयितुमुचितस्सर्वशक्तित्वहानेः ।
नात्माशक्यं चिकीर्षत्तदितरविषये निर्विघाता तदिच्छा
व्यापारे भिद्यमानेऽप्यविषमरसता दृश्यते क्वापि लोके ॥ ३०

तत्तत्सेवाविशेषस्थिरपरिणमितस्सार्वभौमप्रसाद-
स्मृते भृत्यस्य साम्यं स्वयमनभिमतस्वामिचिह्नैकवर्जम् ।
एवं देवं दयालुं शरणमुपगतैर्लभ्यतेऽनन्यलभ्या
निर्द्धूताद्वृत्तिशङ्का निरुपधिकरसा सव्यवस्था त्ववस्था ॥ ३१

अत्राहुस्सूत्रमन्त्यं पृथगधिकरणं केचिदाज्ञस्यलाभा-
दस्त्यावर्ते निषेध्ये त्विममिति च पदं तेन शङ्कोत्थितेति ।
भाष्यादौ तन्न दृष्टं भवति च सुगमं पूर्वशेषत्वमस्य
स्यादाद्वृत्तिप्रसङ्गादपि निखिलजगन्निर्मितौ साम्यशङ्का ॥ ३२

सर्गाद्यावर्तलीलारससहचरिते दण्डरासे नियुक्तं
जीवं देवो विमुच्य क्रमत इह सयुग्भावधन्यं भुनक्ति ।
कर्मात्यन्तोपशान्तेरिह न च पुनरावर्तयत्येनमित्य-
प्याम्नाते कर्ममूलाक्षयफलकथनाद्युत्थशङ्कोपशान्तिः ॥ ३३

स्वाविर्भावोऽपवर्गे निरुपधिनियतस्वप्रकार्यन्तदृष्टि-
श्चिद्रूपस्यैव तद्वच्छ्रुतिमकुटमितैः स्वप्रकारैस्सहेक्षा ।
सङ्कल्पादेव सिद्धिस्तनुषु च नियमोन्मुक्तता ब्रह्मसाम्य-
प्राप्तौ तल्लक्षणांशोज्झनमिति चरमाध्यायतुर्याङ्घ्रिसारः ॥ ३४

ध्यानादिं तत्प्रभावं करणभृत इतो देहकाराकुटीरा-
न्निष्क्रान्ति ब्रह्मनाड्या गतिमपि सुपथा स्वप्रकाशं च साध्यम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इच्छातस्स्वेष्टसृष्टिं परममपि परब्रह्मणा भोगमात्रे
साम्यं मायामतस्थः कथमिव घटयेदन्तिमाध्यायसाध्यम् ॥ ३५

मानामानप्रभेदप्रभृतिविभजनादादिमे कर्मभागे
नाना वा देवतेत्याद्यनुपरिपठनान्मध्यमे देवतांशे ।
भागेऽस्मिन् भेदधर्मप्रभृतिकथनतस्सौगतादेश्च भङ्गात्
मीमांसायां त्रिकाण्ड्यां क्वचिदपि न मृषावादगन्धावकाशः॥३६

त्रय्यन्तोदन्वदन्तस्स्मृतिरियमुदिता देशिकैः कर्णधारैः
मुक्त्यर्थज्ञानपारं गमयति विशदं त्वन्यदीक्ष्यं विमुक्तौ ।
कर्तव्ये कल्पकारैः क्वचिदभिदधिरे कृत्यसन्देहभेदा-
स्तत्त्वेऽप्येवं क्वचित् स्यात् तदपि न वितथः स्वोपयुक्तांशबोधः॥

श्रुत्यन्तैकान्ततर्कक्रमगरिमगतौ तूलवच्छैलवर्ग-
स्तत्सिद्धब्रह्मबोधद्युमणिरुचितमस्स्तोमकल्पोऽन्यजल्पः ।
मोक्षोपायैकराज्ये तदितरविधयः किङ्करत्वं भजन्ते
मुक्तानन्दामृतैकोदधिपृषतकणस्पर्धिनोऽन्ये पुमर्थाः ॥ ३८

पारावर्यं विविच्य प्रथममवितथैरागमैस्तत्त्ववर्गे
संसारे तीव्रभीतिः परसमधिगमे तीव्रनिष्पन्नरागः ।
कश्चिद्विद्याविशेषं सपरिकरमधिष्ठाय शान्तान्तराय-
स्संपद्य ब्रह्म भुङ्क्ते निरुपधिकमनावृत्तिरित्थं श्रुतार्थः ॥ ३९

सासौ सासूयतत्तत्कुमतिमतसमुन्मूलनी मूलनीति-
श्रेणी निश्श्रेणिकल्पा त्रियुगपथरथारोहमूतं सुवीत ।
सन्तस्सन्तापवर्गप्रशमनपटुना तत्त्वबोधेन सन्तं
सन्तोषं ब्रह्ममूलाधिकरणचरणाध्यायसारावलिर्वः ॥ ४०

षट्पञ्चाशच्छतं चेत्यधिकरगणैर्व्यक्तसीमाविभागे
काण्डेऽस्मिन्नस्मदुक्तं कतिचिदनुविदुः क्षेपधन्यैः किमन्यैः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पश्यन्तो विश्वमेतत् त्रिगुणगुणनिकायन्त्रितस्वान्तनिघ्नं
नाथे नस्साक्षिभूते न वयमिह मुधा कुर्महे नर्मलीलाम् ॥ ४१

विश्वं द्रव्यादिभेदाद्द्विशदमभिहितं तत्त्वमुक्ताकलापे
व्यूढं शारीकस्य त्विह दृढघटितं रूपमापादचूडम् ।
तस्मादस्मच्छुताब्धेरमृतमिव समुद्वान्तमश्रान्तबद्ध-
श्रद्धैरन्योन्यहस्तप्रदमिदमुभयं धार्यमाचार्यवद्भिः ॥ ४२

इत्थं शारीरकोक्ते पथि समुपनतास्स्रग्धराश्श्रद्दधानं
पारे मायापयोधेः प्रहितमभिमुखैः सूरिभिश्शुद्धभावैः ।
ब्रह्मालङ्कारकल्पैर्बहुभिरुपनिषत्सूत्रतात्पर्यशिल्पै-
र्देवार्हत्वाय दिव्याप्सरस इव परिष्कृत्य सम्भावयन्ति ॥ ४३

प्रज्ञाधम्मिल्लमल्लीपरिमलमिलितप्राज्ञसेवासमुद्य-
च्छुद्धालोकोज्ज्वलम्मां श्रुतिपरिषदुपस्कारसौभाग्यवद्भिः ।
पद्यैरेतैस्स्वहृद्यैः प्रणवमहिमवत्पाञ्चजन्यक्रमेण
स्वाध्मातं रङ्गनाथः स्वयमिति मुखरीकृत्य सम्मोदते स्म ॥ ४४

पाराशर्यैः प्रभूतादुपनिषदमृतोदन्वतस्सारभूतं
निर्मथ्यादत्त सूत्रैरवितथनिगमाचार्यनामा मुनीन्द्रः ।
यत्तन्निष्कृष्टमित्थं यतिपतिहृदयारूढमारूढताक्ष्य-
स्तद्वक्त्रां वाजिवक्त्रः सह मम गुरुभिर्वादिहंसाम्बुवाहैः ॥ ४५

इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य
वेदान्ताचार्यस्य कृतिषु अधिकरणसारावल्यां
चतुर्थस्याध्यायस्य चतुर्थः पादः ॥ ४ ॥
श्रीमतेनिगमान्तमहागुरवे नमः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



For Private And Personal Use Only